Shri Raghunatha Temple MSS.
JAMMU

No. २६१२ (महाभारते)


Title भगवद्गीता १८ टीका युक्ता
[illegible]


Author श्री गिरधारी दास: [illegible]


Extent ४३० Age x


Subject वेदान्त शास्त्रं











द्वितीयाध्यायः॥

शांकरभाष्यं
आनंदगिरिकृतटीका
स्वामिकृता श्रीधरी
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्तकृतटीका
परमार्थप्रपाटी
वनमाली
उत्तमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद १॥

संजयउवाच तंतथाकृपयाविष्टमश्रुपूर्णाकु
लेक्षणं विषीदंतमिदंवाक्यमुवाचमधुसूदनः १

भाष्यंनास्ति

आनंदगिरिकृतटीका

अहिंसापरमोधर्मो भिक्षाशनमपीत्येवं लक्षणयाबुद्ध्यापुरस्तादेवमव्यवस्थितम
र्जुनस्य श्रुत्वा स्वपुत्राणांराज्यमप्रचलितमवधार्य स्वस्थहृ
दयं धृतराष्ट्रंदृष्ट्वातस्यदुराशामपनेष्यामीति मनीषया संजयस्तम
सुक्तवानित्याह संजयइति परमेश्वरेण सामर्थ्यमाणोपि कृत्याकृ
त्येसहसा नार्जुनः सस्मार विपर्ययप्रयुक्तस्य शोकस्य दृष्टतरमोहहे
तुत्वात्तथापि तंभगवान्नोपेक्षितवानित्याह तंतथेति तंप्रकृतं पार्थं
तथास्वजनमरणप्रसंगदर्शनेन कृपया करुणयाविष्टमधिष्ठितम
श्रुभिः पूर्णेसमाकुले चेक्षणे यस्यतंअश्रुपासनरलात्तं विषीदंतं
शोचंतमिदं वक्ष्यमाणंवाक्यं सोपपत्तिकं वचनं मधुनामानमसुरं
सूदितवानिति मधुसूदनो भगवानुक्तवान्न यथोक्तमर्जुनमुपेत्य
उक्तवानित्यर्थः १ ॥

स्वामिकृतटीका

द्वितीये शोकसंतप्तमर्जुनं ब्रह्मविद्यया प्रतिबोध्य हरिश्चक्रे स्थित
प्रज्ञस्य लक्षणं ततः किंवृत्तमित्यपेक्षायां संजयउवाच अश्रुभिः
पूर्णेआकुले ईक्षणेयस्य तंतथाउक्तप्रकारेण विषीदंतमर्जुनंप्रतिम
धुसूदन इदंवाक्यमुवाच १ ॥

तंतथेति

पिशाचभाष्यं नास्ति.

रामानुजभाष्यटीका

तंतथाइत्यारभ्य श्लोकद्वयंसंततं १ ॥२॥

एवमुपविष्टे पार्थे कुतोयमस्थाने शोकउपस्थित इत्यादिपूर्वमिमं
विषमस्थं शोकमविदुषः सेवितंपरलोकविरोधिनमकीर्तिकरमतिक्षु
द्रं हृदयदौर्बल्यकृतं परित्यज्य युद्धायोत्तिष्ठेति श्रीभगवानुवाच ॥

अभिनवगुप्तटीका

आदौलोकव्यवहारमपेक्ष्यैव श्रीभगवानर्जुनंप्रतिबोधयति क्रमात्तु
ज्ञानंकरिष्यतीत्यतः नायंजुष्टमित्याह क्लैब्यमादिभिर्निर्भर्त्सनमभिदध
दधर्मेवधर्माभिमानोद्यमिष्यादिदर्शयति १ ॥

भीष्मं द्रोणं चेत्यादिना भुञ्जीय
भोगानित्यनेन च कर्मविशेषानुसन्धानं फलविशेषानुसन्धानं च द्वयं तयोः पूर्वपदे स्तवयति नचै
तद्विद्म इत्यनेन च कर्मविशेषानुसन्धानमाह निरभिसन्धानं तावत्कर्म नोपपद्यते न च पराजयम
भिसन्धाय युद्धे प्रवर्तते जयोधिचायमनर्थ एव तदाह हत्वा गुरून् भेदमपि चर्तुं श्रेयः एतच्च नि
स्तनुभः कां विजयं कांक्षामः किं वा परराज्यभुज्यो बन्धूनां विनाशात् ॥ १ ॥

गी०
टी०
द्वि०

परमार्थप्रपाटीका

ततः किं वृत्तमित्यपेक्षायां संजय उवाच तं तथेति कृपयाविष्टं स्वजनरूपया पापं विषीदंतं विषादं प्राप्तं अत एवाश्रुपूर्णे अक्षिणी यस्य तं प्रति मधुसूदनः स्वयं दैत्यमर्दनः कृष्ण उवाच १ ॥

वनमालीटीका

ततः किं वृत्तमित्यपेक्षायां संजय उवाच तमिति अश्रुभिराकुले पूर्णे ईक्षणे यस्य तं १ ॥

कुसुमवैजयंतीटीका

देहात्मनोः कर्मणश्च स्वरूपज्ञानमुक्तं प्रथमे द्वितीये मोहशान्त्यर्थं सद्गुरुः कृष्णेन वर्णितम् एवं बंधुवधात्मकदोषदर्शनेनार्जुनस्य युद्धादुपरतिं निशम्य स्वात्मजानां स्थिरीभूतमनसोर्वेदितं राज्यं च निश्चितमात्मजानां हृष्टमनसो धृतराष्ट्रस्यात्मजानन्दजनकं ततः किं वृत्तमिति मनोरथं परिहरन् संजयस्तमकथयदिति जनमेजयमाह वैशंपायनः संजय उवाच तं तथेति तथोक्तप्रकारेण तेन स्थितं वा इति ममताजनितमोहकारणानुरागविशेषः कृपाशब्दवाच्यस्तया आविष्टं व्याप्तं अतो विषीदन्तमेते मरिष्यन्तीति चेतसीदं कथं जीविष्यामीति व्यामोहेनातिदुःखमापन्नवंतं अत एवाश्रुभिः पूर्णे आकुले वीक्षणात्मके ईक्षणे नेत्रे यस्य तं मधुसूदनमिमर्थं एवं निरतिशयस्नेहशोकाभ्यामतितरां दुःखार्णवमग्नं शूरत्वादिस्वकीयं साधारणधर्मं त्यजंतं परधर्ममाश्रयन्तमज्ञं प्रतीदं वक्ष्यमाणं वाक्यमनेकार्थगर्भकमवाच मधुसूदन इत्यनेन यः पूर्वं मध्वादिदैत्यानवधीत्स एवेदानीमर्जुनस्योपदेशतः स्वपुत्राणां जीविताशां त्यजेदिति ध्वनितम् किं तदाकामित्यपेक्षायां तदेव मधुसूदनस्य वचनमवतारयति संजयो द्वाभ्याम् १ ॥

मधुसूदनीटीका

कृपया ममैते इति व्यामोहनिमित्तः स्नेहविशेषः तयाविष्टं स्वभावसिद्धया अर्जुनस्य कर्मत्वं कृपायाश्च कर्तृत्वं वदता तस्या आगंतुकत्वं सूचितम् अतएव विषीदंतं स्नेहविषयीभूतस्वजनविच्छेदाशंकापरपर्यायः चित्तव्याकुलीभावो विषादः तं प्राप्नुवंतं तत्र विषादस्य कर्मत्वेनार्जुनस्य कर्तृत्वेन च तस्यागंतुकत्वं सूचितं अतएव कृपाविषादवशात् अश्रुभिः पूर्णे आकु-

[Margin:] मित्यनेन यथा भगवतः सर्वजनेषु स्वाभाविकी निर्हेतुकी कृपा तथा नत्वर्जुनस्यापि इति सूचितम्

[Margin:] अहिंसा परमो धर्मो भिक्षाशनं त्वेवं लक्षणाद्युद्धात् पुनर्वैमुख्यमर्जुनस्य श्रुत्वा स्वपुत्राणां राज्यमप्रचलितमवधार्य स्वस्य हृदयस्थ धृतराष्ट्रस्य हर्षनिमित्तां ततः किं वृत्तमित्याकांक्षामपनिनीषुः संजयः तं प्रत्युक्तवानित्याह वैशम्पायनः निः संजय उवाच १०

लेदर्शनादिमेवइत्युक्तेनैत्रेयस्यसत्त्वं एवमश्रुपातआकुलीभावाख्य
कार्यद्वयजनकतयापरिपोषंगताभ्यांकृपाविषादाभ्याम् विशिष्टंतमर्जु
नं इदंसोपपत्तिकंवक्ष्यमाणंवाक्यमुवाचनतूपेक्षितवान् मधुसूदन
इतिस्वयंदुष्टनिग्रहकर्त्तार्जुनंप्रत्यपितथैववक्ष्यतीतिभावः १ ॥

नयानंदीटीका

ओंपीतंवासोदधानंविजयरथगतंब्रह्मरुद्रादिवंद्यं भूमेर्भारंजिहीर्षुंनवज
लदरुचंशंखचक्राब्जहस्तं पार्थव्याजेनलोकंनिगममतस्तोयोजयंतं
महेशं ध्यायेन्नित्यंहृदयेसुजननमतिगंदंकृष्णमानंदकंदं १ लक्ष्मीपतिः
कंससखोनिपंता ब्रह्मादिलोकप्रचनंदसूनुः गोपीप्रियोगोपवपुस्स
आत्माखिलस्यकृष्णोमतिदोममास्तु २ अहिंसापरमोधर्मोमहान्दोषः
८ कुलक्षये आकांक्षामेनराज्यादावर्जुनस्येतियन्मतं ३ एतत्राष्ट्रलदा
कार्यममताभिनिवेषतः राज्यदार्थस्वपुत्राणामवधार्येतिदर्षतः
४ अभक्तस्यमनाज्ञस्यमवलोक्याहसंजयः ॥ शृणुराजन्यथावृत्तंस
माधानेनचेतसा ५ व्यामोहोयोममैतेहमेनेषामितिदुःखदः स्नेहभेदः
कृपासोक्ता तयाऽध्यासस्वरूपया ६ स्वभावसिद्धयाव्याप्तंशोचंतंतेनता
दृशविधं नद्रव्यादश्रुभिः पूर्णैर्व्याकुलेदर्शनादिमं ७ ईदृशायस्यतमो
हतुर्हित्वंचार्जुनंप्रति इदंसयुक्तिकंवाक्यंवक्ष्यमाणमुवाचह ८ नतू
पेक्षितवानीशापतीसोमधुसूदनः स्वयंदुष्टनिहंताजस्तथावक्ष्यतितं
प्रति ९ ॥ १

नीलकंठीटीका

अर्जुनेयुद्धादुपरतेमत्पुत्रानिष्कंटकंराज्यंप्राप्स्यंतीत्याशावंतंराजानंप्रति
संजयउवाच तंतथेति तमर्जुनं तथा स्वजनेदिकर्थदर्शनात्तस्वचिन्तःस्मा
ममायधेत्युक्तप्रकारेण कृपयास्वदेहेननन्देवदयापापरदुःखप्रहाणेच्छा
रूपया तस्याः परदौर्बल्यनिबंधनोत्तरभाविस्याः अर्जुनेयदिवातोजयेयु
रितिस्वपराजयमाशंकमानेदुर्मैलीतान् यानेवहत्वानजिजीविषामस्तइति
सेरूतिशयस्तत्वकवाक्यशेषविरोधाच्च आविष्टंव्याप्तं विषीदंतं सी
सीदंति ममगात्राणीत्यादिनाउक्तरूपं विषादंप्राप्नुवंतं इदंवक्ष्यमाणंवा॰

कंचवचनीयंउवाच मधुसूदनइतिदुष्टंहंतव्यादेवार्जुनेनेति मितीकृमतव
तत्रानपिहन्तिष्यतेवेतित्वयाजयाशानकार्येतिभावः २ ॥

प्रानंदी टीका

एकं समस्तमहसां तमसां विनाशे विश्वावभासनविधौ च पदार्थ-
सारे ऽप्यैश्वर्यमीश्वरमनश्वरमात्मतंत्रम् तं मयि स्फुरतु वाङ्मयदैवतं
तत् ॥ अथैतस्मिन्निःश्रेयसप्रकरणे गीताशास्त्रे उद्देशपर्वणि सर्व-
प्रकरणार्थबीजभूते द्वितीयाध्याये प्रथमाध्यायोक्तप्रकारात्समा-
सन्नमरणं बंधुवर्गमवेक्ष्य देहाहंभावनया विभावशोकमोहसं-
कटोत्कटया करुणया स्वधर्मत्यागे निश्चितमर्जुनं श्रीभगवान्
स्वधर्मसध्रीचीनस्य ज्ञानस्य श्रेयःसाधनतोपदेशेन योजयितुमि-
च्छतीति धृतराष्ट्रं प्रतिबोधयन्संजय उवाच तथा शोकप्रकारेण
कृपयाविष्टं विशोच्यैवस्पृष्टहीनांतःकरणमन्तःप्रववाष्पपरितेक्षणं
सीदमानं तमर्जुनं शोकमोहापनोदायेदमनुत्पन्नबोधत्वात्ताव-
ल्लौकिकहेतुनैव वक्ष्यमाणं वाक्यं मधुसूदनः ॥ १ ॥

रामकंठी टी॰

अथैवं व्यामोहवशाद्विसंस्थुलमर्जुनं प्रति संजातानुजिघृक्षस्य भ-
गवतः परमार्थोपदेशप्रक्रममपिशुनानि वाक्यानि उपक्षिपन्संज-
य उवाच तमथेति ॥ १ ॥

लासिकी टीका

तमर्जुनं कृपयाव्याप्तं अश्रुणा पूर्णे व्याकुले दर्शनात्तमे चेक्षणे
यस्य तं तथोक्तप्रकारेण वक्ष्यमाणं वाक्यं श्रीकृष्ण उवाच १ ॥

णवीरसमिद्धोयिनी ।।
कार्तवीर्यार्जुनायनमः भिक्षाशनमेवायर्म्मया कुरुवधादि
पर्यवसायिनो युद्धाद्वरमित्येवलक्षणया मनीषया संग्रामविमुख
मर्जुनं न्यस्तशस्त्रं निशम्य स्वात्मजानामैश्वर्यमव्यभिचारि निश्चित्य
हर्षविकसितकपोलस्य धृतराष्ट्रस्याकूतिं विलोक्य तन्मनोराज्यमप
निनीषुः संजयस्तं प्रत्यूचिवानित्याह वैशंपायनः संजय उवाचेति
।। यद्यपि विधेयाविधेये हृषीकेशेन भगवता स्मारितोऽप्यर्जुनो
दृढतरमोहदहनशोकाविष्टतया तत्कालं न स्वीकृतवांस्तथापि त
नोपेक्षितवानित्याह तमिति तं प्रकृतमर्जुनं तथा बंधुजनव
धप्रसंगदर्शनेन कृपया करुणयाविष्टमधिष्ठितमश्रुपूर्णाकु
लेक्षणमश्रुव्याप्ततरलनेत्रं विषीदंतं शोचंतमिदं वक्ष्यमाणं वा
क्यं सोपपत्तिकं वचनं मधुसूदन उवाचेति संबंधः मधुसूदन इति
विशेषणं च यथासमर्गादेवस्मताः प्रवृत्तिनिरोधकं मधुं नाशितवां
स्तथैवार्जुनं प्रत्यपि शुद्धरूपमेवोपदेक्ष्यतीति धृतराष्ट्रं प्रतिबोध
नाभिप्रायकं ।। १ ।।

रामचंद्रसरस्वतीकृतटीका

तदेवंप्रथमाध्यायेनचश्रेयोनपश्यामीत्यत्ररणेहतस्यपरिव्राट्
समत्वयोगक्षेमत्वोक्तेर्यथाश्रेयोमोक्षाख्यमन्यत्श्रेयोन्यदुत।
वाश्रेयइतिश्रुतिसिद्धमुक्तं नैवहंतव्यैरित्याशयेवदतोर्जुनस्य।
मुमुक्षुत्वप्रतीते नकांक्षेविजयंकृष्णेत्यादिवदतश्चैहिकफलवि
रागप्रतीते नरकेनियतंवासइत्यादिवदतश्चदेहातिरिक्तात्मवि
वेकप्रतीतेःकिंनोराज्येनगोविन्देत्यत्रआख्यानवर्त्मनाशमप्र।
तीतेः किंभोगैर्दमप्रतीतेः यद्यप्येतेनपश्यंतिइत्यत्रस्वस्यभो।
गाभावप्रतीतेस्तन्मेक्षेमकरमिति तितिक्षाप्रतीतेरथीरत्वे
ब्रह्मज्ञानेप्रतीते यद्यपि तथापिविधिवदुपसत्यभावान्मोक्ष
तात्विकस्वरूपाज्ञानाल्लिंगातिरिक्तज्ञानाभावादतदुपदर्शि
नस्सर्वकंसोपकारकज्ञानोपदेशायद्वितीयोध्यायप्रारभते ॥
यथाचैतदस्मिन्नध्यायेनप्रतिपाद्यते तथा तत्तत्स्थलेप्रदर्श
यिष्यामः तथाकिंवृत्तमित्यपेक्षायां संजयउवाच तंतथे
ति स्वयंदुष्टनिग्रहकर्ता अर्जुनंप्रत्यवितथैववक्ष्यतीतिभा
वः स्पष्टमन्यत् ॥ १ ॥

भाषा अनुवाद

अहिंसा परम धर्म है इससे भिक्षाकरि निर्वाह करना उचित है संजयके मुखसे ऐसी बातें अर्जुन की सुनि और युद्धसे विमुख जानि अपने पुत्रोंका अचल राज्य मानि मनप्रसन्न स्वस्थहृदय धृतराष्ट्रको देखि फेरि संजय धृतराष्ट्र की उस दुष्ट आशा को दूर करते यह वचन बोलि कि हे राजन् इस प्रकार कृपायुक्त अश्रुधारा पूर्ण लोचन विषाद करते हुये अर्जुनसे दुखमोचन श्रीभगवान ब्रह्मविद्या जो ज्ञान तिससे प्रबोध करत यह वचन कहते भये १ ॥

दोहा ॥ संजयवाक्य ॥

कृपायुक्त कौंतेसें नेदिं अश्रुपूर्ण विकलनैन पीडतको
मधुसूदनकहित भय यह बैन १ ॥

श्रीभगवानुवाच कुतस्त्वा कश्मलमिदं विषमे स
मुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन २

भाष्यं नास्ति

आनन्दगिरिकृतटीका

किमुक्तवानित्यपेक्षायामाह श्रीभगवानुवाच कुतोहेतोस्त्वां सर्व
क्षत्रियप्रवरं कश्मलं मलिनं शिष्टगर्हितं युद्धात् पराङ्मुखत्वं विषमे
सभयस्थाने समुपस्थितं प्राप्तमनार्यैः शास्त्रार्थमविद्भिः जुष्टं सेवितमस्व
र्ग्यं स्वर्गविरुद्धं प्रत्यवायकारणमिह चाकीर्तिकरमयशस्करमर्जुनेति नाम्ना प्र
ख्यातस्य तवैतन्न युक्तमित्यर्थः २॥

स्वामिकृतटीका

तदेव वाक्यमाह श्रीभगवान् कुत इति कुतो हेतोः त्वा त्वां विषमे संक
टे संग्रामे इदं कश्मलं उपस्थितं अयं मोहः प्राप्तः यतः आर्यैरसेवितमस्व
र्ग्यमधर्म्यम[illegible] यशस्करं च २॥

पैशाचभाष्यम् नास्ति

रा

रामानुजभाष्यं [illegible] नास्ति

एवमवस्थिते पार्थे कुतोयम[illegible] विषमे
[illegible] विहतोयं परलोक[illegible]मकीर्तिक[illegible]
[illegible]निषेधेति २॥

अभिनवगुप्तटीका २॥ नास्ति

परमार्थप्रपाटीका

कुत इति विषमे संग्रामसंकटे त्वा त्वामिदं कश्मलमज्ञानं कुतो हेतोः स
मुपस्थितं प्राप्तं अस्य तत्स्वरूपमाह अनार्यजुष्टं न आर्याः अनार्याः तैर्जुष्टं
सेवितं आर्यैरसेवितं एतद्विषयमज्ञानकश्मलमिति ज्ञात्वा त्याज्यमि
त्यर्थः यत इह अमुत्र च गर्हितं तत्कथमित्याह अकीर्तिकरं अस्वर्ग्यं चेति २

वनमालीटीका

हे अर्जुन कुतो हेतोस्त्वा त्वामिदं कश्मलं विषये युद्धसमये समुपस्थितं प्रा
प्तं यतो नार्यैरविद्वद्भिः सेवितमतोऽस्वर्ग्यमत एवाकीर्तिकरम् २॥

कृष्णवैजयंतीटीका

१ + किं तद्वाक्यमित्यपेक्षायां तदेव मधुसूदनस्य वचनमवतारयति संजयो द्वाभ्याम्

गी॰ टी॰

द्वि॰

6

४ ऐहिकामुष्मिकभोगेच्छावद्भिः सर्वैरेव तत्साधनमेव तत्रापि मन्निमित्तस्य तव त्वीदृशाचरणं महदयोग्यमिति द्विविधमप्ययोग्यत्वं सूचयितुं [illegible] अर्जुनेति सम्बोधनेन स्वरूपतः [illegible] रजोयोऽपि शंकरस्त्वया जितो युद्धेऽपि लेऽकृतो गतमिति सूचितम्

+ श्रीभगवानुवाच कुतस्त्वेति निरतिशयशोकमोहाकुलितातिशिथिलसर्वांगरोमांचनकम्पाश्रुपातादिरूपमिदं कश्मलं मलिनं विषमे युद्धस्थाने आनार्यैः कुपुरुषैर्जुष्टं सेवितं अस्वर्ग्यं स्वर्गप्राप्त्युपायभूतस्वधर्मविरोधित्वेन स्वर्लोकाप्राप्तिकरं अकीर्तिकरं अयशस्करं ॥ २ ॥

मधुसूदनीटीका

१ इदं स्वधर्मात्पराङ्मुखत्वं कृपाव्यामोहाश्रुपातादिपुरःसरं कश्मलं शिष्टगर्हितत्वेन मलिनं विषमे सभये स्थाने त्वा त्वां सर्वक्षत्रियप्रवरं कुतो हेतोः समुपस्थितं प्राप्तं किं मोक्षेच्छातः किं वा स्वर्गेच्छातः अथवा कीर्तीच्छातः इति किंशब्देनाक्षिप्यते हेतुत्रयमपि निषेधति त्रिभिर्विशेषणैः क्रमेण यतोऽनार्यैर्मुमुक्षुभिर्न जुष्टमसेवितं स्वधर्मेणाशयशुद्धिद्वारा मोक्षमिच्छद्भिरपक्वकषायैर्मुमुक्षुभिः कथं स्वधर्मस्त्याज्य इत्यर्थः संन्यासाधिकारी तु पक्वकषायो ग्रेवक्ष्यते अस्वर्ग्यं स्वर्गहेतुधर्मविरोधित्वात् न स्वर्गेच्छयासेव्यम् अकीर्तिकरं कीर्त्यभावकरमपकीर्तिकरं वा न कीर्तीच्छया सेव्यं तथा च मोक्षकामैः स्वर्गकामैः कीर्तिकामैश्च वर्जनीयं तत् कामयवत्त्वमेवमहरमहो अनुचितं चेष्टितं तवेति भावः २ ॥

सदानंदीटीका

तदेव संजयोवाक्यमवतारयति स्फुटं समग्रैश्वर्यसम्पन्न उवाच भगवानिति १ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा २ नित्यमप्रतिबंधेन वर्तते यत्र षड्विधं समग्रैश्वर्यमखिलं तद्भगाख्यं भगवानिति ३ शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तते श्रीकृष्णो भगवच्छब्दः सर्वकारणकारणे ४ अन्यत्र भगवच्छब्द उपचारेण वर्तते उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं ५ वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ६ भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः इदं स्वधर्मात् व्यामोहैकनिबंधनं ७ शिष्टैर्विगर्हितत्वाच्च मलिनं कुतआगतं संग्रामे क्षत्रियश्रेष्ठ त्वां विमर्शपवकारिणं ८ मोक्षेच्छातोऽथवा स्वर्गकामतो वा किमागतं किं कीर्तिकामतो वा त्वां किंशब्देनेति सूचितम् ९ त्रिभिर्विशेषणैरेतं त्रिविधं निरस्यति अनार्यैर्मुमुक्षुभिर्नैतत्सेवितं शुद्धिमिच्छुभिः १० यतः स्वधर्मत्यागेन वित

तदेव भगवतो वाक्यमवतारयति श्रीभगवानुवाच ऐश्वर्यस्य समग्रधर्मस्य यशसः श्रियः वैराग्यस्य मोक्षस्य षण्णां भग इतीगना ग्रस्येति प्रन्येवं सम्बन्धः मोक्षमिति तत्साधनस्य ज्ञानस्येंगना संपत्ताद् एषां समग्रमैश्वर्यादिकं नित्यमप्रतिबंधेन यत्र वर्तते स भगवान् यद्योगेन मनुष्य तयोरन्यत्रिच विना भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति अत्र नाभिनि प्रत्येकं संबध्यते उत्पत्तिनाशाद्यं नरक रामाद्युपल ते प्राणिनां गती आगामिन्यौ संपदो यतः तादृशो भगवच्छब्दार्थः श्रीवासुदेव एव पर्यवसितः इति तथोक्तम्

४०

तस्य शुद्धिर्न जायते न वा स्वर्गो ह्यथासेव्यं स्वर्गादेन विरोधतः ११ स्वधर्मत्यागि
नां स्वर्गः स्वप्नेप्यस्ति न तु दुर्लभः न वा कीर्तिर्ह्यथासेव्यं कीर्तिनाशकरं यतः
१२ तस्मात्स्वधर्म एवेमं त्वं वर्जनीयं शुभेप्सुभिः मोक्षकीर्तिफलेप्सुस्त्वं कि
मद्दोषमेवसेमलम् १३ ॥ २

नीलकंठी टीका

अर्जुनमनुयोजयन् श्रीभगवानुवाच कुतस्त्वेति कश्मलं वैक्लव्यं विषमेसु
हसंकटे अनार्यैर्मोहाभिर्जुष्टं सेवितं न त्वादृशैः शूरैः न आर्यैर्जुष्टमिति
वा यत्न आर्यैर्जुष्टमिति वा यत्न आर्यैर्जुष्टमिति विग्रहो दर्शित स्तत् द्वैधेऽपि
पिपदस्य तत्क्रम दोषाद्रुपेक्षं अत एवास्वर्ग्यमकीर्तिकरं च हे अर्जुन स्वच्छ
स्वभाव तव नैतद्युक्तमिति भावः २ ॥

आनंदी टीका

हे अर्जुन इदं कश्मलं स्वधर्मत्यागेन मोहरूपं पापं विषमे युद्धोद्योग समये एतद्युद्धोद्योगात्मके संकटे काले देशे च त्वा विमर्शकं कुतः समुपस्थितं किमत्र कारणं न जानामीत्यर्थः कश्मलं कीदृशमनार्यजुष्टं आर्यैः शिष्टैः स्वामिभिश्च न सेवितम् अत एवास्वर्ग्यमकीर्तिकरं च भयलोकविरुद्धमित्यर्थः २ ॥

तवं

रामकंठी टीका

इदमेवं विधप्रस्तुतावश्यकरणीयस्वकर्माकरणावसादकारणं व्यामोहात्मकं कश्मलं पापं त्वां भवन्तं कुतः कस्मान्निमित्ताद्विषमे संकटे उपस्थितमागतं हे अर्जुन कीदृशं कश्मलमनार्यजुष्टमशिष्टसेवितमत एवास्वर्ग्यं स्वर्गप्राप्तिप्रतिकूलमकीर्तिकरमपवादसंपादकं इति पदसंगतिः स्फुटैव अर्थविशेषस्त्वित्थं गंभीरीकृत्य भगवानेतदाह अर्जुनेति शोभनमन्त्रिमार्गसंबोधनार्थः किं च तत्कृतमहत्कृपाभिजनमहत्तापराक्रमादिगुणगरिमप्रत्यायनार्थः तच्च ह्येऽपि परमार्थतो मोहादिमलविविक्तस्वभावस्यात्मनः प्रत्यायकत्वेनाप्युक्तः [illegible] तेन वस्तुतोऽर्थे तवैतस्यानेन व्यामोहकलंकेन संबन्धः प्रकाशस्य तमसेवात्यन्तमसंभाव्य इति कुतस्त्वामिदमुपस्थितमेतेनैव वाक्येन गंभीरीकृते अत एव चैतत्पापमनार्यैरतत्त्वविद्भिरसाधुभिः सेवितम् इत्याद्युक्तं [illegible] २ ॥

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा । एवमैश्वर्यादिर्यस्य नित्ययोगेन विद्यते स भगवान् श्रीकृष्ण उवाच ॥

लासिकी टी॰

हे अर्जुन मुक्तिध्वंसनः स्वर्गध्वंसनः कीर्तिध्वंसनो वा स्वधर्मपराङ्मुखं त्वामुपपन्नं संकटे संग्रामे यत आर्यैः साधुभिर्मुमुक्षुभिः स्वकुलज्येष्ठैः पूर्वपितामहादिभिर्वा न सेवितम् २ ॥

रणवीरसंसिद्धोधिनी ॥

तदेव वाक्यमवतारयति श्रीभगवानुवाचेति ऐश्वर्यस्य समग्रस्य
धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग इतीगनेति
परिभाषितः संपूर्णधर्माचरणादिरूपः षड्विधो भगो नित्यमस्या
स्तीति भगवानिति नित्ययोगे मतुप् उवाच वक्ष्यमाणमिति शेषः
॥ तदेवोदाहरति कुतस्त्वेत्यादिना हे इदं स्वधर्मपराङ्मुखत्वतापाद
कमस्त्रुपातादिरूपं कश्मलं मोहः मूर्छाविक्लवकश्मलं मोह इत्यमरः
विषये समये स्थाने त्वा त्वां समवेत्तद्विय प्रवरमर्ज्जनं कुतो हेतोः समु
पस्थितं आर्य्यैः श्रेष्ठैनाभियथाविश्रुतस्यतवैनेन युक्तमिति भावः
नतु शिष्टसंप्रदायैर्हि कामुकिकत्वानिमहतिनितिहुत्योः सामा
न्येन प्रयोजकानि लोके दृष्टानीति तन्नत्वे कथमबोचित्यमित्य
यैति ॥ २ ॥ २ नतदन्यतमस्याप्यभावमप्रदर्शयन्नाह अना

किमुवाचेत्यत आह्न

कुतइति त्वां त्वां कश्मलं स्वधर्मपरित्यागलक्षणं विषं विषवत्परि णा मवि
रसं वासुदेवमयि समीपस्थे कुत इति मोक्षद्वारतो वा स्वर्गद्वारतो वा की
र्तिद्वारतो वा समुपस्थितं प्राप्तमिति भावः प्रथमं निषेधति अनार्येति
आर्यैर्मुमुक्षुभिरसेवितं स्वधर्मैराशयशुद्धिद्वारामोक्षमिच्छंतः कथं स्व
धर्मं त्यजंतीति भावः अथवा अनार्याः केवलंकलत्रादिभरणमात्रलो
र्जुष्टं स्वधर्मत्यागं कथं मुमुक्षुः कुर्यादिति भावः न द्वितीय मित्याह
स्वर्ग्यमिति स्ववर्णाश्रमप्रयुक्तान् धर्मान्त्यजन्कामेष्ट्योतिशे
गादिभिरपि स्वर्गं प्राप्नोतीत्युक्तः स्वधर्मस्य कामेष्वनधिकारादितिभा
वः यद्वा स्वर्ग्यं नरकप्राप्तिहेतुं कथं स्वर्गकामः कुर्यादिति भावः
न तृतीय इत्याह अकीर्तिभावकरं अयशः संपादकं चेत्यर्थः विषमे सं
र्वं कटे इति संप्रदायादेवापादे ननु किंवाहं कुर्यां बंधुजनमवेक्ष्य मेध
नुर्धारणेपि शक्तिः न प्रभवतीत्याह २ ॥

भाषा अनुवाद १

अर्जुन को कातर देखि यह वचन श्रीकृष्ण बोले कि हे अर्जुन ऐसे असमय मे लड़ाई के बीच मूरख कायर शास्त्र हीन मनुष्यों के योग्य जो लोक मे अयश करने वाला है और अस्वर्ग्य जिससे स्वर्ग जाय और नरक मिलै ऐसा कश्मल कहे मोह अर्जुन इस नातेसे भूतल प्रसिद्ध वीर मैं तुम ऐसे को आय कर प्राप्त हुआ यह बड़ाही आचरज है २॥

दोहा

कैसे तो को मोह यह विषम स्थान भयो आप त्यागित यश दूर
स्वर्ग दूर हे अर्जुन प्रगटाय २॥

10

क्लैब्यं मास्मगमः पार्थ नैतत्त्वय्युपपद्यते क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ३ ॥

भाष्यं नास्ति आनन्दगिरीकृतटीका

पुनरपि भगवानर्जुनं प्रत्याह क्लैब्यमिति क्लैब्यं क्लीबभावमधैर्यं मास्मगमः मागाः हे पार्थ पृथातनय यन्दितपि महेश्वरेणापि कृताहवे प्रख्यातयो रूथे मन्मामद्दिमत्येतदुपपद्यते क्षुद्रं तुच्छत्वकारण हृदयदौर्बल्यं मनसो दुर्बलत्वमधैर्यं त्यक्त्वोत्तिष्ठ युद्धायोपक्रमं कुरु हे परंतप परं शत्रुं तापयतीति तथा संबोध्यते ३ ॥

स्वामिकृतटीका

तस्मात् क्लैब्यमिति हे पार्थ क्लैब्यं कातर्यं मास्मगमः न प्राप्नुहि यतस्त्वयि तत्रोपपद्यते योग्यं न भवति क्षुद्रं तुच्छं हृदयदौर्बल्यं कातर्यं त्यक्त्वा युद्धाय उत्तिष्ठ हे परंतप शत्रुतापन नाहं कातरत्वेन युद्धादुपरतोस्मि किंतु बन्धु माध्यत्वादिति ३ ॥

पिशाचभाष्यं नास्ति

रामानुजभाष्यंटीका नास्ति

उत्तिष्ठ पार्थः स्नेहकरुणापर्यायाकुलोभगवदुक्तं ... तिष्ठ ३ ॥

अभिनवगुप्तकृतटीका ३ नास्ति

परमार्थप्रपाटीका

तस्मात्किंकर्तव्यमितिभगवानाह क्लैब्यमिति भो पार्थ त्वं क्लैब्यं पुमर्थविधुरत्वं पदिमामप्रतीकारमशस्त्रं शस्त्रपाणय इत्यादिवाक्यप्रकाशितं मास्मगमः न प्राप्नुहि यतएतत्त्वयि गांडीवधन्वनि नयुज्यते तर्हि किंकर्तव्यमिति चेत्तत्राह क्षुद्रमिति भो परंतप शत्रुतापन क्षुद्रमल्पविचाररूपं हृदयदौर्बल्यं संकल्पितममतोत्पन्नशोकरूपं त्यक्त्वा युद्धायोत्तिष्ठ ३ ॥

वनमालीटीका

हे पार्थ क्लैब्यं कातर्यं मास्मगमः न प्राप्नुहि यतस्त्वय्येतत्रोपपद्यते न संभवते क्षुद्रं तुच्छं हृदयदौर्बल्यं त्यक्त्वा युद्धायोत्तिष्ठ परंतप शत्रुतापन समर्थो ३ ॥

१ नारायणस्य मम पितृत्वात्

कुम्भवैजयन्तीटीका

पुनरर्जुनस्यामर्षमुत्पादयन्नोषगर्भकं वाक्यमाह क्लैब्यमिति हे पार्थ पृथा-
या तपसा लब्धो नरावतारस्त्वं क्लैब्यं षण्ढत्वं शौर्यवीर्यधैर्यतेजोबलदत्ता-
दिरूपं त्वं मागमः मा गाः यत एतत्त्वय्यप्रतिसंक्रुद्धवीरशिरोमणौ त्वयि पतन्नो-
पपद्यते न घटते अतो हे तात क्षुद्रं तुच्छजनसेवितं तुच्छरूपस्याधैर्याद्देहत्याद-
कं वा हृदयदौर्बल्यं मनोमात्रदुर्बलतां न पुनरस्य संग्रामसामग्रीकृतां त्यक्त्वा
विचारेणापनीय त्वमुत्तिष्ठ युद्धाय युद्धयत्नपरो भव शत्रुतापन वीर्यस्य
तवैतन्महत्त्वनुचितमिति संबोधनकथनाभिप्रायः ३ ॥

सेनाचेदणज्ञानेनाधैर्येण धनुरपि धारयितुमशक्नुवताम

मधुसूदनीटीका यदि किं तु शक्यमित्यत आह

क्लैब्यं क्लीवभावमधैर्यमोजस्तेजआदिभंगरूपं मास्मगमः मा गाः हे पार्थ
पृथातनय पृथया देवप्रसादेन लब्धे तनय मातृवीर्यातिशयस्य प्रसिद्धत्वा-
त् पृथातनयत्वेन त्वं क्लैब्यायोग्य इत्यर्थः [illegible]
अर्जुनत्वेनापि तदयोग्यतामाह नैतदिति त्वय्यर्जुने साक्षात् महेश्वरेण
पि सह कृताहवप्रख्यातमहाप्रभावेनोपपद्यते नोपयुज्यते न पतेत्
समाधानेन तदयोग्यत्वनिर्देशः ननु न च शक्नोम्यवस्थातुं भ्रमतीव च
मे मन इति पूर्वमेवोक्तमित्याशंक्याह क्षुद्रमिति हृदयदौर्बल्यं मनसो
भ्रमणादिरूपमधैर्यं क्षुद्रत्वकारणत्वात् त्यक्त्वा निरसनं वाप्यकावि
वेकेनापनीयोत्तिष्ठ युद्धाय सज्जो भव हे परंतप परं शत्रुं तापयतीति
संबोधयते हेतुगर्भम् ३ ॥

सदानंदीटीका

ननु त्वं कथं धैर्यो स्मि न यतो धीरो नेत्यम
दुःसहं १ अनाशंक्याह मा गाः क्लैब्यं धैर्यं तेजो मत्वा परं स्वजनानेव तत्त्वेनैव बन्धुहंचाति
व्यसनं वीर्यं च वरः २ साक्षान्महेश्वरेणापि कृतयुद्धे अर्जुने त्वयि हेवमा सामर्थ्ययाल
वेकातर्ध्ये नैवेतत्पद्यते मलं ३ तदहंता देतत्कं धुहे शौर्यं धैर्यस्य विवेकतः
तत्काद्युद्धाय शीघ्रं त्वं सज्जीभव रणादिति ४ यतस्त्वं शत्रुसंतापकारी शूरः
रतमो मतः ५ ३ ॥

नीलकंठीटीका

तद्देवाह क्लैब्यमिति क्लैब्यं निर्वीर्यत्वं नचशक्तोऽस्म्यवस्थातुमित्युक्तरूपं मा गमः नैतत् त्वयि महादेवप्रतिभटे युक्तं अतः क्षुद्रं तुच्छं हृदयकृतमेवत। वदौर्बल्यं नतुशक्तिसहायाद्यभावकृतं तत्यक्त्वा उत्तिष्ठ युद्धाय परंतप शत्रुतापन ३ ॥

रामचंद्रसरस्वतीकृतटीका

12

आनंदी टीका

हे कौंतेय निःसंबन्धकथनात्म अविश्वासयोगाविष्करणं क्लैब्यं कातरत्वं मागमः त्वयि नैतत्त्वद्विधैः कर्मभिः प्रख्यातपौरुषपत त्क्लैब्यं नोपपद्यते हे परंतप इति प्रोत्साहनार्थम् क्षुद्रमसारम् हृदयदौर्बल्यं हित्वा हृत्कृत्वा हृदयविक्लवता करुणात्मकां उत्तिष्ठ रथोपस्थादुत्थाय युद्धार्थं सज्जीभव ३ ॥

रामकंठी टीका

हे परंतप शत्रुजननत्रवरंजनक क्लैब्यं कापुरुषत्वं मा गाः यतस्त्व यि जगद्विख्यातविक्रमादिगुणमहिम्नि नैतद्वैविध्यमल्पसत्त्व सत्वजनोचितमुपपद्यते तस्मात्क्षुद्रमसारं हृदयदौर्बल्यमा श्रयकार्पण्यं विहायोत्तिष्ठ युद्धे तेनाश्चर्यसंग्रामकर्मण्युद्यमस्थ हीष्व अथापि त्वच्छूद्रस्य दौर्बल्यं गंभीकार्येण योगोऽमंत वः क्लैब्यशाब्दस्य च विवेकशून्यत्वगंभीकारेणात्युंदृपि विशे षणमेवं योजनीयमिति ३ ॥

व्रक्रमे शिथिलयि नाहृ + हृ

कात्यर्थमसाधव [illegible] टीका नासिकी टीका

वक्ष्यमाणयोपपत्त्या तस्मादियमेवत्याह क्लैब्यमिति हे पा र्थ कातर्येण या त्वद्विधवीरवरे योग्येन भवति त्वं अकातर्यमुद्धा यसंन्नोभव ३ ॥

त्वंत

यतावीरसमिद्धायिनी॥
नत्ववांधववधवेद्यरणात्तेनार्थे धैरणपत्तरथियारथिनमयाकुव
ता मया किंकर्तव्यमित्यत आह क्लैव्यमिति क्लैव्यंमाउभोवो
वितंयेयाभावमोजस्तनश्चादिमंगतूपमास्मगमः मागाः पार्थ
इयातनयेतिस्ववोधनेन ॐत्या देवप्रसादलब्धे व्यकस्मिन्नेव
तनयेवीयातिमाउस्यप्रतिडु त्वात्क्लैव्यायोग्योसीतिधुनिते अर्जु
न नाम्नानव नस्योग्यत्वमित्याह नैतदिति त्वयिमद्दवरणावि
कृतादवेविश्रुतपौरुषेमहामहिस्यजुनेयतत्क्लैव्यंनोपपद्यते
नशुस्यतेइति त्वइन्वइतापादकेसपाकानिरसनंच हृदयस्यम
नसोदौर्बल्यंभ्रमतूपंतत्त्यगारणोयादकवद्वपंचत्यक्त्वोत्तिश्रु
हृयोपक्रमस्व पतेन नचमाक्रोम्यवस्याद्वमित्यर्जुनोक्रमपास्त
परंतपेत्यनेनुद्धासरणानामेवहृदयतयाविख्यानानांप्राकृसंता
पकानां त्वयियादृशामितिधुनिते २॥

रामचंद्रसरस्वतीकृतटीका

क्लैब्यमिति क्लैब्यं ओजस्तेजआदिभंगं पार्थ तु चितं मा गाः एतत्त्वयि महा
वीरेऽनि तप्रभावेनोपपद्यत इत्यर्थः ननु स्वमतीव च मे मन इति पूर्वमेवम
योक्तमित्याशंक्याह क्षुद्रमिति हृदयदौर्बल्यं चेतः कातरादित्वं क्षुद्रत्वं सत
मित्यक्त्वा उत्तिष्ठ युद्धाय सज्जो भव परंतपेति हेतुगर्भं ननु न कारणांतरेण
स्वधर्मत्यागोयं किं त्वधर्मत्वाभावाद्धर्मत्वाद्धाऽस्य युद्धस्य त्यागइत्याहा
र्जुनः ३ ॥

14

भाषा अनुवाद

फेरभी भगवान अर्जुनसे कहतेहैं कि हे परन्त शत्रु संहार करने
वाले अर्जुन हे कौंतेय कुंतीपुत्र वीरभाव छोड इस क्लीव कहे नपु
सकके भावको नगही यह तुमारे योग्य नहीं है इस आचरनमें
तुमारी शोभा जगतमें कुछ नहीं इससे इस क्षुद्र कहे तुच्छ
हृदय की दुर्बलता कहे कादर पनको छोडकर उठो और
धीरज धरि संमें के अनुसार कार्य करो कुंतीपुत्र संबोधनसे (
जनाया कि मातृस्वभाव कन्याको होता पुत्रको पितृस्वभावही
उचितहै और परंतप से सोचाया कि उठकर शत्रुवोंको मार
लो तुम अनेकवार संग्राममें जय पायेहो ३ ॥

दोहा ॥

क्लीवभावं न हि प्राप्तहो पार्थ योग न तो मे पर क्षुद्रहृदय।
दुर्बल्यको स्थित अर्जुन तज कोद ३ ॥

अर्जुनउवाच कथंभीष्ममहंसंख्येद्रोणंचमधुसू
दन इषुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन ४

आनंदगिरिकृतटी॰

एवंभगवता प्रतिबोध्यमानेऽपि शोकाभिभूतत्वात् प्रतिबुध्यमानःसन्नर्जुनः
स्वाभिप्रायमेव प्रकटंभगवन्तंप्रत्युक्तवान् कथमित्यादिना भीष्मंपितामह
ं द्रोणंचाचार्यंसंख्येरणे हेमधुसूदन इषुभिःयत्रवाचापियोत्स्यामीति
वक्तुमनुचितं तत्रकथंबाणैर्योत्स्य इतिभावः सायकैस्तैःकथंप्रतियोत्स्या
मि प्रतियोत्स्येतौहि पूजार्हौ कुसुमादिभिरर्चनयोग्यौ हेअरिसूदनसर्वा
नेवारीन् यत्त्वंनहतवानितिभगवानेवंसंबोध्यते ४ ॥

स्वामिकृतटीका

नाहंकातर्येनयुद्धादुपरतोऽस्मि किंतुयुद्धस्यान्याय्यत्वात् अर्जुनउवाच क
थंभीष्मइति भीष्मद्रोणौपूजार्हौपूजायामर्हौपूजायोग्यौतौप्रतिकथमहं
योत्स्यामि तत्रापिइषुभिःयत्रवाचापियोत्स्यामि इतिवक्तुमनुचितं तत्र
बाणैःकथंयोत्स्यामीत्यर्थः हेअरिसूदन शत्रुसूदन ४

पिशाचभाष्यं ... ४ ॥

रामानुजभाष्य

पुनरपिपार्थःस्नेहकारुण्यधर्माधर्मभयाकुलोभगवदुक्तंहितमजानन्निद
मुवाच भीष्मद्रोणादिकान्बहुमन्तव्यान्गुरून्कथमहंहनिष्यामि कथं
तैर्भोगेष्वतिमात्रसक्तास्तुहत्वातैर्भुज्यमानांस्तानेवभोगांस्तद्रुधिरेणो
पसिच्यतेष्वासनेषूपविश्यभुंजीयतेष्वासक्ताभवेम इति ४ ॥

अभिनवगुप्तकृतटी॰ ४॥

परमार्थप्रपाटी॰ ॥

अथास्तांधात्र्त्राष्ट्रादिवधशंकावकाशः श्रुतिगर्हितस्यब्रह्मवधस्यका
गतिरित्याशयेनार्जुनः आहकथमिति भोमधुसूदनकेवलंदैत्यनिर्व॰
हणअहंसंख्येसंग्रामेभीष्मंद्रोणंच इषुभिर्बाणैःकथंप्रतियोत्स्यामिप्र
तिपक्षत्वेनकथंयुद्धंकरिष्यामि यतस्तौपूजार्हौ आचार्यत्वेनब्रह्मण्यत्वेनब्रा
ह्मणमान्यत्वेनावस्थितौ अथाध्यीशानतपस्वीश्रुतिरपि नस्मायप्रयापिराजा
परमतांगच्छति ब्रह्मवादततउपनिश्रयानेसोयानीयउपनेहिनातितान्स
योनिंगच्छतिसपापीयान्भवति यथाश्रेयांसंहिंसित्वेति एवंश्रुतौतत्रप

गी॰ टी॰ हिं॰

16

तस्य शोच्यतानौचित्यादिना राजानां क्षत्रियः यद्यपि परमतां गच्छति राजहत्यादिनो
त्कृष्टो भवति तथा स्वधर्माचरणेनाततत्त्ववसाने च श्रेयः ब्राह्मणत्वमेव उपनि
श्रयति श्रयं त प्राप्नोति एवं मति ३ इति विचार्य यः क्षत्रियः स्वां योनिं ब्राह्मणं वध्या
नेपनं ब्राह्मणं हि नास्ति चानयति स कां योनिं पितरं गच्छति हिनस्ति ब्रह्म एव
स पापीयान्भवति किंवत् यथा श्रेयांसं महानुभावं हिंसित्वा अथ तैत्तिरीय
केपि यावन्तो वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेद
विद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदिति भाष्यं दिवे दिवे प्रतिदिवसं न
मस्कुर्यात् पुरतः कदापि नाश्लीलं कीर्तयेत् उन्मर्यादं न वदेत् शेषं स्पष्टं एवं
सति भीष्मादीनां वधः कथं कर्तुं शक्यत इति भावः ४॥

ननु नाहं कर्णेण युद्धाभिहन्तः किं तद्गुरुस्वाम्याप्पत्वादित्याशयेन भगवत

वनमालीटी॰

उक्तो हितमजानन्नर्जुनः प्राह कथमित्यादिपञ्चभिः भीष्मद्रोणौ पूजार्हौ तौ प्र
ति कथं योत्स्यामि तत्रापि इषुभिः यत्र वाचापि योत्स्यामीति वक्तुमनुचितं तत्र
वाणैः कथं योत्स्यामीत्यर्थः अरिशत्रुमरिणा चक्रेण सूदयतीत्यरिसूदन ४

अथमवैजयन्तीटी॰

एवं पुरुषोत्तमेनोक्तोऽपि अर्जुनः स्नेहमोहकारुण्यादिवशीभूतस्तद्वचनं हितमप
हितं मन्यमानो युद्धारंभाय महानधर्म एवेति भगवन्तमाह अर्जुन उवाच कथ
मिति भीष्मं जितेन्द्रियं सत्यवादिनं पितृवत्सलं कुरुकुलवृद्धं पितामहं द्रोण
वर्णाश्रमशास्त्राचार्योपदेष्टारं गुरुं च संख्ये संग्रामे इषुभिर्बाणैः कथं प्रतियोत्स्यामि
मनीषी भूत्वा कथं युद्धं करिष्यामि कथंचिदपि नेत्यर्थः युद्धाकरणे हेतुमा
ह पूजार्हाविति पूजार्हौ पूजनयोग्यौ पुष्पादिभिरहं तयोः पूजायोग्ययोर्बाणैर्म
याहननं कथं कर्तव्यमिति भावः ननु मधुसूदनारिसूदनयोः संबोधनयोर्द्वयोः
हर्षकपदे पुनरुक्तिदोषो वक्तव्यः यतस्तयोरेकार्थपरत्वमिति चेन्न तयोर्भिन्नार्थ
परत्वेन भिन्नविषयत्वात् तथाहि विष्णुकर्णमलोद्भूतमधुनाममहासुरे ब्रह्म
णापवित्तिं ... मधुकैटभौ विष्णुकर्णमलोद्भूतौ इति भारतवचनात् तयोर्दानवमानवाः मधुसूद
नह्यस्माकं ... स्वजनवधाय ... इति पुराणवचनाच्च मधु
सूदनेत्यनेन स्वधर्मविरोधिनः सर्वजनवैरिणस्त्वं हत
स्वजनवधाय ... महासुरं मधुनामानं भवानवधीन्नेति
द्वेषिणो ... पितामहः भरद्वाजात्मजश्च एतौ न हन्तुं शक्यौ निपा
वीनां ... गुरुः कृपिताम ... यथाप्रातेन वा धात्राय संयतो जया
स्वयं ... पितामहः ... यथासमयः

कृत इति धृतराष्ट्रं प्रति संजयवचनादस्माद्विज
मैथिलौ सद्धर्मचारिणौ गुरुपितामहौ म
याकथंहंतव्यावित्यभिप्रायेणार्जुनेन द्वौ
संबोधनौ कथितावतो न तु नकाकि दोष
गन्धस्यस्पर्शः ४ ॥

मधुसूदनी टीका ॥

ननु नायं स्वधर्मस्य त्यागः शोकमोहादिवशा
त् किंत्वधर्मत्वाभावादधर्मत्वाच्चास्य युद्ध
स्य त्यागो मया क्रियते इति भगवदभिप्राय
मप्रतिपाद्यमानस्यार्जुनस्याभिप्रायमवता
रयति संजय अर्जुन उवाचेत्याह वैशम्पा
यनो जन्मेजयं प्रति भीष्मं पितामहं द्रोण

17

माचार्यं संख्ये रणे इषुभिः सायकैः प्रतियोत्स्या
मि प्रहरिष्यामि कथं न कथंचिदपीत्यर्थः य
तस्तौ पूजार्हौ कुसुमादिभिरर्च्यौ ॥

नयोग्यौ पूजार्हाभ्यां सह क्रीडास्थानेपि वाचापि हर्षफलकमपि लीलायुद्धम
नुचितं किंपुनर्युद्धमिषुभिः शरैः प्राणत्यागफलकं प्रहरणमित्यर्थः मधुदना सू
रिसूदनेति संबोधनद्वयं शोकव्याकुलत्वेन पूर्वापरपरामर्शवैकल्यात् अतो
नमधुसूदनारिसूदनेति स्यार्थस्य पुनरुक्तत्वदोषः युद्धमात्रमपि यत्रानोचि
तं दूरे तत्र वधइति प्रतियोत्स्यामीत्यनेन सूचितं अथवा पूजार्हौ कथं प्रतियोत्स्या
मीति पूजार्ह इत्योरेव विवरणं भीष्मं द्रोणं चेति हेब्राह्मणौ भोजयदेवदत्तं चे दत्तंयत
तिवत्संबंधः अयंभावः दुर्योधनादयो नाम पुरस्कृत्य भीष्मद्रोणौ युद्धाय
सज्जीभवंति तत्र ताभ्यां सह युद्धे न तावद्धर्मः पूजादिवदविहितत्वात् नचा
यमनिषिद्धत्वादधर्मोपि न भवतीति वाच्यं गुरुं हुंकृत्य त्वंकृत्येत्यादिना वा
ङ्मात्रेणापि गुरुद्रोहे दुरदृष्टफलत्वप्रदर्शनेन निषिद्धः तदा किंवाच्य
ताभ्यां सह संग्रामस्याधर्मत्वे निषिद्धत्वे चेति ४ ॥

सदानंदीटीका

ननु स्वधर्मसंग्रामो नायं शोकवशात्कृतः किंतु युद्धस्य धर्मत्वाभावाच्चा
धर्मरूपिणः १ मयास्मिक्रियते त्यागः इत्याह कथमिति भीष्मं पितामहं
द्रोणमाचार्यं सायकैः शरैः २ नजाने प्रहरिष्यामि पूजार्हौ उत्तमादिभिः
पूजार्हाभ्यां सह क्रीडास्थाने वाचापि लीलया ३ हर्षार्थमपि संग्रामो नो
चितः किं शरैः रणे प्राणत्यागकरो युद्धमेभो वाच्यमिति स्फुटं ४ संबोधन
द्वयं मोहादेकार्थकमुदाहृतम् ५ ४ ॥

नीलकंठीटीका

ननु शत्रवो वा स्वभावदुष्टा वा तापनीयाः ननु बंधवाः साधवश्च त्वमर्जु
न उवाच कथमिति मधुसूदनारिसूदनेति संबोधयन् त्वमपि दुष्टानेव
शत्रूनेव तापयतः पूजार्हौ श्रेष्ठौ गुरू च भीष्मद्रोणौ जहीति वक्तुमयु
क्तमिति सूचयति समानार्थकमिदं संबोधनद्वयं वक्तुः शोकेन विक्लव
त्वात्पौनरुक्त्यदोषावहमिति मन्तव्यं इषुभिरिति ताभ्यां सह वाचापि योद्धु
मशक्यं किमुत बाणैरिति भावः ४ ॥

18

श्रानेरी टीका

अनात्मतत्त्वाहं हमेवात्मत्वेनाभिमन्यमानो गुर्वादिवध[illegible]
महापातकोऽस्मि एतावद्दुःखं मयानानुष्ठेयमित्यभिप्रायेणार्जुन उ
वाच स्पष्टम् ४ ॥

[illegible]मकंठी टीका

अथ संप्रत्यनाविर्भूतात्मनात्मस्वरूपविवेचनं तमप्रत्याहे
हातिकमेवात्मत्वेन प्रतिपद्यमानो गुर्वादिवधमहापातक
पर्यवसायि समरानुष्ठाने दोषोद्भावनेन प्रतिषेद्धुमर्जुन उवा
च हे मधुसूदन कथं केन शास्त्रोपपन्नेन प्रकारेण भीष्मं पिता
महं द्रोणं च गुरुं ब्राह्मणं संगरे सायकैः प्रतीपसंप्रहारेण यो
त्स्यामि यद्विवा प्रतिशाहूयो मे द्वितीया व्याख्येया युधिष्ठि
रमेकपव परैर्मपटमनक्षोदसं अन्यत्राप्येवं द्रष्टव्यं यतः
तौ विद्याभिधानधनप्रदानपरमोपकारिणौ गुणोरपि परिते
षणीय हृदयौ पूजनमेवार्हतः अथैतेन कथमिति प्रकारप्रश्न
नप्रसत्तु तेरणपरिजिहीर्षयाः कश्मलत्वं भगवतोपन्यस्तं य
मविरोधादनुपपन्नमेवेत्यभिप्रायः सूचितोऽर्जुनेन [illegible] ध

लासिकी [illegible] टीका

नाहं कातर्येण युद्धादुपरतोऽस्मि किंतु युद्धस्यान्याय्यत्वात् इत्यर्जु
न आह मधुसूदनारिसूदनेति संबोधनद्वयं शोकव्याकुलतया
कथितवान् भीष्मपितामहद्रोणाचार्यौ पूज्यायोग्यौ तौ प्रति
कथमहं योत्स्यामि न कथंचिदपि तत्रापीषुभिः यत्र वाचापि यो
त्स्यामीति वक्तुमनुचितम् ४ ॥

१९

शत्वीरसमिद्धोपिनी॥

ननु च शोकमोहौ स्वधर्मभूतं युद्धं वैमुख्य प्रयोजकौ किंतु गुरुव
धादिनाधर्मत्वाभावो धर्मत्वविचारेणैव तन्मूलो जिकेन्ये वं रूपं भग
वदभिप्रायानभिज्ञस्यार्जुनस्याभिप्रायमवतारयति अर्जुन उवाचेति॥
कथमिति भीष्मं पितामहं द्रोणं च गुरुं चैवेषुभिः संख्ये युद्धे इषुभि
सायकैः कथं प्रतियोत्स्यामि प्रहरिष्यामि अपितु नमस्करणमयीति॥
यतः पूजार्हौ कुसुमादिभिरर्चनयोग्यौ अतो स्वादिभिर्वधहिंसायेलगु
हे मधुसूदन अरिसूदन अत्यतिरिक्तमिश्रुभिरितिपदं यत्र क्रीडाविहारादिषु वा
ग्राह्येणापि मीतिजनकं योत्स्यामीति वक्तुमनुचितं तत्र शुभिः प्राग
नाहदत्त फलं युद्धं कथमाचित्यमावहेदिति सर्वथाप्यधर्मत्वाभावे
नाधर्मजनकतयावास्माहे दुःखमेव परमो धर्म इति विज्ञापयति
४॥

कथंभीष्ममिति दुर्योधनादयःशत्रवस्तुभीष्मद्रोणौचपूज्यावसज्जीभंति न
ताभ्यांसहयुद्धंनतावद्धर्मः अविहितत्वात् श्येनादिवत् नचायमनिषिद्ध
त्वाच्छीवनादिवदधर्मोऽपिनभवतीतिवाच्यं गुरुंहुंकृत्यत्वंकृत्येतिब्राह्म
मात्रेणापिगुरुद्रोहेदोषगतिप्रदोयपदाविरुद्धफलत्वनिदर्शनेननिषिद्धत्वात्किं
वाच्यंताभ्यांसहसंग्राममस्यायमत्वेनिषिद्धत्वेवेत्यर्थः प्रतियोत्स्यामीतिवद
न् युद्धमेवतावद्भूहविद्रावणफलकोऽपिनधर्मः दूरेनह्यधरतिसूचयति म
धुसूदनारिसूदनशब्दाभ्यांपुनरुक्तिरूपोवदतात्मनः पूर्वापरोक्तिप्रमाम
धिवैधुर्यंप्रकटीकरोति ननुगुरोरप्यवलिप्तस्यकार्याकार्यमजानतः उ
त्पथंप्रतिपन्नस्यपरित्यागोविधीयतइत्युक्तेस्तेषामवलिप्तानांकार्याकार्य
विवेकशून्यानांउत्पथनिष्ठानां गुरुत्वेनैवस्वीकारोऽनुचितः इत्याशंक्य
नतावदेतेउत्पथंप्रतिपन्नाः ताहृयधर्मोपजीविनांभद्राभिनिवेशस्याप्युक्त
त्वात् अतस्तैः सहयुद्धमेवश्रेयस्करमित्याशंक्याह ४ ॥

20

भाषाअनुवाद

इसप्रकार भगवानसे प्रबोध कराये भी गये अर्जुन तौभी शोकग्रस्त अपने मनका मनोरथ प्रकाश करते हुये कृष्ण भगवानसे फेर कहने लगे कि हे मधुसूदन पूजा करनेके योग्य जो भीष्मपितामह और द्रोणाचार्य तिनसे संग्राममें बाणोंसे कैसे युद्ध करें और उनको मारें जिनसे वचनसे भी संग्राम करने की बात नहीं कर सकतेहैं हे अरिसूदन कहे शत्रुनाशन अभिप्राय यह कि यत्न कहे उपायसे शत्रुनाश करने वाले ४ ॥

अर्जुनवाक्य दोहा ॥

कैसें भीष्म द्रोण को मधुसूदन रणयुद्ध हुगनकटोंगोबाण
सों पूजायोग्यविरुद्ध ४ ॥

90

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यम
पीह लोके हत्वार्थकामांस्तु गुरूनिहैव भुंजी
य भोगान् रुधिरप्रदिग्धान् ५ ॥

आनंदगिरिकृतटी०

राज्ञां धर्मोपि युद्धे गुर्वादिवधे हनिमात्रफलत्वं गृहीत्वा पापमारोपयन्
ते गुरूनिति गुरून्भीष्मद्रोणादीन् आततायीश्चात्र मान्यान् अहिंसित्वा महा
नुभावान्महामाहात्म्यान् श्रुताध्ययनसंपन्नान् श्रेयः प्रशस्यतरं भोक्तुं
भोक्तुमभ्यवहर्तुं भैक्ष्यं भिक्षाणां समूहं भिक्षाशनं नृपादीनां निषिद्धम
पीह लोके व्यवहारभूमौ न हि गुर्वादिहिंसया राज्यभोगा उपेत्तते किं च
हत्वा गुर्वादीनर्थकामानेव भुंजीय न मोक्षमनुभवेयमिहैव भोगान्न
स्वर्गे अर्थकामानेव विशिनष्टि भोगानिति भुंजत इति भोगास्तान् रुधि
रप्रदिग्धान् लोहितलिप्तानिवात्यंतगर्हितानभोगान् गुरुवधादिसाध्या
न् परित्यज्य भिक्षाशनमेव युक्तमित्यर्थः ५ ॥

स्वामिकृतटी०

तर्हि तानहत्वा तव देहयात्रापि न स्यादिति चेत्तत्राह गुरूनिति गुरून्द्रो
णादीन् अहत्वा परलोकविरुद्धो गुरुवधस्तमकृत्वा इह लोके भिक्षान्नम
पि भोक्तुं श्रेयउचितं विपरीते तु न केवलं परत्र दुःखं किं तु इहैव च नरकदुः
खमनुभवेयमित्याह हत्वेति गुरून् हत्वा इहैव तु रुधिरेण प्रदिग्धान् प्र
कर्षेण लिप्तान् अर्थकामात्मकान् भोगान् अहं भुंजीयाश्नीयान् यद्वा
र्थकामानिति गुरूणां विशेषणं अर्थे लुब्धत्वादेते तावद्युद्धान्निव
र्तेरन् तस्मादेतद्वधः प्रसज्यत एवेत्यर्थः तथा च युधिष्ठिरं प्रति भीष्मेणोक्तं
अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धो
स्म्यर्थेन कौरवैरिति ५ ॥

पिशाचभाष्य स्पष्टोर्थः ५ ॥

रामानुजभाष्यं स्पष्टोर्थः ५ ॥

अभिनवगुप्तकृत टीका ॥

स्पष्टोर्थः ५ ॥

परमार्थप्रपा टीका

अथोक्तमेव विविधाह गुरूनिति महानुभावान् गुरून्द्रोणादीनहत्वा

गी॰
टी॰
हि॰

लोकशास्त्रविरुद्धं गुरुवधमकृत्वा इह लोके भैक्ष्यं भिक्षयाप्राप्तमन्नं भोक्तुं
श्रेयः उचितं परं तु गुरून् हत्वा रुधिरप्रदिग्धान् मद्रुधिराक्तानर्थकामात्मकान्
स्वकान्भोगानिहैव लोके कथं भुञ्जीय गुरुवधशंकाकुलेन कथमन्ते
यां परलोककथा दूरतोपास्तेत्यर्थः अतिरपि ब्राह्मणस्य लोके किंतः कथमश्री
ब्राह्मणयजनापत्त्वरेत्र न निरस्त्वान्वलोहितं कुर्यात् तावता हन्तव्यः सम्यक् हितानाहृत तस्मा
भावे तमेव तेन पातये यथा निहन्तदिति सर्वेषक्ते निषिद्ध तावता हन्त साभवतीति
स्वगणये इति चतुर्थद्वितीयायार्थोवगम्यते ब्राह्मणेनापद्धरेतेकोधार्विभावे
नतोद्धरेत् तथा न निरस्त्यात् इस्तपादाद्यभिघाते न कुर्यात् तथा न लो
हितं शस्त्रादिना रुधिराक्तं न कुर्यात् हि यतः कारणादेतावताऽपकर्मणा
पतनं साभवति पातकेन न संपद्यते ५ ॥

नत्वेषां वधं विना तव देहयात्रापि कथं स्यात् तत्राह गुरूनिति गुरून् हत्वा

वनमालीटीका

गुरुवधमकृत्वा इह लोके भैक्ष्यमपि भोक्तुं श्रेय उचितं इहनन पक्षे तु केवलं
परत्र दुःखं किं किं तु इहापि दुःखमेव भवेदित्याह हत्वेति गुरून् हत्वा
हैव तेषां रुधिरेण प्रदिग्धान् अलिप्तान् तैर्भुज्यमानत्वात् अर्थकामात्मकान्
भोगान् भुञ्जीय अर्थकामान् गुरूनिति वा ५ ॥

नन्वेवं चेन्नोहित्वं तद्रात्रून्मार्गवर्तिनः कथं न हंसीत्याशंक्यान्योपि कृपादयो

अर्जुनमवैजयन्तीटी॰ ॥

गुरवोवरहवसन्तीति हत्वयत्युरोरपि अवलिप्तस्य कार्याकार्यमजानत उ
त्पथं प्रतिपन्नस्य परित्यागो विधीयत इति स्मृतेः राज्यनिमित्तं हि शास्त्रापि गुरोस्त्यागपव
निरूपितो न तु वधः अतो राज्यनिमित्तं गुरुवधरूपाद्युद्धात् भिक्षाटनात्रा
दिभिरेव देहपालनमेव श्रेय इत्याह गुरूनिति महानुभावान् महान् अ
भावः श्रुतिस्मृतिधर्मावरणरूपः प्रभावो येषां तान् महानुभावान्
मत्ये येषां तान् संसारतापनाशकानित्यर्थः अहिम महानु
हन्तीति हिमहा रविस्तस्येवानुभावस्तेजो येषां तान्यद्वा अहिम महा
र्थः गुरूनज्ञाना थकारनिरोधकान् गुकारस्त्वन्धकारः स्याद्रुकारस्तन्निरोध
कः तयोरेकं परं ब्रह्म गुरुरित्यभिधीयत इति वचनात् अहत्वा हननमकृ
त्वा इह मनुष्यलोके भ्रष्टत्वं भैक्ष्यमपि भोक्तुं श्रेयो भवतीत्यर्थः पापनि
भवति इत्यनेन न तु चिरायुष्णमस्माकं भैक्ष्यान्नमत्रमपि भोक्तुं श्रेयोस्तीति प्रथमं
लोकस्यु इ मेव निस्तविनं अर्थं च बकामोक्षु भिल्पाको येषां तात्रवय सर्वकामो
न तथावा के भीष्मद्रोणकृपे परधिरे अति अक्यसस्तु रुधिरा सोदाम

नकस्यापि च न इति सत्यं महाराजवद्धोस्म्यर्थेन कौरवैरिति नाहं शान्तपि गुरून् हत्वा रुधिरप्रदिग्धान् तैर्भुक्तानि
धिरेः अर्कर्षणावलिमात्र लोकाययकीर्तिकरत्वेनानिनिंद्यान् भुञ्जं नरति भोगा विषयाः कर्माणि चनुगा
निहेवामित्वेव

कं भुंजीय अहम् अश्नीयाम् परलोकस्तु का कथा अथवा अर्थकामानि
ति भोगविशेषणं अर्थाश्च कामाश्च तेऽर्थकामास्तान् अर्थकामरूपभो
गानेव भुंजीय न तु धर्ममोक्षावित्यर्थः ॥ ५ ॥

ननु भीष्मद्रोणयोः पूजार्हत्वं गुरु मधुसूदनीटीका ॥ तेनैव एवमन्येषामपि कृपादीनां न च तेषां गुरुत्वेनैव स्वीकारः साम्प्रतमुचितः गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथप्रतिपन्नस्य परित्यागो विधीयते इति स्मृतेः तस्मादेषां युद्धगर्वेणावलिप्तानामन्यायराज्यग्रहणेन शिष्टद्रोहेण च कार्याकार्यविवेकशून्यानामुत्पथनिष्ठानां वध एव श्रेयानित्याशंक्याह ^

^ गुरूनहत्वा परलोकस्तावदस्त्येव अस्मिंस्तु लोके तैर्हतराज्यानां नोऽस्माकं नृपा
दीनां निषिद्धं भैक्ष्यमपि भोक्तुं श्रेयः प्रशस्यतरमुचितं न तु तद्वधेन राज्यम
पि श्रेय इति धर्मापिष्ठेहतिमात्रफलत्वं गृहीत्वा पापमारोप्य भूते नन्व
ऽवलिप्तत्वादिना तेषां गुरुत्वाभाव उक्त इत्याशंक्याह महानुभावानि
ति महानुभावः श्रुताध्ययनतपआचारादिनिबंधनः प्रभावो ये
षां तान् तथा च कालकामादयोऽपि यैर्वशीकृतास्तेषां गुणातिशयशा
लिनां नावलिप्तत्वादिदुरापसंभव इत्यर्थः हि महानुभावानित्ये
कं वा पदं हिमं नाम्यमपरं तीति हिमहा आदित्योऽग्निर्वात स्तस्येवानुभावः
सामर्थ्यं येषां तान् तथा चापि तेजस्वित्वात् तेषामवलिप्तत्वादिदोषो ना
स्त्येव धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं तेजीयसां न दोषाय वह्नेः स
र्वभुजो यथेत्युक्तेः ननु यदार्थलुब्धाः सन्तो युद्धे प्रवृत्ताः तदैषां विक्री
तत्वात् मत्तां कृतस्य स्वर्वे किं महात्म्यं तथा चोक्तं भीष्मेण युधिष्ठिरं प्रति अ
र्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धोऽस्म्य
र्थेन कौरवैरित्याशंक्याह हत्वेति अर्थलुब्धा अपि ते मदपेक्षया गुरवो
भवन्त्येवेति पुनर्गुरुग्रहणेनोक्तं तथाप्यर्थे ईदृशानपि गुरून् हत्वा
भोगानेव भुंजीय न तु मोक्षं लभेय भुज्यन्त इति भोगा विषयाः कर्मणि
घञ् ते च भोगा इहैव न परलोके इहापि च रुधिरप्रदिग्धा इव अपयशो
व्याप्तत्वेनात्यंतजुगुप्सिता इत्यर्थः यदेहाप्येवं तदा परलोकदुःखं कि
पहणीयमिति भावः अथवा गुरून् हत्वार्थकामात्मकान् भोगाने
व भुंजीय न तु धर्ममोक्षावित्यर्थकामपदस्य भोगविशेषणतया व्या
ख्यानांतरं द्रष्टव्यम् ॥ ५ ॥

सदानंदीटीका ॥

ननु एषां भीष्मद्रोणानां पूज्यत्वं सांप्रतं कथं युद्धगर्वेण हतानां कार्याका
र्यमजानतां । गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथं प्रति

23

पत्रस्यपरित्यागोविधीयते २ इतिस्मृतेर्वधः श्रेयान्शिष्यद्रोहत्वादि
ति एवमाशंक्य सफलत्वाभावमाह गुरूनिति १ अहत्वा तावदस्त्येव
परलोकसंबंधिनः अस्मिंल्लोके नृपादीनां निषिद्धं भैक्ष्यमप्युत ४ उ
चितं भोक्तुमस्माकं न गुरूणां वधो वरः उत्कृष्टोऽध्ययनाचारतपआदि
बंधनः ५ येषां प्रभावस्तेषां तु महानुभावता मता न त्वैवलिमत्वा
द्विभेदैर्षैः ततिर्मताक ६ अपरे तिहिमेयोग्यादिस्यावास्तिनत्सम य
षासामर्थ्यमेतेषांत्वदैवैषेनेवातति: ७ धर्मव्यतिक्रमो दृष्टः ईश्वरा
णांच साहसं तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ८ नत्वर्थलो
भिनः संतः प्रवृत्ता येऽधुना तेषां विक्रीतदेहानां कुतोयं महिमा ध्रुवः
९ तथैवोक्तं शांतिपर्वणि भीष्मेणापि युधिष्ठिरे अर्थस्य पुरुषो दासो दास
स्त्वर्थो न कस्यचित् १० इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः इत्याश
क्याह महात्मा गुरुभक्तिसमन्वितः अर्थलुब्धानपि गुरून्हत्वा भुंजीय भो
वे विषयानेव नो मोक्षं नैव नैवेह न परत्र च ११ इहाप्यपयशोव्याप्तानिंद
दकृतान्हवाः १२ ॥ ५ ॥

नीलकंठीटीका

ननु युद्धोद्यतानां गुरूणामपि वधः श्रेयानिति माशंक्याह गुरूनिति यद्यपि
त्वउक्तं प्रशस्तमेव तथापि महानुभावान् गुरूनहत्वा भैक्ष्यमेव भोक्तुं
श्रेयः प्रशस्ततरं एवं तर्हि गुरूंस्त्यक्त्वा दुर्योधनादीनेव हत्वा अहीति सा
शंक्याह अर्थकामानिति धनार्थिनो गुरवो वयं च दुर्योधनस्य साहाय्यं
करिष्यंति तेन तद्वधोऽपि प्रसक्त एवेत्यर्थः तथा च इहैव न तु परलोके
भुंजीयेति संप्रत्ययः पदांतरोपन्यासात्
उतहत्वा भोगसंपादने श्रेय इति संप्रत्ययमेवास्पदेहृषणमाह
रुधिरप्रदिग्धानिति ५ ॥

ज्ञानेश्वरी टीका

गुरुनहत्वा गोहि गुरुहननेन वधः परिहृतो भवति एवं सति राज्यला
भात्मकात्पापात् इहास्मिँल्लोके लोकानां द्रोहैर्द्रोहैर्भैक्षं भिक्षास
मूहं ग्रासमात्रमपि श्रेयोर्थं भुंजे श्रेयो तिप्रशस्तम् तु पुनः गु
र्थकामो राज्याभिलाषी गुरुन्विहत्य तद्भोगानि तेन लब्धा भो
गान् तान्न हि भुंजीय न वितिनिपात समुदायो न ह्रीत्यर्थः ५

रामकंठी टीका

यस्मात्तेषां ग्रामपरिहारेण गुरुहननेन वधः परिहृतो भवति तोऽस्मिँह
ल्लोके भिक्षान्नमप्यवहर्तुं श्रेयस्स्यान्नमनं तु नरं हे धर्मलिप्सु
स्तात् व्यापाद्य तद्भोगानि तोपचितानि ह्यानि विषयान्समश्नीया
म् ५ ॥

लास्मिकी [illegible] टीका

गुरुहत्या महापातकरूपं परलोकविरुद्धं तेषां वधे पुरुकत्वा
तो विरास्यानि षिद्धमपि भिक्षान्नं हिंसाशून्यत्वाल्लोके श्रेयः यश
स्करं न केवलं पारलौकिकं दुःखमेव तेषां वधे इहापि शोक
निदानकं दुःखमेवेत्याह हत्वेति ५ ॥

रणवीरसंबोधिनी॥

ननु गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथप्रतिपन्नस्य परित्यागो विधीयते इति स्मृतेर्गुरुद्रोणादीनामवलिप्तानामन्यायराज्यग्रहणेन शिष्यद्रोहेण च कार्याकार्यविवेकशून्यानामुन्मार्गगामिनां वधः श्रेयानेवेत्याशंक्याह गुरूनिति गुरून्भीष्मद्रोणादीनहत्वा इहास्मिँल्लोके ये ते हि न राज्यानामस्माकं भैक्ष्यमपि क्षत्रियाणां निषिद्धं भिक्षान्नमपि भोक्तुं श्रेयः प्रशस्यतरं न तु नरकहेतुभूतराज्यसुखानुभव इति राज्ञां यमे विधुद्धे इति मा च फलं दृष्ट्वा पापमारोप्य भुङ्क्ते कुतो न तद्वधः श्रेयानित्याह महानुभावानिति महानुभावः श्रुताध्ययनादिनिबंधनः प्रभावो येषां तान् तथा चावलिप्तत्वादिकं स्वल्पं पापं न तत्प्रभावानां वधप्रयोजकमिति भावः यद्वा हि महानुभावानित्येकं पदं हिमं जाड्यं हन्तीति हिमहा सूर्योऽग्निर्वा तस्येवानुभावो येषामिति तथा च धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं तेजीयसां न दोषाय वह्नेः सर्वभुजो यथेति स्मृतेः कृतदोषस्यैषां नास्त्येवेति भावः नन्वर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित् इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैरिति युधिष्ठिरं प्रति भीष्मोक्तेरर्थलोभेनैव गुरूणां प्रवृत्तिदर्शनाद्धि क्रीतात्मनामेषां ऊनत्वं सर्वोक्तमाहात्म्यध्वंसेनैषां वधोऽधर्मः स्यादित्याशंक्याह हत्वेति अर्थं कामयन्ते ते अर्थकामाः तेषां मरणे तद्यागरूपत्वं न हीयते इत्याह न त्वात्ममहिमोदता इहैव लोके अर्थकामाय न तु लब्धात्मलाभादयानपि गुरून् भावः भुञ्जीय इति भोगान् विषयान् इहैव लोके परलोकं विना तावदस्माकमिति नपथश्चोक्ता सर्वेनाकस्मात्पादकान् रुधिरप्रदिग्धानिति भोगानेव भुञ्जीय न तु श्रेयस्करं जीव यद्वा भोगानेवेति संबंधः जीवन्नपि बन्धमनोदो भवेयमिति यद्वार्थकामरूपान्भोगानेव भुञ्जीय भिक्षान्नपानमेव नोद्वेजकमिति भावः ५॥

रामचंद्रसरस्वतीकृतटीका

गुरुभिस्सर्द्धेन गुरूनहत्वा परलोकस्तावदस्त्येवास्मिंस्तु लोके तैर्हतैरा।
ज्यानां नो भैक्ष्यमपि भोक्तुं श्रेयः उचितं न तु तद्वधेन राज्यमपि श्रेय इति भावः
ननु तैर्हतस्य कृतस्य भैक्ष्यमपीत्याह महानुभावानिति महानुभावत्वमस्या।
कृपासुधर्मा तेन मम मा तिष्ठ्यं करिष्यंतीति भावः यद्वा किमिति भैक्ष्यं भुज्यते
स्मितान्हत्वा राज्यं तावद्गृहाण पश्चात्कुरु च प्रायश्चित्तकथनाय गुर्मिला
किं विहाय स्वधर्मं तत्राह महानुभावानिति कालकामाद्यो यैर्वशीकृतास्ते
मया कथं हंतव्या इति भावः यद्वा कार्याकार्यमजानतो ज्ञातो गुरुत्वं येन त
दुर्धाद्विलोकनं त्र्युयतो भीष्माशंक्याह हिमहानुभावानिति हिमं जाड्यम
ज्ञानं परगतं जहाति पराकरोतीति हिमहस्तद्गमनुभावः सामर्थ्यं येषा
मित्यर्थः ये परासां निराकर्तुं शक्तास्ते कथं कार्याकार्यं ज्ञानविधुरा
स्युरिति भावः अवलिप्तस्याभावेपीदमेव योज्यं यद्वा ज्ञानस्तेभिस्ताभिस्ता
घस्त्रहणस्म जातः ब्रूहे लोलस्या: पत्यप्रायेणसदृयुद्धमारब्धं त्वयाकि
मर्थमेतादृशीयुक्तिरारब्धेत्यत आह अहिमहानुभावानिति हिमशब्दे
न हिमजन्यः कंपोलक्ष्यते तत्रश्च सूर्यादीनामनुभावोदहि महो भवति प
तेषां तु न तथ्यत्वयिकं कंपजनकत्वमर्थः ततः ज्ञातो गुरुत्राशेति भावः अ
स्मिन्नेवार्थे वा अहि महानुभावानिति सर्पतुल्यपराक्रमानिति यो ज्याम
ननु यद्वा अर्थकामाः संतो गुरुभ्यस्तास्ते देर्षे कृतानामनां ज्ञत्वसंप्रवीक्षसा
मर्थ्यं तथा चोक्तं भीष्मेण युधिष्ठिरं प्रति अर्थस्य पुरुषो दासो दासस्त्वर्थो
न कस्यचित् इति सत्यं महाराज बद्धोस्म्यर्थेन कौरवैरित्याशंक्याह हत्वे
ति तु पूर्वोक्तात्मस्वरूपाहेलनापराधजनकं तत्कर्याशयात्तत्प्रभावे
ब्रुपि मद्वचेत्त्वया गुरवो भवंतीति पुनर्ग्रहणं नोक्तं इहस्थानपिहत्वा
ये भोगास्ते इहैव न परलोके ते च रुधिरप्रदिग्धा इत्यपयशोग्रस्ता इत्यर्थः ॥५॥
किंच भीष्मद्रोणादीनां महतो विजयपराभवस्य का लोके लाघवावहो ऽ
नस्तु इतो स्थितेषु अस्माकं विजय इति कयापि भंग्याह ॥

25

भाषा अनुवाद

फेरभी अर्जुन कहतेहै कि यद्यपि युद्ध करना राजोंका धर्महै तोभी
लोभसे जीविका हीके अर्थवे अनर्थ रूप पाप करतेहै और जो क
हो कि इन लोगोंको विनामारे हमारी देह यात्रा कोहू जीवनहूनि
भोजनवस्त्रभी न चलेगा निर्वाह कहो कैसे संसारमें होगा इ
सबात पर कहतेहै कि जिसलिये महानुभाव महात्मा गुरुलो
गोंको नमारके भीखमांग खाना भी मेरेजान लोकमें श्रेय कहे
अति उत्तम कल्याण रूपहै और नही गुरु आदि वडे लोगोंकी मारि
उनके लोहूसे लपेटे भोग हम चाहते क्योंकि जो कहो कि परलोक
मे जो होगा सो होगा किसने देखा परलोक कही मे दुःख नहींहै
यहांभी दुर्यश और संताप रूप दुखहै और जो कहो कि लोकमें
तो सुख मिलेगा तो तुच्छ सुखके हेतु भक्ति और स्वर्ग लोकमे य
श कौन छोडेगा ५ ॥

कवित्त॥

वेदउपदेशिनको महा अनुभाविनको गुरूनको मारकहाकैसें
यह भावेगो योग्य हमे भिक्षा अन्न भोगनको निश्चयकरजा
न्यो इहलोक माहि यहि हम पावेगो हननकर गुरूनको अ
सों अर्थ लोभिनको वैसे अबपाप करि कौन यम आवेगो
भोगकरी भोगनको क्रमसहनो बात कौनको लिख लगावेगो
५॥

नचैतद्विद्मः कतरन्नोगरीयोयद्वाजयेमयदि वानोजयेयुः यानेवहत्वानजिजीविषामस्ते वस्थिताः प्रमुखेधार्तराष्ट्राः ६ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका

क्षत्रियाणांस्वधर्मत्वाद्युद्धमेव श्रेयस्करमित्याशङ्क्याह नचैतदिति एतदपिनजानीमोभैक्ष्ययुद्धयोः कतरन्नोऽस्माकंगरीयः श्रेष्ठं किं भैक्ष्यं हिंसाशून्यत्वाडुत युद्धंस्वधर्मत्वादिति सन्दिग्धाचजयस्थि- तिः किंसाम्यमेवोभयेषां यद्वावयंजयेमातिशयेमदृयदिवानो ऽस्मान्धार्तराष्ट्रादुर्योधनादयोजयेयुः जातोपिजयोनफलवान् यतोयान्बन्धून्हत्वानजिजीविषामो जीवितंनेच्छामस्तएवाव [illegible]स्थिताः प्रमुखे संमुखेधार्तराष्ट्राधृतराष्ट्रस्यापत्यानि तस्मा द्भैक्ष्याद्युद्धस्य श्रेष्ठत्वेनसिद्धमित्यर्थः ६ ॥

स्वामिकृतटीका

नचैतदिति एतद्द्वयोर्मध्येनः अस्माकंकतरत्किंनामगरीयः अधि कतरंभवतीतिनविद्मः तदेवद्वयंदर्शयति यद्वाजयेमएतान्वयंते ष्यामः यदिवानः अस्मान्एतेजयेयुःजेष्यंतीति किंवास्माकंजयो पिफलतःपराजयएवेत्याह यानेवहत्वाजीवितुंनेच्छामः तएवैते संमुखेऽवस्थिताः ६ ॥

पिशाचभाष्यंनास्ति

रामानुजभाष्यं[illegible] नास्ति

[illegible]जीवनेच्छामभवेमइति ६ ॥

अभिनवगुप्तकृतटीका ६ नास्ति

परमार्थप्रपा ६

अथतेभ्योस्माकंजये[illegible]पराजयेवामरणमेवावशिष्यतइत्याहनचैदि तिजय[illegible]पराजयव्यवस्थानदैवाधीनातयापियद्वयंजयेम यदिवातेऽस्माञ्जयेयुः अनयोः पक्षयोर्मध्येकतरद्गरीयः किंश्रेष्ठंत-

गी॰
टी॰ द्वि॰

२७

न्नविद्मः न जानीमः यतो ऽस्माकं पराजयेमरणमेवावशिष्टं [illegible]
[illegible] न पलायनमित्यसंदिग्धं तथास्माकं जयपक्षे सर्वेषामा
चार्याणां गोत्रिणां च वधो भविता अनेन रमस्माभिः किं जीवितव्यं परिशेषा
लोकशास्त्रगर्हीभयात् अतएवमेवेत्याह यानेवेति यान् हत्वा वयं न जिजीविषामः
न जीवितमिच्छामस्ते धार्तराष्ट्राः प्रमुखे ऽग्रे ऽवस्थिताः संति ६

वनमालीकृतटीका

यद्यपि कर्म करिष्यामस्तथापि जयः पराजयो वेति न जानीमः तस्मान्नैवेत
दिति द्वयोर्मध्ये नो ऽस्माकं कतरत् गरीयः अधिकतमं भविष्यतीति न विद्मः यद्वाय
दि वा वयमेव तान् जयेम तएव यदि वा नो ऽस्मान् जयेयुः जेष्यंतीति च न वि
द्मः किं चास्माकं जयो ऽपि पराजय एवेत्याह यानिति यान् हत्वा जीवितुं नेच्छाम
स्तएते संमुखे स्थिताः वीरस्याबलवं धुवधो लोके निंद्यत्वादस्मादनर्थायेति भावः

कुसुमवैजयंतीटीका

किं च [illegible]
नदिति वयमेतान् जयेम जेष्यामः यदि वैते नो ऽस्मान् जयेयुः जेष्यंति एतद्द्व
योर्जयपराजययोर्विपरीतकर्मारभमाणानां नो ऽस्माकं कतरत् वा नाम
ध्ये कतरत् गरीयः श्रेष्ठतरं भविष्यतीति वयं न विद्मो न जानीमः [illegible]
[illegible]
[illegible] यानिति यतो यान् एव बंधून् धनादीन् एव
हत्वा वयं न जिजीविषामः जीवितमेव नेच्छामस्तएव धार्तराष्ट्रा अन्यस्य पुत्राः
प्रमुखे संग्रामे स्थिताः सन्मुखे कृत्वा स्थिताः अतएवैतेषां वधे ऽस्माकं जयो
ऽपि पराजयो भवेदिति भावः ६

मधुसूदनीटीका धर्मत्वेन युद्धमेव न वश्रेयस्करं भिन्याशंक्याह
एतदपि न जानीमो भैक्षयुद्धयोर्मध्ये कतरन्नो ऽस्माकं गरीयः श्रेष्ठं किं भै
क्षं हिंसाशून्यत्वात् उत युद्धं स्वधर्मत्वादिति इदं च न विद्मः आरब्धे ऽपि युद्धे यद्वा वयं
जयेमातिशयेमहि यदि वा नो ऽस्मान् जयेयुर्धार्तराष्ट्राः उभयोः साम्यपक्षो
ऽप्यर्थाद्बोद्धव्यः किं च जातो ऽपि जयो न फलतः पराजय एव यतो यानेव भ्रातृन् हत्वा
जीवितमपि वयं नेच्छामः किं पुनर्विषयानुपभोक्तुं तएवावस्थिताः संमुखे धा
र्तराष्ट्राः धृतराष्ट्रस्य वंधिनो भीष्मद्रोणादयः सर्वे ऽपि तस्माद्युद्धस्य [illegible] श्रेष्ठ
त्वेन सिद्धमित्यर्थः तदेवं प्राक्केनेन ग्रंथेन संसारदोषनिरूपणाद्धिकारि
विशेषणान्युक्तानि तत्र नचश्रेयो ऽनुपश्यामि हत्वा स्वजनमाहवऽत्यत्राणो

स्वधर्मत्वान्मुख्योत्तरं गोत्र
मित्राचार्यादि वधात्मकं कर्मी
तरतीत्यत्यपि युद्धे प्रवृत्तानां
मस्माकं मध्ये केषां जयः केषां
पराजयो वा भवेदिति वयं न
जानीमस्तयोर्द्वैगापीत
[illegible] दित्याह

[illegible] भैक्षाशनस्य दत्त्वियं प्रति निषिद्धत्वात् युद्धस्य च विहितत्वात्

हतस्य परिव्राट् समानयोगक्षेमतोक्तेः स्मृत्युक्तेयोस्तु तेवैश्रेय इत्यादिश्रुतिसिद्धं श्रे
यो मोक्षाख्यमुपपन्नं तत्रार्थान्तरदिनरदश्रेय इति नित्यानित्यवस्तुविवेको दर्शितः
नकांक्षे विजयं कृष्णेत्यत्रैहिकफलविरागः अपि त्रैलोक्यराज्यस्य हेतोरित्यत्र पार
लौकिकफलविरागः नरके नियतं वास इत्यत्र स्थूलदेहातिरिक्त आत्मा किं
नो राज्येनेति व्याख्यानवर्त्मना शमः किं भोगैरिति दमः यद्यप्येते न पश्यन्तीत्यत्र
निर्लोभता तन्मे क्षेमतरं भवेदिति तितिक्षा इति प्रथमाध्यायार्थः संन्यास
साधनसूचनं अस्मिन्नध्याये श्रेयो भोक्तुं भैक्षमपीत्यत्र भिक्षाचर्याफलितः
संन्यासः प्रतिपादितः गुरूपसदनमिदानीं प्रतिपाद्यते समधिगतसंसारदोष
जातस्यातितरां निर्विण्णस्य विधिवद्गुरुमुपसन्नस्यैव विद्याग्रहणाधिकारात् ५

सदानंदीकृत

ननु भिक्षाशनं निंद्यं क्षत्रियप्रतिषिद्धत्वात् धर्म्यं युद्धं च विहितं श्रेयो नेत्याह
नेति च १ एतच्चापि वयं विद्मो मध्ये संग्रामभैक्ष्ययोः कतरन्नो गरीयोऽस्माकं भै
क्ष्यं संग्राम एव वा २ इदं चापि न जानीमः प्रारब्धेऽस्मिन् रणे वयं जयेम यदि वाऽस्मा
ञ्जयेयुः शत्रवो रणे ३ सिद्धेपि विजये नोऽस्माकं फलतः स्यात्पराजयः स्वज
नानन्वयं हत्वा नेच्छामस्त्वपि जीवितुं ४ किं पुनर्विषयान्भोक्तुं तएते व्यवस्थिता
रणे भीष्मद्रोणादयः सर्वे तथा दुर्योधनादयः ५ अतः शत्रून् पश्यतेसर्वं यथा विन
ष्टा परे नस्माद्दैत्याद्दुःखस्यापि श्रेष्ठत्वं नैव सिध्यति ६ ॥

नीलकंठीकृत

एवं तर्हि भैक्ष्यमेव न वक्ष्य इत्याशंक्याह न चैतदिति यद्यपि क्षत्रियस्य भैक्ष्यमे
वेष्टं तथापि नः अस्माकं क्षत्रियाणां भैक्ष्यभोगयोर्मध्ये कतरत् गरीय इति वयं न वि
द्मः ननु किं युद्धमेव गरीय इति तत्राह यद्वेति यदि वा वयं जयेम शत्रून् यदि वा नो
स्मान् शत्रव एव जयेयुः इदमपि न विद्मः अन्यपक्षे पुनर्मरणमपार्थितं भैक्ष्यमेव
वा पद्यत इति भावः ननु मद्भिः सहाये सति तव जय एव निश्चित इत्यत आह याने
वेति इष्टनाशात् जयोपि पराजयरूप एवेत्यर्थः यन्तु निश्चितेपि भैक्ष्यश्रेयस्त्वे पुनर्यु
द्धभैक्ष्ययोः कतरत् श्रेय इति संशयो नोचितः अतो नः अस्माकं मध्ये कतरत् नः
संगरीय इति व्याख्येयमिति तदसत् धर्मसंमूढचेता इति वाक्यशेषाद्युक्तसं
शयस्यैवोचितत्वात् संग्रामगरीयस्त्वसंशयेनैव जयसंशयेः स्यथासिद्धेः न्य
तरसंशयस्यैवयर्थ्यात् विशेषाध्याहाराद्दोषाच्च ६ ॥

गी.
टी.हि

२८

एतन्तावदास्तामिदमपरं विचा **आनंदी टीका** यितामित्याह

नचैतज्जयपराजययोर्दैवाधीनतयाजानीमः कतरद्वलंनोऽस्माकंधार्तराष्ट्राणांचमध्याद्वलवत्तरंस्यादिति यद्वावयंतान्जयेम यदिवातेस्मान्जयेयुरिति यानेवगुरुप्रभृतीन्व्यापाद्य वयंनजिजीविषामः जलतयोदोषाज्जीवितेनेच्छामः तेमीधार्तराष्ट्राः एतराष्ट्रस्यसेनायांसमवेताभीष्माद्योधृतराष्ट्रपुत्रादुर्योधनाद्योपत्रस्ववस्थिताः ६ ॥

रामकंठी टीका

किंञ्च एतदेवनजानीमोद्वयोर्मध्यात्कतरद्वलमस्माकंप्रयोजनवत्यागरीयोगुरुतरंस्यात् कयोरित्यावेक्षनोरित्याह यदिवावयंतान्प्रतिद्वन्द्विनोजयेमतिरस्कुर्वीमहि यदिवास्मांस्तिरस्कुर्वीरन् एतयोरर्थयोरेकतरस्यगरीयस्त्वापरिज्ञानेकारणमाह यस्माद्यान्कुतून्व्यापाद्यबंधुविरहात्प्राणानेवधारयितेनेच्छामस्तेधृतराष्ट्रपुत्राभ्रातरोस्माकंपुरः स्थिताः किंञ्चकंभवति यदितावदस्माभिःकुरवोहताः स्मस्तदस्यपक्षस्यकागरीयाता दुःखमात्रफलत्वात् एवंचार्थादितरेकंस्यात् यदिते स्मांजयेयुः सपक्षोगरीयान्भवेत [illegible]

[illegible]

[illegible] ६ ॥

लासिकी **[illegible] टीका**

नत्रयुद्धात्रमताववपिजयपराजययोः संशयात्सदत्वेनयुद्धमनर्थावहमेवभातीतिपाह नचैतदिति तथाचयुधिष्ठिरेण भीमंप्रति यर्थस्य [illegible] नकाप्यवित इति नेम [illegible] नन्वस्माकंजयएवश्रेयानित्यत्रदोषमाह यानेवेति ६ ॥ यानेवहत्वाजेवितेनेच्छामस्तएवैतेधार्तराष्ट्राः संमुखेवस्थिताः ॥ ६ ॥

द्वयोर्जयपराजययोर्मध्येनोऽस्माकंकतरन्नोगरीयोऽधिकतरंभवत्यतन्नविद्मस्तदेवद्वयमाह यद्वातान्जयेम जेष्यामोयदि नोनेतधार्तराष्ट्रा जयेयुर्जेष्यन्ति इति ६

पंचोली टीका

किंच यदि स्वधर्ममपि अंगीकरिष्याम तथापि अस्माकं जयः परा
जयो वा भवेदिति न ज्ञायत इत्याह नचैतदिति चशब्दः एतद्द्वयं न
विद्मः नोस्माकं कतरत् किं नाम गुरूणां हननं अहननं वा गरीय
अधिकतरं भविष्यतीति न विद्मः यद्वा एतान्वयं जयेम जेष्यामः
यदि वा नोस्मान् एते जयेयुः जेष्यंतीति न विद्मः किंच अस्माकं
जयेपि फलतः पराजय एवेत्याह यानेवेति किंच जयपक्षेपि
यानेव धार्तराष्ट्रान् वयं ह-
त्वा न जिजीविषाम एव न जीवितुमिच्छामो राज्यादिभोगस्य
शंकापि का ते एव धार्तराष्ट्राः प्रमुखे अग्रे युद्धार्थमवस्थिताः प्र-
वर्तते ६ ॥

रामवीरसमिहोयिनी ॥

ननु गुरुमेव स्वधर्मता छोड़े यरूकरं तव न उन् भैक्ष वर्पेत्या पंकारह
नचैतदिति भैक्षचर्यायुद्धयोर्मध्ये कतरन्नोस्माकं गरीयः श्रेय
स्करमिति यतरपि वयं न विद्मः किं भैक्ष्यरूक वयादि पापजनकत्वा
भावाच्छ्रेयस्करम् उत युद्धं स्वधर्मत्वादिति कोविद्धयस्य तस्य त्वा
उतंसकाभावेन संदिहाना एव वयमिति भावः नच प्रबलतया
स्वहतिरूपस्य युद्धस्यैव यथाकथंचित्कर्तव्यतायां निश्चितायाम
पि किं विजफलं परपवमाने टपपते जयस्य संदिग्धत्वादित्याह यद्वे
ति वयं धार्तराष्ट्रान् किं जयेम किं वा ते नोस्मान् जयेयुः अस्त्वा वा जया
निश्चयः फलाभावाच्च युद्धमहति भयोजनको भवतीत्याह यानेवेति
पतो यान्वंधून् हत्वा न जीवितमपि नेच्छामः किं पुनः राज्यसुखानि
भोक्तुं त एव धार्तराष्ट्राः धृतराष्ट्रसंबंधिनो भीष्मद्रोणादयो नोस्मा
कं प्रमुखे संमुखे अवस्थिताः युद्धार्थमिति शेषः तस्मात्तदास्युद्धमस्व
मिति सिद्धम् ६ ॥

नचैतद्विद्मइति उभयोर्वक्ष्यमाणयोर्मध्येकतरन्नोगरीयः गरीयोन
भवतिर्भैक्ष्यवावहमित्येतन्नविद्मइतिसंबंधः कयोरुभयोस्तदाह यद्वेति
वाइतिवैः यद्विधिषाचरणेनवयंभीष्मादीन्गुरून्जयेमपरित्यापापभ
यमत्वक्तयुद्धात्मानस्मान्तेजयेयुः एतयोर्मध्ये कस्माकेकिंलाघवंवाबह
मितिनविद्मइतिपूर्वपक्षपद्मोलाघवंवाबहइतिभावः संप्रदायव्याख्या
नपापभयाडुपरतेऽर्जुनेनोचिता अस्मिंहित्याख्यानेद्वीउयापिपूर्व
स्यागस्यसंभाविततान्ननुतर्हिभीष्मद्रोणादीन्मान्यान्गुरून्परित्यज्य
दुर्योधनादीनांवधेकिमितिनयतसेइत्याशंक्याह यानेवेति यानेवभी
ष्मादीन्हत्वावयंदयजीविताननि इच्छामहेः तएवभीष्मादयोधा
र्तराष्ट्राःसंतोऽदुर्योधनादीनांतादात्म्यापन्नाः संतस्तान्दृष्टतोनिदिष्ट
प्रमुखेअग्रेस्थिताः कथमेतानरितस्तस्मज्जदुर्योधनादयोहंतव्याइतिभा
वः तदेवंभीष्मादिसंकटेव घा [illegible] भिहितांचरंतीतिश्रुतिसिद्धमिदाच
र्येनस्याभिलाषंप्रदर्श्यविधिंहुपसत्तिमपितत्संकटव्याजेनेवदर्शय
ति ६ ॥

नैष्कुन्याय

गी॰
टी॰ हि॰

30

भाषाअनुवाद

और जो हम अधर्म अंगीकार करें तोभी तो हमारी जयया पराजय होगी यह भी हम नहीं जानते हैं कि दोनों मे क्या होगा सोई कहते हैं कि होय हमी रणमे उनको जीतलें नतुवा वेई सब हमे जीतें पर तु हमारी जीत होनेसे भी विचार देखो कि वह हमारी हारही है क्यों कि जिनको नाश करिके हम और संसार मे प्राणधारण करना नहीं चहते सोई धृतराष्ट्रके पुत्र सब रण भूमि मे हमारे सामने आ पै खड़े हैं ६।

कवित्त॥

नहि हम जानें यह का हरता साची कहें का हरता हमारी पतो वडीसखदाइ है जो उ हम जीत पावें इनहीको जीतकर अथवा यह जीतें हमे हम को हराइ है॥ और इक बात यह जिनहुको मार हम जीवनकी आस को उनदेउ गे भुलाइ है॥ सोइ धृतराष्ट्रसुत कोरव विचार देखो षडे पसम हु हमारे हि सनमुख आइहै ६॥

31

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्म
संमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नं ७ ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका

समधिगतसंसारदोषजातस्यातितरां निर्विण्णस्य मुमुक्षोरुपसन्नस्या
त्मोपदेशसंग्रहणेऽधिकारं सूचयति कार्पण्येति योऽल्पां [illegible] स्व
ल्पामपि स्वक्षतिं न क्षमते स कृपणस्तद्विधत्वादविद्वाननात्मवित्
अयमपरमपुरुषार्थस्तथा कृपणो भवति यो वा एतदक्षरं गार्ग्यविदित्वा
स्माल्लोकात् प्रैति स कृपण इति श्रुतेः तस्य भावः कार्पण्यं दैन्यं तेन दो
षेणोपहतो दूषितः स्वभावश्चित्तमस्येति विग्रहः सोऽहं पृच्छामि त्वां पु
न्नैवात्वां धर्मसंमूढचेताः धर्मो धारयतीति परं ब्रह्म तस्मिन् संमूढ
मविवेकतां गतं चेतो यस्य ममेति तथाह पृष्टः किं पृच्छसि यन्निश्चि
तमैकान्तिकमनापेक्षिकं श्रेयः स्यान्नैरागनिहंत्रि वदनैकान्तिक
मनात्यन्तिकं स्वर्गवदापेक्षिकं वा तन्निःश्रेयसं मे मह्यं प्रब्रूहि ना
पुत्रायाशिष्यायेति निषेधात् न प्रवक्तव्यमिति मा मंस्थाः यतः शि
ष्यस्तेऽहं भवामि प्राप्यतु शाधि मां निःश्रेयसं त्वामहं प्रपन्नोऽस्मि ७

स्वामिकृतटीका

तस्मात्कार्पण्येति एतान्हत्वा कथं जीविष्याम इति कार्पण्यं दोषः स्व
कुलक्षयकृतः ताभ्यामुपहतः अभिभूतः स्वभावः शौर्यादिलक्षणो य
स्य सोऽहं त्वां पृच्छामि तथा धर्मे संमूढं चेतो यस्य सः युद्धं त्यक्त्वा भिक्षाटनम
पि क्षत्रियस्य धर्मो [illegible] अधर्मो वेति संदिग्धचित्तः सन्नित्यर्थः अतो मे यन्नि
श्चितं श्रेयो युक्तं स्यात्तद्ब्रूहि किं च तेऽहं शिष्यः शासनार्हः अतस्त्वां
प्रपन्नं शरणागतं मां शाधि शिक्षयोपदेशं कुरु ७

पैशाचभाष्यं नास्ति

रामानुजभाष्यं [illegible]

ननु युद्धमारभ्य निहत्य धार्त्तराष्ट्रान्भवतो धार्त्तराष्ट्राः प्रसह्य हन्युरिति चेत्
अस्तु तद्वधलब्धजयादधर्मादस्माकं धर्माधर्ममजानद्भिस्तैर्हननमे।

गी·
टी·टि·

32

वगरीयइतिमेमतिर्भातिइत्युक्तापन्नस्त्वंश्रेयइतिनिश्चितंतत् तवशर
णागतायतवशिष्यायमेब्रूहीत्यतिमात्रकृपणोभगवत्पदांबुजमुपस
सार ७ ॥

अभिनवगुप्तकृतटीका ७ ॥ नास्ति

परमार्थप्रपा

अथव्याकुलचित्तःसन्श्रीकृष्णमेवपृच्छतिकार्पण्येति स्नेहानुबंधितं
गो[illegible]त्रिणांजीवरक्षणमेवकार्पण्यं तयातद्दोषस्तेनोपह
तःस्वभावश्चित्तंयस्यसतथा कार्पण्यदोषात्स्वधर्मपरित्यागः हिंसायांच
अतःस्वधर्मपरित्यागः एवमुभयथाधर्मसंमूढचेताः धर्मविषयेविमू
ढचेताः [illegible]यस्मात्सर्वः अतःपरमुभयथाधर्मसंरक्षणेनयच्छ्रेयःउचित
स्यात्तन्मेनिश्चितमसंदिग्धंयथास्यात्तथाब्रूहियतोऽहंतेशिष्यःअ
तस्त्वांप्रपन्नंशरणागतंमांशाधिशिक्षय [illegible] आचार्यवान्पुरुषोवेदेतिश्रुतेः

वनमालीकृत

ततःकिमित्यतआहकार्पण्येतिएतान्हत्वाकथंजीविष्यामइतिका
र्पण्यंदोषश्चकुलक्षयकृतस्ताभ्यामुपहतोऽभिभूतःस्वभावःपौरुष
लक्षणोयस्यसोऽहंत्वांपृच्छामि तथाधर्मसंमूढचेतायस्यसःयुद्धस
काभिक्षाटनंत्वविप्रधर्मःउतयुद्धंकृत्वाराज्यपालनंधर्ममितिसंदिग्ध
चित्तःसन्पृच्छे अतोममयन्निश्चितंश्रेयःयुक्तंस्यात् तद्ब्रूहिकिंचते
ऽहंशिष्यःशासनार्हः अतस्त्वांप्रपन्नंशरणागतंमांशिक्षय ७

कुसुमवैजयंतीटीका

एवंनकारःहेविजयमित्यजादिवैलोक्यराज्येऽपित्रचैहिकामुष्मिक
फलनिर्वेदःकिंराज्येनेत्यत्र शमः किंभोगैरित्यत्र दमः तन्मेदेम
तरमित्यत्रतितिक्षाःयद्यप्येतेनपश्यन्तीत्यत्रलोभाभावःइत्यादिसाध
नकदम्बसम्पन्नोऽपिगुरूपसत्तिंविनोपायाःसर्वेनसिद्ध्यन्तीतिवि
चिन्त्यसाकंधर्माधर्ममजानंतंकिंभिक्षाटनंश्रेयउतस्वधर्मभूतंयु
द्धंवेतिजितासार्थंश्रीकृष्णंसमारथिंजगद्गुरुंगुरुंकृतवानितिसंजयो·
हत्वानजिजीविषामइतिस्नेहात्मकंममत्वंकार्पण्यंयोकापतद्दोषं।

गार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः कथंनज्ञेयमस्माभिः
पापादस्मान्निवर्तितुमित्यादिनाकुलक्षयकृतोदोषः कार्पण्यंचदो
षश्चताभ्यामुपहतोविनष्टः स्वभावः शौर्यादिलक्षणोयस्यसतथा
अतएवधर्मसम्मूढचेताः कोवाममधर्मः एतान्हत्वाऽप्येषांपालनंउत
सर्वांस्त्यक्त्वारण्यगमनंवेतिधर्मनिर्णयविषयेसम्यङ्मूढमनिश्चितं
चेतोयस्यसतथा अहंत्वांपृच्छामिमांकिंपृच्छसीतिचेत्तत्राहयच्छ्रेयइति
ममयतःश्रेयःपरमार्थरूपंफलंस्यात्तन्निश्चित्यातिदुस्तरागाधधर्मसं
शयरूपाकूपारनिमज्जमानायमेमह्यंब्रूहिममैवार्थंकिंकरउत्यात्मीयंमां
ज्ञात्वाकथयेत्यर्थः ननुस्वशिष्यानेवगुरवोधर्ममनुपदिशन्तित्वंतुमम
मित्रमसित्वामहंकथमुपदेक्ष्यामीतिचेत्तत्राहशिष्यइतितेनत्वाहंशि
ष्यःशासनार्हस्त्वयिदृढविश्वस्तोस्मितदाज्ञंमेसर्वंकरिष्यामीतिभावः
त्वांप्रपन्नंशरणागतंमांत्वंशाधिशिक्षयममायमपिशिष्योऽहमेनंकथंक
थयामीत्येवंरूपंसंदेहंत्यक्त्वामामात्मसात्कृत्वास्वस्वाभाविककारुण्या
याशिक्षयेत्यर्थः ७ ॥

मधुसूदनीटीका

तदेवंभीष्मादिसंकटदशाहुस्यायाःऽथभिक्षाचर्यंचरन्तीतिश्रुतिसि
द्धभिक्षाचर्येऽर्जुनस्याभिलाषंप्रदर्श्यविधिवदुपसत्तिमपितत्संकटव्या
जेनैवदर्शयति योऽल्पःस्वल्पामपिवित्तक्षतिंनक्षमतेसकृपणइतिलो
केप्रसिद्धस्तद्धर्मयोगादखिलोऽनात्मविदप्राप्तपुरुषार्थतयाकृपणोभवति यो
वाएतदक्षरंगार्ग्यविदित्वाऽस्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः तस्यभा
वःकार्पण्यमनात्माध्यासवत्त्वंतन्निमित्तोऽस्मिन्जन्मन्येतएवमदीयास्ते
षुहतेषुकिंजीवितेनेत्यभिनिवेशरूपोममतालक्षणोदोषःतेनोपहत
स्तिरस्कृतःस्वभावःक्षात्रोयुद्धोद्योगलक्षणोयस्यसतथा धर्मविषयेनिर्णा
यकप्रमाणादर्शनात्संमूढंकिमेतेषांवधोधर्मःकिमेतत्परिपालनंधर्मः
तथाकिंपृथिवीपरिपालनंधर्मःकिंवायथावस्थितारण्यनिवासएव
धर्मःइत्यादिसंशयविषयीभूतंचेतोयस्यसतथा नचैतद्विद्मःकतरन्नोग
रीयइत्यत्रव्याख्यातमेतत् एवंविधःसन्नहंत्वामिदानींपृच्छामि

गी॰
टी॰ द्वि
२

श्रेयस्त्वनुषंगः अतो यद्यपि द्विविधं ऐकांतिकमात्यंतिकं च श्रेयः परमपुरुषा
र्थभूतं फलं साक्षात् मम त्वद्वि साधनानंतरमवश्यंभावित्वमैकांतिकत्वं जा
तस्याविनाश आत्यंतिकत्वं यथा रोगाद्यपेक्षितेनैकदा चिकित्सेन निवृत्तिर्न भवेद
पि जातापि च रोगनिवृत्तिः पुनरपि रोगांतराविनाशात् एवं
कृतेपि यागे प्रतिबंधवशात् स्वर्गो न संभवेदपि जातोपि स्वर्गो दुःख
क्रांतो नश्यतीति चेति नैकांतिकत्वमात्यंतिकत्वं वा नयोः तदुक्तं दुःखत्रया
भिघाताज्जिज्ञासा तदपघातके हेतौ दृष्टे सापार्था चेन्नैकांतात्यंततो
भावादिति दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः तद्विप
रीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानादिति च ननु त्वं मम सखा न तु शि
ष्योऽतस्त्वादृशि शिष्यस्तेहमिति वदंतं शासनयोग्यतादृष्टत्वं शिष्यप
वमेवासि न साधारणस्त्वं ज्ञानत्वात् अतस्त्वां प्रपन्नं शरणागतं मां शाधि
शिक्षय करुणया नत्वं शिष्यत्वपांकयोपदेशणीयो ऽहमित्यर्थः प
नेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं
मशैववाह्णीविंदनायांपितेमुपसमारश्रुथी हि भगवान्तमादिरनूपस
त्रिपतिपादकश्रुत्यर्थो दर्शितः ७ ॥

सदानंदीकृत

तदेवं सर्वसंदर्भं संसारो दोषवारिधिः उपस
कारिकाः १ शोकानिमोहशास्त्रस्योपादानं तेन विवेकादिसाधनान्यपि
पश्यामीत्यत्र श्रेयोपवर्गकः २ उपन्यस्तो न तेन कृत्स्नशः नच श्रेयोन
त्वानिमुविवेकोसो दर्शितः प्रदिदेनुवकः ३ नकांक्षे विजयं कस्मात्रै
हिकफले रतिः अपि त्रैलोक्यराज्यस्यत्यागामुत्रफले रतिः ४ किंनो
राज्येन तेन्यत्र शमः प्रोक्तः स्पष्टमः यत्पूर्वेनमूपयंतीमपत्रतिर्लोभ
तात्मनः ५ नत्वेतेमन्तरेणत्रतिनिहासाधनांतरं मोक्षंभेसमृपीम
अभिज्ञावर्ण्यपद्धिना ६ संस्मारदोषदर्शिनो जायतरूपसदं नस्फुट रा
नकां पिनावर्णेनेनस्यैवासदर्शकाच्यत्यविधि ८ नत्वंकरच्छलेनेवम
पमत्तिः प्रदर्शिते कृपरोगऽनात्मविनस्पभावः कार्पण्यमस्यनेनत्रिमि

तोममैतेहमेतेषामितिनिश्चयः दोषस्तेनाहतः स्वाज्ञः स्वभावो यस्य स तथा ९
निर्णायकप्रमाणस्यादर्शनाद्धर्मगोचरे किमेतेषां वधो धर्मः किमेतत्परि
पालनं इत्यादिसंशयग्रस्तचेतो यस्मादमीदृशः ततः इच्छाम्यधुनाश्रेयश्चा
त्यंतिकमसंशयं १२ यन्निश्चितं स्यात्तन्मह्यं ब्रूहि श्रेयोर्थिने परं ननु त्वं मम
सखासि न शिष्योसीति चेच्छृणु १३ तवानुशासनार्हत्वाच्छिष्य एव भवाम्य
हं न सखा न्यूनबोधत्वादतस्त्वां शरणं गतं १४ कृपया शाधि वयं मां नोपे
क्षा शिष्यशोकया १५

नीलकंठी

उक्तसंशयपातेनवहृत्तेति कार्पण्येति कार्पण्यं दीनत्वं स्वभावः शौर्यं ते
जो धृतिर्दाक्ष्यमित्यादिना वक्ष्यमाणलक्षणः शेषं स्पष्टं ॥

गी·
टी·टि·

34

एवमनुशोच्य संकटयातेन **आनंदी टीका** किंकर्तव्यता मूढो भगवन्तं विज्ञापयति

कार्पण्येन बन्धुस्नेहजनितेन ज्याख्येन चित्तवैक्लव्येनोपहतः स्वभावो धैर्यात्माहृविवेकादिर्यस्य स हं अतएव धर्मे शास्त्रोदि तार्थे संशयितचित्तस्त्वां शास्तारं पृच्छामि अत्र मम यत्किंचि च्छ्रेयः प्रशस्ततरं तन्निश्चितं ब्रूहि यतस्त्वाहं शिष्यः शासनी यः अतो मां प्रपन्नं शिष्यं शरणागतं शिक्षय १ ॥

रामकंठी टीका

हे भगवन्नहं कार्पण्यदोषेण बन्धुहिंसाजनितेन दैन्येनोपह तस्वभावः प्रध्वंसितत्त्वधर्मोऽतएव धर्मेषु शास्त्रोदितेषाचा रेषु संमूढचेताः संशयितमनस्को भवन्तं पृच्छामि यतश्च यन्मे वस्तुश्रेयः प्रशस्यतरं स्यात्तन्निश्चितं निःसन्देहमादिश यतः शिष्यः शासनीयस्त्वयाहम् एतेन प्रपन्नमुपपन्नं सन्तं त्वद्गृहभूत्वा मां शाधि अनुग्राहयेति किंच १ ॥

लामिकी[illegible] टीका

कार्पण्यं एतान् हत्वा कथं जीविष्याम इति दैन्यं दोषः स्वकुलक्ष यकृतः ताभ्यां संमूढं भिक्षाटनं युद्धं वा तन्मध्ये यस्य श्रेयः स्यादेवं सन्दिग्धचित्तः [illegible] शिष्यः शासनार्हः न तु समः तो शाधि तस्मात् यः शरणागतं मां १ ॥

एवंविधस्य सतस्त्वां पृच्छामि यन्मे यन्निश्चितं श्रेयः प्रशस्यं स्यात्तद्ब्रूहि शिष्याहं ते ॥

पंचोली टीका

तस्मात्संशयानो निर्णयं पृच्छति कार्पण्येति एतान् हत्वा कथं जी विष्याम इति कार्पण्यदोषः स्वकुलक्षयकृतः ताभ्यामुपहतत्वमभि भूतः स्वभावः शौर्यलक्षणो यस्य सोऽहं कार्पण्यदोषोपहतस्वभा वः अज्ञाननिमित्ता शोचना अथवा कृपणस्य भावः कार्पण्यं दैन्यम् अतः कथं धर्मसंमूढ तेऽरवदोषेणोपहतस्वभावस्तं त्वां पृच्छामि कथं धर्मसंमूढ चेताः धर्मे संमूढं चेतो यस्य विवेकविज्ञानान्नुदयात् अथवा धर्मे चेतिसं मे संमूढं युद्धं न्यक्कारभिक्षाटनमपि क्षत्रियस्य धर्मः अधर्मो वेति धर्मसंमूढचेताः अतो यन्मे श्रेयः हितं निश्चितं चेतः चिन्तयस्य सोऽहं धर्मसंमूढचेताः अतस्त्वाम स्यात्तन्निश्चितं ब्रूहि किंच तेऽहं शिष्यः शासनार्हः अतस्त्वां प्रपन्नं शरणमागतं मां शाधि शिक्षय १ ॥

रणवीरसमिद्धोधिनी॥

अथ समरकर्मानुष्ठानं धर्मसुखबाधकत्वास्यदिदार्थतया प्रति
पापापि स्वात्मनि वैरछाभिमानदोषमाशंकमानो भगवति
समाधानमात्मानमावेदयन्नाह कार्पण्येति यद्वाभिदाधान
मेवशुश्रूषुश्रेयस्करमिति मते यद्यपि सम्यक्कथानिश्चितवांस्त
थापि तद्रूपमतिरेव सम्यक्तं देहेच्छेदिनीति मत्वा भगवंतमेव पु
नः पृच्छति कार्पण्येति यः स्वल्पामपि स्वक्षतिं न क्षमते स कृप
णो लोके प्रसिद्धस्तस्य भावः कार्पण्यं तेनापबन्धुहत्याजनितदै
न्य तदेव दोषोल्पस्य रक्षार्थं बहुफलनाशकत्वात् तेनोपहतनास्ति
रक्षतः स्वभावः क्षात्रो शुद्धो धर्मलक्षणो यस्य स तादृशः अ
तयव धर्मविषये निर्णायकप्रमाणाभावात्संमूढं किमेतेषां व
थो धर्मः किं वैतत्परिपालनमित्यादिभिः संमूढं संशयेव्यामवेतोपस्य
मतादृशोऽहं वो धर्मनिर्णायकं पृच्छामि द्वयोर्मध्ये यच्छ्रेयस्कर
स्यात विनिश्चितं निःसंशयं यथा स्यात्तथा मे मम ब्रूहि उपदिश न
व नाशिष्यत्वात्तथा यत्नं मे मम सूपादि शिष्यते यदि
यामित्याशंक्याह शिष्यस्तेऽहं ते तव शिष्यः शासनीयोऽस्मि
तो न्यूनतानमाहि इति भावः कथंतोस्वाधं प्रदुः
स्मारय कर्कशपापासिद्ध्यनवशिष्ट्यां प्रतसर्वात्रुई मपन्नमातं कृपाविष्णु
ति भावः ८॥
द्यनवशिष्यमांकयोपेतत्तणीयोदमि

कार्पण्येति कार्पण्यं अस्मिन्नन्मन्येत एव महीयांस्तेषु हननेषु किं जी
वितेनेत्येवंविधानुसंधाने स एव ममताल्लक्षणो दोषस्तेनोपहत
स्तिरस्कृतस्वभावः क्षात्रो योगलक्षणो धर्मो यस्य सः तथा धर्मे धर्मवि
षये निर्णायकप्रमाणादर्शनात् किं तेषां वधो धर्मः किं वा एतत्परि
पालनं धर्मः तथा किं रक्षीपालनं धर्मः आहोस्विद्यथावस्थितेऽरण्ये
निवास एव धर्म इत्यादि संशये मूढचेतः करणः सन् त्वामिदानीं पृच्छा
मि श्रेयः उत्तमपंथाः अतो यन्निश्चितं अचंचलमविनाशं सर्वशास्त्राऽवि
रुद्धं श्रेयो भवति तन्मे ब्रूहि ननु त्वं मम सख्यासि न तु शिष्यो अहं शि तेऽहं
ष्यस्तेऽहमिति त्वदनुशासनयोग्य एवाहं शिष्य एव न सखास्मि न तु ज्ञा
नत्वादिति भावः अतः प्रपन्नं शरणागतं मां शाधि शिक्षयेत्यर्थः ७

गी॰
टी॰ दि॰

भाषाअनुवाद

इनकुटुम्बके लोगोंका वधकरिके अपने प्राण कैसे करि राखेंगे इस चिन्ता कोकार्पण्य कहते और दोष जो कुलक्षय कृत पाप हैं य ही दोनो बातों से हमारी धारना नष्ट होगई इस से धर्म विचार मे हमारी बुद्धि भ्रष्ट हैं कि संग्राम छोड़ भिक्षान्न भोजन करना लड़िव को उचित कि अनुचित इस संदेह से व्याकुल हो हम आपसे पूछते हैं "आप कृपा करि कहो कि जिसमे अत्यन्त परम कल्यान हमारा होसो" कों कि हम आपके शिष्य औ शरणागत हैं शरणागत पर दया करना महात्माको उचितहैं ७

सवैया ॥

कार्पन्य मो‥ को प्रगट्यो आपकहांजादिके दोषते ना ष्यो स्वभावहै पूछों होंया हिते हम यनोकों मे धर्म में मूढ चित्त मूढविप्रभाव है होवैं कल्याणनिश्चयजा दीसें सो उपदेश मोकों कीजें करभाव है आछे सें मोहु कहो समझाय अब सरनमें पर्यो तेरो शिष्यभाव है ७॥

37

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणाम् । अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

कुतो निःश्रेयसमेव पृच्छसि तत्राह नहीति यस्मान्न प्रपश्यामि किं न प्रपश्यसि ममापनुद्यादपनयेत् यच्छोकमुच्छोषणं शोषणमिन्द्रियाणां तन्न पश्यामि ननु शत्रून्निहत्य राज्ये प्राप्ते शोकनिवृत्तिस्ते भविष्यति नेत्याह अवाप्येति अविद्यमानः सपत्नः शत्रुर्यस्य तदसपत्नं राज्यं राज्ञः कर्म प्रजारक्षणप्रशासनादि तदिदमसां भूमाववाप्यापि शोकापनयकारणं न प्रपश्यामीत्यर्थः तर्हि देवेन्द्रत्वादिप्राप्तौ शोकापनयस्ते भविष्यति नेत्याह सुराणामपीति तेषामाधिपत्यं अधिपतित्वं स्वाम्यमिन्द्रत्वं ब्रह्मत्वं वा तदवाप्यापि मम शोको नापगच्छेदित्यर्थः ८ ।

स्वामिकृतटीका

त्वमेव विचार्य यद्युक्तं तत्कथयेति चेत् तत्राह नहीति इंद्रियाणामुच्छोषणमतिशोषकरं मदीयं शोकं यत्कर्मापनुद्यादपनयेत्तदहं न प्रपश्यामि यद्यपि भूमौ निष्कंटकं समृद्धं राज्यं प्राप्स्यामि तथा सुरेंद्रत्वमपि यदि प्राप्स्यामि एवमभीष्टं तत्सर्वमवाप्यापि शोकापनोद[नो]पायं न प्रपश्यामीत्यन्वयः ८ ॥

पैशाचभाष्यं नास्ति

रामानुजभाष्यं नास्ति

एवमस्थाने समुपस्थितस्नेहकारुण्याभ्यामप्रकृतिं गतं क्षत्रियाणां परमधर्ममप्यधर्मं मन्वानं धर्मबुभुत्सया शरणागतं पार्थमुद्दिश्य आत्मयाथात्म्यज्ञानेन युद्धस्य फलाभिसंधिरहितस्य स्वधर्मस्यात्मयाथात्म्यावाप्त्युपायताज्ञानेन च विना अस्य मोहो न शाम्यतीति मत्वा भगवता परमपुरुषेणाध्यात्मशास्त्रावतरणं कृतं ८ ॥

गी·
टी· हि·

अभिनवगुप्तकृतटीका ८ नास्ति

परमार्थप्रपा

इदानीं त्वमेव विचार्य यद्युक्तं तत्कुरुष्वेति चेत्तत्रोर्वरितं प्रमेयं पु
नर्वदति न हि प्रपश्यामीति अस्मिन्संग्रामे कार्ये यद्दृश्यते तत्किं
अस्माकं जये भूलोकराज्यं तथास्माकं मरणे स्वर्लोकराज्यं अनयो
रुभयोर्मध्ये एकमपि तथा न हि पश्यते यदस्माकं शोकमपनुद्या·
त् नाशयेत् किंभूतं शोकं इंद्रियाणामुच्छोषणं सकलेंद्रियग्ला
नकं अथ भूलोकराज्यं वर्णयति असपत्नं निःकंटकं ऋद्धं समृद्धं
स्वर्लोकराज्यं च सुराणां च यदाधिपत्यं शक्रादिप्रमितानां देवानामाधिप
त्यं तत्र मर्त्यलोकराज्ये ये भोगास्ते रुधिराक्ताः स्वर्लोकभोगा अपि पुन·
श्च्यवनात्क्षणभंगुराः अतः शोकप्रदाः न तु शोकशामका इत्यर्थः
॥ ८ ॥

वनमालीकृत

इंद्रियाणामुच्छोषणं यन्मम शोकमपनुद्यान्नाशयेत् तं न हि प्र
पश्यामि यद्यपि भूमौ अकंटकं राज्यं प्राप्स्यामि तथा सुराधिपतित्वम
पि प्राप्स्यामि एवं यदि छेनत्सर्वं प्राप्स्यामि शोकापनोदनायतन्न
पश्यामीत्यर्थः ८ ॥

कृसमवैजयंतीटीका

ननु वर्णाश्रमादिश्रेयस्करा धर्मविदोऽनेके ब्राह्मणा उपदेष्टारस्स
न्ति तान् किं त्वा न त्रियवंशोद्भवं नवमानलेयं मामेवात्मनः श्रेयः कथं
पृच्छसीति चेत्तत्राह नहीति हि यस्मात् यद्यापत्तव वचो ममेंद्रिया·
णां बाह्यान्तःकरणानामुच्छोषणमतितापकं शोकमपनुद्यात् अ
पनयेत् तथा मे येषां ब्रह्मरुद्रेन्द्रादीनामपि तद्वचो न पश्यामि नानुभ
वामि तस्मात्सर्वेषामुपदेष्टारं त्वामेवात्मश्रेयसे धर्मे एकाकी त्वामे
व प्रपन्नं मां शाधीति भावः नन्वेतान् जित्वा यदा राज्यादिकं प्राप्स्यसि
तदैव विशोको भविष्यसि धर्मश्रेयोऽनेन रूपमन्या वा किमिति चेत्तत्राह

अवाप्येति भूमौ असपत्नं रिपुरहितं ऋद्धं धनादिसम्पत्संपन्नं राज्यं-
सुराणां ब्रह्मादीनामाधिपत्यं च अवाप्य प्राप्यापि सकलसम्पत्स
म्पन्नैहिकामुष्मिकभोगभोक्तुरपि मम शोकापनोदनाय तव वचना
दन्यत्किमपि न भवेदित्यभिप्रायः ८॥

मधुसूदनी टीका

ननु स्वयमेव त्वं श्रेयो विचारय कृतं संपन्नोसि किं परशिष्यत्वेनेत्यत
आह यच्छ्रेयः प्राप्तं सत् कर्तृ मम शोकमपनुद्यादपनुदेद्विवारयेत्त
न्न पश्यामि हि यस्मात्तस्मान्मां शाधीति सोऽहं भगवः शोचामि तं-
मां भगवान् शोकस्य पारं तारयत्विति श्रुत्यर्थो दर्शितः शोकात नो
दे कोऽयं श्वन्याशोकावनहि शोषणमाह इंद्रियाणामुच्छोषणमिति स
र्वदा संतापकरमित्यर्थः ननु युद्धे प्रयतमानस्य शोकनिवृत्तिर्भ-
विष्यति जेष्यसि चेत्तदा राज्यप्राप्त्या इतरथा च स्वर्गप्राप्त्या द्वाविमौ
पुरुषौ लोकेस्मादित्यादि धर्मशास्त्रादित्याशंक्याह अवाप्येत्यादिना शत्रुवर्जि-
तं समृद्धिसंपन्नं च राज्यं तथा सुराणामधिपत्यं हिरण्यगर्भत्वपर्यं-
न्तमैश्वर्यमवाप्य स्थितस्यापि मम यच्छोकमपनुद्यात्तन्न पश्यामीत्य
न्वयः न यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो-
लोकः क्षीयत इति श्रुतेः यत्कृतकं तदनित्यमित्यनुमानात् अस-
त्तेनाप्यैहिकानां विनाशदर्शनाच्चैहिक आमुष्मिको वा भोगः शो
कनिवर्त्तकः किं तु सत्ताकालेपि पारतंत्र्यादिना विनाशकालेपि वि
च्छेदात् शोकजनक एवेति न युद्धं शोकनिवृत्तये इष्टमित्यर्थः एते
नेहामुत्र भोगविरागोऽधिकारि विशेषणत्वेन दर्शितः ८

सदानंदी कृत

ननु त्वं कृतिसंपन्नः स्वयं श्रेयो विचारय परशिष्यतया किं तत्रेत्या
शंक्याह सदुत्वः १ यच्छ्रेयः कर्त्तव्यमसन्मम शोकं निवारयेत् न
न पश्याम्यहं यस्मात्तस्मान्मां शाधि शोकिनं २ शोकं संतापकं
नित्यमिंद्रियाणामशोषकरं नन्वोजोयतमानस्य शोकस्तेलयमे

गी॰
टी॰ द्वि॰

39

ष्यति ३ जेष्यसि तं नदा राज्यं प्राप्स्या वा स्वर्गं तो न्यथा अमत्रादारिभि
हीनं राज्यं ससादि संयुतं ४ हिरण्यगर्भपर्यंतमैश्वर्यं प्राप्य सर्वतः
यत्स्थितस्यापि मे शोकमपनुद्यात् न लभे ५ न च श्रेष्ठेति वेदेन कृ
तकेनास्ति नित्यता कृतकं यन्नतन्नित्यपुनस्तापीति विनिश्चितं ६
नैहिकामुष्मिको भोगो मम शोकनिवर्तको इहामुत्रफलेनेन·
विरागो दर्शितः पुनः ७ ॥८॥

नीलकंठी

ननु त्वं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतपेति युद्धमेव श्रेय इत्युक्तं
किं पुनः पृच्छसीमत आह नहीति बंधुनाशनिमित्तः शोको राज्य
लाभेन स्वर्गाधिपत्यलाभेन वा न निवर्तयिष्यत इति युद्धादस्यकं
चित्तनिवृत्तिरूपशमोपायं वृद्धीत्याशयः अत्रार्जुनविषादव्या·
जेन ब्रह्मविद्याधिकारिविशेषणं भैक्षचर्यं इहामुत्रार्थफलभोग
विरागश्च दर्शितः ८ ॥

आनंदी टीका

भूमौ निस्सपत्नं समृद्धं राज्यं च अमरस्यापि इंद्रियाणां बाधं भ
न्तराणां उच्छोषणं संतापकं शोकं योपनुद्यात् निरसेत् ते
नो विना न पश्यामीति त्वामहं प्रपन्नः ८ ॥

रामकेटी टीका

अथ राज्यं सुराधिपत्यं चावाप्य यच्छोचनं मम स्यात् तन्निवारकं कं
चिदपि न पश्यामीति सम्बन्धः यस्मान्नमहं कंचित्त्वां वर्जे
यित्वा न तर्कयामि यो मम शोकं शोचनमपसारयेत् कीदृश
मिंद्रियाणां बाधाभ्यन्तराणां करणानामुच्छोषणं संतापकं
किं कृत्वा शोचने निर्विपत्नं स्फीतं भूपालाधिपत्यं लब्ध्वापि अथ
वा नल्पमित्युच्यते देवानामप्यैश्वर्यमधिगम्य मम कार्पण्य
दोषोपहतस्वभावस्य शोचनमेव स्यात् अतो मां शाधीति ए
वं शोचनक्रियापेक्षमवाप्य क्रियायाः पौर्वकाल्यमवसेयम्
न त्वपनोदनक्रियापेक्षम् सतथाहि सति भिन्नकर्तृकत्वा
च्छब्ददोषः समनन्तयाभावाच्चार्थदोषोऽनिवारः स्यात्
[illegible]
८ ॥

लाक्षिकी [illegible] टी.

त्वमेव विचार्य यदुक्तं तत्कुरु इति चेत्तत्राह न किमपि अहं
न पश्यामि अनपदेयद्वस्तु इंद्रियसंतापकं शोकं राज्यं
निष्कंटकं तथा स्वर्गे इंद्रत्वमपि यदि प्राप्स्यामि एवं सर्व

> यद्यप्यत्र भूमौ समृद्धं
> समभीप्सितं प्राप्यापि शोकापनोदनोपायं
> न पश्यामीत्यन्वयः ॥ ८ ॥

पंचोली टीका

त्वमेव विचार्य यद्युक्तं तत्कुरु विनिवेत् तत्राह तत्रियाणामुद्दे
स्वधर्म इति तदेव निश्चयेन कर्तव्यमिति भगवदुपदेशः स्वयमेवा
शक्याद्रष्टुः उद्धाक्रियमाणे जयस्तावत् पातिकः निश्चयपक्षेपि
युद्धफलं भूमौ राज्यं तच्च असपत्नं निष्कंटकं समृद्धं च तत् अवा
प्यापि मम शोकं मदीयं यत्कर्म अपनुदेत् तदहं न हि प्रपश्य
मि किं विशिष्टं शोकं इंद्रियाणामुच्छोषकं न केवलं भू
मौ राज्यं शोकविच्छेदकं न भवति सुराणामपि आधिपत्यं युद्धे
मरणपक्षे प्राप्स्यामि तन्मान्तरेपि स्वजनवधनिमित्तशोकं शो

> उच्छोषणं

गी॰
टी॰
द्वि॰

तिं न प्रपश्यामीत्यर्थः भूमावसपत्नं शत्रुरहितं ऋद्धं राज्यं च सुराणामपि चाधिपत्यं वावाप्य यत्कर्मेन्द्रियाणां शोषणं शोकं अपनुद्यात् अपनयेत् तदहं न हि प्रपश्यामीत्यन्वयः ८ ॥

रत्नावीरसमिद्धेयिनी ॥

ननु स्वयमेवं श्रेयो विचारयस्तु तं संपन्नस्त्वं किं मच्छिष्यभावं नयसीत्यत आह न हीति हि यतः अहं तत्किमपि वस्तु त्वां विना न प्रपश्यामि यदस्मम इन्द्रियाणामुच्छोषणमतिसंतापकं शोकमपनुद्यादपहरेत् ननु युद्धे जयसद्भावे भूमिराज्यलाभस्य मरणादिना स्वर्गादिलोकप्राप्तेश्च श्रेयसः संभवात्तत्कामस्यास्त्यत आह अवाप्येति असपत्नं निर्विपक्षमृद्धं सस्यादिसमृद्धं भूमौ राज्यं भूपालाधिपत्यं सुराणामाधिपत्यमिन्द्रत्वमपि प्राप्य शोचनमेव मे स्यात् अथवा कियदेतत् हिरण्यगर्भत्वमपि प्राप्य शोकाभिभूतत्वादित्यनन्तत्वमेवत्रस्तं प्रभृत्वामाशुद्धस्यात् येन शोकानभिभूतत्वादेकच निश्चयवान्भूयासमिति भावः ८ ॥

रामचंद्रसरस्वतीटीका

ननुत्वमेव किं छेदयो विचारयन्नत संपन्नो सीत्याशंकाह नहीति
मम यच्छोकमपनुद्यात्तन्न पश्यतः प्रपश्यामि अतः पाहीति सो
ऽहं भगवन् शोकाक्रान्तं मां भगवान् शोकसागरात्तारयत्विति निगूढः
अन्तरर्थः शोकं विशिनष्टि इंद्रियाणामुच्छोषणमिति। इंद्रिया
णां स्वस्वविषयग्रहणप्रतिबंधकमित्यर्थः ननु भूमौ साम्राज्यमिं
द्रपदं वा शोकापनोदकं स्यादित्याशंक्याह अवाप्येति अवस्थित
स्यात्यध्याहारः यद्यहं तेन नाशितः स्यां किमहं तेन न कुर्यामिति अस्यार्थो
निगूढः एवमर्जुनो किमनुयत्संजय आह ८ ॥

41

भाषाअनुवाद

जोकहोकितुमी विचार करके जो करनेयोगयहोसोकरो ति
सपर कहते है कि इन्द्रियों की चैतन्य शक्तिका नाश करने
वाला जो यह शोक हमै आयके प्राप्त भयाहैसो किसी उपा
यसे दूर होगायह हम किसी भांति नहीं देखते है और यद्य
पि हम निष्कण्टक पृथिवी भरकाराज्यकरैं या देवाधिपत्यक
हे स्वर्ग राज्य इन्द्रपद प्राप्त करैं तौभी इस शोक सागर केपार
जाने को उपाय हम नहीं देखतेहैं ८।

सवैया॥

नाहिन देखों में ऐसो पदारथजो मेरे याहि को दूर करे
है जोयह इंद्रिय सोषक शोक भयो मोहिचितनथीयरे
है प्रापत होयके भूमि अकंटक राज्य समृद्धिको भोग
करेहै वोहै जो देवको राज्य मिलें अबतो भीन निश्चयशो
कटरेहै ८॥

42

सञ्जय उवाच एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ९ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

एवमर्जुनेन स्वाभिप्रायं भगवन्तं प्रति प्रकाशिते सञ्जयो राजानमावेदितवानित्याह सञ्जय इति एवं प्राक्प्रकारेण भगवन्तमुक्त्वा परन्तपो ऽर्जुनो न योत्स्येन संग्रहरिष्ये अस्मन्नात्मपौत्रकप्रसङ्गादिति गोविन्दमुक्त्वा तूष्णीमब्रुवन् बभूव किलेत्यर्थः ॥ ९ ॥

स्वामिकृतटीका

एवमुक्त्वार्जुनः किं कृतवान् इत्यपेक्षायां संजय उवाच एवमिति ९

रामानुजभाष्यं नास्ति

पिशाचभाष्यं नास्ति

मधुसूदनी

अथ स्नेहकारुण्यधर्माधर्मविधियाकुलत्वार्जुनपदवी देहात्मानमेव अनात्मत्वेन मत्वा शोकाविष्टो देहात्मनिवृत्तिनिमित्तं परमार्थधर्माभास प्रत्यरो: ९

अभिनवगुप्तकृतटी नास्ति

एवमुक्त्वा हृषीकेशमिति सेनयोरुभयोर्मध्ये इति मुनेनेदं सूचयति संशयाविष्टोऽर्जुनो नैकपदेन युद्धानिवृत्तो यत एवमाह समग्रधर्मां प्रयत्नमिति अतउभयोरपि हानाहानयोर्मध्यगो भगवतानुशिष्यते ॥ ९ ॥

परमार्थप्रपा

अथ ते किं कृतमिति सञ्जय आह एवमुक्त्वेति स्पष्टं ९

वनमालीकृतटीका नास्ति ९ स्पष्टम्

श्रीमद्वैजयन्तीटीका

धर्ममप्युक्त्वा भगवच्छरणमुपगतोऽर्जुनस्ततः किं निश्चितवानित्याशङ्कायां सञ्जयो धृतराष्ट्रमाह एवमिति हे परन्तप परं शत्रुं दिवलपौरुषादिभिस्तत्क्षणमेव तपति वनवासादिभिः पीडयतीति परन्तपो धृतराष्ट्रस्तत्संबुद्धौ हे परन्तप अर्जुनस्य विशेषणं चे

+ एवं कथं भीष्ममहमिति द्वाभ्यां युद्धस्य महदधर्मरूपत्वं तत्रापि न चैतद्विद्म इत्यनेन जयपरा
+ जययोरपि अनिश्चिततत्त्वं चोक्त्वा तदनन्तरं कार्पण्यदोषेत्यादि द्वाभ्यां [illegible] आत्मनो गुरूपसत्तित्वमुक्त्वा अष्टमश्लोकोऽयं इकारः ततः पश्चात् अहं न योत्स्ये इत्यपि उक्त्वा तूष्णीं सकलेन्द्रियक्रियाशून्यो बभूव सर्वेन्द्रियप्रवर्तकस्य सर्वज्ञस्य गुरोरग्रे परंतपोऽप्यहं न योत्स्यामि स्वातंत्र्येण कथं भूयामिति लज्जया प्रोवदनो गुडाकेशोऽपि परन्तपोऽपि पार्थस्तूष्णीमेवासीत् पुनः किंचिदुवाचेति तूष्णीं भवेत्यभिप्रायः

परंतपोऽरिकदम्बतापनः गुडाकेशो जितनिद्रः पार्थो हृषीकेशं बाह्यान्तःकरणप्रवर्तकं गोविंदं सकलसुरासुरनरपशुपक्ष्यादीनां गां वाणीं विंदतीति साक्षात्त्वात्मनेति तत्तथा तेन विशेषणद्वयेन भगवतोऽन्तरात्मत्वं सर्वज्ञत्वं च सूचितं + ९

मधुसूदनीटीका संजय उवाच

तदनन्तरमर्जुनः किं कृतवानिति धृतराष्ट्राकांक्षायां गुडाकेशो जितालस्यः परंतपः शत्रुतापनोऽर्जुनः हृषीकेशं सर्वेन्द्रियप्रवर्तकत्वेनान्तर्यामिणं गोविंदं गां वेदलक्षणां वाणीं विंदतीति व्युत्पत्त्या सर्ववेदोपादानत्वेन सर्वज्ञं आदौ एवं कथं भीष्ममहं संख्ये इत्यादिना युद्धस्वरूपायोग्यत्वमुक्त्वा तदनन्तरं न योत्स्य इति युद्धफलाभावं चोक्त्वा तूष्णीं बभूव बाह्येन्द्रियव्यापारस्य युद्धार्थं सर्वकृतस्य निवृत्त्या निर्व्यापारो जात इत्यर्थः स्वभावतो जितालस्ये शत्रुतापने च तस्मिन्नागन्तुकमालस्यं संतापकत्वं च नास्पदमाधास्यतीति योजयितुंद प्राद्वः गोविंद हृषीकेशपदाभ्यां सर्वज्ञत्वं सर्वशक्तित्वसूचकाभ्यां भगवतः तन्मोहापनोदनमनायाससाध्यमिति सूचितम् ९ ॥

सदानंदीकृतटीका

ततः किं कृतवान्पार्थ इत्यत्रोवाच संजयः जितालस्योऽर्जुनः शत्रुतापनश्चेद्धियेश्वरं १ सर्वज्ञं भगवंतं तमेवमुक्त्वा वचोऽर्जुनः कथं भीष्ममहं चेति स्वरूपायोग्यतां रणे २ न योत्स्य इति युद्धस्य फलाभावं ततः परं उक्त्वा तूष्णीं बभूवेत्यनिर्व्यापारतया स्थितः ३ स्वभावतो जितालस्ये सर्वशत्रुप्रतापने संतापकत्वमालस्यं न तदाधास्यतिनास्पदं ४ इति द्योतयितुं हेति तथानायासतो हरेः बोधाच्छोकापनेतृत्वं गोविंदेति पदध्वनिः ५ ९

नीलकंठीटीका [illegible] ९ नास्ति ९

गी॰
टी॰ द्वि॰

४३

एवंपार्थप्रतिज्ञातामुक्तिमुपसंह

आनंदी टीका रन्नुथनमर्थं संजय उवाच

एवंकथंभीष्ममहमित्यादियुद्धेस्वस्यानौचित्यंहृषीकेशउक्तातदानंतरंनयोत्स्यइतिगोविंदंगोवाचेविंदतीति सर्वज्ञंसर्वाभिप्रायज्ञंउक्त्वातूष्णींबभूवह युद्धव्यापाराद्विरामेत्यर्थः ९

रामकंठी टी० ^एवंयुद्धनिषेधनिश्चितबुद्धित्वंधनंजयस्यप्रतिपादयितुं संजयउवाच^

श्लोकमेतद्व्रतार्थम् किंबहृषीकानीइन्द्रियाणितेषामीशोनियंता भगवान् गुडाकानिद्रामाचष्टते तस्याईशस्तयानभिभवनीयइत्यर्जुनविशेषणंव्याख्येयम् इति ९ ॥

लालित्री [illegible] टीका

एवंसर्वज्ञंसर्वाभिमतं [illegible] नपरायणामी [illegible] ९ हि परन्तपराजन्धृतराष्ट्रश्रीहृष्ट्रमेवमुक्त्वायुक्त्वासम्बोध्यनयोत्स्यइतिपालितमुक्त्वातूष्णींबभूवतत्प्रसिद्धौ ॥ ९ ॥

पंचोली टीका

एवमुक्त्वार्जुनः किंकृतवानित्यपेक्षायामाह संजयउवाच गुडाकेशोर्जुनः हृषीकेशंश्रीकृष्णंप्रतिपूर्वोक्तप्रकारेणकथंभीष्ममहंसंख्येयात्स्यामीत्यादि हेपरंतपहेधृतराष्ट्रअहंनयोत्स्येयुद्धंनकरिष्यामीतिगोविंदंप्रतिउक्त्वातूष्णींबभूवमौनमाश्रितवान् ९ ॥

रत्नावीरसमिह्रोधिनी॥

एवं भगवंतंशरणं प्रपद्यस्वाभिप्रायंप्रकाश्यंतमर्जुनं धृतराष्ट्रप्रत्यावेदितवान्संजयइत्याह संजयउवाचेति ॥ अथयुद्धनिषेधेनिश्चितबुद्धित्वमर्जुनस्यप्रतिपादयितुमाह एवमिति एकंकथंभीष्ममहं संख्येइत्यादिनास्वस्ययुद्धायोग्यतांहृषीकेशंसर्वनियंतारंभगवंतंप्रति प्रतिपाद्य तदनंतरंगोविंदं गोवेदलक्षणांवाणींविंदतेइतिव्युत्पत्त्यासर्ववेदोपादनसेनसर्वज्ञंप्रतिनयोत्स्येनप्रहरिष्येयतास्वयंशोकप्रसंगादितिफलाभावेचप्रदर्श्यसंयुद्धनिषेधमुक्त्वापरंतपः शत्रुनिर्मूलनसमर्थोपिगुडाकेशोजितनिद्रालस्यप्रमादोर्जुनस्तूष्णींबभूवनिर्व्यापारः स्थितः इतिप्रसिद्धं ९ ॥

रामचंद्रसरस्वतीकृतटीका

एवमिति परंतपइति नाशक्ताईहघासंकल्पेकृतवानितिभा
वः तूष्णींबभूवेतिशोकापनोदकंब्रूहीत्युक्तवानदमस्यवचन
स्यानौचित्यादितिभावः ततःकिंवृत्तंतदाह ५ ॥

45

भाषाअनुवाद

इसप्रकारकीबातें भगवानसे कह कर अर्जुन ने फेरक्याकि
यासो संजय धृतराष्ट्र से कहते हैंकि निद्राविजयी शत्रु ना
शन धनंजय अर्जुन भगवान से कहाकि हेगोविन्द हम युद्ध
न करेंगे जो होय सो होय यह कहि कर मौन हीरहे ९

संजयवाक्य॥ दोहा॥

कहि ऐसे श्रीकृष्ण को गुडाकेश अविनाश हे गोविंदनमे
लरें कहियुग भयो अलाप ९॥

46

तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरु
भयोर्मध्ये विषीदंतमिदं वचः १० ॥

आनंदगिरिकृतटीका

तमर्जुनं सेनयोर्वाहिन्योरुभयोर्मध्ये विषीदंतं विषादं कुर्वंतमति
दुःखितं शोकमोहाभ्यामभिभूतं स्वधर्मात् प्रच्युतप्रायं प्रतीत्य प्र
हसन्निवोपहासं कुर्वन्निव तदाश्वासार्थं हे भारत भरतान्वय इत्येवं
संबोध्य भगवानिदं प्रश्नोत्तरं निःश्रेयसाधिगमसाधनं वचनमुक्
तवानित्याह तमुवाचेति १० ॥

स्वामिकृतटीका

ततः किं वृत्तमित्यत आह तमुवाचेति प्रहसन्निवेति प्रसन्नमुखः हस
न्नित्यर्थः १० ॥

पिशाचभाष्यं

अस्य संबन्धाभिधेयप्रयोजनान्युच्यंते मोक्षस्तावत्प्रयोजनं सच गीता
शास्त्रप्रतिपादितात्परमार्थस्वरूपमभिधेयं परमार्थस्वरूपावबोधस्या
स्य च शास्त्रस्य साध्यसाधनलक्षणसंबंध इति विशिष्टप्रयोजनसंबंधा
भिधेयवद् गीताशास्त्रं प्रवर्ततेऽर्जुनस्य राज्यार्थं शत्रूञ्जिगीषोर्धात्तरा
ष्ट्रैः सह युद्धं संग्रामे तत्र सहायार्थेनैन भगवता वासुदेवेन सह रथ
मारुह्य योद्धुं युद्धभूमिप्रविष्टोऽर्जुन उभयोरपि सेनयोर्मध्ये योद्धुं व्यव
स्थितानाचार्यपितृपितामहपुत्रमित्रादीन्दृष्ट्वैते मया हन्तव्या मदर्थे
चैते मरिष्यन्ति इति पर्यालोच्य शोकमोहाभिभूतचित्ततया बहुप्रल
पनेयात्मस्वरूपं कायुद्धादुपरराम एवमुपरतायतनेस्मिन्द विषादमूल
शोकमोहापनोदाय परमकारुणिको भगवान्भक्तवत्सलो वासुदेवो
वेदान्तवाक्यैः समधिगम्यं परमार्थतत्त्वमुपदिदेश अत्र दृष्ट्वा तु पाण्डवा
नीकं इत्यारभ्य यावन्न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह इत्येवमंतो
ग्रंथः प्राणिनां शोकमोहबहुलसंसारोऽविद्यामूल इति प्रदर्शनार्थ
त्वेन व्याख्येयः १० ॥

रामानुजभाष्यं

एवमस्थाने समुपस्थितस्नेहकारुण्याभ्यामप्रकृतिंगतं क्षत्रियाणां प

गी०
टी०
वि०

४७

रंस्वधर्ममपिअधर्ममन्वाने धर्मबुभुत्सया शरणागते पार्थे सुहृद्रूपात्मया
थात्म्याज्ञानेनयुद्धस्यफलाभिसंधिरस्यस्वधर्मस्यात्मयाथात्म्यप्राप्त्युपा
यताज्ञानेनचविनास्यमोहोनशाम्यतीतिमत्वाभगवतापरमगुरुणा
ध्यात्मशास्त्रावतरणंकृतं तदुक्तं प्रस्थानेस्नेहकारुण्यधर्माधर्मविधा
कुलंपार्थंप्रपन्नमुद्दिश्यशास्त्रावतरणंकृतमिति तमेवदेहात्मनोर्या
थात्म्याज्ञाननिमित्तशोकाविष्टं देहातिरिक्तात्मज्ञाननिमित्तंचधर्माध
र्मभावमाणंपरस्परविरुद्धगुणान्वितमुभयोःसेनयोःयुद्धायोद्यतयोर्मध्ये
अकस्मान्निरुद्योगंपार्थमालोक्यपरमगुरुःप्रहसन्निवपरिहासमवांके
वदन्निवात्मपरमात्मयाथात्म्यंतत्प्राप्त्युपायभूतकर्मयोगज्ञानयोगभ
क्तियोगगोचरंनत्वेवाहंजातुनासमित्यारभ्य अहंत्वासर्वपापेभ्योमोक्ष
यिष्यामिमाशुचइत्येतदन्तमुवाचेत्यर्थः १० ॥

अभिनवगुप्तकृतटी० ॥
१० ॥

परमार्थप्रपाटी० ॥

अथार्जुनेविषादेननयोत्स्यइतिनिश्चित्यतूष्णींभूतेसतिभगवानाह (
तमुवाचेति हृषीकेशःआशयज्ञःहसंस्तमर्जुनंप्रतिप्रहसन्निवप्र
हासगर्भमिववचनमुवाच नतुविषादावसरेहासाद्युक्तमपिकथ
मुक्तंप्रहसन्निवेतितत्रोच्यते विषादोत्पत्तेरकारणकत्वात् यतोदु
नानाद्यवधादेवविषादोत्पत्तेर्दर्शनात् अकातेनभीष्मद्रोणकर्णदु
र्योधनाद्याःशौर्येणशक्रमप्यवगणयन्तः नात्रधर्ममनुरुध्यप्रवृत्ताः
नत्वमर्जुनत्वेनतेषुकथंकृपापात्रत्वं तथातेमहद्धापवेतिकुतोज्ञाते
स्वभुजप्रतापविश्वासादुत्तमसहायीभूतास्मत्स्वभावात् नाद्यःअस्मा
न्यतिस्वभुजप्रतापव्यापनस्यानौचित्यात् किंचअस्मत्सहायान्त
पयोगात् कौतुकदर्शनार्थंचेन्नरलोकवदकिंचित्करत्वेनागम
स्वैयर्थ्यात् नद्वितीयःवधस्यास्मन्निमित्तकत्वेनविषादानुत्प
त्तेः अतोपिविषादकारणमुक्तंतस्यतारणमात्रेकर्मणेःकर्ममार्ग
बहिर्भूतमित्याशयेनप्रहास्यमुखोभूत्वाप्रोवाचेत्यर्थः १० ॥

वनमालीकृतटीका

हृषीकेशः इंद्रियप्रेरकांतर्यामी ज्ञातिनस्तव मम सख्युः कथमीदृशी बुद्धिरिति हासं कुर्वन्निवेत्यर्थः १० ॥

कुसमवैजयंतीटीका

ननु यच्छ्रेयस्यान्निश्चितमस्य ब्रूहि तेऽहं शिष्यः प्रपन्नं मां शाधीत्येव मात्मश्रेयसे हरं संप्रपन्नो भूत्वा पुनः गुरोरग्रे तदुत्तरं विनैवातिधार्ष्ट्यं नाहं न योत्स्य इत्यनुचितं वदन्तूष्णीभूतेन कृष्णः किमुत्तरं मा दादय वानत्र ममानधिकारिणमनोपेक्षां कृतवानिति सबलज्जामात्रराश· यं ज्ञात्वा संजयस्तत्त्विरस्य नाहन्नामिति उभयोः सेनयोर्मध्ये यथापृथु त्सयापूर्वमागतेऽस्मिन्द्रकारुण्यभ्यानुस्मर्का विषीदन्तमति शायं मोहप्रा प्तवंतं तं पार्थं प्रहसन्निव प्रहोऽपूर्वका मात्रराधारवेशपाः शापहृषिते नैकरथेनापि त्वधास्वधर्मस्तत्तणाय साभिमानेन सर्वज्ञकुरुबले विजि· गीषणा वोऽप्युच्यन्नरदानीं त्वसमाज्ञौ हिसीवलेन परिहृतस्यापि मत्स्य हायस्यापितवेदं स्वधर्मविसर्जनमुचितमेवन कोप्येवं भूतस्त्वदन्यो भ वेदिति सखेदोक्त्यावहित्थः प्रहसन्निव वनलत्तनकर्मनाहर्षांदत्पुष्टाभावस्त्वरास त्वासप्रहसतीतीवशब्देनैवायमर्थः सूचित इति भावः हृषीकेशस्त स्त्रुपलक्षणं सर्वेषां चेतनाचेतनानां प्रेरयिताऽयमनेन सर्वप्रेरणाक र्तृस्वतंत्रस्याग्रेऽहं न योत्स्य इत्यर्जुनप्रतिज्ञायाः स्थितिर्न भविष्यती ति सूचितम् इदं वक्ष्यमाणमतिशयगंभीरार्थकं वचनं वाचनं दनहि कर्मालोकनोपेक्षां कृतवानित्यर्थः भारतेति संबोधनेन राजर्षिर्भर तस्य वंशेऽनुने नरोभक्तस्त्वदितरोऽभक्तस्त्वन कोप्यभवत् नापि भवि ष्यति चेति सूचितम् १० ॥

मधुसूदनीटीका

एवं युद्धमुपेक्षितवत्यर्जुने भगवानप्युपेक्षितवानिति धृतराष्ट्रस्य प्राणनिराशापाह सेनयोरुभयोर्मध्ये युद्धोद्यमेनागतयोस्तद्विरोधितं विषादं मोहं प्राप्तवंतमर्जुनं प्रहसन्निव अनुचिताचरणप्रकाशनेन लज्जांबुधौ मज्जयन्निव हृषीकेशः सर्वांतर्यामी भगवानिदं वद

गी·
टी· हि·

मारणमशोच्यानित्यादिवचः परमगंभीरार्थमनुचिताचरणप्रका
शकमुक्तवान् ननूपेक्षितवानित्यर्थः अनुचिताचरणप्रकाशने
न लज्जोत्पादनेन प्रहासः लज्जा च दुःखात्मिकेति द्वेषविषय एव स
र्वात्मा: अर्जुनस्य तु भगवत्कृपाविषयत्वादनुचिताचरणप्रका
शनस्य च विवेकोत्पत्तिहेतुत्वादेकदलाभावेन गौणप्रकाशं प्रह
सन्निति कृपयापितमिव भावः लज्जामुत्पादयितुमिव विवेकमुत्पाद
यितुमर्जुनस्यानुचिताचरणं भगवता प्रकाश्यते लज्जोत्पत्तिस्तु
नान्तरीयकतया स्यात् सा तु वेति न विवक्षितेति भावः यदि हि युद्धारं
भात्प्रागेव गृहे स्थितो युद्धमुपेक्षेत तदा नानुचितं कुर्यात् महता
संरंभेण तु युद्धभूमावागत्य तदुपेक्षणमतीवानुचितमिति कथयि
तुं सेनयोरित्यादिविशेषणं एतच्चाशोच्यानित्यादौ स्पष्टं भविष्यति १०

सदानंदीकृतटीका

एवमप्यर्जुने युद्धमुपेक्षितवतीश्वरः नैवोपेक्षितवानित्यमंयंप्र
त्याह संजयः १ आगत्य सेनयोर्मध्ये युद्धोद्योगेन चार्जुनं शामवंतं
विषादं च संमोहं युद्धरोधकं २ तं चेष्टया स्मेनोचितहसनेन प्रकाश
यन् श्रीनर्मीतमाहेशो लज्जाब्धौ मज्जयन्निव ३ वक्ष्यमाणमिदं
वातिगंभीरं सारवद्वचः ४ १०

नीलकंठीकृतटीका

तमिति मूढोप्ययममूढवद्वदतीति प्रहसन्निव इदं वक्ष्यमाणं १०

[illegible]कृतटीका

आनंदी टीका

तं पार्थं उभयोः सेनयोर्मध्ये शोकप्रकारेण सीदमानं शोकाभिह
तं युद्धं प्रति निष्क्रियात्मानं प्रहसन्निव विकृतचेष्टादर्शनादुप
हसन्निव हृषीकाणामिन्द्रियाणामीशः प्रेरयिता परमात्मस्व
पश्चात्तरात्मा भगवान् देहाहंभावनाविभूतमिथ्याज्ञानस्या
स्यानयोत्थामीति कृतसंकल्पस्य तत्त्वज्ञानोपदेशं विनामि
थ्याज्ञाननिवृत्तेरसंभव इति तत्त्वोपदेशपूर्वं स्वकर्मणि प्रव
र्तयिष्यन् इदं देहदेहिनोः संयोगवियोगस्वरूपमुपदिशन्निव वाच
त्यर्थः १० ॥

रामकंठी टीका

एवमविद्यामोहपरित्यक्तसंग्रामाध्यवसायमर्जुनं सम्यग्ज्ञा
नोपदेशेनात्र स्वकर्मणि प्रवर्तयिष्यन् भगवानुवाच १०

लासिकी [illegible] टीका

ततः किं हन्तेत्यत आह तमिति [illegible] प्रहसन्निव बोधयुक्त
स्याप्यर्जुनस्य व्यामोहकलत्वं न स्वमायाशक्तेर्वैभवं च मत्कृतं वद
न्तवर्जुनमुल्लएढयन्निति इव शब्दप्रयोगः [illegible] १०

पंचोली टीका

ततः किं हन्तमित्यपेक्षायामाह हे भारत हृषीकेशः श्रीनाराय
णः प्रसन्नवदनः सन् उभयोः सेनयोर्मध्ये विषीदन्तं विषादं कुर्व
न्तं अर्जुनं प्रति इदं वक्ष्यमाणं वचः वाक्यमुवाच १० ॥

रणवीरसमिद्धायिनी ॥

एवं युद्धनिश्चयेदं यनं जयं भगवान्नोपेक्षितवानित्याह तमुवाचेति
सेनयोरुभयोर्मध्ये समराध्यवसायेनागत्य तत्कालानुवितं विषादे
कुर्वंतं तमर्जुनं प्रहसन्निव लज्जितं कुर्वन्निव हृषीकेशः सर्वांतर्या
मी भगवान् इदं वक्ष्यमाणं वचः सोपपत्तिकं तत्कालोचितं वचन
मेतदर्थमुवाच नतूपेक्षितवान् लज्जाकारत्वं समरोद्यमेनेवागतस्य पश्चा
त्तत एव निवृत्तेः कल्मतत्स्वभावस्यैव प्रकाशनादुत्पाद्यते इति १० ॥

49

(मधुभाष्य)

तत्रकेनयोर्मध्येवांयवादिमोहनो न संहृतं विपरीतं न कर्त्तनं भगवानुवाच १०॥

रामचंद्रसरस्वतीकृतटीका·

नमस्काचेति नमिति ममताक्रांतनेपि देववशादुपपन्नसर्वस
स्वतुल्लतराउदमेवच भगवद्गीताकथने निदानं व्याख्यातंशा
यमयत् एवमनायाससंपन्नसमुत्तुल्लतरामज्ञेनंवीसात्माना
त्मतत्वविवेकप्रदर्शनपूर्वकशोकापनोदहेतुभूतं पैत्र्यज्ञानेस
र्वसहकारिसध्रीचीनंमोहस्वरूपादिचोपदिदिक्षुः किंस्वल्पदे
हान् शोचसि भीष्मादीनां किमात्मानं शोचसीति तावद्विकल्प्याद्यं
निराकर्तुं प्रतिजानीते १०॥

क्या

50

भाषाअनुवाद

तिसके अनन्तर क्या भयासो कहते हैं कि दोनो सेनाके बीचमे विषाद को प्राप्तभये अर्जुन को संबोधन करि भगवान हसते हुये वर्तमानये वचन कहने लगेहे भारतधृतराष्ट्र ॥ १० ॥

दोहा॥

हे भारत हसके तेहिक दिन भए हृषीकेश सेना दोउ
मध्य मेहिं पावत प्रबल कलेश १० ॥

51

श्रीभगवानुवाच

शांकरभाष्यं

दृष्ट्वा तु पाण्डवानीकमित्यारभ्य न योत्स्य इति गोविन्दमुक्त्वा तू
ष्णीं बभूव हेत्येतदन्तः प्राणिनां शोकमोहादिसंसारदुःखबीज
भूतदोषोद्भवकारणहेतुप्रदर्शनार्थत्वेन व्याख्येयो ग्रन्थस्तथाहि अ
र्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसम्बन्धिबान्धवेष्वहमेषां
ममैते इत्येवं भ्रान्तिप्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तावा
त्मनः शोकमोहौ प्रदर्शितौ कथं भीष्ममहं संख्ये इत्यादिना
शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः स्वत एव क्षात्रधर्मे यु
द्धे प्रवृत्तोपि तस्माद्युद्धादुपरराम परधर्मं च भिक्षाजीवनादि
कं कर्त्तुं प्रववृते तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्ट
चेतसां स्वभावत एव स्वधर्मपरित्यागः प्रतिषिद्धसेवा च स्यात्
स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मनःकायादीनां प्रवृत्तिः
फलाभिसन्धिपूर्विकैव साहङ्कारा च भवति तत्रैवं सति धर्मा
धर्मोपचयादिष्टानिष्टजन्मसुखदुःखादि प्राप्तिलक्षणः संसा
रः नुपरतो भवतीति अतः संसारबीजभूतौ शोकमोहौ तयोश्च
सर्वकर्मसंन्यासपूर्वकादात्मज्ञानात् नान्यतो निवृत्तिरिति तदुप
दिदिक्षुः सर्वलोकानुग्रहार्थं अर्जुनंनिमित्तीकृत्याह भगवान् वा
सुदेवः अशोच्यानित्यादि तत्र केचिदाहुः सर्वकर्मसंन्यासपूर्वका
दात्मज्ञाननिष्ठामात्रादेव केवलात् कैवल्यं न प्राप्यत एव किं तर्हि
अग्निहोत्रादिश्रौतस्मार्त्तकर्मसहितात् ज्ञानात् कैवल्यप्राप्तिरिति
सर्वासु गीतासु निश्चितोऽर्थ इति ज्ञापकं चाहुरस्यार्थस्य अथ चे
त्त्वमिमं धर्म्यं संग्रामं न करिष्यसि कर्म्मण्येवाधिकारस्ते कुरु कर्म्मै
व तस्मात्त्वमित्यादि हिंसादियुक्तत्वाद्वैदिकं कर्म्म अधर्म्मायेतीयमा
शंका न कार्य्या कथं क्षात्रं कर्म्म युद्धलक्षणं गुरुभ्रातृपुत्रादि हिंसा

गी·
टी·द्वि

52

दिलक्षणमत्यन्तनरमपि स्वधर्मं त्वनिष्ठता नाधर्माय तदकरणे
च ततः स्वधर्मं कीर्त्तिं च हित्वा पापमेवाप्स्यसीति ब्रुवता यावज्जी
वादिश्रुतिचोदितानां स्वकर्मणां पश्वादिहिंसालक्षणानां च क
र्मणामशेषेण ना धर्मत्वमिति सुनिश्चितमुक्तं भवतीति ।
तदसत् ज्ञानकर्मनिष्ठयोर्विभागवचनात् बुद्धिद्वयाश्रययोर
शोच्यानित्यादिनाग्रन्थेन भगवता यावत् स्वधर्ममपि चावेक्ष्ये
तदन्तेन ग्रन्थेन यत् परमार्थात्मतत्त्वनिरूपकृतं तत् सांख्यं
तद्विषया बुद्धिरात्मनो जन्मादि षड्विक्रियाभावादकर्त्तात्मेति
प्रकरणार्थ निरूपणात् या जायते सा सांख्यबुद्धिः सा येषां
ज्ञानिनामुचिता भवति ते सांख्याः एतस्या बुद्धेर्जन्मनः प्रागात्म
नो देहादिव्यतिरिक्तस्य कर्त्तृत्वभोक्तृत्वाद्यपेक्षो धर्माधर्मविवेकपू
र्वको मोक्षसाधनानुष्ठाननिरूपणलक्षणो योगः तद्विषयाबुद्धि
योगबुद्धिः सा येषां कर्म्मिणामुचिता भवति ते योगिनः तथा
च भगवताविभक्ते द्वे बुद्धी निर्दिष्टे एषा तेऽभिहिता सांख्ये बु
द्धिर्योगे त्विमां शृण्विति तयोश्च सांख्यबुद्ध्याश्रयां ज्ञानयोग नि·
ष्ठां सांख्यानां विभक्तां वक्ष्यति पुरा वेदात्मना मयाप्रोक्तेति त·
थाच योगबुद्ध्याश्रयां कर्मयोगेन निष्ठां विभक्तांच वक्ष्यति कर्म
योगेन योगिनामित्येवं सांख्यबुद्धिं योगबुद्धिञ्चाश्रित्य द्वे निष्ठे वि
भक्ते भगवतैवोक्ते ज्ञानकर्मणोः कर्त्तृत्वाकर्तृत्वैकत्वानेकत्वबु·
द्ध्याश्रययोरेकपुरुषाश्रयत्वासम्भवं पश्यता यथैतद्विभागवचनं
तथैवदर्शितं शातपथीये ब्राह्मणे एतमेव प्रव्राजिनो लोक।
मिच्छन्तो ब्राह्मणाः प्रव्रजन्तीति सर्वकर्मसंन्यासं विधाय तच्छे
षेण किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति तत्रै
व च प्राग्दारपरिग्रहात् पुरुष आत्मा प्राकृतो धर्मजिज्ञासोत्तर
कालं लोकत्रयसाधनं पुत्रद्विप्रकारञ्च वित्तं मानुषं दैवञ्चत

च मानुष्यंवित्तं कर्म्मरूपं पितृलोकप्राप्तिसाधनं विद्याञ्च दैवं वि
त्तं देवलोकप्राप्तिसाधनं सोऽकामयतेति अविद्याकामवत एव स
र्वाणि कर्म्माणि श्रौतादीनि दर्शितानि तेभ्योव्युत्थाय प्रव्रजन्ती
ति व्युत्थानमात्मानमेव लोकमिच्छतोऽकामस्य विहितं तदेतद्धि
भगवद्वचनमनुपपन्नं स्यात् यदि श्रौतकर्म्मज्ञानयोः समुच्च
योभिप्रेतः स्याद्भगवतः ॥ नच अर्ज्जुनस्य प्रश्नउपपन्नोभवति
ज्यायसी चेत् कर्म्मणस्ते इत्यादि एकपुरुषानुष्ठेयत्वासम्भवं बु
द्धिकर्म्मणोर्भगवता पूर्वमनुक्तं कथमर्ज्जुनोऽश्रुतं बुद्धेश्च कर्म्म
णोज्यायस्त्वं भगवत्यध्यारोपयेत् मृषैव ज्यायसी चेत् कर्म्मणस्ते
मता बुद्धिरिति किञ्च यदि बुद्धिकर्म्मणोः सर्वेषां समुच्चय उक्तः
स्यात् अर्ज्जुनस्यापि स उक्त एवेति यच्छ्रेय एतयोरेकं तन्मेब्रूहि
सुनिश्चितमिति कथमुभयोरुपदेशे सत्यन्यतरविषयएव प्रश्नः
स्यात् नहि पित्तप्रशमनार्थिना वैद्येन मधुरं शीतलञ्च भो
क्तव्यमित्युपदिष्टे तयोरन्यतरत् पित्तप्रशमनकारणं ब्रूहीतिप्रश्नः
सम्भवति अथार्ज्जुनस्य भगवदुक्तवचनार्थविवेकानवधारणनि
मित्तः प्रश्नः कल्प्येत तथापि भगवता प्रश्नानुरूपं प्रति वच
नं देयं मया बुद्धिकर्म्मणोः समुच्चय उक्तः किमर्थमित्थं त्वं भ्रान्तोसी
ति नतु पुनः प्रतिवचनमननुरूपं पृष्टादन्यदेव द्वे निष्ठे मया पुरा
प्रोक्ते इतिवक्तुं युक्तं नापिस्मार्त्तेनैव कर्म्मणा बुद्धेः समुच्चयेऽभि
प्रेते विभागवचनादि सर्वमुपपन्नंकिञ्च क्षत्रियस्य युद्धं स्मार्त्तं क
र्म्म स्वधर्म्मइति जानतस्तत् किं कर्म्मणि घोरे मां नियोजयसीत्युपा
लम्भोऽनुपपन्नस्तस्मात् गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्त्ते
न वा कर्म्मणात्मज्ञानस्य समुच्चयो न केनचिद्दर्शयितुं शक्यः।
यस्य त्वज्ञानाद्रागादिदोषतोवा कर्म्मणि प्रवृत्तस्य यज्ञेन दानेन त
पसा वा विशुद्धसत्त्वस्यज्ञानमुत्पन्नं परमार्थतत्त्वविषयमेकमे

गी· टी· हि

वेद सर्वब्रह्मलोककर्त्ता चेति तस्य कर्म्मणि कर्म्मप्रयोजने च निवृत्तेपि
लोकसंग्रहार्थं यत्नपूर्वं यथाप्रवृत्तिस्तथैव कर्म्मणि प्रवृत्तस्य य
त् प्रवृत्तिरूपं दृश्यते न तत् कर्म्म येन बुद्धेः समुच्चयः स्यात् यथा
भगवतो वासुदेवस्य क्षत्रधर्म्मचेष्टितेन ज्ञानेन समुच्चीयते पुरु
षार्थसिद्धये तद्वत्तत्फलाभिसन्ध्यहङ्काराभावस्य तुल्यत्वात् विदु
षः तत्त्वविन्नाहं करोमीति मन्यते न च तत्फलमभिसन्धत्ते यथा
च स्वर्गादिकामार्थिनोऽग्निहोत्रादिकर्म्मानुष्ठानायाहिताग्नेः का
म्य एवाग्निहोत्रादौ प्रवृत्तस्य सामिकृते विनष्टेपि कामे तदेवाग्नि
होत्राद्यनुतिष्ठतोपि न तत् काम्यमग्निहोत्रादि भवति तथा च द
र्शयति भगवान् कुर्वन्नपि न करोति न लिप्यते इति । अत्र यच्च
पूर्वैः पूर्वतरं कृतं कर्म्मणैव हि संसिद्धिमास्थिता जनकादय इति त
त्प्रविभज्य विज्ञेयं तत्कथं यदि तावत् पूर्वे जनकादयः तत्त्व
विदोपि प्रवृत्तकर्म्माणः स्युस्ते लोकसंग्रहार्थं गुणा गुणेषु वर्त्तन्त
इतिज्ञानेनैव संसिद्धिमास्थिताः । कर्म्मसन्न्यासे प्राप्तेपि कर्म्मणा
सहैव संसिद्धिमास्थिता न कर्म्मसन्न्यासं कृतवन्त इत्येषोऽर्थः । अथ
न ते तत्त्वविद ईश्वरसमर्पितेन कर्म्मणा साधनभूतेन संसिद्धिं सत्त्व·
शुद्धिं ज्ञानोत्पत्तिलक्षणां वा संसिद्धिमास्थिता जनकादय इति व्या·
ख्येयं एतमेवार्थं वक्ष्यति भगवान् सत्त्वशुद्धये कर्म्म कुर्वन्तीति स्व
कर्म्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इत्युक्त्वा सिद्धिप्राप्तस्य च
पुनर्ज्ञाननिष्ठां वक्ष्यति सिद्धिं प्राप्तो यथा ब्रह्मेत्यादिना तस्माद्गीता
सु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिः न कर्म्मसमुच्चितादिति निश्चि
तोऽर्थः यथा चायमर्थस्तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्या
मः । तत्रैवं धर्म्मसंमूढचेतसो मिथ्याज्ञानवतो महति शोकसागरे
निमग्नस्यार्जुनस्यान्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान् वासु
देवस्ततः कृपयार्जुनमुद्दिधारयिषुरात्मज्ञानायावतारयन्नाह ।

मित्याशंक्या

तन्मध्यमवाक्यस्य कथमेकवाक्यत्वं पर्यैकत्वा

आनन्दगिरिकृतटीका

(भगवद्वचनमुदाहरति श्रीभगवानिति)

अतीतसन्दर्भस्य समनन्तरग्रन्थमर्थं विवक्षिता तस्मिन्नेव वाक्यविभाग
मवगमयति दृष्ट्वेतीति धर्मक्षेत्रे कुरुक्षेत्रे इत्यादिराद्यश्लोकस्तावदे
कं वाक्यं शास्त्रस्य कथासम्बन्धपरत्वेन पर्यवसानात् दृष्ट्वेत्यारभ्य या
वत् तूष्णीं बभूव हेति तावदेकं वाक्यं अत आरभ्य इदं वचनं तेन दत्तो
ग्रन्थो भवत्यपरं वाक्यमिति विभागः। तत्राद्यश्लोकस्य पृथगेक
वाक्यत्वे प्रकृतशास्त्रस्य महाभारते॰ वक्तारावयोतिर्बाधान्तिमस्या
पि सम्भवत्येकवाक्यत्वमर्जुनाश्वासार्थतया प्रवृत्तत्वादित्याह प्रा
णिनामिति। शोको मानसस्तापो मोहो विवेकाभाव आदिश
ब्दस्तदवान्तरभेदार्थः स एव संसारस्य दुःखात्मनो बीजभूतो
दोषस्तस्योद्भवे कारणमहङ्कारो ममकारस्तद्धेतुरविद्या च त॰
त्प्रदर्शनार्थत्वेनेति योजना। संगृहीतमर्थं विवृणोति तथा
हीति। राज्यं राज्ञः कर्म परिपालनादि प्रजाद्दी गुरवो द्रोणा
दयः पुत्राः स्वेनोत्पादिताः सौभद्रादयः सम्बन्धान्तरमन्तरेण
स्वे हृद्गोचरा गुरुपुत्रप्रभृतयो मित्राः प्राहेतोच्छन्नेऽपकारनिर
पेक्षतया स्वयमुपकारिणो हृदयानुरागभाजो भगवत्प्रमुखाः
सुहृदः स्वजना ज्ञातयो दुर्योधनादयः सम्बन्धिनः श्वशुरस्याल
प्रभृतयो द्रुपदधृष्टद्युम्नादयः परम्परया पितृपितामहादिष्वनु
रागभाजो राजानो बान्धवास्तेषु यथोक्ते प्रत्यये निमित्तीकृ
त्य यः स्नेहो यश्चैतैः सह विच्छेदो यश्चैतेषामुपघाते पातकं
या च लोकगर्हा सर्वं तन्निमित्तं ययोरात्मनः शोकमोहयोस्तावे
तौ संसारबीजभूतौ कथमित्यादिना दर्शिताविसर्थः। कथंपु
नरनयोः संसारबीजयोरर्जुने सम्भावना उपपद्यते नहि प्रथित
महामहिम्नो विवेकविज्ञानवतः स्वधर्मे प्रवृत्तस्य तस्य शोक

वाक्य

गी॰
टी॰ द्वि॰

54

मोहावनर्थहेतू सम्भावितावित्याशंक्य विवेकतिरस्कारेण तयो
र्विहिताकरणप्रतिषिद्धाचरणत्वादनर्थाधायकयोरस्ति तस्मिन्
सम्भावनेत्याह शोकमोहाभ्यामिति। भिक्षया जीवनं प्राणधार
णमादिशब्दादशेषकर्मसंन्यासलक्षणं पारिव्राज्यमात्माभिधान
मित्यादि शृणु ते किञ्चार्जुनेन दृश्यमानौ शोकमोहौ संसारबीज
शोकमोहत्वादस्मदादिनिष्ठशोकमोहवदित्युपलब्धौ शोकमोहौ
प्रत्येकं पक्षीकृत्यानुमानद्वयमित्याह तथा चेति शोकमोहादीत्यादि
शब्देन मिथ्याभिमानस्नेहरागादयो गृह्यन्ते स्वभावतश्चित्तदोष
सामर्थ्यादित्यर्थः अस्मदादीनामपि स्वधर्मप्रवृत्तानां विहिताकर
णत्वाद्यभावान्न शोकादेः संसारबीजतेति दृष्टान्तस्य साध्यविक
लतेति चेत्तत्राह स्वधर्मइति। कामादीनामित्यादिशब्दादिविशिष्टा
नीन्द्रियाण्युपादीयन्ते फलाभिसन्धिस्तद्विषयेऽभिलाषः कर्तृत्वभोक्तृत्वा
भिमानोऽहंकारः। आगन्तुकप्रकारेण वागादिव्यापारे सति किं सि
ध्यतीत्याह तत्रेति। शुभकर्मानुष्ठानेन धर्मोपचयादिह देवा·
दिजन्म ततः सुखप्राप्तिः अशुभकर्मानुष्ठानेनाधर्मोपचयाद
दिह तिर्य्यगादिजन्म ततो दुःखप्राप्तिः व्यामिश्रकर्मानुष्ठानादु
भाभ्यां धर्माधर्माभ्यां मनुष्यजन्म ततः सुखदुःखे भवतः एव
मात्मकः संसारः सन्ततो वर्तत इत्यर्थः। अर्जुनस्यान्येषाञ्च शो
कमोहयोः संसारबीजत्वमुपपादितमुपसंहरति इत्यत इति। त
देवं प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्यात्मज्ञानेन·
निवर्तनीयशोकमोहाख्यसंसारबीजप्रदर्शनपरत्वं दर्शयित्वा व
क्ष्यमाणसन्दर्भस्य सहेतुसंसारनिवर्तकसम्यग्ज्ञानोपदेशे ता
त्पर्यं दर्शयति तथोक्त्वेति। तद्यथोक्ते ज्ञानमुपदिदिक्षुरुपदेष्टुमि
च्छन्भगवानाहेति सम्बन्धः। सर्वलोकानुग्रहार्थं यथोक्तं ज्ञानं
भगवानुपदिदिक्षतीत्ययुक्तमर्जुनं प्रत्येवोपदेशादित्याशंक्या

ह अर्ज्जुनमिति । नहि तस्यामवस्थायामर्ज्जुनस्य भगवता यथोक्तं
ज्ञानमुपदेष्टुमिष्टं किन्तु स्वधर्म्मानुष्ठानाद्बुद्धिशुद्ध्युत्तरकालमित्य
भिप्रेत्योक्तं निमित्तीकृत्येति । सर्वकर्म्मसंन्यासपूर्वकादात्म-
ज्ञानादेव केवलात् कैवल्यप्राप्तिरिति गीताशास्त्रार्थः स्वाभिप्रेतो
व्याख्यातः संप्रति वृत्तिकृतामभिप्रेतं निरसितुमनुवदति तत्रे
ति । निर्द्धारितः शास्त्रार्थः सति सप्तम्या परामृश्यते । तेषां वृत्ति
मेव विवरणवाक्यादौ सैद्धान्तिकमभ्युपगमं [illegible]
[illegible] । [illegible] प्रत्यादिशन्ति सर्वकर्म्मेति । वैदिके
न कर्म्मणा समुच्चयं व्युदसितुं मात्रपदं स्मार्त्तेन कर्म्मणा स
मुच्चयं निरसितुमवधारणं । अभ्यासतमन्वयं धुनीते केवलादि
ति । नैवेत्येवकारः सम्बध्यते केन तर्हि प्रकारेण ज्ञानं कैवल्य-
प्राप्तिकारणमित्याशंक्याह किं तर्हीति किन्तु प्रसाधकमित्याशं-
क्य इदमेव शास्त्रमित्याह इति सर्वास्विति यथा प्रयाजानुयाजाद्यु
पकृतमेव दर्शपूर्णमासादि स्वर्गसाधनं तथा श्रौतस्मार्त्तकर्म्मो
पकृतमेव ब्रह्मज्ञानं कैवल्यं साधयति विमतं सेतिकर्त्तव्यता
कमेव स्वफलसाधकं कारणत्वाद्दर्शपूर्णमासादिवत् तदेवं ज्ञा
नकर्म्म समुच्चयपरं शास्त्रमित्यर्थः इति यदमाकृरिस्यनेन सर्वे
ण सम्बध्यते । पौर्वापर्य्यपर्य्यालोचनया शास्त्रस्य समुच्चयप
रत्वं न निर्द्धारितमित्याशंक्याह ज्ञापकं चेति । न केवलं ज्ञानस्य
क्लिष्टतरपि न समुच्चितमित्यस्यार्थस्य स्वधर्म्माननुष्ठाने पाप
प्राप्तिवचनसामर्थ्यलक्षणं लिङ्गं गमकमित्यर्थः । शास्त्रस्य
समुच्चयपरत्वे लिङ्गवद्वाक्यमपि प्रमाणमित्याह कर्म्मण्येवे
ति तत्रैव वाक्यान्तरमुदाहरति कुरु कर्म्मेति । ननु न हिंस्या-
त् सर्वभूतानीत्यादिना प्रतिषिद्धत्वेन हिंसादेरनर्थहेतुत्वा
वगमात्तद्रूपेण वैदिकं कर्म्म धर्म्मायेति नानुष्ठातुं शक्यते

गी० टी० हि०

55

तथा च तस्य सापेक्षत्वेन समुच्चयो न सिध्यतीति सांख्यमत-
माशंक्य परिहरति हिंसादिति । आदिशब्दादुच्छिष्टभक्षणं गृ
ह्यते । यथोक्ता शङ्का न कर्तव्येत्याकांक्षापूर्वकं हेतुमाह
कथमित्यादिना । स्वशब्देन क्षत्रियो विवक्षिते युद्धाकरणे क्षत्रि
यस्य प्रत्यवायश्रवणात्तस्य तं प्रति नित्यत्वेनावश्यकर्तव्यत्वे
[illegible] प्रतीतेर्गुर्वादिहिंसायुक्तमति क्रूर
मपि कर्म नाधर्मायेति हेत्वन्तरमाह तदकरणे चेति आचा
र्यादिहिंसायुक्तमतिक्रूरमपि युद्धं नाधर्मायेति ब्रुवता भगव
ता श्रौतानां हिंसादियुक्तानामपि कर्मणां हतो नाधर्मत्व
मिति स्पष्टमुपदिष्टं भवति सामान्यशास्त्रस्य व्यर्थहिंसानिषे
धार्थत्वात् क्रतुविषये चोदितहिंसायास्तदविषयत्वात् क्रतो वै
दिककर्मानुष्ठानानुपपत्तिरित्यर्थः ज्ञानकर्मसमुच्चयात् कैव
ल्यसिद्धिरित्यपि संहृतमिति प्राहुः । यत्तावदुक्तं ज्ञानं सेतिकर्त
व्यताकं स्वफलसाधकं कारणत्वादिति अनुमानं तद्दूषयति तदस
दिति । न हि शुक्तिकादिज्ञानमज्ञाननिवृत्तौ स्वफले सहकारि
किंचिदपेक्षते तथा च व्यभिचारादसाधकं करणत्वमित्यर्थः य
त्तु गीताशास्त्रे समुच्चयस्यैव प्रतिपाद्यतेति प्रतिज्ञानं तदपि
विभागवचनविरुद्धमित्याह ज्ञानेति । सांख्यबुद्धिं योगबुद्धिमि
ति बुद्धिद्वयं तत्र सांख्यबुद्ध्याश्रयां ज्ञाननिष्ठां व्याख्यातुं सांख्य
शब्दार्थमाह अशोच्यानित्यादिना इति अशोच्यानित्यादिना स्वधर्म
मपि चावेक्ष्येत्या तदन्तं वाक्यं यावत्प्रविश्यति तावता ग्रन्थेन यत्प
रमार्थभूतमात्मतत्त्वं भगवता निरूपितं तद्यया सम्यक् व्याख्या
यते प्रकाश्यते सा वैदिकी सम्यग्बुद्धिः संख्या तया प्रकाश्यत्वे
न सम्बन्धि प्रकृतं तत्त्वं सांख्यमित्यर्थः सांख्यशब्दार्थमुक्त्वाशिकां बु
द्धिं तदन्तस्य सांख्यान् व्याकरोति तद्विषयेति तद्विषया बुद्धिः सां

ख्येबुद्धिरिति सम्बन्धः तामेव प्रकटयति आत्मन इति न जाय
ते म्रियते वेत्यादि प्रकरणार्थनिरूपणद्वारेणात्मनः षड्भाव
विक्रियासम्भवात् कूटस्थोसाविति सा बुद्धिरुत्पद्यते सासां
ख्यबुद्धिः तत्पराः सन्न्यासिनः सांख्या इत्यर्थः सम्प्रतियोगबु
द्ध्याश्रयां कर्म्मनिष्ठां व्याख्यातुकामो योगशास्त्रार्थमाह एतस्या
इति यथोक्तबुद्ध्युत्पत्तौ विरोधादेवानुष्ठानायोगात्तस्यास्तन्निव
र्तकत्वात् पूर्वमेवतदुत्पत्तेरात्मनश्च देहादिव्यतिरिक्तत्वाय
पेक्षया धर्म्माधर्म्मौ निश्चित्य तेनेश्वराराधनरूपेण कर्म्मणा शु
द्धो मोक्षाय युज्यते योगः सम्पद्यते तेन मोक्षसिद्धये परम्प
रया साधनीभूतश्रौतधर्म्मानुष्ठानात्मको योग इत्यर्थः अथयो
गबुद्धिं विभजन् योगिनो विभजते तद्विषयेति उक्ते बुद्धिद्वये
भगवतोऽभिमतिं दर्शयति तथा चेति सांख्यबुद्ध्याश्रया ज्ञान
निष्ठेत्येतदपि भगवतोऽभिमतमित्याह तयोश्चेति ज्ञानमेव
योगो ज्ञानयोगस्तेन हि ब्रह्मणा युज्यते तादात्म्यमापद्यते ते
न संन्यासिनां निष्ठा निश्चयेन स्थितिस्तात्पर्य्येण परिसमाप्ति
स्ता कर्म्मनिष्ठातोऽव्यतिरिक्तां निष्ठयोर्मध्ये निश्चित्य भगवान्
वदतीति योजना लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया
नघ ज्ञानयोगेन सांख्यानामित्येतद्वाक्यमुक्तार्थविषयमर्थतो
नुवदति पुरेति योगबुद्ध्याश्रया कर्म्मनिष्ठेत्येतदपि भगवद
मतिमादर्शयति तथा चेति कर्म्मैव योगः कर्म्मयोगस्तेन बु
द्धिशुद्धिद्वारा मोक्षहेतुज्ञानाय पुमान् युज्यते तेन निष्ठां कर्म्मि
णां ज्ञाननिष्ठातो विलक्षणां कर्म्मयोगेनेत्यादिना वदति भग
वानिति योजना निष्ठाद्वयं बुद्धिद्वयाश्रयं भगवता विभज्योक्तमु
पसंहरति एवमिति कथा पुनरनुपपन्ना भगवता निष्ठाद्व
ये विभज्योक्तमित्याशङ्क्याह ज्ञानकर्म्मणोरिति कर्म्महि क

गी·
टी· हि

56

र्त्वाद्यनेकत्वतुल्याश्रयं ज्ञाने पुनरकर्तृत्वैकत्वतुल्याश्रयं तदुभ
यमिमं विरुद्धसाधनसाध्यत्वान्नैकावस्थस्यैव पुरुषस्य सम्भवस
तोऽयुक्तमेव तयोर्विभागवचनमित्यर्थः । भगवदुक्तविभागव
चनस्य मूलत्वेन श्रुतिमुदाहरति । तत्र ज्ञाननिष्ठाविषयं वा
क्यं पठति एतमेवेति प्रकृतमात्मानं नित्यवित्तमित्यभावं वे
दितुमिच्छन्तः त्रिविधेऽपि कर्म्मफले वैतृष्ण्यभाजः सर्वाणि क
र्म्माणि परित्यज्य ज्ञाननिष्ठाः भवन्तीति पञ्चमलकारस्वीकारे
ण संन्यासविधिं विवक्षितवान् तस्यैव विधेः शेषेणार्थवादेन किं
प्रजयेत्यादिना मोक्षफले ज्ञानमुक्तमित्यर्थः । ननु फलाभावा
त् प्रक्षेपो नोपपद्यते पुत्रेणैतल्लोकजयस्य वाक्यान्तरसिद्धत्वा·
दित्याशङ्क्य विदुषोऽप्रजासाध्यमनुष्यलोकस्यात्मव्यतिरेकेणा
भावादात्मनश्चासाध्यत्वाद्विदुषो युक्तिमानिति विवक्षित्वाह
येषामिति । इति ज्ञानं दर्शितमिति शेषः तस्मिन्नेव ब्राह्मणे
कर्म्मनिष्ठावाक्यं दर्शयति तदेवेति प्राक्तनत्वमतत्त्वदर्शित्वेना
ज्ञत्वं सच ब्रह्मचारी सन् गुरुसमीपे यथाविधि वेदमधीत्वा
र्थज्ञानार्थं धर्म्मजिज्ञासां कृत्वा तदनन्तरकाले लोकत्रयप्राप्ति
साधनं पुत्रादित्रयं सोऽकामयत जाया मे स्यादित्यादिना का
मितवानिति श्रुतमित्यर्थः वित्तं विभजते द्विप्रकारमिति ।
तदेवप्रकारद्वैरूप्यमाह मानुष्यमिति । मानुष्ये वित्ते याच
ष्ट कर्म्मरूपमिति तस्य फलपर्य्यवसायित्वमाह पितृलोके
ति दैवं वित्तं विभजते विद्यायेति तस्यापि फलनिष्ठत्वमाह
दैवेति कर्म्मनिष्ठाविषयत्वेनोदाहृतश्रुतेस्तात्पर्य्यमाह अविधे
ति अज्ञस्य कामनाविशिष्टस्यैव कर्म्माणि सोऽकामयतेत्यादि
ना दर्शितानीत्यर्थः । ज्ञाननिष्ठाविषयत्वेन दर्शितश्रुतेरपि
तात्पर्य्यं दर्शयति तेभ्य इति । कर्म्मसु विरक्तस्यैव संन्यासपूर्वि

ज्ञा॰

ष॰

कात्ज्ञाननिष्ठाम्प्रागुदाहृत्य क्रमाद् दर्शितेत्यर्थः अवस्थाभेदेन ज्ञान
कर्मणोर्भिन्नाधिकारत्वस्याश्रुतत्वात् तन्मूलेन भगवतो वि
भागवचनेन शास्त्रस्य समुच्चयपरत्वप्रतिज्ञानमपबाधितमि
तिसाधितं किञ्च समुच्चयो ज्ञानस्य श्रौतेन वा कर्मणा विव
क्षते यदि प्रथमे तत्राह तदेतदिति । समुच्चयेऽभिप्रेते प्रश्ना
नुपपत्तिं दोषान्तरमाह नेचेति । तामेवानुपपत्तिं प्रकटय
ति एकपुरुषेति । यदि समुच्चयः शास्त्रार्थो भगवता विव
क्षितस्तदा ज्ञानकर्मणोरेकेन पुरुषेणानुष्ठेयत्वमेव तेनोक्त
मर्जुनेन च श्रुतं तत् कथं तदसम्भवमनुक्तमश्रुतं च मिथ्यैव
श्रोता भगवत्यारोपयेत्तच तदारोपादृते किमिति मां कर्मणि
वातिक्रूरे युद्धलक्षणे नियोजयसि इति प्रश्नोऽवकल्पते तथा
च प्रश्नालोचनया सहृप्रतिबन्धाः शास्त्रार्थतया समुच्चयो
ऽभिप्रेतो न भवतीति प्रतिभातीत्यर्थः किञ्च समुच्चयपदे क
र्मापेक्षया बुद्धेर्ज्यायस्त्वं भगवतापूर्वमनुक्तमर्जुनेन चाश्रुतं
कथमसौ तस्मिन्नारोपयितुमर्हतीति ततश्चानुवादवचनं श्रोतुरनु
चितमित्याह बुद्धेश्चेति । अतश्च समुच्चयः शास्त्रार्थो न सम्भवत्य
न्यथा पञ्चमादावर्जुनस्य प्रश्नानुपपत्तेरित्याह किञ्चेति समुक्तो
पि समुच्चयेनार्जुनं प्रत्युक्तोऽसाविति तदीय प्रश्नोपपत्तिरित्याश
ङ्क्याह यदीति एतयोः कर्मतत्त्यागयोरिति यावत् । ननु क
र्मापेक्षया कर्मत्यागपूर्वकस्य ज्ञानस्य प्राधान्यात्तस्य श्रेयस्त्वात्त
द्विषयप्रश्नोपपत्तिरिति चेत्तत्राह नहीति तथैव समुच्चये पुरुषा
र्थसाधने भगवता दर्शिते सत्यन्यतरगोचरो न प्रश्नो भवतीति शेषः
समुच्चये भगवतोक्तेऽपि तदज्ञानादर्जुनस्य प्रश्नोपपत्तिरिति शा
ङ्कते अथेति अज्ञाननिमित्तं प्रश्नमङ्गीकृत्यापि परिहरति तथापि
ति । भगवतो भ्रान्तभावेन पूर्वापरानुसन्धानसम्भवादित्यर्थः॥

व॰

ति॰ ननुसर्वानु॰

गी·
टी·टि·

51

प्रश्नानुरूपत्वमेव प्रतिवचनस्य प्रकटयति मयेति आवर्त्तमंश
मादर्शयति नन्विति प्रतिवचनस्य प्रश्नानुरूपत्वमेव स्पष्टयति
[illegible]ति इष्टादिति श्रौतेन कर्मणा समुच्चयो ज्ञानस्येति प
क्षं प्रतिक्षिप्य पक्षान्तरं प्रतिक्षिपति नापीति । श्रुतिस्मृत्यो·
र्ज्ञानकर्मणोर्विभागवचनमादिशब्दगृहीतं बुद्धेर्ज्यायस्त्वे पञ्च
मादौ प्रश्नो भगवत्प्रतिवचनं सर्वमिदं श्रौतेनैव स्मार्त्तेनापि क
र्मणा बुद्धेः समुच्चये विरुद्धं स्यादित्यर्थः द्वितीयपक्षासम्भवे हे
त्वन्तरमाह किञ्चेति समुच्चयपक्षे प्रश्नप्रतिवचनयोरसम्भवा
न्नेदं गीताशास्त्रं तत्परमित्युपसंहरति तस्मादिति विस्पष्टत्व·
ल्लात्मज्ञानं स्वफलसिद्धौ न सहकारि सापेक्षमज्ञाननिवृत्तिफ
लत्वाद्रज्ज्वादिज्ञानवत् अथवा बन्धः सहायानपेक्षेण ज्ञाने
न निवर्त्यते अज्ञानात्मकत्वात् रज्जुसर्पादिवदिति भावः ननु कु
र्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहमिति वक्ष्यमाणत्वात्
कथं गीताशास्त्रे समुच्चयो नास्ति तत्राह यस्त्विति । चोदनाल
ज्ञानुसारेण विहितो·नुष्ठेयस्य कर्मणो धर्मिताद्यापारमात्रस्य·
नयात्माभावात्तत्त्वविदस्य वर्णाश्रमाभिमानशून्यस्याधिकारप्रति
पत्त्यभावाद्रागादिप्रवृत्तीनामविद्यालेशतो जायमानानां कर्मा
भासत्वात् कुर्याद्विद्वानित्यादिवाक्यं न समुच्चयज्ञापकमिति भा
वः वाशब्दश्चार्थे द्वितीयस्तु विविदिषावाक्यस्य साधनान्तरसंग्रहा
र्थः । सांसारिकं ज्ञानं आवर्त्तयति परमार्थेति । तदेवाभिनय
ति एकमिति । प्रवृत्तिरूपमिति रूपग्रहणमाभासत्वप्रदर्शना
र्थं कर्माभाससमुच्चयस्तु यादृच्छिकत्वान्न मोक्षं फलयतीति श्रो
यः । किन्तु ज्ञानिनो रागादिप्रवृत्तिर्न ज्ञानेन तत्फलेन समुच्चीयते
फलाभिसन्धिविकलप्रवृत्तित्वादहङ्कारविधुरप्रवृत्तित्वाद्वा भगवत्प्र
वृत्तिवदित्याह यथेति । हेतुद्वयस्यासिद्धिमाशङ्क्य परिहरति तत्र

विदिति । कुतस्तं ब्रह्मैवाहमिति मन्वानो विद्वान् प्रवृत्तिं न तत्फलं
वा नैव स्वगतत्वेन पश्यति रूपादिवद्दृश्यत्वधर्मित्वायोगात् कि
न्तु कार्यकारणसंघातत्वेनैव प्रवृत्त्यादि प्रतिपद्यते न तत्स्तत्त्ववि
दो व्याख्यानभिन्नाटनादौ प्रवृत्तस्य तत्स्मादि फलाभिसंधेरभा
वत्वान्नासिद्धं हेतुद्वयमित्यर्थः । ननु ज्ञानोदयात् प्रागवस्थाया
मिवोत्तरकालेपि प्रतिनियतप्रवृत्त्यादिदर्शनात् तत्त्वदर्शिनिष्ठ
प्रवृत्त्यादेराभासत्वमिति तत्राह यथावेति । स्वर्गादिरेव काम्यमा
नत्वात् कामस्तदर्थिनः स्वर्गादिकामस्यापि रोगादेरपेक्षितस्व
र्गादिसाधनस्यानुष्ठानार्थमग्निमाधाय व्यवस्थितस्य तस्मिन्नेवका
ले कर्मणि प्रवृत्तस्यार्द्धकृते केनापि हेतुना कामे विनष्टे तदेवा
ग्निहोत्रादि निर्वर्त्यते न तत् काम्यं भवति नित्यकाम्यविभागस्य
स्वाभाविकत्वाभावात् कामोपबन्धानुपबन्धकृतत्वात् तथावि
दुषोपि विध्यधिकाराभावाद्भागादिप्रवृत्तीनां कर्माभासतेत्य
र्थः । विद्वत्प्रवृत्तीनां कर्माभासत्वमित्यत्र भगवदनुमतिमु
पन्यस्यति तथा चेति । ननु विद्वद्व्यापारेपि कर्मशब्दप्रयोगद
र्शनात् सद्व्यापारस्य कर्माभासत्वानुपपत्तेः समुच्चयसिद्धिरि
ति तत्राह यद्वेति । ज्ञानकर्मणोः समुच्चित्यैव संसिद्धिहेतुत्वे
प्रतिपन्ने कुतो विभज्यार्थज्ञानमिति शङ्कते तत्कथमिति ।
ननु किं जनकादयोपि तत्त्वविदः प्रवृत्तकर्माणः स्युराहोस्विदत
त्त्वविद इति विकल्प्य प्रथमं प्रत्याह यदीति । तत्त्वविदां कथं प्रव
त्तकर्मत्वं कर्मणामकिञ्चित्करत्वादित्याशङ्क्याह ते लोकेति ।
तेषामुक्तप्रयोजनार्थमपि न प्रवृत्तिर्युक्ता सर्वत्राप्युदासीनत्वा^
दित्याशंकाह गुणा इति । इन्द्रियाणां विषयेषु प्रवृत्तिद्वारा तत्त्व
विदां प्रवृत्तकर्मत्वेपि ज्ञानेनैव तेषां मुक्तिरित्याह ज्ञानेनेति ।
उक्तमेवार्थं संक्षिप्य दर्शयति कर्मेति । कर्मणोत्पादो बाधिता

तद्गम्याभावो दृश्यते । द्वितीयमनुवदति प्रयेति । तत्र वाक्यार्थंक
थयति ईश्वरेति विभज्य विज्ञेयत्व वाक्यार्थस्योक्तमुपसंहरति
इति व्याख्येयमिति कर्म्मणां चित्तशुद्धिद्वारा ज्ञानहेतुत्वमित्युक्ते
र्थे वाक्यशेषं प्रमाणयति एतमेवेति योगिनः कर्म्म कुर्वन्ती
त्यादि वाक्यमर्थतोनुवदति सङ्गेति स्वकर्म्मणा इत्यादौ साक्षा
देवमोक्षहेतुत्वं कर्म्मणां वदतीत्याशंक्याह स्वकर्म्मणेति त
[illegible] मोक्षहेतुत्वं कर्म्मणां वदतीत्याशं
क्याह स्वकर्म्मणेति । स्वकर्म्मानुष्ठानादीश्वरप्रसादद्वारा ज्ञानति
ष्ठा योग्यता लभ्यते ततो ज्ञाननिष्ठया मुक्तिस्तेन न साक्षात् क
र्म्मणां मुक्तिहेतुत्वेन [illegible] भविष्यतीत्यर्थः । तत्त्वज्ञानोत्तरका
ले कर्म्मासम्भवे फलितमुपसंहरति तस्मादिति । ननु यद्यपि गी
ताशास्त्रे तत्त्वज्ञानप्रधानमेकं वाक्यं तथापि तन्मध्ये श्रूयमाणं
कर्म्म तदङ्गमङ्गीकर्त्तव्यं प्रकरणप्रामाण्यादिति समुच्चयसिद्धि
रित्याशंक्याह यद्याचेति । अर्थशब्देनात्मज्ञानमेव केवलं कैवल्यहेतु
रित्यर्थः समर्थितः । इति कृतामभिप्रायं प्रपञ्चयितुं स्वाभिप्रेतः शा
स्त्रार्थः समर्थितः संप्रत्यशोच्यानित्यस्मात्प्राक्तनग्रन्थसन्दर्भस्य प्र
संख्याकानामध्यायानां षट्कत्रितयमुपादाय त्रैविध्यात् तत्र
सर्वषट्कात्मकं [illegible]
त्रैविध्यात् तत्र [illegible] षट्कत्रितयमुपादाय
रोति मध्यमषट्करूपं मध्यमकाण्डं तत्पदार्थविषयीक
न्तिमषट्कलक्षणमन्तिमं काण्डं तत्त्वं पदार्थगोचरयति अ
मधिकरोति तत्त्वज्ञानसाधनानि तत्र तत्र प्रसङ्गादुपन्यस्यन्ते त
त्त्वज्ञानस्य तदधीनत्वात् तत्त्वज्ञानमेव केवलं कैवल्यसाधनमि
ति च सर्वत्र विगीतं एवं सर्वोक्तरीत्या गीताशास्त्रार्थपरिनिश्चि

सीदन्तीति यावत् धर्म्मसंमूढं कर्त्तव्याकर्त्तव्यविवेकविकलं चेतो
यस्य तस्य मिथ्याज्ञानवतोऽहंकारममकारवतः शोकाख्यसाग
रे दुरुत्तरे प्रविश्य क्लिश्यतो ब्रह्मात्मैकलक्षणवाक्यार्थज्ञान·
मात्मज्ञानं तदतिरेकेणोद्धरणासिद्धेः तमतिभक्तमतिस्नि·
ग्धं शोकादुद्धर्त्तुमिच्छन् भगवान् यथोक्तज्ञानार्थं तं अर्ज्जुन
मवतारयन् पदार्थ परिशोधने प्रवर्त्तयन्नादौ त्वम्पदार्थशोधयि
तुमशोच्यानित्यादिकमाहेति योजना । १८

गी·
टी हि·

59

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः
॥११॥

शांकरभाष्यं

अशोच्यानित्यादि नशोच्या अशोच्या भीष्मद्रोणादयः सद्वृत्तत्वा
त् परमार्थरूपेण च नित्यत्वात् तानशोच्यानन्वशोचोऽनुशो·
चितवानसि ते म्रियन्ते मन्निमित्तमहं तैर्विनाभूतः किं करिष्या
मि राज्यसुखादिनेति त्वं प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि
च भाषसे तदेतन्मौढ्यं पाण्डित्यं विरुद्धमात्मनि दर्शयस्युन्म
त्त इवेत्यभिप्रायः यस्माद्गतासून् गतप्राणान् मृतान् अगता
सूनगतप्राणान् जीवतश्च नानुशोचन्ति पण्डिताः आत्मज्ञाः
पण्डा आत्मविषया बुद्धिर्येषां ते हि पण्डिताः पाण्डित्यं निर्वि
द्येति श्रुतेः परमार्थतस्तु नित्यानशोच्याननुशोचस्यतो मूढो·
सीत्यभिप्रायः ११।

आनन्दगिरिकृतटीका

यस्याज्ञानं तस्य भ्रमो यस्य भ्रमस्तस्य पदार्थ परिशोधनपूर्वकं स
म्यक् ज्ञानं वाक्याद्भवतीति ज्ञानाधिकारिणमभिप्रेत्याह अशो
च्यानित्यादीति यत्तु केचिदात्मा वा अरे द्रष्टव्य इत्याद्यात्मया
यात्मदर्शनविधिवाक्यार्थमनेन श्लोकेन व्याचष्टे स्वयं हरि
रित्युक्तं तदयुक्तं कृतियोग्यतैकार्थसमवेतश्रेयःसाधनता
याः परामिमतनियोगस्य वा विध्यर्थस्यापाततः प्रतीयमानस्य क
ल्पनाहेत्वभावात् न च दर्शने पुरुषतन्त्रत्वादिते विधेयत्वागा
दिविलक्षणो विधिरुपपद्यते कृत्यान्तर्भूतस्यादर्शनात् नभो

न विधिमधिकरोतीत्यभिप्रेत्य व्याचष्टे न शोच्या इति कथं तेषाम
शोच्यत्वमित्युक्ते भीष्मादिशब्दवाच्यानां शोच्यत्वं तत्स्थदेहस्यात्मनां
वेति विकल्प्याद्यं दूषयति सद्वृत्तत्वादिति ये भीष्मादि शब्दैरु
च्यन्ते ते श्रुतिस्मृत्युदीरिताविगीताचारवत्त्वान्न शोच्यतामस्पृशीर
त्रित्यर्थः द्वितीयं प्रत्याह परमार्थेति अर्जुने रज्जुवद्विवदशो
च्येषु शोच्यबुद्ध्या भ्रान्तोसीत्याह तानिति अनुशोचनप्रकारम
भिनयन् भ्रान्तिमेव प्रकटयति ते म्रियन्त इति पुत्रभार्यादि
प्रयुक्तं सुखमादिशब्देन गृह्यते त्वमनुशोचितवानसीति सम्बन्धः
विरुद्धार्थाभिधायित्वेनापि भ्रान्तत्वमर्जुनस्य साधयति त्वं प्रज्ञा
वतामिति उत्सन्नकुलधर्माणामित्यादीनि वचनानि किमेतावता
फलितमिति तदाह तदेतदिति तन्मौढ्यमशोच्येषु शोच्य दृष्टिव
मेतत् पाण्डित्यं बुद्धिमतां वचनमाषितमिति यावत्। अर्जुनस्य
सर्वोक्तभ्रान्तिभाक्त्वे निमित्तमात्माज्ञानमित्याह यस्मादिति। ननु
तस्य बुद्धिमात्रमेव पाण्डित्यं न त्वात्मज्ञत्वं हेत्वभावादित्याशंक्या
हनेहीति। पाण्डित्यं पण्डितभावमात्मज्ञानं निर्विद्य निश्चयेन ल
ब्ध्वा बाल्येन तिष्ठासेदिति बृहदारण्यक श्रुतिमुक्तार्थामुदाहरति
पाण्डित्यमिति यथोक्तं पाण्डित्यराहित्ये कथं ममावगतमित्याशं
श्री॰ क्य कार्यदर्शनादित्याह परमार्थतस्त्विति यस्मादित्यस्यापेक्षितं दर्श
यति तत इति ११

स्वामिकृतटीका

देहात्मनोरविवेकादस्यैवं शोको भवतीति तद्विवेकप्रदर्शनार्थं
श्रीभगवानुवाच अशोच्यानिति शोकस्याविषयभूतानेव बंधून्
त्वमन्वशोचः अनुशोचितवानसि दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समु
पस्थितं इत्यादिना तत्र कुतस्त्वा कश्मलमिदं विषमे समपस्थितं इत्या

गी॰
टी॰ टि॰

दिनामयाबोधितोपिपुनस्त्वंप्रज्ञावादान्प्रज्ञावतांपंडितानांवादा
न्शास्त्रान्कथंभीष्ममहंसंख्येइत्यादीन्केवलंभाषसेनतुपंडितो
सियतः गतासूनगतप्राणांस्त्वंभूतप्रागतासूंस्त्वजीवतोपिबंधूंस्त्वं
मृद्धीनाएतेकथंजीविष्यंतिइतिनानुशोचंतिदेवमाह ११ पण्डिता विवे

पिशाचभाष्यं

अशोच्यानशोच्याभीष्मद्रोणादयः धार्मिकत्वाद्धस्तत्स्वपरमा
त्मस्वरूपत्वात् अन्वशोचः अनुशोचितवानसि प्रज्ञापरमात्मज्ञा
नेतन्निमित्तांश्चवादान्वचनानीहभाषसे गताःअसवःप्राणायेषां
तेगतासवस्तान् गतासून्अगतासून् गतासूंस्तु गतप्राणांश्च
पंडिताःपरमार्थविदोनानुशोचंति अतोमूढस्त्वंप्रज्ञापरमात्म
तस्ते ११

रामानुजभाष्यटीका

अशोच्यान्प्रत्यनुशोचसिपतंतिपितरोह्येषांलुप्तपिंडोदकक्रिया
इत्यादिकान्देहात्मस्वभावप्रज्ञानिमित्तवादांश्चभाषसेदेहात्म·
स्वभावज्ञानवतांनात्रकिंचिच्छोकनिमित्तमस्तिगतासून्देहानअ
गतासूनात्मनश्चप्रतितयोर्याथात्म्यविदोनशोचंति अतस्त्व
यि किंप्रतिविरुद्धमिदमुपलभ्यतेयदेतानहंनिहनिष्यामीत्य
नुशोचनंयच्चदेहातिरिक्तात्मज्ञानकृतंधर्माधर्मभाषणं अतोदे
हस्वभावंनजानासितदतिरिक्तमात्मानंचनित्यंतत्प्राप्त्युपायभू
तंयुद्धादिकंधर्मंच इदंयुद्धंफलाभिसंधिरहितमात्मयाथात्म्या
वाप्त्युपायभूतं आत्माहिनदेहजन्माधीनजन्मानदेहमरणाधी
नविनाशश्चतस्यजन्ममरणयोरभावात् अतः सनशोकस्थानं
देहस्त्वचेतनः परिणामस्वभावस्तस्योत्पत्तिविनाशयोगःस्वाभा
विकइतिसोपिनशोकस्थानमित्यभिप्रायः ११ ॥

अभिनवगुप्तकृतटीका

अनया च युक्त्या ज्ञानाज्ञानयोर्मिथ्यात्वः श्रीभगवतानुशिष्यते
ऽर्जुनो येनोपदेशेन तरत्यात्मा विषादमोहाभिभवादिसंज्ञः कृ
पागृहीतः समवाप्य सर्वं भूतमिवप्रपन्नान्न वेनं तकस्य मानुष
मनुष्यभावः अंतकस्तु वेत्स्यथमेतेस्य विशेष इति तवकोवाच ॥ ११ ॥

परमार्थप्रपाटीका

अथार्जुनस्य ज्ञानकर्मोपदेशादिषादं परिहरन् विज्ञानविषयं
त्रिंशता श्लोकैर्भगवानाह अशोच्यानिति अशोच्यान्
शोकानर्हानेवंभूतान् अनुशोचसि कृपया शोचसि शोचितवान्
सि दृष्ट्वेमं स्वजनं कृष्ण इत्यादिना अनन्तरं कृत्वा कश्मलमिदमि
त्यादिना स्वाभिवोधितोपि प्रज्ञावादान् प्रज्ञायाः वचनानि च
मात्रेण वादान् वक्ष्यसि भाषसे जानन् प्रलपितवद्द
इति न ते तादृशं भाषणं विषयुक्तमित्यर्थः यतः पण्डिताः
ज्ञातारः गतासून् गतप्राणान् तथा गतासून् जीवतोपि वे
अदीनकायं जीविष्यन्ति नानुशोचन्ति ॥ ११ ॥

वनमालीकृतटीका

सर्वत्रोदासीनतया काशावर्दुर्भोगोपि स्वतरुस्वभावः स्वशरणा
गतपक्षपाती परमकारुणिको भक्तवत्सलो नादिसंसारभवा
दपतितान् स्वयमिवलोकः विजिज्ञासन् सदुपायमजानतो जीवा
नुविलोक्य संसारसिंधुतरणाय स्वविषयकसर्वोत्तमतधीपूर्वकावि
च्छिन्नप्रेमप्रवाहरूपं स्वभक्तियोगं विवक्षिषुस्तदुपाये प्रथमसोपानं
स्वस्वरूपानुसंधानपूर्वकं स्वधर्मानुष्ठानं वक्तुं स्वसखेन राजतारं स
स्वस्वरूपात्मनानात्मविवेक
विदितात्मतत्वमर्जुनं स्वपत्नकुलीनं भगवानात्मनात्मविवेक
माह अशोच्यानिति हे अर्जुन त्वं यानशोच्यान् शोचः दृष्ट्वेमं मित्यादिना शो

अशोच्या शोचितुमशक्यं कलेवरं सदा नश्वरत्वात् अशोचनार्हं चा
त्मानं शोचसि न कश्चिद्गतासून् मृतान् गतासून् जीवतश्च शोचन्ति न य
दि आत्मा तावदविनाशी नाना शरीरेषु संचरते तस्य शोच्यता न
च देहस्य नश्वरत्वादेव शोच्यता एवं यौवनादावपि शोच्यता भवे

गी॰
टी॰ टि॰

चिंतवानसितेअशोच्याःशोकाद्दीनमर्वति यांश्चभाषसेपापमेवाश्र
येदस्मानितिसाहिताते प्रज्ञावादाः स्वप्रज्ञत्येववादास्वमनीषोत्था न
तुशास्त्रोपदेशादिजाताइत्यर्थः यद्वापकर्षेणज्ञानेनेतीतिप्रज्ञाः ते॰
षांवादास्तद्विरुद्धवादाइत्यर्थः सिद्धेशोकंभाषणंचानु[illegible] सिद्धयोरशो
चनमात्रमनतिरेव्ययोर्विधानार्थविभक्तिविपरिणामेनान्वयः
कथमासन्नविनाशान्न शोच्याइत्यत आह गतासूनिति पंडिताआ
त्मानात्मतत्त्वविदः गतासवः प्राणायेभ्यस्ते गतासवो देहास्तद्वि
रुद्धाजीवाअगतासवः पुरुषस्यमरतो त्रस्तन प्राणाभागतपव
ते अधिदैवंशमुर्वेतिभागतोनुव्रजंतीतिनमितिस्यतेः यद्यपिमु॰
क्तौजीवस्यापिप्राणवियोगोभवति नतस्मप्राणाउत्क्रामंतीतिश्रुते
र्वलीयंतइतिश्चमामुक्तौप्राणानामशेषतोजीवन्तस्यसकार॰
णप्रलयस्योक्तत्वात्तथापिदेहात्मनोर्वियोगंमरणंत्वंपदार्थ
स्यायाप्राणानांभागेनजीवेनसहगमनमस्तिदेहेत्वभागोनापि
संवंधोनास्ति तथाचसंसारावस्थायांगतप्राणागतप्राणत्वेनदे
हात्मानोविवहितौदेहः [illegible]
[illegible]
[illegible] देहः परिणामीनश्वरस्वभावेन शोकस्थानं आत्माअ
पपत्तिविनाशादिविकारशून्यइतिनशोकस्थानमित्यर्थः यद्वागत
निर्गताः कदाचित्संयुक्ताअनंतरंनिर्गता असवः प्राणायेभ्यस्तान् देह
नहिकृशानगतास्तनस्यसंयोगारहितानित्यानंदस्वरूपांश्चेतनां
श्चनशोचंति यद्यपिप्राणसंबंधोवद्धावस्थायांचेतनतां
पिप्राणाधीनचेष्टावत्त्वमेवप्राणित्वंतच्चचेतनत्वेप्यस्तितथा
क्तौप्राणाभावेपिसत्तउपपत्तेतिनतच्चदेहएवास्तिनचेतनेमु॰
ष्टायाउक्तत्वात नहिसाक्षित्वमात्रेणैवउत्तरममाणाअतिश्चेतोवे
लेवमाणित्वमीशस्यापिप्राणि॰

त्वापत्तेः न च जीवस्य प्राणजन्मभोगाश्रयत्वेन प्राणित्वमीशस्य भो-
गाभावात् प्राणित्वमिति वाच्यं प्राणादिप्रयुक्तस्वाभाविकभोगस्य-
जीवेप्यभावात् अनाद्यविद्यावशाद्देहादावहंममेत्यभिमानात्तु त्वेन
देहेन प्रवृत्तिवज्जीवभोगस्वाभाविकत्वात् आत्मनो देहाधीनजन्मम
रणादिकं नास्त्येवेति मत्वा न शोकस्थानं देहस्य परिणामस्वभावत्वेनो
त्पत्तिविनाशयोः प्रतिक्षणं स्वाभाविकत्वात्सोपि न शोकस्थानं अतो
देहात्मनोः स्वरूपं तज्ज्ञानोपायभूतं फलानि सर्वं च विरहितं प्रज्ञावस
र्थं जानन्नपि मत्संबंधित्वविदितत्वाच्छोचनेन प्रतनु मत्तद्विरुद्धभाष-
णं च विप्रतिषिद्धमुभयोपलभ्यत इति भावः ११

कुसुमवैजयंतीटीका

अस्यात्मानात्मनोर्याथात्म्यस्वरूपस्वभावाद्यविवेकादयं मोहः स्यात्त
योर्ज्ञानं विना न शाम्यतीति निश्चित्य तच्छोकापनोदनाय तयोः स्वभा
वादिकं प्रवदन् श्रीभगवानुवाच अशोच्यानिति यतोऽशोच्यान् शो
चितुमनर्हान् बांधवान् प्रति त्वमन्वशोचः दृष्ट्वेमं स्वजनं हत्स्म निह
त्य धार्तराष्ट्रान्नः पतन्ति पितरो ह्येषामित्यादिभिर्यत्त्वं प्रज्ञावादान् क
थं भीष्ममहं संख्ये इत्यादिना प्रज्ञावतां देहात्मस्वभावविदां वादान्
शब्दानेव केवलं भाषसे वदसि न तु तेषामिव कर्माचरसि अतस्त्व
मधिनमान्येवासि न तु पंडितोसि महत्पुरुषारंभकृतानेकदेशेभ्योऽ
नेकान्वीरानाहूय स्वपार्श्वे लक्षणगोचरीभूत्वा सर्ववीरसम्मतस्य
तवैवं भाषितं ममैवाग्रे त्रपायितायातीत्यभिप्रायः शोचनस्य भाष
णाद्भूतकालत्वाद्भूतनिर्देशो नात्वपपन्नः भाषणस्य तु शोचना
ऽनन्तरत्वाद्वर्तमानत्वनिर्देशोप्यविरुद्ध एव ननु बन्धुविश्लेषजन्यः
शोकः प्रज्ञावतामपि दुःसहो भवेन्न केवलो ममैवेति चेत्तत्राह गता
सूनिति गता अपगता असवः प्राणा येषां तान् देहान् अगतासूंश्च अवि
गतप्राणानात्मनश्च पंडितास्तयोर्याथात्म्यज्ञानवन्तो नानुशो
चन्ति एते मरिष्यन्ति चेत्तर्ह्यहं कथं जीविष्यामीत्येवं न विमृशन्ति

गी॰
टी॰ द्वि॰

62

त्वयि तु महद्विपरीतं पश्यामि यतोऽशोच्ये देहात्मस्वरूपे शोकं
देहातिरिक्तात्मविवेकवतामिव धर्माधर्मभाषणं च करोषि अत
स्त्वं देहात्मनोः स्वभावस्य धर्मस्यापाय भूतं स्वधर्मं चानजानासि
[illegible]
[illegible]
[illegible] ११

मधुसूदनी टीका

तत्रार्जुनस्य युद्धाख्ये स्वधर्मे स्वतो जातापि प्रवृत्तिर्द्विविधेन मोहे
न तन्निमित्तेन च शोकेन प्रतिबद्धेति द्विविधो मोहस्तस्य निराक
रणीयः तत्रात्मनि स्वप्रकाशपरमानंदरूपे सर्वसंसारधर्मासंस
र्गिणि स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रयावि
वेकेन मिथ्याभूतस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभास
रूपकः सर्वप्राणिसाधारणः अपरस्तु युद्धाख्ये स्वधर्मे हिंसा
दिबाहुल्येनाधर्मत्वप्रतिभासरूपोऽर्जुनस्यैव करुणादिदोषनिबं
धनोऽसाधारणः एवमुपाधित्रयविवेकेन शुद्धात्मस्वरूपबोधः प्र
थमस्य निवर्तकः सर्वसाधारणो द्वितीयस्य तु हिंसादिमत्त्वेपि यु
द्धस्य स्वधर्मत्वेनाधर्मत्वाभावबोधोऽसाधारणः शोकस्य तु कारण
निवृत्त्यैव निवृत्तेर्न पृथक्साधनांतरापेक्षेत्यभिप्रेत्य क्रमेणाप्र
[illegible]यमनंतरं अशोच्यानन्वशोचिविनमयोगपानेव भीष्मद्रोणादी
न् आत्मसहितानं[illegible]तोपि मन्नन्वशोचः अतः शोचितव्या
नतिप्रते म्रियंते म[illegible] [illegible] विनाभूतः किंकरिष्यामि
न्यसुत्वादिने स्वमर्थेकेन दृष्ट्वेमं स्वजनमित्यादिना तथाचाशो
च्य शोच्यभ्रमः पश्यादि साधारणः तत्रासंनपंडितस्यानुचितत्व
सार्थः तथाच कुतस्त्वा कश्मलमित्यादिना महत्त्वेनानुचितः
मिदमाह [illegible]तेमयेति विमृश्यामेपि त्वत्स्वयं प्राज्ञोपि सन् प्रज्ञा
नामवादान् प्रज्ञैर्वक्तुमनुचितान् पाण्डित्यकं भीष्ममहं संख्ये

प्रज्ञावादीन् भाषसे वदसि न तु लज्जया तूष्णीं भवसि अतः परं किमनु
चितमस्तीति सूचयितुं चकारः तथा चाधर्मे धर्मत्वभ्रांतिर्धर्मे चाध
र्मत्वभ्रांतिरसाधारणी न त्वाति पंडितस्यनोचितेति भावः प्रज्ञावतां
पंडितानां वादान् भाषसे परं न तु त्वमसम्मतिर्वा भाषणापेक्षयाऽनु
शोचनस्य प्राक्कालता अतीतत्वनिर्देशः भाषणस्य तु वर्तमानका
लत्वेनाव्यवहितत्वाद्वर्तमानत्वनिर्देशः क्वाटसेनातिङ् व्यत्ययेनानु
शोचसीति वर्तमानत्वं व्याख्येयं ननु बंधुविच्छेदे शोकोऽनानुचितः
वसिष्ठादिभिर्महाभागैरपि कृतत्वादित्याशंक्याह गतासूनिति ये पं
डिताः विचारजन्यात्मतत्वज्ञानवंतस्ते गतप्राणानगतप्राणांश्च बंधु
त्वेन कल्पितान् देहान्नानुशोचंति एते मृताः सर्वोपकरणपरित्या
गेन गताः किं कुर्वंति कुत्र तिष्ठंति एते च जीवंतो बंधुविच्छेदेन कथं जी
विष्यंतीति न व्यामुह्यंति समानसमयेन तत्प्रतिभासाभावात् अन्या
नसमयेन तत्प्रतिभासेऽपि मृषात्वेन निश्चयात् न हि रज्जुतत्वसाक्षा
त्कारेण सर्पभ्रमेऽपनीते तन्निमित्तभयकम्पादि संभवति तथापि
तोपहतेर्द्विष्टस्य कदाचिद्रज्जौ तत्कालप्रतिभासेऽपि तत्कार्थितया
तत्प्रवृत्तिः संभवति मधुरत्वनिश्चयस्य बलवत्वात् एवमात्मस्व
रूपाज्ञाननिबंधनत्वाल्लोकभ्रमस्य तत्स्वरूपज्ञानेन तदज्ञानेऽ
पनीते तत्कार्यभूतः शोकभ्रमः कथमवतिष्ठेतेति भावः वसि
ष्ठादीनां प्रारब्धकर्मप्राबल्यात् तथा तथानुकरणेन शिष्टाचारतया
नेषामनुष्ठेयतामापादयति शिष्टैर्धर्मबुद्ध्यानुष्ठीयमानस्यालौ
किकव्यवहारस्यैव सदाचारत्वात् अन्यथा निष्ठीवनादेरप्यनुष्ठानप्र
संगादिति द्रष्टव्यम् यस्मादेवं तस्मात्वमपि पंडितो भूत्वा शोकमा
कार्षीरित्यभिप्रायः ११

सदानंदीकृत टीका

तत्रार्जुनस्य संग्रामेऽप्रवृत्तिरभवत्तत्र मोहेन द्विविधेनैषा प्रति

गी·
टी· द्वि·

63

वहासवहिथा १ मोहस्यादौनिराकार्यत्वात्स्वरूपंप्रदर्शयति स्वप्रका
शेपरानंदेशुद्धेसंसारिणिस्वतः २ शरीरत्रितयाध्यासात्संसारेस
त्यतामतिः अनात्मनिशरीरादावात्मताधीर्भ्रमात्मिका ३ सर्वसा
धारणोमोहएकोसाधारणोपरः स्वधर्मेधर्मताबुद्धिर्युद्धेपार्थस्य
याभवत् ४ मोहोपशमपरोयोत्रासाधारणपदाभिधः देहत्रयादि
विद्यात्मतत्वंप्रत्यंचमागमैः ५ योवोधःस्यात्स्वाद्यस्यमोहस्यविनि
वर्तकः स्वधर्मत्वेनयुद्धस्यहिंसादीनांनदोषता ६ एवंवोधोद्विती
यस्यसेमोहस्यनिवर्तकः हेतुकायेनशोकस्यविनिवृत्तिः स्वतोभ
वेत् अत्यभिप्रेत्यभगवांस्तत् हृषीकेशोवदत् उवाचसर्वशोका
यथासमूलंनिवर्तयन् ८ भीष्मादीनात्मसहितानयोग्यानेव
शोचितुं पंडितः सन्दीनांस्त्वमनुशोचितवानसि ९ म्रियंतेम
न्निमितंतेकिंकरिष्यामितैर्विना किंनोराज्यादिनेत्यादिवचोभिर्वञ
याभ्रमात् १० शोच्यभ्रमस्त्वयाशोच्येसामान्यस्तिर्यगादिभिः अस्मंत
पंडितस्यायंनोचितः सर्वथाभवेत् ११ मात्रैर्वतामयोग्यंश्वशाद्व
त्वदसिनेकथा कथंभीष्ममहंसंख्येइत्यादीस्त्वंनलज्जया १२ स
त्वीभवसि किंतेस्यादनौचित्यमतःपरं यदि प्रज्ञावतांवादान्भाष
सेननत्वध्यसे १३ मोच्छापंडितस्यमेकत्वंयदिदृष्टंनदत्त्वं नतुवंधु
वियोगेनुशोकःस्याद्धीमतामपि १४ मैवंधीमन्नमेनज्ञः महासा
येवकल्पते येपंडितागरोःस्मृतावेदांतविषयंपदं १५ ब्रह्मैकंयु
क्तिभिर्मत्वानिदिध्यास्यनिरंतरं साक्षात्कृतात्मतत्वास्तेनष्ट वि
पामलाबुधाः १६ मृतान्वाजीवतोवभूत्वानुशोचंतिकस्मितान्
पतेसर्वंपरित्यज्यगतास्तिष्ठंतिकुत्रते १७ जीविष्यंतिकथंचैते
जीवंतोवंधवोमम वंधुविच्छेदनस्वैवनव्यामूत्पत्तिपंडिताः १८ प
वमत्तानजभोक्ताकल्पितावंधवोमृताः जीवंतोवानतेवोधेशोकं
मोहमदाःसतां १९ देहादेर्नश्वरात्मत्वान्नित्यत्वात्स्वस्वगात्मनः नशो

या: प्राणिन: सर्वे स्वात्मनत्वविदो मता २१ एवं त्वं पण्डितो भूत्वा मा
केशी: शोकमाप्नुजे स्वात्मन्नेव सदा स्थैर्यमास्तीत्याशयो हरे: २२

नीलकंठीकृतटीका

अर्जुनस्य देहनाशे आत्मनाशधी: स्वधर्मे युद्धे चाधर्मधीरिति मोह
द्वयं तत्राद्यं वत्सविद्यासूत्रभूतैर्विंशत्या श्लोकैरपनिनीषन् श्रीभ
गवानुवाच अशोच्यानन्वशोचस्त्वमिति जीवापेतं वाव किलेदं म्रि
यते न जीवो म्रियत इति श्रुतेर्देहाद्युपाधिनाशेप्याकाशवन्नाशर
हितत्वेन अशोचनीयान् भीष्मादीनन्वशोच: कथमेते मया हन
न्या: कथं वा तैर्विनाहं जीविष्यामीति शोकं कृतवानसि एवं मूढोपि
त्वं प्रज्ञावादान् प्रज्ञावतां देहादन्यमात्मानं जानतां वादान् शब्दान्न
रके नियतं वास: एतेन पितरो ह्येषामित्यादीन् भाषसे परं न तत्प्र
ज्ञावानसि तत्र हेतु: गतासूनिति गतासून् गतप्राणान् देहान् अगता
सूंश्चेति प्रस्तुतनिर्देशश्चैव एतेन प्राण एवेष्टानन्तदेह: तथा च श्रु
ति: प्राणो ह पिता प्राणो माता प्राण आचार्य इत्यादि: अतएव सप्रा
णानेतान् श्रवणायं तं तरं पित्रादिं हंतास्मसि धिक्कामितिवदंति
अक्रांति प्राणानदहंतम् अपि नैवं वदंती लोकवेदप्रसिद्धि: तस्मात् आ
त्मा देहादन्य: [illegible] चेतनत्वात् व्यतिरेकेण घटवत् देहो न
चेतन: दृश्यत्वात् घटवत् यदि देहश्चेतन: स्यात् मृतेपि तत्र चैत
न्यमुपलभ्येत तस्मात् देहनाशेनात्मनाशं मत्वा नो मूढ एव त्वासीत्यर्थ:
एतत् प्रज्ञानां पंडितानां च वादान् वक्तुमयोग्यान् भाषसे इति तार्किक
व्याख्यानं तत्र हीर्षेयज्ञो दुर्लभत्वात् विशेषाध्याहारसापेक्षत्वा
च्चोपेक्ष्यं ११ ॥

64

आनंदी टीका

सम्यग्ज्ञानाभावमेवाह भीष्मादीनशोच्यानन्वशोचमाणानीत्याशोचनान
र्हान् त्वमनुशोचः शोचितवानसि च तनः पापमेवाश्रयेदस्मान्नित्या
दि श्रेयस्त्वं तद्भैक्ष्यमपीत्यादि च प्राज्ञवद्बुद्धिमानिव न भाषसे पंडिता:
प्राज्ञा हि गतासूनगतासूंश्च जीवितश्च नानुशोचंति जन्म
मरणयोरावश्यकत्वात् अथवा मोहे शापवणिस्थूलप्रकृतिरूप
समुदायात्मनोर्देहदेहिनोर्देहरूपयोर्वक्ष्यमाणं भेदमाश्रित्य व्याख्या
ने आत्मानात्मतत्वज्ञानोपदेशश्चारब्ध इति: तथाहि अशोच्यानित्य
त्वेनात्मनो विनाशाभावदर्शनादशोच्यनीयान् शोचितवानसि
पंडितानित्यानित्यविचारकाः गतासून गतासूंश्च तेष्वतेषु शरीरे
ष्ववस्थितानवस्थितशरणत्वात् जीवन्मृतव्यपदेशभाजो नित्याजी
वात्मनो नानुशोचन्तीति ॥ ११ ॥ त्वं मानुष्येणोपहतान्तरात्मा विषा
दमोहाभिभवाद्विसंज्ञः कृपागृहीतः समवीक्ष्य बंधूनभिप्रपन्नान्मु
खमंतकस्य ॥ मानुष्येण मनुष्यजातिसुलभेन रजोगुणस्वभावेन
संशयविपर्यज्ञानप्रायेण चित्तचापल्येनोपहतो मलिनीकृतोन्तरा
त्मान्तःकरणं यस्य हस्तः स त्वमन्तकस्य मुखमभिप्रपन्नान् देहदेहिनो
संयोगस्य पर्यवसानकायति कैगंशोहुगणयति इति कालस्वरूप
स्य स्वरूपस्य वशमागतान् समवीक्ष्य कृपागृहीतः युद्धे ममैते बन्धवो ह
न्यन्ते युद्धत्यागाद्रहितास्तु तिमममानि बन्ध्यन कारुण्येनैव प्रि
शोचेन गृहीतश्चाविष्टोतएवैते म्रियन्ते इति विषादस्य शोकस्याभि
भवेन तथा त्वमेते युद्धे पतेरक्षिताः स्युरिति मोहस्य मिथ्याज्ञानस्य
चाभिभवाद्विगतस्य सम्यग्ज्ञानेसीत्यर्थः ॥ ११ ॥

रामकंठी टी॰

अतएवाह त्वं ज्ञातिगुर्वादिवधपर्यवसायिनः समरव्यापारस्याय
मौचित्यं खोटकेन्वायं मन्यसे लोकद्वयबाधकत्वे प्राज्ञवद्बुद्धिमानि
व न जल्पसि नैषा नैष्ठिकी बुद्धिः शरीरशरीरिविवेकज्ञानाभावज
निता विमतिरेवैषा न ह्येते गुर्वादयोऽवश्यं विनाशिशरीरमात्रात्म
काः किंतु नित्याः शरीरिणएतेतद्व्यतिरिक्ताः अतएव किं जीवेत

गी॰
टी॰
द्वि॰

65

प्राज्ञवन्नाभिभाषसे। अशोच्यान् विनाशाभावात्परमार्थतस्तद्दुःखयो
गाभावादशोचनीयान्पौरैवनस्याविषयीभूतानन्वशोचत् शोक
विषयत्वेन भावयन् यतस्त्वेते नित्याः अतएव तानुगतासूंस्ते
भ्यः शरीरेभ्य उत्क्रान्तप्राणान्मृतव्यपदेशभाजस्तथागतासूंस्ते
ष्वेतेषु शरीरेष्ववस्थितप्राणान्वा जीवव्यपदेशभाजः पण्डिता वि
ज्ञातपरमार्था नानुशोचन्ति ॥ ११ ॥ त्वमानुष्येणोपहतान्तरात्मा
विषादमोहाभिभवाद्विसंज्ञः कृपागृहीतः समवीक्ष्य बन्धूनभिप्र
पन्नान्मुखमन्तकस्य ॥ उपदेशाभावात्सेप्रत्युदितदैवसर्गोवित
प्राज्ञस्त्वं मानुष्येण मनुष्यभावेन संशयविपर्ययज्ञानबहुलेनोप
हतान्तरात्मा सत्यभिज्ञानाभातिरस्कृतत्वसत्यात्मस्वरूपावर्तेन सं
शयः यस्माद्विषादेन शोकजेनानध्यवसायमोहेन च विपर्ययप्रत्य
यहेतुना वैचित्येन यस्ताभिभवसामर्थ्यभंगः कृतस्तस्मादुद्गविसं
ज्ञो विकल्प्यमानसम्यग्ज्ञानोऽसि कुत एतदवगतमित्याह यतस्त्वं
निर्वारप्रसरस्य कृतान्तस्य वदने प्रविष्टान्बान्धवान्निरूप्य कृपागृ
हीतो गृहीतकृपास्वीकृतकरुणः संवृत्तः आहिताग्न्यादेराकृति
गणत्वाद्गृहीतशब्दस्य पूर्वनिपाताभावो वावसेयः बहुव्रीहि
रेवायं न तत्पुरुषः तस्मिन्सति भिन्नकर्तृकप्रसंगः अनेन श्लोके
नवक्ष्यमाणस्यात्मज्ञानस्य प्रथमप्रतिपाद्ये शरीरशरीरिव्यतिरे
कज्ञानमासूत्रितं यत एकान्तविनश्वरशरीरसन्निवेशवद्बन्धु
बुद्धित्वं इदं शरीरिस्वरूपापरमर्शनिबन्धनम् ॥ ११ ॥

लासिकी टीका

शोकावेगेन वशीकृतस्यात एव विस्मृतात्मतत्त्वस्यामर्षनयानिम
त्वादि तद्देशे मयाममर्षितं यतोऽर्जुनस्य स्मृतिदानाय श्रीभगवानु
वाच अशोच्यानिति अशोच्यान् शोकस्याविषयीभूतान्त्वं
वोधयुक्तोऽपि सन्नन्वशोचः अनुशोचितवानसि हेतुमेतस्वजनेन
सेत्यादिना नश्वरस्य देहस्य शोचितमशक्यत्वात् नित्यस्यात्म
नाशोचनानर्हत्वात् शोच्यत्वम् अनेन श्लोकः प्रमत्तमित्यादिनाम
याबोधितमपि प्रज्ञावतां बहिर्भावनया नैपुण्यमुक्तो नावादान्क

थं भीष्ममहं संख्येइत्यादिप्रज्ञावचनानि च भाषसे अस्तु तत्कथय
सि यतो गतप्राणान्बंधून् गतांश्च जीवतोपि बंधुहीनान् एतत्कथं जी-
विष्यंतीति नानुशोचंति पंडिताः सदसद्विवेकजन्या बुद्धिः संजाता येषां
मिति पंडिताविवेकिनः अतस्त्वं पंडितस्य शोके न युक्तः तथा हि
आत्मनस्तावन्नानाशरीरेषु संचरतः कास्य शोचिता न वदेहांतरसं
चारएव शोचिता एवं हि बाल्याद्यौवनादिप्राप्तावपि शोच्यतास्यात् ॥

पंचोली टीका ॥

देहात्मनोरविवेकादहंकारपूर्वकौशोकमोहौ संजातावर्जुनस्य द-
हात्मज्ञानेमंतरेणतयोर्निवृत्तिर्न संभवतीतिदेहादिभ्योभेदेन।
आत्मानंदर्शयितुमाह हेअर्जुनत्वंअशोच्यान्भीष्मद्रोणादीन्सत-
हतान् परमार्थस्वरूपेणनित्यान् अतएवअशोच्यान्तान् अन्वशो-
चः अनुशोचितवानसि ते भीष्मद्रोणादयो मन्निमित्तं म्रियंते तैर्विना
मृतोहंराज्यसुखादिनाकिंकरिष्यामीतिच पुनःप्रज्ञावादान् बुद्धिम-
तांवादान्भाषसे कथंभीष्ममहंसंख्ये इत्यादीन्केवलंभाषसे न तु पं-
डितोसि तदेतन्मौढ्यं पांडित्यं विरुद्धमात्मनि दर्शयसि इत्यत्रवेदम-
भिप्रायः यस्मात्पंडिता आत्मज्ञाः गतासून्गतप्राणान् अगतासून-
गतप्राणान्न अनुशोचंतीति नयतंतस्ते पंडिताः पंडितत्वनिष्ठा बुद्धि-
र्येषामेयतेपंडिताः न तु घटपटादिवत्तानेकदृष्टाः गतासूनगा-
तासून्वा आत्मनो अन्यथाभावं न पश्यंतीत्यर्थः परमार्थतस्तु त्वंतो
नित्या अशोच्यान्त्वं अनुशोचसि अतो मूढोसि ज्ञ तस्ते अशोच्या
यतो नित्याः कथमित्याह ११ ॥

रणवीरसमिद्धोधिनी ॥

अर्जुनस्य युद्धारंभे स्वधर्मे जातापि प्रवृत्तिर्मोहेन तन्निमित्तेन शोकेन
च प्रतिरुद्धेति तन्निराकरणपूर्वं तस्मिन्नेव स्वधर्मे तं प्रवर्तयितुं भ-
गवानुवाच अशोच्यानिति त्वमित्यनेन पदेन पंडितत्ववैशिष्ट्यं अभी-
क्ष्यते ततश्च त्वं पंडितोपि सन् अशोच्यान् शोचितुमयोग्यान्भीष्म-
द्रोणादीनन्वशोचः दृष्ट्वेमं स्वजनं कृष्णेत्यादिनानुशोचितवानसि य

66

तेमत्त्विमितंप्रियंते येतैर्विरहितोहंत्वलमपिनस्यामेतन्मइतिशोक
स्तवातिपंडितस्य नयुक्तइतिभावः तथा प्रज्ञानंतीतिप्रज्ञाबुद्धिस्तद्व
वतः पंडितास्तेषामवादानुचितालापान्वकमपश्वयाज्ञाहालापा
न् कथंभीष्ममहंसंख्येइत्यादिरूपान्भाषसेवदसि नचलज्जयान
लीभवसि अतिपंडितस्यतवायोग्योशोच्यभ्रमः ऊतस्त्वाकथमत्तमि
दमित्यादिनामहृवनेन मयेतदनुचितमेवाचरितमितिविमर्शोश्रा
मावपि ताटस्थ्यानुचितमाहभाषणं वयस्यादिसाधारणमनुचित
मितिभावः नन्ववसिष्ठादीनामपिशोकस्यदृष्टत्वात्कथंतस्यनोचि
ततेत्यतआह गतासूनितिपंडिताः स्वधर्माचरणस्यैवसर्वश्रेयः
स्कत्वंनिश्चितवंतोभवादृशाः वसिष्ठप्रवीराः गतासूनुत्तव्यपदे
शभाजोवंधादीन् कथमेते विरहितमसेवोपकरणत्वात्स्थितिभाजः
स्युरित्येवंप्रकारेणानानुशोचंति अगतासून्जीवतश्च कथमेते शि
ष्यजनैर्विनाकृताः सुखभाजः स्युरितिचनानुशोचंति सर्वेषामपि
देहिनामंते देहवियोगस्यावश्यंभावित्वादितिभावः ११॥

मधुभाष्य॥

प्रज्ञावादांश्चभाष [illegible] नीयाः [illegible] कथमशोच्याः गतासून्किमिति

तत्र सेनयोर्मध्ये बांधवादिमोहजालसंहतं विषीदंतमर्जुनं
भगवानुवाच प्रज्ञावादांस्त्वमनीषोक्त्यवचनानि कथमशो
च्याः गतासून्किमिति ११॥

रामचंद्रसरस्वतीकृतटीका

अशोच्यानिति अशोच्यान् शोकानर्हान् भीष्मादिदेहांस्त्वमशो·
चइतिसंबंधः यद्वायांस्त्वमशोचोभीष्मादिदेहांस्तेनित्यमदेहाअ
शोच्याइतियत्तदोरध्याहारेणसंबंधः देशात्तविशिष्टज्ञानसंप
न्नेतिसंबोध्यनेयस्त्वंप्रागुक्तरीत्याशमादिसंपन्नोहिविषफल
विरागवानात्मानात्मविवेकसंपन्नः इत्थंतच्छोकतर
णे क्षमावानपित्वयापिशरीरयात्रायामगुकोगुरूपदेशापेक्षः
सकथंवानप्राज्ञोविशिष्टज्ञानसंपन्नइति यद्वाईदृशस्यापिस्थू
लदेहविषयेशोकइतिमहदिदंप्रज्ञत्वमित्युपहासः नकेवल
शोचसि अपितुअवेवानवक्तव्यानिवाक्यानिसीदंतिममगात्रा-
णि इत्येवमादीनिभाषसे ननुजरामरणयोर्देहधर्मत्वात्देहा
नांचमरणाभिमुखत्वात्कथंनशोच्यास्तेत्यत आह गतासूनिति
अत्रचशब्दोऽप्यर्थःकिंस्विदनेनार्थे तथाचपंडिताःशास्त्रीयबुद्धि
संपन्नागतासून् मृतान्देहान्नानुशोचंति किमगतासूनित्यर्थः
अतनेवंनत्रमेदेहाइत्युपसंहारेदेहानांपरामर्शाउपक्रमेपिअ
शोच्यानित्यत्रदेहाएवोच्यंतइतिसाधिवभाति ननुतदाने
गतासत्वावेक्षणानंतरंमृतानांभीष्मादिशरीराणांस्वर्गला
भेकिंमिनाशितानांपुनःकुतश्चावोपलब्धिरितिशोचेमोत्याश
कौकेमत्तिसत्यायेनपुनर्मदीयत्वदीयभीष्मादिशरीराणांनत
श्योगइत्वादेहानरस्थिनानामिवैवोनश्यैच्यातेत्यत आह

67

भाषाअनुवाद

प्रथम अध्याय के २८ श्लोक से लेकर तुम जो कुटुम्बके जनोंका
शोक करतेहो सो वे सब तुमारे शोचने योग्य नहीं है और द्विती
य अध्याय के २ श्लोकसे लेहमसे प्रबोध कराये अर्थात् समझा
ये भी गये जो तुम पण्डितमानी के समान ये वचनउच्चारन क
रते अर्थात् कहते हो कि भीष्मकी संग्राममे कैसे मारें इससे यह
प्रतीति होती कि तुम यथार्थ पण्डित नहीं हो जिस हेतु बुद्धिमा
न पण्डित जो हैं वे गतप्राण अगतप्राण अर्थात् मरे औ जीवते
को नहीं शोचते हैं कि वन्धु विहीन हहकैसे जियेंगे ११

दोहा॥

नहि शोचनके योग्य जो तिहतं शोचत जाय बुद्धिवाद
को विविध विधताकों त अब गाय ११॥

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः नचै
वनभविष्यामःसर्वेवयमतःपरं १२ ॥

शांकरभाष्यं

कुतस्तर्ह्यशोच्याः यतो नित्याः कथं नत्वेव जातु कदाचिदहं नासं
किन्त्वासमेव अतीतेषु देहोत्पत्तिविनाशेषु घटादिषु वियदिव
नित्यमेवाहमासमित्यभिप्रायः तथा नत्वं नासीः किन्त्वासीरेव तथा
नेमे जनाधिपाः नासन् किन्त्वासन्नेव तथा न चैव न भविष्यामः
किन्तु भविष्याम एव सर्वे वयमतोऽस्माद्देहविनाशादुत्तरकाले
ऽपि कालेषु नित्या आत्मस्वरूपेणेत्यर्थः देहभेदानुवृत्त्या बहुव
चनं नात्मभेदाभिप्रायेण १२

आनन्दगिरिकृतटीका

नित्यत्वमशोच्यत्वे कारणमिति सूचितं विवेचयितं विवेचयितुं प्रश्न
पूर्वकं प्रतिजानीते कुत इत्यादिना नित्यत्वमसिद्धं प्रमाणाभावादि
ति चोदयति कथमिति आत्मा न जायते प्रागभावशून्यत्वात्खवि
षाणवदिति परिहरति नत्वेवेति किन्त्वात्मा नित्यो भावत्वे सत्यजा
तत्वाद्व्यतिरेके घटवदित्यनुमानात्तस्मादाह न चैवेति एवं कैश्चि
दात्मयाथात्म्ये जिज्ञासिते भगवानुपदिशति नत्वित्यादिना श्लोकच
तुष्टयेनेत्याह तद्विशेषवचने हेत्वभावात् सर्वत्रैवात्मयाथा
त्म्यप्रतिपादनाविशेषादित्याशयेन पदच्छेदः पदार्थोक्तिर्विग्रहो वा
क्ययोजनेति त्रितयमपि व्याख्यानाङ्गं प्रतिपादयति नत्वित्यादिना न
त्वात्मनो देहोत्पत्तिविनाशयोरुत्पत्तिविनाशप्रसिद्धेरुक्तमनुमानद्वयं
प्रसिद्धिविरुद्धतया कालात्ययापदिष्टमिदमिति नेत्याह अतीतेष्वि
ति चराचरव्यपाश्रयस्तु स्यादिति न्यायेनात्मनो जन्मविनाशप्रसिद्धे
रौपाधिकजन्मविनाशविषयत्वान्निरुपाधिकस्य तस्य जन्मादिराहि
त्यमिति भावः यद्यपि नत्वेश्वरस्य जन्मराहित्यं तथापि कथंममेत्या

गी॰
टी॰ द्वि॰

69

शंकामाह नत्वेति तथापि भीष्मादीनां कथं जन्माभावस्तत्राह तथा ने
मइति द्वितीयमवमानं प्रपंचयन्नुत्तरार्द्धं व्याचष्टे नत्वेमादिना ननु
देहोत्पत्तिविनाशयोरात्मनो जन्मनाशाभावेपि महासर्गमहाप्रल
ययोस्तस्याग्निविस्फुलिंगदृष्टान्तश्रुत्या जन्मविनाशावेष्टव्यावित्या
शंक्य नात्माश्रुतेरिति न्यायेन परिहरति त्रिष्वपीति यावदधिका
रन्तु विभागो लोकवदिति न्यायेन भिन्नत्वादधिकारित्वमात्मनामनु
मीयते भिन्नत्वे च बहुवचनप्रयोगप्रमितमित्याशंक्याह देहेति १२

स्वामिकृतटीका

नत्वेवाहमिति यथाहं परमेश्वरो जातु कदाचित् लीलाविग्रहस्या
विर्भावतिरोभावेनापि नासमिति न नैवं अपि तु आसमेवानादित्वा
त् नत्वं नासीर्न भूः अपि तु आसीरेव इमे च जनाधिपा नृपा नासन्नि
ति न अपि तु आसन्नेव महंशत्वात् न तथा अतः परं इतः उपर्यपि न भवि
ष्यामः न स्थास्याम इति च नैवापि तु स्थास्यामः एवं जन्ममरणशून्यत्वा
दशोच्या इत्यर्थः १२

म॰

पैशाचभाष्यटीका

कुतस्तेऽशोच्याः जन्ममरणादिमत्त्वासंभवादत आह नत्वेवेति जात
जातुशब्दः कदाचिदित्येतस्मिन्नर्थे वर्त्तते नाहं कदाचिन्नासं अपि त्वा
समेव नत्वं नासीः आसीरेवेत्यर्थः नेमे भीष्मादयो नासन् किंत्वास
न्नेव न चैव न भविष्यामः सर्वे वयमतः परं त्वमहमिमे च राजान
श्च सर्वे वयं जातु न भविष्यामः अपि तु भविष्याम एव अतीतेषु दे
होत्पत्तिविनाशेषु सर्वेषामेवास्माकमुत्पत्तिविनाशौ न स्तः यस्मात्
स्वरूपेण नित्यत्वात् तथा भविष्यद्देहोत्पत्तिविनाशेष्वपीत्यर्थः
र्थः बहुवचनं देहाद्देहाभिप्रायेण देहोत्पत्तिविनाशौ न स्तः यस्मात्
चात्मनो जन्मविनाशाशंका न कर्त्तव्येत्य बहुदेहेषु जायमानेष्वपि न प्रत्यस्य
चात्मनो जन्मविनाशो न स्त इत्युक्तं भवति १२

भेदा

रामानुजभाष्यटीका

प्रथमं तावदात्मनां स्वभावं शृणु अहं सर्वेश्वरस्तावदतो वर्त्तमा

नात्पूर्वस्मिन्ननादौ कालेन नासं अपि त्वासं त्वन्मुखाश्चैते ईशितव्या
क्षेत्रज्ञा न नासन् अपि त्वासन् अहं च यूयं च सर्वे वयमतः परस्मिन्न-
नन्ते काले न चैव न भविष्याम एव यस्मादहं सर्वेश्वरः परमात्मा नि-
त्य इति नात्र संशयस्तथैव भवन्तः क्षेत्रज्ञा आत्मानोऽपि नित्या एवेति मन्त-
व्यं एवं भगवतः सर्वेश्वरादात्मनां च भेदः पारमार्थिक इति भगव-
तैवोक्तं इति प्रतीयते अज्ञानमोहितं प्रति तद्विहतये पारमार्थिक
नित्यत्वोपदेशः अहं त्वमी इमे सर्वे वयमिति व्यपदेशात् औपाधिका-
त्मभेदवादे ह्यात्मभेदस्यातात्विकत्वेन तत्त्वोपदेशसमये भेदनि-
र्देशो न संगच्छते भगवदुक्तात्मभेदः स्वाभाविक इति श्रुतिरप्याह नि-
त्यो नित्यानां चेतनश्चेतनानामेको बहूनां विदधाति कामानिति नित्या-
नां बहूनां चेतनानां य एकश्चेतनो नित्यश्च कामान्विदधातीत्यर्थः
अज्ञानकृतभेददृष्टिवादे तु परमपुरुषस्य परमार्थतत्त्वदृष्टेर्निर्वि-
शेषकूटस्थनित्यचैतन्यात्मयाथात्म्यसाक्षात्कारान्निवृत्ताज्ञानतत्का-
र्यतया अज्ञानकृतभेददर्शनं तन्मूलोपदेशरूपं व्यवहारं च परमपुरुष-
स्याधिगताद्वैतज्ञानस्य बाधितानुवृत्तिरूपमिदं भेदज्ञानं दग्धपटा-
दिवन्न बन्धकमित्युच्यते नैतदुपपद्यते मरीचिकाजलज्ञानादिकं
हि बाधितमनुवर्तमानमपि न जलाहरणादिप्रवृत्तिहेतुः एवमत्रा-
प्यद्वैतज्ञानेन बाधितं भेदज्ञानमनुवर्तमानमपि मिथ्यार्थविषयत्व-
निश्चयान्नोपदेशादिप्रवृत्तिहेतुर्भवति न चेश्वरस्य शास्त्राधिगततत्त्व-
ज्ञानतया बाधितानुवृत्तिर्वक्तुं शक्यते तथा च श्रुतिः यः सर्वज्ञः
सर्ववित् परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया
च वेदाहं समतीतानीत्यादिश्रुतिस्मृतिविरोधात् किं च परमपुरुष-
स्येदानीन्तनगुरुपरम्परायाश्चाद्वितीयात्मस्वरूपनिश्चये सति अनुवर्त-
मानेऽपि भेदज्ञाने स्वनिश्चयानुरूपमद्वितीयमात्मानं कस्मा उपदिश-
ति निवर्तकं प्रतिबिम्बवत्प्रतीयमानेभ्योऽर्जुनादिभ्य इति चेन्नैतदुपपद्यते

गी·
टी·द्वि·

70

नचात्मनः कोपिमार्गाकृपाणादर्पणादिवत्प्रतीयमानेषु स्वात्मप्रति
बिंबेषु तेषां स्वात्मनो नन्वज्ञानात्तेभ्यः कुमप्यर्थमुपदिशाति वाधि
तानुवृत्तिरपि तेनैशक्यानेवकुंबाधकेनाहिनीपात्मज्ञानेनात्मव्यति
रिक्तभेदज्ञानकारणस्याप्यज्ञानादेर्विनष्टत्वात्‌ हि चेद्‌ज्ञानादौतत्वं
द्वैकत्वज्ञानेन पारमार्थिकतिमिरादिदोषस्य हि चेद्‌ज्ञानादौतत्वं
द्वैकत्वज्ञानेन पारमार्थिकतिमिरादिदोषस्य हि चेद्‌ज्ञानादौ तत्वं·
नष्टत्वात्‌ ह्यपि नानुवृत्तिर्द्विकाद्यनुवर्तमानमपि प्रबलप्रमाणबाधितत्वे
नाकिंचित्करं रहस्तं भेदज्ञानस्यमविषयस्य सकारणस्यापारमार्थि
कत्वेनावस्त्वतयात्मज्ञानविनष्टत्वात्‌ कथंचिदपि बाधितानुवृत्तिः संभ
वति अतः सर्वस्य रसस्य इदानीं ननु रूपपरंपराप्यनन्यज्ञानेस्तीति वे
द्वैदर्शनतत्कार्योपदेशाय संभवः भेददर्शनमस्तीति चेत्‌ अज्ञा·
नस्य तद्धेतोः स्थितत्वेनाज्ञानादेवसन्तताम्नुपदेशेन संभवति किं
च्छिष्यं प्रत्युपदेशो निःप्रयोजनः गुरुस्तर्हि नु च कल्पितमिति चेत्‌ शि
ष्यतज्ज्ञानयोरपि कल्पितत्वात्तदप्यनिवर्तकं कल्पितत्वेपि एवं विरोधि
त्वेन निवर्तकमिति चेत्‌ तदाचार्यज्ञानेपि समानमिति तदेव निवर्तकं
भवति स्तुतौ उपदेशानर्थक्यमेवेति तत्समीचीनवादेर्निरस्तेः ११
अभिनवगुप्तटीका

यमर्थद्वयमाह नदेवाह
नेन देहिनामात्मनित्यनेनव
प्रवाह महंहि नैवनमासम
आसंपूर्वत्वमपि अमीराजा

शोचितव्यानिमानेवं ... [illegible]
... [illegible]
... [illegible]
... [illegible]
परमार्थप्रणाकृतटीका ... भवेत्‌ १२

ननु शोकः किं जीवनिमित्तकोदेहनिमित्तकोवानाद्यः तेषां नित्य
त्वात्‌ नापरः तेषां पुरो निरितं वहनमानत्वादिमाशंक्याह्लोके

वस्तु·

तमाह न त्वेवाहमिति [illegible] यतोहमीश्वरो जातु कदाचित्स्वेच्छाधृ
तविग्रहस्याविर्भावतिरोभाववाः पूर्वं नासमिति न किं त्वासमेवा
नादित्वात् न च त्वं नासीः किं त्वासीरेव इमे जनाधिपा राजानो
नासन्निति न किं त्वासन्नेव मदंशत्वात् तथाऽतः परमग्रे वयं स
र्वे ग्राच्छिह पितानैव भविष्याम इति किं तु भविष्याम एव ननु जी
वनिरूपणो अहमिति दिने गमनागमनरहितस्येश्वरस्य कथं स
संग इति चेन्न परमार्थतो विचारे जीवोपि मदंशत्वान्नित्योनादिश्च
तितान्विपरितान अनुशोचंतीत्यर्थः १२ ॥

वनमालीकृतटीका

नन्वस्तु देहभिन्नात्मनः प्राणसंयोगवियोगादिरूपजन्ममरणाभा
वः देहे च दृश्यं सर्वजीवनाशसंभवात्कथं न शोकः कार्य इत्यत आ
ह नत्वेवेति स्वविग्रात्मतां स्वभावं शृणु अहं सर्वेश्वरो वर्तमाना
त्पूर्वस्मिन्काले नासमिति न अपि त्वासमेव जातु कदाचित्त्वमि
मे जनाधिपाश्च सर्वे जीवाः सच्चिदानंदस्वरूपा मन्नियम्या नासन्नि
ति न अपि त्वासन्नेव एवमहं यूयं सर्वे वयमतः परं प्रलये मुक्तौ
च न भविष्यामः इति न अपि तु भविष्याम एवं च हेयस्याति शो
येन प्रकृतार्थस्य बोधकत्वात् आसन्नेव भविष्यामः एवेत्यर्थः
इदानीमस्म इति नोक्तं सिद्धत्वात् येऽर्जुनादयो हे ईश्वरीकृतस्य सामर्थ्या
ज्जातेन नित्यत्वाच्छ्रुतात् श्रुति यथाहं सर्वेश्वरो नित्यः कालत्रयसं
बंधी तथा त्वमेते जनाधिपाश्च नित्याः कालत्रयसंबंधिन इत्युप
देशः न च वेदांते नैरीश्वरनित्यत्वं जानंतो नतन एव जीवनित्यत्वस्या
पि ज्ञानं भविष्यतीति किमत्र जीवनित्यत्वोपदेशेनेति चेन्न नि
त्यो नित्यानां चेतनश्चेतनानामिति श्रुतेर्हि नित्यानामिति निर्धार
णसामर्थ्याज्जीवानां नित्यत्वमौपचारिकं परमनित्यत्वं तु ईश्वरस्यैव
[illegible] नित्यानामिति निर्धारणस्य अपि जीवानामपि [illegible]

...इति शंकानिरासाय वह्निमत्त्वसाम्यतया जी
वनित्यत्वं भगवतोक्तं अतः सृष्टीनां संबंधमात्रे न तु निर्धार
णो भेदव्यपदेशाच्चान्यः शारीरश्चोभयेपि हि भेदेनैनमधीयते
अधिकं तु भेदव्यपदेशादित्यादिसूत्रैः ज्ञाज्ञौ द्वावजावीशानी
शौ य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति यो विज्ञाने तिष्ठ
न् विज्ञानमन्तरो यमयति पृथगात्मानं प्रेरितारं च मत्वा जुष्ट
स्ततस्तेनामृतत्वमेतीति श्रुतिभिः अनन्यः परमो राजंस्तथान्यः
पंचविंशकः स्मृत इत्यादिस्मृतिभिश्च प्रतिपादितस्य भेदस्य [ ] त्रिका·
लाबाध्यत्वरूपं सत्यत्वं कालत्रयेपि तद्रूपं नित्यत्वं च भगवता प्रतिपा
दितं न त्वेवाहमीश्वर इत्यस्य द्वैतौ च भेदसिद्धोपदेशवैयर्थ्यमि·
ति वाच्यं प्रत्यक्षस्य वर्तमानमात्रग्राहित्वेन वर्तमानभेदसिद्धावप्य
तीतानागतभेदस्याप्रमितासिद्धस्य बोधकत्वेनोपदेशस्य सार्थ
कात् यद्यपि भेदवाचकं श्रौतं पदं नास्ति तथाप्युक्तसूत्रैः
श्रुतीनां भेदपरत्वेन व्याख्यातत्वात् भगवद्वाक्ये यद्यपि भेदवा
धकं ते पदं नास्ति तथाप्यामन[ ] स्यामनस्य देवाविस्व आऊ
तीरित्यादौ यथा बहुत्वसंख्या[ ] नास्ति स्व आऊनयः सिद्धेति
नयावयमित्युक्ते बहुत्वसंख्याभेदः सिद्ध्यति यथा च तप्ते पय
सि दध्यानयति सा वैश्वदेव्यामिक्षेत्यत्रामिक्षाद्रव्यके यागे वि
धाय वाजिभ्यो वाजिनमिति वाजिनाख्यगुणो विहितस्तस्यामि·
द्रात्परत्वाद्बहुदेवे यागे निवेशासंभवेन स्वैव यागाहिजयाग·
बोधकत्वम् तथा भगवदुक्तस्य मदर्थत्वम् भगवन्स्त्वया
संभवेन तन्न श्रुतेनांतरस्य बोधकत्वं सिद्धानि न हि सैव संप्र
तिपन्नार्थत्वम् न च भेदो मिथ्या जक्षन्क्रीडन्रममाणः वि
रंजनः परमं साम्यमुपैतीति श्रुतिनिषेधमात्रेपि भेदप्रतिपादकता
न नैव सोवांतरमोदः परंज्योतिरुपसंपद्य स्वेन रूपेणाभिति

अथ तत्र प्रतिस्वस्वरूपाविर्भावलक्षणास्य परिमुक्तित्वात् तथाभेद
स्य मायिकस्य मायायामोहं विना दर्शनासंभवेनोपदेशाद्यसंभवाच्च
नहि स्वप्रज्ञो वचनेन रूपमुपदेशं स्व प्रत्येवं करोतीति न च स्वामिकगुरु
शिष्यवदुपदेशाद्युपपत्तिः स्वामिकोपदेशोपलब्धज्ञानमोहा
देर्मिथ्यात्वनमोहस्य मिथ्यात्वापत्तेः तथापत्तौ न हि बोधकवेदस्यत
दुपायबोधकवेदस्य न दुष्टत्वेन वेदमात्रस्य वाऽप्रामाण्यापत्तेः क
य॰ ल्पितत्वसजातीयत्वस्य प्रत्युपदेशकत्वसंभवेपि तज्ज्ञानतो भगवत उ
पदेशकत्वासंभवात् कल्पितभेदं कल्पितत्वेनाज्ञानतो भ्रांत-
त्वापत्तेश्चेश्वरत्वहानेः न ह्यनिस्वीकारेण कृतार्थो हृत्तावयत्नेयेव
निरीश्वरवादिना किंच भेदः स्पृष्टेन कल्पितो विशिष्टेन वा नाद्यः
घसे॰ सदैव कल्पकत्वेन स्पृष्टस्य कल्पकत्वासंभवात् न द्वितीयः क
ल्पकस्याधिकसत्ताकत्वनियमेन कल्प्यस्यांख्याभूतस्य विशि- मि॰
ष्टस्य कल्पकत्वासंभवात् किंच जीवः प्रतिबिंबो वाऽवच्छिन्नो वा ना
द्यः उपाध्यंतर्गगनस्योपाधौ प्रतिबिंबासंभवात् नहि जलस्य घटा स्प॰
देर्जले प्रतिबिंबः उपाध्येकदेशस्यापि त्वांगीकारे ब्रह्मणः सदे-
शत्वापत्तेः न चाकाशस्य जले प्रतिबिंबः तस्य सदेशत्वेनोपाधिव
हिः स्थस्य तत्संभवात् बलतनस्थनास्येवाकाशप्रतिबिंबो जलादे
र्वा दृष्टत्वानापत्तेः नरूपवाद्दृष्टस्य प्रतिबिंबस्यादृष्टो भवति ध
र्माधर्मवाय्वपिशाचादेः [illegible] पि प्रतिबिंबस्यापि चादृष्टत्वा
पत्तेः किंच प्रभामंडलस्येव प्रतिबिंबः पारमार्थिकस्य ब्रह्मणः स
न्नसत्ताकव्यावहारिकोपाधौ प्रतिबिंबासंभवात् नहि मरीचि
जले सूर्यप्रतिबिंबः संभवतीति न द्वितीयः उपाधिना ह्येकदेशोव-
च्छिद्यते कृत्स्नं वा आद्ये सदेशत्वापत्तेः द्वितीये तूपाधेर्भेदकत्वा
संभवेन कृत्स्नस्य जीवत्वमीशत्वं वा स्यात् अंतर्यामिब्राह्मणस्यो
भयथाविरोधाच्च नहि घटावच्छिन्नस्य महदावच्छिन्नाकाशत्वम

गी॰
टी॰

मदावच्छिन्नस्य चैदावच्छिन्नाकाशत्वमस्ति । न वा जीवोपाध्यंतर्गतस्ये
शत्वं तत्रास्मास्यांतः प्रविश्य नियामकत्वरूपमंतर्यामित्वं न वा
स्वकौंतेयस्याराधेयत्ववत्परब्रह्मण एव जीवत्वं तथासत्युपदेशस्य
तेजलांजलितापत्तेः नहि राधेय एव त्वं राधेयो न भवसि किंतु कौं
तेय इति राधेयस्योपदेष्टानिसमुक्तत्वबोधकश्रुतीनां निर्विषय
त्वापत्तेश्च । न च तत्त्वमस्यादिवाक्यसिद्धो जीवेश्वराभेदः कथम
पलप्यत इति वेत्तद्वाक्येन हि स्वरूपातिरिक्ताभेदादिबोधनेऽव
र्थिकत्वहानिस्तद्बोधने भेदस्य बाधकाभावेन पारमार्थिक
त्वसिद्धिः स्वरूपस्याज्ञानाद्यधिष्ठानतया सदासिद्धत्वेन वाक्यवैय
र्थ्यं स्यात् आत्मा तत्त्वमसीत्यत्र अतत्त्वमसीति पदच्छेदेन स्वरसात्स्वप
मेव जीवेनत्वबोध्यते भेदबोधकत्वदृष्टान्तानुरोधात् तथा
रिपरिभ्रमणेन श्रान्तः सूत्रबंधः पक्षी शंकुमेवाश्रयति तथा
जागरादौ [illegible] श्रांतो जीवं सुषुप्तौ परेशं संश्रयतीत्याह यथाश
कुनिः सूत्रेण प्रबद्ध इत्यादिना यथा मधुकैः हृता रसा अथे
म॰ अस्याहं घत[illegible]स्येति भेदं न विदंति तथा जीवे विद्यमानोप्यवि
याद्वहिनेत्वभिन्नतया ज्ञायते परेशमित्याह यथा सोम्य मधुक
नेत्यादिना यथा चेतनाभिः समुद्रे मिलिताभिर्नदीभिः इयं
गंगा इयं यमुनेति न ज्ञायते तथा बोधिस्मिन्नैक्ष्येभ्यस्तया न ज्ञायत
इत्याह यथा सोम्येमा इत्यादिना यथा रुद्रस्य विद्याते न विद्यमानस्य
षीश्वरात् प्रशान्तस्यैवमवस्थानं तदभावे च विद्यानकाभावेपि श्रु
क्तात्तथा जीवस्य मात्रुषादिदेहेपीश्वराधीनत्वमित्याह यथा
सोम्य मह्लतो द्वदस्य मादिना यथा वटवीजे महावटः सूक्ष्मतया सत्
पिनो लभ्यते तथा जीवोगतो हरिर्न दृश्यत इत्याह स एषोथ फल
मित्यादिना यथा जले महिमलवणात्थमेतादृशस्य माणोपिल
वणां तदृश्यते तथा बद्धावस्थानेहन्तेसामर्थ्येदृश्यमाणोपिसत्

स्या

रहस्यमित्याह लवणमुदकेवधायेत्यादिना यथा लोके कश्चित्पुरुषो व
द्धाक्षो देशांतरे नीतो वा मुक्तः पृष्ट्वा पृष्ट्वा स्वदेशमायाति तथाऽज्ञो यो
पि श्रोत्रियोपदेशादिनाज्ञ इत्याह यथा सौम्य पुरुषमित्यादिना
यथा रोगी स्वव्यापारः प्राज्ञस्यात्मवेदनया मुमूर्षोः परेण संप
न्नो जीवस्तेन वेदेत्याह पुरुषं सोम्योपतापिनमित्यादिना यथा
कश्चित्पुरुषो राजभटैरानीतस्तेयमिति यदा स चोरस्तदा दं
डयः यदा न चोरस्तदा न तथा योऽहं ब्रह्मेति ज्ञानी स ... न बद
ते य बोधनात्पूर्वं वेदेति द्वितीयं च हि नेयमनुसोऽप्यानेतर्वी का
नो सत्त्वं सामान्यविशेषविचित्रमात्मानमेव देहे येन बोध्यते यत्तु बोध
स्तु मानं ... पारकीयत्वं तदुपहारकत्वात् देहः
महिनं ब्रह्मेति जानन् देहं त्यजेदित्याह पुरुषमित्यादिना स्वस्य संसारि
त्वादिकं मत्वा तत्स्य जीवस्य सच्चिदानंदाकारत्वं निर्मुक्तत्वादिने
श्वरसादृश्यं बोध्यते वा केन न च सादृश्येन प्रत्यक्षसिद्धे जीवस्य
एतं दर्शनाय आविर्याहतत्वात् अत एव जगद्दर्जगदेवं ... णापि
परस्य निरस्ता न यं हि यद्द्रष्टव्यवान्सर्वज्ञत्वादिविशिष्टद्र
धीरूढीनादत्तानात् अधिष्ठानतया भानात्स न तद्दर्थ इत्यादि प्रत्यक्ष
सिद्धांश्चैतन्यमात्रादधिकार्थस्य लक्षणं जन्म बोधे अभाने त
देवत्वपर्यायात् भाने चव वाक्यस्य सार्थकत्वापत्तेः अद्वैतवादे नेत्थ
नेव प्रत्यक्षे विशिष्टस्य भाने पि शुद्धं न भासते ते न सत्ता योगाय वा
क्यं सार्थकमिति वाच्यं विशिष्टभाने विशेषभानावश्यकत्वात्
नहि दंडिनि भाने पुरुषव्यक्तिर्न भासते शुद्धभानं विना जगदा
ध्यापत्तेः नत्वधिष्ठानभानं विनाध्यस्तस्य भानं भवतीति किंय
ते व शुद्धमधिष्ठानं प्रपंचस्तत्राध्यस्त इति तथा न च द्वितीयादिभ
यं भवतीति विरोधः द्वितीयादित्युक्तत्वात्समादधिकाद्धि लोके यामे
भयमनुवदति स्फुनिर्यतः अन्यथा वार्थ्यवास्तुरुषो वेदेत्यादि स्फु

पूर्वोत्तरवाक्येन भेदस्यैव बोधनात् यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता इतिश्रुत्या भोक्तृभोग्यभेदो बोध्यते यत्र पुत्रेण सह आगतः पिता इति अत्रैव प्रधान

गी·
टी·टि·

73

तिविरोधः स्यात् एकाकी न रमते एकाकी विभेति सहायमीहांचक्र
इति श्रुतेः क्रियाफलं ज्ञानीयक्रियाकर्तृत्वेन किंवा पतत्रादिवान्
ज्ञानमात्रेण नाद्यः ब्रह्मणोऽपि भोगप्रसंगात् नान्त्यः ईश्वरस्य प्राणि
मात्रभोगेन ज्ञातृत्वेनादृष्टाधार्थोपपत्तेश्चेति तत्र ब्रह्मणा सहेत्यनास
र्वान्कामान्सह युगपदश्नुत इति योजनेऽपि मोक्षे भेदसिद्धेः यमे
वैष वृणुते तेनैव लभ्य इति श्रुतेः ब्रह्मणा च न मुक्तिर्विना सहेति
वार्थः सहशब्दस्याप्रलेरप्रदर्शनीयत्र प्रसक्तेरेण सहप्रसक्तेरसह
णकाले अप्रसिद्धकालो शाब्दो प्रदर्शितो इति विभक्तिव्यत्ययेन सह
वार्ति शब्दस्य कालपरत्वे कादाचित्कमित्यत्रापि च न भवस्य मुक्तिकाले
हि पराहीते सर्वान्कामानश्नुते आविर्भूतनिरतिशयानंदराशिभि
वती सर्वं ब्रह्मणा सहैने सर्वे संप्राप्यमेयति संचरेत तस्यांते कृतात्म
नः प्रविशंति परमं पदमिति स्मृतेः परस्य कर्तृकर्मक्रियादिपदानां
वैयर्थ्यमेव न हि तत्र मते स्वरूपभिन्ने मोक्षे किमप्यस्ति न च यदु
दरमंतरं कुरुते इति श्रुतिविरोधः अंतर्यामित्वादिना प्रसक्तेश्वराभे
दस्यानया निषेधात् न च नेह नानास्ति किंचनेत्यादिश्रुतिविरो
अवतारी धः अंतर्यामित्वादिना प्रसक्तेश्वरभेदस्यानया निषेधात् न च ने
हनानास्ति किंचनेत्यादिश्रुतिविरोधः अंतर्यामित्वादिना प्र
सक्तेश्वरभेदनिषेधात् भावप्रधाननिर्देशेन नानाशब्दस्य नाना·
त्वार्थकत्वात् अन्यथा नानानिषेधस्यैव ब्रह्मभिन्नत्वाद्वितं मात्र
निषेधयोर्विरहतः न च भिन्नाभावो ब्रह्मस्वरूपः ब्रह्मस्वरूपस्य सदा
सिद्धत्वेनोपदेशवैयर्थ्यात् सप्रतियोगिकभ्रमकालाज्ञातस्य
नानानिषेधस्य निःप्रतियोगिकभ्रमकालज्ञानब्रह्मस्वरूपता
संभवात् अभावस्यातिरिक्तस्य मन्यत्वस्वीकारे भावत्वापत्त्या
ताधिकरणतादीनां भावानामपि मन्यत्वावश्यकत्वात् न चैवमे
वाद्वितीयमिति सजातीयविजातीयस्वगतभेदनिषेधकश्रुति

विरोधः एकपदेन मुख्यत्वस्य बोधनात् एके मुख्या अन्ये केवला इति कि
ष्यात् द्वितीयपदे समानाधिकरण्यबोधनात् एवकारेण विशेषण
संगतेन शंखः पांडुर एवेत्यादाविवायोगव्यवच्छेदे वस्तुतोऽयोगव्यव
च्छिद्यते न त्वत्र विशेषसंगतएवकारो येन पार्थ एव धनुर्धर इत्यादावि
वान्ययोगव्यवच्छेदो बोध्येत किंचाद्वितीयपदेनैव द्वितीयमात्रनिषे
धसिद्धेरुपदांतरवैयर्थ्यात् विशेषणतयोपलक्षणतया वास्
त्वाद्वितीयाभावबोधनेनैवोद्देशहानेः अतिविहितस्य द्विती
याभावस्याज्ञातापत्त्या पुनः अन्यानिषेधासंभवात् चिन्मात्र
स्यैव बोधने चिन्मात्रसिद्धत्वेनोपदेशवैयर्थ्यात् चिन्मात्रज्ञान
स्यैवनाविरोधित्वेन द्वैतस्य सत्यत्वोपपत्तेः न हि भूतलमात्रज्ञाने
घटस्य तदभावस्य वा धियो विरोधि संततिच भेदश्रुतेः षड्विधता
त्पर्यलिंगानि आथर्वणे द्वासुपर्णेत्युपक्रमः परमं साम्यमुपैती
त्युपसंहारः तयोरन्यः अनश्नन्नन्यः अन्यमीशमित्यभ्यासः शास्त्रै
कगम्येश्वरप्रतियोगिकस्य तदन्तयोगिकस्य त्रैकालिकभेदस्य शा
स्त्रं विनाप्राप्तेरपूर्वता पुण्यपापे विधूयेति फलं अस्य महिमानमे
तीति स्तुतिरूपोऽर्थवादः अनश्नन्निरुपपत्तिः अंतर्यामिब्राह्मणे
पि षड्विधलिंगोपेतेनैवाक्ये तथाहि [illegible] अंतर्यामिण
मित्युपक्रमः [illegible]
[illegible]
नः एष त आत्मांतर्याम्यमृत इत्युपसंहारः एष आत्मेत्याद्येकविंश
तिकृत्वोऽभ्यासः अंतर्यामित्वस्याप्रमानत्वात् अपूर्वता सर्वेषु लोकेषु वि
दितिं दात्रूपोऽर्थवादः यस्य पृथिवी शरीरं पृथिवी यं न वेद यस्यात्मा
शरीरं आत्मा यं न वेदेत्याद्युपपत्तिरिति न च नाद्भीश्वर इति प्रत्य
क्षेणैव भेदसिद्धा अतिरनुवादिकेति वाच्यं प्रत्यक्षस्य प्रामाण्ये हि
तेनैव भेदसिद्ध्यास्तु भेदश्रुतेरनुवादत्वात् वादः प्रत्यक्षस्य प्रामाण्यम

गी॰
टी॰ टि॰

74

तेरन्तुवादकत्वासंभवात् अप्रमाणगृहीतमात्रग्राहित्वेनानुवादक
त्वस्वीकारे अप्रमाणगृहीतमात्रग्राहित्वेन श्रुतेरप्रामाण्यापत्तेः नव
भेदस्य प्रत्यक्षत्वासिद्धत्वेन शास्त्रारंभो व्यर्थः ईश्वरप्रतियोगिकभेदस्य
प्रत्यक्षसिद्धत्वेप्यनेन गुणपूर्णस्य श्रीहरेरप्रत्यक्षत्वात् श्रवणम
ननिदिध्यासनादिना तमपरोक्षीकर्तुं शास्त्रारंभस्य सार्थकत्वा
त् ॥ १२ ॥

ऊं समवेजयंतीटीका

^ नत्वात्मनां देहाधीनजन्ममरणयोः सुप्रसिद्धत्वात्कथमशोच्यत्वमित्याशंक्य तेषां त्रैकालिकनित्यत्वं परस्परभेदत्वभावं च स्वयमेव वदन्नशोच्यत्वं साधयति

^ नत्वेवाहमिति नत्वाहेन देहेंद्रियमनोबुद्धिप्राणादिभ्यो विलक्षण
त्वस्तु चितम् यथाहं सर्वात्मा सर्वे[illegible]श्वरेश्वर इतो वर्तमानात्पूर्व
स्मिन्नतीते भूतकाले जातु कदाचिदपि नासमिति ना पितासमे
व तथा त्वमपि नासीरिति ना पितासीरेव इमे जनाधिपा राजान
श्च किंत्वासन्नपि त्वासन्नेव पुनरप्यतो वर्तमानात्परस्मिन्ननंते
भविष्यत्तथा वत्स्यत्काले नामेषां सर्वजीवात्मनामपि नित्यत्वं मत्वा
त्वशोकं मा कुरु इत्येवं जीवेश्वरयोरभेद इति वदतां प्र[illegible]च्छिन्नबौ
द्धानां मुखे धूलीकुर्वता भगवता परमपुरुषेणैव श्रुतिस्मृत्याय
विरोधेनैव स्वस्मात्तेत्र ज्ञातमनो पारमार्थिक एव भेद उक्तः तेषां
मतेनाज्ञानोत्सेकोज्जृंभमाणो नु शेते न ह्यामे नो भुक्तभोगामज्जो
न्यः द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोर
न्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ज्ञाज्ञौ द्वावजावीशनीशौ
नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामाः
न शरीरश्चोभयेपि भेदेनैनमधीयते भेदव्यपदेशाच्चान्यः अधिकं
तु भेदनिर्देशादित्यादिभेदप्रतिपादकशास्त्रकदंबविरोधाज्जी
वेश्वरयोरभेदकथनं मरुदनुपपन्नमेव नन्वस्मत्सिद्धांतेऽज्ञान
प्रपंचकाध्यासेनैव सर्वस्य भेदस्य तद्विषयकशास्त्रस्य च सर्वलौ
किकवैदिकव्यवहारस्य च सिद्धत्वान्नन्वनुपपन्नमेवैतन्नन्वस्मा

^ [illegible]काले अहं त्वं इमे च सर्वे वयं न भविष्याम इति न अपि तु भविष्याम एव यथा परमेश्वरस्य मम नित्यः संशयं नित्यत्वं

प्रच[illegible]
वाद[illegible]

सिद्धं तेनात्र प्रयुक्ताध्यासेनैव सर्वस्य भेदस्याविद्याकल्पितत्वात्
सर्वलौकिकवैदिकव्यवहारस्याविद्याकल्पितत्वं कथमनुपपन्नत्वमभेदक
थनस्येति चेन्न अधिष्ठानाध्यासयोरेवासम्भवात् तथाहि शुद्धबुद्ध
निर्विशेषाद्वितीयचेतनमात्रस्य वस्तुनोऽधिष्ठानत्वं न सम्भवति य
तः सामान्यविशेषधर्मवत्त्वस्याधिष्ठानत्वप्रयोजकत्वं सामान्येन ज्ञा
ने विशेषेणाज्ञानमेवाधिष्ठानं लोके प्रसिद्धं यथेदं रजतमित्यत्रे
दन्तासामान्यधर्मो रजतस्य साधकः शुक्तौ वर्त्तते शुक्तित्वं च विशे
षधर्मस्तस्य बाधकः सर्वानुभवप्रसिद्धः न तथा निर्धर्मके चिन्मा
त्रे वस्तुन्युभयधर्मवत्त्वं वक्तुं शक्यं सिद्धान्तभङ्गात् कथंचित्सामान्य
धर्माङ्गीकारेऽपि विशेषधर्मानङ्गीकारेण तद्बाधायोगाच्च अथारोप्या
सिद्ध्याप्यध्यासासिद्धिः यद्यदारोप्यते तत्तत्सत्यं प्रधाने शुक्तिरूप्यादि
वत् यत्रैवं तत्रैवं शशशृङ्गादिवदित्यन्वयव्यतिरेकव्याप्तेः सर्व
वादिसम्मतत्वात् अथ भ्रमसामान्यभावादध्यासाभावः तथा
हि भ्रमसामग्री सावयवत्वेन्द्रियसंप्रयुक्तता यावत्सादृश्यं पूर्वप्र
माजन्यसंस्कारो दोषश्चेत्यपेक्षिते तत्राद्ये त्रयमधिष्ठाने दोषसं-
स्कारौ तु ज्ञातृपुरुषनिष्ठौ यथेदं रजतमित्यत्रेन्द्रियसंप्रयुक्ततया शु
क्तेः सावयवत्वं परमार्थरजतसादृश्यं शुक्तौ प्रत्यक्षप्रमाणसिद्धं त
त्संस्कारदोषौ पुरुषनिष्ठौ न तथा दार्ष्टान्तिके निरवयवनिर्गुणपर
त्मनि निर्गुणावयवसादृश्यादीनामयोगात् केवलो निर्गुणश्च नि
ष्कलं निष्क्रियमित्यादिश्रुतेः नापि दोषसंस्कारौ भवतः तदाश्रय
स्य ज्ञात्रन्तरस्याभावात् अधिष्ठानमात्रस्यैव तदा सत्त्वात् जीवस्य भ्रम
कार्यत्वेन तदुत्तरभावित्वात् अथाज्ञानस्याश्रयविषयप्रयोजका-
भावादध्यासाभावः तत्राज्ञानाश्रयो ज्ञानमात्रं ब्रह्मैव जीवो वाऽन्य
हो नाद्यः ज्ञानमात्रस्य स्वयंज्योतिषो वस्तुनोऽज्ञानाश्रयत्वानर्हत्वात्
सूर्यस्यान्धकाराश्रयत्वमत्यन्तं कोऽब्रवीतीति भावः नापि जीवः

वेना

गी·
टी·द्वि

तस्याध्यासकार्यत्वेनतदुत्तरभावित्वात् नतृतीयः उभयभिन्नत्वेनतन
सादृश्यग्रहत्वात् तथाकोवाऽज्ञानविषयः शुद्धानुभवमात्रंउत
तद्भिन्नोन्यः तस्यभवन्मतेज्ञानविषयत्वेनाज्ञानविषयत्वानर्हत्वा
त् अज्ञानतन्निवर्तकज्ञानयोरेकाधिकरणत्ववदेकविषयस्यापि
नियमाच्च नद्वितीयः ज्ञानाज्ञानोभयभिन्नस्यतदानीमभावात्
तद्भिन्नस्यसर्वस्यापितत्कार्यत्वेनतद्विषयत्वायोगात् ननुगृहेद
रहतितमसोयथागृहमेवाश्रयोविषयश्चेतिप्रसङ्गसिद्धः तथा
त्रापिशुद्धंब्रह्मैवाज्ञानस्याश्रयोविषयश्चेतिचेन्नदृष्टान्तवैषम्या
त् गृहतमसोरज्ञानरूपत्वेनेतरेतराविरोधित्वात् दार्ष्टान्तिकेतुज्ञा
नाज्ञानयोरातपतमसवद्विजातीयत्वेनेतरेतरविरोधित्वात् नहिसूर्यस्यान्ध
काराश्रयत्वंतद्विषयत्वंवाकोटिवर्षैरपिसंभावयितुंशक्य
म् किंचाध्यासोपादानंब्रह्मणियदज्ञानंतत्स्वप्रयुक्तंब्रह्मप्रयुक्त
मन्यप्रयुक्तंवेतिविवेचनीयम् नाद्यः आत्माश्रयदोषप्रसंगात्त
स्यप्रयोक्तृत्वासम्भवाच्च अन्यथाघटादावपिप्रयोक्तृत्वापत्तेः न
द्वितीयः प्रयोक्तृत्वस्यकर्तृत्वविशेषधर्मत्वात्तस्यत्वन्मतेप्यासव
स्तुरूपाश्रयत्वात् शुद्धे तदसंभवात् अपिचदेवतिर्यङ्मनुष्य
नारकादियोनिप्राप्तिरूपानर्थहेतोरविद्यायाः स्वरूपंशुद्धंब्रह्मजा
नातिनवा [illegible] जानातिचेत्तथाज्ञानाकोवाकमिवप्रः स्व
नतत्रस्वात्मानंनिस्पृश्यात् ज्ञानत्वापत्त्याभवन्मतेशुद्धदोनेश्च तज्ञा
नातिचेदज्ञतापत्त्याब्रह्मत्वासिद्धेः शुद्धंचिन्मात्रेनब्रह्मअज्ञत्वात्
संसारिजीववद्विद्यमानात् नापितृतीयः उभ[?]येनरवस्त्वनङ्गीका
रात् अङ्गीकारेचतत्राप्युक्तयुक्त्याप्रयोजकात्त्वंनेस्यान्यदिमनवस्था
पत्तेः किंचाज्ञानस्यसत्वमसत्वंवानाद्यः भवतामनङ्गीकारात् नद्वि
तीयः असतः आवरकत्वासंभवात् अधिष्ठानावरणाभावेऽध्या
साभावः नहिशुक्तिस्वरूपभासमानेरजतारोपोभवतीतिभावः किं

वस्तुप्रकाशेस्यावरणासम्भवेपि अध्यासार्थं दुराग्रहेणानंगीका
रेण च किं तत् ब्रह्मस्वरूपावरकं तद्धर्मविशेषावारकं वेति वाच्यम् ना
द्यः जगदान्ध्यप्रसङ्गात् न द्वितीयः स्वरूपेतरधर्मानङ्गीकारात् अ
न्यथा सिद्धान्तभङ्गप्रसङ्गात् ननु निर्विशेषश्रुतिबाधभयाद्धि न ध
र्मानङ्गीकारेपि स्वरूपस्यैवानन्दांशमात्रस्याज्ञानावृतत्वेपि सत्तां
शस्यानावृतत्वान्नोक्तदोष इति चेन्न असम्भवात् निरवयवे व
स्तुन्यंशादिकल्पनाया अन्याय्यत्वात् सांशत्वापत्त्या मिथ्यात्वापत्तेश्च
ब्रह्म मिथ्या सांशत्वात् घटादिवदित्यनुमानात् निरवयवशाद्व्या·
कोपात् निर्विशेषवादभंगाच्च अथाद्वितीयनिर्विशेषवस्तुनः
सत्त्वे किंचित्प्रमाणमस्ति न वेति वक्तव्यम् अस्ति चेत्तत्र न तावत्प्र
त्यक्षं अतीन्द्रियत्वात् नाप्यनुमानम् लिङ्गशून्यत्वात् नेन्द्रियाणाना
नुमानामिति श्रुतेः नापि शाब्दः शब्दस्याविषयत्वात् न वचनताव
च्छक्तिविषयत्वं जातिगुणक्रियाप्रकृतिप्रत्ययाद्यर्थत्वाभावात् ना
पि लक्षणाविषयत्वं सम्बन्धशून्यत्वात् असङ्गो ह्ययं पुरुष इति श्रु
तेः ननु सत्यसम्बन्धाभावेपि शाखाचन्द्रवत्कल्पितसम्बन्धस्य सत्त्वा
न्न दोष इति चेन्न दृष्टान्तवैषम्यात् तयोर्हि शाखाचन्द्रयोरुभयोरपि
सावयवत्वात् प्रत्यक्षविषयत्वात् किरणद्वारा सम्बन्धस्यापि सत्त्वात्
दार्ष्टान्तिके तु अत्यन्तवैपरीत्यान्नोक्तार्थसिद्धिः नापि गौणाविषयत्व
म् निर्गुणत्वात् विषयत्वाङ्गीकारे च मिथ्यात्वप्रसङ्गः द्वैतापत्ति·
श्च तथा च प्रयोगः ब्रह्म मिथ्या प्रमाणाविषयत्वात् नवमतेमपवव
दिति नापि द्वितीयः सर्वप्रमाणहीनत्वेन शशशृङ्गतुल्यत्वापत्तेः
निर्विशेषं ब्रह्मावस्तु सर्वप्रमाणशून्यत्वात् शशशृङ्गाद्यवस्तुजा
तवदित्यनुमानादिति संक्षेपः एवं पराभिमताध्यासगिरिवज्रेण
अभिमताध्यासलक्षणादीनामपि बहुप्रकारेणैव पूर्वैर्निरस्तत्वा
द्विस्तरभयादत्रोपरम्यते १२ ॥

गी.
टी.हि.

76

मधुसूदनीटीका

तत्रैवंस्थायेकोनविंशतिश्लोकैरशोच्यानन्वशोचस्त्वमित्येतस्यविवर
णंक्रियते स्वधर्ममपिचावेक्ष्येत्याद्यष्टभिःश्लोकैः प्रज्ञावादांश्चभाष
सेइत्यस्यमोहद्वयस्यपृथक्प्रयत्ननिराकर्तव्यत्वात् तत्रस्थूलश
रीरात्मानंविवेक्तुंतस्यनित्यत्वंप्रथयति नशब्दोदेहादिभ्योव्यतिरेकंसू
चयति यथा अहंइतः पूर्वंजातुकदाचिदपिनासमिति नैव अपि
त्वासमेव तथात्वमप्यासीः इमेजनाधिपाश्चासन्नेव एतेनभावा
प्रतियोगित्वंदर्शितं तथासर्वेवयं अहंत्वंइमेजनादिपाश्च अतःपरं
नभविष्यामइतिन अपितुभविष्यामएवेतिध्वंसाप्रतियोगित्वमुक्तं
अतःकालत्रयेपिसत्तायोगित्वादात्मनोनित्यत्वेनानित्याद्देहाद्वैल·
क्षण्यंसिद्धमित्यर्थः १२

सदानंदीटीका

अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे इतिपादद्वयस्यैवविवृत्तिः
क्रियतेधुना १ नेत्याद्येकोनविंशत्यापादस्याद्यस्यविस्तरः स्वधर्ममि
त्याद्यष्टाभिर्द्वितीयस्योच्यतेतथा २ मोहद्वयंनिराकार्यंपृथग्यत्ने
नदुःखदं स्थूलदेहात्पृथक्कर्तुमात्मानंसाक्षिणंपरं ३ वक्त्यादौतस्य
नित्यत्वमसंस्पृष्टार्थमीश्वरः देहादिभ्यस्तुशब्देनव्यतिरेकोस्यसूच्य·
ते ४ नैवाहंजातुनितःपूर्वंनासंकिंत्वासमेवहि तथैवत्वंतथाप्यासी
रासन्नेतेजनाधिपाः ५ एतेनप्रागभावस्याप्रतियोगित्वमीरितं
तथाहंत्वमिमेभूपानभविष्यामएवकिं ६ अतऊर्ध्वंतनोःपाताद
वरुपभाविनोनच किंतुसर्वेभविष्यामोवयंनित्यंतथात्मनः ७
एतेनैवात्मनःप्रोक्ताध्वंसस्याप्रतियोगिता अतःकालत्रयेसत्ता
योगित्वान्नित्यतात्मनः नित्यत्वेनास्यसंसिद्धंवैलक्षण्यंशरीरतः दे
हाद्युपाधिभेदेनभेदोहंत्वमिमेइति ९ नात्रस्वाभाविकोभेदोयथा·
त्मनोहरिणेरितः तत्पदार्थविशुद्ध्यर्थंभेदस्त्वादिशयलौकिकं १० श्री

त्मनो नित्यत्वाद्धारा वेलक्षण्ये शरीरतः शास्त्रस्योपक्रमे यस्मान्नि
सायथि षितेहरेः ११ यत्तत्राभिमतो विष्णोर्भेदः स्वाभाविकः किल
अन्यथेहोपदेशस्यावसरे कथमीरयेत् १२ अहं त्वं वयमित्यादि
भेदमित्याह विन्यसन् उपदेश्योपदेशादिव्यवहारोस्ति कल्पितः
भेदस्तेनैव तन्नास्मि द्विर्न्नवास्तवरूह्यते न निरोधो न चोत्पत्तिर्न
बद्धो न च साधकः १४ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता इ
त्यादि श्रुतिनिर्णीतो हैतनत्त्वाविमर्शनात् १५ भेदवादो मता
भिष्ठो न मतत्त्वविमर्शिनाम् १६ ॥ १२ ॥

नीलकंठी टीका

ननु देहादन्योऽपि देहनाशेन नश्यतां कोशाकार इव कोशनाशे
नेति तत्राह न त्वेवाहमिति त्वमहमिमे च सर्वे अनादयोऽनंता
श्चेत्यर्थः जातु कदाचित् अहं नासमिति न अपि त्वासमेव
तथा त्वमपि नासीरिति न अपि त्वासीरेव इमे जनाधिपाः राजा
न इत्युपलक्षणं सर्वस्य जंतुजातस्य नासन्निति न अपि त्वासन्ने
वेति योजना अनादित्वादनंतत्वमप्याह न चैवेति न भविष्यामः इ
ति नैव किंतु सर्वे भविष्याम एव ननु देहस्यानात्मत्वे प्राचीनक
र्मक्षये देहे नाशे जीवनं नोपपद्यते [illegible]
गात् [illegible] ष्टांतपीडयायपि जन इति चेयदवतद
भिमानमात्रादिति भ्रमः यदा हि पुनः परशरीरे विशति तदा तत्पी
डया देहपतिर्न बाध्यते तस्य तदानीं देहाभिमानाभावात् यत्त
स्तु बाध्यतेऽभिमानमत्वादिति लोके प्रसिद्धं किंच प्राचीनकर्मव्य
तिरेकेण जीवनं नोपपद्यते कृतहानाकृताभ्यागमप्रसंगात् इ
त्यादिषु पिपाककर्मशीलत्वमनुमेयं स्थावरजीविका प्राक्कर्मपूर्वि
का जीविकात्वात् पाकादिक्रियापूर्वका सदादिजीविकावत् अ
पि च क्रियावैचित्र्यात्कायवैचित्र्यं दृष्टं चराचरशरीरवैदं च नादिष्टजन्यदि

गी॰
टी॰ हि॰

दिहापिसर्वदुःखोदितैविश्चंप्राक्कर्मवैचित्र्यादत्रमेयं नत्वात्मसंयोजा
नस्यगोवत्सस्यस्तनपानादौप्रवृत्तिर्जन्ममात्रस्यमरणाद्भासस्यमा
रभवीयात्रुभवजनितसंस्कारजन्याभोजनादिप्रवृत्तिस्तोचङ्गासादि
वदित्यतोस्तिप्राचीनंकर्म अपिचकौलिकप्रात्वप्रसिद्धमेतत् य
थादेवदत्तःस्वशरीरेकंटकवधेनविद्यतेएवंप्रात्रुक्ततायांदेवद
त्ति॰ त्तप्रमायांकंटकेनविद्धायांदेवदत्तोव्यथते नत्वन्ययादेवदत्तेनांतर
पात्तवैषम्यंनापिवास्तंकंटकव्यथादि किंतुकेवलंप्राक्कर्ममात्र
एवंचबीजांकुरन्यायेनकर्मजन्मसंस्कारपरंपरयाऽनादिःसंसा
रःउत्तिनदेहनाशादात्मनाशोस्तीतिनभीष्मादयःशोचनीयाःअ
त्रएवंस्मिन्श्लोकेआत्मनोदेहादन्यत्वमुक्तंगतासूनदेहानित्ति
विशेषणेन अत्रतस्त्वशरीरविशिष्टस्यात्मनोव्यवहारदृष्टान्ति
त्वंसाधितमितिभेदः १२ ॥

आनंदी टीका

जीवानामविनाशित्वमेवलक्षयति हि नित्वेवे अहमिदानीं
वर्तमानः जातुकदाचिन्न नासम् अपित्वहं प्राक्शरीरेष्वस्थित
एवेदानीमपिवर्ते एवं त्वमपिजातु नासीः अपित्वासीरेवप्रा
गभूतइदानीमपिवर्तसे च पुनः इतः परमस्माद्देहादनंतरं नभ
विष्यामः अपितु भविष्याम एवशरीरांतरेष्वितित्रिष्वपिकालेषु
सत्तया नित्यत्वादेषामविनाशित्वमित्यर्थः १२ ॥

जीवावस्थायामेवैषांनावन्नित्यत्वं रामकंठी टीका प्रतिपादयितुमाह +

+ एवंमां वर्तमाने मन्यसे सोऽहं जातु नासं न त्वहं येन पूर्वकालभाव
मेवप्रकृते प्रतिपादयति नाहमभूत्वाभवामि किं त्वप्रागपि भूत्वे
दानीमपिभवामि ^ यथा च त्वमेवमिमेऽपि वर्तमानत्वेन प्रतिभासमा

^ यथाहं तथात्वमपि सम्प्रति वर्तमानत्वेन प्रतिभासमानः इ
मिथ्यासीरेव न तु अभूत्वाभवसि

नाः सर्वे राजानः पूर्वमासन्नेव न पुनरभूत्वाभावपक्षो न च सर्वे व
वयमतः परमस्माच्छरीरादनंतरं भविष्यामः भविष्याम एवेत्य
नेन युष्मदस्मदादिपरिभेदेन व्यवस्थितस्य जीवलोकस्य कालत्र
येऽपि सत्तासंभवान्नित्यत्वं प्रतिजानीते आसमित्यादिना भूतादिक्रि
याकारित्व व्यपदेशोऽविनाशधर्मकशरीरसामानाधिकरण्यभ्रम
कृतः न तु नित्यस्य भूतादिव्यपदेश उपपद्यत इति नन्वेवं सति
सर्वे [illegible] जीवलोक [illegible]
[illegible]
[illegible] निर्दिशे [illegible]
[illegible] माह १२ ॥

लामिकी टीका

एवं हि वालत्वयौवनादिदशाभावेऽपि शोच्यता स्यात् अशोच्यत्वे आ
त्मनः स्थूलदेहवैलक्षण्यमेवार्जुनेनानुभूतपूर्वं हेतुमाह न त्वे
वाहमिति अहं परमेश्वरो लीलागृहीततनुः लीलाविग्रहस्यावि
र्भावतिरोभाववान् जातु नासम् इति नैव अपित्वासमेवानादित्वात् ^
अतः कालत्रयेऽपि सत्तायोगित्वादात्मनो नित्या हि देहवैलक्षण्यमि
त्यम १२ ॥

^ नैव त्वं नासीः अपि त्वासीरेव मेन रूपानेन नासन्नापि त्वासन्नेव सदंशत्वात्
पतेन प्रागभावाप्रतियोगित्वमुक्तम् न चातः परं देहविनाशादूर्ध्व
कालं न भविष्याम इति न किन्तु भविष्याम एवात्मस्वरूपेण नित्यत्वा
त् एवं ध्वंसाप्रतियोगित्वमुक्तम् देहात्मभेदापेक्षया बहुवचनमुक्तं न
तु आत्मभेदाभिप्रायेण ^

पंचोली टीका

कालत्रयसत्तानिरूपणेन आत्मनो नित्यत्वं साधयति न त्वेवाहं इ
ति यथाहं परमेश्वरो जातु कदाचित् लीलाविग्रहस्याविर्भावेति ।

गी॰
टी॰
हिं॰

रोभावेपि नासं न अपि त्वासमेव कस्मादनादित्वात् अतीतेषु दे
हविनाशेषु नित्यमेवाभूवमित्यर्थः तथा त्वं नासीर्नाऽ
पि त्वासीरेव तथा इमे जनाधिपाः नृपाः नासन्निति न अपि त्वा
सन्नेव तथा च वयं सर्वे अतः परं अस्माद्देहपातात्परं उत्तरकाले
न भविष्यामः अपि तु भविष्याम एव आत्मस्वरूपेण त्रिष्वपि कालेषु
वयं सर्वे नित्या नित्या एव अत्र वयं सर्वे इत्यत्र देहभेदानुवृत्त्या ब
वचनं नात्मभेदाभिप्रायेण तत्र कथमेव नित्यत्वमात्मनः ए

रामवीरसमिद्बोधिनी ॥

अस्य देवप्रागभावप्रतियोगित्वं देवध्वंसप्रतियोगित्वं च भवतीति
मे तत्वं च देहस्यैव संभवति न त्वात्मन इति प्रतिपादयन्नुक्तमेव
द्रढयति न त्वेवेति हे अर्जुन त्वं मां वर्तमानं मन्यसे सोऽहमितः पू
र्वं कदाचिदपि नासमिति न त्वेवापि त्वासममेवेति न त्वं हे अ
मेवं पूर्वकालभाविनं प्रतिपादयति एवं त्वमप्यासीरिमे जना
प आसन्नेव अतः परं च तस्माज्जन्मन उत्तरकाले च वयं सर्वे न भ
विष्यामः इत्येतन्नैव किं तु भविष्याम एवेति कालत्रयेऽपि तुल्य
त्वं स्वरूपभेदेन व्यवस्थितस्य जीववर्गस्य स्थितिर्निश्चयेति भग
प्रतिज्ञायते १२

मधुभाष्य

नत्वेवाहमीश्वरानित्यत्वस्याप्रस्तुतत्वाद्दृष्टान्तत्वेनाह ॥ न
त्वेवेति यथाहं नित्यः सर्ववेदान्तेषु प्रसिद्धः एवं त्वमेते ज
धिपाश्च नित्याः देहिनो भाव एव भवति तदेवासिद्धं प्रति
न देहिनोऽस्मिन्यथा कौमारादि शरीरभेदेऽपि देहिनस्तदी
सिद्धः एवं देहान्तरप्राप्तावपीत्यर्थः नहि जडस्य
रस्य कौमाराद्यनुभवः संभवति अतस्तस्यादर्शनात् अत
वाद्यनुभवाभावः अहमनुभवाद्यनुभवाद्वैतसि

तिचेन्न सत्येवाविशेषे देहे स्यादौ ज्ञानादिविशेषा
दर्शनात् छिन्नस्य वा प्रायत्नभवाभावः अदृष्टं ममश्चाभि
मानो मनसि काष्ठादिवच्च श्रुतेश्च प्रामाण्यं च प्रत्यक्षा
दिवत् न च बौद्धादिवत् अपौरुषेयत्वात् न ह्यपौरुषेये
पौरुषेयाज्ज्ञानादयः कल्पयितुं शक्याः विनाचकस्य
चिद्वाक्यस्याऽपौरुषेयत्वं सर्वसमयाभिमतधर्मोपसिद्धेः
यश्चैतो नांगीकुरुते नासौ समयी अप्रयोजकत्वात् सा
ल्पधर्मो निरूप्यत्वादिति चेन्न सर्वाभिमतस्य प्रमाणं वि
ना निषेद्धुमशक्यत्वात् न च सिद्धिः प्रमाणिकस्येति चेन्न
सर्वाभिमतेरेव प्रमाणत्वात् अन्यथा सर्ववाचिकव्यवहा
रासिद्धेश्च न च मयाश्रुतमिति न वक्तारं शक्यम् अन्यथा
वाप्रत्युत्तरं स्यात् भ्रांतिवीतत्वस्यात् सर्वं दुःखकारणत्वं
वा स्यात् एकोवान्यथा स्यात् रचितत्वे च धर्मे प्रमाणस्य
कर्तुर्ज्ञानादिदोषशंका स्यात् न वा दोषत्वं स्ववाक्येनैव
सिध्यति न च येन केनचिदपौरुषेयमित्युक्तमयुक्तवाक्य
सम्मम् अनादिकालपरिग्रहसिद्धत्वात् अतः प्रामाण्यं श्रु
तेः ननु कृतेर्कैर्थीरस्तु न सम्भवति अथ वा जीवनोपादे
हनाशं वाऽपेक्ष्य शोकः न तावज्जीवनाशानित्यत्वादित्याह
नत्वेवेति १२॥

19

नत्वेवाहमिति अहंपूर्वंनस्थूलशरीरोपहितःसन्जातुइतिकदा·
चिन्नासमितिनैवेतिकिंत्वासमेवेत्यर्थः तथात्वंजातुनासीरित्यपि
नैवेतिपुरुषविपरिणामः इमेजनाधिपाःदुर्योधनादयोनासन्निति
नैवेतिवचनविपरिणामोपि उत्तरार्धेस्पष्टं तिउतानिभिन्नान्येव
शरीराणिभविष्यन्तिउतानिचपरंतेषांशरीराणांएभिःशरीरैः
शोचनास्येवेत्याशंक्याह ॥

भाषाअनुवाद

भीष्मआदिके प्रति जो शोच करना अनुचित है इसमे श्रीभगवा
न कारन कहते हैं कि देखो हम परमेश्वर हमारा शरीर धारन के
वल लीलाके अर्थ है इससे उस देहके होने जाने वशते हम कभे
हुवे मे नहीं रहे थे यह संभव नहीं होता जिस हेतु हम अनादि औ
र हमारे अंशते उत्पन्न तुम और ये सब राजालोक भी कभी नहीं
रहे थे यह भी संभव नहीं है इससे हम सब जैसे पहले थे तैसे
अब भी हैं फारे आगेभी हम सब होंयगे इससे आत्मस्वरूपके
जन्म मरन का स्वभाव है तो फिरि स्वजनविनाश कहो शोक
का विषय कैसे है नहीं है १२ ॥

मेंहोंतं महोनहिनहि यहरानेहोय याते के रन दमसभी
होंगे यह मतजोय १२॥

व१

देहिनोऽस्मिन्यथादेहेकौमारंयौवनंजरा त
थादेहान्तरप्राप्तिर्धीरस्तत्रनमुह्यति १३

शांकरभाष्यं

तत्रकथमिव नित्यआत्मेति दृष्टान्तमाह देहिनः देहोऽस्यास्तीति
देही तस्य देहिनो देहवतः आत्मनः अस्मिन् वर्तमाने देहे यथा ये
नप्रकारेण कौमारं कुमारभावो बाल्यावस्था यौवनं यूनो भावो म
ध्यमावस्था जरा वयोहानिर्जीर्णावस्था इत्येताः तिस्रोऽवस्था अन्यो
न्यविलक्षणास्तासां प्रथमावस्थानाशे न नाशो द्वितीयावस्थोपज
~~ने चोपजननमात्मनः किंतर्ह्यविक्रियस्यैव द्वितीया तृतीयाव-~~
~~स्थानाशे न नाशो द्वितीयावस्थोपज~~ने चोपजननमात्मनः किंतर्ह्य
विक्रियस्यैव द्वितीया तृतीयावस्थाप्राप्तिरात्मनो दृष्टा यथा त
थैव तद्वदेव देहादन्यो देहो देहान्तरं तस्य प्राप्तिर्देहान्तरप्राप्ति
रविक्रियस्यैवात्मन इत्यर्थः धीरो धीमांस्तत्रैवं सति न मुह्यति न
मोहमापद्यते १३

आनन्दगिरिकृतटीका

ननु सर्वं देहं विहायापूर्वं देहमुपाददानस्य विक्रियावत्त्वेनोत्पत्तिविना
शवत्त्वविभ्रमः समुद्भवेदिति शङ्कते तत्रेति प्रश्नोऽयं च प्रतिज्ञायां
नित्यत्वे हेतूक्ते सतीति यावत् अवस्थाभेदे सत्यपि वस्तुतो
विक्रियाभावादात्मनो नित्यत्वमुपपन्नमित्युत्तरश्लोकेन दृष्टान्ताव-
ष्टम्भेन प्रतिपादयतीत्याह दृष्टान्तमिति न केवलमागमादेवात्म
नो नित्यत्वं किन्त्ववस्थान्तरवज्जन्मान्तरे पूर्वसंस्कारानुवृत्तेश्चेत्याह
देहिन इति देहवत्त्वं तस्मिन्नहंममाभिमानभाक्त्वं तस्य स्वामित्वेन निर्दे
शे षष्ठी आत्मनः श्रुतिस्मृत्युपपत्तिभिर्नित्यत्वज्ञाने धीमानित्य
व धीर्विद्यते एवं सतीति तत्त्वतो विक्रियाभावान्नित्यत्वे समधिगते
सतीत्यर्थः १३

स्वामिकृतटीका

ननु ईश्वरस्य तव जन्मादि शून्यत्वं सत्यमेव जीवानां तु जन्ममरणे प्रसिद्धे
इत्यत्राह देहिन इति देहिनो देहाभिमानिनो जीवस्य यथास्मिन्स्थूले
देहे कौमाराद्यवस्था देहनिबंधना एव न तु स्वतः पूर्वावस्थानाशेऽवस्था
तरोत्पत्तावपि स एवाहमिति प्रत्यभिज्ञानात् तथैव देहनाशे देहांतर
प्राप्तिरपि लिंगदेहनिबंधना [illegible] न तु तावदात्मनो नाशः जातमात्रस्य
पूर्वसंस्कारेण स्तन्यादौ प्रवृत्तिदर्शनात् अतो धीरो धीमान् तत्र तथा दे
हनाशोत्पत्त्योर्न मुह्यति आत्मैवमृतो जातश्चेति न मन्यते १३ ॥

पिशाचभाष्यम् ॥

अस्मिन्वर्तमाने देहे यथा कौमारं कुमारभावं यौवनं यूनो भावं जरां
वृद्धत्वं तथा तद्देहांतरप्राप्तिः धीरो धीमान् तत्र न मुह्यति न मोहं
गच्छति यथा अस्मिन्देहे कौमारयौवनजरास्वात्मनो भेद एवमिह
पूर्वापरावस्थाः एवं शरीरांतराणीत्यर्थः १३ ॥

रामानुजभाष्यम् ॥

एकस्मिन्देहे वर्तमानस्य देहिनः कौमारावस्थां विहाय यौवनाद्यव
स्थायामात्मनः स्थिरत्वबुद्ध्या यथात्मा नष्ट इति न शोचति देहाद्देहांतर
प्राप्तावपि तथैवास्थित आत्मेति बुद्धिमान्न शोचति अतः आत्मनां नित्य
त्वात् आत्मानो न शोकस्थाने एतावदत्र वक्तव्यं आत्मनां नित्यानां
अनादिकर्मवशात्तया तत्तत्कर्मोचितदेहांतरसंसृष्टानां तैस्तैर्देहैर्बंधनि
वृत्तये शास्त्रीयं स्ववर्णोचितं युद्धादिकं कर्मानभिसंहितफलं कर्मेत्यु
त्तामिंद्रियैर्वर्जनया इंद्रियार्थस्पर्शाः शीतोष्णादिप्रयुक्तसुखदुः
खदायिन आविर्भवंति ते तु यावत्प्रारब्धकर्मसमाप्ति मंतव्या इत्यस्मिन्न
र्थमनंतरमेवाह १३ ॥

अभिनवगुप्तकृतटीका ॥

[illegible] देहिनोऽस्मिन्निति
आकारांतरे च सति यदि शोच्यता तर्हि कौमाराद्यौवनावाप्तौ किमिति
न शोच्यते यो धीरः स न शोचति धैर्यं चैतच्छरीरेऽपि यस्यास्थानान्नाति
न शक्यं अतस्तद्धैर्यमवलंब्य १३ ॥

परमार्थप्रपा टी॰

एवं शोकस्य जीवनिमित्तकत्वं निवार्य देहनिमित्तकत्वं निवारयति
देहिन इति देहिनो देहाभिमानिनो जीवस्य कौमारयौवनजराख्या
वस्थात्रयं यस्मात्तु भवो दृष्टः यथाहं कौमारदशायां नग्नो बालिशो ऽक्री
डितवानु स एवाहं यौवने सम्यग्वस्त्रुपागतो ऽस्मि पुनः स एवाहं संप्रति
देहाद्युपलवेन स्थविरत्वं प्राप्तो ऽस्मीति यो ऽस्ति तद्वत् कस्तत्रायं जडो
ऽस्य कौ देहो भवति रायवेति तथा च तस्य पूर्वावस्थातिक्रमे उत्तरावस्था
प्राप्तौ किं पित्रादीनां शोको भवति तथैव देहांतरप्राप्तावपि शिष्टितो ऽ
पि बालः पूर्वसंस्कारवशात् स्तनग्रहणरोदनादिषु प्रवर्तते एवम
नुभवधीरस्तत्र विषये न मुह्यतीत्यर्थः १३ ॥

वनमाली टी॰ ॥

ननु स्वीयदेहनाशरूपं मरणं तु जीवस्यास्त्येव तत्राह देहिन इति यथै
कस्मिन्देहे वर्तमानस्य देहिनः कौमारावस्थां विहाय यौवनाद्यवस्था
प्राप्तस्य स्थिरत्वबुद्ध्या न शोको भवति तथैकं देहं विहाय देहांतरप्रा
प्तिस्तत्प्राप्तौ धीरः आत्मा स्थिर इति धीमान्न मुह्यति आत्मा मृत इति ननु
सति ननु देह एवात्मा स्थूलो ऽहं गौरो ऽहं गच्छामीति प्रतीतेः जातो दे
वदत्तो मृतश्च इति प्रतीतेर्देहजन्मनाशाभ्यामात्मनो ऽपि जन्मनाशोपपत्ते
र्वर्तमानागमादेः प्रमाणानंगीकारेण देहभिन्नात्मनो प्रत्यक्षत्वा
दिति लोकायतिकास्तान्प्रत्याह देहिन इति यो ऽहं बाल्ये पितरा
वन्वभवं सो ऽहं वृद्धो नप्तॄननुभवामीत्यवस्थाभेदाद्देहभेदे ऽप्यात्मनः स्थि
रत्वप्रत्यभिज्ञानात् यथा भेदस्तथा यो ऽहं स्वप्ने पूर्वं व्याघ्रदेहो ऽनंतरं पशु
देहः स एवाहं मनुष्यदेह इत्यनुगतदेहेष्वनुगतात्मज्ञानात् तत्र दे
हांतरप्राप्तौ देहभिन्नात्मनि न मुह्यति उक्तदेहात्मनोरभेदप्रत्यय
स्तु कर्दमलिप्तवस्त्रे कर्दमवस्त्रं पुत्रे नष्टे ऽहं नष्ट इत्यादिवदौपचा
रिकः मम देहः स्थूल इत्यादिप्रत्ययस्य बाधकत्वेनाभेदारोपासंभवा
त् देहातिरिक्तात्माभावे स्तनपानादौ बालस्य प्रवृत्तिर्न स्यात् इष्टसा
धनताज्ञानाभावात् अनुभावकस्य तदानीमसत्वात् प्राचीनस्तन
पानानुभवितुरिदानीमसत्त्वेन स्मरणासंभवाच्च यथैकस्मिन्देहे प
रिणामिनि नानावस्था जायंते तत्त्यागप्राप्तिभयात्स्वधर्मानुष्ठानेन

गी॰
टी॰
द्वि॰

८३

त्याज्यं तदुत्पत्त्यादेरवर्जनीयत्वात्तथाविद्यमानदेहनाशे देहान्तरो
त्पत्तेरावश्यकत्वात्तद्भयात्स्वधर्मानुष्ठानं न त्याज्यं मि
तिभावः देहिन इत्येकवचनं तु जीवस्यानेकावस्थादिगतस्याप्यैक
त्वलाभाय एकवचनानुरोधेन जीवैकत्वे शुकादिमोक्षप्रतिपाद
कशास्त्रस्याप्रामाण्यं स्यात् तदंगीकारे विनिगमकाभावेन जीवै
कापरत्वाभिमतस्याप्रामाण्यापत्तेः सजीवोऽहमेवेति निश्चयाभावे
न श्रुत्युक्तश्रवणादौ बह्वायाससाध्यनिष्कंपप्रवृत्तिर्न स्यात्
यः सर्वज्ञः सर्वविदित्यादिनित्यसर्वज्ञबोधकश्रुतिविरोधापाताद्ब
बद्धमुक्तगुरुशिष्यादिव्यवहारस्यानुपपत्तेश्च न च स्वस्य बद्धप॰
तिः मोक्षस्य ब्रह्मस्वरूपस्य च त्वदभिमतस्य स्वामिकगुर्वादिवन्मि
थ्यात्वापत्त्या स्पष्टाशून्यवादापत्तिः १३ ॥

इति वैजयन्ती टीका ॥

एवमात्मनस्त्रैकालिकनित्यत्वमुक्त्वेदानीं शरीरसंयोगवियोगयो
नित्यत्वमाह देहिन इति पुरुषार्थिकप्रमाणाप्रमाणकर्मप्रयुक्ताः सु
रासुरनरतिर्यगाद्याकारा देहाः सन्त्यस्य देही तस्य जीवस्य एकस्मि
न्नपि देहे यथा कौमारावस्थां परित्यज्य यौवनावस्था भवति पुनस्तां
विहाय जरावस्था भवति तथैवैकस्माद्देहाद्देहान्तरस्यान्यदेहस्य
प्राप्तिर्भवति तत्र देहान्तरप्राप्तौ धीरः जीवो नित्य इति ज्ञानवान् न मुह्य
ति देहे नष्टे जीवोऽपि नष्ट इत्येवं मोहं न प्राप्नोतीत्यर्थः देहिन इत्येकव
चनं जात्यभिप्रायेणान्यथा अशोच्यानन्वशोचः गतासूनगतासूंश्च न
सर्वे वयमतः परमिति पूर्वोक्तविरोधः स्यात् एवमन्यत्रापि यत्राय
त्मनामेकवचनं भगवतोक्तं वर्तते तत्र तत्र सर्वत्र जात्यभिप्राये
व बोध्यम् देहान्तरप्राप्तिरित्यनेनात्मनो हरेरधीनत्वं शरीरसंयोग
वियोगयोर्यौगपद्यमणुपरिमाणकत्वं प्रतिदेहभिन्नत्वं सूचितम् तत्र
हरेरधीनत्वं शरीरसंयोगवियोगनामश्रीपुरुषोत्तमायत्तस्वरूपा
तिप्रवृत्तिकत्वं स्यात् तत्राभाववत्त्वमित्यर्थः तमेव भान्तमनुभाति
वैष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते इत्या
श्रुतेः शरीरसंयोगवियोगयोर्यौगपद्यं मोक्तत्वं हरेरधीनत्वं शरीरशब्देन नारायणादि
प्रकृतिरुच्यते कार्यकारणयोरभेदात् अयं भावः अनादिकर्माणि

भ्य उन्निनीषते एष एव साधु कर्म कारयति तं यमेभ्यो लोके ४ १

क॰

काविद्यानादिप्रकृतिसंबन्धावच्छिन्नोदेवतिर्य्यङ्मनुष्यादिदेहस्
थःसंसारचक्रमनुभवन् श्रीभगवन्निर्हेतुककृपाकटाक्षावलो
कितश्चाचार्य्याद्देवोभूत्वा तन्मुखेननिर्ज्जितसच्छास्त्रसुधाश्रावित
संशयादिरोगोभगवत्स्वरूपादिविषयकध्यानसन्ततिपरिपाक
लब्धसाक्षात्कारनिरस्तकर्मबन्धोभगवद्भावापत्तिलक्षणमोक्ष
भागीभवतीति यमेवैषवृणुतेतेनलभ्यः तमक्रतुंपश्यतिवी
तशोकः यदापश्यःपश्यतेरुक्मवर्णं कर्तारमीशमित्यादिश्रुतेः
अणुपरिमाणकत्वंच आराग्रमात्रकत्वं आराग्रमात्रोह्यवरोपिदृ
ष्टः अणुरेषआत्माचेतसावेदितव्यः वालाग्रशतभागस्यशतधा
कल्पितस्यचेत्यादिश्रुतिभ्यः इत्यनेनवैभवमाध्यमपरिमाणवादि
नौतार्किकवाह्यौनिरस्तौ प्रतिदेहभिन्नत्वंच देहंदेहंप्रतिभिन्नत्वं
ब्रह्मादिस्थावरान्तेषुचतुर्विधेषुयोनिष्वपिभिन्नत्वमित्यर्थः इत्य
नेनात्मपरमात्मनोर्जीवानांचमहद्वैलक्षण्यं अथचप्रत्यगात्मना
मपिमिथोभेदसिद्धान्तंतत्त्वेननचैकजीववादिपक्षोनिरस्तउक्त
त्यलम् ॥१२॥

मधुसूदनीटीका ॥

देहाःसर्वेभूतभविष्यद्वर्तमानजगन्मंडलवर्तिनोऽस्यसंतीति
देही एकस्यैवविभुत्वेनसर्वदेहयोगित्वात् सर्वत्रचेष्टोपपत्तेर्न
प्रतिदेहमात्मभेदेप्रमाणमस्तीतिसूचयितुमेकवचनं सर्वेव
यमितिबहुवचनंतुपूर्वत्रदेहभेदानुवृत्त्यनत्वात्मभेदाभिप्रायेण
लीतिनदोषः तस्यदेहिनएकस्यैवसतोऽस्मिन्वर्तमानेदेहेयथाकौ
मारंयौवनंजरेत्यवस्थात्रयंपरस्परविरुद्धंभवति नतुतद्भेदादात्म
भेदः यएवाहंबाल्येपितरावन्वभूवंसएवाहंवार्द्धकेप्रणप्तॄननु
भवामीतिदृढतरप्रत्यभिज्ञानात् अन्यनिष्ठसंस्कारस्यचान्यत्रा
नुसंधानाजनकत्वात् तथातेनैवप्रकारेणाविकृतस्यैवसतःआ
त्मनोदेहान्तरप्राप्तिः एवमस्माद्देहादत्यन्तविलक्षणदेहप्राप्तिःस
भयोगैश्वर्यंचतत्तद्देहभेदानुसंधानेपिसएवाहमिति प्रत्यभिज्ञा
नात् तथाचयदिदेहभेदादात्माभवेत्तदाकौमारादिभेदेनदेहभिन्न
माने प्रतिसंधानंनस्यात् अथतुकौमाराद्यवस्थानामत्यन्तवैल
ताप्येवस्यावतोदेहस्याप्यावत्प्रत्यभिज्ञत्वस्थायितिरितिन्यायो

देहमात्रंचैतन्यविशिष्टमात्मेतिलौकायतिकाः तथाचस्थूलोहंगौरोहंगच्छामिचेत्यादि प्रत्यक्ष प्रमाण
मीनांपामाण्यमनयनोदितंभविष्यति अतःकथंदेहादात्मनोव्यतिरेकेपिकथवाजन्मविनाशशून्यत्वंजातो
वदेवोमनोदेवदत्तइतिप्रतीतेर्देहजन्मनाशात्मनोपिजन्मविनाशोपपन्नेरित्याशंक्याह देहिनइति
व्यतिरेकात्

ऽप्रमेयं वाधस्योभयत्रतुल्यत्वात् एतच्च न जायत इत्यादौ प्रपंचयिष्यते एतेन देहात्म
दे देहेन सहोत्पद्यते विनश्यति चेति पक्षो ॥ २

गी. टी. द्वि.

नैकं स्यात्तदापि स्वप्नयोगेश्वरयोर्देहधर्मिभेदे प्रतिसंधानेन स्मा
दित्युभयोदाहरणं अतो महमरीचिकादावुदकादिबुद्धेरिव अह
लोहमित्यादिबुद्धेरपि भ्रमत्वमवश्यमपि... तत्रावस्थाभे
प्रत्यभिज्ञोपपत्तावपि धर्मिणो देहस्य भेदे प्रत्यभिज्ञानुपपत्तेः अ
थवा यथा कौमाराद्यवस्थाप्राप्तिरविकृतस्यात्मन एकस्यैव तथा
देहांतरप्राप्तिरेतस्माद्देहादुत्क्रान्तौ तत्र स एवाहमिति प्रत्यभि
ज्ञाभावेपि जातमात्रस्य हर्षशोकभयादिसंप्रतिपत्तेः पूर्वसंस्का
रजन्याया दर्शनात् अन्यथा स्तनपानादौ प्रवृत्तिर्न स्यात् तस्या
ष्टसाधनतादिज्ञानजन्यत्वस्याहष्टमात्रजन्यत्वस्य वाभ्युपगम
त् तथाच पूर्वापरदेहयोरात्मैक्यसिद्धिः अन्यथा कृतनाशा
ताभ्यागमप्रसंगादित्यन्यत्र विस्तरः अथवा देहिन एकस्यैव त
यथाक्रमेण देहावस्थोत्पत्तिविनाशयोर्न भेदो नित्यत्वात् तथा
युगपत्सर्वदेहांतरप्राप्तिरपि नैवैकस्यैव विभुत्वात् मध्यमप
माणत्वे सावयवत्वेन नित्यत्वायोगात् अणुत्वे सकलदेह
व्याप्युपलब्ध्यप्रसंगाद्विभुत्वे निश्चिते सर्वत्र दृष्टकार्यत्वात्
शरीरेष्वेक एवात्मा त्वमिति निश्चितोर्थः तत्रैवं सति व्यथा
भेदकल्पनया त्वमधीरत्वात् अस्मि धीरस्तु विद्वान् अस्य
हमेषां हंता एते मम वध्या इति भेददर्शनाभावात् तथाच वि
दगोचरापन्नाः सर्वे देहा एकभोक्तृका देहत्वात् त्वद्देहवदि
कृतिरपि एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरा
त्यादि एतेन यदा कुंठदेहमात्रमात्मेति चार्वाकाः इंद्रियाणि
प्राणश्चेति तदेकदेशिनः क्षणिकं विज्ञानमिति सौगताः देहा
तिरिक्तः स्थिरो देहपरिमाण इति दिगंबराः मध्यमपरिमाणस्या
त्यत्वाद्युपपत्तेर्नित्योणुरिति एकदेशिनः तत्सर्वमपार्थकं भव
नित्यत्वविभुत्वस्थापनात् नन्वात्मनो विभुत्वे नित्यत्वे च न
दामः प्रतिदेहमेकत्वं न तु सहामहे तथाहि बुद्धिसुखदुःखे
द्वेषप्रयत्नधर्माधर्मभावनाख्यनवविशेषगुणवंतः प्रति
त्रापवर्गनित्या विभवश्चात्मान इति वैशेषिका मन्यंते इममेव प
तार्किकमीमांसकादयोपि प्रतिपन्नाः सांख्यास्तु वि प्रतिपद्य
नाश्रयात्मनो गुणवत्त्वं प्रतिदेहं भेदे न विप्रतिपद्यंते अन्य

खडःखादिसंकरप्रसंगात् तथाचभीष्मादिभिन्नस्यममनित्यत्वेवि
शेषेपिसुखडःखादियोगित्वाद्भीष्मादिबंधुदेहविच्छेदेसुखवियो
गाद्दुःखसंयोगश्चस्यादितिशोकमोहौनानुचि+विन्यर्जुनाभिप्राय
माशंक्यलिंगशरीरविवेकायाह १३ ॥ तौ+

सदानंदी टीका ॥

नतुस्थूलोहमित्यादिप्रत्यक्षंमार्जितंभवेत् आत्मनोदेहभिन्नत्वेसा
क्षिणेतत्त्वनोचितं १ विष्णुशर्माम्रतोजातइतिप्रत्यक्षमानतः शरीर
जन्मनाशाभ्यांसहैवास्यात्मनोपितौ २ जन्मनाशौप्रसिद्धौस्तइत्या
शंक्याहमाधवः देहाःसर्वेत्रिकालस्थाजगन्मंडलवर्तिनः ३ अस्म
स्तीतिदेहीस्यात्तस्यैकस्यात्मनोविभोः ब्रह्मादिस्थावरांतेषुशरीरेष्व
खिलेष्वपि ४ व्यापिनोनास्तिभेदस्यगंधइत्यपिदर्शितं हरिणैकव
निर्देशाद्देहिनोस्मिन्नितिस्फुटं ५ देहभेदान्नहत्याक्तवयंसर्वेवयमतः
स्थिति तस्यैकस्यात्मनोदेहवर्तमानेसतोयथा ६ कौमारंयौवनं
जीर्णत्वेत्यवस्थात्रयंयतः परस्परविरुद्धंतत्तद्भेदात्मनोभिदा
बाल्ययुवपितरावन्वभूवंसएवहि वार्द्धकेहंप्र[illegible]दीनेतान
नुभवाम्यसौ ८ प्रत्यभिज्ञाभवत्येषाप्रत्यगात्मैकगोचरा येषु
वर्तमानेषुनैवव्यावर्ततेत्वयः ९ यत्तेभ्योभिद्यतेह्यन्यःकस्तेम
ध्यवस्तुतः निर्विकारस्यबालाद्यायथासंत्यत्रदेहिनः १० तद्वद्दे
हांतरप्राप्तिर्निर्विकारस्यवस्तुतः एतस्माद्देहनोत्पत्तभिन्नदेहात
आत्मनः ११ योगैश्वर्येतथास्वप्नेनास्तितेनभिदात्मनः सोहमित्येव
विज्ञानंप्रत्यभिज्ञात्मकंयतः १२ प्रत्यगात्मनितेनायंदेहाद्भिन्नवि
लक्षणः आत्मैकःकेवलःशुद्धोदेहाध्यासादयंभ्रमः १३ स्थूलोहम
हंकोजातोमृतइत्यादिकोनृणां बाल्याद्याजाग्रदाद्याश्चाहंता
वाःपरस्परे १४ अवस्थाःकल्पिताआत्माप्रत्यगात्मनिकेवले जा
यमानस्यहर्षादिःपूर्वसंस्कारजोभवेत् १५ अन्यथास्तन्यपाना
भिप्रवृत्तिःस्यान्नदेहिनां अदृष्टाद्याप्रवृत्तिःस्यादिष्टसाधनताधि
या १६ तथाचात्मिकासंसिद्धिःपूर्वापरशरीरयोः अन्यथाकृतना
शादिदोषोपिस्याद्दुरुद्धरः १७ एवंदेहादितत्त्वात्मज्ञानाद्धीमान्न
मुह्यति शोकमोहाद्यसंस्पृष्टोधीरधीस्त्वमतोभव १८ ॥ १३ ॥

७ । पौत्रा

यद्यप्येवं तथापीष्टदेहवियोगजः शोको भवत्येवेत्याशंक्याह दे
हिन इति देहोस्थूलसूक्ष्मो विद्यतेऽस्य स देही चिदात्मा तस्य यथा
स्मिन्स्थूलशरीरे कौमाराद्यवस्थासु देहभेदेपि एकप्रवाहं बाल
आसमिदानीं वृद्धोस्मीत्यभेदप्रत्यभिज्ञानादैक्यं बालादिशरीरे
भ्यान्यत्वं च आह तेभ्यस्तु हं ते भिन्नं जरत्तमेभ्यः सूत्रमिवेति न्या
यात् एवं देहांतरप्राप्तिरपि स्थूलशरीरादन्येषां लिंगशरीराणां
सूक्ष्माणां स्थूलशरीरानुकारिणां प्राप्तिः अयमर्थः यथा एक
मपि स्थूले शरीरे कौमाराद्यवस्थाभेदादनेकरूपं एवं नित्यमपि
लिंगशरीरं प्राणिकर्मभेदात्सुरनरतिर्यगाद्यवस्थाभेदादने
कं भवति ततश्चोक्तन्यायेन स्थूलादिवत्सूक्ष्मादपि शरीराद
त्मा विविक्त एव एवं च शोकादिधर्मिणो लिंगादपि विभिन्नस्य
तव इष्टवियोगजः शोकोपि न युक्तः अत एव तत्र तस्मिन्विष
ये धीरो न मुह्यति अभिमानिकौ शोकमोहौ देहद्वयाभिमान
त्यागाद्धीरं न बाधेते अतस्त्वमपि धीरो भवेति भावः पूर्वश्लोक
योगंत्वाहंनिति वयमिति च बहुवचनेनोपाधिभेदाभिप्रायं
अत्र तु देहिन इत्येकवचनेनोपधेयचिदात्मैक्याभिप्रायमिति
ज्ञेयं तथा च व्यतिरेकस्यात्मन औपाधिकभेदमाह यथा ह्ययं
ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् उपाधिना
क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मेति क्षेत्रेषु वक्ष्यमा
णलक्षणेषु स्थूलसूक्ष्मदेहद्वयात्मकेषु एको देवः सर्वभूतेषु
गूढः सर्वव्यापी सर्वभूतांतरात्मेति च एकत्वाच्च विभुत्वमप्यस्य
सिद्धं तेन देहादीनामनित्यानामविभूनां च परामिमतमात्म
त्वं प्रत्याख्यातं वेदितव्यं ॥ १३ ॥

आनंदी टीका

नदेवं सामान्येनोक्ता विशेषेण नित्यत्वे लोकप्रसिद्धं दृष्टांतमाह देहिनोऽस्मिन्वर्तमाने देहे एतद्देहविषया बालाद्यवस्था न श्यन्त्यः देहि नः सर्वास्ववस्थास्वेकरूपस्य नित्यस्याविनाशिनो यथाविनाशो न शोककारणं न भवति तथैवास्माद्देहाद्देहान्तरप्राप्तिरपीति कात्मविषयं शोकं न करोति धीरो बुद्धिमांस्तत्र न मुह्यति एवमात्मनि देहान्तरप्राप्ति रितीत्यर्थः १३ ॥

रामकंठी टीका

यथास्य देहिनः तत्संवेदितृ अस्मिन्वर्तमाने बुद्ध्यापरिगृहीते देहे यथा जराह कौमारं कुमारभावो बाल्यं तथा यौवनं तारुण्यं तथा जराह रात्मनः कौमारं कुमारभावो बाल्यं तथा यौवनं तारुण्यं तथा नित्यं इति बन्धी यमा द्भावस्त्ववस्था त्रयमनित्यं तेन देहिना भुक्त्वादि त्वेनानुबन्धीयमा नेसंबध्यते तथा तेनैव निदर्शनेन नष्टो देहादन्यस्य देहस्य प्राप्तिः स्यामनोदेहद्वयव्यापकस्यापि स्थितैव तत्र तत्त्वज्ञो मोहं न गच्छति किं नित्यमेव तमवगच्छति विनाश वीरविनाशेऽशरीरिणमविनष्टं मन्यते नित्यमेवतमवगच्छति किंविनाश मनेनोक्तं भवति यथा बाल्याद्यवस्थाविनाशे न कश्चिदात्मा विनाश मनेनोक्तं भवति यथा बाल्याद्यवस्या अतीतानागत मन्यते किं तु सर्वः कश्चित्प्रतिपन्ना बाल्याद्यवस्थामात्मानमेकं स्थितं मन्यते तथैव नाना त्वेनानुसंदधानः प्रतिपन्नावस्थामात्मानं तथानः प्रबुद्धो नित्यमात्मान देहसम्बन्धमतीतानागतत्वेनानुसन्दधानः अवस्थाभिः स्त्रकृताः स्व मवगच्छति एताभिश्च स्थूलाभिः कौमाराद्यवस्थाभिः तत्संवेदितत्वात्तथाहि तास्त्वन्या स्वं जागरादयो ह्यवस्थाः प्रतिपादितावेदितव्याः तथाहि तासूपलब्धत्वेनैकेन ल न्यभिन्नरूपास्तु प्रवर्तमाना स्वरूपात् विनाशवतीषूपलब्धत्वेनैकेन सर्वेष्वपि स्वसंवेदन लक्षणेन प्रकाशात्मना विलक्षणस्वभावश्चात्मा सर्वेष्वेव स्वसंवेदन सिद्धो व्यापकत्वेन व्यवस्थितस्तत्रैव यथैकस्मिन्देहे परस्परविविक्त लक्षणानां जागराद्यवस्थाविशेषसंवेदितत्वमात्रैकलक्षण नाशिकस्वभावजागराद्यवस्थाविशेषस्य सूक्ष्मस्या एकश्चात्मा सिद्धः तथा देहान्तरेष्वपि लक्षणविशेषस्य व्याप प्रभावादेक एव सिद्धः [illegible] तथैवं ते [illegible] ११

*नतु देहनिष्ठस्य जीवस्य कर्तृत्व तात्कालाद्युपलंभ स्तत्कथं न हि नाशे तस्य नित्यत्वं स्यादि ति तु राशंकां प्रत्यक्षो पलभ्यनिदर्शनेन प्र तिपादनेन परिहृ तुमाह देहिन इति

[illegible]की टीका

नन्वी भरस्यतत्वजन्मादिभून्यत्वं सत्यमेव जीवानां पुनर्जातो देवदत्तो मृतो देवदत्त इति प्रतीत्या देह
जन्मनाशाभ्यामात्मनो जन्मनाशावितिभ्रान्तिरित्याशंक्याह देहिन इति ॥४॥=

स्था॰ देहेषु॰ सर्वव्यापी

मी॰ ह्री॰ हि॰ २ देहिनो देहाभिमानेन जीवभूतात्मन एकस्यैव सर्व[illegible]षु विभुत्वादेकव
चननिर्देशः यथाचश्रुतिः एको देवः सर्वभूतेषु गूढ इति य
स्मिन्देहे कौमाराद्यवस्थाः स्थूलदेहनिबन्धना न तु स्वतः पूर्वा
[illegible]
[illegible]
[illegible]
[illegible] इति ॥१३॥

१४ तथैव तद्देहनाशे तस्यैवात्मनः देहान्तरे प्राप्तिरपि लिंगदेहनिबंधना जातमात्रस्य पूर्वसंस्कारेण स्तन्यादौ प्रवृत्तिदर्शनात् अतो धीरो धीमान्प्रबुद्धस्तत्र तयोर्देहनाशोत्पत्त्योर्निमित्ते आत्मैव जातस्मृत इति न मन्यते

पंचोली टीका

परमात्मनो नित्यत्वेपि जीवानां जन्ममरणयोः प्रसिद्धत्वात्कथं
त्वमित्याशंकायामाह श्लोकेन आत्मनो नित्यत्वं साधयति देहि
नो देहवतः आत्मनोस्मिन्वर्तमाने देहे यथा येन प्रका
रेण कौमारं बाल्यावस्था यौवनं मध्यमावस्था च राजीर्णावस्था
हनिबंधना एव न तु स्वतः इति एतास्तिस्रोवस्था अन्योन्याविल
क्षणा अविकृतस्यैवात्मनो भवति एवं अवस्थानाशे यथा आत्म
नाशो न तथावस्थापगमेनात्मनो नाशः पुनर्जन्म सएवाहमिति प्रत्य
भिज्ञानात् तथा न हे देव वर्तमाने देहा देहान्तर प्राप्तिः अविशि
ष्ट आत्मनो भवति लिंगदेह निबंधनात् न तु स्वतः नात्मनो
जातमात्रस्य पूर्वसंस्कारेण स्तनपानादौ प्रवृत्तिदर्शनात् तत्र
निधीरो ज्ञानी तत्र तयोर्देहनाशोत्पत्त्योर्न मुह्यति आत्मैव ज्ञात्वा
न मुह्यति न मन्यते यद्यप्यात्मनित्यत्वज्ञानेन शोकमोहाविश्वि
शोकमोहौ न संभवतः शोकः करणपरिणामः मोहः अविवे
तथापि तद्देहसंयोगजन्यसुखदुःखादिशोकसंभवात् शोकप्रवृत्तिः आत्मनाशनिमि
निमित्तो शोकमोहौ संभवतः इत्यन्नेन स्थितेन देहवियोगजन्यस्य प्रविवि
[illegible] सएव बद्धमानो भवति शोकाह १३

रणवीरसमिहोधिनी ॥

इयं देहिनो नित्यमात्मनः अवस्थात्रयस्यानित्यत्वं प्रतिपादयति देहि
इति देहिनो देहवतोजीवस्यास्मिन्वर्तमाने देहे यथा कौ
मारं बाल्यं यौवनं तारुण्यं जरा वार्द्धक्यं स्य अवस्थात्रयमनित्यम् एवं
भावि तथा देहान्तरप्राप्तिः एवं सर्वं देहनाशोत्पत्तौ तद्देहं बंध

प्रकारद्रूपतया भवति इतिधीरः धियं राति ददातीति धीरः
परोपदेशोपि ह्यमो भवात् प्राप्तस्य देहनाशेन मुह्यति मोहं ना
माति शोकस्यापि परवशो न भवतीति एवं जनन देहनाशोस-
त्यपि एवं भूतानंतरे देहांतरसंबंधादहतो न तस्य शोकः शोकका
रणो विनान्यथा कौमारादियौवनावाप्तौ न तस्य शोकस्तथाप्रसन्न्ये
नेति भावः १३॥

मधुभाषः

नापि देहनाशमित्याह देहिन इति यथा कौमारादि देहस्य
नैनजरादि भामाव शोकः एवं जीर्णदिदेहत्यागेन देहान्त
रप्राप्तावपि तथापि मदर्शनाभावादिनाशोक इति वेनोया
ह १४॥



भाषा अनुवाद

जो कहो कि तुम ईश्वर तुमारा जन्म और विनाश नहोना संभ
वैहै परंतु हम लोग जीवहै इससे हमारा जन्म मरन प्रसिद्ध
है इस विषयमें भगवान कहतेहै कि देखो देहाभिमानी जी
वको इसस्थूल शरीरमे जैसे कौमार यौवन और वृद्धा अव
स्था प्राप्त होतीहै परन्तु जीवस्वरूप को नही और यही सब
अवस्थाके मध्यमे पूर्व अवस्थाके गये और और अवस्था प्राप्त
भये भी संसकार वशाते सोई हमहै यह ज्ञान रहता है तैसे
ही जीवकी स्थूल देह नाश हो लिंग शरीरके द्वारा देहान्तर
प्राप्ति होनेसे भी आत्माका नाश नही देखो तत्के भये बा
लकको पूर्व संसकार वशाते जन्म होते मात्र दूध पीनेसे
प्रवृत्ति देख पडतीहै इसीसे स्थूल देहके जन्मनाश भये धी
र पुरुष मूढ नही होते अर्थात् आत्मा का जन्म मरण अंगी
कार नही करतेहै १३ ॥

दोहा

देहविषैं ज्यों जीवको बालक यौवन वृद्ध त्यों देहांतर प्राप्तिहैं
धीरन मोह प्रसिद्ध १३॥

मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत १४ ॥

शांकरभाष्यम् ॥

यद्यप्यात्मविनाशनिमित्तो मोहो न संभवति नित्य आत्मेति विजानतस्तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते सुखवियोगनिमित्तो मोहो दुःखसंयोगादिनिमित्तश्च शोक इत्येतदर्जुनस्य वचनमाशंक्याह मात्रास्पर्शा इति मात्रा आभिर्मीयंते शब्दादय इति श्रोत्रादीनींद्रियाणि मात्राणां स्पर्शाः शब्दादिभिः संयोगास्ते शीतोष्णसुखदुःखदाः शीतमुष्णं सुखं दुःखं च प्रयच्छंतीति अथवा स्पृश्यंत इति स्पर्शा विषयाः शब्दादयः मात्राश्च स्पर्शाश्च शीतोष्णसुखदुःखदाः शीतं कदाचित् सुखं कदाचिद्दुःखं तथोष्णमप्यनियतस्वरूपं सुखदुःखे पुनर्नियतरूपे यतो न व्यभिचरतोऽतस्ताभ्यां पृथक् शीतोष्णयोर्ग्रहणं यस्मात्ते मात्रास्पर्शादयः आगमापायिनः आगमापायशीलाः तस्मादनित्याः उत्पत्तिविलयरूपत्वात् अतस्तान् शीतोष्णादीन् तितिक्षस्व प्रसहस्व तेषु हर्षं विषादं मा कार्षीरित्यर्थः १४ ॥

आनन्दगिरिकृतटीका ॥

आत्मनः श्रुत्यादिप्रमिते नित्यत्वे तदुत्पत्तिविनाशप्रयुक्तशोकमोहाभावेऽपि प्रकारान्तरेण शोकमोहौ स्यातामित्याशंकामनूद्योत्तरत्वेन श्लोकमवतारयति यदीत्यादिना शीतोष्णयोस्ताभ्यां सुखदुःखयोश्च प्राप्तिं निमित्तीकृत्य यो मोहादिर्दृश्यते तस्यान्वयव्यतिरेकाभ्यां दृश्यमानत्वमाश्रित्य लौकिकविशेषणमशोच्यानित्यत्र यो विद्वानधिकारी सूचितस्तस्येति तितिक्षुः समाहितो भूत्वेति श्रुतेः तितिक्षुत्वविशेषणमिहोपदिश्यते व्याख्येयं पदमुपादाय करणव्युत्पत्त्या तस्येन्द्रियविषयत्वं दर्शयति मात्रा इत्यादिना षष्ठीसमासं दर्शयन् भावव्युत्पत्त्या स्पर्शशब्दार्थमाह मात्राणामिति तेषामर्थक्रियामादर्शय

ति ते शीतेति सम्प्रतिशब्दद्वयस्य कर्मव्युत्पत्त्या शब्दादिविषयपरत्वमु
पेत्य समासान्तरं दर्शयन् विषयाणां कार्यं कथयति प्रथवेति नतु
शीतोष्णप्रदत्वेः सुखदुःखप्रदत्वस्य सिद्धत्वात् किमिति शीतो
योः सुखदुःखाभ्यां पृथग्ग्रहणमिति तत्राह शीतमिति विष
भक्त्या पृथक्कथनं तदन्तर्भूतयोरेव तयोः सुखदुःखहेतुत्वारानु
ल्पप्रातिकूल्ययोरुपलक्षणार्थं प्रथात्मे हि शीतमुष्णं वा तु
प्रातिकूल्यं वा संपाद्य वा स्या विषयाः सुखादि जनयन्ति नतु विष
न्द्रियसंयोगस्यात्मनि सदासत्वात् तन्मात्रक शीतादेरपि तथात्वात्
मित्तो हर्षविषादौ तन्निमित्तापत्ताविति शोकोत्तरार्द्धं व्याचष्टे यस्मा
दित्यादिना प्रत्यक्कौन्तेय भारतेति संबोधनाभ्यामुभयकुल
इत्येव विद्याधिकारित्वमिति एतदेव द्योत्यते १४

स्वामिकृतटीका ॥

ननु गतासून् अगतासूंश्च नानुशोचन्तीत्युक्तं तत्र गतासून् अगतासून् वा आत्मानमेवेति चेत् तत्राह मात्रेति मात्राभिः इन्द्रियवृत्तयः तासां स्पर्शा विषयैः संबन्धाः ते शीतोष्णादि प्रदा भवन्ति ते त्वागमापायित्वादनित्याश्चास्थिराः अतस्तांस्तितिक्षस्व सहस्व यथा जलातपादि संपर्काः तत्तत्कालकृताः स्वभावतः शीतोष्णादि प्रयच्छन्ति एवमिष्टसंयोगवियोगाश्च अपि सुखदुःखादि प्रयच्छन्ति ते नेषां वा स्थिरत्वात् सहनं तव धीरस्योचितं न तु तन्निमित्त हर्ष विषादादि परवशत्वमित्यर्थः १४ ॥

विश्वेश्वरभाष्यटीका ॥

यद्यप्यात्मना शानिमित्तः शोको न संभवति नित्यत्वात्मेति जानता तथापि शीतोष्णनिमित्तः शोकः संभवतीत्येतदर्थं न स्यवचनं शोकाह मात्रास्पर्शास्त्विति मीयन्ते आभिः शब्दादय इति मात्राणि स्पर्शाः शब्दादिभिः संयोगाः शीतोष्णसुखदुःखदाः शीतं चोष्णं च शीतोष्णे ते एव सुखदुःखे ददतीति शीतोष्णसुखदुःखदाः आगमापायिनः आगमापायशीलास्तस्मादनित्यास्तान्मात्रास्पर्शानितिति स्वयम् सहस्व ते ऽप्र हर्षविषादौ मा कार्षीरित्यर्थः १४ ॥

रामानुजभाष्यम् टी० ॥

शब्दस्पर्शरूपरसगंधाः साश्रयास्तन्मात्रकार्यत्वान्मात्रा इत्युच्यंते श्रोत्रादिभिस्तेषां स्पर्शाः शीतोष्णमृदुपरुषादिरूपसुखदुःखदा भवंति शीतोष्णशब्दः प्रदर्शनार्थः तान्धैर्येण यावद्युद्धादिशास्त्रीयकर्मसमाप्ति तितिक्षस्व ते चागमापायित्वाद्धैर्यवतां तु योग्या अनित्यत्वाच्च बंधहेतुपापनाशे सति आगमापायित्वेनाः पिनष्टा नित्यत इत्यर्थः १४ ॥

अभिनवगुप्तकृतटीका

धीरास्तु मात्राशब्दवाच्यैरर्थैर्युक्ताः स्पर्शा इंद्रियद्वारेणात्मनः संबंधाः न तु कृतायाः शीतोष्णसुखदुःखाद्यवस्था अनित्याः तानपि शोचंति न त्वेवं धीरा इत्याह मात्रास्पर्शास्तु कौंतेयेति अथवा मात्राभिरिंद्रियैः तेषां स्पर्शनं न तु साक्षात्परमं [illegible] ॥ त्माना आगमत्वानिरपायो विनाशप्रतयुक्तांस्तितिक्षस्व सहस्व १४ ॥

परमार्थप्रपा टीका ॥

ननु तानहं शोचामि किंतु तद्वियोगाद्दुःखभाग्भवामीति चेत्तत्राह मात्रास्पर्शा इति मीयंते ज्ञायंते विषया आभिरिति मात्रा इंद्रियाणि तासां स्पर्शा विषयैः सह संबंधास्ते शीतोष्णादिसुखदुःखप्रदा भवंति ते चागमापायित्वादनित्याः अतस्तांस्तितिक्षस्व सहस्व यतस्त्वं भारतः भरतवंशोत्पन्नोसि वीरोसि अन्येन तदुक्तं भवति शब्दस्पर्शादिविषयाः देहार्थं मन्यंते अतः सर्वोत्कर्षो विषयो देहः एवंविधमपि देहं धीरास्तृणीकुर्वंति किं पुनः तद्वियोगजं गणभंगुरं शीतोष्णादि तत्सहस्वेत्यर्थः १४ ॥

वनमाली टीका ॥

नन्वात्मनो नित्यत्वाद्देहस्य नश्वरत्वाच्च भयं शोकस्थानं यद्यपि न स्यात्तथापि प्रेमास्पदानां स्वजनानां दर्शनस्पर्शनालापादिकं सुखं हेतुत्वेन प्रेमास्पदस्य हानिः तेषां स्वस्यातितीव्र दुःखं विच्छेदभेदादादर्शनादत्यंतदुःखं स्यादतः कथं न शोच्यमत आह मात्रेति मीयंते ज्ञायंते इति मात्राः श्रोत्राद्याः स्पर्श्याः विषयास्तेषां स्पर्शाः श्रोत्रादिभिः सह संबंधः शीतोष्णसुखदुःखदाः सर्वे विषयोपलक्षकाः तेनापि विषयसामान्याकारोपलक्षकाः विष-

याः स्वानुभवद्वारा सुखदुःखदा इत्यर्थः शब्दादीनां श्रोत्रादिभिः सह
सन्निकर्षास्ततस्तद्विषयाँ साक्षात्कारास्ततश्चेष्टविषयज्ञानात्सुख
मनिष्टविषयज्ञानाद्दुःखं भवति तान्धैर्येण यावच्छास्त्रीययुद्धा
कर्मसमाप्तिस्तावत्तितिक्षस्व तेषामागमापायित्वादनित्यत्वाद्धैर्यं
हेयोग्याः बंधहेतुविद्यानिवृत्तौ देहादावहं ममेत्यभिमाननिवृ
चांतःकरणे सुखदुःखाद्युत्पन्नावपि जीवन्मुक्तानामागमापायि
नामपि दुःखादीनामिवाशाड्डुःखाद्यनुभवाभावात्तेषामनित्यत्वं
स्वाभाविकसंबंधशून्यत्वं देहादावहमित्यभिमानं विहाय दुःखा
धिकरणे मन एवेति विभावयन् ज्ञानानंदस्वरूपं चात्मानं संवि
न् यावत्स्वधर्मानुष्ठाने शीतादिप्रयुक्तं दुःखादिकमवश्यं सोढव्य
मिति भावः १४ ॥

ऊह्ममेवैजयन्तीटीका

नन्वात्मनामनादिकमेव शास्त्रे कौमाराद्यवस्थावद्देहान्तरस्य प्राप्ति
र्योभवद्भिरुक्ता तस्याः केनोपायेन निवृत्तिः स्यादथ च धीरस्तत्र न
मुह्यतीति यदुक्तः सोपि धीरस्य मोहः कयारीत्या न भवेदित्याशंक्य
वैतितिक्षैव भवतीति वक्तुं गतागतस्पर्शानित्यस्यार्थं दर्शयंश्चेतन
कार्याणां स्वभावमाह मात्रास्पर्शास्तु नरत्यस्यार्थं दर्शयन्त्र
तन्मात्रकार्यत्वात् ज्ञानेन्द्रियैर्मीयन्ते इति वा मात्राः शब्दादिपंचविषया
तेषां स्पर्शाः स्वस्वकारणैः श्रोत्रादिभिः सह संयोगाः शीतोष्णसुखदुः
खदाः शीतोष्णशब्दोपलक्षिताः स्पर्शमधुरतिक्तादिरसरूपकुरूपसुगंधदु
धस्वस्पर्शदुःस्पर्शा इति वा मात्राः शब्देनाक्षेप्याः
तितेतथा आगमापायिनः जन्मनाशभवनस्वभावाः अनित्याः
रकालस्थित्यनर्हाः तानतितिक्षस्व सहस्व तत्कालेतैः सुखदुःखैश्च
पते सुखदुःखदाः अपि यावद्योगकालं तावदन्येरूपायैर्नस्मार्यमि
स्यादचिरस्थायित्वात् स्वयमेवापगच्छन्तीति मत्वा यथा धीरस्तान्स
ने तथात्वमप्येवं विचार्य शब्दनायमर्थो ज्ञा
मात्राः पंचभूतात्मकदेहास्तन्मात्रकार्यत्वाद्वितीयोप्यर्थोस्ति तथाहि
षां स्पर्शाः मिथः पितामहादिरूपसंबन्धास्तन्मात्राशब्देनाभिधेय
प्रत्रशीतोष्णशब्दौ चेद्रस्वयंपरायमेयमिभ्याः शीतोष्णसुखदुःखदाः
लोकभेदविवक्षयायथा

दुःखं च यथा च स्तर्यः सोष्णकरेण शीतानां नां तु ख

दं स्वशीतलकरेण तेषां नो सुखं शीतानां नां तु मातन्यानां नो
चन्दनवनितानां दुःखं ददाति तथा ते पि पुत्रमित्रकलत्रादि
देहसंयोगेन सुखं तद्वियोगेन दुःखं शास्त्रालत्राद्यादिवियोगे
न सुखं तत्संयोगेन दुःखं च ददतीत्यर्थः आगमापायिनः गता
गतस्वभावाः अतो नित्याः सदैकरसस्थित्यनर्हाः तानू तितिक्षस्व
येन स्वपुत्रपितामहो यं गुरुरिमे भ्रातरः यानिमानू हत्वा न जिजी
विषामइत्यादिरूपो स्नेहमोहप्रयुक्तो ते पुत्र स्वकीयत्वबुद्धित्यक्त्वा
स्ववर्णोचितं जयपराजयादिफलानुसन्धानरहितमोक्षसाध
नभूतं युद्धं निश्चित्य संयोगवियोगाभ्यां हर्षशोकप्रदस्वभावानू
नानुपेक्षस्वेत्याशयः यतस्त्वं मातितृपक्षस्वरूपाख्यिन्याः कुन्त्याः
पुत्रो सितत्रापि सत्यवादिन्याः सज्जेतलायाः पुत्रस्य महाप्रताः
पिनो राजर्षेर्भरतस्य वंशे जातो सि अतस्त्वं वैतदुपेक्षायोनाति
प्रयासः इति कौन्तेय भारत योः संबोधनयोरभिप्रायः १४ ॥
नन्वात्मनो विभुत्वे नित्यत्वे मधुसूदनी टीका ॥ म.
मीयन्ते आभिर्विषया इति मात्रा इन्द्रियाणि तासां स्पर्शा विषयैः संबं
धाः तत्तद्विषयाकारांतःकरणपरिणामा वा ते आगमापायिनउत्प
त्तिविनाशवन्तोंतःकरणस्यैव शीतोष्णादिद्वारा सुखदुःखदाः न तु
नित्यस्य विभोरात्मनः तस्य निर्गुणत्वान्निर्विकारत्वाच्च नहि नित्यस्या
नित्यधर्माश्रयत्वं संभवति धर्मधर्मिणोरभेदात् संबंधांतरानुपप
त्तेः साक्ष्यस्य साक्षिधर्मत्वानुपपत्तेश्च तदुक्तं नर्तेस्याद्विक्रियां दुःखी
साक्षिता का विकारिणः धीविक्रियासहस्राणां साक्ष्यतोहमवि
क्रिय इति तथा च सुखदुःखाद्याश्रयीभूतांतःकरणभेदादेव सर्व
व्यवस्थोपपत्तेर्न निर्विकारस्य सर्वभासकस्यात्मनो भेदे मानम
स्ति सद्रूपेण स्फुरणरूपेण च सर्वत्रानुगमात् अंतःकरणस्यता
वत्सुखदुःखजनकत्वमुभयवादिसिद्धं तत्र समवायिकार
णत्वस्यैवाभ्यर्हितत्वात्तदेव कल्पयितुमुचितं न तु समवायिका
रणांतरानुपस्थितौ निमित्तत्वमात्रं तथा च कामः संकल्प इत्या
दिश्रुतिर्विबोधयंती एतत्सर्वं मन एवेति कामादिसर्वविकारोपादा

^न विवदामः प्रतिदेह
मेकत्वं न तु सहात्मैव तथा हि
बुद्धिः सुखदुःखेच्छाद्वेषप्रय
त्नधर्माधर्मभावनाख्या नव
वि शेषगुणवंतः प्रति
देह का^भिन्ना एव नित्या
विभवश्चात्मान इति वैशेषि
कामन्यंते इममेवं पक्षं ना
किंकमीमांसकादयोपिप्र
तिपन्नाः सांख्यास्तु विप्रति
पद्यमाना अप्यात्मनो गुण
वत्वे प्रतिदेहभेदेन विप्रति
पद्यन्ते अन्यथा सुखदुःखा
दिसंकरप्रसंगात् तथा च
भीष्मादिभिन्नस्य मम नित्यत्वे
विभुत्वे पि सुखदुःखादियो
गित्वाद्भीष्मादिबंधुदेहवि
च्छेदे सुखवियोगेदुःख
संयोगश्चस्यादिति कथं
शोकमोहो नानुचितावि
ति [illegible]नाभिप्रायं आशं
क्य लिंगशरीर विवेकायाह ॥

२।१४ः अन्तःकरणस्यागमापायित्वाद्दृश्यत्वाच्च नित्य
दृग्रूपात्त्वत्तो भिन्नस्य सुखदुःखादिजनका ये मात्रास्प
र्शास्तेप्यनित्याः

गी. टी. द्वि.

नत्वमभेदनिर्देशात्मनस आह आत्मनश्च स्वप्रकाशज्ञानानंदरू
पत्वस्य श्रुतिभिर्बोधनात्तत्कामाद्याश्रयत्वं अतो वैशेषिकादयो
भ्रांत्यैवात्मनो विकारित्वं भेदं चांगीकृतवंत इत्याह नियतसु
एकदा सुखजनकस्यैव शीतोष्णादेरन्यदा दुःखजनकत्वद
र्शनात् एवं कदाचिद्दुःखजनकस्याप्यन्यदा सुखजनकत्वद
र्शनात् शीतोष्णग्रहणमाध्यात्मिकाधिभौतिकाधिदैविकसु
खदुःखोपलक्षणार्थं शीतमुष्णं च कदाचित्सुखं कदाचिद्दुः
खं सुखदुःखे तु कदापि न विपर्येते इति पृथङ्निर्देशः तथा चा
नास्थिरान् त्वद्भिन्नस्य विकारिणः सुखदुःखादिप्रदान् भी
दिसंयोगवियोगरूपान् मात्रास्पर्शांस्त्वं तितिक्षस्व नैतेमम
किंचित्कारा इति विवेकेनोपेक्षस्व दुःखित्वादात्मनो भीष्मादि
मानं दुःखिनमात्मानमीक्षस्व इत्यर्थः कौंतेय भारतेति संबोधनद्वयेन
भयजलविशुद्धस्य तवात्मानमनुचितमिति सूचयति नन्वं
करणस्य सुखदुःखाश्रयत्वे तस्यैव कर्तृत्वेन भोक्तृत्वेन ना
चेतनत्वमभ्युपेयं तथा च तद्व्यतिरिक्ते तद्भासके भोक्तरि मा
भावान्नाममात्रे विवादः स्यात् तदभ्युपगमे च बंधमोक्षयोर्वै
धिकरण्यापत्तिः अंतःकरणस्य सुखदुःखाद्याश्रयत्वेन बद्ध
त् आत्मनश्च तद्व्यतिरिक्तस्य मुक्तत्वादित्याशंकामपनुदन्स्याप
नेतमाह भगवान् १४ ॥

मदानंदी टी. ॥

नन्वात्मनो न नित्यत्वे विभुत्वे वा विकल्पना एकत्वं तु कथं सिद्धे
जीवत्वद्वैतवादिषु १ वैशेषिकादयः सर्वे तार्किकाः कापि
लाद्या देहभेदेन भिन्नत्वमात्मनस्तेऽपि पदिरे २ अन्यथा सुखदुः
खादिसंकरः सर्वदेहिनां एवं भीष्मादिभिन्नस्य नित्यस्येममस
पि ३ सुखदुःखादियोगित्वात्तत्संयोगवियोगजौ शोकमोहौ
ध्रुवं न स्तामित्याशंक्याह मापतिः ४ मीयंते विषया आभिर्मात्राः
सर्वेंद्रियाणि ताः तासां स्पर्शास्तु विषयैः संबंधाः क्षणभंगुराः
५ परिणामाधियः सर्वे तत्तदाकारहेतवः बुद्धेरागंतवं तस्य

खदुःखप्रदाः शुभाः ६ शीतोष्णादिसुखैर्नैते न तु नित्यस्य देहिनः
कौटस्थ्यात्त्रिगुणत्वाच्च साक्षिणः सुःकथं त्विमे ७ नित्यस्यानि
त्यधर्माणामाश्रयत्वं न संभवेत् सात्यस्य साक्षिधर्मत्वादुपपद्ये
त सर्वथा ८ नैतस्माद्धि क्रियादुःखी साक्षिता क्व विकारिणः ९
धीविक्रियासहस्राणां साक्ष्यतो हमविक्रियः १० इत्युक्तं वार्त्ति
के तस्मात्साक्षिणो नैव विक्रियाः अंतःकरणधर्मास्ते सुखदुः
खादयोखिलाः नात्मनो निर्विकारस्य तेन भेदविकल्पना ए
कस्मिन्नद्वितीयस्मिन्भेदो नास्ति मनागपि ११ वैशेषिकादयो
ह्यात्मानमन्यं ते विक्रियाभिदा आयंतवत्वात्स्वरूपत्वात्सुखाद्याः त
दाश्रयाः १२ परिणामाद्धियः सर्वे भिन्नायाः साक्षिणो दृशः
केवलत्वरूपमतः सिद्धमात्मनो लिंगदेहतः १३ सर्वं सुखादि वैचि
त्र्यं लिंगधर्मो न चात्मनः प्रतिदेहमसौ बुद्धिभिन्नाद्दुःखादिधर्मि
णी १४ तत्र कूटस्थ आत्मैको भानुवत्प्रतिबिंबतः प्रमातृत्वं गतो
नानारूपेण प्रतिभासितः १५ पात्रस्थसलिलेष्वर्को यथैव प्रति
बिंबितः स्वच्छेषु स्वच्छवद्भाति मलिनेषु तथाविलः १६ चलेषु
चलवद्भाति स्थिरेषु स्थिरवत्तथा चचलत्वादयो धर्माः सूर्ये सं
ति न तावता १७ तथा सुखादयो बुद्धेर्नानात्वात्स्फुरनेकधा
त्मनो नैव ते संति सूर्यस्येवाविकारिणः १८ एतेन सर्गो नर
कौ बंधमोक्षौ भवाभवौ व्याख्यातौ मात्रनिष्ठत्वान्मातृणां बुद्धि
भेदतः १९ भिन्नत्वान्नैव ते त्वात्मा लिप्यते व्योमसूर्यवत् एक
स्मिन्नपि देहस्मिन्मातृद्वैःखसुखे यथा २० पादाद्यंगेषु भिन्ने
षु भिन्नेन तद्गतं त्वं च पादे मे सुखमत्रघ वेदना शिरसीति
व २१ प्रत्युप्रतिस्वयानासौ भिद्यते जीव एकलः तथात्मा स्व
कोपवासौ सर्वदेहेषु भासकः २२ उपाधेरेव भिन्नत्वान्नभेदः प्र
त्यगात्मनि स्फूर्तिसिद्धात्मनो भेदे मानमन्यन्न दृश्यते २३ ये
न भेदप्रसिद्धिः स्यात्तस्माद्भेदो न वास्तवः प्रत्यक्षादेः प्रमाण
स्याविषयत्वेन चात्मनः २४ तद्भेदस्य कथं युक्ता न स्यागोचरता

गी.
टी.
द्वि.

भवेत् प्रतियोगपात्मविज्ञानाधीनज्ञानाभिदायतः २५ प्र
तश्चात्मैकएवात्तिसिद्धमित्युपपत्तिभिः शीतेजान्तुसुखेदे
वःकदाचिद्दुःखकारणं २६ एवमुस्त्वमतोभिन्नतयास्वीकारए
तयोः प्रतोत्पत्तास्थिरात्वतोभिन्नस्यैवविकारिणः २७ यर्माश्रि
तसुखदुःखादिदायिनःक्षणभंगुरान् मात्रास्पर्शास्तितिक्ष
नैतेकिंविल्करामम २८ एवंतात्त्वमुपेत्तस्वविवेकेनचिदा
त्मनः देहाद्याभासमतोमात्वंजानीहिसुखंचदुःखिनं २९ कुल
हृयविशुद्धस्यतवाज्ञानेनचोचितं कौंतेयभारतेत्येवंसंबो
धनद्वयगाधुनिः ३० ॥ १४ ॥

नीलकंठी टीका ॥

ननुआत्मनोलिंगशरीरादन्यत्वेपिअहंदुःखीत्याद्यनुभवाद्दुःखा
दिधर्माश्रयत्वंदुर्वारं ततश्चभीष्मादिबंधुवर्गनाशेसतिदुःखसं
बंधोभवत्येवेत्याशंक्याह मात्रास्पर्शाइति मीयंतेविषयाआभि
स्तामात्राइंद्रियवृत्तयः यद्वादशप्रज्ञामात्राः वागादयः दशभू
तमात्राः नामादयःकौषीतकिप्रसिद्धाइंद्रियविषयरूपाग्राह्याः
तासांस्पर्शाःपरस्परंविषयविषयिभावेनसंबंधाइतिव्याख्येयं
यद्वामात्राप्रमाताप्रमासहरूस्पर्शाःविषयेंद्रियसंबंधाःस्पर्शाःशब्दस्प
तद्वाचित्वंस्पर्शान्कृत्वाबहिर्बाह्यानित्यत्रदृष्टं तत्रस्पर्शपदेनत
द्धेतोःविषयेंद्रिययोरपिलाभः तेनप्रमातुःप्रमाणद्वाराप्रमेयेण
सहसंबंधाःसर्वेशीतोष्णादिवदागमापायिनः उत्पत्तिविनाश
शीलाः अतएवानित्याश्चतद्देवसुखदुःखदाश्च अतस्ताननुतिति
क्षस्वसहस्व हेकौंतेयभारतेत्युक्तमवंशपधीवत्वमस्परूचयति
प्रमातृत्वादिरनर्थोहिसुषुप्तिसमाधिग्रहावेशादिषुअभावाज्ञाय
त्वमातैभावाद्यर्कदाचित्कतया आत्मनिप्रतीयमानोपिवृद्ध
गादिवन्मिथ्याभूतःसन्नतद्धर्मत्वंभजते यद्वियत्राभेदेनकदा
विज्ञातिकदाचिन्नतत्तस्याधर्मत्वंरज्जामिवसर्पः प्रमात्रादिष्व प्र
तीचिप्रत्यगभेदेनकदाचिद्भातिअतोमिथ्येतिनिश्चितं तेनप्र

तीतिप्रमातृसंबंधएवनास्ति सत्यमिथ्यावस्तुनोर्वास्तवसंबं-
धायोगात् प्रमातृधर्माणांदुःखादीनांतुप्रतीतिसंबंधोहृशोएतदप
व कथंतर्ह्यात्मनिदुःखित्वप्रत्ययः तत्तदुपाधितादात्म्याध्यासादि
तिश्रमः अतएवजाग्रतिदृष्टंदुःखंस्वप्नेनानुवर्तते स्वप्नदृष्टंवा
जाग्रतिनदृश्यते तथाचश्रुतिः सयत्तत्रपश्यतिपुण्यंचपापंचा
नन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइति कामःसंकल्पोविचि-
कित्सेत्यादिश्रुतिरेतत्सर्वंमनएवेतिभेदनिर्देशात्कामादिसर्व
विकारोपादानत्वंमनसएवाह तस्मात्स्वप्नइवात्मनिदुःखित्व
प्रतीतिर्भ्रांतिरेवेतिइष्टवियोगजनितांतांनितित्तस्वेतिभावः १४॥

आनंदी टीका

मीयन्तेआभिर्विषयाइतिमात्राइन्द्रियवृत्तयःतासांस्पर्शाःदेहसम
वायेनविषयैःसंयोगाःशीतोष्णसुखदुःखदाःदेहिनःशीतत्वेनसु
खदाःउष्णत्वेनदुःखदाःसन्तः आगच्छन्त्यपयान्तिचेत्यागमापायि-
नःनियमहीनाअनित्याःसन्ति नियमाभावोह्येषाम् एकदासुखज
नकस्यैवशीतादेरन्यदादुःखदायित्वात् शीतोष्णग्रहणमत्रोपल-
क्षणं तेनयत्किंचिदाध्यात्मिकंसुखंदुःखंचेतिज्ञेयं अतएवानित्यता
विचारयितुंशक्याइत्याह तांस्तितिक्षस्व अज्ञानात्कल्पयोत्पन्नमपि
दुःखितावत्त्वंहृष्टस्त्वित्यर्थः १४ ॥

तदनेननमात्रैकीकृतदेहदेहिव्यतिरेको

रामकंठी टीका

प्रपत्तिप्रतिपादनद्वारेणपारमार्थिकमात्मानंहितमुपक्रम्येदानीं यथा प्रतिपादितआत्मस्वरूपेयेनहेतुनासर्वजंतवोमुह्यंति अन्यथैवतंप्रतिपद्यन्ते तत्प्रतिपादनपूर्वंतत्प्रतिषेधोपायमुपदेष्टुमाह +

+मीयन्तएताभिरितिकृत्वादेहत्वविशिष्टस्यप्रमातुःप्रमेयार्थपरिच्छे
दसाधनेमात्राइंद्रियशब्देनसमाख्यायन्ते स्पृश्यन्तेवेद्यतयापरामृश्यन्त
इतिस्पर्शाःइंद्रियार्थाःतेचद्विप्रकाराःश्रोत्रादिबाह्येंद्रियस्पृश्यमानाः
शब्दादिरूपाःकेवलान्तःकरणस्पृश्यमानाःसुखदुःखादिरूपाःतत्रदेहे
व्यतिरेकपरमार्थतोनित्यस्यात्मनोमात्रास्पर्शाःपुनःशीतोष्णसुख
दुःखदाइतिसंबन्धः तेच शरीरेणसमबध्यमानाःशीतमनुभवा
म्युष्णमनुभवामीतिप्रत्ययंददति अंतःकरणेनसंबध्यमानाःसु
खमनुभवामिदुःखमनुभवामीतिप्रत्ययंददति तत्रशीतोष्णसु
खदुःखादिधर्मान्स्वात्मन्यारोपयन्त उत्पादविनाशस्वभावत्वाद
नित्या आत्मन्यनित्यताभ्रममुत्पादयंतःसर्वप्राणिनोमोहयन्तीत्य

गी॰
टी॰
द्वि॰

पृ॰

र्थः यतस्त्वं ते परमार्थतः प्रतिक्षणविनाशिनः ततः श्रोत्रादितोपप
न्नानित्यमात्मानं प्रत्ययमय्यस्मा तितिक्षस्व सहस्व तत्समपि तेन
नित्यसत्वादिस्पर्शमात्रेणानित्यनिर्विकारस्वात्मावष्टंभप्रति
मात्यासौ: यथा त्रैलोक्यैकवीरेण त्वया दुर्वारदर्पोद्धुरमापतन
प्रतिद्वन्द्विनो निष्प्रकंपनिजपौरुषपरिस्पंदस्वास्थितेन मनाग
प्यन्तरनुपजातविक्रियेर्षासकलमावन्तशत्रुकृतभरतयासोढ

का॰

मेवैव निसर्गनिर्विशेषस्य स्वात्मन्यहंकारमारोपणेनापि स्पृशो
प्रतिद्वन्द्विनः प्रकृतिनिःसारतत्स्वरूपनिरूपणमात्रेणासंयंता
यथास्थितवस्तुविमर्शाभावमात्रजनितो येयामोहो यदात्मा
देहवुद्ध्यादिषमीरोपणकृशोहं स्थूलोहं सुखितोहं दुःखितोहमि

स्व॰

त्यादयः प्रत्ययास्सामानाधिकरण्येन प्रादुर्भवन्ति तत्वतः पुन
स्तस्यात्मैकानावस्थिता बहिरन्तःकरणशक्तिभिः केवलं स्व
नैनवतावता कोपिदण्यात्मनो विकारकणिकासंपादयितु
तमाः स्फटिकदर्पणेपमायमात्मा नीलपीताद्याभासु
भिः स्फुरन्तीभिरपिनिकटस्थत्वादिप्रतीतिभिर्नान्यथाकर्तुं
नैयथाक्रमं शक्तिसामर्थ्यवशाद्दिविधाः पदार्थजातस्या
भान्तिभासः उपपद्यते तत्रैनैतज्जातवीमान्विकारमादर्शी
त्रः प्रतएवमात्रास्पर्शाश्रोत्रेन्द्रियार्थव्यपदेशः कृतः
क्षेत्रेकेन सर्वमेवयुगपत्र स्वभावकोमारजागराद्यवस्था
घवस्थास्वपि सर्वप्राणिगतासु स्वसंवेदकत्वेनैवैकेनस्वभाव
युक्तो नित्यो व्यापक एवात्मा प्रतिपादितः नचैनावतैकस्य
स्थित्वादोसति सर्वस्थात्वत्वादिप्रसंगः यतो मायाशक्ति
न्यभेदाभासाएव प्रमातारः सततं परस्परविभक्तमात्मानं
गच्छन्ति नतु पारमार्थिकः परः प्रमाता नत्राहि एकस्मिन्न
समवेद्यानिर्विशेषस्वभावे सर्वमिदं प्रतिबद्धं यथोक्तं
घप्रजात्मनमिति उपक्रमप्यास्मित्रिपततेनोहक्षेसंवाद
रुति सदसद्बुधिते विस्मविप्रयोगविस्मकमेणीति नदेवंस्व

स्थिकानामा[illegible]परोक्ष्यसंभवात् निःसामान्यमतिविशेषाद्यव
स्थाणः सामान्यतो ज्ञाते तत्त्वे सत्यज्ञाने विशेषवत्त्वरूपाधिष्ठानता
संभवे न विश्वस्यारोपितत्वासंभवात् न हि निरधिष्ठानकोध्या
सः सजातीयादिभेदाभाववस्य वभिन्नत्वेन भेदमात्रनिषेधासंभ
वात् अद्वितीयपदेन द्वितीयमात्रनिषेधसंभवे शेषवैयर्थ्याच
विशेषणतयोपलक्षणतया वा द्वितीयाभाववैशिष्ट्ये तेनैवाद्वैत
ज्ञानि[illegible]बोधने
तत्त्वतोऽद्वैतस्य सत्यत्वं भेदघटितेन वहष्टान्तानुसारात् स आत्मा
तत्त्वमसीत्यत्र तत्त्वमिति पदच्छेदेन जीवस्य ब्रह्मभिन्नत्वं न स्पष्टं।
[illegible]मप्यस्य बोध्यते किं च स्वभिन्नमभेदादिकं तत्त्वमित्यनेन बो
ध्यते न वा आद्ये तेनैवाद्वैतहानेः द्वितीये स्वरूपस्याज्ञाततया धि
ष्ठानतया वा न वा केन च सिद्ध्यात्वदभिमतमहावाक्यस्य
वैयर्थ्यापत्तेः एकेन ख्यानस्य केवलाद्वैत्यनुसारात् एकपदेन
लक्षणया स्वत्वं [illegible] अद्वितीयपदेन समाभ्यधिकस्यान्यत्व
स्य वैकोधेन शावः पोंड्रपवेत्यादिवत् स्वात्वादेर्ब्रह्मणपयोगवव
स्य टेरोबोध्यते वाचारंभणशब्दस्यान्यथात्वे योगरूढ्योरभावा
त् वाचारंभणं व्याकरणनिरूपितं वागिंद्रियारब्धभाषाशब्दो
विकारो देशादिभेदेन विकृतः स्तेति केति संस्कृतं सत्यमेक
रूपं यथा भाषाशब्दा यावानर्थावबोधस्तन्तदधिकं च संस्कृता
द्भवति तथा देवतोनरज्ञानाद्यफलं तन्न धिकं च ब्रह्मज्ञाना
द्भवतीत्यत्र वाचारंभणमित्यादि दृष्टान्तः सत्यरूपब्रह्मकार्य
लोनेन तदा[illegible]रकार्येन च समनु[illegible]लकत्वादिकं प्रजानां नवला
[illegible]वादेकमेव सत्वं स्वीकार्यं न देवाधिष्ठानगते घटः सन्नित्या
दौ घटादिनिष्ठतया भाति प्रतिदमिह रूपेऽहं देहरूपमित्यत्र अ
[illegible]कि निष्ठे दत्तावदिति वाच्यं सद्ब्रह्मेत्यत्राप्यधिष्ठानसत्वस्यैव
भानापत्त्याब्रह्मसत्तो यास त्वापत्तेः सत्वैर्विध्यस्यत्वयापंगीका

गी॰
टी॰
द्वि॰ ६

94

तद्बलाद्येन सम्व्यापलापेतिलाघवेमग्रस्सत्वमपिनस्वी·
कार्यप्रतीतिस्तुवास्तवसत्वंविनापिसम्भोद्रूप्यवत्स्यातीतिकस·
त्वेनाप्युपपद्यते प्रतीतिस्त्वेवदरस्यावियत्वादिवत्स्नन्यच्चश्रुति
सत्वमपिमनिष्टमेव नचत्रिकालाबाध्यत्वादिरूपंकालसंबं
धित्वानर्वरूप्यमस्तीतिप्रतीतिकेपिकालसंबंधोस्तीतिवाच्यं
कालसंबंधित्वेनप्रतीतिरेवहिनकालसंबंधोर्थक्रियायाथार्थैः
प्रमेयत्वेप्रमेवमितिवत्तस्यसत्वमिनपिसत्वाच्च १६ ॥
उत्तमेवैजयन्तीटीका ॥
तत्रमात्रास्पर्शानामनित्यत्वेसतिप्रकृतिकार्यत्वाविशेषात्
वैषामपिकार्याणामनित्यत्वाऽपत्याऽसत्वमपिस्यात्तथात्वे
स्वकसर्पविषमूर्छितत्रक्तघस्यानिर्विषकरणायेवावस्तु·
रूपदेहवदस्यात्मनस्तन्नुकायेऽथचगमनादिविद्रूहगन्धा
वामयेश्वतत्रुराज्यादिभोगप्राप्तयेनकोपितत्रन्मतोगुरु·
गोचादिवधरूपत्रपापंकरोतीत्येवमर्जुनाभिप्रायंज्ञात्वात
रात्मानर्कार्यांश्चिर्नेनन्दनं दन्त्रीभगवान्स्वप्रकृतिकार्याणांदे
हादीनांतच्छत्वेवारयन्नाह नेति असतः रुक्त्स्यरज्जुसर्प्पा
देःभावःसत्पतानविद्यतेनसम्भवति यथायतोऽस्यावस्तु
त्वेनसत्वधर्मोनधिकरणत्वात्प्रमाणाभावाच्च सतः सतः
देहादिकार्यस्याप्रभावः असत्पतानविद्यतेनसंभवति यतो
स्ववस्तुत्वधर्माश्रयत्वेनावस्तुत्वधर्माश्रयासम्भवात्
तत्प्रमाणाच्च असत्पसत्वेकमपिसत्वेचविद्यते इत्यर्थः उभ
यथात्वंवदसितथान्येपिकेचित् ज्ञानेनैवमवेक्ष्यपेस्तायामा
रु उभयोरेति उभयोरसत्सतोर्हृदयोः अन्तयोरभावाभावयोः
अन्तः निर्णयः दृष्टः निश्चितः कैश्चिदपेक्षायामाह उभयो
तत्त्वदर्शिभिर्यथार्थस्वरूपविद्भिः उमारमारस्कन्दादिभिः

त्स॰१

अपि शब्दस्यार्थकत्वेन शास्त्राणि संदृश्यंते तथाह्यवधारणा
र्थकत्वेनान्ययोगो व्यवच्छिद्यते तथा चायमर्थः तत्वद
र्शिभिरेव सच्छास्त्रेष्वेव निश्चितः न तु यथार्थवेद्भिरसच्छा
स्त्रैः ज्ञातर्कपरैश्चेति शास्त्राणि च यदिदं किंचित्तत्सत्यमि
त्याचक्षते सदेव सोम्येदमग्र आसीत् सत्यस्य सत्यं प्राणा वै स
त्यं श्रुत्येन माङ्गः सत्यकर्मेति सत्यं ह्येवेदं सृजते अनाद्यन
न्तं जगदेतदीदृक् प्रवर्तते नात्र विचारमस्ति कुर्द्धमूला
वाक्शाख एषोश्वत्थः सनातन इत्यादिश्रोतानि कुर्द्धमूल
मधः शाखमश्वत्थं प्राहुरव्ययमिति स्वयमेव वक्ष्यते वा
तिरेके निन्दाश्रवणाच्च तथाहि असत्यमाहुर्जगदेतद
ज्ञाः शक्तिं हरेर्येन विदुः परां ह्रियः सत्यरूपं जगदेतदी
दृक् सृष्ट्वात्वभूत्सत्यकर्मा महात्मा इत्यादिश्रोतानि अस
त्यमप्रतिष्ठं ते जगदाहुरनीश्वरमित्यादि वक्ष्यमाणानि
च तथाऽनुमानान्यपि इदं सत् सत्यप्रतिपादकश्रुतिगम्य
त्वात् ब्रह्मवत् इदं सत्यं सत्यशक्तेः कार्यत्वात् यदेवं तत्
शेवं वृक्षछायावत् इदं सत्यं सत्यपरिणामित्वात् क्षीर
वदित्यादीनि श्रुतिस्मृतिन्यायानुमानानि जगतः सत्यत्वं
प्रतिपादयंति ननु सदेवेदमग्र आसीदित्यादिना सत्वस्या
पि श्रवणात्कथं कार्यस्यासत्यतेति चेन्न अस्य वाक्यस्यावि
कारित्वरूपासत्वपरत्वात्तदवस्थापतिप्रपादनपरत्वा
त् तथाहि विकारिमताक[illegible]स्येदं कारास्पदस्य जगतः
कारणावस्थायां अनभिव्यक्तनामरूपकत्वात् सदादिश
ब्दवाच्यत्वाभिधानमविरुद्धं कार्यावस्थायां तु अभिव्य
क्तनामरूपकत्वादाविर्भूतविकारकं सदादिशब्दवाच्य
त्वं भजते नत्वस्य विरोधः इत्यर्थः अन्यथा कथमसतः सज्जा
यतेति वाक्यशेषविरोधात् तथा चाह भगवान् पराशरः

गी॰
टी॰
हि॰

ततेतदस्तयंनित्यंजगन्मुनिवराखिले आविर्भावतिरोभावज
न्मनाशविकल्पवदिति विस्मुपुराणे नथैववृक्षवेणुकंन्य
ग्रोधःसुमहानल्पेयथाबीजेव्यवस्थितः संयमेविश्वमखि
लंबीजभूतेतथात्वयिबीजादंकुरसंभूतोन्यग्रोधःसमुपस्थितः
विस्तारंचयथायातित्वत्तःसृष्टौतथाजगदितितथाभगवान्
सूत्रकारोप्याह पटवच्चयथासंकुचितःपटःपटत्वेनादृश्यमा
णोपिपटएवप्रसारणेनस्पष्टतयादृश्यतेएवंतथातिरोभावा
पन्नमव्यक्तमपिजगत्कार्यत्वेननामरूपाभ्यामदृश्यमाणम
पिसदेवआविर्भूतंतत्प्रत्यक्षागमाभ्यांसत्त्वेनस्पष्टंदृश्यतेइति
सूत्रार्थः नतुमायाकार्याणांदेहादीनांसत्यत्वेसतिकेषाम
प्यात्मनांबंधनिवृत्तिर्नस्यादितिचेन्नसत्यस्यैववयनवस्त्रादेर्ही
नादिनासत्यस्यैवमलपंकादिस्पृष्टस्यक्षालनादिनानिवृत्तिदर्श
नात् शुभ्रस्यांतेविश्वमायानिवृत्तिरितिश्रुतेः मायामेतांत
रंतितेइतिवक्ष्यमाणप्रमाणाच्च यथाप्रमत्तेराज्ञितदपराधि
नःतस्करादेर्निगडादिनाबन्धोजायतेपुनस्तस्मिन्प्रसन्नेसति
तन्निवृत्तिःस्यान्नतुतत्स्वरूपनाशःतथासर्वेश्वरेमय्यप्रसन्ने
मद्विमुखानांतेअज्ञानांमाययाबन्धोभवति पुनर्मयिप्रसन्ने
मदनुग्रहेणैवतेषांमायानिवृत्तिःस्यान्नस्वरूपनाशः तप
ववस्तुनोबन्धकत्वमोचकत्वादिकंसम्भवति नाश्नुतेव
श्वादेरवस्तुत्वात् तस्मात्सत्यशोकेममशक्तिकार्यत्वादस्य
सत्यत्वेमलाधैर्येणमात्रास्पर्शान्संसहमत्स्मर्संनायमदात्रे
वेतान् हत्वाराज्यंभुक्तानेनत्वमथस्मृतंत्वयाप्राप्यं वाकिंत्राणाः
ज्येनगोविंदकिंभोगैर्जीवितेनवा अपित्रैलोक्यराज्यस्यहेतोः
किंनुमहीकृते श्रेयोभोक्तुंभैक्ष्यमपीहलोकेइत्याद्युक्तं
पणेवरागेपणपूर्वमेवराज्यभोगादिषुविरक्तस्यतवाप्यहेतो
नकार्याणांमात्रास्पर्शानामापापादित्वमनित्यत्वंचमतः श्री

नमा

५ मीयन्ते विषया आभिरिति मात्रा इंद्रियवृत्तय स्ताभिः स्पर्शा विषयैः सह संबन्धाः
ते शीतोष्णादिप्रदा अन्योन्यविरोधि बाह्याभ्यंतर भोगप्रदाः पुरुषस्य भवन्ति स्पर्श
ग्रहणेन नात्मा एतैः स्पृश्यते नतु नित्ययोगतया मलिनी क्रियते इति सूच्यते ते
तूत्पत्तिविनाशवत्त्वादनित्याः अस्थिराः अत एवोदितदशामाश्रित्य तान्तितिक्षस्व
सहस्व तान्मा बहु भ प्रतिष्ठां मात्रात्वी नित्यार्थः एतेन सुखदुःखोदय आत्मधर्मतयां
नार्थिकोऽक्रान्ति रूक्ताः यथा जलसंपर्कोऽस्ति नत्काल ह्रोताः शीतोष्णादि प्रयच्छंति एव

वेसत्येस्वात्मनि सत्व्यवस्थितं त्वं शुक्लत्वमिति प्रतिपादयितुमाह १४ ॥

लासिनी टीका

ननु मृतो जीवतो वाहं न शोचामि किंतु तद्वियोगादिदुःखभाजमात्मानमेवेति चेत्तत्राह मात्रेति १४ ॥

तथापि तद्देहसंयोगजं सुखं देहवियोगजं दुःखं संयोगवियोगनिमित्तो शोकमोहौ संभवत इत्यर्जुनस्य वचनमाशंक्याह +

पंचोली टीका

+मात्रेति मीयंते शब्दादयो विषयाः आभिस्ताः मात्राः श्रोत्रादीनींद्रियाणि स्पृश्यंते इति स्पर्शाः शब्दादयो विषयाः मात्राश्च स्पर्शाः मात्रास्पर्शाः अथवा मात्राणामिंद्रियाणां स्पर्शाः शब्दादिभिः संयोगाः ते मात्रास्पर्शाः शीतोष्णसुखदुःखदाः शीतं उष्णं सुखं दुःखं प्रयच्छन्तीति आगमापायिनः उत्पत्तिविनाशशीलाः अत एव अनित्यास्तस्मात्तान् तितिक्षस्व हे भारत तेषु हर्षविषादमा कार्षीः हे कौंतेय यतः पुनः मात्रास्पर्शाः शीतोष्णसुखदुःखदाः आगमापायिनः अनित्याः अत एव हे भारत तान् तितिक्षस्व १४ ॥

रघावीरसमिद्धायिनी ॥

ननु स्वनित्यत्वं देहस्य तथापि प्रत्यक्षमुपलभ्यमानमीष्टादिबंधुजनदेहविच्छेदस्य सुखवियोगदुःखसंयोगयोर्जनकत्वमस्त्येव कथं शोकमोहावपसरतः त्यजेनाभिप्रायमाशंक्य तदुच्छित्तये आह मात्रास्पर्शा इति मीयंते अनुभूयंते आभिर्विषया इति मात्रा इंद्रियाणि तासां स्पर्शा इंद्रियार्थसन्निकर्षाः शीतोष्णद्युपलक्षणं शीतोष्णादिरूपसुखदुःखजनकाः आगमापायिनः उत्पत्तिविनाशशालिनः अत एवानित्याः तान् स्वस्ता तितिक्षस्व सहस्व तद्वशो माभूः एतदुक्तं भवति इंद्रियार्थसन्निकर्षे सत्येव शोकः प्रादुर्भवति न तु तदभावेऽतः सोऽस्ति तस्मात्तस्यानित्यतया तज्जन्यस्य शोकस्यापि नित्यत्वं युज्यते इति तद्वशो

५८

सिद्धसंयोगवियोगाक्रान्ति
सुखदुःखादि प्रयच्छंति
तेषां नाशित्वात्स्वरूपतः
तदभावे तद्विनाशनतः
तन्निमित्तहर्षविषादस्या
प्यनित्यत्वं

96

नमास्मतंस्वात्मावह्मप्रतिष्ठांत्याक्षीदिति भावः भारतेति
भरतकुलोत्पन्नस्य तव धीरत्वमेवोचितमित्यभिप्रायेण
संबोधयति १४॥

मधुभाष

मात्रास्पर्शा इति मीयंत इति मात्रा विषयास्तेषां स्पर्शाः संबंधाः
त एव शीतोष्णसुखदुःखदाः देहे शीतोष्णादिसंबंधाद्धि
शीतोष्णाद्यनुभव आत्मनः ततश्च सुखदुःखे नत्वात्म
स्वतो दुःखादिः संभवति कुतः आगमापायित्वात् यथा
त्मनः स्वतः सुखः सुखमावपिस्तुः अतो यतो मात्रास्पर्शाः जा
ग्रदादावेव वर्तते संति नान्यदेवेति तदन्वयव्यतिरेकित्वात् नि
मित्ता एव नात्मनः स्वतः आत्मनस्त्वेते विषयविषयीभाव
बंधादन्यः संबंधो नास्ति नचागमापायित्वेपि प्रवाहरूपे
णापि नित्यत्वमस्ति सुषुप्तिप्रलयाद्यवभावादित्याह अ
नित्या इति अत आत्मनो देहाद्यात्मभ्रम एव सुखदुःखका
रणम् अतस्तद्धितस्य बंधुमरणादि दुःखं न भवति
अतो मिथ्याभिमानं परित्यज्य ज्ञानात् शीतोष्णादीनि तितिक्ष
स्व अतः प्रयोजनमाह १४॥

भाषा अनुवाद।

जो कहो कि हम भीष्म आदिके प्रति शोक नही करतेहै पर
न्त उनके वियोगमे हमै दुःख करना होगा इस लिये हम
अपनेको शोचतेहै इस वात पर कहतेहै कि सकल वस्तु
जिसके द्वारा परिमाण की जाय ऐसी जो सब इंद्रिय हनि
कहे संयोग और उनके द्वारा जो विषयों का स्पर्श होता
वही शीत उष्णादि द्वारा सुख दुःख देताहै किन्तु वे अनित्यहै
इससे उनको सहो जैसे जल धर्म आदि संयोगसे कालस्वभा
व वशसे शीत उष्ण होनेसे सुख दुःख होता है तैसे इष्ट और
अनिष्ट प्राप्त होनेसे भी सुख दुःखहोताही है परन्तु वह अ
नित्य और मिथ्याहै इससे हमको उनका सहना उचितहै
हम ऐसे धीर पुरुषको उनमे हर्ष विषाद करना अयोग्य
धार हयाहै १४ ॥

दोहा॥

मदीन मात्रा स्पर्श यह शीतोष्ण सुख दुःख दत होवत नाश
अनित्य है तिनको सहु भारत ॥ १४॥

97

यंहिनव्यथयन्त्येते पुरुषंपुरुषर्षभ समदुःख
सुखंधीरं सोऽमृतत्वायकल्पते ॥१५॥

शांकरभाष्यम् ॥

शीतोष्णादीन् सहतः किंस्यादिति शृणु यंहीति यंहिपुरुषंसमे
दुःखसुखे यस्यतं समदुःखसुखं सुखदुःखप्राप्तौ हर्षविषादर
हितं धीरं धीमन्तं नव्यथयंति नचालयन्ति नित्यात्मदर्शनादेते य
थोक्ताः शीतोष्णादयः सनित्यस्वरूपदर्शननिष्ठोद्वन्द्वसहिष्णुरमृ
तत्वाय अमृतभावाय मोक्षायेत्यर्थः कल्पते समर्थोभवति ॥१५॥

आनंदगिरिकृतटीका ॥

अधिकारिविशेषणं तितिक्षुत्वं नोपयुक्तं केवलस्य तस्यपुमर्थाहे
तुत्वादिति शङ्कते शीतेति विवेकवैराग्यादिसहितं तन्मोक्षहेतु
ज्ञानद्वारा तदर्थमिति परिहरति शृण्विति तितिक्षमाणस्यविवक्षि
तं लाभमुपलम्भयति यंहीति हर्षविषादरहितमित्यत्र शमादिसा
धनसम्पन्नत्वमुच्यते धीमन्तमिति नित्यानित्यविवेकभागित्वमेतच्चो
भयं वैराग्यादेरुपलक्षणं नित्यात्मदर्शनं त्वमर्थज्ञानं साधनचतु
ष्टयवन्तमधिकारिणमनूद्य त्वंपदार्थज्ञानवतस्तस्य मोक्षोपयिक
वाक्यार्थज्ञानयोग्यतामाह सनित्येति ॥१५॥

स्वामिकृतटीका ॥

तत्सहनेकारणयत्वात्तद्पितत्सहनमेवोचितंमहाफलत्वादित्याह यं
हीति एतेमात्रास्पर्शायंपुरुषंनव्यथयंतिनाभिभवंति समेसुखदुः
खेयस्यतंसैतेरविक्षेप्यमाणोधर्मज्ञानद्वाराअमृतत्वायमोक्षायक
ल्पतेयोग्योभवति ॥१५॥

पिशाचभाष्यम् ॥

मात्रास्पर्शान्सहमानस्यकिंस्यादित्यत्राह यंहीति यंहिपुरुषंनव्यथ
यंतिनचालयंतिएतेमात्रस्पर्शाःसमदुःखसुखंसुखदुःखप्राप्तौहर्ष
विषादरहितंधीरंधीमंतं सोऽमृतत्वायअमृतभावायमोक्षायेत्यर्थः
कल्पतेसमर्थोभवति ॥१५॥

रामानुजभाष्यम् ॥

गी॰ टी॰ द्वि॰

९८

ततत्त्वतोऽतिः किमर्थमित्यत आह यं हि पुरुषं धैर्यादिगुणकमवर्जनीयदुः
खं सुखवन्मन्यमानममृतत्वसाधनतया स्ववर्णोचितं युद्धादिकम
नभिसंहितफलं कुर्वाणमेतदंतर्गतशस्त्रपातादिस्पर्शा न व्य
थयंति स एव तत्त्वं साधयति न त्वाहं शोकदुःखासहिष्णुरित्यर्थः अत
आत्मनो नित्यत्वादेव तत्कर्तव्यमित्यर्थः ॥ १५ ॥

अभिनवगुप्तकृतटीका नास्ति

ननु यत एवागमापायिनस्ततः सर्वे दृशाविशेषात्तत एव शोच्यं ते भ्ये
वे तथाहि कोऽयमागमो नाम उत्पत्तिरिति चेत् सापि का असत आत्म
लाभः सा इति त्वमसत् असत्स्वभावता हि निःस्वभावता निरात्मता नि
रात्मकस्य स्वभावापेक्षमात्रीकर्तुं शक्यः अनीलं हि न नीलीकर्तुं
कं स्वभावान्यथाभावोऽनुपपन्नात् तथा च शास्त्रे न हि स्वभावो भावानां
व्यावर्तेतौष्ण्यवद्रवेरिति अयमसत एवात्मलाभोत्पत्तिः तदात्वात्म
लाभोत्पत्तिः तदात्वं ह्यागमो सतो व्यभावान्नित्यत्वेनैवापगमो
कथमसतः स्वभावः द्वितीयेन सतो भाववदसदेव सत्स्वभावस्यापि
नाशः शीर्यते न किंचिद्विनाशः स्यात् अभावस्य भावत्वायोगात् अयमुक्तरादि
र भावे सर्वे भावे न त्वन्यथा भावस्य किंचित् न दृश्यते इति
नाविरुद्धं न देशान्तरं प्राप्य अतः पश्यति इव अव्यनिविकल्प
ता इत्याह ॥ १५ ॥

परमार्थप्रपाटीका ॥

अथ दुःखसहनेन तावदुपायहृदयमक्लिष्टधैर्यविवेकश्च तत्र प्रथममाह
यं हीति एते मात्रास्पर्शा यं पुरुषं पुरुषार्थाधिष्ठानभूतं न व्यथयंति
नाभिभवंति भो पुरुषर्षभ पुरुषश्रेष्ठ धीरं अविक्रियं सहनशी
लं समदुःखसुखं सुखवद्दुःखं सहमानं हे शोभने विनिर्विषादमिति पुरुषविशे
षणानि स पुरुषः अमृतत्वाय मोक्षाय कल्पते ॥ १५ ॥

वनमालीटीका ॥

ननु दुःखाभावरूपपुरुषार्थस्य पुरुषार्थादिस्वधर्मानुष्ठानेनापि संभवा
त् किं तत्कल्पसमकदुःखसाध्यमभिमानत्यागेनेति हृदयस्थं वि
शोकामपाकर्तुमभिमानत्यागाद्दुःखनदुःखाभावः स्वयं पुरुषार्थो

परमानंदस्वस्वरूपाविर्भावरूपमोक्षहेतुश्च भवतीत्याह यंही
ति यं देहादावहमित्याद्यभिमानशून्यं एते मात्रास्पर्शाः न व्यथ
यंति सुखदुःखे वैषम्यबुद्ध्या न कुर्वंति सोमृतत्वाय मोक्षाय कल्प
ते योग्यो भवति न तु सुषुप्त्यादौ पामराणामप्यहमित्याद्यभिमा
नाभावादमृतत्वंस्यादत आह पुरुषमिति पुरुषमेव संतं देहाद्य
संध्यानवंतं जाग्रतमित्यर्थः यद्वाभिमानत्यागजन्यदुःखाभाव
मात्रात्कथं मोक्षमेव बहिर्ज्ञानमृतत्वरूपं भवतीति श्रुतिविरोधा
दत आह पुरुषमिति पुरुष ब्रह्म सर्वं व्याप्नोतीति पुरुषो ब्रह्म
स्वाभीन्नं कीदृशं सुखदुःखे समं अनात्मधर्मत्वात्पुरुषार्थत्वाच्च
दुःखं च यथा हेयं वैषयिकसुखमप्यनात्मधर्मत्वान्मोक्षविरुद्धत्वाच्च
तथा हेयमिति हेयत्वेन समे दुःखसुखे यस्य तादृशं समत्वमेव
कथं स्यादत उक्तं धीरमिति सुखदुःखकार्यहर्षविषादयोरलभ
कमप्रयत्नवंतमित्यर्थः अयं भावः यथा तत्रोत्पन्नत्वेन न हेतोत्प
न्नदंडेन च संबंधविशेषेण पुरुषस्य धनित्वं दंडित्वं तथा सद्रूपसुख
न दुःखादिना अविद्यासहकृतस्वामित्वेन दुःखादिजनकादृ
ष्टप्रयोजकाविद्यावत्त्वेन वा संबंधेन जीवस्य दुःखादिमत्त्वं जीवन्मु
क्तानामत्र हृदन्तस्याविद्यालेशस्य दग्धपटन्यायेन देहाद्यहमभि
मानाप्रयोजकत्वेन तन्निमित्ताहृष्टाप्रयोजकत्वं प्रारब्धकर्मजन्या
दृष्टफलदुःखादिभोगसंपादकत्वं च परमलीनविद्यैव दुःखाद्य
नुभवरूपसंसारहेतुरिति संसारहानाय देहादावहं ममेत्यभिमा
न विहाय कर्माणि मदीयमिदं कर्मानेनेदं फलं प्राप्यमिति चाभि
मानं विहाय शास्त्रोक्तस्वस्वरूपानुसंधानपूर्वकस्वोचितकर्मानुष्ठा
नेन ततः सर्वात्ममत्वधीपूर्वकाविच्छिन्नप्रेमप्रवाहरूपापराभक्तिल
ब्धो भगवत्प्रसादलब्धो मोक्ष इति पुरुषमित्येकवचनेराजाधर्मि
ष्ठो भवेत् ब्राह्मणः शांतो दांतो भवेदिति विद्वज्जात्यभिप्रायेण प्रपत्रं
त्वेकवचनानुसारादेक एव सर्वेषु देहेषु जीव एको देवः सर्वभूतेषु
गूढ इति श्रुतेरिति तत्र अविद्यायामंतरे वर्तमानाः स्वयं धीराः पंडितं
मन्यमानाः अविद्यारमणीयचरणादित्यादौ कर्मबंधस्य सति संपद्य

नविदुरित्यादौ स्तुश्रुतेः वेदांतविज्ञानसुनिश्चितार्था इत्यादौ तत्वज्ञा
नस्यपरिशुद्धत्वंतिसर्वे इत्यादौ मोक्षस्यचचेतनधर्मस्यानेकेषु केर
संगत्यापत्तेः वेदांतविज्ञानसुनिश्चितार्था इत्यादौ तत्वज्ञानमपरि
ह्यंतमवेइत्यादौ। तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजना
इतिश्रुतयोस्तत्वदर्शिभिः उपदेक्ष्यंतितेज्ञानंज्ञानिन इत्यात्मतत्व
वित्वबहुत्वश्रवणाच्च तद्योयोदेवानांप्रत्यबुध्यतसएवतदभ
वत्ऋषीणांतथामनुष्याणां अजोह्येकोजुषमाणोऽनुशेतेज
हात्येनांभुक्तभोगामजोन्यः नित्योनित्यानांचेतनश्चेतनानामे
कोबहूनांयोविदधातिकामानितिश्रुतेः बहवोज्ञानतपसा
पूतामद्भावमागता इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः
येचमुक्ताभवंतीहनराभरतसत्तमतेषांलक्षणमेतद्वितत्स्वेतद्धी
पनिवासिनामितिस्मृतेश्च बहूनांमुक्तिप्रतिपादिकायाविरोधा
पत्तेः नहिमुक्तौबहुत्वेपत्यत्वादिप्रसंगेऽपदूष्येत नचैकजीव
वादेमुक्तामुक्तव्यवस्थासिद्धि ऋत्यसिद्धानांशुकादीनांत्वदभिग
तानांगौडपादादीनांब्रह्मविदांमुक्तिनासीत्तदुपदेशात्तवभवि
च्छतीतिविचित्रं किंचजीवैकत्वेसुखदुःखभोगसांकर्यं देहोपा
धिभेदेपियोगिनांभोगसांकर्यदर्शनात् अंतःकरणस्योपाधि
देमुमोतत्राशाद्धकस्तुसाल्पसुमयोरनुभवस्यसांकर्यापत्तेः प्र
तिदिनसुषुप्तौनष्टस्यसंस्कारास्मरणाद्यनियामकत्वाच्च नच
कारणात्मनःसुषुप्तावर्थतःकरणमस्तिकारणस्याविद्याद्रूप
स्यैकत्वेनस्रत्वाद्यनियामकत्वादित्यलं ॥ १५ ॥

इतिश्रीमद्वैजयन्तीटीका ॥

नन्वेतेषामुपपत्तायांकिंफलंभविष्यतीत्यपेक्षायामाह यंहिनेति
यंसर्वधर्मनिष्ठंधैर्यादिगुणसंपन्नंपुरुषंप्रतिदेहेषुशीतेइतिमत्यातं
चक्रुमात्मानंसमदुःखसुखंसमदुःखसुखंचियस्यतंइष्टानिष्टप्राप्तौ
वपिहर्षविषादरहितमित्यर्थः एतएवधीरंयुक्तादौनिश्चितशत्रुं
दिपातेनविदीर्यमाणेष्ववयवेष्वनुद्विग्नचित्तमित्यर्थः हियस्मा
देतेमात्रास्पर्शाःसुखदुःखदाअपिमात्रास्पर्शानव्यथयंतिनपीडयंतितस्मा

+ नन्वंतःकरणस्य सुखदुःखाश्रयत्वेन तस्यैव कर्तृत्वेन भोक्तृत्वेन च चेतनत्वमभ्युपेयं तथा च तद्व्यतिरिक्ते
तद्भासके भोक्तरि मानाभावान्नाममात्रे विवादः स्यात् तदभ्युपगमे च बंधमोक्षयोर्वैयधिकरण्या
पत्तिः अंतःकरणस्य सुखदुःखाद्याश्रयत्वेन बद्धत्वात् आत्मनश्च तद्व्यतिरिक्तस्य मुक्तत्वादि
त्याशंकामर्जुनस्यापनेतुमाह भगवान् +

स्यैषादिवासुरूपोऽमृतत्वाय मोक्षभावाय कल्पते योग्यो भव-
ति पुरुषर्षभेति सम्बोधनेन सर्वेषां पुरुषाणां मध्ये श्रेष्ठोऽसि अत
स्त्वामेतेन व्यथयितुमशक्यत्वमेतान्सहिष्णुसे एवेति सूचितम् ॥१५॥

मधुसूदनी टीका ॥

+ यं स्वप्रकाशत्वेन स्वत एव प्रसिद्धं अत्रायं पुरुषः स्वयंज्योतिर्भव
तीति श्रुतेः पुरुषं पूर्णत्वेन पुरि शयानं स वा अयं पुरुषः सर्वा
सु पूर्षु पुरिशयो नैनेन किंचनानावृतमिति श्रुतेः समदुःखसुखं
समे दुःखसुखे अनात्मधर्मतया भास्यतया च यस्य निर्विकारस्य स्व
यंज्योतिषस्तं सुखदुःखग्रहणमशेषांतःकरणपरिणामोपल
क्षणार्थं एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनी
यानिति श्रुत्वा हृद्धिकनीयस्त्वरूपयोः सुखदुःखयोः प्रतिषेधात्
धीरं धियमीरयति प्रेरयतीति व्युत्पत्त्या चिदाभासद्वारा धीतादा
त्म्याध्यासेन धीरं धीप्रवर्तकं धीसाक्षिणमित्यर्थः स धीः स्वप्नो भूत्वे
मं लोकमतिक्रामतीति श्रुतेः एतेन बंधप्रसक्तिर्दर्शिता तदुक्तं
यतो मानानि सिध्यंति जाग्रदादित्रयं तथा भावाभावविभागश्च
सब्रह्मास्मीति बोध्यत इति एते सुखदुःखदा मात्रास्पर्शाः प्रिय
मात्र न व्यथयंति परमार्थतो न विकुर्वंति सर्वविकारभासकत्वेन
विकारायोग्यत्वात् सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चा
क्षुषैर्बाह्यदोषैः एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुः
खेन बाह्य इति श्रुतेः अतः स पुरुषः स्वस्वरूपभूतब्रह्मात्मैक्यज्ञा
नेन सर्वदुःखोपादानतदज्ञाननिवृत्त्युपलक्षिताय निखिलद्वैता
नुपरक्तस्वप्रकाशपरमानंदरूपायामृतत्वाय कल्पते योग्यो
भवतीत्यर्थः यदि ह्यात्मा स्वाभाविकबंधाश्रयः स्यात्स्वाभावि
कधर्माणां निवृत्तिमंतरेण निवृत्तेर्न कदापि मुच्येत तथा चोक्तं
आत्मा कर्तादिरूपश्चेन्मा कांक्षीस्तर्हि मुक्ततां नहि स्वभावो
भावानां व्यावर्तेतौष्ण्यवद्रवेरिति प्रागभावासहवृत्तेर्युगपत्
सर्वविशेषगुणनिवृत्तेर्धर्मिनिवृत्तिनांतरीयकत्वदर्शनात्
अथात्मनि बंधो न स्वाभाविकः किंत्वविद्याद्युपाधिकृतः आत्मै

100

द्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणइतिश्रुतेः तथाचधर्मिम
ज्ञैवपितत्रिरूपस्याशुक्त्युपपत्तिरितिचेत् न तर्हियःस्वधर्मम
न्यनिष्ठतयाभासयतिसउपाधिरित्यभ्युपगमाद्बुद्ध्यादिरुपाधि
स्वधर्ममात्मनिष्ठतयाभासयतीत्यायातं तथाचायातंमार्गैव
धस्यासत्यत्वाभ्युपगमात् नहिस्फटिकमणौजपाकुसुमोपा
धिनिमित्तोलोहितिमासत्यः अतःसर्वसंसारधर्मासंसर्गिणो
प्यात्मनउपाधिवशात्तत्संसर्गित्वप्रतिभासोबंधः स्वस्वरूपज्ञा
नेनतत्स्वरूपाज्ञानतत्कार्यबुद्ध्याद्युपाधिनिवृत्त्यातन्निमित्ता
खिलभ्रमनिवृत्तौनिरस्तनिखिलभास्योपरागतयाशुद्धस्व
प्रकाशपरमानंदतयापूर्णस्यात्मनः स्वतएवकैवल्यंमोक्षइति
नबंधमोक्षयोर्वैयधिकरण्यापत्तिः अतएवनाममात्रेविवादइति
प्राप्तेभास्यभासकयोरेकत्वानुपपत्तेः दुःखीस्वव्यतिरिक्तभास्य
भास्यत्वात्घटवदित्यनुमानात् भास्यस्यभासकत्वादर्शनात्त
स्यैवभास्यत्वेभासकत्वेचकर्तृकर्मविरोधात् आत्मनःकथ
मितिचेत्नतस्यभासकत्वमात्राभ्युपगमात् अहंदुःखीत्या
वृत्तिसहिताहंकारभासकत्वेननतस्यकदापिभास्यकोटावप्र
वेशात् अतएवदुःखीनस्वातिरिक्तभासकापेक्षः भास्यत्वा
त् दीपवदित्यनुमानमपि नभास्यत्वेनस्वातिरिक्तभास[illegible]
साधकेनप्रतिरोधात् भासकत्वंचभानकरणत्वंस्वप्रकाशभा
नरूपत्वंवा आद्येदीपस्येवकरणांतरानपेक्षत्वेपिस्वातिरिक्त
भानस्यापेक्षितत्वेदुःखिनोनन्याहन्यते अन्यथादृष्टान्तस्यसा
ध्यवैकल्यापत्तेः द्वितीयेत्वसिद्धोहेतुः[illegible]तयाभा
स्यत्वहेतोरेवविजयते बुद्धिवृत्त्यतिरिक्तभानानभ्युपगमा
बुद्धिरेवभानरूपेतिचेन्न भानस्यसर्वदेशकालानुस्यूततया
भेदकधर्मशून्यतयाचविभोर्नित्यस्यैकस्यचानित्यपरिच्छि
नेकरूपबुद्धिपरिणामात्मकत्वानुपपत्तेः उत्पत्तिविनाशा
दिमतीतेज्ञावश्यकल्प्यविघटनतयाप्युपपत्तेः अन्यथानंतरा
नोत्पत्तिविनाशभेदादिकल्पनायामतिगौरवापत्तेर्विनाश

त्वविस्तरः नयाचश्रुतिः नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽवि
नाशित्वात् आकाशवत्सर्वगतश्चनित्यः महद्भूतमनंतमपारं
विज्ञानघनएवेतदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमा
त्माब्रह्मसर्वानुभूरित्याद्याविभुनित्यस्वप्रकाशज्ञानरूपतामा
त्मनोदर्शयति एतेनाविद्यालक्षणादर्थाव्यतिरेकःसि
द्धः अतोऽसत्योपाधिनिबंधनबंधभ्रमस्यसत्यात्मज्ञानेना
निवृत्तौमुक्तिरितिसर्वमवदातं अरूपमित्यनेतिसंबोधयन्स्व
प्रकाशचैतन्यरूपत्वेनपुरुषत्वं परमानंदरूपत्वेनचामन
स्कत्वमत्वेसर्वद्वैतापेक्षयाश्रेष्ठत्वामजानन्नेवशोचसि अतः
स्वस्वरूपज्ञानादेवतवशोकनिवृत्तिः स्वकारान्तरतिशोकमाः
त्मविदितिश्रुतेरितिसूचयति अत्रपुरुषमित्येकवचनेनसां
ख्यपक्षोनिराकृतः तैःपुरुषबहुत्वाभ्युपगमात् ॥

[illegible]

॥ ५५ ॥

सदानंदी टीका ॥

नन्वंतःकरणस्यैवभोक्तृत्वेसुखदुःखयोः तस्यैवचेतनत्वात्स्या
दात्मत्वेननततःपरं १ भोक्तुरन्यस्यचात्मत्वेमानंनैवेहदृश्य
ते स्याद्वैयधिकरण्यंचबंधमोक्षयोः २ बद्धंमनोवि
मुक्तंवान्यश्चात्मेत्यसाहमाधवः यस्ततःस्वप्रकाशत्वात्प्रसिद्धःपू
र्णमद्वयं ३ मात्रास्पर्शानजर्वंतिविक्रियांवस्तुनोएवपि दृश्य

गी॰
टी॰
द्वि॰

यमेतयायमपुरुः(खसुखसमेदृशः ४ धीरं धीप्रेरकं स्वात्मता
दात्म्याध्यासतो विभुं चिच्छायाद्वारतो बुद्धिसाक्षिणं वस्तुतः पर
अथास्त्वं यथाधिष्ठानेन तदुक्तं सांप्रदायिकैः यतो मानानि सिद्ध्यं
ति जाग्रदादित्रयं तथा भावाभावविभागश्च स ब्रह्मास्मीति बोध
ते अतः स पुरुषः साक्षी ब्रह्मात्मैकधिया विलं ७ स विलासम
हामोहं धत्तामोक्षायकल्पते अनात्मन्यात्मताध्यासाद्बंधस्त
त्रैव कल्पितः ८ न विहैतैकविज्ञानात्मकत्वस्योपचर्यते वस्त
तो बंधमोक्षादि नास्त्येवाद्वैतवस्तुनि ९ स्वाभाविकत्वे बंधस्य
मुक्तिर्नस्यात्ततो विभोः न स्वभावविपर्यासः प्रामाण्यं नो श्रुते
रपि १० तस्माद्बंधस्य मिथ्यात्वं तदुक्तं वार्तिके स्फुटं आत्माकर्त्रा
दिरूपश्चेन्माकांक्षीस्तर्हि मुक्ततां ११ नहि स्वभावो भावानां
व्यावर्तेतौष्ण्यवद्रवेः मिथ्याज्ञानप्रसक्तोऽयं बंधो ध्यस्तश्चिदात्मनि
सम्यगद्वैतबोधेन तन्निवृत्त्यास्य मुक्तता स्वप्रकाशपरानंद
रूपत्वेनैव पुरुषः १३ इत्याद्यानेन नरहरिणा बोधितः अथमः सर्वतः श्रेष्ठो द्वैतास्पृष्टश्चिदद्वयः
वस्तुरूपत्वं पुरुषर्षभ पुरुषर्षभः १४ प्रज्ञात्वेनाद्वैवि
भोः १५ ॥ १५ ॥ प्रोचसीत्येव तात्पर्यं गम्यते श्रीहरे

नीलकंठी टीका ॥

तितिक्षाफलमस्पष्टमेवेत्याह यं हीति एते मात्रास्पर्शाः प्राकृ
त्यांतरीत्या त्रिविधा अपि यं जाग्रति स्वप्ने सेअज्ञानसमाधौ वा न
व्यथयंति स्वाम्यान्नप्रच्यावयंति पुरुषं पूर्णं अपापञ्च वसतीति पुरुष
हं पुरुषं कर्मेंद्रियाणि वाक्पंचत तथा पराणि ज्ञानेंद्रियाणि मन
प्राणादिवत प्रयं च प्राणादि पंचकं मथो वियदादिकं च कामश्च कर्म
मनसः पुनरष्टमी पुरीति प्रसिद्धाः यद्वा स्थूलसूक्ष्मोपाधिमयी पु
वश्मनासामंतर्भावादष्टपुरीति तं पुरवशाः तेन कारणोपाधेरपि
स्वात्मनो विविक्तत्वंदर्शितं पुरुषर्षभेति त्वमप्येतदनुभवितुं यो
ग्योऽसि सर्वपुरुषश्रेष्ठत्वादिति सूचयति उपाधित्रयस्यापि माटेवस

दुःखाय

मेदुःखसुखेयस्यतं नहिसमाधिस्थस्यसुखायवाशीतोष्णस्पर्शो
भवतइतियुक्तमस्यसमदुःखसुखत्वं धीरंध्यायिनंयोगिनंनव्य
थयंतिसोऽमृतत्वायमोक्षायकल्पतेयोग्योभवति ॥ १५ ॥

आनंदी टीका

तत्सहनप्रकारमेवाह अमृतत्वायमोक्षायकल्पतेसमर्थःस्या
दित्यर्थः १५ ॥

रामकंठी टी॰

यंपुरुषंपुरुषलक्षणंज्ञानेकृतानानिर्विकल्पसंज्ञैकृतयाधुवस्व
वस्थायोवर्तमानमतएवधीरंपरिज्ञातसदसत्पदार्थमतएवच
समदुःखसुखं समेममनोबुद्धयात्वमोत्रैणैकेनरूपेणस्पृश्यमानेन चे
लेपदुःखसुखेयस्यतथाविधंघटादिवदेहंपत्वमात्रविशिष्टरूपः
सावादिभिरजरउपजनितविकारैःसतमेतेजन्मविनाशधर्मयो
गादनित्याःसुखितोहमित्यादिविपर्ययप्रत्ययहेतवःस्पर्शाशब्दा
भिहिताविषयाःशब्दादयोनव्यथयंतिचालयंति नहिविकार
हेकैकस्वभावात्सत्यादात्मनोनप्रच्यावयंति सोऽमृतत्वायपर
मार्थसत्यपरमात्मसमापत्तिवशादविनाशित्वायकल्पतेसमर्थ
नेश्वक्षोभवतीत्यर्थः [illegible]
[illegible]
[illegible] १५ ॥

यतेमात्रास्पर्शायंपुरुषं धीरंतत्त्वज्ञं तथासम दुःखसुखं सुखदुःखे प्राप्तेहर्षविषादरहितं

लासिकी टीका

स्वात्मपरामर्शान्यायेनतत्सहनस्यमहाफलित्वमित्याह यमिति [illegible]
नव्यथयंतिप्रात्मदर्शनात्रप्रच्यावयंति [illegible] धारा अमृतत्वाय
[illegible] सएवविधोज्ञानाधिकृतोमोक्षाय
तत्त्वे नेसमर्थोभवति ॥ १५ ॥

पंचोली टीका

तत्सतीकारप्रयत्नादपितत्सहनमेवयुक्तंयतःतत्सहनेनिरति
शयफलमित्याह यंहीति हेपुरुषर्षभहियस्मादेतेशीतोष्णा
दयोविषयाःइंद्रियाणिचयं आत्मदर्शिनंसमदुःखसुखंसमसु
खदुःखंयस्यसमेसुखदुःखेप्राप्तेहर्षविषादरहितंधीरंधीमंते
पुरुषंनव्यथयंति नचालयंतितज्ज्ञानीदंडसहिष्णुःअमृतत्वा

यमोक्षायकल्पते समर्थोभवति १५ ॥

रणवीरसमिद्धोयिनी ॥

धीराणां विषयसंबंधसहनफलमाह यंहीति एतेस्वो
काइंद्रियार्थसन्निकर्षाउष्णस्पर्शोकष्ठलं दनक्षणशालिनं धीरं
येधैर्यगुणशालिनमतएव समदुःखसुखं सुखदुःखे अप्रतपे
वप्रवर्तमाने नव्यथयंति नकंपयंति स्वेदादर्जनकतयाधर्मे
धर्मतत्त्वहेत्वर्थस्थापनेन वस्वरूपेशितस्वधर्मेकर्तव्यतानिश्चयः
यान्नव्यावर्तयति सः पुमानमृतत्वाय अविद्यमानेऽमृतत्वं मरण
मत्स्यधर्मोयस्य सोऽमृतो मरणसंदेहेव देहपतनात दर्थंकल्पते यो
याविततयोर्योग्यासंस्थांमृतत्वमरणादिति भावः अथवाऽहे यावित
वितमन्नादिकं भक्ष्यंवनाश्यतिमृतेऽइतिकोयमाहविद्यमानेऽमृतं
मृतत्वेऽत्रासमावरभि विताद्भिमोविनवितायभोक्तानतब
नयेदृष्विवीनत्यलाभादितिभावः अथवामृतत्वायमोक्षाय
वकल्पतेऽइति १५ ॥

मधुभाव

यंहीति यमेतेमात्रास्पर्शानव्यथयंति पुदिघायमेवसंतं प्र
तीरसंबंधाभावे सर्वेषामपि व्यथाभावात्तुकरुषमिति वि
शेषणं कथंनव्यथयति समदुःखसुखत्वात् तत्कथम
धैर्यताः नित्यआत्मेत्युक्तम् किमात्मेवनित्यः अहोस्वि
न्यदपि अन्यदपि नास्तिकिमिति आह १५

भाषा अनुवाद

जिस हेतुसे उपाय अवलम्बन करि शीत उष्ण वारन करने से उनका सहना ही उचितहै उसमें बड़ा फलहै यह कहतेहैं कि हे पुरुष श्रेष्ठ अर्जुन जिन धीर पुरुषोंका सुख दुःख समान भाव अर्थात् शीत उष्णमें क्लेश नहीं होता सोई विक्षेप रहित पुरुष धर्म ज्ञानके द्वारा मोक्ष प्राप्ति के अधिकारी है १५ ॥

दोहा

पीड़ै नहि जिह पुरुषकों यह विषये नरश्रेष्ठ समसुख सुख दुःख धीरको सोहैं मुक्त वरिष्ठ ॥१५॥

नासतोविद्यतेभावो नाभावोविद्यतेसतः उ
भयोरपिदृष्टोऽन्त स्त्वनयोस्तत्त्वदर्शिभिः १६

शांकरभाष्यं

इतश्च शोकमोहावकृत्वा शीतोष्णादिसहनंयुक्तंयस्मात् नास
तइति नासतोऽविद्यमानस्यशीतोष्णादेः सकारणस्यनविद्यते
नास्तिभावोभवनमस्तिता नहि शीतोष्णादिसकारणंप्रमाणै
र्निरूप्यमाणंवस्तुसम्भवति विकारोहिसः विकारश्चव्यभिचर
ति यथाघटादिसंस्थानंचक्षुषानिरूप्यमाणंमृद्व्यतिरेकेणानुप
लब्धेरसत्तथासर्वोविकारः कारणव्यतिरेकेणानुपलब्धेरसज्ज
न्मप्रध्वंसाभ्यां प्रागूर्ध्वंचानुपलब्धेः कार्यस्य घटादेर्मृदादिका
रणस्यतत्कारणस्यच तत्कारणव्यतिरेकेणानुपलब्धेरसत्त्वं
तदसत्त्वेसर्वाभावप्रसंगइतिचेन्नसर्वत्रबुद्धिद्वयोपलब्धेःस
द्बुद्धिःसद्बुद्धिरिति यद्विषयाबुद्धिर्नव्यभिचरति तत्सत् यद्विष
याव्यभिचरति तदसत् इति सदसद्विभागेबुद्धितंत्रेस्थितेसर्वं
त्रद्वेबुद्धीसर्वैरुपलभ्येते समानाधिकरणेननीलोत्पलवत्सन्
घटःसन् पटःसन् हस्तीत्येवंसर्वत्रतयोर्बुद्ध्योर्घटादिबुद्धिर्व्य
भिचरति तथाचदर्शितं नतुसद्बुद्धिस्तस्मात् घटादिबुद्धिवि
षयोऽसन्व्यभिचारात् नतुसद्बुद्धिविषयोऽव्यभिचारात् घटे
विनष्टेघटबुद्धौव्यभिचारन्त्यांसद्बुद्धिरपिव्यभिचरतीति चेत्न
पटादावपि सद्बुद्धिदर्शनात् विशेषविषयैवसासद्बुद्धिरतो
पिनविनश्यति यथसद्बुद्धिवत् घटबुद्धिरपि घटान्तरेदृश्य
तइतिचेन्नपटादावदर्शनात् सद्बुद्धिरपिनष्टेघटेनदृश्यतइ
तिचेत्ननविशेष्याभावात् सद्बुद्धिःविशेषणविषयासतीविशे
ष्याभावेविशेषणानुपपत्तौ किंविषयास्यान्नतुपुनःसद्बुद्धि
र्विषयाभावात् एकाधिकरणत्वंघटादिविशेष्याभावेनयुक्तं
इतिचेत् नसदिदमुदकमिति मरीच्यादावन्यतराभावेपिसामा

गी॰
टी॰
द्वि॰

104

नाधिकरणपर्यवसानात् तस्माद्देहादेर्द्वन्द्वस्य च सकारणस्यासतो
न विद्यते भाव इति तथा सतश्चात्मनः अभावोऽविद्यमानता न
विद्यते सर्वत्राव्यभिचारादित्यवोचाम एवमात्मानात्मनोः सदस
तोरुभयोरपि दृष्टः उपलब्धोऽन्तो निर्णयः सत्सदेवासदसदेवेति
व अनयोर्यथोक्तयोस्तत्त्वदर्शिभिः तदिति सर्वनाम सर्वं च ब्र
ह्मतस्य नाम तदिति तद्भावस्तत्त्वं ब्रह्मणो याथात्म्यं तद्द्रष्टुं शीलं
येषां ते तत्त्वदर्शिनस्तैस्तत्त्वदर्शिभिस्त्वमपि तत्त्वदर्शिनां दृ
ष्टिमाश्रित्य शोकं मोहं च हित्वा शीतोष्णादीनि नियतानियत
रूपाणि द्वन्द्वानि विकारोऽयमसदेव मरीचिजलवन्मिथ्यावभा
सत इति मनसि निश्चित्य तितिक्षस्वेत्यभिप्रायः ॥ १६ ॥

आनंदगिरिकृतटीका ॥

अधिकारिविशेषणे तितिक्षुत्वे हेत्वन्तरपरत्वेनोत्तरश्लोकमवता
रयति इतश्चेति इतःशब्दार्थमेव स्फुटयति यस्मादिति यतः शी
तादेः क्लेशादिहेतोरनात्मनो नास्ति वस्तुत्वं वस्तुनश्चात्मनो
विकारत्वेनानेकरूपत्वं अतोऽनुगतो विशेषणे तितिक्षुत्वं युक्त
मित्याह नेत्यादिना कार्यस्यासत्त्वेऽपि कारणस्य सत्त्वेनात्यन्ता
त्वासिद्धिरित्याशंक्य विशिनष्टि सकारणस्येति नासत इत्य
हाय पुनर्नकारानुकर्षणमन्वयार्थं असतः शून्यस्यास्तित्वप्र
संगाभावादसतः प्रतिषेधप्रसक्तिरित्याशंक्याह नहीति
विमतमनात्मिकमप्रामाणिकत्वात् रज्जुसर्पवत् नहि यस्मिन्
हकस्य प्रत्यगात्मनोऽप्रामाणिकत्वादित्याशंक्याह नहीति
रूपत्वादतोऽनिर्वाच्यं द्वैतमित्यर्थः कथं पुनरस्य द्वैतादिविषय
स्य शीतोष्णादिद्वैतस्य दुर्निरूपत्वेनानिर्वाच्यत्वं तत्राह विकार
हीति ततश्च विमतं मिथ्या आगमापायित्वात् सम्प्रतिपन्नवदि
ति फलितमाह विकारश्चेति वाचारम्भणश्रुतेः द्वैतमिथ्यात्वं
प्रत्यगात्मकं तत्त्वदर्शित्वं च कारणः किंच कार्यकारणाद्भिन्नमभि
न्नमेव निर्विकल्प्यमिद्धं दूषयति यद्यपि निरूप्यमाणमेतत्सर्वं

श्चेति शेषः विमतं कारणान्नतत्त्वतोभिद्यते कार्यत्वाद्घटवदित्यः
र्थः इतोपि कारणाद्भेदेन नास्ति कार्यं आदावन्ते च यन्नास्ति वर्तमा
नेपि तत्तथेति न्यायादित्याह जन्मेति यदि कार्यं कारणादभिन्नं
तदा तस्य भेदेनासत्त्वे पूर्वस्मादविशेषः नाशात्मनावस्थानेन
नयुक्तं तस्यापि कारणव्यतिरेकेणाभावात् कार्यकारणवि
भागविशिष्टे वस्तुनि कार्यकारणपरम्पराया विश्रमत्वादित्यभि
प्रेत्याह स्वदादीति कार्यकारणविभागविहीनं वस्त्वेव नास्ती
तिमन्वानश्चोदयति तदसत्त्वइति अनुवृत्तव्यावृत्तबुद्धिद्वयद
र्शनादनुवृत्तेश्च व्यावृत्तानां कल्पितत्वादकल्पितं सर्वभेदक
ल्पनाधिष्ठानमकार्यकारणं वस्तु सिध्यतीति परिहरति न सर्वे
त्रेति सम्प्रतिसतो वस्तुत्वे प्रमाणमनुमानमुपन्यस्यति यद्विष
येति यद्व्यावृत्तेष्वनुवृत्तं तत्तमर्थसत् यथा सर्पधारादिष्वनुग
तो रज्ज्वादिरिदमंशः विमतं सत्यमव्यभिचारित्वात् सम्प्रतिपन्न
वदित्यर्थः व्यावृत्तस्य विकल्पितत्वे प्रमाणमाह यद्विषयेत्या
दिना यद्व्यावृत्तं तन्मिथ्या यथा सर्पधारादि विमतं मिथ्याव्यभि
चारित्वात् सम्प्रतिपन्नवदित्यर्थः इत्यनुमानद्वयमनुसृत्य स
तोऽकल्पितत्वं असतश्च कल्पितत्वं स्थितमिति शेषः ननु ने
दमनुमानद्वयमुपपद्यते समस्तद्वैतवैतथ्यवादिनो विभागा
भावादनुमानादिव्यवहारानुपपत्तेस्तत्राह सदसदिति उक्ते
विभागे बुद्धिद्वयाधीने स्थिते सत्यनुमानादिव्यवहारो निर्वह
ति प्रातिभासिकविभागेन वियोगात् परमार्थस्यैव तद्वत्त्वे
केवलव्यतिरेकाभावादित्यर्थः अतः सदसद्विभागस्य बुद्धिद्व
याधीनत्वे बुद्धिविभागस्यापि तदाभावात्तत्राह सर्वत्रेति व्यव
हारभूमिः समस्यर्थः बुद्धिविभागस्यापि कल्पितस्यैव बाध्यवि
भागप्रतिभाससहेतुनेति भावः बुद्धिद्वयमनुसृत्य सदसद्विभा
गे सतः सामान्यरूपतया विशेषाकांतां सामान्यविशेषद्वे व
स्तुनी वस्तुभूते स्यातामिति चेत्तत्राह समानाधिकरण इति ।

या

गी॰
टी॰
द्वि॰

पटयोः सामानाधिकरण्यं बुद्ध्योरुपचर्यते सोयमिति सामाना-
धिकरण्यवद्घटः सन् इत्यादि सामानाधिकरण्यमेकवस्तुनिष्ठं
वस्तुभेदे घटपटयोरिव न तद्योगादित्यर्थः नीलमुत्पलमितिव-
द्धर्मधर्मिविषयतया सामानाधिकरण्यस्य स्वच्छत्वान्न वस्त्वैक्य-
विषयत्वमिति चेत्तत्राह ननीलेति नहि सामान्यविशेषयोर्भे-
देऽभेदे च तद्भावो भेदाभेदौ च विरुद्धावतो जातिशुक्लयोः सामाना-
धिकरण्यं नीलोत्पलयोरिव न गौणं किन्तु ब्राह्मणमनुष्यत्वैक-
ल्पितमित्येकनिष्ठमित्यर्थः सामान्यविशेषयोरुक्तन्यायं गुण-
गुणादावपि दिशत्येवमिति तुल्योहि तत्रापि विकल्पदोषा इ-
तिभावः सामानाधिकरण्यानुपपत्त्या द्वे वस्तुनी सामान्यविशे-
षाविति पक्षं प्रतिक्षिप्य विशेषावेव वस्तुनीति पक्षं प्रतिक्षिप-
तयोरिति बुद्धिव्यभिचाराद्बाध्यव्यभिचारेपि कथं व्यावृत्तानां वि-
शेषाणामवस्तुत्वमित्याशंक्याह तथाचेति विकारोहि सदु-
दाविति शेषः नैवैकं वस्तु सामान्यविशेषात्मकमेकस्य
पविरोधादित्यभिप्रेत्य सामान्यमेकमेव वस्तु तदुक्तेरव्या-
बाधात् बाध्यस्यापि सतस्तथात्वादित्याह नन्विति व्यभि-
तिपूर्वेण सम्बन्धः विशेषाणां व्यभिचारित्वमतस्त्वाव्यभिचा-
फलितमुपसंहरति तस्मादिति असत्त्वकल्पितत्व तच्छू-
मेवस्फोरयति व्यभिचारादिति सद्बुद्धिविषयस्य सतोऽकल्पि-
तत्वं तच्छेषोपात्तमेवहेतुमाह अव्यभिचारादिति सद्बुद्धि-
भिचारद्वाराबाध्यस्यापि व्यभिचारात्तदव्यभिचारित्वहेतोरसि-
रितिशंकते घटे विनष्ट इति सद्बुद्धेर्घटमात्रबुद्धिवद्घटवि-
त्वाभावाच्च घटनाशे व्यभिचारोऽस्ति इति परिहरति न पटादि-
ति सद्बुद्धेर्घटविषयत्वे निरालम्बत्वायोगात् विषयाभावे व्यभि-
क्यमित्याशंक्याह विशेषणेति सतोऽकल्पितत्वहेतोर्व्यभि-
चारत्वस्यासिद्धिमुद्धृत्य विशेषाणां कल्पितत्वहेतोर्व्यभिचारि-
त्वस्यासिद्धिं शंकते नसदिति यथा सद्बुद्धिर्घटे नष्टे पटादौ इत्य

स्वव्यभिचारिणीत्यव्यभिचारः सतो दर्शितस्तथा घटबुद्धिरपि
घटे नष्टे घटान्तरे दृष्टत्वाद्व्यभिचारात् घटे व्यभिचारासिद्धेर्वि
शेषान्तरेपि कल्पितत्वहेतोः व्यभिचारो न सिध्यतीत्यर्थः घट
बुद्धेर्घटान्तरे दृष्टत्वेपि पटादावदृष्टत्वेन व्यभिचारात् पटा
दिविशेषेष्वपि व्यभिचारित्वसिद्धिरित्युत्तरमाह न पटादावि
ति विशेषाणामेवं व्यभिचारित्वे सतोपि तदुपपत्तेर्व्यभिचा
रित्वहेत्वसिद्धिर्न तावदस्यमिति शंकते सद्बुद्धिरिति घटा
दिनाशदेशे तदुपरक्ताकारेण सत्वाभानेपि नासत्वं घटाद्य
भावाधिष्ठानतया भानादित्याह न विशेष्येति यथा सर्वग
ता जातिरित्यत्र खण्डमुण्डादिव्यक्त्यभावदेशे गोत्वं व्यञ्जका
भावान्न व्यज्यते न गोत्वाभावात् तथा सत्वमपि घटादिना
शव्यञ्जकाभावान्न भाति न स्वरूपाभावादित्युक्तमेव प्रपञ्च
यति सदित्यादिना सप्रतियोगिकविशेषणव्यभिचारेपि स्व
रूपाभावादिव्यभिचाराद्युक्तं सतः सत्यत्वमिति भावः द्वयोः
सतोरेव विशेषणविशेष्यत्वदर्शनात् घटसतोरपि विशेषण
विशेष्यत्वे द्वयोः सत्त्वध्रौव्यात् घटादिविकल्पितत्वानुमाने सा
मानाधिकरण्यधीबाधितमिति चोदयति एकेति अनुभवम
नुरुध्य बाधितविषयत्वमुक्तानुमानस्य निरस्यति नेत्यादि
ना घटादेः सतिकल्पितत्वानुमानस्य दोषराहित्यं फलितमु
पसंहरति तस्मादिति प्रथमपादव्याख्यानं परिसमाप्तेविति
विवृ नन्वेवं व्याख्यानं भाष्यकाराभिप्रेतं सर्वद्वैतशून्यत्व
विवक्षायां शास्त्रतद्भाष्यविरोधात् केनापि पुनर्दुर्विदग्धेन
स्वमनीषिकयोत्प्रेक्षितमेतदिति चेन्मैवं किमिदं द्वैतप्रपंच
शून्यत्वं किं तुच्छत्वं किं सद्विलक्षणत्वं नाद्योऽनभ्युपगमात्
द्वितीयानभ्युपगमे तु नैवेव शास्त्रविरोधो भाष्यविरोधश्च सा
द्धि शास्त्रतद्भाष्ये च द्वैतस्य सत्यत्वानधिकरणत्वसाधनेनाऽ
नृतत्वे पर्यवसितमिति त्रैविध्यद्वैतस्तत्र तत्र प्रतिष्ठापि

गी॰
टी॰
द्वि॰

१०६

ते तथाच प्रत्तेपाशंकां सम्प्रदायपरिचयाभावादिति द्रष्टव्यं प्र
नात्मजातस्य कल्पितत्वेनावस्तुत्वप्रतिपादनपरतया प्रथम
पादं व्याख्याय द्वितीयपादमात्मनः सर्वकल्पनाधिष्ठानस्याक
ल्पितत्वेन वस्तुत्वप्रमादनपरतया व्याकरोतीति तथेति नन्वा
त्मनः सदात्मना विशेषेषु विनाशिषु तदुपरक्तस्य विनाशः स्या
दित्याशंक्याविशिष्टनाशेऽपि स्वरूपनाशस्योक्तत्वान्मैवमित्या
ह सर्वमिति ननु कदाचित्सदेव पुनः सत्वमापद्यते प्रागस
तो घटस्य जन्मना सत्वाभ्युपगमात् सच्च कदाचिदसत्वं प्रति
पद्यते स्थितिकाले सतो घटस्य पुनर्नाशेनासत्वाङ्गीकारादेवं
सदसतोरव्यवस्थितत्वाविशेषादुभयोरपि हेयत्वमुपादेयत्वं
म॰ वा तुल्यं स्यादिति तत्राह एवमिति तत्राहोहष्टशाद्वेन सम
ध्यमानो दृष्टिं व्यथयति नहि प्रागसतो घटस्य सत्वमस प्र
स्थिते सत्वप्राप्तिविरोधादसत्वनिवृत्तिश्च सत्वप्राप्त्या चेत्
प्रमितेरनाश्रयत्वमनोरथेनैव सत्वापत्तिमसत्वनिवृत्ताव
त्वमनवकाशि भवेत् एतेन सतोऽसत्वापत्तिरपि प्रतिनीतेति
भावः कथं तर्हि सतोऽसत्वमसतश्च सत्वं प्रतिभाति इत्याशं
त्रै॰ क्य तत्तदर्शनाभावादित्याह तत्वेति तस्य भावस्तत्वं न च तत्
हेन परामर्शयोग्यं किंचिदस्ति प्रकृते प्रतिनियतमित्याशं
व्याचष्टे नहीत्यादिना तत्र सदसतोरन्यथात्वे केचित्प्रति
शंके केचित् तयोरुक्तनिर्णयमनुरुन्ध्य तथात्वमेवाभिग
कि तत्र केषां मतमेषितव्यमिति तत्राह त्वमपीति ॥ १६ ॥

स्वामिकृतटीका ॥

ननु तथापि शीतोष्णादिकमतिदुःसहं कथं सोढव्यमतं तत
त्सहने च कदाचिदात्मनाशस्यापि संभवादित्याशंक्य तत्त्ववि
धर्म॰ चारतः सर्वं सोढुं शक्यमित्याशयेनाह नासत इति प्रसत्वात्
[illegible]नाम्नाऽसतो अविद्यमानस्य शीतोष्णादेरात्मनि भावः सत्ता
न विद्यते तथा सतः सत्स्वभावस्यात्मनः प्रभावो विनाशो ना

विद्यते एवमुभयोः सदसतोरन्तो निर्णयो दृष्टः कैः तत्त्वदर्शि
भिर्वस्तुयाथात्म्यविद्भिः एवंभूतविवेकेन सहस्वेत्यर्थः १६ ॥

पिशाचभाष्यटी.

ननु शोकमोहावकृत्वा शीतोष्णादिसहनं यस्मादुक्तं नासत
इति असतः अविद्यमानस्य रज्जुसर्पवत् दृष्टनष्टस्वभावस्यज्ञा
नतः भावः सत्ता न विद्यते तथा परमार्थस्य सतः आत्मनः अभा
वः अविद्यमानता न विद्यते सर्वत्राव्यभिचारात् अनयोः सदस तोस्तत्त्वं विनिश्चित्य
मोहं त्यक्त्वा शीतोष्णादीन्तितिक्षस्वेत्यभिप्रायः १६ ॥

रामानुजभाष्यम्टी.

आत्मनो नित्यत्वं देहानां स्वाभाविकं नाशित्वम् शोकनिमित्तम्
न भवतीत्युक्तं गतासूनगतासूंश्च नानुशोचन्ति पंडिता इति तदुपपादयितु
मारभते नासत इति असतो देहस्य सद्भावो न विद्यते सतश्चात्मनो
असद्भावः उभयोर्देहात्मनोरुपलभ्यमानयोर्यथोपलब्धितत्त्व
दर्शिभिरन्तो दृष्टः निर्णयान्तत्वान्निरूपणस्य निर्णय इहान्तशब्दे
नोच्यते देहस्यासद्रूपत्वं नो सत्त्वमेव स्वरूपं आत्मनस्तु न तस्य सत्त्व
असद्रूपमिति निर्णयो दृष्ट इत्यर्थः विनाशस्वभावो ह्यसत्त्वं
अविनाशस्वभावः सत्त्वं यथोक्तं भगवता पराशरेण तस्मिन्न वि
न्यस्तेति किंचित्क्वचित्कदाचिद्द्विज वस्तुजातं ज्ञानं यथा स
त्यमसत्यमन्यत् अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते तत्तु ना
शि न संदेहो नाशिद्रव्योपपादितं यत्तु कालान्तरेणापि नान्य
संज्ञामुपैति वै परिणामादिसंभूतं तद्वस्तु नृप तच्च किमिति
अन्तवन्त इमे देहा अविनाशि तु तद्विद्धीत्युच्यते तदेव सत्त्वा
सत्त्वव्यपदेशहेतुरिति गम्यते अत्र तु सत्कार्यवादस्यासंगत
त्वात् न तत्परोयं श्लोकः देहात्मस्वभावाज्ञानमोहितस्य तन्मो
हशान्तये ह्युभयोर्नाशित्वानाशित्वरूपविवेक एव वक्तव्यः थिद्य^
स एव अविनाशि तु तद्विद्धि अन्तवन्त इमे देहा इत्यनन्तरमुपपादित इ
ति यथोक्त एवार्थः १६ ॥

अभिनवगुप्तकृतटीका ॥

गी॰
टी॰
द्वि॰
ति॰

नचयतएवागमापायिनएतेसर्वेदेशविशेषात्ततएवशोचंते
मैवं तथाहि कोयमागमोनाम उत्पत्तिरितिचेत् सापिकाऽ
सतआत्मलाभःसाइतित्वमत असत्स्वभावताहिनिःस्वभाव
तानिरात्मता निरात्माचस्वभावःकथंसस्वभावीकर्तुंशक्यः
अनीलंहिननीलीकर्तुंशक्यंस्वभावोनरापनेतुंइष्टत्वात् त
थाचशास्त्रं नहिस्वभावोभावानांव्यावर्ततेऽप्ववद्वेति
अथसतएवात्मलाभउत्पत्तिः नदालब्धात्मनोस्यजातव्यम
वाप्तित्वैतेवत्यागमेकाशोचाता एवमपायोपिसतोस
तीयत्तणेसावसत्स्वभावस्यापिकथमसत्तास्वभावः
कश्चिद्भावःस्यात् स्वभावस्यात्यागात् अथपिनर्थस्यादिति
नाशःक्रियते सयुदिव्यतिरिक्तोभावस्यकिंहतं नष्टरूप
तितिचेत् मानामदर्शिभावोनत्वन्यथाभूतःपटोहतइव
व्यतिरिक्तस्तुनासाविन्तुके तेदेतन्महिपाह अथच
वेतेनेदमाह असतोनित्यविनाशिनःशरीरस्यनभावः
वर्तमवस्थाभिःपरिणामित्वात् नित्यसतश्चपरमात्म
क्लिकदाचिद्धिनाशोऽपरिणामधर्मत्वात् तथाचवेदः
नाशीवाअरेऽयमात्मानुच्छित्तिधर्मेति अनयोःसदस
प्रतिष्ठापदंयत्रानयोर्विश्रांतिः १६ ॥

परमार्थप्रपाटी ॥

अथहितीयोपायमाह नासतइति असतःशुक्तिकारजत
दसहूपस्यदृश्यमात्रस्यभावः वर्तमानत्वंवक्तुंनशक्यते
नशक्यते एवमसत्यस्यात्मनःअभावःअवर्तमानत्वंचव
सेहष्ट: अंबैतहुक्तंभवतियत्रोनरतणेवापोहरूपते तद
कल्पवपदेशं तथायत्सर्वदाप्यवाधितंतत्सच्छब्दवपदेश
अतोन्यदतोमितिप्रकृतेः तदुक्तमध्यात्मसारे यद्वन्न
वभातिमरीचिकांभस्त्रांमेनिधानमपिरज्जुभुजंगमतुल्यं

लाणवधिसुखस्यवधीहतद्बुद्धिस्थंविभातितदपिअवेदेति
सत्यं सर्वप्रपंचविलयावसरेऽस्मोपलब्धाणवापुत्तमतंवि
दिहालिनूनं अर्थप्रतीतिवशतोपिचजागरादौतस्मात्स
दित्यभिहितं वस्तु चित्स्वरूपमिति एवमवस्थात्रयेप्यबा
धितसत्यंब्रह्मणिनिविष्टचित्तानांतत्त्वदर्शिनामसद्रूपशी
तोष्णादिद्वंद्वदुःखमसहनेकियानायासः यथास्वप्नेसर्पव्या
घ्रादृष्टस्यजागरेतत्प्रतीकारासंभवादित्यर्थः १६ ॥

वनमाली टीका ॥

यदुक्तमात्मनोनित्यत्वंदेहानामनित्यत्वंवाशोच्यानित्यादि
नातदुपपादयति नासतइति असतः परिणामिनोदेहस्यभा
वोपरिणामित्वंनविद्यते सतोपरिणामिनआत्मनोभावःप
रिणामित्वंचनविद्यते अनयोरुभयोर्देहात्मनोरंतस्तत्त्वद
र्शिभिर्दृष्टः निरूपणस्यनिर्णयांतत्वान्निर्णयएवांतःशब्दे
नोक्तः असतोदेहस्यासत्वमेवसतआत्मनःसत्वमेवस्वरू
पमितिनिर्णयोदृष्टइत्यर्थः अनाशीपरमार्थोसौ आज्ञैरभ्यु
पगम्यते यत्तुकालांतरेणापिनान्यसंज्ञामुपैतिवैपरिणा
मादिसंभूतिंतद्वस्तुनृपतच्चकिमितिविष्णुवाक्यैः यद्वास
दसच्छब्दोसत्कर्मासत्कर्मपरोप्रशस्तेकर्मणितथासच्छ
ब्दः पार्थयुज्यते अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत् ।
असदित्युच्यतेपार्थेत्यादिवक्ष्यमाणत्वात् तथासतोदुष्ट
कर्मणःसकाशात्भावःसुखंनविद्यते तथासतःसुकर्मणो
दुःखादितोभावोदुःखंनविद्यते अनयोरुभयोःसदसत्कर्म
णोःसुखदुःखकारणत्वरूपोंतोनिर्णयस्तत्त्वदर्शिभिर्दृष्ट
वृंदंवत्तत्प्रियस्यप्रशस्ततरं अतःपापमेवाश्रयेदस्मानिति
वाक्यंनहीतिभावः भवत्यस्मिंस्तत्प्रयोजनिकेच्छेतिभावः
भावोनभवतिताहृग्गिच्छायस्मिन्सोभावोदुःखंयत्रसतोवि

सु

वधारितः

गी॰
टी॰
द्वि॰

चनास्ति प्रबाधित

सस्यभावः सत्वं नास्ति सद्भावात् सतो ब्रह्मणोऽसत्वं सजाती-
यविजातीयस्वगतभेदशून्यं ब्रह्मैव स्वप्रकाशरूपं सत् घटः स-
न्नित्यादौ च घटादितादात्म्यापन्नं तदेव भातीति सजातीयाज्जडा-
द्भेदः स्वगतो गुणाद्भेदो नास्ति प्रतियोगिनो भावात् तथा च श्रु-
तिः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य ऐ-
तदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति उ-
पसंहरंती उक्तभेदशून्यमेकं सत्यमाह 'वाचारंभणं विका-
रो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिर्विकारस्यानृ-
तत्वमाह सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्र-
तिष्ठा इति श्रुतिर्विकारस्य चिति कल्पितत्वमाहेति 'तद्वि-
श्वस्य सृष्ट्यादेर्जन्माद्यस्य यत इति सूत्रे यतो वा इमानि
भूतानि जायन्त इत्यादिश्रुतौ जन्माद्युक्तेरीक्षतेर्नाशब्दमि-
ति सूत्रे स ऐक्षतेति श्रुतौ चेश्वरस्येच्छापूर्वकर्तृत्वस्य लोकव-
ल्लीलाकैवल्यमिति सूत्रे आप्तकामस्य का स्पृहेति श्रुतौ च
प्रयोजनाभावेपि सृष्टेः 'वैषम्यनैर्घृण्ये न सापेक्षत्वादि-
ति सूत्रे पुण्येन पुण्यं लोकं नयतीत्यादिश्रुतौ च कर्मसापे-
क्षत्वेन वैषम्यस्य तेजोऽतस्तथा ह्याहेति सूत्रे वायोरित्यादिश्रुतौ
च तेजआदेर्वाय्वादिजन्यत्वमस्य विपर्ययेण तु क्रमोऽत उप-
पद्यते चेति सूत्रे पृथिव्यप्सु प्रलीयत इत्यादिश्रुतौ पृथिव्या-
देर्वाय्वादेर्लयस्य चोक्तेरयुक्तकल्पनापत्तेः
परिहारो युक्तौ 'किंच विकल्पनापत्तेः' नहि कल्पिते विश्वे ऐन्द्र-
उपपत्तिः नहि शुक्तिरूप्यमृषात्वे सर्वज्ञेन तत्पाल-
जालिकवत्तदुपपत्तिः प्रतारकेभ्योऽपि ज्ञानं न पालयति नैवैन्द्र-
पालकत्वाद्यभावात् एतस्मिन्नपि इन्द्रजालिकस्योत्पादक-
मतीति गुरूपदेशादिना ज्ञातमन्त्रादिप्रयोगादित्थं लोकाः श्री-
भावेपीममाश्रुपशंपन्निति हि वदन्ति स्वमायामोहं विना

वेतोस्ययदिकार्यमात्रस्यासत्वप्रतीतिःस्यात्तर्हियंतच्छत्वंश्रा
स्याद्धेनकविष्यतीत्येवंमनसिनिधायात्रश्लोकेश्रीकृष्णे
नसत्कार्यवादएवोक्तः केचिदत्रासच्छब्देनदेहादिका-
र्यस्यतच्छत्वंप्रतिपादयंतितेषामज्ञानमोहितमनोभगवदा
शयानभिज्ञानांपरिच्छिन्नबाह्यत्वस्वभावत्वादसन्नित्यादि
जल्पनमुचितमेव अन्येत्वत्रसत्कार्यवादस्यासंगतत्वाद्भ्रांत
त्वेनायंश्लोकः देहात्मस्वभावाज्ञानमोहितस्यतन्मोहशा
न्तयेस्वभयोर्नाशित्वानाशित्वरूपविवेकएववक्तव्यः स
एवगतासूनगतासूंश्चनानुशोचन्तितिप्रस्तुतः सएवश्रा
विनाशितु यंतवन्तइमेदेहाइत्यनंतरमुपपादितइतिय-
श्लोकएवार्थः इतिवदन्तितेस्माभिःप्रष्टव्याः भवद्भिर्यदुक्त
मत्रसत्कार्यवादस्यासंगतत्वं तत्कयारीत्याभगवतःपूर्वा
परोक्तिविरोधत्वेनवाग्रंथस्यप्रकरणविरोधत्वेनवाभवत्म
स्मतविरोधत्वेनवेतिविकल्प्यंनाद्यः ऊर्ध्वमूलोऽधःशाखएव
त्थोऽस्यव्ययःसनातनइतिश्रुत्यर्थरूपायाः ऊर्ध्वमूलमधःशा-
खमश्वत्थंप्राहुरव्ययमित्यादिस्मृतेर्विरोधात् असत्यमप्र
तिष्ठंतेजगदाहुरनीश्वरमित्यादिनाकार्यासद्वक्तरासुरत्व-
प्रतिपादनाच्च नापिद्वितीयः कार्यस्यसत्वमत्वापुनस्तस्या
सत्वकथनासंभवाद्भगवतस्तत्त्वोपदेशसमयेयथार्थकथ-
नेनैवचकत्वप्रसंगात् अनाप्ततमत्वप्रसंगाच्च नचदेहा-
दिकार्यस्यासत्वकथनेविनाऽर्जुनस्यमोहशान्तिः कथंभवे
दितिवाच्य असत्योपदेशेनकस्यापिमोहनिवृत्तिसंभवात्
अनुवृत्तमोहस्याभैरवसेवाद्यनवाप्यसम्मतत्वाच्च अन्यथासि
द्धानमङ्गाच्च नापितृतीयः भगवतः सर्वज्ञत्वेनचपूर्वाप
रवचनस्यविरोधलेशागन्धाभावात् नापिचतुर्थः स्वप्र-
कारितकार्यदेहादिस्वभावनिरूपणप्रकरणस्यसत्वात् न
देहात्मस्वभावाज्ञानमोहितस्यार्जुनस्यमोहशान्तयेयः

गी.
टी.
हि.

भयोर्नाशित्वानाशित्वरूपविवेकएववक्तव्यः सएवगताः
रूनगतासूंश्चेतिप्रस्तुतः सएवाविनाशितुतद्विद्धि अन्तवन्तइमेदे
हाइत्यनन्तरश्लोकद्वयेनउपपादितइतियथोक्तएवार्थइतिचेन्नश्रुप
पन्नत्वात् तथाहि देहात्मनोः स्वरूपस्यसत्यत्वज्ञानेनविना
तयोःस्वभावज्ञानेनसम्यक्तदभावेतन्मोहशान्त्यभावः गता
सुत्वागतासुत्वविनाशित्वानित्यत्वानन्तवत्त्वादयः पूर्वापर
पर्ययस्याः शास्त्रासूयिदेहात्मनोःकार्यत्वाकार्यत्वप्रतिपा
दनेनसत्कार्यवादमेवद्योतयन्ति तथाचात्रप्रयोगः यद्य
त्कार्यंतत्तद्गतासुत्वमन्यकार्यत्वात् घटादिवत् यद्यदका
र्यंतत्तदगतासुत्वमन्यकार्यत्वाभावात् यद्यत्कार्यंतत्तद्वि
नाशित्वंघटादिवत् यन्नैवंतन्नैवंचेतनवत् यद्यत्कार्यंत
तदन्तवत्त्वंयन्नैवंजीववदित्येवमनुमानसहकृतार्थद्वारा
तथाचैवसदसद्भावाभावशास्त्रप्रयोगाच्छास्त्रद्वारापिचसत्का
र्यवादस्यसंगतिरस्त्येवनत्वसत्त्वलेशागंधस्पर्शः नापिपं
चमःभवतः सत्कार्याङ्गीकारत्वेनासत्कार्याङ्गीकारात् अ
न्यथासिद्धान्तभंगात्स्मार्तमतप्रवेशाच्च नन्वस्मिन्प्रकरणे
सत्कार्यवादरूपस्यशास्त्रस्यपादाभावात्तदसंगतत्वमतेवे
त्वमन्याकलितोक्तित्वात् तथाहि नत्वेवाहमित्यस्यभाष्ये
भवद्भिर्यद्वाधितानुवृत्तेः स्वप्नेनैकत्वेनतदप्यसंगतत्वमेव
समग्रगीताशास्त्रेष्वेकतरेपिपक्षेबाधितानुवृत्तिशास्त्रस्यपा
दाभावत्वात् योदोषोस्माकंदीयतेसः युष्माकमपिस्यात् य
श्चाहगर्थविचारणइतिवचनात् नैवपर्यनुयोक्तव्य
संगतत्वमित्यलेङ्कतर्कनिरासेः १६ ॥

मधुसूदनी टी. ॥

+यत्कालतोदेशतोवस्तुतोवापरिच्छिन्नंतदसत् यथाघटा
दिजन्मविनाशशीलंप्राक्कालेनापरकालेनपरिच्छिद्यते

+ नतुभवतु१६हपैकत्वेनथापितस्यासत्यत्वतुद्दश्यरूपःसत्यएवसंसारः तथाचशीतोष्णादिदुःखं...
सतितद्भागस्यावश्यकत्वात्सत्यस्यचज्ञानाद्विनाशानुपपत्तेः कथंतितिक्षा कथंवासोस्तत्वायकल्प
इतिचेन्नकृत्स्नस्यापिद्वैतप्रपंचस्यात्मनिकल्पितत्वेननतज्ज्ञानाद्विनाशोपपत्तेः शुक्तौकल्पितरजतस्य
क्तिज्ञानेनविनाशवत् कथंपुनरात्मानात्मनोः शीतोष्णादिविशेषेशात्मवदनात्मापिसत्योनभवेत् अन
वदात्मापिमिथ्यानभवेत् उभयोस्तुल्ययोगक्षेम
त्वादित्याशंकाविशेषमाह भगवान्+

ध्वंसप्रागभावप्रतियोगित्वात् कदाचित्कं कालपरिच्छिन्नं
मित्युच्यते एवं देशपरिच्छिन्नमपि तदेव मूर्त्तत्वेन सर्वदेशावृ
त्तित्वात् कालपरिच्छिन्नस्य देशपरिच्छिन्ननियमेपि देशपरि
च्छिन्नत्वेनाभ्युपगतस्य परमाण्वादेस्तार्किकैः कालपरिच्छेदा
नभ्युपगमाद्देशपरिच्छेदोपि पृथगुक्तः सच किंचिद्देशावृत्ति
त्वंप्रत्यन्ताभावः एवं सजातीयभेदः स्वगतभेदश्चेति त्रिविधो भे
दो वस्तुपरिच्छेदः यथा वृक्षस्य वृक्षान्तरात् शिलादेः पत्रपु
ष्पादिस्वभेदः एवं वा जीवेश्वरभेदो जीवजगद्भेदो जीवपर
स्परभेदः ईश्वरजगत्भेदो जगत्परस्परभेद इति पंचविधो
वस्तुपरिच्छेदः कालदेशाऽपरिच्छिन्नस्याप्याकाशादेस्तार्कि
कैर्वस्तुपरिच्छेदाभ्युपगमात्पृथङ्निर्देशः एवं सामान्यमेतेपि
योजनीयं एतादृशस्यासतः शीतोष्णादेः कृत्स्नस्यापि प्रपंच
स्याभावः सत्तापारमार्थिकत्वस्यावश्यं न सत्ताकतादृशपरि
च्छेदशून्यत्वं न विघातेन संभवति घटत्वाघटत्वयोरिव परि
च्छिन्नत्वापरिच्छिन्नत्वयोरेकत्र विरोधात् न हि दृश्यं किंचित्
क्वचित्काले देशे वस्तुनि वा न निषिध्यते सर्वत्राननुगमात्
न वा सद्वस्तु क्वचिद्देशे काले वस्तुनि वा निषिध्यते सर्वत्रानु
गमात् तथा च सर्वत्रानुगते सद्वस्तुन्यननुगतव्यभिचारि
वस्तु कल्पितं रज्जुरिवेदं रज्ज्वानुगते व्यभिचारि सर्पधारादिकमि
ति भावः ननु व्यभिचारिणः कल्पितत्वे सद्वस्त्वपि कल्पितं
स्यात् तस्यापि तदवच्छिन्नव्यावृत्तत्वेन व्यभिचारित्वादित्यत आह नाभा
वो विद्यते सत इति सदधिकरणकभेदप्रतियोगित्वं हि वस्तु
परिच्छिन्नत्वं तच्च न तदवच्छिन्नव्याहतत्वेन तद्देशशशविषाणादेरस
त्त्वायोगात् सद्व्याममभावो निरूप्यत इति न्यायात् एकस्यैव
व्ययप्रकाशस्यानित्यस्याविभोः सतः सर्वानुस्यूतत्वेन सद्भाकि
त्वस्यानभ्युपगमात् घटः सन्नित्यादिप्रतीतेः सार्वलौकिक
त्वात् सतो घटाधिकरणकभेदप्रतियोगित्वायोगात् प्रभा॰

वः परिच्छिन्नत्वं देशतः कालतो वस्तुतो वा सतः सर्वानुस्यूत
न्मात्रस्य न विद्यते न संभवति पूर्ववद्विशेषादित्यर्थः नत्वस
न्नाम किमपि वस्तु नास्त्येव यस्य देशकालवस्तुपरिच्छेदः प्रति
षिध्यते किं तर्हि सत्त्वं नामपरं सामान्यं तदाश्रयत्वेन द्रव्यगुण
कर्मसु सद्व्यवहारः तदेकाश्रयसंबंधेन सामान्यविशेषसम
वायेषु तथा चासतः प्रागभावप्रतियोगिनो घटादेः सत्त्वं का
रणव्यापारात् सतोपि तस्याभावः कारणनाशाद्भवत्ये
वेति कथं उक्तं नासतो विद्यते भावो नाभावो विद्यते सत इ
त्येवं प्राप्तं परिहरति उभयोरपीत्यर्धेन उभयोरपि सदस
तोः सतश्चासतश्चान्तो मर्यादा नियमरूपत्वयत् सत्तत्सदेव यद
सत्तदसदेवेति दृष्टो निश्चितः श्रुतिस्मृतियुक्तिभिर्विचार
कैस्तत्त्वदर्शिभिः वस्तुयाथात्म्यदर्शनशीलैर्ब्रह्मविद्भि
र्नैव तार्किकैः अतः कुतार्किकाणां न विपर्ययानुपपत्ति
वशाद्वावधारणेपकौ न तद्रूपो नियम एव दृष्टो न त्वनेकां
पोन्यथाभाव इति तत्त्वदर्शिभिरेव दृष्टो नातत्त्वदर्शिभि
र्तिवा तथा च श्रुतिः सदेव सोम्येदमग्र आसीदेकमेवाद्वि
तीयमित्युपक्रम्यैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतके
तो इत्युपसंहरती सदेकं सजातीयविजातीयस्वगतभेदशू
न्यं सत्यं दर्शयति वाचारंभणं विकारो नामधेयं मृत्तिकेत्ये
व सत्यमित्यादिश्रुतिस्तु विकारमात्रस्य व्यभिचारिणो वाचा
रंभणत्वेनानृतत्वं दर्शयति अन्नेन सोम्य शुङ्गेनापो मूलम
न्विच्छाद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गे
न सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदा
तनाः सत्प्रतिष्ठा इति श्रुतिः सर्वेषामपि विकाराणां सति क
ल्पितत्वं दर्शयति सत्त्वं च न सामान्यं तत्र मानाभावात् पदा
र्थमात्रसाधारण्येन सत्सदिति प्रतीत्या द्रव्यगुणकर्ममात्र
वृत्तिमत्त्वस्य साधानुपपादकस्य कल्पनात् वैपरीत्यस्यापि

ववत्वात् एकरूपप्रतीतेरेकरूपविषयनिर्वाह्यत्वेन संबंध।
भेदस्य स्वरूपत्वस्य च कालिपियितमनुविनत्वात् विषयस्या
नुगमेपि प्रतीत्यनुगमे जातिमात्रोच्छेदप्रसंगात् तस्माद
केमेव सद्रूपस्वतः स्फुरणरूपं ज्ञाताज्ञातावस्थाभासकं स्व
तादात्म्याध्यासेन सर्वत्र सद्व्यवहारोपपादकं सत् घट इति
प्रतीत्या तावत्सद्ब्रह्म किंमात्राभिन्नत्वे घटे विषयीकृतं त्व।
सत्तासमवायित्वं घ्रभेदप्रतीतेर्भेदघटितसंबंधानिर्वाह्य।
त्वात् एवं द्रव्यं सद्गुणः सन्नित्यादिप्रतीत्या सर्वाभिन्नत्वं सतः
सिद्धं द्रव्यगुणादिभेदासिद्ध्या च न तेषु सत्त्वं नाम धर्मः कल्प्य
ते किं तु सति धर्मिणि द्रव्याद्यभिन्नत्वं लाघवात् न च वास्त
वं न संभवतीत्याध्यासिकमित्यन्यत् तदुक्तं वार्तिककारैः
सतो नापि न भेदः स्याद्द्रव्यत्वादेः कुतोन्यतः एकाकारा हि सं
वित्तिः सद्द्रव्यं सन्गुणोयदेत्यादि सत्तापि सतो भेदिका तस्मा
प्रसिद्धेः द्रव्यत्वादिकं तु सद्धर्मत्वात्तत्सतो भेदकमित्यर्थः अ
नपवद्घटाद्भिन्नः पट इत्यादिप्रतीतिरपि न भेदसाधिका घट
पटतद्भेदानां सद्भेदे नैक्यात् एवं यत्रैव न भेदग्रहस्तत्रैव
तद्व्यपटासमीसद्भेदप्रतीतिर्विजयते तार्किकैः कालप
दार्थस्य सर्वात्मकस्याभ्युपगमात्तेनैव सर्वव्यवहारोपपत्तौ
तदतिरिक्तपदार्थकल्पने मानाभावात्तस्यैव सर्वानुस्यूतस्य
सद्रूपेण च सर्वतादात्म्येन प्रतीत्युपपत्तेः स्फुरणस्यापि सर्वा
नुस्यूतत्वेनैकत्वान्नित्यत्वे विस्तरेणाग्रिमश्लोके वक्ष्यते तथा
तु यथा कस्मिंश्चिद्देशे काले वा घटस्य पटादेर्न देशांतरे का।
लांतरे वा घटत्वं एवं कस्मिंश्चिद्देशे काले वा घटस्यान्यत्राप
त्वेन शक्रेणापि न शक्यते संपादयितुं पदार्थस्वभावभंगा
प्रसंगात् एवं कस्मिंश्चिद्देशे काले वा घटस्याभाववाघटस्य पा
केनापि न शक्यते संपादयितुं पदार्थस्वभावभंगप्रसंगात्
एवं कस्मिंश्चिद्देशे काले वा सतो देशांतरकालांतरे वा सत्वं

ना
न्य

गी॰
टी॰
हि॰

नशक्यते संपादयितुं शुक्तिसाम्यात् अतउभयोर्नियतरूप
त्वमेव दृष्टत्वमित्यद्वैतसिद्धौ विस्तरः अतः सदेव वस्तु माया
कल्पितासन्निहितत्वाऽद्वैततत्त्वाय कल्पते सन्मात्रदृष्ट्या वृत्ति
तित्वाद्युपपद्यत इति भावः । [illegible]
विपरीत [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] १६ ॥

सदानंदी टीका ॥

नन्वस्तु प्रकृतैकत्वे
समस्तहेतोर्वस्तुत्वे तथाप्यस्य नश्वरता शीतोष्णादेः सुखं वा
धनाशने सत्यामपि । एवं कथं तितिक्षा सात्कथं वा
इत्याशंक्याह भगवान्मंगलायतने जातु स्यादात्मनः क्षयः
समस्तहेतोर्बंधरूपिणः ३ स्वाज्ञानात्कल्पितत्वेन स्वात्म
योदयात्क्षयः कल्पितस्य भुजंगस्य रज्जौ तज्ज्ञानतः क्षयः ४
दृष्टो यथा मथितस्य शीतोष्णादेस्तयोर्धिया अन्योन्यार्थं
तोयस्मात्सदात्मानात्मनो द्वयोः ५ शीतोष्णादिजगत्सर्वं
तितस्मात्सदाजगत् अन्योन्याध्यासकल्पत्वे कथमेकस्य
त्वता ६ इत्थमेव मिथ्यात्वमिति च वक्ष्ये युक्तिभिः परि
द्वेहितयहस्तदेशतः कालतोर्थतः ७ तज्जन्मनाशपूर्वी
त्वादसद्रज्जुभुजंगवत् यथा स्वाप्ने स्वप्ना सर्वं सत्त्वं भाति
मीरपते ८ तथैवं बंधशोहेन शोक विषं स्वप्ना विले नाथ
मकरादिवित्स्यात्स्वांगे भातिकं यथा ९ अतमतो विषमा
स्यशीतोष्णादेर्नेत्यालिना सहेतोर्निष्प्रमाणत्वाद्धिकार

चलत्वतः ९ घटांकुरादियत्कार्यं दृष्टं सत्कारणं हि तत् आ
काशादिश्च नः कार्यं नष्टमेवं प्रतीयते ११ असतश्चेदिदं कार्यं
सर्वं स्यादसदन्वितं असतः कारणत्वं च निरात्मत्वान्न सिद्ध्य
ति १२ अवः सत्कुरुते कार्यमयस्कांतो मणिर्यथा कारण
त्वं भवेदेवं कुर्वतोतिशयः कुतः १३ इत्येवं वार्तिके श्लोका
र्थस्य गतिरीरिता अधिष्ठानस्य सत्यत्वसिद्धेनत्वन्यसिद्धये
यथा घटादिसंस्थानं मृदो भिन्नं न चस्तुधा दृश्यते सकलं तद्व
त्सतोभिन्नं जगन्न हि १४ शीतोष्णादेः प्रपंचस्य सहेतोर्नास्ति
सत्यता अन्योन्यव्यभिचारित्वात्कल्पितत्वाच्चिदद्वये १५ अज्ञा
नज्ञापकत्वं हि प्रामाण्यं शास्त्रविन्मतं नाज्ञातत्वं प्रपंचस्या
ज्ञानकार्यस्य जाड्यतः १७ सर्वत्रानुगते सत्ये कल्पिते व्यभिचा
रिवत् विश्वं रज्जौ यथा सर्पदंडादि सन्नतत्तथा १८ सन्घटः स
न्पटोऽस्तीत्यमनुस्यूते सदद्वये न घटः पट इत्येवं व्यभिचारि प्र
कल्पिते १९ सामानाधिकरण्ये तु मिथ्यासद्वस्तुनोरपि दृष्टेनी
लनभोवारिमरीच्यादाविदं यथा २० तस्माद्देयस्य देहादेः सहे
तोर्नास्ति सत्यता तथा सतश्चिदानंदापरिच्छिन्नस्य वस्तुनः २१
अभावो सत्यता नास्ति परिच्छिन्नत्वलक्षणः सर्वत्राव्यभिचारि
त्वादनुस्यूतस्य चित्सतः २२ एवं सदसतोरात्मानात्मनोरनयो
र्द्वयोः निर्णयः सत्सदेवासदसदेवेति नान्यथा २३ दृष्टो
ऽन्तस्त्वनयोर्याथात्म्यं ब्रह्मणः सतः तत्त्वं दृष्टं सदा शीलं ये
यातितत्त्वदर्शिभिः २४ त्वमप्येवं समाश्रित्य दृष्टिं तां तत्त्वदर्शि
नां शोकमोहौ परित्यज्य तितिक्षस्वागतागतं २५ दृश्यं स्वरूप
तोऽध्यस्तं विकृते तोन्वतात्मकं संसर्गमात्रमध्यस्तमात्मनो
ऽस्मिन्ननात्मनि २६ प्रातीतिकशरीरत्वाद्दृश्यं मिथ्या जडं तत्व
स्वाध्यत्वाच्चिदात्मत्वादात्मा सत्यः स्वयंप्रभुः २७ ॥ १६ ॥

नीलकंठी टीका ॥

नचस्थितिसमाध्यादौ नत्कोपायेरात्मनः समक्षः स्वस्तत्वेपिमो

गी॰
टी॰
हि॰

112

पाधिकदशायांतमायःपिंडस्यदग्धत्वमिवतस्याङःविवर्त्तवादं उ
पाधिस्तुमूलप्रकृतेर्व्यापिकायामायायाहृप्यइतितस्यत्वस्तुननिर्मू
लोच्छेदमर्हत्यतःसोमस्तत्वायकल्पतइत्युपपन्नमित्याशंक्या
ह नासतइति प्रमात्रादेरागमापायित्वेनकादाचित्कत्वात्व
ज्वरगादिवत्असतःभावःसत्ताकालत्रयेपिनास्ति अयमर्थः
प्रमात्रादिर्मूलाज्ञानेनचिदात्मनिकल्पितः मूलाज्ञानस्यचा
त्मज्ञानेननिवृत्तौकारणाभावान्नपुनःप्रमात्राद्युद्भवोस्तीति
निष्प्रत्यूहमसत्त्वंज्ञानात्सिध्यतीति ननुप्रतीतिमात्रात्प्र
मात्रादेर्मिथ्यात्वोपगमेप्यात्मनोपिसुषुप्त्यादावप्रतीयमानत्वा
विशेषान्मिथ्यात्वमस्तु उभयोर्वासत्यत्वमस्त्वित्याशंक्याह
नाभावोविद्यतेसतइति सतस्तुनःअभावोऽसत्त्वंकदाचिद
पिनविद्यते सुषुप्त्यादावपिप्रत्युत्पन्नयोः सुखाज्ञानयोःसु
खमहमस्वाप्संनकिंचिदवेदिषमितिउत्थानेपरामर्शदर्शना
त् तदनुभवमन्तरेणतयोःपरामर्शासंभवात् अतःसतो
सत्त्वंनास्ति श्रुतिरपिसुषुप्तिकैवल्ययोःप्रमात्राद्यभावेदृशो
नित्यत्वंचाह यद्वैतन्नपश्यति पश्यन्वैतन्नपश्यति नहिद्रष्टु
र्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्वितीयमस्ति
ततोन्यद्विभक्तंयत्पश्येदिति यदिप्रमात्रादिःसत्यस्तर्हि
तोर्ध्वसमसुषुप्त्यादावदर्शनेनमात्रिध्याभावाद्वाइष्टहेत्वलोपा
द्भावकथं नाद्यःआत्मनिरुपष्टुनष्टस्वभावस्यान्यत्रसद्भावक
ल्पनायोगात् नान्त्यःउदाहृतयोःशुक्त्यैवतद्विधेयात् तस्मा
उभयोरपिसत्यत्वेनमिथ्यात्वेनवासाम्यंदुर्वचं नतुसत
काष्ठादेःक्वचिदपिदेशकालेवा
सतएवपरमाणोर्देशान्तरेऽभावोयद्यपिनास्तितथापि
वस्तुदृष्टःतत्कथमुच्यते नासतोविद्यतेभावोनाभावोविद्यते
द्यतेसतइत्याशंक्याविहरन्नुभवेननिरस्यति उभयोरपीति
ष्टोनोयाथात्म्यं यथात्म्यमनभः केभरज्ज्वरगादयोनित्यत्वा

नित्यत्वसत्यत्वासत्यत्वादिधर्मोपि तेन तया निश्चितोऽपि प्रबोधेन
बाध्यते तद्वज्जाग्रद्दृष्टोऽपि तत्वज्ञानेन बाध्यते नतु जाग्रद्द्व
मनावगत्वात्स्वप्नगत न भ्रमादौ नित्यत्वादिनिश्चयो भ्रम इति चे
त् अनादिकालप्रवृत्तप्रारब्धवीर्यसंस्कारवशात् जाग्रद्भ्र
मादावपि सभ्रम एवेति तत्वं नतु स्वरूपसदेव रजतादिकं
शुक्त्यादावध्यस्यते न त्वसनु शशशृंगादिकं, गगनादिकं तु
तद्दीर्घत्वा स्वरूपेणासदपि कथमात्मन्यध्यस्यत इति चेन्न अ
ध्यासे हि पूर्वानुभवमात्रमपेक्षते न त्वनुभूतस्य स्वरूपेण स
त्वमपि दर्पणप्रतिबिंबिते गगनेपि नैल्याध्यासदर्शनात्
न च गगने नैल्यं स्वरूपेण सत्यमस्ति अथ चान्यत्राध्यस्यते
तस्माद्भ्रमपरंपरायाः संभवात् स्वप्नदृष्टिभिरिवास्माभिरदृ
ष्टमपि सदसतोर्याथात्म्यं प्रबुद्धैर्दृष्टं शक्यमेव तथाच श्रु
तयः नेह नानास्ति किंचन अस्तीत्येवोपलब्धव्यः अतोन्य
दार्तमित्याद्याः आत्मनोऽसत्वं चात्मनश्च सत्वं प्रतिपादयंति ९
एवं सतोज्ञानेनासतो बाधात्कैवल्यं सिद्ध्यतीति भावः १६ ॥

आनंदी टीका

एतदेव प्रपंचयति असतः आगमापायिनः शीतोष्णादेः न
विद्यते न च भावः सत्ता स्थैर्येणास्ति सतः सदेकरूपस्यात्म
नो नित्यस्याभावो विनाशो नास्ति उभयोरप्यनयोः सदसतोर
न्तो मर्यादा व्यवस्था तत्वदर्शिभिः सदसतोर्याथात्म्यवेदिभिर्दृष्टो
निश्चितः अन्तशब्दोऽत्र मर्यादावाची यामान्त इतिवत् १६ ॥

+ अथोपपत्त्युपन्यासपूर्वमात्मनोवेदकेक जन्मविनाशवतस्तदभावं

रामकंठी टीका

स्वभावस्य पारमार्थिकी सत्ता न तथानात्मेयरूपस्येत्यादेश प्रतिपादयितुमाह +

इह स्वभावादेव यद्विद्यमानं वस्तु तस्यासतो भावः सत्ता नास्ति
तथैव स्वभावतः सतो नित्यस्याभावो विनाशो नास्ति एतयोः
सदसतोः प्रकाशतमसोरिवात्यन्तपरस्परविरोधात् किन्त्व
नयोर्द्वयोरपि तत्वविद्भिः साक्षात्कृतपरमार्थैरन्तो निष्ठा निश्च
यो दृष्टोऽवितथो न त्वतत्वविद्भिस्तेषामविद्याद्युतस्वभावपरमे
श्वरमायाशक्त्याऽऽवितविषयप्रत्ययतया सत्यमात्मानमप्रत्य

गी॰
टी॰
हि॰

113

वस्तुष्वनात्मवासदनित्यत्वादिनावास्तवसद्भावरहिते देहादि वस्त्विदन्तया संवेद्यमानत्वात्सत्वेन प्रतिपद्यन्ते परमार्थतस्तु सच्चिन्मात्रमात्मतत्त्वमप्रत्यभिज्ञायमानत्वादसत्वेन प्रतिपद्यन्ते [illegible] १६ ॥

तात्त्विकी टीका

अथोपपत्तिपूर्वमात्मनस्तात्त्विकीं सत्तां देहादेश्चावश्यकमभावं सामान्यतः प्रतिपादयति नेति स्वभावादेवासतो वस्तुनो भावः सत्ता नास्ति नैव तयोः सदसतोः प्रकाशतमसोरिव परस्परविरुद्धयोः स्वभावो विपर्येति ॥ १६ ॥

पंचाली टीका

तत्वविचारतोपि शोकमोहौ अकर्त्तव्यावित्याह नासत इति असतः अनात्मधर्मत्वादविद्यमानस्य शीतोष्णादेः सकारणस्याविद्यासहितस्य भावः सत्ता न विद्यते तत्त्वदर्शिभिः ब्रह्मणोयाथात्म्यदर्शनशीलैः उभयोरपि अनयोः सदसतोः आत्मानात्मनोः अन्तो निर्णयोपि दृष्टः १६ ॥

रसाविर्भाविनी

ननु यद्यपि विषयसन्निकर्षजनितशीतोष्णादि दुःखमसहनं महाफलं तथापि तदतिदुःसहं कथं सोढव्यं नत्वसहनेन कदाचिदात्मविनाशोपि संभाव्यत इत्याशंक्योपन्यासपूर्वमात्मनः पारमार्थिकीं सत्तां तथा तदाश्रयदेहादेस्तु जन्मविनाशवत्तत्त्वादभावं प्रतिपादयितुमाह नेति यत्कालतो देशतो वस्तुतो वा परिच्छिन्नं तदसत् स्वभावादेवाविद्यमानं वस्तु तस्यासतो भावः सत्ता नास्ति तथैव स्वभावतः सतो नित्यस्य कालादिभिरपरिच्छिन्नस्याभावो विनाशः परिच्छेदो नास्ति एतयोः सदसतोः प्रका

+ स्वभावतः सतो नित्यस्याभावो नास्ति

ऽ तथाच शास्त्रम् नहि स्वभावो भावानां व्यावर्तेतोष्ण्यवद्रवेरिति एतयोर्द्वयोरपि तत्त्वविद्भिर्वस्तुयथात्म्यविद्भिरन्तो निश्चयो दृष्टो विज्ञातः सोऽस्ति देवासुरसदेवेति



प्रातमसोरिवात्यंतंपरस्परविरोधइति किंतुह्णयोरप्येतयोस्त
त्वविद्भिर्वस्तुयाथात्म्यविद्भिरंतोनिश्चयोदृष्टोनिश्चितः नतु
न त्वदर्शिभिस्तेहिपरमेश्वरानुगृहीता किमोहितधियोयथार्थ
मजानंतीति अयंतत्त्वविचारणयात्मनोविनाशासंभवादेहादे
स्तत्संभवाच्चसर्वंसोढव्यमितिभावः १६॥

मधुभाष

नासतइति असतः कारणस्यसतोब्रह्मणश्चाभावोनवि
द्यते प्रकृतिःपुरुषश्चैवनित्यौकालश्चसत्तमेतिवचनात्
श्रीविष्णुपुराणे पृथिव्यादितत्त्वात्मकार्यः असतः कार
णत्वंच सदसद्रूपयाचासौ गुणमय्यागुणोविभुरितिच
श्रीभागवते असतःसदजायतेतिच अव्यक्तेश्च संप्रदायत
श्चनसिद्धमित्याह १६॥

भाषा अनुवाद

और जो कहो कि नौभी अति दुःसह शीत उष्ण कैसे कर सहै और जो बडा क्लेश करिके सहै तो कदाचित आत्मा का नाश होसकताहै यह शंका कवि कहतेहै कि विचार से तो वे सहेजाय सकतेहै जैसे अति तुच्छ और अनात्म धर्म अर्थात् शरीरके धर्म जो शीत उष्ण प्रभृति इनका आत्मासे कछु सम्बन्ध नहीहै और सत्वभाव जो आत्मा इसका कभू विनाश होता नही यथार्थदर्शी तत्वज्ञानी इसी प्रकारसे सत और असत दोनो पदार्थकी निर्णय किये है इससे विवेक ज्ञानके द्वारा शीत उष्ण आदिको सह करो १६ ॥

दोहा ॥

जो असत सो है नहि सतको नहि अभाव इन दोनोके अंतको तत्वदर्शि लखिपाव १६ ॥

115

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विना-
शमव्ययस्यास्य न कश्चित्कर्तुमर्हति १७ ॥

शांकरभाष्यं ॥

किं पुनस्तत् यत् सदेव सर्वदास्तीत्युच्यते अविनाशीति अवि-
नाशि न विनष्टुं शीलं यस्येति तुशब्दः सतो विशेषणार्थः त-
द्विद्धि विजानीहि किं येन सर्वमिदं जगत्ततं व्याप्तं सदाख्येन
ब्रह्मणा साकाशमाकाशेनेव घटादयः विनाशमदर्शनम-
भावमव्ययस्य न व्येति उपचयापचयौ न याति इत्यव्ययं तस्या-
व्ययस्य नैतत्सदाख्यं ब्रह्म स्वेन रूपेण व्येति न व्यभिचरति नि-
रवयवत्वाद्देहादिवत् नाप्यात्मीयेनात्मीयाभावात् यथा देव-
दत्तो धनहान्या व्येति न त्वेवं ब्रह्म व्येत्यतोऽव्ययस्यास्य ब्रह्मणो
विनाशं न कश्चित् कर्तुमर्हति न कश्चित् आत्मानं विनाशयितुं
शक्नोति ईश्वरोऽप्यात्मा हि ब्रह्म स्वात्मनि च क्रियाविरोधात् १७

आनन्दगिरिकृतटीका ॥

नन्वसदिति सामान्यं स्वरूपं वा प्रथमे तस्य विशेषसापेक्षतया
प्रलयदशायामशेषविशेषनाशे विनाशः स्यान्न द्वितीयो
विशेषास्तदापि सन्तीति वाच्यं आत्मातिरिक्तानां विशेषाणां
कार्यत्वाङ्गीकारात् प्रलयावस्थायामनवस्थानादात्मनस्तु सा-
मान्यात्मना धर्मित्वेऽुक्तदोषो द्वितीये तु स्वरूपस्याहन्त्वेक-
ल्पितत्वाद्विनाशित्वमनुवृत्तत्वेन तस्यैव सामान्यतया प्राप्त-
दोषात्तु वक्तिरिति मत्वानश्चादयति किं पुनरिति सामा-
न्यविशेषभावशून्यमात्मैकरसं सदेवेत्यादिश्रुतिप्रमितं
सर्वविक्रियारहितं वस्तु प्रकृतं सद्विवक्षितमित्युत्तरमाह
उच्यत इति आत्मनः सदात्मनो विनाशराहित्यविज्ञाने सर्व-
जगद्व्यापकत्वे हेतुमाह येनेति आत्मनो विनाशाभावे युक्ति

वि १

गी॰
टी॰
हि॰

116

माह विनाशमिति आत्मनोविनाशमिच्छता स्वतोवा परतोवा
नाशस्तस्येष्यते नाद्यइत्याह अविनाशीति देहादिद्वैतमसदुच
ते ततःसतोविशेषणं स्वतोनाशराहित्यं तस्यद्योतकोनिपा
तइत्याह तुशब्दइति आकांक्षापूर्वकं विशेषंदर्शयति किमि
त्यादिना विमतमविनाशिव्यापकत्वादाकाशवत् नहिप्रमि
तमेवोदाहरणं किन्तुप्रसिद्धमपीतिभावः नद्वितीयइत्याह
विनाशमिति नावलस्यविनाशंकर्तुं कश्चिदर्हतीतिसम्बन्धः
विनाशस्यसावशेषत्वनिरवशेषत्वाभ्यां द्वैराश्यमाश्रित्यव्या
करोति अदर्शनमिति नकश्चिदस्याभावं कर्तुं शक्नोतीत्यत्र
हेतुमाह अव्ययस्येति ब्रह्महि स्वरूपेणवेति स्वसम्बन्धिना
वेति विकल्पार्थंदूषयति नैतदिति नहिनिरवयवस्य स्वाव
यवापचयरूपव्ययःसम्भवतीत्यत्रवैधर्म्यदृष्टान्तमाह देह
दिवदिति द्वितीयंनिरस्यति नापीति तदेवव्यतिरेकदृष्टान्तेन
स्पष्टयति यथेति द्विविधेपिव्ययायोगेफलितमाह अतइति
किंच ब्रह्मपरतोननश्यत्यात्मत्वाद्घटवदित्याह नकश्चिदिति
आत्मत्वहेतोरसिद्धिमुद्धरति आत्माहीति तदात्म्यश्रुतिरत्र श्रु
तिहेतुःक्रियते अस्तुतर्हि स्वयमेव ब्रह्मस्यात्मनो नाशकम्
इन्धनादिदर्शनान्नेत्याह स्वात्मनीति १७ ॥

स्वामिकृतटीका ॥

तत्रसत्स्वभावमविनाशवस्तुसामान्येनोक्तं विशेषतोदर्शयति
अविनाशीति येनसर्वमिदमागमापायिधर्मकं देहादिकं तत
मादितेनव्याप्तं तत्त्वात्मस्वरूपमविनाशि विनाशशून्यं वि
जानीहि तत्रहेतुमाह विनाशमिति आगमापायिधर्मकम
सद्दर्शयति ॥ १७ ॥

पिशाचभाष्यं टी॰ ॥

किंपुनस्तत्सदेवसर्वदासदेवेत्युच्यते अविनाशीति विनष्टुंशी

लमस्येति विनाशिन विनाशि अविनाशितच्छाह्यो ऽसतो विशेष-
णार्थः नहि हि ज्ञानीहि येन सर्वमिदं जगद्व्याप्तमाकाशेनेव वि-
नाशमदर्शनं घटादिवदस्याव्ययस्य ब्रह्मणः विनाशं कर्तुं नाल-
ति न कश्चिदात्मानं विनाशयितुं शक्नोति १७ ॥

रामानुजभाष्ये टी० ॥

आत्मनो विनाशित्वं कथमुपपद्यते इत्यत आह तदात्मतत्त्वमवि-
नाशीति विद्धि येनात्मतत्त्वेन चेतनेन तद्व्यतिरिक्तमिदमचेत-
नतत्त्वं सर्वं ततं तस्य व्यापकत्वेन निरतिशयसूक्ष्मत्वादात्मनो
विनाशानर्हस्य तद्व्यतिरिक्तो न कश्चित्पदार्थो विनाशं कर्तुम-
र्हति तद्व्याप्यतया तस्मात्स्थूलत्वात् नाशकं हि शस्त्रजलाग्नि-
वाय्वादिकं नाश्यं व्याप्य शिथिलीकरोति मुद्गरादयोऽपि वेगव-
त्संयोगवायुमुत्पाद्य तद्द्वारेण नाशयति अतआत्मतत्त्वमवि-
नाशि १७ ॥

अभिनवगुप्तकृत टी० ॥

यत्तत्त्वदर्शिभिर्दृष्टः स त्वल नित्योनित्यो वेत्याशंक्याह तच्चा-
आत्मतत्त्वविनाशी १७ ॥

परमार्थप्रपा टी० ॥

येनात्मना किं येनाध्यासाश्रयीभूतेनाधिकरणरूपेण सर्वमि-
दं प्रपञ्चजातं ततं विस्तारं प्राप्तं न हि सत्याश्रयव्यतिरेकेण सत्यभा-
सेन शुक्तिकायामसत्वे रजतमिवेत्यर्थः अतोऽव्ययस्यास्य
विनाशं कर्तुमर्हति न कोपीत्यर्थः १७ ॥

वनमाली टी० ॥

नन्वीश्वरनित्यत्वे मानाभावात्तद्दृष्टान्तेन कथं जीवानां नित्यत्ववा-
दिमित्त्वं अनित्यत्वं सिद्ध्यति नचाविनाशीश्वर [illegible] मामेत्या-
दिना परमेश्वरनित्यत्वं सिद्धमिति वाच्यं तद्वाक्यानामुपासना-
परत्वेनाप्रमत्वात् उपासनापाश्रयोपितमग्निध्यायीतेत्या-
दिवदर्थविषयकत्वादत आह अविनाशीति येन परब्रह्मणा

वि

अविनाशीति

सर्वमिदंजगत्ततेव्याप्तंतदविनाशिविद्धि अस्यसर्वव्याप
कस्याविनाशंकर्तुंकश्चिन्नार्हति नहिव्याप्येननियमेनव्याप
कस्यनियामकस्यविनाशःसंभवति सर्वस्यतदधीनसत्तात्
त्वाद्विनाशकाभावादव्ययस्य तथाचसर्वस्यमदधीनत्वा
शकालवस्त्वादिनासर्वैस्वरस्यममनाशोनास्तितथात्वदादी
नांचेतनानामप्यहंशानांनाशनादिचेतनत्वादितिभावः

जनमेवेजयन्ती टी॰ ॥

एवंनत्वेवाहमितिद्वाभ्यामात्मनःसत्यत्वमुक्तंततोनामत
त्वेनेनदेहानामपिसत्यत्वेप्रतिपादितमिदानीमुभयोःस
त्वेसत्यैकतरस्यापिविनाशित्वाभावाद्युद्धकरणमि
शंक्य अविनाशीत्यारभ्यदेहीनित्यमवध्योयमित्येनेनदेहा
नोर्मिथोवैलक्षण्यंवदन्नुपक्रमेतावदात्मनोविलक्षण
ह अविनाशीति तशब्दोनिश्चयार्थकः तत्तुजीवस्वरू
येनात्ररूपकेनदेहिनाइदंसत्यत्वादिविषयभूतंसर्वंदेव
थोगादिशरीरं ततेदेहेदेहंप्रतिभिन्नभिन्नस्वरूपेणस्व
निमवरूपगुणादयोयस्यसव्ययःनव्ययः अव्ययस्तस्य
करसस्वरूपगुणकस्येत्यर्थः अस्याविनाशिनः विना
रूपायन्यथाभावंकर्तुंकश्चिन्नवायघनलजलास्त्रादिपदा
र्थः आध्यात्मादिकोवानअर्हति नसमर्थोभवतीत्यर्थः

मधुसूदनी टी॰ ॥

विनाशोदेशतःकालतोवस्तुतोवापरिच्छेदःसोऽस्यास्तीति वि
नाशिपरिच्छिन्नंनवि
तत्ववततत्पंस्फुरणं तेविद्धिनाशिसर्वप्रकारपरिच्छेदशू
स्फुरणेनेकेननित्येनविभुनासर्वमिदंदृश्यजातंस्वतःस
स्फूर्तिशून्यंततंव्याप्तं समस्तमास्फुर्त्याध्यासेनरज्जुशकलेन

सर्पधारादिस्वस्मिन्समावेशितं तदविनाशेवविद्धीत्यर्थः
कस्मात्यस्माद्विनाशंपरिच्छेदं अव्ययस्यापरिच्छिन्नस्यास्य
परोक्षस्य सर्वानुस्यूतस्य स्फुरणरूपस्य सतः कश्चित्कोऽपि प्र
मेयो वा विषयो वा इन्द्रियसन्निकर्षादिरूपो हेतुर्वा न कर्तुम
र्हति समर्थो न भवति कल्पितस्याकल्पितपरिच्छेदकत्वा
योगात् आरोपमात्रे चेष्टापत्तेः अहं घटं जानामीत्यत्र हि अ
हंकाराश्रयतयाभासते घटस्तु विषयतयाऽत्पत्तिविना
शवती काचिदहंकारवृत्तिस्तु सर्वतो विप्रकृष्टस्य सतः स्फु
रणस्य व्यंजकतयाऽत्ममनोयोगस्य परैरपि ज्ञानहेतुत्वाभ्यु
पगमात् तदुत्पत्तिविनाशेनैव च तदुपहितस्फुरणरूपस्य
उत्पत्तिविनाशप्रतीत्युपपत्तेर्नैकस्य स्फुरणस्य स्वत उत्पत्ति
विनाशकल्पनाप्रसंगः घटावच्छेदेन शब्दवत् घटाद्यवच्छे
देनाकाशवच्च अहंकारस्तु तस्मिन्नवस्थोऽपि तदाश्रयतया
भासते न हि तत्तादात्म्याध्यासात् सुषुप्तावहंकाराभावेऽपि
तद्वासनावासिताज्ञानभासकस्य चैतन्यस्य स्वतः स्फुरणात्
उत्थितावेतेकालमहं किमपि नाज्ञासिषमिति सुषुप्तोत्थि
तस्य स्मरणं न स्यात् न चोत्थितस्य ज्ञानाभावानुमितिरियं
मिति वाच्यं सुषुप्तिकालरूपपक्षात् ज्ञानलिंगासंभवाच्च अ
स्मरणादेर्व्यभिचारित्वात् स्मरणजनकनिर्विकल्पकाद्यभा
वसाधकत्वाच्च ज्ञानसामान्याभावस्य चान्योन्याश्रयग्रस्तत्वा
त् तथा च श्रुतिः यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्य
ति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादित्यादि
स्वभोस्वप्रकाशस्फुरणसद्भावं तेन तन्नित्यतया दर्शयति प
र्वतादिविषयोऽपि तद्ज्ञानावस्थाभासके स्फुरणे कल्पितः
पूर्वमागतज्ञानः स एवेदानीं मयाज्ञात इति प्रत्यभिज्ञानात्
ज्ञानतज्ज्ञापकत्वे हि प्रामाण्यं सर्वतन्त्रसिद्धान्तः यथार्थोऽनुभवः

गी॰
टी॰
हि॰

118

प्रमेतिवदद्भिस्तार्किकैरपिज्ञातज्ञापिकायाःस्मृतेर्व्यावर्तकमनु
भवपदंप्रयुंजानैरेतदभ्युपगमात् अज्ञातत्वंचघटादेर्नवक्त्रा
दिनापरिच्छिद्यतेतत्रासामर्थ्यात् तज्ज्ञानोत्तरकालमज्ञानस्याः
नुवृत्तिप्रसंगाच्च नाप्यनुमानेनलिंगाभावात् नहीदानींज्ञा
ततत्वेनाज्ञाततत्वमनुमातुंशक्यंधारावाहिकानेकज्ञानविषये
व्यभिचारात् इदानीमेवज्ञाततत्वंतथागज्ञाततत्वेमतीदानींज्ञा
तत्वरूपसाध्याविशिष्टत्वात्सिद्धं नचाज्ञातावस्थाज्ञानमंतरे
णज्ञानंप्रतिघटादेर्हि तत्ताग्राहीत्वेशक्यतेपूर्ववृत्तित्वाग्रहात्
घटंनजानामीतिसार्वलौकिकानुभवविरोधाच्च तस्मादज्ञा
स्फुरणभासमानंसाक्ष्येवघटादिकंभासयतीति घटादीना
ज्ञानकल्पितत्वसिद्धिः अन्यथाघटादेर्जडत्वेनाज्ञातत्वतज्ज्ञा
योरनुपपत्तेःस्फुरणेवाज्ञातेसाक्ष्यस्यैवाज्ञानेनेतिस्वयमे
भगवान्वक्ष्यति अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवइत्यत्र
तेनविभुत्वंसिद्धं तथाचश्रुतिः महद्भूतमनंतमपारंविज्ञान
घनएवेति सत्यंज्ञानमनंतमितिचज्ञानस्यमहत्त्वमनंतत्वंच
दर्शयति महत्त्वंसाक्षात्सर्वसंबंधित्वमनंतत्वंत्रिविधपरिच्छे
दशून्यत्वमितिविवेकः एतेनशून्यवादोपिप्रत्युक्तः निरधिष्ठान
सू ८ भ्रमायोगान्निरवधिबाधायोगाच्च तथाचश्रुतिः पुरुषान्नपरंकिं
चित्साकाष्ठासापरागतिरिति सर्वबाधावधिपुरुषंपरिशिन
ष्टि उक्तंभाष्यकारैः सर्वंविनश्यद्वस्तुजातंपुरुषांतंविनश्यति
पुरुषोविनाशहेत्वभावान्नविनश्यतीति एतेनक्षणिकवादो
पिपरास्तः अबाधितप्रत्यभिज्ञानात् अन्यदृष्टस्यान्यस्मरणानु
पपत्तेश्च तस्मादेकस्यसर्वानुस्यूतस्यस्वप्रकाशस्फुरणरूप
स्यसतः सर्वप्रकारपरिच्छेदशून्यत्वादुपपन्नं नाभावोविद्यते
सतइति [illegible]
[illegible]

सदानंदी टीका ॥

नतुज्ञानात्मकेसत्याज्ञानमाद्यंतवाकिल घटज्ञानेसमुत्प
न्नेनष्टेचेतिप्रतीतितः १ घटंवेद्मीत्यतोभानात्साश्रयंचस
कर्मकं दिक्कालवस्तुविच्छिन्नंज्ञानंस्याद्व्यापकंकथं २ इ
त्यत्राहाविनाशीत्यपरिच्छिन्नंचिदद्वयं स्फुरणेनहिद्विनैके
नयेनैकेनचिदात्मना ३ नित्येनविभुनासर्वमिदंव्याप्तंजडा
त्मकं स्वसत्तास्फूर्तिदानेनसर्वंस्वस्मिन्निवेशितं ४ परिच्छे
देनकोप्यस्यापरोक्षस्याव्ययस्यच सर्वानुस्यूतरूपस्यसत
कोद्वैमिहार्हति ५ नाश्रयोविषयोनेनसन्निकर्षादिका
रणं परिच्छेत्तुसमर्थोस्त्यपरिच्छिन्नस्यकर्हिचित ६ ज्ञाना
सत्ताविभिन्नंत्वेस्तूच्यतेसच्चिदात्मनः सत्यंज्ञानमनंतंचा
परिच्छिन्नमबाधितं ७ कृत्याज्ञानेविनिर्णीतंसंविद्रूपंसद
द्वयं यात्वाद्यंतवतीकाचिद्वृद्धिवृत्तिर्मताहिसा ८ स्फुर
णस्यास्यनित्यस्याभिव्यंजकतयाखिले घटादौजन्मनाशा
दिप्रतीतिविषयेचिता ९ तदुत्पत्तिविनाशाभ्यामनाशि
स्फुरणेपरे जन्म(नाश)प्रतीतेश्चोपपन्नेनस्वतःसतः १० साश्रया
दिपरिच्छेदवतीभवतुतेनहि नवृत्तिःस्फुरणस्यास्यापरि
च्छिन्नस्यवस्तुनः ११ यथाघटाद्यवच्छेदादाकाशेभेदकल्प
ना तथाधीवृत्त्यवच्छेदात्स्फुरणेभेदकल्पना १२ स्वतोथी
वृत्त्यभावेपिसतःस्फूर्तिःस्वतोयतः अतश्चौपाधिकत्वस्यप
रिच्छेदेनवास्तवः १३ तदुक्तंवार्त्तिकेसम्यक्सत्यादिपद
निर्णये नतुसत्यमनंतंचकथंसम्यक्प्रतीयते १४ देशा
कालादिहेतुत्वान्नदिदानीविभाव्यते वस्तुतोदेशतश्चैवा
कालतश्चविधीयते १५ आनंत्यंब्रह्मणस्त्वातःसत्याद्यपिवि
सिद्ध्यति अनंतंदेशतोव्योमदेशावस्थकृतित्वतः १६ कारण

नैकदेशं हि कार्यं नान्यत्र वर्तते कार्यत्वात्कालतो नास्य वस्तुत
श्च विहायसः ९ वस्त्वं तस्य सद्भावादानंत्यं वस्तुतोपि नः का
लाकाशादियोनित्वात्सर्वात्मत्वात्तथात्मनः १० वस्त्वं तस्य
चासत्वात्तुच्छो नैत्यं परात्मनः कल्पितेन परिच्छेदो नह्यकल्पि
तवस्तुनः ११ कल्पितस्येह कालादिवाचारंभणश्रुतेः क
ल्पितानामधिष्ठानतया सत्यमबाधितं १२ देहादिसर्वविश्व
स्यासत्यत्वं सिद्धमित्यलं १३ ॥ १७ ॥

नीलकंठी टीका ॥

यस्याभावो नास्ति तस्य सतः सत्वे किं मानमित्याशंक्याह अवि
नाशीति तच्छब्देन प्रकृतं सत्परामृश्यते येन सता इदं सर्वं वि
यदादि ततं व्याप्तं घटः सन् पटः सन्निति सर्वस्य सदभेदानुभवा
त् यथा घटो मृत् शरावो मृदिति घटादीनां मृदभेदानुभवा
न्मृदुपादानकत्वं तद्वत्सर्वस्यापि सदुपादानकत्वं बोध्यं ननु मृ
द्वत्सदपि किं विकारवद्भवतीत्याशंक्याह अविनाशीति तत्
सत् अविनाशि विद्धि अयमर्थः पूर्वावस्थापरित्यागोत्र विना
शः मृद्धि पिंडाकारं त्यक्त्वा घटी भवति अतः सा विनाशशीला
विकारयोराश्रयत्वात् वस्तु तु न तथा किं तर्हि रज्जुवत्स्वयम
विनष्टैव कार्याकारं भवति स्वकीयसत्तास्फुरणेन कार्यं प्रति
ति अतः अविनाशि तथा च श्रुतयः अजायमानो बहुधा विजाय
ते जात एव न जायते को न्वेनं जनयेत्पुनः अजायमानः जन्मा
दिविकारमलभमानोपि विजायते वियदादिरूपेण विभवति
तथा लोकदृष्ट्या जातो घटादिः परमार्थदृष्ट्या न जायते परि
णाम्युपादानस्याभावात् अत एव घटादिको न्वेनं जनयेत् न
कोपि मृदादेस्तु स्वाम मृदादिवत्कल्पि
तत्वेन रज्जुरगादिवदिति दृष्टान्तरमेतत् तथा श्रुतिः
भासमेवसत्यं तस्य भासा सर्वमिदं विभातीति सतः सत्यत्वे न श्रु

णोपलक्षितस्य प्रपंचस्य सत्यत्वं सतो भानमेव प्रपंचस्य भान
मिति तथा च प्रपंचगते सत्तास्फूर्ती सतः सत्वे प्रमाणमित्यर्थः
श्रुतिश्च अनेन सोम्य शुंगेनापो मूलमन्विच्छ अद्भिः सोम्य शुंगे
न तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ स
न्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इति सतो जग
दुपादानत्वं कार्यलिंगेन द्रढयति सतोऽविनाशित्वं विनाश
हेत्वभावादित्याह विनाशमिति नश्चेति नापत्तीयत इत्यन्व
यं एतेन सर्वविकारशून्यस्य विनाशो नास्तीत्यर्थः अपक्षयो
हि जन्मादिविकारवत एव भवतीति सर्वविकारोप
लक्षणतया बोध्यः न कश्चिदित्यनेन तदन्यस्य विनाशहेतो
रभावो दर्शितः द्वितीयाद्वै भयं भवतीति श्रुतेः ॥ १७ ॥

आनंदी टीका

अविनाशाविनाशशब्दाभ्यां सदसतोर्लक्षणमाह येन जीवात्म
ना सर्वमिदं भूतं ततः करणसमवायरूपशरीरं ततं ज्ञातृत्वकर्तृ
त्वादिभिर्व्याप्तं तदविनाशि जानीहि अयो वस्तुनो देशकालादि
नाश्च भेदः अवयवविभागः तेन रहितस्य जीवात्मनः न क
श्चिदीश्वरो विनाशं कर्तुमर्हति सावयवस्यावयवविभागेन वि
नाशो भवति न निरवयवस्येति १७ ॥

+ ततश्चतत्वतः किं सत्किमसदित्यपेक्षायां

रामकंठी टीका आह +

एतयोः सदसतोर्मध्यात्तदविनाशि विनाशधर्मरहितत्वात्परमा
र्थतः सद्धि जानीहि किं तद्येनेकैकं दमन्योन्यभिन्नावभासमयं
सचराचरं वस्तुजातं ततं कर्तृत्वविवक्षया विस्फारितं ज्ञातृत्ववि
वक्षया व्याप्तं एक एव हि परमार्थतः सर्वकर्ता सर्वज्ञः परमेश्वरः
परमात्मा तद[illegible]वभासितान्योन्यभेदानीतं ते च ज्ञातारो देहादिकेम
वात्मत्वेन प्रतिपाद्यमानानां परिमितविषयं कर्तृत्वं ज्ञातृत्वं च
न वास्तवमेवमस्यात्मतत्वाभिधानस्य वस्तुनोऽव्ययस्य देशकाला
द्यवच्छेदरहितत्वादव्ययस्वभावस्य तद्विलक्षणः कार्यरूपो न
कश्चिदस्याविनाशमभावं कर्तुमर्हति न हि नित्यस्य सर्वथा नवः

गी.
टी.
हि.

छिन्नमहिम्नोर्थस्यानित्यावच्छेदः पदार्थो विनाशाय प्रभ
वतीति [illegible]
१७ ॥

येनतत्त्वमिदं ततेन सर्वमिद
मागमापायिधर्मकं देहा
दिकं साक्षितेन व्याप्तं

१२०

लाक्षिकी टीका

तत्रसत्त्वभावस्याविनाशाभावे विशेषतो निरूपयति अवि
नाशीति तदात्मस्वरूपमविनाशि विनाशशून्यत्वात् सत्
नीहि तद्वाहे सतो विशेषणार्थः [illegible]
[illegible]
ह विनाशमिति अव्ययस्य देशकालाद्यपरिच्छिन्नत्वात्
यस्येत ... हि ... ल दलो देशकालादिपरिच्छिन्नः कश्चिदप्यर्थः ईश्वरो वा वि

पंचोली टीका

यत्सत्तत्स्वभावे अविनाशि
यति अविनाशिवस्तुस्वविशेषेणोक्तं तद्विशेषतोऽद
तं अविनाशि विद्धि न तु पुनः येन इदं सर्वं जगत्ततं व्याप्तं त
नाशमभावं कर्तुमर्हति कश्चिदपि प्रमान् अस्याव्ययस्यात्मनः
१७ ॥

सतावीस मिहोयिनी ॥

नतु किं सत् किं वा सदित्यत आह अविनाशि तु विद्धि यतः सद
तो मर्थे तद विनाशि विनाशि हीन त्वात्यर मार्थसहितं
रि किं तदित्यपेक्षायामाह येनात्मना सर्वमिदं मागमा
धर्मकं देहादि सर्वं कार्यजातं ततं साक्षितया व्याप्तं देहादि
कीय आत्मनामसदितिसेयरति एवं वास्याव्ययस्यात्मनो वि
धांकश्चित्कर्तुमर्हति ततश्चनात्मविनाशः संभावनीय इ
नात्पर्थम् १८

अविनाशीति नायिप्रापादिना विनाशशत्याह

मधुभाष ॥

अव्ययं वतद्दवत देहस्यापिकस्यविनित्यवमितिनेत्याह

भाषा अनुवाद

अविनाशी सत वस्तुका स्वरूप सामान्य से वर्णन करिके फेरि विशेष रूपसे कहतेहैं जो इस अनित्य देहमे साक्षी रूप व्याप्त होकर रहाहै वही आत्माको अविनाशी जानो जिस हेतु उसके विनाश करनेको किसी की सामर्थ्य । नही है १७ ॥

दोहा

अविनाशी तिह जानहु जिहकर विस्तार अह अविनाशीको
नहि मारणयोग्य संसार १७॥

121

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः अ
नाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत १८

शांकरभाष्यं ॥

किं पुनस्तदसत् यत् स्वात्मसत्तां व्यभिचरतीत्युच्यते अन्तव
न्त इति अन्तो विनाशो विद्यते येषां ते अन्तवन्तो यथा मृग
तृष्णिकादौ सद्बुद्धिरनुवृत्ता प्रमाणनिरूपणान्ते विच्छिद्य
ते स तस्यान्तस्तथेमे देहाः स्वप्नमायादेहादिवच्चान्तव
न्तो नित्यस्य शरीरिणः शरीरवतोऽनाशिनोऽप्रमेयस्यात्मनोऽ
न्तवन्त इत्युक्ता विवेकिभिरित्यर्थः नित्यस्यानाशिन इति
न पुनरुक्तं नित्यत्वस्य द्विविधत्वाल्लोके नाशस्य च यथा दे
हो भस्मीभूतोऽदर्शनं गतो नष्ट उच्यते विद्यमानोऽपि यथाऽ
न्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते तत्राना
शिनो नित्यस्येति द्विविधेनापि नाशेनासम्बन्धोऽस्येत्यर्थः
अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यादात्मनस्तन्माभूदिति
नित्यस्यानाशिन इत्याह अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादि
प्रमाणैरपरिच्छेद्यस्येत्यर्थः नन्वागमेनात्मा परिच्छिद्यते
प्रत्यक्षादिना च पूर्वं न आत्मनः स्वतःसिद्धत्वात् सिद्धे ह्यात्मनि
प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति न हि पूर्वमित्थ
महमित्यात्मानं अप्रमाय पश्चात् प्रमेयपरिच्छेदाय प्रव
र्तते न ह्यात्मा नाम कस्यचिदप्रसिद्धो भवति शास्त्रं त्वन्त्यं प्र
माणं अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रमाणत्वमा
त्मनः प्रतिपद्यते न त्वज्ञातार्थज्ञापकत्वेन तथा च श्रुतिः
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर इति यस्मादेवं नि
त्योऽविक्रियश्चात्मा तस्माद्युध्यस्व युद्धादुपरमं मा का
र्षीरित्यर्थः न ह्यत्र युद्धकर्तव्यता विधीयते युद्धे प्रवृत्त एव
ह्यसौ शोकमोहप्रतिबद्धस्तूष्णीमास्ते अतस्तस्य कर्तव्यप्रतिब

न्यापनयनमात्रं भगवता क्रियते तस्माद्युद्धस्वेत्यनुवादमा
त्रं न विधिः ॥ १८ ॥

आनंदगिरिकृतटी॰

सदसतोरनन्तरप्रकृतयोः स्वरूपाव्यभिचारित्वेन परमार्थ
तया सन्निर्धारितमिदानीमसन्निर्दिधारयिषया पृच्छति
किं पुनरिति असदेवेति निर्द्धारितत्वात् प्रश्नस्य निरवका
शत्वमाशंक्य प्रश्नं व्यावर्त्य विवक्षितमसन्निर्धारयितुं तस्य
सावकाशत्वमाह यत्त्वात्मेति देहादेरनात्मवर्गस्य प्रकृ
तासच्छब्दविषयत्वमाह उक्ता इति तेषामस्वातन्त्र्यमुदस्याः
ति नित्यस्येति आकाशादिव्यावृत्त्यर्थं विशिनष्टि शरीरि
ण इति परिणामनित्यत्वमवच्छिनत्ति अनाशिन इति त
स्य प्रत्यक्षाद्यविषयत्वमाह अप्रमेयस्येति देहादेर्वस्तु
त्वादात्मनश्चैकरूपत्वाद्युद्धे स्वधर्मे प्रवृत्तस्यापि तव न
हिंसादिदोषसम्भावनेत्याह तस्मादिति ननु देहादिषु
सद्बुद्धेरनुवृत्तेस्तस्याविच्छेदाभावात् कथमन्तवत्त्वं तेषा
मिष्यते तत्राह यथेति तथेमे देहाः सद्बुद्धिभाजोऽपि प्रमा
णतो निरूपणायामवसाने विच्छेदादन्तवन्तो भवन्ती
तिशेषः देहत्वादिना च जाग्रद्देहादेरन्तवत्त्वं सम्प्रतिपन्न
वदनुमातं शंकामित्याह स्वप्नेति शरीरादेरन्तवत्त्वेऽपि
प्रवाहरूपेणात्मनस्तत्सम्बन्धस्यानन्तत्वमाशंक्याह नि
त्यस्येति प्रवाहस्य प्रवाहिव्यतिरेकेणानिरूपणात्तदा
त्मना देहाद्यभावे सम्बन्धसिद्धिरित्यभिसन्धायोक्तं विवे
किभिरिति पदद्वयस्यैकार्थत्वमाशंक्य निरस्यति नित्यस्ये
त्यादिना नित्यत्वस्य द्वैविध्यसिद्ध्यर्थं नाशद्वैविध्यं प्रति
प्रकटयति यथेत्यादिना नाशस्य निरवशेषत्वेन सावशे
षत्वेन च सिद्धे द्वैविध्ये फलितमाह तत्रेति विशेषणाभ्यां
कूटस्थनित्यत्वमात्मनो विवक्षितमित्यर्थः अन्यतरविशे

षणमात्रोपादाने परिणामिनित्यत्वमात्मनः शंकेतेत्यनिष्टा
पत्तिमाशंक्याह अन्यथेति औपनिषदत्वविशेषणमाक्षि
प्याप्रमेयत्वमाक्षिपति नन्विति इतश्चात्मनोनाप्रमेयत्वमि
त्याह प्रत्यक्षादिनेति तेन चागमप्रवृत्त्यपेक्षतया पूर्वावस्था
यामात्मैव परिच्छिद्यते तस्मिन्नेवाज्ञातत्वसंभवादज्ञातज्ञा
पकं प्रमाणमिति च प्रमाणलक्षणादित्यर्थः एतदप्रमेय
मित्यादिश्रुतिमनुसृत्य परिहरति नेत्यादिना कथंमानं
मेयत्वात्मनः सिद्धत्वमित्याशंक्याक्षं विवृणोति सिद्धे ही
ति प्रमित्सोः प्रमेयमिति शेषः तदेव व्यतिरेकमुखेन वि
शदयति नहीति आत्मनः सर्वलोकप्रसिद्धत्वाच्च तस्मिन्न
प्रमाणमन्वेषणीयमित्याह नह्यात्मेति प्रत्यक्षादेरनात्म
विषयत्वात् तत्र चाज्ञातज्ञाततायाव्यवहारसम्भवात्तत्प्रा
माण्यस्य च व्यावहारिकत्वाद्विशिष्टे तत्प्रवृत्तावपि केवले
तदप्रवृत्तेर्यद्यपि नात्मनि तत्प्रामाण्यं तथापि तद्धितप्र
त्याशास्त्रस्य तत्र प्रवृत्तिरवष्टम्भाविनीत्याशंक्याह शास्त्र
मिति शास्त्रेणप्रत्यग्भूते ब्रह्मणि प्रतिपादिते प्रमात्रादि
विभागस्य बाधितत्वाद्युक्तमस्यान्तत्वमपौरुषेयतया नि
र्दोषत्वाच्चागमस्य प्रामाण्यमित्यर्थः तथापि कथमस्यप्र
त्यगात्मनि प्रामाण्यं तस्य स्वतः सिद्धत्वेनाविषयत्वादज्ञात
ज्ञापकतायोगादित्याशंक्य स्वतो[illegible]भासमानोपि प्रतीचोमनु
ष्याहं कर्ताहमित्यादिनामनुष्यत्वकर्तृत्वादीनामतद्धर्मा
णामध्यारोपेणात्मनि प्रतीयमानत्वात् तन्मात्रनिवर्त
कत्वेनात्मनोविषयत्वमनापाद्यैव शास्त्रं प्रामाण्यं प्रतिप
द्यते सिद्धन्तु निवर्तकत्वादिति न्यायादित्याह अतद्धर्मे
निषदारादिव स्मरणातिशयजनकत्वेनार्थकमित्यात्मनि
शास्त्रप्रामाण्यं नेष्टमित्याशंक्य जडत्वाजडत्वाभ्यां विशे
षादितिमत्वाह नन्विति ब्रह्मात्मनोमानापेक्षामन्तरेणास्व

गी॰
टी॰
द्वि॰
२२३

नः स्फुरणे प्रमाणमाह तथा चेति साक्षादन्यापेक्षामन्तरेणाः
परोक्षादपरोक्षस्फुरणात्मकं यद्ब्रह्म न च तस्यात्मनोऽर्थान्तर
त्वं सर्वाभ्यन्तरत्वेन सर्ववस्तुसारत्वात्तमात्मानं व्याचक्ष्वेति।
योजना अप्रमेयत्वेनाविनाशित्वं प्रतिपाद्य फलितं निगम
यति यस्मादिति स्वधर्मनिवृत्तिहेतुनिषेधे तात्पर्यं दर्शयति
युद्धादिति आत्मनो नित्यत्वादिस्वरूपमुपपाद्य युद्धकर्तव्यत
विधानात् ज्ञानकर्मसमुच्चयोऽत्र भातीत्याशंक्याह नहीति
युध्यस्वेति वचनात्तत्प्रवर्तकत्वविधिरस्तीत्याशंक्याह युद्ध
इति कथं तर्हि कथं भीष्ममहमित्याद्यर्जुनस्य युद्धोपरमप
रं वचनमिति तत्राह शोकेति यदि स्वतो युद्धे प्रवृत्तिः तर्हि
भगवद्वचनस्य का गतिरित्याशंक्याह तस्येति भगवद्वचन
स्य प्रतिबन्धनिवर्तकत्वे सत्यर्जुनप्रवृत्तेः स्वाभाविकत्वं फ
लितमाह तस्मादिति १८ ॥

स्वामिकृतटीका ॥

अन्तवन्त इति अन्तो नाशो विद्यते येषां ते अन्तवन्तः नित्यस्य सर्वदै
करूपस्य शरीरिणः शरीरवतः अतएवानाशिनः अप्रमेयस्य
परिछिन्नस्यात्मनः इमे सुखदुःखादिधर्मका देहा उक्तास्तत्त्व
दर्शिभिः यस्मादेवमात्मनो न विनाशः न च सुखदुःखसंबंधः
तस्मान्मोहजं शोकं त्यक्त्वा युध्यस्व स्वधर्मं मा त्याक्षीरित्यर्थः १८

पिशाचभाष्यटी॰ ॥

किंतु न स्वल्पमप्ययं न्त्वात्मसत्तां व्यभिचरतीत्युच्यते अन्तवन्तः
इति अन्तो नाशो विद्यते येषां ते अन्तवन्तः नित्यस्य शरीरिणः
यथा मृगतृष्णिकादौ सहृत्तिरज्जुहता प्रमाणनिरूपणाच्छि
छिद्यते मतस्यां तलथेमे देहाः स्वप्रमायालब्धदेहादिवदन्तः
वतः नित्यस्य शरीरिणः शरीरवतः अविनाशिनो प्रमेयस्या
त्मनः अन्तवन्त इत्युक्ताः पण्डितैर्ब्रह्मवादिभिरित्यर्थः अप्रमे
यस्य प्रत्यक्षादिप्रमाणैरपरिछेद्यस्य नन्वात्मा परिछिद्यते।

तथाचश्रुतिः यत्साक्षादपरोक्षाद्ब्रह्मआत्मेति यस्मादेवंनित्य
स्त्वविछेद्यश्चात्मा तस्माद्युध्यस्व तदुपरमं माकार्षीरित्यर्थः न
त्वयंयुद्धकर्तव्यताविधीयते युद्धेप्रवृत्तएवासौमोहवशान्निवृ
त्तूष्णीमास्ते तस्यप्रतिबंधापनयनं भगवता क्रियते तस्माद्यु
ध्यस्वेत्यनुवादमात्रंनविधिः शोकमोहादिसंसारसागरनिवृ
त्त्यर्थं गीताशास्त्रंप्रवर्तत इति एतस्यार्थस्यसमाप्तिभूते अत्र च वोप
निनाय भगवान्यत्तुमन्यसेयुद्धे भीष्मादयोहन्यंतेअहमेषां
हंतेति एषाबुद्धिर्मिथ्यैवमानेकथं ॥ १८ ॥

रामानुजभाष्य टी. ॥

देहादिस्तुविनाशित्वमेवस्वभावइत्याह अंतवंतइति उपच
यापचयरूपाइमेदेहा अंतवंतेविनाशस्वभावः उपचयात्म
काहिघटादयो अंतवंतो दृष्टाः नित्यस्यशरीरिणः कर्मफल
भोगार्थतयाभूतसंघातरूपादेहाः अनाशः अशेषेनेत्यादिशास्त्रे
ण कर्मावसानेविनाशिनः आत्मात्वविनाशी कुतः अप्रमे
यत्वात् नह्यात्माप्रमेयतयोपलभ्यते अपितुप्रमातृतयात
थाचवक्ष्यते एतद्योवेत्तितंप्राहुः क्षेत्रज्ञइतितद्विदइतिनचा
नेकउपचयात्मकश्चआत्मोपलभ्यते सर्वत्रदेहेअहमिदंजा
नामीति देहस्यप्रमातृतयैवोपलब्धेः नचदेहादिवत्प्रदे
शभेदेप्रमातृत्वाकारभेदउपलभ्यते अतएकरूपत्वेनानु
पचयात्मकत्वात्प्रमातृत्वाद्व्यापकत्वाच्चात्मानित्यः देहस्तूप
चयात्मकत्वाच्छरीरिणः कर्मफलभोगार्थत्वादनेकरूपत्वाद्व्याप्यत्वा
द्विनाशी तस्माद्देहस्यविनाशस्वभावत्वादात्मनोनित्य
स्वभावत्वाच्चोभावपिनशोकस्थानमिति शस्त्रपातादिपरुष
स्पर्शानवर्जनीयान्स्वगतान् अन्यगतांश्चधैर्येणसहमानअ
मृतत्वप्राप्तयेअनभिसंहितफलंयुद्धाख्यंकर्मारभस्वेत्य
र्थः १८ ॥

अभिनवगुप्तकृत टी. ॥

निरूपाख्येनाकाले स्थूलविनाशयोगिनः तदन्यथानुपपत्तेरेव चाविनाशिनः प्रतिक्षणमवस्थान्तरभागिनः यदुक्तं श्रुतेषु प्राणेष्टह्यप्रतिक्षणं नवत्वज्ञानिरनुमीयतेइति श्रुतिनापि कालात्मनोऽप्यर्थानां प्रतिभेदः क्षणे क्षणे वर्तते सर्वभावेषु सोऽल्पात्तत्र विभाव्यतेइति पृथगर्थानामिति पृथगर्थक्रियाकारित्वादिति यावत् देहाद्यंतवंतो विनाशिनश्च आत्मा तु नित्यो यतोऽप्रमेयः प्रमेयस्य तु जडस्य परिणामित्वेन तु अजडस्य चिदेकरूपस्य स्वभावांतरायोगात् एवं देहानित्यमनंतवंत इति शोचितुमशक्या आत्मा नित्यमविनाशी तेन न शोचनार्हः तत्रैणायमेकः कल्पः अन्ययोर्द्वयोरर्थयोरुक्तिनादर्शितः अशोच्यानन्वशोचः इति ॥ १८ ॥

परमार्थप्रपा टीका ॥

अथ यदर्थमेतदुपक्रमस्तदाह अंतवंतइति नित्यस्य सर्वदैकस्वभावस्यातएवानाशिनः अप्रमेयस्यापरिच्छिन्नस्य शारीरिणः शारीरावच्छिन्नस्य परमात्मनः इमे सुखदुःखयोनयो देहास्तत्त्वदर्शिभिरंतवंतः क्षणभंगुराउक्ताः घटांतर्गताकाशस्य घटाइव व्यापकस्यैव बहुभिः स्वरूपैर्नदतो न तस्य त्वर्थः यस्मादेवं तस्माद्वीभत्सेणादिव्यविषये विगतज्वरो भूत्वायुध्यस्व युद्धं ऊरुषयद्धा हूमेस्वभावस्यायामनुभूयमानाडद्वावचदेहाद्यंतवंतो जाग्रदवस्थायां न स्वप्नाडकावेदेन प्रतिपादिताः सैनिकस्य शारीरिणः तच्छस्य तस्य तस्य शोचं पूर्ववत् तदुक्तं स्वप्ने तल्पगतो येन स्वप्नदेहं पिशातपथी अथैतत्स्वप्नयाचरति तेहास्यलोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छतीति भास्थानानि शेषं स्पृष्टं तदुक्तं स्वप्ने यथा पश्यति देहं मोहः शमित्यादि

वे॰
ध॰

वनमाली टीका ॥

नन्वनादित्वाच्चेतनत्वात्स्वतंत्रत्वाच्चेश्वरस्यास्तु नित्यत्वं नत्वप्रति
बिंबस्य जीवस्य तत्सदृशत्वेपि कथं नित्यत्वं प्रतिबिंबस्यानित्य
त्वनियमात् प्रतिबिंबत्वं जीवस्य रूपं रूपं प्रतिरूपो बभूव ए
कधा बहुधा चैव दृश्यते जलचन्द्रवदिति श्रुतिसिद्धमत आह
अंतवंत इति नित्यस्य शरीरिणो जीवस्य मे बाल्ययौवनाद्यव
स्थाभेदेन भिन्नाः परिणामित्वेन प्रत्यक्षसिद्धा देहा अंतवंतः
नाशवंतः परिणामित्वाद्दीपकलिकावत् श्रुतिभिरुक्ताः
अस्य जीवसमूहस्य मे प्रत्यक्षसिद्धा देहा अंतवंत इत्यर्थः
नित्यस्य देहा अंतवंत इत्युक्ते परमेश्वरदेहस्याप्यनित्यत्वप्र
सक्तेतातः शरीरिणः शीर्यत इति शरीरं तत्स्यास्तीति शरीरी तत्
स्येश्वरदेहस्य शीर्यमाणत्वाभावात् नित्यत्वे हेतुरनाशिनः
नाशशून्यस्य तत्र हेतुरप्रमेयस्य प्रमातुः न ह्यात्माप्रमेयत
योपलभ्यते पित्विदमहं जानामीति प्रमातृतयैवानुभूय
ते नवादेहादेरिव प्रदेशभेदे प्रमातुराकारभेदः उपलभ्यते
अतएकरूपत्वेनानुपचयात्मकत्वात्प्रमातृत्वादात्मा नित्यः
देहस्तूपचयात्मकत्वाच्छरीरिणो भोगायतनत्वादनेकरूप
त्वाच्चानित्यः रूपं रूपं प्रतिजीवं जीवं प्रत्यंतर्यामितया प्रति
नि^ रूपो मत्स्यादिवत्तिर्यैर्नियामकतावद्रूपे हरिरभिव्यक्तो बभू
व एकधा मुख्यरूपेण बहुधा नियामकरूपैर्दृश्यते यथापा
त्रादिस्थजलभेदेनैकश्चंद्रो नाना दृश्यते तथैकोप्यनेकनि
यामकरूपैः सत्यैर्नित्यैश्चाभिव्यक्तो भवतीत्यर्थः एकस्य
नित्यत्वात्तत्वानेकरूपत्वं त्वचिंत्यशक्त्योपपन्नं प्रसिद्धं हि षो
डशसहस्रसंख्याकानां विवाहे रासमंडले चैकस्यानेकरूप
त्वं अतो नित्यस्वभावयोरपि देहदेहिनोर्न शोकविषयत्वमितिश
स्त्रपातादिपरुषस्पर्शानवर्जनीयान् धैर्येण सो[ढव्या]स्तत्वाश

ढव्याश्र^

घे^

गी॰
टी॰
द्वि॰

शामयेफलेछा रहितंशुद्धात्वंसेवोचितंकर्मारंभस्वयंपञ्च पंचकोशा
पवदेहरूपेदेनोक्ताः तथाहिपंचीकृतमहाभूततत्कार्यात्मकोविरा
ट्स्थूलतेराशिरन्नमयःकोशःस्थूलसमष्टिस्तत्कारणीभूतोपंचीकृत
पंचमहाभूततत्कार्यात्मकोहिरण्यगर्भः सूत्रंमूर्तराशिः सूक्ष्म
समष्टित्रयंवा इदंनामरूपंकर्मेतिबृहदारण्यकोक्तः प्राणात्म
कः सकर्मात्मकत्वेनक्रियाशक्तिमात्रमादायप्राणमयःकोशः
ज्ञानात्मकत्वेनज्ञानशक्तिमात्रमादायमनोमयःकोशःरूपात्म
कत्वेनतदुभयाश्रयतयाकर्तृत्वमादायविज्ञानमयंकोशः तत
प्राणमयमनोमयविज्ञानमयात्मकमेकमेवहिरण्यगर्भाख्यं
लिंगशरीरंकोशः तदेतत्तुभूतस्तुमायोपहितचैतन्यात्मासर्वसं
स्कारशेषोव्याकृतनामाविद्यानंदमयकोशइतितत्र अन्नमयादेव
स्त्वेनतस्माद्ब्रह्मतोकिंविनाशिममब्रह्मत्वेनोपदेशासंभवात्
एकैकंनिरासायैतत्पूर्वपूर्वस्योत्पादनमस्योक्तत्वात् तस्मादानंदमयादन्यश्चेतरआत्मान्तरमयइत्यानेदमयोनतस्मुक्तो
निपंवभगवद्रूपात्एवयेनब्रह्मेत्सुपदेशाभावाच्च अतोन्नमयादी
शानंदंब्रह्मणो विद्वान् विज्ञानेनब्रह्मसमेतयेआनंदंब्रह्मणोपासना
श्रुत्याभ्यासात् नचाभ्यासादिनाब्रह्मशब्दाभ्यासादन्नमयादेः कथं
ब्रह्मत्वसिद्धिरितिवाच्यं यथाहिज्योतिष्टोमादिकाः एवसंतेत
तेनज्योतिषायजेतेति ज्योतिःपदमेवज्योतिष्टोमाभ्यासवा
लविशेषविधानपरंतथानंदमयाधिकावेपठितानंदा
देःसङ्ग्राम्यमानेब्रह्मपदमानंदमयादेर्ब्रह्मत्वविधानपरं
नचब्रह्मपुच्छंप्रतिष्ठेतिब्रह्मपदसमभिव्याहारात्पुच्छमेवब्रह्म
तिवाच्यं तस्यप्रियमेवशिरः मोदोदक्षिणःपक्षः प्रमोदउत्तरः
पक्षःआनंदआत्माब्रह्मपुच्छंप्रतिष्ठेतिब्रह्मपदसमभिव्याहारानंदा
त्पुच्छमेवत्यानंदमयपरेदत्तपुच्छत्वेनावयवत्वेनपाठादानं

न२९

वस्तुत्वात् अवयवापेक्षयावयविनः पूर्णत्वात् वस्तुतस्त्वबु-
त्स्तोऽध्यवतरणाय पत्तित्वेनानंदरूपस्य ब्रह्मणो हि रूपकमा-
त्रं कृतं सर्वत्रात्र प्राचुर्ये मयट् न तु विकारे मयड्वैतयोर्भाषाया-
मिति सूत्रेण विहितस्य विकारार्थस्य मयटोऽद्वक्ताद्वैते संभ-
वात् न च ब्रह्म पुच्छं प्रतिष्ठेति प्रतिष्ठाशब्दसमभिव्याहारात् पुच्छं
ब्रह्मेति वाच्यं आनंदात्मेत्यात्मपदोक्तानंदस्याधारापेक्षाभा-
वात् अन्यावयवसाधारणपुच्छस्य कल्पनानंदाधारत्वासंभवा-
च्च नहि कल्पनस्य पक्षिणः पुच्छमेवाधारः पक्षिणां सर्वावयवे-
षु पुच्छस्य प्राधान्याभिप्रायेण प्रतिष्ठापदं तस्मात्सर्वावयवाश्रितपु-
च्छेन प्रतितिष्ठति पुच्छेनैव प्रतिष्ठायोत्पततीति प्रतिष्ठा हि पुच्छ-
मित्येतद्वीयोक्तेः स य एवंवित् अस्माल्लोकात्प्रेत्य एतमन्नमयमा-
त्मानमुपसंक्रम्य एतं प्राणमयमात्मानमुपसंक्रम्य एतं वि-
ज्ञानमयमात्मानमुपसंक्रम्य एतमानंदमयमात्मानमुपसंक्र-
म्य इमान् लोकान् कामान्नी कामरूप्यनुसंचरन् एतत्साम गाय-
न्नास्ते इति श्रुतौ ब्रह्मविदोऽत्र मयादिप्राप्तिरुक्ता नहि ब्रह्मवि-
दो ब्रह्मप्राप्तिर्युक्ता तस्मादपि विनिर्मुक्ताः अनिरुद्धतनौ स्थि-
ताः ततो मुक्ता मूर्त्तिं त्यक्त्वा प्रद्युम्नस्य तनौ स्थिताः प्रद्युम्नाच्च
विनिर्मुक्ता जीवं संकर्षणं ततः ततस्त्रैगुण्यहीनास्ते परमात्मा-
नमंजसा एकांतभावोपगता वासुदेवं विशंति ते इति मोक्षध-
र्मोक्तरीत्या कस्यापि रूपभेदेन क्रमेण प्राप्तिर्युक्ता ततस्त्वस्या-
धिष्ठस्यानापेक्षया अन्यत्रेतरात्मत्येकस्यैवानन्यत्वात् तदेवं-
कमुपपद्यते नहि ज्ञातायज्ञनेरेव वरुणं पितरमुपससार अधी-
हि भगवो ब्रह्मेति भृगुः स्वरूपमतिक्लेक(?) गुणविशिष्टमुक्त्वा
निदिध्यासने न साक्षात्कारस्य गुणांतरविशिष्टविज्ञाने प्रकृत-
वचने मयडित्यनेन सूत्रेण प्राचुर्ये मयड्विधीयते अयनेति-
त्रभूतानि तदन्नमिति श्रुतेः तस्माद्यत्वमुपजीव्यत्वं तत्प्राचुर्ये
ब्रह्मण्येव प्राणं प्रतिवेष्टयतीति प्राणः प्राणेन प्राचुर्यं च तत्रैव

गी. टी. द्वि.

126

मतुज्ञाने मनः सामान्यज्ञाने विज्ञाने विशेषज्ञाने तत्साधुर्यमपि
तेनैव न च ब्रह्मणमयोग्यम इत्यादावल्पब्रह्मणवदल्पानं
दस्यापत्तिरिति वाच्यं प्रकाशमयः सवितेत्यादौ व्यधिकरणज्ञी
वगतानेदोषत्वैव भूयस्त्वोपपत्तेः नह्नि म्लत्वमयः पुरुष इत्यत्र
तत्रिं दुःखमपि भासते यत्तु तस्यैव पव शारीर आत्मा यः पूर्वस्य
ति तस्य प्राणमयस्यैष एव शारीरे भवः शारीर आत्मा यः सत्यंज्ञा
नमित्यादिना गुहानिहितत्वेनोक्तः सर्वस्यान्नमयस्यैवं प्राणम
यमनोमयविज्ञानमयानंदमयेषु योज्यं तथा चान्नमयादी
नामात्मानंतरोक्तानात्मत्वं सिद्धमिति तत्र चैतन्यमस्य सहू
सच्चिदस्याकार इत्यादिविग्रहः सर्वस्यान्नमयादेरात्मास्वरूपं सप
वप्राणमयादेरित्यर्थात् शारीरे भवत्वं उत्पत्तिर्हि न जीवस्य
विद्यमानत्वं ब्रह्मणोपपत्ति जीवस्याहमिति प्रत्यक्षसिद्ध
त्वेनोपदेशवैयर्थ्यात् सत्यंज्ञानमित्यादिनाष्टुइं ब्रह्मणः का
रस्य मध्यब्रह्मविषयकं श्रा उत्पादनायोगाच्च किंच सत्यंज्ञान
मनंतं ब्रह्मेति प्रकृतं तच्छुद्धं ब्रह्म तस्माद्वा एतस्मादात्मनः आका
शः संभूत इत्यात्मपदेन निर्दिश्यमानाकाशादिकारणत्वं च प्रति
पाद्यानंतरं निरतिशयानंदत्वेन तस्यात्मत्वविवरणार्थं प्रवृत्त
तस्य संदर्भस्य तत्रैव समर्पनात् तदनंतरं तस्माद्वा एतस्मा
दमयादन्योंतर आत्मा ब्रह्मैक्यपदेशाभावेन चानंदमयपदब
स्य सोकामयतेत्यनेन तरवाक्यस्थेन तच्छब्देन पुंल्लिंगेन न प
ब्रह्मपरत्वयात्वदभिमतेन नाव्यवहितोपास्थितानंदमयस्य
हि परामर्शीन तद्ग नपुंसकलिंगब्रह्मपदार्थस्य किंच सत्यं
नादिशब्दैः स्वरूपमात्रं बोध्यते सत्यत्वादयो यथर्मा वा यपर्यो
यत्वापत्तिस्तथा च परां तर वैपर्थ्यं द्वितीये तद्धानिः नत्व
घासत्यत्वादिकं बोध्यते कृतिबाधस्य मिथ्यात्वासंभवात्
नच श्रुतेस्तत्र तात्पर्याभावः अलौकिकब्रह्मनित्यसत्यत्वा
दौ तात्पर्याभावेन तदसिद्ध्यापत्त्यापर्यायत्वानिस्तारात् नच

या०

स०

लक्षणयाखंडब्रह्मपरंवाक्यं क्वचिदशक्तस्यपदस्यलक्षणासंभ
वात् नचविशिष्टशक्तस्य शक्तिजन्यबोधाविषयस्वस्वरूपा-
भिन्नस्यलाक्षणिकबोधविषयत्वेहेतुत्वाज्ञानेऽविषयत्वेलक्षण
वैयर्थ्यात् गंगापदलक्ष्यस्यतीरस्यागंगात्वस्मृत्यादिपदल
क्ष्यस्यासत्यत्वायापत्तेः १८ ॥ वै०

अस्तमेवैजयन्ती टी० ॥ स्ये

देहानांतुजन्मादिषड्विकारवत्त्वाद्विनाशो वेत्याह अन्तव
न्तइति इमेऽपरोक्षविषयाः देहाः घटादयइवोपचयापचया
त्मकाः स्वरनराद्याकाराः अन्तवन्तः विनाशवन्तः अन्तवन्तइ-
त्युपलक्षणं जन्मादिषड्विकाराणां जायतेऽस्तिवर्द्धतेविपरि-
णमतेऽपक्षीयतेविनश्यतीतिषड्भावविकाराः विद्यन्तेयेषांते
ऽन्तवन्तः यद्वा अन्तंतिस्वस्वविषयैर्वध्नन्तीत्यन्तानींद्रियाणि
तानिविद्यन्तेयेषुतेऽन्तवन्तः यद्वा अन्तंतनिबध्नातीत्यंतंमन
तद्विद्यतेयेषुतेऽन्तवन्तः मनएवमनुष्याणांकारणंबंधमो
क्षयोरितिवचनात् उक्ताः कथिताः तत्वदर्शिभिरितिशेषः
बहुवचनेनप्राकृताएवदृश्यन्तेनत्वप्राकृताः यतस्तेषांप्रकृ
तिकालकर्मादिजन्यत्वाभावात् ननुगुणत्रयाद्व्यभिन्नत्वे
सतिशुद्धमायाकार्यत्वमप्राकृतत्वमितितल्लक्षणेनतेषा
मपिशुद्धमायाजन्यत्वात्तेपि अन्तवन्तइतिचेन्न आदित्यवर्णं
तमसःपरस्तादितिश्रुत्यातमःशब्दवाच्याभ्यांप्रकृतिकाला
भ्यांपरः विलक्षणइत्युक्तत्वात्तेपिनित्याएवननाशित्वशंका
योग्याइतिभावः देहाः कस्येत्यपेक्षायामाह नित्यस्यबद्धस्तु
नाएवस्याशासाम्प्रच्युतस्वरूपस्यदेहाद्देहान्तरंगच्छत्य
पिसदैकरसस्वरूपस्येतिवा शरीरिणः शीर्यतेऽत्रपतेइति
शरीरंनविद्यतेयस्यसः शरीरीतस्यनतुशीर्यमाणशरीरस्य
संबंधीचेन्नर्हितेनसहात्मापिशीर्णभावमाप्नोतीतिचेन्नत्रा

गी॰
टी॰
द्वि॰

१२७

ह अविनाशिनः देहानांविनाशशीलत्वेपिविनाशत्वाभाव
स्वभावस्य अतएवाप्रमेयस्यप्रमेयत्वेनानुपलभ्यमानस्यप्र
त्यक्षप्रमाणाविषयस्यप्रमाणतः ज्ञातुरित्यर्थः एतद्योवेत्तिं
शाङ्कः तेषग्रहाइतितद्विदः इतिवक्ष्यमाणेन यस्माद्देहात्मनोः
सत्यत्वेपिदेहानांविकारित्वनाश्रयत्वादनित्यत्वंआत्मनस्तु
विकारित्वनाश्रयत्वाभावान्नित्यत्वंचविद्यते तस्मात्तयोर्ना
शित्वानाशित्वस्वभावंज्ञात्वाशोकंचत्यक्त्वायुध्यस्वयुद्धंकुरुष्व
भारतेतिसंबोधनेनयथाभरतमारभ्यत्वत्पितृपर्यन्तास्सर्वे
मृताअपितेषांशोकंनकरोषि तथैतेभीष्मादिदेहाःअपिप
तिष्ठन्त्येवनात्मानोऽतएवामप्युभयेषांशोकंमाकुरुष्वेति १८

मधुसूदनी टीका ॥

अंतवंतोविनाशिनोइमेऽपरोक्षादेहाःउपचितापचितरूपत्वा
च्छरीराणिबहुवचनात्स्थूलसूक्ष्मकारणरूपाविराट्सूत्रा
व्याकृताख्याः समष्टिदृष्ट्यात्मनः सर्वेनित्यस्याविनाशि
नएवशरीरिणःआध्यात्मिकसंबंधेनशरीरवतःएकस्यात्म
नःस्वप्रकाशस्फुरणरूपस्यसंबंधिनः दृश्यत्वेनभोग्यत्वेन
चोक्ताः श्रुतिभिर्ब्रह्मवादिभिश्च तथाचैतेतैत्तिरीयके अन्नमया
द्यानंदमयांतान्पंचकोशान्कल्पयित्वातदधिष्ठानमकल्पि
तंब्रह्मपुच्छंप्रतिष्ठेतिप्रदर्शिते तत्रपंचीकृतपंचमहाभूत
तत्कार्यात्मकोविराट्स्थूलराशिरन्नमयकोशः स्थूलसमष्टिः
तत्कारणीभूतोऽपंचीकृतपंचमहाभूततत्कार्यात्मकोहिर
ण्यगर्भःसूत्रमसूर्तराशिः सूक्ष्मसमष्टिः त्रयंवाइदंनामरूप
कर्मेतिबृहदारण्यकोक्तः सूत्रात्मकः सर्वकर्मात्मकत्वेन
क्रियाशक्तिमात्रमादायप्राणमयकोशउक्तः नामात्मकत्वे
नज्ञानशक्तिमात्रमादायमनोमयकोशउक्तः रूपात्मका
त्वेनतदुभयाश्रयतयाकर्तृत्वमादायविज्ञानमयकोशउ

+ नत्रस्फुरणरूपस्यस
तःकथमविनाशित्वंत
स्यदेहधर्मत्वात् देहस्य
चानुत्तरणंविनाशादित्य
त्रचैतन्यवादिनस्ता
त्रिराकृतंत्रासतोविद्यते
भावइत्येनद्विद्वुणेति +
२४

क्तः ततःप्राणमयमनोमयविज्ञानमयात्मैक[illegible]एवहिरण्य
गर्भाख्योलिंगशरीरकोशः तत्कारणीभूतस्तुमायोपहितचैत
न्यात्मासर्वसंस्कारशेषोऽव्याकृताख्यआनंदमयकोशः सर्वेषां
संस्काराणांशेषोयस्मिन् तेचसर्वेएकस्यैवात्मनःशरीराणी
त्युक्तं तस्यैषएवशरीरआत्मायःपूर्वस्येति तस्यप्राणस्यैषएव
शरीरेभवःशारीरआत्मायःसत्यज्ञानादिलक्षणोगुहानिहित
त्वेनोक्तःपूर्वस्यान्नमयस्य एवंप्राणमयमनोमयविज्ञानमया
नंदमयेष्वपियोज्यं अथवाइमेसर्वेदेहास्त्रैलोक्यवर्तिसर्वप्रा
णिसंबंधिनएकस्यैवात्मनउक्ताइतियोजना तथाचश्रुतिः
एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मा कर्मा
ध्यक्षःसर्वभूताधिवासःसाक्षीचेताःकेवलोनिर्गुणश्चेतिस
र्वशरीरसंबंधिनमेकमात्मानंनित्यविभुंदर्शयति नन्वनित्य
त्वेयावत्कालस्थायित्वंतथाचाविद्यादिवत्कालेनसहना
शेपितदुपपन्नमित्यतआह अनाशिनइति देशतःकालतो
वस्तुतश्चपरिच्छिन्नस्याविद्यादेःकल्पितत्वेनानित्यत्वेपियाव
त्कालस्थायित्वरूपमौपचारिकंनित्यत्वंव्यवह्रियते यावद्वि
कारंतुविभागोलोकवदितिन्यायात् आत्मनस्तुपरिच्छेद
त्रयशून्यस्याकल्पितस्यविनाशहेतोरभावान्मुख्यमेवकूटस्थ
नित्यत्वं नतुपरिणामिनित्यत्वंयावत् कालस्थायित्वंवे
त्यभिप्रायः नन्वेतादृशेदेहिनिकिंचित्प्रमाणमवश्यंवाच्य
मन्यथानिष्प्रमाणस्यतस्यालीकत्वापत्तेःशास्त्रारंभवैयर्थ्या
पत्तेश्च तथाचवस्तुपरिच्छेदोदुष्परिहरःशास्त्रयोनित्वादिति
न्यायाच्च अतआह अप्रमेयस्येति एकधैवानुद्रष्टव्यमेतदप्र
मेयंध्रुवं नतत्रसूर्योभातिनचंद्रतारकं नेमाविद्युतोभांति
कुतोयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंवि
भातीतिश्रुतेः स्वप्रकाशचैतन्यरूपएवात्माअतस्तस्यसर्वभा

गी॰
टी॰
द्वि॰

१२८

सकस्य स्वभावार्थेन स्वभास्यापेक्षा किंतु कल्पिताज्ञानतत्कार्य
निहत्यर्थकल्पितहृत्तिविशेषापेक्षा कल्पितस्यैव कल्पितविरो
धित्वात् यत्रात्ररूपोबलिरितिन्यायात् तथाच सर्वकल्पितनि
वर्तकहृत्तिविशेषे स्यार्थशास्त्रारंभस्तस्य तत्वमस्यादिवाक्य
मात्राऽधीनत्वात् स्वतःसर्वदाभासमानत्वात् सर्वकल्पनाधि
ष्ठानत्वाद्रूपमात्रभासकत्वाच्च न तस्य तुच्छत्वापत्तिः तथाचै
कमेवाद्वितीयं सत्यं ज्ञानमनंतं ब्रह्मेत्यादिशास्त्रमेव स्वप्रमेया
त्रेयेन स्वस्यापि कल्पितत्वमापादयति अन्यथा स्वप्रामाण्या
नुपपत्तेः कल्पितस्य चाकल्पितपरिच्छेदकत्वेनास्तीति प्राक्
प्रतिपादिते आत्मनः स्वप्रकाशत्वे च युक्तितोपि भगवत्पूज्य
पादैरुपपादिते तथाहि यत्र जिज्ञासोः संशयविपर्ययव्यतिरेक
प्रमाणमन्यतममपि नास्ति तत्र तद्विरोधिज्ञानमिति सर्वत्रद्ट
ष्टं अन्यथातित्रयान्यतमापत्तेः आत्मनि चाहं वा नाहं वेति न क
स्यचित् संशयः नापि नाहमिति विपर्ययः व्यतिरेकप्रमा वेति
तत्स्वरूपप्रमा सर्वदास्तीति वाच्यं तस्य सर्वसंशयविपर्यय
धर्मित्वान्नधर्मांशे सर्वमभ्रांतं प्रकारे तु विपर्यय इति न्यायात्
अन्तःपदार्थे प्रमाणमप्रमाणं च प्रमाभासस्तथैव च ऊर्ध्वत्वे
वप्रमा यत्र तदसंभावनाकृतमिति प्रमाभासःसंशयःस्वप्रका
शेसद्रूपेधर्मिणिप्रमाणाप्रमाणयोर्विशेषो नास्तीत्यर्थः
त्मनो भासमानत्वे च घटज्ञानमपि ज्ञातं नवेत्यादिसंशयःआ
यःस्यात् नचांतरपदार्थविषयस्यैव संशयादिप्रतिबंधकत्वं
स्वभावःकल्प्यः बाह्यपदार्थेप्यनेन विरोधिज्ञानेनैव संशयादि
प्रतिबंधसंभवे आंतरपदार्थस्वभावभेदकल्पनायामप्रमाणत्वा
त् अन्यथा सर्वविप्लवापत्तेः आत्ममनोयोगमात्रं चात्ममानस
त्वाद्धेतुः तस्य च ज्ञानमात्रे हेतुत्वात् घटादिभानेप्यात्मभानं
समहालंबनेन्यायेन तार्किकाणां अवश्यं पि दुर्निवारं नचा

त्-गादुधा

वात्त्वघटत्वमानसत्वादिसंकरः लौकिकालौकिकत्ववदंशभे
देनोपपत्तेः संकरस्यादोषत्वाद्जातित्वानभ्युपगमाद्वा अत्र तप
व्यवसायमात्रपवात्मभानसामग्र्या विषमाणत्वादनुव्यव
सायोपपत्तेः नचव्यवसायभानार्थं स्वस्यप्रदीपवत्स्वव्य
वहारे सजातीयानपेक्षत्वात् नहि घटतज्ज्ञानयोरिवव्यवसा
यानुव्यवसाययोरपि विषयत्वविषयित्वव्यवस्थापकं वैजा
त्यमस्ति व्यक्तिभेदातिरिक्तवैधर्म्यानभ्युपगमात् विषयत्वा
वच्छेदकरूपेणैव विषयित्वाभ्युपगमे घटयोरपि तज्ञावाप
त्तिरविशेषात् ननु यथा घटव्यवहारार्थं घटज्ञानमभ्युपेय
ते तथा घटज्ञानव्यवहारार्थं घटज्ञानशब्दप्रयोगस्य विष
यज्ञानमभ्युपेयं व्यवहारस्य व्यवहर्तव्यज्ञानसाध्यत्वादिति
चेत् कानुपपत्तिरुद्भाविता देवानांप्रियेण स्वप्रकाशवादि
नः नहि व्यवहर्तव्यभिन्नत्वमपि ज्ञानविशेषणं व्यवहारहे
तुतावच्छेदकं गौरवात् तथा चेश्वरज्ञानवद्योगिज्ञानवत्स्व
मयमिति ज्ञानवत्त्वेनैव व्यवहारोपपत्तौ न ज्ञानान्तरकल्प
नावकाशः अनुव्यवसायस्यापि घटज्ञानव्यवहारहेतुत्वं
किं घटज्ञानत्वेन किं वा घटज्ञानत्वेनैवेति विवेचनीयं उभय
स्यापि तत्र सत्वात् तत्र घटव्यवहारे घटज्ञानत्वेनैव हेतुता
याः क्लृप्तत्वात्तेनैव रूपेण घटज्ञानव्यवहारेपि हेतुत्वोपप
त्तौ न घटज्ञानज्ञानत्वेन हेतुत्वावच्छेदकं गौरवानुमानाभावा
च्च तथा च नानुव्यवसायसिद्धिः एकस्यैव व्यवसायस्य व्यव
सातरि व्यवसाये व्यवसाये च व्यवहारजनकत्वोपपत्तेरिति
त्रिपुटीप्रत्यक्षवादिनः प्रभाकराः औपनिषदास्तु मन्यन्ते स्व
प्रकाशज्ञानरूप एवात्मा न स्वप्रकाशज्ञानाश्रयः कर्तृकर्म
विरोधेन तज्ज्ञानानुपपत्तेः ज्ञानभिन्नत्वे घटादिवज्जडत्वेन क
ल्पितत्वापत्तेश्च स्वप्रकाशज्ञानमात्रस्वरूपोपात्मा विषयोप

गी॰
टी॰
द्वि॰

129

ह्रितःसन्प्रमातेत्युच्यते वृत्तिमदंतःकरणोपहितःप्रमातेत्यु
च्यते तस्यचक्षुरादीनिकरणानि सचक्षुरादिद्वारांतःकरण
परिणामेनघटादीन्व्याप्यतदाकारोभवति एकस्मिंश्चांतः
करणपरिणामेघटावच्छिन्नचैतन्यमंतःकरणावच्छिन्नचैत
न्यंचैकलोलीभावापन्नंभवति ततोघटावच्छिन्नचैतन्यंप्रमा
त्रभेदात्स्वाज्ञानंनाशयदपरोक्षंभवति घटंचस्वावच्छेदकं
स्वतादात्म्याध्यासाद्भासयति अंतःकरणपरिणामस्वरूपत्वा
त्तिस्वच्छःस्वावच्छिन्नेनैवचैतन्येनभास्यतइति अंतःकरणतद्वृ
त्तिघटानामपरोक्षता तदेतदाकारत्रयमहंजानामिघटमि
ति भासकचैतन्यस्यैकरूपत्वेपिघटंप्रतिवृत्त्यपेक्षत्वात्प्रमा
तृता अंतःकरणतद्वृत्तीःप्रतितदनपेक्षत्वात् साक्षि
तिविवेकः अद्वैतसिद्धौ सिद्धांतबिंदौचविस्तरः यस्मादेवं
त्माउक्तन्यायेननित्योविभुरसंसारीसर्वदैकरूपश्चात्मातस्मा
त्तन्नाशशंकयास्वधर्मेयुद्धेशोकप्रवृत्तस्यतवतस्मादुपर
मोनयुक्तइतियुध्यस्वेत्यभ्यनुज्ञामात्रंभगवानाह तस्माद्युध्यस्वभार
त अर्जुनस्यस्वधर्मेयुद्धेप्रवृत्तस्यततउपरतिकारणेशोक
मोहौ तौचविचारजनितेनविज्ञानेनबाधिताविति अपवादा
पवादेउत्सर्गस्यस्थितिरितिन्यायेनयुध्यस्वेत्यनुवादोनवि
धिः यथाकर्तृकर्मणोःकृतीत्युत्सर्गःउभयप्राप्तौकर्मणी
त्यपवादः अकाकारयोःस्त्रीप्रत्यययोर्योगेनेतिविकल्पेनाभि
ति तदपवादः तथाचस्तुतोर्ब्रह्मणोजिज्ञासेत्यत्रापवादा
पवादेउत्सर्गस्थितेःकर्तृकर्मणोःकृतीत्यनेनैवषष्ठी
षष्ठीसमासःसिद्धोभवति कश्चित्तस्मादेवविधेर्मोक्षकर्म
कर्मणोःसमुच्चयइतिप्रलपति तद्युद्धस्यस्वधर्मत्वेन
नकर्मसमुच्चयमात्रत्वात्प्रतीतेः विस्तरेणचैतदग्रेभगवा

गीतावचनविरोधेनैव निराकरिष्यामः ॥ [illegible]

[illegible] १८ ॥

सदानंदी टीका ॥

नासतो विद्यते भाव इत्येतद्विवृणोत्यजः स्वप्नमायाशरीरादि
वदेहनेकल्पिता जडाः १ देहा विनाशिनः सर्वे देवतिर्यङ्नराद-
यः नित्यस्यानाशिनो ध्वस्तदेहद्वयस्य चात्मनः २ दृश्यत्वेन
दृशः प्रोक्ताः श्रुतिभिर्ब्रह्मवादिभिः नित्यत्वस्य च नाशस्य द्वि-
विधत्वात्तयोर्यथा ३ भस्मीभूतो मृतो देहो नष्टश्चादर्शनं गतः
नद्वावाहत्यर्थमत्रोक्तं नित्यस्येति शरीरिणः ४ यथाकाशादि
[illegible]को देहो नष्ट इतीर्यते तन्नेहत्यर्थमत्रोक्तमनाशिन इति
स्फुटं ५ अन्यथा परिणाम्येवानित्यः क्षीरादिवद्भवेत् नित्यः
कूटस्थ आत्मेति सिद्धमित्याशयो हरेः ६ नन्वेतादृशचिद्रूपे
मानमस्ति न वास्ति चेत् भास्यत्वेन जडत्वं स्यान्नेहं स्यादपि घटा
दिवत् ७ नास्ति चेत्तर्ह्यलीकत्वं खपुष्पादेरिवास्य च इत्यत्राह
प्रमेयस्यापरिच्छेद्यस्य वस्तुनः ८ स्वप्रकाशस्य चिद्धातोर्मा
नापेक्षा स्वभासने नास्ति सर्वावभासस्य मानेनेतेनावभास्यते ९
स्वमानार्थं स्वभासस्यापेक्षा नैवोपपद्यते स्वप्रकाशस्वभाव
स्य मानाभावेऽपि न क्षतिः १० मानाभावेऽप्यलीकत्वनियमोऽ
स्ति जडे हि ते अन्यथा स्यादलीकत्वं मानस्याप्यवभासिनः ११
मातृमानप्रमेयाणां यौगपद्येन भासकः साक्षी तत्र प्रमाण
स्यापेक्षा नास्यादित्यहो भ्रमः १२ प्रमाणमप्रमाणं वा प्रमाभा-

सत्यथैवच ऊर्ध्वंत्येवप्रमायत्रनदसंभावनाकृतः १३ इत्युक्तं
संप्रदायज्ञैर्वार्त्तिके श्रीसुरेश्वरैः नन्वपार्थस्तदाशास्त्रारंभोमा
नानपेक्षणे १४ शास्त्रयोनित्वसूत्रस्यैववैयर्थ्यंचेतिचेन्नहि ।
कल्पिताज्ञानतत्कार्यनिवृत्त्यर्थमपेक्ष्यते १५ कथितंमान
मेतेनस्वप्रकाशस्यकाक्षतिः कल्पितस्यैवसाजात्यात्कल्पि
तस्यविरोधिता १६ विरुद्धयोरधिष्ठानभूतस्यनविरोधिता ।
तथाचकल्पितस्यैवाज्ञानादेर्विनिवर्तकः १७ वृत्तिभेदस्तु
त्वन्यैःशास्त्रारंभोपिसार्थकः तस्यतत्त्वमसीत्यादिवाक्यार्थी॰
ननतैवच १८ शास्त्रयोनित्वसार्थक्यंतस्मात्सच्चित्सुखात्म॰
नः सर्वदाभासमानत्वात्स्वतःसिद्धस्यभास्वतः १९ सर्वाधि
ष्ठानभावेनतत्कर्तृत्वंचनिराकृतं यस्मात्सर्वाक्रीत्यात्संवि
दात्माव्यापकोच्युतः २० सर्वदैकरसोनित्यस्ततस्तत्राशशो
कया स्वधर्मेशोकप्रवृत्तस्ययुद्धेतस्मान्नवायुना २१ ननुशो॰
कोपरतिस्त्वेवमाहयुद्धाभ्यनुज्ञया युध्यस्वेतिविधिर्नायं
पूर्वशास्त्रानुवादतः २२ ॥ १८ ॥

नीलकंठी टी॰ ॥

एवंसतआत्मनोनित्यत्वंअसतोदेहादेरनित्यत्वंचोक्तमुपसं
हरन्नर्जुनंयुद्धाभिमुखंकरोति अंतवंतइति यद्यपिनासतो
विद्यतेभावइतिअसतोदेहानांकालत्रयेपिसत्त्वंनास्तीतिप
रमार्थदृष्ट्याउक्तंतथापितांदृष्टिमप्रतिपद्यमानस्यनरका
दिभयमनुरुध्यमानस्यव्यवहाराभिप्रायेणनित्यानित्यवि॰
भागमभिप्रेत्यदेहानामंतवत्त्वमुच्यतइतिनदोषः नित्यत्वं
कालापरिच्छेद्यत्वंतच्चव्यवहारेणनभसोप्यस्तीत्यतउक्तं अ
नाशिनइतिनाशः अदर्शनंतद्वान्हिआकाशः नभआत्म
निलीयतइतिस्मृतेः अयंतुनतथेत्यनाशी सर्वदैवप्रका
शमानइत्यर्थः एतदपिनघटादिवद्दृश्यत्वेनेत्याह अप्रमे
यस्येति तथाचश्रुतिरात्मनोऽप्रमेयत्वमाह एतदप्रमयं॰

ध्रुवमिति अप्रमेयमित्यस्याप्रमेयत्वमित्यर्थः एतच्चात्मनि
प्रमाणाप्रसराज्ज्ञेयं तथा च श्रुतिः येनेदं सर्वं विजानाति तं
केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति प्रसिद्धि
त्वस्य प्रत्यगात्मत्वादेव यस्मात्तादृशपरोक्षाद्वयात्मा सर्वो
त्तर इति श्रुतेः उक्तं च प्रमाणमप्रमाणं च प्रमाभासस्तथैव च
व यत्प्रसादात्प्रसिध्यन्ति तदसंभावनाकृतमिति तस्माद्युध्य
स्व भारत भीष्मादिदेहानां मिथ्यात्वादनित्यत्वाच्च स्वयमे
व नष्टप्रायतया हनना निहन्यात्त्वया स्वधर्मो न नाशनीय इ
ति भावः १८ ॥

आनंदी टीका

अप्रमेयस्य देशकालादिभिरनवच्छिन्नस्यात एव नित्यस्य श
रीरिणः शरीरसमवेतस्यात्मनः इमे तु राश्रिता भीष्मादिदेहाः
अंतवन्तः देशकालादिभिरवयवविभागदर्शनाच्छिन्नस्वरू
पाः तस्माद्भीष्मादिजीवात्मनामविनाशित्वाद्युध्यस्वैतद्दे
हे स्वधर्मात्त्रिहन्तेऽपीनः षेणेन नियोजयतीति भगवान् १८ ।

+ तत्स्वरूपं प्रतिपद्यास्तत्स्वरूपं प्रतिपादयितु रामकंठी टीका। माह+

+सर्वेशरीरेषु सर्वावस्थासु चाविलुप्तोपलब्धृत्वमात्रैकलक्ष
+णत्वान्नित्या विनाशिनस्तथा देहादिभिरवच्छेत्तुमशक्यत्वा
दप्रमेयस्य यत्नादिकलनाविषयभूतस्य शरीरिण आत्मन
इमे तत्त्वदेहास्तद्विलक्षणा अन्योन्याभिघातागमापायिधर्मक
त्वाद्विनाशिनो विनश्वरस्वभावत्वात्तथा देशकालादिपरिच्छे
द्यत्वात् अंतवन्तः यत्नादिकलनाविषयभूता वयत्वमात्र
ए संबद्धा इति देहरूपस्य वस्तुनः परमार्थाविनश्वरस्यैतत्त्य
त्वमात्रादिनाहेतुनात्मसंबद्धस्य विनाशे सत्यात्मनोऽपि वि
नाशप्रतिपत्तिरविद्याविजृंभितेत्युक्तत्वयि नोपपन्ना अतोऽय
थाप्रतिपादितात्मतत्त्वप्रतिष्ठितोऽहंकारो वक्ष्यमाणयोप
पपत्त्या ध्यपरिहृत्य स्वकर्मानुतिष्ठन्युद्धात्मव प्रसक्तं समरक
र्म समाचरेति प्रथयुद्धं नाम परहननरूपतया हिंसात्मकं

कर्म तत्कथमहं युद्धज्ञानादिव्यलक्षणे घोरे कर्मणि प्रवर्ते
य इति यन्मन्यसे तदेतदात्मस्वरूपानभिज्ञत्वजनितमोहवि
लसितमेव [illegible]: १८ ॥

लासिकी टीका

अथात्मस्वभावमाह अन्तेति [illegible]
[illegible] सर्वदैकरूपस्य
आध्यात्मिकसंबन्धेन शरीरवतः देशतः कालतोऽपरिच्छिन्नस्य
वस्तुतस्त्वा अप्रमेयस्येति हिंसात्मके कर्मणि प्रवर्तयतीति यन्म
न्यसे तदेतन्न विलसितमित्याह युध्यस्वेति एतद्धि लक्षणे देश
कालादिपरिच्छिन्नः कश्चिदर्थः ईश्वरो वा देहादिवन्नाशयु
१८ ॥

शरीरिण

^ अप्रमेयस्य प्रतिज्ञादि
प्रमाणैर्देहादिवदपरि
च्छेद्यस्य तद्व्यतिरेकेण स्वपदा
र्थपरिच्छेदकायां यद्दृष्टं चि
त्तमीहते पादोद्देशो भ्रांतो
न स्यात्तत्त्वेयं वेदवीकल्पि
तैमस्तत्वेदः स्वादि धर्मकादे
हा प्रतिक्षणमवस्थान्तर
[illegible]भाक्त्वात्प्रमाणेनानन्तवंतः
स्व प्रमायादेहादिवन्नाश
युक्ताः अत आत्मनस्त्वप्र
तिष्ठामाश्रित्य

पंचोली टीका

यच्चात्मस्वरूपं स्वात्मसत्ताव्यभिचारिसामान्येनोक्तं तदपि वि
शेषतो दर्शयति अन्तवन्त इति हे भारत इमे देहाः नित्यस्य अ
विक्रियस्य अविनाशिनो विनाशरहितस्य अप्रमेयस्य प्रमाणा
तीतस्य शरीरिणः आत्मनः अन्तवन्तः अन्तो नाशो येषां ते अन्त
वन्तः नाशोऽपि लोके हि द्विविधः यथा देहो भस्मीभूत अदर्शनं गतो
नष्ट उच्यते विद्यमानोऽपि यथा अन्यथा परिणतो व्याध्यादि
कैर्नष्ट उच्यते तत्र अस्य आत्मनः अनाशिनः नित्यस्य हि द्विवि
धापि नाशेन संबंधो नास्ति १८ ॥

रणवीरसमिद्धोधिनी ॥

एवंस्वरूपं निर्णीयात्मस्वरूपं प्रतिपादयति अन्तवन्त इति नित्य
स्य सर्वेषु शरीरेषु सर्वावस्थास्ववाविलुप्तप्रमातृत्वमात्रैकलक्ष
स्यात एवानाशिनः प्रागभावध्वंसाभयाप्रतियोगिनो न एवा
मेयस्य देशकालादिभिः परिच्छेत्तुमशक्यत्वादियत्ताकल
विषयभूतस्य शारीरिणो देहिन आत्मन इमे सुखदुःखादिधर्म
लादिलक्षणा देहा अन्तवन्तो ध्वंसप्रतियोगिनः अत एव प्रागभा

प्रतियोगिनोपि प्रागभूतस्यैव विनाशप्रसक्तत्वात् एवं चात्मनो
नित्यत्वे देहादेरेव प्रत्यय विनश्वरत्वे चात्मनि विनश्वरत्वसंभावन
मप्यर्थानुभवविजृंभितत्वादनुपपन्नमिति भावः तस्मात्
तथोपपादितदेहदेहि विनाशिनित्यत्वज्ञानवांस्त्वं युध्यमानो यो
पपत्त्या दुःखादिद्वैरेव कर्मानुतिष्ठन्नुद्यत्स्वप्रकृतं समरकर्म सं
माचरेति १८॥

मधुभाष्य

अंतवंत इति प्रकृत तद्दिद्दर्पणनाशात्प्रतिबिंबनाशवदात्मना
शोऽस्त्यतआह नित्यस्येति शरीरिण इती स्वरव्याहृतये न
च नैमित्तिक नाशमित्याह अनाशिन इति कृतप्रमेयस्य
स्वरूपत्वात् नह्युपाधिबिंबमात्रनाशे प्रतिबिंबनाशः
सति च प्रदर्शके स्वयमेवादर्शकः चित्वात् नित्यश्चोपाधिः
कश्चिदस्ति प्रतिपत्तौ विभोरस्य नित्योपाध्यास्वरूपप्र
विरूपयाप्युतो जीवः केयवप्रतिबिम्बक इति भगवद्व
चनात् व्यवहारस्तु भ्रांत इत्याह १८॥

132

भाषा अनुवाद

उत्पत्ति विनाश धर्म विशिष्ट देहादि की अनित्यता देखावते हैं कि नित्य अर्थात् सदा एक रूपसे स्थित और इसीसे अविनाशी और अपरिमेय जानने जोग नही ऐसा देही कहे आत्मा है और स्वख दुख आदि धर्म विशिष्ट नश्वर विनाशी यह देह है ऐसा तत्वज्ञानी कहते हैं इसीसे जो स्वरूपसे आत्माका विनाश या स्वख दुख आदिका सम्बन्ध नही है तो मोह जनित शोक का परित्याग करिके युद्धमे प्रवृत्त होउ और अपना क्षत्रीका परम धर्म जो युद्ध सो करै छोडना नही १८ ॥

दोहा॥

अंत वंत कहि देह यह जीव नित्य की यह अविनाशी अप्रमाराकी पार्थयुद्ध करता तेह १८॥

133

यएनंवेत्तिहन्तारं यश्चैनंमन्यतेहतम् उभौ
तौनविजानीतो नायंहन्तिनहन्यते १९ ॥

शांकरभाष्यं ॥

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रंनप्रवर्तक
मित्येतस्यार्थस्य साक्षीभूतेऋचावानिनाय भगवान्यत्तम
न्यसे युद्धे भीष्मादयो मयाहन्यन्ते ग्रहमेव तेषां हन्तेत्येषा
बुद्धिर्मृषैव तेकथं यएनमिति यएनं प्रकृतं देहिनं वेत्ति
विजानाति हन्तारं हननक्रियायाःकर्तारं यश्चैनमन्योमन्य
ते हतं देहहननेन हतोहमिति हननक्रियायाःकर्मभूतं
तावुभौन विजानीतोनज्ञातवन्तौ ग्रविवेकेनात्मानमहंप्र
त्ययविषयं हन्ताहंहतोस्म्यहमिति देहहननेन ग्रात्मानं
यौविजानीतस्तावात्मस्वरूपानभिज्ञावित्यर्थः यस्मांदयमात्मा
हन्तिनहननक्रियायाःकर्ताभवति नचहन्यते नचकर्म
भवतीत्यर्थः ग्रविक्रियत्वात् १९ ॥

ग्रानंदगिरिकृतटीका ॥

ग्रविनाशित्व तद्धिद्धीत्यत्र पूर्वार्द्धेन तत्पदार्थसमर्थनमुत्त
रार्द्धेन निरीश्वरवादस्य परिणामवादस्य वा निराकरणमा
त्मनि जन्मादिप्रतिभानस्योपचारिकत्वप्रदर्शनमन्तवन्तइत्या
दिवचनमिति केचित् ग्रस्तु नामायमपिपन्थाःपूर्वोक्तस्य
गीताशास्त्रार्थस्योत्प्रेक्षामात्रमूलत्वं निराकर्तुंमंत्रद्वयंभग
वानानीतवानिति श्लोकद्वयस्यसङ्गतिंदर्शयति शोकमो
हादीति तत्रप्रथममंत्रस्यसङ्गतिमाह यत्त्विति प्रत्यक्षनि
बन्धनत्वादस्युष्मावुद्धेर्मृषात्वमयुक्तमित्याक्षिपति कथं
मिति प्रत्यक्षस्याज्ञानप्रसूतत्वेनाभासत्वात् तत्कर्तावुद्धि
र्भ्रमेति परिहरति यएनमिति य हन्ता चेन्मन्यते हन्तुं इ॰

त्याघाम्रवमर्थतोदर्शयित्वा आचष्टे यएनमिति हन्तारं हंतव्य
त्मानंमन्यमानस्य कथमज्ञानमित्याशंक्याह हन्ताहमिति।
हन्तृत्वादिज्ञानमज्ञानमित्येव हेतुमाह यस्मादिति आत्मनो
हननंप्रति कर्तृत्वकर्मत्वयोरभावे हेतुंदर्शयति अविक्रिय
त्वादिति १९ ॥

स्वामिकृतटीका ॥

तदेवंभीष्मादिमृत्युनिमित्तः शोकोनिवारितः यच्चात्मनोहंतृ
त्वनिमित्तंदुःखमुक्तं एतान्नहंतुमिच्छामितदपितद्वदेवनिर्नि
मित्तमित्याह यएनमिति एनमात्मानंहननक्रियायाःकर्ता
रंकर्मभूतंचवेत्तिकर्मत्ववत्कर्तृत्वमपिनास्तीत्यर्थः तत्रहेतु
र्नायमिति १९ ॥

यएनमिति

पैशाचभाष्यम् टी॰ ॥

नृ॰ एनंप्रकृतंदेहिनंवेत्तिहंतारं यश्चैनंमन्यतेहतं
देहहननेनहतोयमिति हननक्रियायाःकर्मभूतमात्मानं तावु
भौनविजानीतः अविवेकेनआत्मानमहंत्यपविषयेःयोविजा
नीतस्तावुभौचात्मस्वरूपानभिज्ञावित्यर्थः यस्मान्नायमात्मा
हंतिहननक्रियायानकर्तानहन्यते नचकर्मभवतीत्यर्थः
अविक्रियत्वात् ॥ १९ ॥

एवमुक्तस्वभावमात्मानं

रामानुजभाष्यम् टी॰

हेतुनाहंतमन्यते हननहेतुंयोमन्यते यश्चैनंकेनापि
सू॰ त्यत्वादयंनहननहेतुर्नहंति एवंचआत्मानहन्यते हंतिधा
तोरप्यात्मानकर्मत्वशरीरवियोगकरणवाचीनहिंस्यात्सर्व
भूतानीतिशास्त्रेणेनहंतव्यारत्यादीनपिशास्त्राणिनित्य
शरीरवियोगकरणविषयाणिउक्तैरेवहेतुभिर्नित्यत्वादपरिणा
त्वादात्मनोजन्ममरणादयः सर्वएवाचेतनधर्मानसंतीति
ने १९ ॥

अभिनवगुप्तकृतटी. ॥

एनमात्मानं देहं च यो हन्तारं हतं च वेत्ति तस्माज्ज्ञानेअतएव
सवज्ञः १९ ॥

परमार्थप्रपा टी.

अथ एतान्न हन्तुमिच्छामीत्यादिना यच्चात्मनो हन्तृत्वनिमित्तं
दुःखमुक्तं तदपि निर्निमित्तमित्याह य एनमिति एवमात्मनो
हननक्रियायां कर्मत्वं कर्तृत्वमपि नास्ति यद्वद्घटेनैव घट
स्फोटेन तदन्तर्गताकाशस्य कर्मकर्तृभावो नास्ति तत्र हेतु
माह नायमिति १९ ॥

वनमाली टी. ॥

ननु बन्धुविच्छेदनिमित्तकशोके पनीतेपि तद्वधकर्तृकत्व-
निमित्तके पापभयादेव शोकाभावात्पापाभावे च ब्राह्मण
वधादेः शोकाविषयात्पापानापत्ते न तोहं वधकर्ता न वा प्रेरक
इति द्वयोरपि हिंसानिमित्तकपापापत्तेरित्याशङ्कां कण्टक
वाक्येन परिहरति य इति यो मीमांसकादिरेनं जीवं हन्तारं
वेत्ति न तु हननक्रियाकर्तारं यश्च लोकायतिकादिर्हतं हनन
कर्म मन्यते तौ उभौ तत्स्वरूपं न जानीतो यं न कंचित्स्वतन्त्रो
हन्ति परेशाधीनत्वात् ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठ
ति भ्रामयन्सर्वभूतानि यन्त्रारूढानि माययेति वक्ष्यमाण-
त्वात् उक्तरीत्यानित्यत्वेन हननकर्मतासंभवात् अयं भा
वः उक्तरीत्यानित्यत्वात्तस्य न हननकर्मत्वं पराधीनमपि
कर्तृत्वं स्वाभाविकं नास्ति किंत्वनाद्यविद्यावशाद्देहान्तः
करणादावहं ममेत्यभिमानाद्बुद्धिस्थकर्तृत्वादिना हं करो
मीति कर्ता भवति तत्र तत्फलभोगाय सदसद्योनिषु संस
रति न चैवं कर्तृत्वं जीवे मृषा स्यात्तथा च कर्ता शास्त्रार्थवत्त्वा
दिति जीवस्य कर्तृत्वबोधकं सूत्रं विरुद्धेतापसिद्धान्त इति स्या
दिति वाच्यं बुद्ध्या उत्पन्नस्यापि कर्तृत्वादेर्विद्यासहकृतत्वस्वाभि

यथाह्रिष्ठरुषस्य दृष्टित्वं न तत्र हन्तृत्वस्य तथाप्यविद्यासहकृतत्वामित्यादि संबंधेन जीवस्य कर्तृत्वं दुःखित्वादिकं तेन संबंधेन +

त्वसंबंधेन वास्तवस्यैव जीवे सत्वात् हन्तृत्वोत्पन्नदंडेन केनचित्सं बंधेनैवमकर्तृत्वं तस्यैव संसारमोक्षादिकं तत्रैव दृष्टादौ जीव स्य संबंधि नियामके चिन्नाय विद्या प्रयुक्तो देहादावात्माभि मान एव प्रत एव विद्यया भिमान स्त्वेनादृष्टादि संबंधस्त्व तः सत्यमेव कर्तृत्वेन ततः सत्यमेव दुःखाघन्नभवरूपः संसा रः साभिमानस्य तत्रियमस्य स्वोचितयुद्धाख्यकर्मानुष्ठानात् पापं किं तस्वर्गादिकं भवति त्वं तु मुमुक्षुरतो भिमानं विहाय फलेच्छारहितं स्वधर्मं युद्धमाचरेति १९ ॥

अहमेवेजयन्ती टीका ॥

एवं शरीरे वर्तमानस्याप्यात्मनो नित्यत्वादप्रमेयत्वाच्चाविना शित्वमुक्तमिदानीमेतावद्धेतुमिच्छामित्यतोपि मधुसूदनं त्वस्यान्तरं वदन्नतस्य देहवियोगस्य निमित्तत्वं हन्तेर्थो नेः कर्मत्वं वारयन्नाह य एनमिति यः कश्चित्वत्सदृशो मोहयुः कः पुमान् एनं देहिनं हन्तारं हननं निमित्तं वेत्ति जानाति यश्चा न्यमन्यते भूयत्तेतो मोहाविष्टाबुभौ तावपि न विजानीतः आत्मा नित्योऽविनाशी त्येवं विशेषेण न जानीतः यतोयं शरीरी न हन्ति कस्यापि देहवियोगं न करोति न हन्यते स्वयम पि केनाप्युपायेन न वध्यते तो हन्ति क्रियायाः कर्मापि न भव तीति भावः नन्वयमेनं हन्त्यनेनायं हत इति लोकप्रसिद्धं न न हिंस्यात्सर्वाणि भूतानि ब्राह्मणेन हंतव्य इति वेदप्रसिद्धं त्वेन चात्मनो हन्तृत्वस्य हन्तेः कर्मत्वं च दृष्टं कृतत्वा कथमात्मा विनाशीति चेन्न लोके वेदे च हन्तेः प्रयोगस्य दे हवियोगपरत्वादात्माविनाशीत्यर्थः । १९ ॥

मधुसूदनी टीका

एनं प्रकृतं देहिनं यः हन्तृत्वादिगुणकं योर्हेतारं हननक्रिया याः कर्तारं वेत्ति अहमस्य हंतेति विजानाति यश्चान्यएनं मन्य

+ नन्वेवमशोच्यानन्वशोचस्त्वमित्यादिना भीष्मादिबंधुविच्छेदनिबंधनशोकेपनीतेपि तद्वधकर्तृत्व निबंधनस्य पापस्य नास्ति प्रतीकारः नहि यत्र शोको नास्ति तत्र पापं नास्तीति नियमः द्वेष्यवाह्मण वधे शोकाविषयेपापाभवप्रसंगात् अतो हंतृत्वेऽपि कर्तृत्वेन हयोरपि हिंसानिमित्तपातकापत्ते रवक्तृव्यमिदं वचनं तस्माद्युद्धस्य भारतेन्याशंका कांदकपठितयाऽवचापरिहरतिभगवान्

तेहतेहननक्रियायाःकर्मभूतं देहहननेनहतोहमितिविजा
नाति यश्चैनंमन्यतेहतंदेहंहननक्रियायाःकर्मभूतंदेह
तावुभौदेहाभिमानित्वादेनमविकारिणमकारकस्वभाव-
मात्मानंनविजानीतोनविवेकेनजानीतःशास्त्रात्कस्मात्
यस्मान्नायंहंतिनहन्यतेकर्ताकर्मचनभवतीत्यर्थः अत्र
यएनंवेत्तिहंतारंहतंचेत्यमावतिवक्ष्यपदानांमाहंतिवा
क्यालंकारार्थी अथवायएनंवेत्तिहंतारंतार्किकादिरात्मनः
कर्तृत्वाभ्युपगमात् तथायश्चैनंमन्यतेहतंचार्वाकादिरा-
त्मनोविनाशित्वाभ्युपगमात् तावुभौनविजानीतइतियोज्य
वादिभेदख्यापनायद्वयोरुपन्यासः श्रुतिस्तुतार्किकानेवविष
यतयावादद्वयोपदेशः हंताचेन्मन्यतेहंतुंहतश्चेन्मन्यतेह
तमितिपूर्वार्धेश्रोतःपावः

१९ ॥

सदानंदी टीका ॥

नत्वत्वडकरीत्यन्येमास्तुशोकस्तथापिमे भीष्मादिवधक
र्तृत्वनिमित्तेनोद्भवेद्दरं १ कर्ताहंप्रेरकस्त्वंचहिंसायांपातकं
द्वयोः अथास्वतिवचस्तस्मादयुक्तमितिचेच्छृणु २ यएनंदे-
हिनंसूक्ष्मक्रियंनिष्कलंपरं हननाख्यक्रियायाश्चकर्तारंवे
त्तिमूढधीः ३ अस्यहंताहमित्येवंयश्चैनंमन्यतेहतं हताहं
नाक्रियायाश्चकर्मेत्येवंहितावुभौ ४ देहाभिमानिनावेनं
नजानीतोविवेकतः यतोयंतान्क्रियायानोकर्तानैवात्मिक
र्मवा ५ कर्मैनंवेत्तिचार्वाकोदेहमात्रात्मविज्जडः बुद्ध्यादि-
गुणमात्मानंकर्तारंवेत्तितार्किकः ६ इत्यंवादिभिदासम्यक्
ख्यापनायपराद्विख्यापनाय
वा ७ अतश्चार्वाककाणादपक्षेत्यक्तातिहृततः वेदांतमतमा
श्रित्यस्वस्थोभवत्पाण्डवाहवे ८ ॥ १९ ॥

गी॰
टी॰
द्वि॰

नीलकंठी टीका

नचनासतोविद्यतेभावइतिन्यायेनासतोमात्रादेर्मिथ्यात्वेन
निःस्वरूपकत्वात्कर्तृत्वेनसंभवति अतःसतएवकर्तृत्वंबं
धमोक्षभाक्त्वंचवाच्यं अन्यथांतःकरणेबंधआत्मनश्चमोक्ष
इतितयोर्वैयधिकरण्यंस्यात् तथायेनसर्वमिदंततमितिस
तोदेहाद्युपादानत्वंचोक्तं तथाचहननक्रियांप्रत्येकस्यैवक
र्तृत्वंकर्मत्वंचापततितच्चविरुद्धं स्वात्मनिस्वव्यापारायोगा
त् नहिवह्निर्वह्निंदहतीतियुक्तमित्याशंक्याह यएनमि
ति यस्तार्किकादिरेनमात्मानंहंतारंहननक्रियायाःक
र्तारंमन्यते यश्चार्वाकादिरेनंहतंहननक्रियायाःकर्मभू
तंमन्यते तावुभावपिनजानीतः आत्मतत्त्वमितिशेषः यस्मा
त्नायंहंतिनहन्यते नहियःकर्तासआत्मा नापिदेहआत्मा
तयोःप्रागेवानात्मत्वावधारणात् अयंभावः यथायःपिंडव
ह्निसंबंधादेवदग्धृत्वंनतुस्वतः एवंमात्राद्युदयसमनियतं
कर्तृत्वंमात्रादिधर्मएवनात्मनः आत्मनितुकर्तृत्वप्रतीति
र्मात्रादिसंबंधादेवअतोमात्रादिविशिष्टस्यैवबंधोनकेव
लस्य मोक्षस्तुमात्रावियोगएवेति नबंधमोक्षयोर्वैयधिक
रण्यं नचमात्रादेर्निःस्वरूपत्वमस्ति सत्वासत्वाभ्यामनिर्व
चनीयस्यव्यवहारयोग्यस्यब्रह्मज्ञानैकबाध्यस्यस्वप्नमाया
गंधर्वनगरादितुल्यस्यतत्स्वरूपस्याभ्युपगमात् तस्मान्नक
र्तृत्वमात्मधर्मः यथोक्तं आत्माकर्त्रादिरूपश्चेन्माकांक्षीस्त
र्हिमुक्तता नहिस्वभावोभावानांव्यावर्तेतौष्ण्यवद्रवेरिति
किंचकर्तृत्वंरागद्वेषादिविकारवतएवसंभवति तदुक्तंसुरे
श्वरैः आत्मनोऽनुभूयमानेसाक्षित्वेनबाध्यते यथोक्तं नैतस्मा
णांसाक्षिताहमविक्रियइति नचमनोदेहाद्युपादानत्वेनह
ननक्रियाकर्मत्वंसंभवति विवर्तवादाभ्युपगमात् नह्यध्य
स्तस्यधर्मैरधिष्ठानंविकारीत्युच्यते यथोक्तंभाष्ये यत्रयद

फलं स तं कृतेन गुणेन दोषेण वा अणुमात्रेणापि न संबध्यत इति विहितं चैतत् हुर्यै: नहि भूमिरूषरवती मृगतृष्णाजलवाहिनी सरित् सुष्ठु इति मृगवारिपूरपरिपूरवती न नदी तथा घ पुण्येन स्पृशतीति एतेन कर्तृत्वकर्मत्वयोरनात्मधर्मत्वाद-
नात्मनश्चानेकरूपत्वादेकत्रात्मनि तदुभयविरोधोद्भावन-
मपि निरस्तं वेदितव्यं एवं चार्वाकतार्किकाभिमतो देहात्म-
कर्तात्मवादो हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतं उभौ
तौ न विजानीतो नायं हन्ति न हन्यत इति काठकोक्तेन मंत्रेण
पूर्वार्धे पाठभेदात्पठितेन परिहृतो वेदितव्यः १९ ॥

शांकरी टीका

यत्तु मन्यसे एते षां हननेन नरकपातः स्यादिति तदपि न दृष्टव्यं
हननक्रियायाः कर्तृत्वं कर्मत्वं च न संभवतीत्यर्थः १९ ॥
निरवयवस्यानित्यस्यात्मनो विनाशाभावात्

रामकंठी टीका

मायावशादुत्पन्नं निर्विकारपरमार्थसन्तमात्मानमप्रत्यक्ष-
देहादिलक्षणं देहमेवात्मत्वेन मन्यमानो हननादिदेहधर्मा-
ध्यारोपेणैवमथमात्मानं हन्तारं हननक्रियाकर्तारं वेत्ति
प्रत्यगात्मसम्यग्ज्ञानौ न जानीतः सत्यस्यात्मनः स्वरूपं न बु-
ध्येते यतोऽयं परमात्मा सर्वमेवेदं परमनिर्विकारचिन्मात्रस्वभा-
वः स्वात्मतया सर्वदा विमृशन्न हन्ति न च हन्यते हन्तृत्वेनोप-
लक्ष्यमाणं हननक्रियाकर्तृत्वं न प्रतिपद्यते नापि हन्तव्यतोप-
लक्ष्यमाणं हननक्रियाकर्मत्वमेते हि विकल्पविपर्ययज्ञानात्म-
कव्यवहाराणां ते यज्ञानामेव संभवन्ति न परमात्मनः १९ ॥

लासिकी टीका

यस्मादित्थमात्मा देहादिवदपरिच्छेद्यस्तस्मात् सर्वत्र साक्षी
तस्मादयं यदृच्छाभिलाषी हन्तारमात्मानं मन्यते यश्चैनं हतमवी
ज्ञाय ये तद्दृष्टिपातिनो हननक्रियायाः कर्ता नापि कर्मभूतः अ
विक्रियत्वात् १९ ॥ युध्यस्वेति हिंसात्मके कर्मणि प्रवर्तयतीति यन्मन्यसे तद
ज्ञानविलसितमित्याह य एनमात्मतापन्नमुक्तलक्षणमात्मानं हन्तारं हननक्रियाकर्तारं वेत्ति
यश्चैनं हननक्रियाकर्मभूतं वेत्ति तावुभावविद्याग्रस्तौ शास्त्रादात्मस्वरूपं न विजानीतो यतो
यमात्मा हननक्रियाया न कर्ता नापि कर्मभूतः अविक्रियत्वात् अविक्रि
यत्वं तदुक्तम्

तेयश्चैनमेव प्रतिपादितलक्षणमविनाशिनमात्मानं विनाशलक्षणं देहधर्माध्यारोपेण हतं हिंसितं मन्यते तावुभावपि मोहवशादनात्मन्यात्माभिमाने +

गी. टी. द्वि.

137

पंचोली टीका

यच्चात्मनोहंहन्तृत्वनिमित्तंभीष्मादीनांहन्यमाननिमित्तंदु
खंकंपतात्रहंतुमिच्छामीत्यादिनातदपिआत्मविनाशादि
त्वकशोकमोहवन्निर्मूलमेवेत्याह यएनमिति यः पुमानू
देहिनंहन्तारंहननक्रियायाःकर्तारंवेत्तिजानातिचपुनः
प्रमानएनंदेहिनंहतंहननक्रियायाःकर्मभूतंमन्यतेतनु
वपिनविजानीतः देहेन्द्रियादिसंघातएवहंतानाहन्यतेइ
उभौनविज्ञातवंतौअविवेकेनात्मानमहंप्रत्ययविष
हंतोहमितिदेहहननेनआत्मानंयौविजानीतः तौआत्मस्व
पानभिज्ञौइत्यर्थः यस्मान्नायमात्माहंतिनहननक्रियायाः
तानचहन्यतेनचकर्मभवतीत्यर्थः अविक्रियत्वात्कर्म
क्रियआत्माइतिद्वितीयोमंत्रः नायंश्लोकोविपर्ययं
दा १९ ॥

रागावीरसमिद्धोयिनी॥

नन्वेवमशोच्यानन्वशोचस्त्वमित्यादिनाभीष्मादिबंधुवि
निमित्तः शोकोपनीतोभवता तस्मात्युद्धसमारंभेतिप्र
कंपरहननरूपतयाहिंसात्मकंकर्महियुद्धं तत्कथमहं
गादिविषयनिबंधनपापस्यप्रतीकारमसंभावयन्तवीर्य
प्रवर्तेयं येनाहंकर्ताप्रेरकश्चसन्हावश्यपापभागिनोस्यामि
यत्नन्यसेतदेतदात्मस्वरूपाज्ञानजनितमोहविलसितंम
प्रतिपादयन्नाह यएनमिति योमोहवशाद्यमन्यवत्
परमार्थसदात्मतत्वंतस्माद्धिभिन्नंशरीरमेवात्मत्वेना
मामोहननादितद्धर्मोध्यासेनपश्यन्नेवंप्रकृतमन्यदूपं
हंहननक्रियायाःकर्तारंवेत्ति यश्चमन्यदेनंहतमिति
ध्यान्यएनमेवप्रतिपादितलक्षणमविनाशिनंमन्यते
पानलक्षणशरीरधर्मोध्यारोपणेनहतंहननक्रियायाः

ते मन्यते देहहननेनैव हतोऽयमिति प्रतिपद्यते तावुभावपिमो
हवशाद्देहात्मन्यात्माभिमानग्रहग्रस्ततया यथार्थानुभवेन विजानी
तः सत्यस्यात्मनः स्वरूपं न विवेकेन बुध्येते यतोऽयं परमात्मा न
हंति हंतृतानिबंधनेन हननक्रियाकर्तृत्वं न प्रतिपद्यते न च हन्य
ते हन्यमानतानिबंधनेन हननक्रियायाः कर्मत्वं च न प्रतिपद्यते इति
हंतृतानिबंधनं यथार्थं नास्त्येवेति भावः तथा च काठकश्रुतिः हं
ता चेन्मन्यते हंतुं हतश्चेन्मन्यते हतं उभौ तौ न विजानीतो नायं
हंति न हन्यत इति ॥१९॥

मधुभाष्य

यपनमिति कुतः उक्तहेतुभ्यो नायं हंति न हन्यते न हि प्र
तिबिंबस्य क्रिया सा हि बिंबक्रियैव क्रियावान् ध्यायती
वेति श्रुतेश्च अत्र मंत्रवर्णोऽप्यस्तीत्याह १९ न जायत इति
नवेम्यरस्तान वह्नवाभवि

138

भाषा अनुवाद

भगवान की इस बातसे महात्मा भीष्मपितामहादिकके मृत्यु हेतक जो अर्जुन को शोक आयके प्राप्त भयाथा सो दूर भया अब कुटुम्बके वध करनेवाले हमहै यह दुख प्रथम अध्यायके ४४ श्लोकमे कहाहै सो उस दुखके उत्पन्न होनेमे कोई हेतु नही है यह प्रतीति कराते है कि यह आत्मा न किसीसे मरता और न किसीको मारताहै और जो इसको हन्ता जानता और इसको हत मानता वे दोनो कुछ भी नही जानतेहै १९ ॥

दोहा॥

जो यह मारत याहि या जानहिं मर्यौहार जो जान नायह मारत नहिमरत दोउ सो अज्ञान १९॥

139

नजायतेम्रियतेवाकदाचि न्नायंभूत्वाभ
वितावानभूयः अजोनित्यःशाश्वतोयंपुरा
णोनहन्यतेहन्यमानेशरीरे २० ॥

शांकरभाष्यं टी॰ ॥

कथमविक्रियःआत्मेति द्वितीयोमन्त्रः नजायते नोत्पद्य
ते जनिलक्षणावस्तुविक्रिया नात्मनो विद्यतइत्यर्थः
तथा न म्रियतेवा तत्रवाशब्दश्चार्थेनम्रियते चेत्यन्त्याविना
शलक्षणाविक्रिया प्रतिषिध्यते कदाचिच्छब्दः सर्वविक्रि
याप्रतिषेधैःसंबध्यते नकदाचिज्जायतेनकदाचिन्म्रिय
तइत्येवं यस्मादयमात्माभूत्वाभवनक्रियामनुभूय पश्चाद
भविता अभावंगन्तानभूयः पुनस्तस्मान्नम्रियते योहिभू
त्वा नभविता सम्रियत इत्युच्यते लोके वाशब्दान्नशब्दाच्चा
यमात्माभूत्वावाभविता देहवन्नभूयःपुनस्तस्मान्नजायते
योह्यभूत्वाभविता सजायतइत्युच्यते नैवमात्माऽतोनजाय
ते यस्मादेवं तस्मादजोयस्मान्नम्रियते तस्मान्नित्यश्च यद्यप्या
द्यन्तयोर्विक्रिययोःप्रतिषेधेसर्वाविक्रियाःप्रतिषिद्धाभव
न्ति तथापि मध्यभाविनीनांविक्रियाणां तदर्थैःस्वशब्दैरेव
प्रतिषेधःकर्तव्य इत्यनुक्तानामपियौवनादिसमस्तवि
क्रियाणांप्रतिषेधोयथास्यादित्याह शाश्वतइत्यादिना शाश्व
तइत्यपक्षयलक्षणाविक्रियाप्रतिषिध्यते शश्वद्भवःशा
श्वतोनापक्षीयते स्वरूपेणनिरवयवत्वान्निर्गुणत्वाच्च नापि
गुणक्षयेणापक्षयः अपक्षयविपरीतापि वृद्धिलक्षणावि
क्रिया प्रतिषिध्यतेपुराणइति योह्यवयवागमेनोपचीयते
सवर्द्धतेऽभिनवइतिचोच्यते अयंत्वात्मानिरवयवत्वात् पु
रापिनवएवेति पुराणोनवर्द्धतइत्यर्थः तथानहन्यतेन॰

गी. टी. हि.

140

विपरिणम्यते हन्यमाने विपरिणम्यमानेपि शरीरे हन्तिवन
विपरिणामार्थे द्रष्टव्यो ऽ उ नहन्यतायेन विपरिणमत इत्यर्थः
अस्मिन्मंत्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनिप्र
तिषिध्यन्ते सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः यस्मा
देवं तस्मादुभौ तौन विजानीत इति पूर्वेण मंत्रेण संबन्धः

आनंदगिरिकृतटी. ॥

तदेव साधयितुं नजायते म्रियते वा विपश्चिदित्यादिमन्त्रांत
रमवतारयति कथमिति सर्वविक्रियाराहित्यप्रदर्शनेन हे
तुं विशदयन् मन्त्रमेव पठति नजायत इति जन्ममरणविक्रि
याद्वयप्रतिषेधं साधयति नायमिति अयमात्मा भूत्वा नभ
वा^ वितानभूत्वा भूयो भवितेति योजना नकेवलं विक्रियाद्वयमे
वात्र निषिध्यते किन्तु सर्वमेव विक्रियाजातमित्याह अजइ
ति वाच्यमर्थमुक्ता विवक्षितमर्थमाह जनिलक्षणेति विक
ल्पार्थत्वं व्यावर्तयति वेति निषिद्धमर्थं निर्दिशति नेत्यादिना
सम्बन्धमेवाभिनयति न कदाचिदिति अन्यविक्रियाभावे हे
तुत्वेन नायमित्यादि व्याचष्टे यस्मादिति उक्तमेव व्यनक्ति
योहीति आत्मनितु भूत्वा पुनरभवनाभावान्नास्ति मस्तुविति
र्थः आत्मनो जन्माभावेपि हेतुरिहैव विवक्षित इत्याह वाशब्दा
दिति अभूत्वेति छेदः देहवदिति व्यतिरेकोदाहरणं उक्तमे
वार्थं साधयति योहीति जन्माभावे तत्पूर्विकास्तित्वविक्रि
यापि नात्मनोऽस्तीत्याह यस्मादिति प्राणवियोगादात्मनोत्प
त्तेरभावे सावशेषनाशाभाववन्निरवशेषनाशाभावोपि सि
ध्यतीत्याह यस्मादिति ननु जन्मनाशयोर्निषेधे तदन्त गौ
नानो विक्रियान्तराणामपि निषेधसिद्धेस्तन्निषेधार्थं न पृ
थक् यतितव्यमिति तत्राह यद्यपीति स्पष्टहैर्मध्यवर्ति वि
क्रियानिषेधयाचकेविति यावत् आर्थिकेपि निषेधे निषेध

स्यसिद्धतया शाब्दो निषेधो न पृथगर्थवानित्याशंक्याह अनु॰
क्तानामिति नित्यशब्देन शाश्वतशब्दस्य पौनरुक्त्यं परिहरन्व्या
करोति शाश्वत इत्यादिना अपक्षयो हि स्वरूपेणैवास्याद्गुणाप
चयतो वेति विकल्पक्रमेण दूषयति नेत्यादिना पुराणपदस्या
गतार्थत्वं कथयति अपक्षयेति तदेव स्फुटयति योहीति न म्रि
यते वेत्यनेन चतुर्थपादस्य पौनरुक्त्यमाशंक्य व्याचष्टे तथे॰
त्यादिना ननु हिंसार्थो हन्तिः श्रूयते तत्कथं विपरिणामो नि
षिध्यते तत्राह हन्तिरिति हिंसार्थत्वसंभवे किमर्थान्तरे ह
न्तिरिष्यते तत्राह अपुनरुक्ततया इति हिंसार्थत्वे हतेति निषे
धेन पौनरुक्त्यं स्यात्तद्विवक्षितार्थो विपरिणामार्थत्वमेवाभि॰
त्यर्थः पूर्वावस्थात्यागेनावस्थान्तरापत्तिर्विपरिणामः तद॰
र्थश्चैवात्र हन्तिरिष्यते तदानिष्पन्नमर्थमाह नेति न जायते
इत्यादिमन्त्रार्थमुपसंहरति अस्मिन्निति षण्णां विकाराणामा
त्मनि प्रतिषेधे फलितमाह सर्वेति आत्मनः सर्वविक्रियारा
हित्येपि किमायातमित्याशंक्याह यस्मादिति २० ॥

स्वामिकृतटीका ॥

न हन्यत इत्येतदेव षड्भावविकारशून्यत्वेन द्रढयति नेति
न जायत इति जन्मप्रतिषेधः न म्रियते वेति विनाशप्रतिषेधः
वाशब्दश्चार्थे न चायं भूत्वा उत्पद्य भविता भवति अस्तित्वं भज
ते किं तु प्रागेव स्वतः सद्रूप इति जन्मानन्तरास्तित्वलक्षणद्वि॰
तीयविकारप्रतिषेधः तत्र हेतुः यस्मादजः यो हि जायते स
जन्मानन्तरमस्तित्वं भजते न तु यः स्वयमेवास्ति स भूयोपि अ॰
स्तित्वं भजत इत्यर्थः नित्यः सर्वदैकरूप इति वृद्धिप्रति॰
षेधः शाश्वतः शश्वद्भव इति अपक्षयप्रतिषेधः पुराण इति॰
विपरिणामप्रतिषेधः पुरापि नव एव न तु परिणामतो रूपा॰
न्तरं प्राप्य नवो भवतीत्यर्थः यद्वा न भवितेति सतस्मात्षडंग
कान्नाभूयः अधिकं यथा भवति तथा न भवितेति वृद्धिप्रतिषे

गी. टी. हि.

२०२

यः अजो नित्य इति चोभयं वृद्ध्यभावहेतुरित्यपौनरुक्त्यं तदे
वं जायते अस्ति वर्धते विपरिणमते अपक्षीयते विनश्यतीत्येवं
यास्कादिभिरुक्ताः षड्भावविकारा निरस्ताः यदर्थमेते विकारा
निरस्तास्तं प्रसक्तं विनाशाभावमुपसंहरति न हन्यते हन्यमा
ने शरीरे इति २० ॥

पिशाचभाष्यं टी. ॥

कथं[मिति श्लोके] (न जायते इ)ति द्वितीयो मंत्रः न जायते नोत्पद्यते जनन
स्य न कर्ता जनितलक्षणवस्तुविक्रियात्मनो न विद्यत इत्य
र्थः तथायं न म्रियते न कदाचिदुत्पत्तिक्रियायाः सत्तामनुभ
वति उत्पत्तेस्सत्तानुभवस्य मरणाव्यभिचारादुत्पत्तेः स नोत्प
द्यते जननमस्य न कर्ता जननलक्षणवस्तुविक्रिया न विद्यते
उत्पत्तेस्सत्तामननुभवन्न म्रियत इत्युच्यते ततोस्तिलक्षण
भावविक्रियात्मनो न विद्यत इत्यर्थः वाशब्दश्चार्थे कदाचि
च्छब्दः सर्वविक्रियाप्रतिषेधैः संबध्यते न कदाचिज्जायते
न कदाचिन्म्रियत इति सर्वत्र योज्यं अयं भूत्वा भविता वा न
भूयः अयमात्मा भूत्वा उत्पत्तिक्रियामनुभूय भूयो भविता
नैवावस्थान्तरं न प्राप्नोति न विपरिणमत इत्यर्थः विपरिणा
मलक्षणभावविक्रियात्मनो न विद्यत इत्यर्थः अजः अवय
वोपचयरूपेण नोपक्षीयते वृद्धिलक्षणभावविक्रियात्मनो न विद्य
त इत्यर्थः अजो नित्यः अपक्षयलक्षणभावविक्रियात्मनो
न विक्रियते हन्यमाने विक्रियमाणेपि शरीरे अस्मिन्मंत्रे षड्
भावविकारा लौकिका वस्तुविक्रिया आत्मनि प्रतिषिध्यंते
सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः यस्मादेवं त
स्मादुभौ तौ न विजानीत इति पूर्वेण मंत्रेण संबंधः २०

(margin: अवस्थान्तरं प्राप्य)

रामानुजभाष्यं टी. ॥

तत्र न जायते म्रियते इति वर्तमानतया सर्वेषु देहेषु सर्वेषु
अनुभूयमाने जन्ममरणे कदाचिदात्मानं न स्पृशतः नायं भूत्वा

भविता वा न भूयः अयं कल्पादौ भूत्वा भूयः कल्पान्ते च न भवि
ता इति न केषुचित्प्रजापतिप्रभृतिदेहेष्वागमेनोपलभ्यमान
कल्पादौ जननं कल्पान्ते च मरणमात्मानं न स्पृशतीत्यर्थः अ
तः अजः सर्वदेहगत आत्मा तत एव नित्यः शाश्वतः प्रकृतिवत्सा
दसत्परिणामैरपि न नीयते अतः पुराणः पुरापि नवः सर्वदा
स्पूर्ववदनुभाव्य इत्यर्थः अतः शरीरे हन्यमानेपि न हन्यते
यमात्मापि २० ॥

अभिनवगुप्तकृतटी० ॥

एतदेव स्फुटयति नायं भूत्वेति अयमात्मा नैनं भूत्वा भवितापि
न भूत्वैव अतो न जायते न च म्रियते यतो भूत्वा न न भविता
पि तु भवितैव २० ॥

परमार्थप्रपाटी० ॥ २०

अथ न हन्यत इत्यनेनात्मनः षड्भावविकारशून्यत्वं यदुक्तं त
देव प्रकटयन्नाह न जायत इति तत्र षड्विकारास्तु जायते ऽ
स्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति एतान्क्रमे
ण निषेधयति न जायत इति जन्मनिषेधः वा शब्दश्चार्थे न
चायं भूत्वोत्पद्य भविता भवति अस्तित्वं भजते किं तु प्रागेव
सतः सद्रूप इति जन्मोत्तरास्तित्वलक्षणद्वितीयविकारनि
षेधः अत्र हेतुः यस्मादजः यो हि जायते स एव जन्मानन्तरम
स्तित्वं भजते नित्यः सर्वदैकरूप इति वृद्धिप्रतिषेधः शाश्वत
इत्यपक्षीयतानिषेधः निरवयवत्वान्निर्गुणत्वान्निर्गुणत्वा
च पुराण इति विपरिणामप्रतिषेधः पुरापि नव एव न तु प
रिणामतो रूपान्तरं प्राप्य नवो भवतीत्यर्थः यद्वा न भविता स्प
ष्टमुपचयं कृत्वा भूयः अधिकं यथा भवति तथा न भवितेति वृद्धि
प्रतिषेधः अजो नित्य इति चोभयं हेत्वाद्यभावहेतुत्वेति न पौ
नरुक्त्यं एवं यदर्थं वेदवादिभिरुक्ताः षड्विकारा निरस्तास्तं प्र
ति विनाशाद्यभावमुपसंहरति न हन्यते हन्यमाने शरीरे ऽ
परमार्थैकरूपात्मीयाकृतिस्तु न जायते म्रियते वा विपश्चिन्नाः

वि

नम

यंकुतश्चिन्नबभूवकश्चित् अजोनित्यःशाश्वतोयंपुराणोनह
न्यतेहन्यमानेशरीरे हंताचेन्मन्यतेहंतुंहतश्चेन्मन्यतेहतं उभौ
तौनविजानीतो नायंहंतिनहन्यते अशरीरंशरीरेष्वन
वस्थेष्ववस्थितं महांतंविभुमात्मानंमत्वाधीरोनशोचतीतिग
तार्थयंश्रुतिः १९ ॥

वनमालीटीका ॥

नन्वात्मानंहननक्रियायाःकर्मकर्ताचकुतोनभवति अविक्रि
यत्वादित्याह नजायतइतिद्वितीयमंत्रेण जायतेऽस्तिवर्द्धतेवि
परिणमतेपक्षीयतेविनश्यतीतियद्विकारास्तत्राद्यंतौनिषि
ध्यतेनजायतेम्रियतेवेतिवासमुच्चयार्थः नजायतेनम्रियते
चेत्यर्थः कुतोनोत्पद्यतेयतोयमात्माकदाचिदपिकाले नभू
त्वाअभूत्वाप्राकभूयःपुनरपिभवितानयोह्यभूत्वाभवति सउ
त्पत्तिरूपांक्रियामनुभवति अयंतुप्रागपिसत्वाद्यतोनो
त्पद्यतेअतोऽजः तथायमात्माभूत्वाप्राककदाचिद्भूयः पुनर्न
भवितानवाशब्दाद्वाक्यविपरिवृत्तिः योहिप्राग्भूत्वानंतरंका
लेचनभवतिसमृतिरूपांक्रियामनुभवति अयंतुनरकाले
पिसत्वाद्यतोनम्रियतेनित्योविनाशायोग्यःशाश्वतःसदैक
रूपःअवयवापचयाभावान्न [illegible]
करूपोनत्वधुनानूतनः हृद्धिरित्याह पुराणइति पुरापिनव
मवस्थांप्राप्नोतिसंवर्द्धते नोकांचिदवस्थांप्राप्नोतियोहिनूतन
न्मविनाशांतर्भूतत्वादित्युच्यते अस्तित्वविपरिणामौतुज
[illegible] तस्मात्त्वान्नपृथक्निषिद्धौ यस्मादेवं सर्वविका
रहितस्तस्माच्छरीरेहन्यमानेनतत्संबद्धोपिकेनाप्यु
येननहन्यतेनहंतेशाकानत्इत्यर्थः २० ॥
कस्मादयंनहन्ति कस्माद्धा नहन्यते इत्यपेक्षायांनहन्यते

अहमेवंजयन्तीटी. ॥

इत्यस्यानंतरंवक्तव्यं नजायतइति अयमात्माजन्मादिषड्विकारशून्यत्वदर्शयन्
नजायते न म्रियतेवाकदाचित्कस्मिन्नपिकालेनजायतेवा
न्मनःप्राप्नोतीत्यनेनास्यजन्मरूपविकारोऽपास्तोभवति

नरपि कदाचिदयं न म्रियते स्वतस्तु न प्राप्नोतीत्यनेनाप्यस्य मरण
रूपविकारोऽपि दूरीकृतो भवति द्वितीयो वा शब्दोऽप्यर्थे हि यस्मा
देहेन जन्ममरणे न स्पृशतस्तस्मादयं कदाचित्सृष्ट्यादौ अपि भूत्वा
उत्पद्य भूयः पुनरपि सृष्ट्यन्ते न भविता न भविष्यतीति न किं तु
प्रागनुत्पद्य अन्ते भविता भविष्यतीत्यनेनास्य अस्तित्वलक्षणवि
कारोऽपि निराकृतः यस्य स्वरूपगुणादयः पूर्वकाले भूत्वा कं
चित्काले स्थित्वा पश्चाद्विनश्यन्ति तस्यैवास्तित्वरूपविकारः
संभवति अस्य तु सदंशत्वेन कालत्रयेऽपि स्वरूपगुणा
दीनामुत्पत्तिविनाशासम्भवादस्तित्वरूपविकारस्याप्यसंभ
व इति भावः ननु यद्ययं न जायते न म्रियते नास्ति चेति विका
रत्रयरहितः स्यात्तर्ह्यस्य वंध्यापुत्रस्येव जन्माद्यभावेन देहस
म्बन्धाभावात्कथं देहिनस्तथा देहान्तरप्राप्तिः शरीराणि इमे देहा
इति पूर्वोक्तः संघटतेति चेत्तत्राह अज इति अजति गच्छती
त्यजः सर्वशरीरगतः ब्रह्मादिपिपीलिकान्तेषु देहेषु भिन्न
भिन्नरूपेणागमन इत्यर्थः यद्वाऽजति क्षिपतीत्यजः स्वस्वविष
येष्विन्द्रियप्रेरकः ननु स्वतन्त्र ईश्वरः सर्वमेव प्रेरयति जीवस्तु पर
तन्त्रः प्रेर्यस्तस्य कथं प्रेरकत्वं संभवतीति चेत्सत्यं ईश्वरस्येवा
स्य सर्वप्रेरकत्वासम्भवेऽपि तत्प्रेरणाधीनप्रेरकत्वमस्ति न स्व
तन्त्रतया [illegible]नासम्भवो भवतीत्यर्थः नन्वत्राज इत्यनेन जन्मा
भावत्वस्य बोधो जायते न गतिक्षेपणयोरिति चेन्न न जायते
इत्यनेनैव तज्ज्ञाने जाते पुनः पाठस्य पुनरुक्तिदोषवत्वादः
ज गतिक्षेपणयोरित्यस्यैव रूपं न जनी प्रादुर्भाव इत्यस्येत्यर्थः
नन्वयं सर्वदेहगतश्चेत्तर्ह्युपचयापचयात्मकेन देहेन सहा
स्याप्युपचयापचयौ भवत इति चेत्तत्राह नित्य इति नित्यः सर्व
कालिकरूपः देवतिर्यगादिदेहप्राप्तावपि कालप्रयुक्तस्त्ववड्ः
वादिभिर्नोपचीयते नापचीयते चेत्यर्थः इत्यनेन वृद्ध्यपक्षयो
निरस्तौ अतएवयतः शाश्वतः शाश्वद्भावरूपः इत्यनेनास्य प

गी. टी. द्वि.

विणमविकारित्वाभावोपिसूचितः अतएवपुराणःप्राचीनः
यथादेहःकालावस्थापरिणामादिभिरयंनूतनोयंप्राचीन
इत्यादिशब्दवाच्यतांभजते तथायंनयतोनित्यःशाश्वतस्त
स्माद्विकारात्मिकेशरीरेहन्यमानेपि शस्त्रादिभिःशाकली
भावंप्राप्तेपिनहन्यतेकेनाप्युपायेनहंतुंनशक्योभवतीत
र्थः २० ॥

+कस्मादयमात्माहननक्रियायाःकर्ता द्वितीयेनमंत्रेण ॥+

मधुसूदनी टीका ॥

+कर्मचनभवति अविक्रियत्वादि+

जायतेऽस्तिवर्धतेविपरिणमतेपक्षीयतेविनश्यतीतिषड्भा
वविकाराइतिवार्ष्यायणिरितिनैरुक्ताः तत्राद्यंतयोर्निषेधःक्रि
यते नजायतेम्रियतेवेतिवाशब्दःसमुच्चयार्थो नजायतेम्रि
यतेचेत्यर्थःकस्मादयमात्मानोत्पद्यते यस्मादयमात्माकदाचि
त्कस्मिन्नपिकालेनभूत्वाप्राग्भूयःपुनरपिभवितानयोह्यभूत्वा
भवतिसउत्पत्तिलक्षणांविक्रियामनुभवति अयंतुप्रागपि
सत्वाद्यतोनोत्पद्यतेअतोजः तथायमात्माभूत्वाप्राक्कदाचि
तभूयःपुनर्नभवितानाशाद्यात्वाकाविपरिहृतिः योहिप्राग्भू
त्वाउत्तरकालेनभवतिसमृतिलक्षणांविक्रियामनुभवति
अयंतूत्तरकालेपिसत्वाद्यतोनम्रियते अतोनित्यःविनाशा
योग्यइत्यर्थः अत्रनभूत्वेत्यत्रसमासाभावेपिनानुपपत्तिः
नुयाजेष्वितिवद्भगवतापाणिनिनामहाविभाषाधिकारेनञ्
समासस्यविधानात् यत्तुकात्यायनेनोक्तंसमासनित्यत्वाभिप्रा
येणवावचनानर्थक्यंचेतितद्भगवत्पाणिनिवचनविरोधा
दनादेयं तदुक्तं आचार्यशबरस्वामिना असद्वादीहिकात्या
यनइति अत्रनजायतेम्रियतेवेतिप्रतिज्ञाकदाचिन्नायंभूत्वा
भवितावानभूयइति तदुपपादनं अजोनित्यइतितदुपसं
हारइतिविभागः आद्यंतयोर्विकारयोर्निषेधेनमध्यवर्तिवि
काराणांतद्व्याप्यानांनिषेधेजातेपिगमनादिविकाराणामु
क्तानामप्युपलक्षणायाऽपक्षयस्यवृद्धिस्वरूपशाश्वतेनैवनि

णाक्रियते तत्र कूटस्थनित्यत्वादात्मनो निर्गुणत्वाच्च न स्वरूप
तो गुणतो वाऽपक्षयः संभवतीत्युक्तं शाश्वत इति शाश्वत्सर्व
दा भवति नापक्षीयते नापचीयत इत्यर्थः यदि नापक्षीयते
तर्हि वर्धतामिति नेत्याह पुराण इति पुरापि नव एकरूपो
न त्वधुना नूतनां कांचिदवस्थामनुभवति यो हि नूतनां कां
चिदुपचयावस्थामनुभवति स वर्धत इत्युच्यते अयं तु सर्व
दैकरूपत्वान्नापचीयत इत्यर्थः अस्तित्वविपरिणामोऽपि जन्म
विनाशांतर्भूतत्वात्पृथक् न निषिद्धो यस्मात्सर्वविकारशू
न्य आत्मा तस्माच्छरीरे हन्यमाने तत्संबद्धोऽपि केनाप्युपायेन
न हन्यते न हंतुं शक्यत इत्युपसंहारः नायं हंति न हन्यत इति
उपपादितं [illegible]
[illegible] २० ॥

सदानंदी टीका ॥

हननाख्यक्रियाया नो कर्तात्मा नैव कर्म वा उक्त एवमपेक्षा
यामविकारित्वयोच्यते १ न जायते यतो नायमभूत्वा भविता पु
नः यो ह्यभूत्वा भवत्येनामुत्पत्तिं भजते स च २ यतोऽयं सत्यप्र
वाहित ततो नोद्यते ह्यजः कालत्रयेऽपि सत्त्वात्तु निर्नैवास्य
उत्पत्ते ३ तथात्मायं भूत्वाशाकु न भविता न यो हि भूत्वा
पुरा पश्चान्न भवत्येष मृत्युभाक् ४ अयं तूत्तरकालेऽपि सत्त्वान्न
म्रियते यतः अतो नित्यो न नाशार्हः कदाचिदपि विह्वनः ५ न
जायते म्रियते वा प्रतिज्ञावाक्यमिष्यते कदाचिदिति तस्यैवो
पपादनमिहोच्यते ६ अजो नित्य इतीहोपसंहार इति भाग
शः आद्यंतयोर्निषेधेन निषेधो मध्यवर्तिनां ७ विकाराणां
ततः सिद्ध एवं द्वाह्यपक्षयो स्वशब्देन निषिध्येते शाश्वत
इत्यपक्षयः ८ पुरापि नव एवासीत्ततो नायं विवर्द्धते अवस्था
नूतनां यस्माद्याति वर्द्धते तु एवं सः ९ अयं सदैकरूपत्वान्नापचीय
तेतरः अस्तित्वविपरीणामो जन्मनाशांतर्गतो यतः १० निषि

गी. टी. द्वि.

ह्वौनएष्यत्कस्मात्षड्विकारविवर्जितः आत्मानशक्यतेहंतुंह
न्यमानेशरीरके ॥१॥२०॥

नीलकंठी टी.

नी.

नायंहंतिनहन्यतइत्युक्तंतत्रनहन्यतइत्येतदुपपादयतितः
त्रस्थैनेवषड्विधेनमंत्रेण नजायतइति अयमात्माकदाचिन्नजा
यतेअभिनवोनोत्पद्यते नवाम्रियतेनिरन्वयोननश्यतितार्कि
काभिमतघटवत् तत्रक्रमेणहेतुद्वयं अजोनित्यइति अजत्वा
न्नजायते नित्यत्वाच्चनवाम्रियतइत्यर्थः अस्तुतर्हिक्षणिकवि
ज्ञानधारारूपः तस्याविज्ञानवादिभिरजत्वनित्यत्वाभ्युपगमा
दित्याशंक्याह भूत्वाभविताचानभूयइति अयमित्यनुवर्ततेअ
यंभूत्वाभूयोभवितानभूयोऽसकृत्भूत्वाभवितेतिभवनक्रिया
द्वयस्यक्त्वाप्रत्ययोक्तंसमानकर्तृत्वेधात्वैक्याभिप्रायेण भूत्वैव
भविता नतुभूत्वास्थित्वाविनश्यति तार्किकाणांहिविज्ञानेउत्प
त्तिस्थितिनाशलक्षणव्यापित्वात्त्रिक्षणावस्थायि विज्ञानवादिनां
तुपूर्वस्यनाशक्षणएवोत्तरस्योत्पत्तिक्षणः सएवतस्यस्थितिक्ष
णइतिक्षणिकत्वाद्विज्ञानानांनोभवनक्रियाद्वयस्यासंभवः यथाना
भूत्वाभवितेत्युक्तं नाहंशैशवंप्रथयनयतः शाश्वतःशाश्वदेकरूपः
योहंबाल्येपितरावन्वभूवंसोहंस्थाविरेप्रणप्तॄननुभवामीतिबा
ल्यस्थाविरयोरात्मैक्यप्रत्यभिज्ञानात् नचसादृश्यात्प्रत्यभि
ज्ञानंसादृश्यग्रहीतःस्थिरस्याभावात् जन्ममरणहीनोपियधर्मा
न्तरविशिष्टःपूर्वंभूत्वापुनर्धर्मान्तरविशिष्टोभविताइत्यपिन भू
त्वैवभवितानत्वभूत्वेतियोजना आर्हतास्तुहिशरीरपरिमाणमा
त्मानमभ्युपगच्छन्तोनित्यस्यैवात्मनःक्रमेणव्युत्क्रमेणवामशु
कमनुजमतंगजशरीरप्राप्तौ
त्मनोविशीर्णीभूतपरिमाणभेदंमन्यमानाभूतस्यैव
क्तेतिनदूषयिन शाश्वतत्वाद्भवनादौपचारिकंभवनमभ्युपग
णस्यवस्तुनोनित्यत्वायोगात् उपचयापचयवतोमध्यमपरिमा
त्यन्यात्मनोक्तंभूत्वाभवनं अनेनैववह्निखड्गःसाक्षीदियमीतेता
भूत्वाभवनंप्रत्याख्येयं नहिखड्गःसाक्षीदियमिणः

भा०

नाशमंतरेणान्यतिकडःक्षोच्छेदःसंभवति घटादौयावद्रूपना
शादर्शनात् नन्वजत्वनित्यत्वशाश्वतत्वंचाकाशेप्यस्तिअतआ
ह पुराणइति पुराविनयवृद्ध्यादिःदृष्टेःआगपिनवएव एतेनअ
पक्षयादिधर्मराहित्यान्नुक्तमजत्वादिकंआत्मनएववियदादेः
स्वरूपंश्रुतिरितिदर्शितं अतएवशरीरेहन्यमानेनहन्यते आत्मा
नाशाहस्वार्थे नजायतेम्रियतेचेत्यर्थः तत्रोपपत्तिःअयंनभू
त्वाअनुत्पद्यतभविताघटादिवदतोनजायते अथवानजःपूर्वा
न्वयित्वंनजायतेनवाम्रियतइति यतोभूत्वाअभविताघटवद्वि
नाशीनअतोनम्रियतइति शाश्वतःपुराणइत्येताभ्यामुपचया
पचयौनिषिध्येते इतिनहन्यतेनविपरिणम्यतइतिचव्याख्यातं
केचित्त्वेवमाहुः नजायतेम्रियतइतिप्रतिज्ञा कदाचिदित्यादिना
तस्याउपपादनं अजइत्यादिरुपसंहारइति २० ॥

अत्रोपपत्तिमाह १

आनंदी टीका

नजायतेम्रियतेवेति जन्ममरणयोरभावहेतुमाह कदाचि
त्संयंभूत्वा अयंभीष्मादिजीवगणःकदाचित्जात्वपिप्राग्भूत्वा
नवैकाजर्वचितयाप्राग्भूत्वैवास्तीत्यर्थः ततश्चातीतकाल
स्यान्योपिभूत्वाभावित्वलक्षणेजन्मनास्तीत्यर्थः तथैवभूत्वा
अयःपुनर्भविष्यतिकालेभविता नभविष्यत्येवेत्यर्थः अतए
वायं उक्तलक्षणाज्जन्महीनःअजत्वान्नित्यः नित्यत्वाच्छाश्व
तःसदैकरूपः अतएवपुराणःचिरन्तनःपूर्वोत्तरकोटिरहि
तः इत्युक्तेरात्रेकारणमाला अथवात्रशास्त्रसिद्धाजायते अ
स्तिविपरिणमतेवर्धते अपक्षीयते विनश्यतीतिषड्भावविका
राःतत्रनिषिध्यते नकदाचिज्जायतेइतिजन्माख्यस्यविकारस्यनि
षेधःवाशब्दश्चार्थे नकदाचि[illegible]यतेचेत्यन्त्यस्यविनाशाख्यस्यविका
रस्यशाश्वतइतिसदैकरूपत्वादपक्षभावित्वपर्यायस्योक्तित्वस्या
पक्षयाख्यस्यचविकारस्यपुराणइतिनायंचेदकलावदपक्षीय
मानोनतउपचीयतेइतिवृद्धिनाम्नोविकारस्यनहन्यतेहन्यमा
नेशरीरइत्यवस्थान्तरप्राप्तिरूपस्यविपरिणामाख्यस्यविकार

१स्त भ्रि १ भूग+

145

स्यप्रतिषेधः २० ॥

भाष्य रामकंठी टी॰

अथषड्कलक्षणदेशकालाकारावस्थाद्यवच्छेदरहितश्चिन्मात्र
स्वरूपत्वान्नजायते नचाम्रियते नित्यशुद्धस्वरूपत्वान्नापि म्रियो
विनश्यति नापिजन्ममरणान्तरालवर्तिषु स्थित्यवस्थारूपं भाव
विकारमनुभवति ते हि जन्मस्थितिविनाशात्मका अवस्थाभे
दादेहाद्यनित्यभावाश्रयाः ते हि भावाः अभूतपूर्वधर्माविर्भावे
जाता इत्युच्यन्ते भूतपूर्वधर्मतिरोभावे च विनष्टा इत्युच्यन्ते तद
न्तराले च तत्तत्स्वरूपप्रवाहसादृश्यभ्रमात्स्थिता इत्युच्यन्ते सदा
तेषामेव पुनर्भावीभावः आत्मनस्तु सदाभूतस्य न भावसंबन्धः
सदैकलक्षणाव्यभिचाराच्च न धर्मान्तराविर्भावतिरोभावाव
ति जन्मस्थितिविनाशलक्षणावस्थात्रयप्रतिषेधोऽस्यानेन श्लो
केन प्रतिपादितः इदानीमेतदेव भावविकारविशेषेणैवास्य प्र
तिषिध्यते नायमात्मा न जायते नो केनक्रमेणोत्पद्यते अ
तो जन्मलक्षणानित्यभावविकाररहितः तथा नित्यः सदैक
स्वभावावियुक्त इत्यनेनास्य प्रतिक्षणं धर्मान्तराविर्भावतिरोभा
वलक्षणो विपरिणामाख्यो विकारः प्रतिषिध्यते शाश्वतः पू
र्णेन स्वरूपेणायुक्त इत्यनेन वृद्धिलक्षणो विकारोऽस्य प्रति
षिध्यते न ह्ययमनित्यभाववत्पूर्वमुपचितो भूत्वापचयरूपं वि
कारमापद्यते तथा पुराणः सर्वकोटिरसंभवात्सततमेव वि
लान इत्यनेनापक्षयलक्षणविकारः प्रतिषिध्यते न ह्ययमुप
तो भूत्वा पुनरुपचीयते देहादिभाववत् तथा शरीरे हन्यमा
नायमात्मा हन्यते शरीरस्यैवानित्यत्वाज्जन्माद्यवस्थावद्वि
नाशावस्थापि संभवति नतु नित्यस्यात्मन इत्यनेन विनाशल
क्षणो विकारोऽस्य प्रतिषिद्धः अस्तित्वलक्षणस्य षष्ठो विकारः प्रा
गुक्तावस्थात्रयमध्ये भूत्वाभावग्राहेन प्रतिपादित इति
कोऽयदि वा केचिदस्तित्वं विकारत्वेनेनेच्छन्तीति नोक्तः

२० ॥

न जायते इति जन्मप्रतिषेधः न म्रियते वेति विनाशप्रतिषेधः वा शब्दो चार्थे न चायं

तामसिकी टीका

अविक्रियत्वं षड्भावविकारेण दर्शयति नेति भूत्वाऽन्यथा भू
यः पुनर्भविता भवति अस्ति त्वं भजते किं तु प्रागेव स्वतः सिद्धः
सद्रूप इति जन्मानन्तरास्तित्वलक्षणद्वितीयविकारप्रतिषे
धः सर्वदैकरूप इति वृद्धिप्रतिषेधः तदेवं जायतेऽस्ति वर्धते
विपरिणमते अपक्षीयते नश्यतीत्येवं यास्कादिभिरुक्ताः ष
ड्भावविकारा निरस्ताः यद्यप्येते विकारा निरस्तास्तथाप्यन्ते
विनाशाभावमुपसंहरति नेति २० ॥

न हन्यते हन्यमाने शरीरे इति

पंचोलीटीका

अविक्रियत्वात् हननक्रियायाः कर्ता न च हन्यते न च कर्म भवतीत्य
र्थः पूर्वस्मिन्मंत्रे तदेव अविक्रियत्वं हेतुभूतं षड्भावविकाररहितत्वेन सा
धयति न जायते इति अयमात्मा कदाचिन्नोत्पद्यते वा कदाचिन्न म्रिय
ते वा अथवा अयमात्मा भूत्वा भूयः अभविता न जायते यस्मादेव तस्मा द
जः न जायते इति अनेन षड्भावविकाररहितत्वमुक्तं जायतेऽस्ति विपरि
णमते वर्द्धते अपक्षीयते विनश्यति इति षड्भावविकाराः न जायते इ
यते इति आद्यन्तौ विकारौ निरस्तौ शाश्वतः निरवयवत्वात् न स्वरूपेण
अपक्षीयते निर्गुणत्वान्न गुणापक्षयेण अपक्षीयत इति अपक्षयरहित
पुराणः निरवयवत्वात् अवयवोपचयलक्षणा वृद्धिर्नास्ति अतएव
पुराणः नूतनत्वाभावः पुराण एव तेन वृद्धिलक्षणविकाररहितः न हन्यते
न विपरिणम्यते इति एवं विपरिणामार्थः तेन विपरिणामलक्षणा वि
क्रिया निषिध्यते जन्मनिमित्ता अस्तिता नास्ति तेन षड्भावविकाररहितः

रामानन्दीरसमिद्धोधिनी ॥

ननु कस्मादस्मात्प्रदं तव्यतालक्षणादीन इत्याशंकामपनेतुं
जायतेऽस्ति वर्धते विपरिणमते पक्षीयते विनश्यतीति षड्भावविकारा
कारा इति वास्यात नयनोक्तषड्भावविकारहीनता मात्मन उपपाद
यन्नाह न जायत इति अयमुक्तलक्षण आत्मा न जायते नोत्पद्यते

शाश्वतः शश्वद्भव इत्य
पक्षयप्रतिषेधः पुराण
इति विपरिणामप्रतिषेधः
पुरापि नव एव न तु परिणा
मतो रूपान्तरं प्राप्य नवो
भवतीत्यर्थः यद्वा न भवि
तेत्यस्यानुषंगं कृत्वा भूयो
धिकं यथा भवति तथा न
भवतीति वृद्धिप्रतिषेधः
अजो नित्य इति चोभयं
दृष्टाभावे हेतुरिति न
पुनरुक्तं

तुः यस्मा
दो हि जायते
तस्मादस्ति
इत्यर्थः

ऊतइत्यपेक्षायामाह यतोयंकदाचित्कस्मिंश्चिदपिकालेनजनि
त्वाभविता पितुर्भूत्वैवभविता योहिप्रागभावप्रतियोगी सएवो
त्पद्यतइतिव्यवह्रियते अयंतुननतथेति नजायतइत्युक्तोजन्म
नलक्षणविकारहीनः वा शब्दः समुच्चये अयमात्मा न म्रियते न
विनश्यति ध्वंसप्रतियोगीनभवतीतियावत् कुतइत्यपेक्षायामा
ह यतोयंपूर्वंभूत्वा कदाचिदपिभूयः पुनर्नभवितापितुअभा
वैव योहिप्रागभावप्रतियोगी उत्तरकालेचनभवति सध्वंसप्र
तियोगीभवति नचायंतथेति नविनश्यतीत्यतोनित्योविनाशा
योग्यः यद्यनित्यःसदैकस्वभावइतिनास्यप्रतिक्षणमपमान
गविर्भावलक्षणोविपरिणामः अस्यजन्मविपरिणामविनाश
नलक्षणविकारत्रयराहित्यंप्रतिपाद्यापक्षयवृद्धिलक्षण त
यराहित्यंवदर्शयति शाश्वतोयंपुराणइति अयमात्माशाश्व
तःसर्वदाभवतिनापक्षीयतइति नथापुराणः पुरापि
एकरूपोनपुनःसंप्रतिकामप्यभिनवीनामवस्थामनुभवति
तिनवर्धतेनूतनोपचयावस्थानमभवोहिवृद्धिमाहनोच्यते
हि शाश्वतःशाश्वत्संपूर्णोनरूपेणपुरुषइतिनवर्धतेयोहिविक
लःसएवसाकल्यरूपांवृद्धिमनुभवतीति पुराणइति एवंकौट
स्थ्यंभवाभावतत्रमेवविशेतनइतिनापक्षीयते यस्यैवोपचयः प्राग
भावप्रतियोगीसएवापक्षीयतइति पंचभावविकाराणांअभा
वविषयःसाक्षादुपपादितः षष्ठस्त्वस्तिवल्लक्षणोविकारो
केषांमतेनास्तीतिनप्रतिपादितः येषांतुसोस्तितेषामपिजन्म
लक्षणविकारांतर्भूततयापृथक्प्रतिपादनंनाद्रियतेतिविशेष
त्प्रनायंहंतिनहन्यतेइति सामान्येनप्रतिज्ञातयोर्हन्तृहननक
प्रतियोगित्वयोर्मध्ये हन्तृत्वाप्रतियोगित्वविशेषेनाह नहन्य
तइति पाठीरहन्यमानेशरीरेनहन्यते हननक्रियायाः कर्म

नभवति शरीरस्यैवानित्यत्वाज्जन्माद्यवस्थाभाक्त्वेन विनाशसंभ
वेन पुनरात्मन इति विनाशलक्षणविकाररहित्यं प्रतिज्ञातं द
ढीकृतं २०॥

मधुभाष्य

नजायत इति नचेश्वरज्ञानवद्भूत्वा भविता तद्धितदेवान्त
देशतः कालतो यो सावपस्थानेःस्वतोन्यतः शविलभाव
वोयात्मेत्यादि श्रुतिस्मृतिसिद्धम् अतः अजादिलक्ष
णेश्वरसद्रूपत्वात् शास्वतः सदैकरूपः पुरंदेहमगातीति
ति पुराणः तथापि न हन्यते हन्यमानेपि देहे २०॥

147

आत्माका नाश नही यह बात षड्भाव विक्रिया कहे वि
कारका अभाव कथनके द्वारा दृढ करतेहै कि आत्मा
का जन्म होना नही अर्थात् इसका जन्म रूप विकार १
नही और कभी मरताभी नही अर्थात् विनाश रूप विका
र नही और आत्मा उत्पन्न होके विद्यमानहै यह भी नही
अर्थात् वर्तमान रूप विकार नही जो जन्मे सोई वर्तमान
होता यह तो अज है पूर्वसे सदा सर्वदा विराजमानहै
इसका फेरि जन्हले विद्यमान होना असंभवहै और यह
नित्य सदा एक रूप अर्थात् इसका वृद्धिरूप विकार नही
और यह शाश्वत अर्थात् क्षय रहित और पुराण अर्थात्
इसका परिणाम नही परिणाम कहते रूपान्तर होने॰
का आत्मा पुरातन होके भी नयासा होता देखो परिणत
होकेभी रूपान्तर को प्राप्त नही होताहै ज्योंका त्योंही
रहता औरभी कहते कि पहले नहीथा अब भया और
बढताहै यह कुछ बात भी आत्मामें नहीहै इस अर्थ
में भी वृद्धिरूप विकार रहित होताहै इस विषयमे अज
और नित्य ये दोनो शब्दोंके रहनेसे और कुछ कहनेका
प्रयोजन नही इसी प्रकार आत्माका जन्म विद्यमानता
वृद्धि परिणाम अपक्षय और विनाश ये छ विकारों का
अभाव सांख्य शास्त्रमे निर्णय कियाहै अब जोवाकी १
सो कहतेहै कि शरीर हत होनेसे भी आत्मा हत होता
नही जिससे वह अविनाशी है २० ॥

कुंडलीया॥

ना यह जन्मे कदाचित नाहिमरे कबि जोय हुरवभयो
नहोयगो आगेवाकुनसोय आगेवाकुनसोय अजहेति।
त्यनिरंतर पुरुषपुरातनादि जानवसे समघटअंतर यह

नहिहोवे हनन हैं याको यही स्वभाव द्रव्यमान मेदेदमे
जानो परमप्रभाव २०॥

148

वेदाविनाशिनंनित्यं यएनमजमव्ययं क
थंसपुरुषःपार्थ कंघातयतिहंतिकं २१

शांकरभाष्यंटी॥

यएनंवेत्तिहन्तारमित्यनेनमंत्रेण हननक्रियायाःकर्ता
कर्मचनभवतीतिप्रतिज्ञाय नजायतइत्यनेनाविक्रियत्वंहे
तुमुक्त्वाप्रतिज्ञातार्थमुपसंहरति वेदाविनाशिनमिति वेद
विजानाति अविनाशिनमन्त्यभावविकाररहितं नित्यं वि
परिणामरहितंयोवेदेतिसम्बन्धः एनंपूर्वेणमंत्रेणोक्तल
णमजं अव्ययं उपजनापक्षयरहितं कथंकेनप्रकारेणस
विद्वान् पुरुषोऽधिकृतोहन्ति हननक्रियांकरोति कथंवा
घातयतिहन्तारं प्रयोजयति नकथंचित्कंचित्हन्तिन
कथंचित्कंचित् घातयतीत्युभयत्राक्षेपएवार्थः प्रश्नार्थासं
भवात्हेत्वर्थस्य अविक्रियत्वस्यतुल्यत्वाद्विदुषःसर्वकर्म
प्रतिषेधएवप्रकरणार्थोऽभिप्रेतोभगवता हन्तेस्त्वाक्षेपउदा
हरणार्थत्वेनविदुषः किंकर्मासम्भवेहेतुविशेषंपश्यन्
कर्माण्याक्षिपति भगवान्कथंसपुरुषइति ननूक्तमेवआ
त्मनोऽविक्रियत्वं सर्वकर्मासंभवकारणविशेषः सत्यमुक्तो
नतुसकारणविशेषोऽन्यत्वाद्विदुषोऽविक्रियत्वादात्मनइति
नह्यविक्रियंस्थाणुंविदितवतःकर्मनसंभवतीतिचेन्नविदुष
आत्मत्वात् देहादिसंघातस्यविद्वत्ताअतःपारिशेष्यादसंहत
आत्मा विद्वानविक्रियइतितस्यविदुषःकर्मासंभवादाक्षेपो
युक्तः कथंसपुरुषइतियथाबुद्ध्याद्याहृतस्य शब्दाद्यर्थस्या
विक्रियएवसन् बुद्धिवृत्त्यविवेकविज्ञानेनाविद्ययोपलब्धा
आत्माकल्प्यतेएवमेवात्मानात्मविवेकज्ञानेनबुद्धिवृत्त्यावि
द्यया असत्यरूपयैवपरमार्थतोऽविक्रियएवात्माविद्वानुच्य
तेविदुषःकर्मासम्भववचनात् यानिकर्माणिशास्त्रेणविधी

यन्ते नान्यविदुषोविहितानीति भगवतोनिश्चयोवगम्यते ननु
विद्याप्यविदुषएवविधीयते विदितविद्यस्यपिष्टपेषणवद्विद्या
विधानानर्थक्यात् तत्राविदुषःकर्माणिविधीयन्ते नविदुषइति
विशेषोनोपपद्यते इतिचेन्नानुष्ठेयस्य भावाभावविशेषोपपत्तेर
ग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहोत्रादिकर्मानेकसाध
नोपसंहारपूर्वकमनुष्ठेयं कर्ताहंममकर्तव्यमित्येवं प्रकारवि
ज्ञानवतोऽविदुषोयथानुष्ठेयंभवति नतु तथा नजायतइत्या
त्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेयंभवति
किंतुनाहं कर्ता नभोक्तेत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञाना
दन्यत् नोत्पद्यत इत्येषविशेषउपपद्यते यःपुनःकर्ताहमिति
वेत्यात्मानंतस्य ममेदंकर्तव्यमिति अवश्यंभाविनीबुद्धिःस्यात्त
दपेक्षया सोधिक्रियतइतितंप्रतिकर्माणि सम्भवन्तिसचावि
द्वान् उभौतौनविजानीतइतिवचनात् विशेषितस्यचविदुषः
कर्माक्षेपवचनात् कथंसपुरुषइति तस्माद्विशेषितस्याऽवि
क्रियात्मदर्शिनो विदुषोमुमुक्षोश्च सर्वकर्मसंन्यासएवाधि
कारोऽतएवभगवान्नारायणःसांख्यान् विदुषोऽविदुषश्चकर्मि
णःप्रविभज्यद्वेनिष्ठेग्राहयति ज्ञानयोगेनसांख्यानांकर्मयो
गेनयोगिनामिति तथाचपुत्रायाहभगवान् व्यासो द्वाविमा
वथपन्थानावित्यादि तथाच क्रियापथश्चैवपुरस्तात् पश्चा
त्संन्यासश्चेत्येतमेवविभागंपुनःपुनर्दर्शयिष्यति भगवान् अ
तत्त्वविदहंकारविमूढात्माकर्ताहमितिमन्यते तत्त्ववित्तु ना
हंकरोमीति तथाच सर्वकर्माणिमनसा संन्यस्यास्तइत्यादि
तत्रकेचित्पण्डितंमन्यावदन्ति जन्मादिषड्भावविक्रियारहितो
विक्रियोकर्तैकोहमात्मेति नकस्यचित्ज्ञानमुत्पद्यते यस्मिन्स
ति सर्वकर्मसंन्यासउपदिश्यते तन्न नजायतइत्यादिशास्त्रोप
देशानर्थक्यप्रसंगात् यथाच शास्त्रोपदेशसामर्थ्याद्धर्माधर्मा
स्तित्वविज्ञानंकर्तुश्चदेहा रसम्बन्धिज्ञानंचोत्पद्यते तथाच

त्वात् नैषवात्मनोऽविक्रियत्वाकर्तृत्वैकत्वादिविज्ञानंकस्मान्नोप
पद्यते इतिप्रष्टव्यास्तेकरणगोचरत्वादितिचेन्न मनसैवानुद्रष्ट
व्यमितिश्रुतेः शास्त्राचार्योपदेशजनितशमदमादिसंस्कृतंम
नश्चात्मदर्शनेकरणं तथाच तदधिगमायानुमानेचागमेच
सतिज्ञानंनोत्पद्यते इतिसाहसमात्रमेतत् ज्ञानंचोत्पद्यमा
नंतद्विपरीतमज्ञानं अवश्यंबाधतइत्यभ्युपगन्तव्यं तच्चाज्ञानं
दर्शितं हंताहं हतोस्मीत्युभौतौनविजानीतइत्यत्रचात्मनोह
ननक्रियायाःकर्तृत्वंकर्मत्वं हेतुकर्तृत्वंचाज्ञानकृतंदर्शितं
तच्चसर्वक्रियास्वपिसमानंकर्तृत्वादेरविद्याकृतत्वमविक्रिय
त्वादात्मनः विक्रियावान्हिकर्ताऽत्मनःकर्मभूतमन्यंप्रयोज
यति कुर्विति तदेतदविशेषेणविदुषःसर्वक्रियासुकर्तृत्वं
हेतुकर्तृत्वंच प्रतिषेधयति भगवान्विदुषःकर्माधिकाराभा
वप्रदर्शनार्थं वेदाविनाशिनंकथंसपुरुषइत्यादिनाक्वतर्हिवि
दुषोधिकारइत्येतदुक्तं पूर्वमेवज्ञानयोगेनसांख्यानामिति त
थाच सर्वकर्मसंन्यासंवक्ष्यति सर्वकर्माणिमनसेत्यादिना न
नुमनसेतिवचनान्नवाचिकानांकायिकानांच संन्यासइतिचे
न्नसर्वकर्माणीतिविशेषितत्वात्मानसानामेव सर्वकर्मा
णामितिचेन्नमनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनो
व्यापाराभावे कर्मानुपपत्तेः शास्त्रीयाणांवाक्कायकर्मणांका
रणानिमानसानि मनोव्यापाराणिवर्जयित्वान्यानि सर्वक
र्माणिमनसासंन्यस्यतइतिचेन्ननैवकुर्वन्नकारयन्नितिवि
शेषणात् सर्वकर्मसंन्यासोयंभगवतोक्तोमरिष्यतोनजीवत
इतिचेन्न नवद्वारेपुरेदेही आस्तेइतिविशेषणानुपपत्तेः नहि
सर्वकर्मसंन्यासेनमृतस्यतद्देहे आसनंसंभवत्यकुर्वतोऽका
रयतश्चदेहेसंन्यस्येति संबन्धोनदेहे आस्तइतिचेन्नसर्वत्रा
त्मनोऽविक्रियत्वावधारणात् आसनक्रियायाश्चाधिकरणाऽ
पेक्षत्वात्तदनपेक्षत्वाच्च संन्यासस्य संपूर्वस्तु न्यासशब्दोऽत्रत्या

गी॰
टी॰
द्वि॰

११
२

150

गार्थो न निषेधार्थः तस्माद्गीताशास्त्रे आत्मज्ञानवतः संन्यास
वाधिकारो न कर्मणीति तत्र तत्रोपरिष्टादात्मज्ञानप्रकरणे
दर्शयिष्यामः २१ ॥

आनंदगिरिकृतटी॰ ॥

पूर्वश्लोकार्थस्यैवोत्तरत्रापि प्रतिभानात् पौनरुक्त्यमाशंक्य
वृत्तानुवादपूर्वकमुत्तरश्लोकमवतारयति यद्यपीत्यादिना
कर्तृत्वाद्यभिमानविरोधाद्धेतोः कूटस्थात्मनिश्चयसामर्थ्यात्
मविदुषः संन्यासं विद्यापरिपाकार्थमभ्यनुजानाति वेदेति प
द्वयस्य पूर्वमेव पौनरुक्त्यमाह अविनाशिनमित्यादिना श्लो
पि सम्भवति किमिति तत्र उक्तविधेन व्याख्यायते तत्राह उभये
ति उत्तरत्र प्रतिवचनादर्शनात्तत्राप्रश्नः संभवतीत्यर्थः विवि
तं प्रकरणार्थं निगमयति हेत्वर्थस्येति अविक्रियत्वं हेत्व
त्तस्य विदुषः सर्वकर्मनिषेधे समानत्वादिति यावत् यदि वि
षः सर्वकर्मनिषेधोऽभिमतस्तर्हि किमिति हन्त्यर्थ एवाक्षेपे
माह हन्तेरिति उक्तहेतुमात्मनेऽपह्नुति विदुष इति अभिप्रा
मप्रतिपद्यमानो हेतुविशेषं पूर्वोक्तं स्मारयति नन्विति उ
मंगीकृत्याक्षिपति सत्यमिति विदुषो विज्ञानात्मनो ब्रह्म
वेद्यस्य विरुद्धधर्मत्वेन दहनतुहिनवद्भिन्नत्वाद्विदुषः सर्व
मत्यागेन ब्रह्मीकारेण विशेषः स्यादित्याह अन्यत्वादिति अवि
द्यत्वादिति छेदः तथापि कूटस्थमविक्रियं ब्रह्म प्रतिपद्यमान
स्यक्रतो विक्रियासम्भवेत् ब्रह्मप्रतिपत्तिविरोधादित्याशंक्या
नन्विति अयमात्मा ब्रह्मेत्यादिश्रुत्या समाधत्ते न विदुष इति
च विद्वत्ता विशिष्टस्य वा केवलस्य वा नाद्यो विशिष्टस्य विद्वत्वं
विशेषणस्यापि तद्वत्संगात्त्र च विशेषणीभूतसंघातस्या
नत्वाद्विद्वत्तायुक्तेत्याह न देहादीनि द्वितीये तु जीवब्रह्मविभा
सिद्धिरित्याह अतइति किंच प्रामाणिकविरुद्धधर्मवत्त्वस्या
द्धत्वात् प्रातिभासिकस्य च बिम्बप्रतिबिम्बयोरनैकान्त्याद्वा

तुमानायोगात् जीवब्रह्मणोरभेदसिद्धिरित्यभिप्रेत्य फलितमा
ह इतितस्येति नन्वविक्रियस्यब्रह्मरूपतया सर्वकर्मासम्भवे
विदुषोविदुत्तापिकथंसंभवति नहिब्रह्मणोऽविक्रियस्य विद्या
लक्षणाविक्रिया स्वीक्रियाभवितुमर्हतीति तत्राह यद्यपीति बुद्ध्या
द्यन्द्रियादिसंहतमन्तःकरणं प्रदीपप्रभावद्विषयपर्यन्तं
परिणतं बुद्धिवृत्तिरुच्यते तत्रप्रतिबिंबितंचैतन्यं अभिव्यञ्ज
कबुद्धिवृत्त्यविवेकाद्विषयज्ञानमिति व्यवह्रियते तेनात्मो
पलब्ध्याकल्प्यते तस्याविद्याप्रयुक्तमिथ्यासम्बन्धनिबन्धनं त
थैवाध्यासिकसम्बन्धेन ब्रह्मात्मैक्याभिव्यञ्जकवाक्योत्थबु
द्धिवृत्तिद्वारा विद्वानात्माव्यपदिश्यते नचमिथ्यासम्बन्धेन
पारमार्थिकाविक्रियत्वविहतिरस्तीत्यर्थः अहंब्रह्मेति बु
द्धिवृत्तेर्मोक्षावस्थायामपिभावादात्मनः सविशेषत्वमाशं
क्य तस्य यावदुपाधिसत्वमेवेत्याह असत्येति ननुकूटस्थ
स्यात्मनोमिथ्याविद्यावत्वेपि तस्य कर्माधिकारनिवृत्तौकस्य
कर्माणिविधीयन्ते नहिनिरधिकाराणां तेषांविधिरित्याशंक्या
ह विदुषइति कर्माण्यविदुषोविहितानीति विशेषमात्त
पति नन्विति कर्मविधानमविदुषोविदुषश्च विद्याविधान
मिति विभागेकाहानिरित्याशंक्याह विदितेति विद्ययाविदि
तत्वं लब्धत्वं कर्मविधिः अविदुषोविद्याविधिरिति विभागा
सम्भवे फलितमाह तत्रेति धर्मज्ञानानन्तरमनुष्ठेयस्यभा
वात् ब्रह्मज्ञानोत्तरकालेच तदभावात् ब्रह्मज्ञानहीनस्यैव
कर्मविधिरिति समाधत्ते नानुष्ठेयस्येति विशेषोपपत्तिमेव
प्रपंचयति अग्निहोत्रादीति ननुदेहादिव्यतिरिक्तात्मज्ञानं
विनापारलौकिकेषु कर्मसु प्रवृत्ते[illegible]रनुपपत्तेस्तथावि
धज्ञानवता कर्मानुष्ठेयमिति चेत्तत्राह कर्ताहमिति आत्म
निकर्ताभोक्तेत्येवंविज्ञानवत्वेपिब्रह्मज्ञानविहीनत्वेनाविदु
षोनुष्ठेयंकर्मेत्यर्थः देहादिव्यतिरिक्तात्मज्ञानवद्ब्रह्मज्ञानमपि

त्व

गी॰
टी॰
द्वि॰

१५।

ज्ञानत्वाविशेषात्. कर्मप्रवृत्तौऽपकरिष्यतीत्याशंक्याह न
विविति प्रत्युद्देश्यनिरोधित्वादविक्रियात्मज्ञानस्येति शेषः ननु
ब्रह्मात्मैकत्वज्ञानात्पूर्वकालमपि कर्ताहमित्यादिज्ञानोत्प
त्तौ कर्मविधिः सावकाशः स्यादिति नेत्याह नाहमिति कार
णाभावादिति शेषः कर्तृत्वादिज्ञानमप्यादित्युक्तं प्रत्युत्पन्ना
नुत्पन्नयोरुक्तविशेषाद्विदुषोऽनुत्पन्ने विदुषो नैतमुपसं
हरति इत्येष इति नत्वात्मविदो न चेदनुष्ठेयं किंचिदस्ति क
थं तर्हि विद्वान्यजेतेत्यादिशास्त्रान्तं प्रति कर्माणि विधीय
न्ते तत्राह यः पुनरिति आत्मनि कर्तृत्वादिज्ञानापेक्षया क
र्मस्वधिकृततत्त्वज्ञानेन तथाविधं पुरुषं प्रति कर्माणि विधीयन्ते
स च प्राचीनवचनाद्विद्वानेवेति निश्चीयते. न खलु कर्तृत्वा
दिज्ञानवतस्ताद्विपरीतकर्तृत्वादिज्ञानद्वारा कर्मसु प्रवृत्ति
रित्यर्थः कर्मासंभवे ब्रह्मविदो हेत्वन्तरमाह विशेषितस्ये
ति वेदाविनाशिनमित्यादिनेति शेषः यद्यपि विदुषो ना
कर्म तथापि विविदिषोः स्यादित्याशंक्याह तस्मादिति वि
याविरुद्धत्वादिष्यमाणमोक्षप्रतिपन्नत्वाच्च कर्मणामित्यर्थः
यद्यपि प्रवृत्तो राश्रमकर्माण्यपेक्षितानि तथापि विद्यातत्
फलाभ्यामविरुद्धान्येव तान्यभ्युपगतान्यन्यथा विविदिषा
संन्यासविधिविरोधादित्यभिप्रेत्योक्तेर्थे भगवतोऽनुमतिमाह
स एवेति विदुषो विविदिषोश्च संन्यासेऽधिकारः विदुषस्तु
कर्मणीति विभागस्पष्टत्वादित्यर्थः अधिकारिभेदेन निष्ठाद्व
यं भगवता वेदव्यासेनापि दर्शितमित्याह तथा चेति अथा
न विधिना स्वाध्यायपाठे मे वर्णिकस्य प्रवृत्त्यनन्तरं तत्र क्रि
यामार्गो ज्ञानमार्गश्चेति द्वौ मार्गावधिकारिभेदेनावेदितावि
त्यर्थः आदिशब्दाद्यत्र वेदाः प्रतिष्ठिता इत्यादि गृह्यते उक्त
योर्मार्गयोस्तत्त्वतोपरिहृतेश्च दाहरणान्तरमाह तथेति बु
द्धिशुद्धिद्वारा कर्मतत्फलयोर्वैराग्योदयात् पूर्वं कर्ममार्गो वि

ष्ठितो विरक्तस्य तु नः संन्यासपूर्वको ज्ञानमार्गो दर्शितः स चेतर-
स्मादतिशयशालीति श्रुतमित्यर्थः उक्तविभागे पुनरपि वाक्य-
शेषानुकूलमादर्शयति एनमेवेति अहंकारविमूढात्मेत्यस्य
व्याख्यानं अतत्त्वविदिति तत्त्ववित्त्विति श्लोकमवतार्य तात्पर्या-
र्थं संगृह्णाति नाहमिति पूर्वेण क्रियापदेनेति शेषः सम्बध्यते
विरक्तमधिकृत्य वाक्यान्तरं पठति तथा चेति आदिशब्दस्त-
स्यैव श्लोकस्य शेषसंग्रहार्थः अविक्रियात्मज्ञानात् कर्मसंन्या-
सो दर्शिते मीमांसकमतमुत्थापयति तत्रेति आत्मनो ज्ञानक्रि-
याश्रयत्वाधारत्वेनाक्रियत्वाभावादक्रियात्मज्ञानं संन्यासका-
रणीभूतं न सम्भवतीत्यर्थः यथोक्तज्ञानाभावो विषयाभावा-
द्वा मानाभावाद्वेति विकल्पार्थं दूषयति नेत्यादिना न तावद-
विक्रियात्माभावो न जायते म्रियते वेत्यादिशास्त्रस्य तद्वाक्य-
तया प्रमाणस्यान्तरेण कारणमानर्थक्यायोगादित्यर्थः द्वि-
तीयं प्रत्याह यथा चेति पारलौकिककर्मविधिसामर्थ्यसिद्धं
विज्ञानमुदाहरति कर्तव्येति कर्मकाण्डादज्ञाने धर्मादौ विज्ञा-
नोत्पत्तिवत् ज्ञानकाण्डादज्ञाते ब्रह्मात्मनि विज्ञानोत्पत्ति-
रविरुद्धा प्रमात्वाविशेषादित्यर्थः ज्ञानस्य मनःसंयोगज-
न्यत्वादात्मनस्तु श्रुत्या मनोगोचरत्वनिरासान्नात्मज्ञाने सा-
धनमस्तीति शंकते करणेति श्रुतिमाश्रित्य परिहरति ना-
मनस्येति तत्त्वमस्यादिवाक्योत्थमनोवृत्त्यैव शास्त्राचार्योप-
देशमनुसृत्य द्रष्टव्यं तत्त्वमिति श्रूयते स्वरूपेण स्वप्रकाशमा-
पि ब्रह्मात्मवस्तु वाक्योत्थबुद्धिवृत्त्यभिव्यक्तं सविकल्पकव्य-
वहारावलम्बनं भवतीति मनोगोचरत्वोपचारादसिद्धं करा-
णगोचरत्वमित्यर्थः कथं तर्हि ब्रह्मात्मनो मनोविषयत्वनि-
षेधश्रुतिरित्याशंक्यासंस्कृतमनोवृत्त्यविषया सेति मन्वानः
शंकते नाहं शास्त्रेति सत्यपि श्रुत्यादौ तदनुग्राहकाभावान्नास्माक-
मविक्रियात्मकज्ञानमुत्पत्तुमर्हतीत्याशंक्याह नैवेति तस्मा-
दविक्रियस्यात्मनोऽधिगत्यर्थमिमं विमतो विकारो नात्मधर्मो वि-

गी॰
टी॰
द्वि॰

152

कारत्वादुभयाभिमतविकारवदित्यनुमाने पूर्वोक्तश्रुतिस्मृ
तिरूपागमेवसत्येव तस्मिन्नोत्पद्यतेज्ञानमिति वचः साह
समात्रं सत्येवमानेमेयं नभातीतिवदित्यर्थः ननुयथोक्तं
ज्ञानमुत्पन्नमपिहानायोपादानायवान भवतीति कुतोऽस्यफ
लवत्वंतत्राह ज्ञानंचेति अवश्यमिति प्रकाशप्रहेनेतमो
निवृत्तिव्यतिरेकेणानुपपत्तिवदात्माज्ञाननिवृत्तिमन्तरेण
त्मज्ञानोत्पत्तेरनुपपत्तेरित्यर्थः नन्वज्ञानस्यज्ञानप्रागभाव
त्वात्तन्निवृत्तिरेव ज्ञानेनतु तन्निवर्तकमिति तत्राह तच्चेति
कथं पुनर्भगवतापिज्ञानाभावातिरिक्तमज्ञानं दर्शितमि
त्याशंक्याह अत्रचेति विमतंज्ञानाभावोनभवत्युपादानत्वा
त्स्वदादिवदितिभावः ननु हननक्रियायास्तु नहिंस्यादिति
निषिद्धत्वात् तत्कर्तृत्वादेरज्ञानकृतत्वेपि विहितक्रिया
कर्तृत्वादेर्न तथात्वमिति नेत्याह नचेति नतावदात्मनि
कर्तृत्वादिनित्यत्वं अमुक्तिप्रसंगान्न चानित्यमपि निरुपादानं
भावकार्यस्योपादाननियमान्न चानात्मा तदुपादानमात्म
नि तत्प्रतिभानान्न चात्मैव तदुपादानं कूटस्थस्य तस्याविद्यां
विना तदयोगादित्याह अविक्रियत्वादितिकर्तृत्वाभावेपि
कारयितृत्वंस्यादित्याशंक्याह विक्रियावानिति आत्मनि
कर्तृत्वादिप्रतिभानस्यानाद्यनिर्वाच्यज्ञानमुपादानंतन्निवृ
त्तिश्च तत्त्वज्ञानादित्युक्तमिदानीं कर्तृत्वकारयितृत्वयोरवि
द्याकृतत्वे भगवतोनुमतिं दर्शयति तदेतदिति विदुषोय
दिकर्माधिकाराभावोभगवतोभिमतः तर्हिकुत्र तस्यजीव
तोधिकारःस्यादितिपृच्छति कथंपुनरिति ज्ञाननिष्ठायामित्यु
क्तंस्मारयति उक्तमिति तदङ्गभूते सर्वकर्मसंन्यासेच तस्याऽ
धिकारोस्तीत्याह तच्चेति वक्ष्यमाणेवाक्ये सर्वकर्मसंन्यासा
नप्रतिभाति मानसानामेवकर्मणां विशेषणवशात् त्यागा
वगमादिति शंकते नान्वेति विशेषणान्तरमाश्रित्यहृष्यति
नसर्वेति मनसेति विशेषणान्मानसेष्वेव कर्मसु सर्वशब्दः सं

कुर्वतः स्यादिति शंकते मानसानामिति सर्वात्मना मनोव्या
पारत्यागे व्यापारान्तराणामनुपपत्तेः सर्वकर्मसंन्यासः सिध्य
तीति परिहरति नेत्यादिना मानसेष्वपि कर्मसु संन्यासे संको
चात्र वागादिव्यापारोपपत्तिरिति शंकते शास्त्रीयानामिति अ
न्यानीत्यशास्त्रीयाणि मानसानि तानि च सर्वाणि कर्माणीत्यर्थः
वाक्यशेषमादाय दूषयति नैवेति नहि विवेकबुद्ध्या सर्वा
णि कर्माणि अशास्त्रीयाणि संन्यस्य तिष्ठतीति युक्तं नैव कुर्व
न्नित्यादिविशेषणस्य विवेकबुद्धेश्च सर्वत्यागहेतोस्तुल्यत्वा
दित्यर्थः भगवदभिमतसर्वकर्मसंन्यासस्यावस्थाविशेषे संको
चं दर्शयन्नाशंकते मरिष्यत इति संन्यासो जीवदवस्थायामे
वात्र विवक्षित इत्यत्र लिंगं दर्शयन्नुत्तरमाह ननवेति अनुपप
त्तिमेव स्फोरयति नहीति अन्वयविशेषव्याख्यानेन लिंगासि
द्धिं चोदयति अकुर्वत इति विवेकवशाद्विशेषाण्यपि कर्माणि
देहे यथोचितं निःस्पृहतया कुर्वन्न कारयंश्च विद्वानवतिष्ठते तथा
च देहे कर्माणि संन्यस्य कुर्वतोऽकारयतश्च सुखमासनमिति
सम्बन्धसंभवात् विशेषणस्य सति देहे कर्मत्यागविषयत्वा
भावाज्जीवतः सर्वकर्मत्यागो नास्तीत्यर्थः अथवा कुर्वत इत्या
दिष्वत्रैव सम्बन्धनीयं लिंगासिद्धिचोद्यं तु देहे संन्यासेत्याद
भ्योत्रैयं आत्मनः सर्वदाविक्रियत्वनिर्द्धारणाद्देहसम्बन्धमन्त
रेण कर्तृत्वकारयितृत्वप्राप्तेरप्राप्तप्रतिषेधप्रसंगपरिहारा
र्थमसकृदेव सम्बन्धः साधीयानिति समाधत्ते न सर्वत्रेति
स्मृतिश्रुतिश्चेत्यर्थः किंच सम्बन्धस्याकांक्षासन्निधियोग्य
ताधीनत्वादाकांक्षावशादस्मदभिमतसम्बन्धसिद्धिरित्याह
आसनेति भवदिष्टस्तु सम्बन्धो न सिध्यत्याकांक्षाभावादित्या
ह न तदनपेक्षत्वाच्चेति संन्यासशास्त्रस्य विक्षेपार्थत्वात्तस्य चा
धिकरणसापेक्षत्वादस्मदिष्टसम्बन्धसिद्धिरित्याशंक्याह सं
र्वस्त्विति अन्यथोपसर्गवैयर्थ्यादित्यर्थः मनसा विवेकवि
ज्ञानेन सर्वकर्माणि परित्यज्यास्ते देहे विद्वानित्यस्यैव सम्बन्धस्य

३

यवाङ्मयकर्म
कायानृयशास्त्री
+

साधुत्वं मत्वोपसंहरति तस्मादिति सर्वव्यापारोपरमात्मनः स
र्वकर्मसंन्यासस्याविक्रियात्मज्ञानाविरोधित्वात् प्रयोजकज्ञान
वतो वैधे संन्यासेऽधिकारः सम्यग्ज्ञानवतस्त्ववैधे स्वाभाविके फ
लात्मनीति विभागमभ्युपेत्योक्तेऽर्थे वाक्यशेषानुगुण्यं प्रदर्शयति
इति तत्र तत्रेति २१ ॥

स्वामिकृतटीका ॥

अतएवाहन्तृत्वाभावोऽपि पूर्वोक्तः सिद्ध इत्याह वेदेति नित्यं बु
द्धिमुक्तं अव्ययमपक्षयशून्यमजमविनाशिनं च यो वेद स पुरु
षः कं हन्ति कथं वा हन्ति एवंभूतस्य वधे साधनाभावात् तथा
स्वयं प्रयोजको भूत्वाऽन्येन कं घातयति कथं वा घातयति न कं
थंचिदपीत्यर्थः अनेन मय्यपि प्रयोजकत्वदोषदृष्टिं मा कार्षी
रित्युक्तं भवति २१ ॥

पिशाचभाष्य टी. ॥

य एनं वेत्ति हन्तारमित्यनेन मंत्रेण हननक्रियायाः कर्ता कर्म च
न भवतीति प्रतिज्ञाय न जायत इत्यनेनाविक्रियत्वं हेतुमुक्त्वा
प्रतिज्ञातार्थमुपसंहरति वेदाविनाशिनमिति वेद विजाना
ति अविनाशिनं अस्तभावविकाररहितं नित्यं विपरिणामरहितं
यो वेदेति संबंधः एवं पूर्वोक्तमंत्रेणोक्तलक्षणमजं जनन
क्रियारहितं अव्ययमपक्षयरहितं कथं केन प्रकारेण स विद्वा
न्पुरुषोऽधिकृतः हन्ति हननक्रियां करोति कथं वा घातयति ह
न्तारं प्रयोजयति न कथंचित्कंचिद्धन्ति न कथंचिद्घातयतीत्युभयत्राक्षेप एवार्थः प्र
श्नासंभवाद्धेत्वर्थस्य च तुल्यत्वाद्विदुषः सर्वकर्मप्रतिषेध एव प्र
करणार्थोऽभिहितो भगवता हन्तेस्त्वाक्षेप उदाहरणार्थत्वेनो
क्तः विदुषः सर्वकर्मासंभवे कं हेतुविशेषं पश्यन्कर्माण्याक्षि
पति भगवान् कथं स पुरुष इति २१ ॥

रामानुजभाष्य टी.

एवमविनाशित्वेनाजत्वेनाव्ययत्वेन च नित्यमेतमात्मानं यः
पुरुषो वेद तिर्यक्स्थावरशरीरावस्थितेष्वात्मस्वेकमप्यात्मानं

कथंघातयति कंवा कथंहंति कथंनाशयति कथंवा तत्प्रयो
जको भवतीत्यर्थः एतानात्मनो घातयाम्यहमित्यनुशोचन
मात्मस्वरूपाज्ञानमूलमेवेत्यभिप्रायः २१ ॥

अभिनवगुप्तकृतटी० ॥

यएनमात्मानं प्रबुद्धत्वाज्जानाति न सहंति न सहन्यते इति तस्य
कथंबंधः २१ ॥

परमार्थप्रपा टी० ॥

अतएव हंतृत्वमपि न युज्यत इत्याह वेदाविनाशिनमिति नि
त्यंवृद्धिशून्यं अव्ययमपक्षयशून्यं अजं जन्मशून्यं एभिस्त्रिभि
र्विकारैरेनमात्मानमविनाशिनं यो वेद ज्ञातवान् सकं पुरुषं घा
तयति च स्वयं हननक्रियाप्रयोगपत्वात् किंचप्रयोजकेपि तथै
वप्रनेनमप्यपिप्रयोजकत्वदृष्टिमाशास्त्रुरीत्युक्तं तदुक्तं शुद्धो
निरंजनोनंतो बाधोहं प्रकृतेः परः चेष्टमानमिदं देहं पश्यामः
न्यशरीरवदिति २१ ॥

वनमाली टी० ॥

जीवस्यानित्यत्वं मन्यमानो मिथ्याज्ञानी त्वमुक्तं ज्ञानी तु नैवं मन्य
त इत्याह वेदेति यएनमविनाशिनं षड्विकाररहितं विकृतज
डदेहादिविलक्षणसच्चिदानंदस्वरूपं वेद स पुरुषो देवमनुष्यप
श्वादिदेहेषु नाद्यविद्याहंतृकाहं ममेत्यभिमानितं बंधेन कर्मफ
लभोगार्थं वर्तमानेष्वात्मसु कमप्यात्मानं कथं हंति कथं नाश
यति कथं वा तत्प्रयोजको भवतीत्यर्थः अविनाशिनं नित्यमिति
कनाशशून्यं स्वाभाविकनाशशून्यं अजमुत्पत्तिशून्यं अव्ययं स्व
रूपविकारशून्यं यद्वा अविनाशिनं शरीरं पापादिशून्यं नित्यं स्वरूप
न अजं षड्विकारशून्यं अव्ययं नित्यमुणकं स्वतंत्रं वेत्तं श्रीह
रियो वेद साक्षात्करोति सतत्प्रसादाद्विहतनाविद्यो निहतकंदे
न कामाभिमानो निहतसर्वकर्माधिकारश्चाविर्भूतविदानंद
संदोहस्वस्वरूपः कं घातयति कं वा हंति कथं चेत्यर्थः २१ ॥

गी.
हिं.
टी.

154

उत्तमवैजयन्ती टी.

एवमात्मनः षड्विकारशून्यत्वादन्यैर्न हन्यते इत्युक्त्वा इदानीम
स्याविकारित्वेन नायं हन्तीत्युपपादयन्नित्यत्वं साधयति वेदे
ति अविनाशिनं मरणात्मकान्त्यविकारशून्यस्वभावं नित्यं वृद्धि
पक्षयरहितं अजं जन्मरूपविकारशून्यम् अव्ययं परिणामा
त्मिकविकाररहितं एवं षड्विकारास्पृष्टस्वरूपगुणादिकं आत्मा
नं यः वेदशास्त्राचार्योपदेशादिना जानाति सः निर्विकारोऽयं
मात्मा इति ज्ञातवान् पुरुषः पुरिशयानः कमन्तरं उत्तरं पं
घं हन्ति कं कथं वा घातयति न केन प्रकारेण हन्ति घातयति वे
त्यर्थः अत्रायं भगवतोऽभिप्रायः यथाहं सर्वज्ञोऽपि यदि स्वस्वरू
पगुणादीनामंतरहितानामन्तं न जानामि तर्हि मम सर्वज्ञता
या हानिर्न स्यात् यदि तु अन्तवतां पदार्थानामन्तं न जानामि
तर्ह्येव तस्या हानिर्भवेत् तथायमात्मापि यदि विनाशरहि
तानामात्मस्वरूपगुणादीनां नाशं न करोति तर्ह्यात्मनः कर्तृ
त्वादिकस्य हानिर्न भवति किंतु नाशवतां देहादिपदार्थानां
नाशं न करोति चेत्तर्हि तत्कर्तृत्वादेर्हानिर्भवेन्न तु करोत्येव
तस्मात्कर्तृत्वाद्यनेकधर्माश्रये मयीश्वरे जीवात्मनि च कर्तृ
त्वाद्यभावशंकां माकृथाः यस्मादहमीश्वरो युष्माकं कर्म
कारयामि यूयं च मदैव कर्म कुरुथेत्येवं भगवदभिप्रायानभि
ज्ञा मूढा एतेनैवात्मनः कर्तृत्वादिशून्यत्वं वदंति कर्ता भूत्वा
थवत्वादिति तत्त्वकारस्याप्याशयं न जानंतीति हृत्थं वजल्पंती
त्यर्थः २१ ॥

मधुसूदनी टीका ॥ इदानीं न हन्तीत्युपपादयन्नु

इति न विनष्टुं शीलं यस्य तमविनाशिनं अन्त्यविकाररहितं तत्र हे
अव्ययं न विद्यते व्ययोऽवयवापचयो गुणापचयो वा यस्य त
मव्ययं अवयवापचयेन गुणापचयेन वा विनाशादर्शनात्तु
भयरहितस्य न विनाशः संभवतीत्यर्थः न तु जन्यत्वेन विना
त्वमत्रमासमाहेत्याह अजमिति न जायत इत्यजं माद्यवि

कारविरहितं तत्र हेतुः नित्यं सर्वदा विद्यमानं प्रागविद्यमानस्य
हि जन्म दृष्टं न तु सर्वदा सत इत्यभिप्रायः अथवा अविनाशिन
मबाध्यं सत्यमिति यावत् नित्यं सर्वव्यापकं तत्र हेतुः अजम
व्ययं जन्मविनाशशून्यं जायमानस्य विनश्यतश्च सर्वव्याप
कत्वसत्यत्वयोरयोगात् एवं सर्वविक्रियाशून्यं प्रकृतमेनं
देहिनं स्वमात्मानं यो वेद विजानाति शास्त्राचार्योपदेशाभ्यां
साक्षात्करोति अहं सर्वविकारशून्यः सर्वभासकः सर्वद्वैतर
हितः परमानंदबोधरूप इति स एवं विद्वान् पुरुषः पूर्णरूपः
कं हंति कथं हंति किंशब्द आक्षेपे न कमपि हंति न कथमपि
हंतीत्यर्थः तथा कं घातयति कथं घातयति कमपि न घात
यति कथमपि न घातयतीत्यर्थः न हि सर्वविकारशून्यस्या
कर्तुर्हननक्रियायां कर्तृत्वं संभवति तथा च श्रुतिः आ
त्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य का
माय शरीरमनुसंचरेदिति अत्र आत्मानं विदुषस्तदज्ञान
निबंधनाध्यासनिवृत्तौ तन्मूलरागद्वेषाद्यभावात् कर्तृत्वा
भोक्तृत्वाद्यभावं दर्शयति अयमत्राभिप्रायो भगवतः वस्तु
गत्या कोपि न करोति न कारयति च किंचित् सर्वविक्रियाशू
न्यस्वभावत्वात् परं तु स्वप्न इवाविद्यया कर्तृत्वादिकमात्मन्य
भिमन्यते मूढः तदुक्तं उभौ तौ न विजानीत इति श्रुतिश्च
ध्यायतीव [illegible]त्यादिः अत एव सर्वाणि शास्त्राण्यविद्व
दधिकारिकाणि विद्वांस्तु समूलाध्यासबाधात् आत्मनि कर्तृ
त्वादिकमभिमन्यते स्वाप्नस्वरूपं विद्वानिव बोधे अतो वि
क्रियारहितत्वादद्वितीयत्वाच्च विद्वान् करोति कारयति वेत्यु
च्यते तथा च श्रुतिः विद्वान्न बिभेति कुतश्चनेति अर्जुनो हि
स्वस्मिन्कर्तृत्वं भगवति च कारयितृत्वमध्यस्य हिंसानिमि
त्तदोषमुभयत्राप्याशशंके भगवानपि विदिताभिप्रायोहं
निघातयामीति तदुभयमाविहेप आत्मनि कर्तृत्वं मयि च
कारयितृत्वमारोप्य प्रत्यवायशंकां माकार्षीरित्यभिप्रायः

गी॰
टी॰
द्वि॰

155

अविक्रियत्वप्रदर्शनेनात्मनः कर्तृत्वप्रतिषेधात् सर्वकर्मोप
क्षेपभगवदभिप्रेतेन हंतिरुपलक्षणार्थः अरः स्फूर्तिकत्वात्
प्रतिषेधहेतोस्तुल्यत्वात् कर्मान्तराभ्यनुज्ञानुपपत्तेः तथाच
वक्ष्यतितस्यकार्यंनविद्यतइति अतोत्र हननमात्रापेक्षेणक
र्मांतरंभगवताभ्यनुज्ञायतइतिमूढजनजल्पितमपास्तं त
स्यापरस्यात्रहननस्यभगवताभ्यनुज्ञानात् वास्तवकर्तृ
त्वाद्यभावस्यकर्ममात्रेसमत्वादितिदिक्
॥ २१ ॥
सदानंदी टीका ॥
इत्थंनिषिद्धंकर्मत्वमात्मनोऽविकारिणः इदानींतुक्रियामा
त्रेकर्तृत्वंप्रतिषिध्यते १ नविनष्टुंस्वभावोस्यनव्ययोपचयाऽ
त्मकः गुणाद्युपचयादेवविनाशोह्युपपद्यतेयतः २ यथाकल्प
विकारीणांगुणनाशोव्ययोभवेत् नाशोवयवतोयद्वत्तंतुनाशे
पटव्ययः ३ नाशःस्याद्धर्मतोयद्वत्कटकादिविनाशतः हेम्नो
भवेत्तद्विर्धर्मकरहात्मनि ४ निर्गुणेनिष्फलेनाशस्तदभावा
दपुज्यते नजायतेयतोनित्योविद्यमानतयासदा ५ तंसर्वंवि
क्रियाशून्यंस्वात्मानंयस्तुसाक्षिणं शास्त्राचार्योपदेशाभ्यामहं
मस्मीतिचाक्रियं ६ साक्षात्करोतिसज्ज्ञानीपुरुषोसोहंतिकंकथं
प्रिये वघातयतीहसः शुद्धमाक्रियमात्मानंविद्वद्याथात्मसद्धा
नतः ८ कर्तृत्वप्रेरकत्वादेरभावंदर्शयत्यजः अयमत्राभि
सन्धिर्वास्तुदेवसमापतेः ९ निर्विकारतयात्मंतच्छुद्धत्वादि
ष्ठनोव्ययः नकर्ताप्रेरकोनायंकुत्रापिपरमार्थतः १० देहादी
नविद्वद्विषयाणिच ११ समस्तान्यामस्वात्मानिशास्त्राणि
विक्रियां कर्तृत्वाद्यात्मिकांकांचिदभिमन्यतइनमः १२ अथो

नः कर्तृत्वं स्वस्मिन्विश्वेश्वरे कालेन तथा आरोप्य वो भयमपि
दोषं हिंसानिमित्तकं ‖ आशङ्कते प भगवान् ज्ञानाभिप्राय ई
श्वरः ईतिद्वातयतीत्येवमाक्षिप्तपदद्वयं हि तत् ‖ आत्मन्या
रोप्य कर्तृत्वं प्रेरकत्वं मयीश्वरे मा कार्षीर्दोषशङ्कां त्वमित्य
भिप्राय ईरितः ‖ १५ ‖ २१ ‖

नीलकंठी टीका

नायं हन्तीत्येतदुपपादयति वेदेति विनाशमदर्शनं गच्छतीति शील
मस्येति विनाशि रज्जूरगवत्कल्पितं पार्थिवं स्थूलसूक्ष्मकारण
शरीरात्मकं तेनान्यं अविनाशिनं अनपचयं नित्यं नाशहीनं नत्वेह
तः अजं जन्मवान् हि अग्निर्नित्यः अयं नश्यत्वाग्नित्यश्चेत्यर्थः ननु
विनाशिनः स्वकार्यापेक्षया अन्यत्वमजत्वं नित्यत्वं च सांख्या
भिमते प्रधाने नार्किकाभिमते परमाणौ च प्रसिद्धमस्ति अत उक्तं अव्य
यमिति न व्येति विकार्यावस्थां गच्छतीत्यव्ययमपरिणामि यथा नं तव
लेप्रणहत्तमितित्यायेन त्रणसाम्यावस्थायामपि परिणा
माणमेव सर्वदास्तीति तेषामभ्युपगमात् आकाशस्यापि त
स्माद्वा एतस्मादात्मन आकाशः संभूत इति उत्पत्तिश्रवणादज
त्वाभावादेव नाव्ययत्वं नाहं शंशास्यानेयो वेद अपरोक्षीकरो
ति स आत्मा कथं केन प्रकारेण कं प्रत्यं घातयति हन्ति किं
याया मवर्तयति कं वा हंति न केन चित्प्रकारेण कमपि घात
यति न वा हंतीत्यर्थः द्वैताभावात् यथा हि श्रुतिः विद्यावस्थायां
सर्वकारकव्यापारं निषेधति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन
कं पश्येदित्यादि अविद्यावस्थायामेव च सर्वकारकव्यवहारं
दर्शयति यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादि
एतेन सर्वकारकोपमर्दित्वाद्विद्यायाः सर्वकारकसापेक्षैः क
र्मभिः सह समुच्चयो निरस्तः परस्परविरुद्धस्वभावत्वेन शी
तोष्णयोरिव द्वयोरेककार्यकारित्वस्य दृष्टान्यायेनासंभवा
दित्यत्र विस्तरः माहेश्वराणां ज्ञानिनोऽयुत्यान कालेऽविद्याले
शानुवृत्त्या चानयितृत्वादेः प्रसक्तावपि विद्यया तस्य बाधि

त्य

तत्वादागामिकर्मणामश्लेषाच्च न दोषः तथा च वक्ष्यते हत्वापि स इमांल्लोकान्न हंति न निबध्यते इति २१ ॥

आनंदी टीका

एवं श्रुतिज्ञातार्थमर्थमुपसंहरति यः पुरुषः एनं पूर्वोक्तलक्षणमात्मानमविनाशिनमन्यविकाररहीतं अजं माद्यविकारशून्यमव्ययमपक्षयवृद्धिपरिणामादिविकारशून्यं वेद जानाति स पुरुषः केन प्रकारेण कं घातयति परेण हन्यमानं प्रयुक्ते स्वयमपि वकं हंति एवं निर्विकारस्यात्मनः केनचिदपि प्रकारेण नाशो न संभवतीत्यर्थः अथ च भीष्मादीनां शिक्षयादिभिः घातनेन वक्ष्यमाणेन दोषचेत्यपणाहसितम् २१ ॥

रामकंठी टीका

एवं प्रतिपादितस्वरूपमविनाशिनमात्मानं यः पुरुषः प्रमातानित्यं सदैव जानाति स नरः भिन्नमात्मानं प्रतिपद्यमानः कथं केन प्रकारेण हन्यते विनश्यते हन्ति वा परं विनाशयति हननक्रियाकर्तृकर्मभावो यं शरीरमात्रप्रतिबद्धात्माभिमानेषु प्रतिबद्धेषु तेन तेषु एव व्यवस्थितः [illegible]

[illegible] २१ ॥

लालकी टीका

अविनाशिनमव्ययमनुत्पत्तिसूर्यं नरकं चावगाहते इति इति यानयतिकं कथं घातयति [illegible] २१ ॥

पंचोलेटीका

य एनं वेत्ति हंतारमित्यनेन आत्मनो हननक्रियां प्रति कर्मत्वकर्तृत्वाभावे प्रतिज्ञायते इति अनेन न अविक्रियत्वे हेतुमाह यः पुमान् एनं आत्मानमविनाशिनं नित्यं अजमव्ययं वेद जानाति हे पार्थ स पुरुषः कथं केन प्रकारेण कं पुरुषं घातयति कं घ्नति हि न स्ति आत्मनः षड्भावविकाररहितत्वात् हंतत्वं न शक्यते २१ इत्यर्थः

आत्मा

अत एव हन्तृत्वाभावो पूर्वोक्तः सिद्ध इत्याह नित्यं वृद्धिशून्यमव्ययमपक्षयशून्यं अजमविनाशिनमेनं यो वेद प्रबुद्धात्मा जानाति स पुरुषः कं हंति कथं वा हंति एवं भूतस्य वधे साधनाभावात्तथा स्वयं प्रयोजकोऽभूत्वा अन्येन कं घातयति कथं वा घातयति न कथंचिदपीत्यर्थः अनेन मय्यपि प्रयोजकत्वाद्दोष इति मा कार्षीरित्युक्तं भवति

भाषा अनुवाद

पूर्व श्लोकमें आत्माको षडविकार रहित कहा इससे आ
त्मा हनन क्रिया जो मारना इसका कर्ता कहे करने वा
ला नहीं यह बात अच्छी प्रकार सिद्ध भई सोई कहतेहैं
कि जो कोई इस आत्माको घटने बढने से रहित तथा
जन्म हीन और अविनाशी जानतेहैं हे अर्जुन वे किस
वास्ते किसीको मारेंगे कारण यह कि आत्मा अविनाशी
के वधकी उपाय नहीं है और आप प्रेरणा करि और कि
सीसे किसीको भी किस लिये घात करवेंगा इससे श्री
कृष्णजी की यह अभिप्राय जानीगई कि भीष्म आदिके
वधमें प्रयोजक रूप दोष हमें कभी दीजो नहीं अर्थात्
हमारे कहनेसे यह काम हमने किया है कहियो नहीं २१

दोहा

जो अविनाशी नित्यको अरु जाने अज अव्यय पार्थ कैसें
पुरुष सो कि हमारे मरावे मह्य २१

157

अथनहंतीति विशेषेणहेत्वयति वेदेति यएनंप्रतिपादितस्व
रूपमात्मानमविनाशिनं नित्यंसदैवजानाति तत्रहेतुः अव्य
यमिति अवयवापचयहीनमिति अवयवापचयेनैवहि वि
नाशः संभवति अविनाशित्वेहेतुमाह अजमिति अजंप्रागभावा
प्रतियोगिनं योह्येवंमविद्यमानः सजायते यश्चजायते सं
एवविनश्यतीति नचायंतथेत्येवंविद्वज्ज्ञानवान्पुरुषः पौरुष
लक्षणयुक्तः सकथंकेनप्रकारेणकंघातयति हन्यमानंसंपा
दयति अंतंवाप्रयुंक्ते कंचहंति हननक्रियाकर्मतांप्रापयति
कथमपिकमपिनहंतिनवाघातयति परप्रेरकोभवतीति हे
एवतत्प्रेरकत्वनिबंधनंपापंनास्मानाश्रयेदितिभावः यते
नचधनंजयाशंकापरास्ता २१॥

मधुभाष्य

अतोयएवं वेदसकथं कंघातयति हंतिवा अविनाशिनंने
मितिकनाशरहितं नित्यंस्वाभाविकविनाशरहितं अथ
वा अविनाशिनंदोषयोगरहितं नित्यंसदाभाविनमितिस
र्वत्रविवेकः दोषयुक्तपुरुषादिषुनष्टेष्वहृप्रयोगदर्शना
त् देहात्मविवेकानुभवार्थंदृष्टांतमाह २१॥

158

वासांसिजीर्णानियथाविहाय नवानिगृह्णा
तिनरोपराणि तथाशरीराणिविहायजीर्णा
न्यन्यानिसंयातिनवानिदेही २२ ॥

श्रीकरभाष्यं टी॰

प्रकृतन्तुवक्ष्यामः तत्रात्मनोऽविनाशित्वं प्रतिज्ञातं तत्कि
मिवेत्युच्यते वासांसीति वासांसिवस्त्राणिजीर्णानि दुर्बलतां
गतानि यथालोकेविहाय परित्यज्य नवान्यभिनवानिगृह्णा
त्युपादत्तेनरः पुरुषोऽपराण्यन्यानि तथा तद्वदेव शरीरा॰
णिविहाय जीर्णान्यन्यानि संयाति संगच्छति नवानि देह्यात्मा
पुरुषवदविक्रिय एवेत्यर्थः २२ ॥

आनंदगिरिकृतटीका ॥

आत्मनोऽविक्रियत्वेन कर्मासंभवे प्रतिपाद्याविक्रियत्वे हेतुत्वे॰
समर्थनार्थमेवोत्तरग्रन्थमवतारयति प्रकृतंत्विति किं तत्प्रकृ
तमिति शंकमानंप्रत्याह तत्रेति अविनाशित्वमित्युपलक्षण
मविक्रियत्वमित्यर्थः तदेवदृष्टान्तेनस्पष्टयितुमुत्तरश्लोक
मुत्थापयति तदित्यादिना आत्मनःस्वतोविक्रियाभावेपिपु
रातनदेहत्यागे नूतनदेहोपादाने चविक्रियावत्त्वध्रौव्यादवि॰
क्रियत्वमसिद्धमिति चेत्तत्राह वासांसीति शरीराणिजीर्णानि
वयोहानिंगतानि त्वग्वलीपलितादिसंगतानीत्यर्थः वाससां॰
पुरातनानां परित्यागेनवानांचोपादाने त्यागोपादानकर्तृभूत
लौकिकपुरुषस्यापि अविकारित्ववैकरूपत्ववदात्मनोदेह
त्यागोपादानयोरविरुद्धमविक्रियत्वमितिवाक्यार्थमाह पु
रुषवदिति २२ ॥

स्वामिकृतटीका ॥

ननुआत्मनोविनाशेपितदीयशरीरनाशंपर्यालोच्यशोचामी
तिचेत् तत्राह वासांसीति कर्मनिबंधनानांनूतनानांदेहाना
मवश्यंभावित्वान्नजीर्णदेहनाशेशोकावकाशइत्यर्थः २२ ॥

159

पिशाचभाष्यं टी॰

आत्मनो नित्यत्वं प्रतिज्ञातं तत्कथं शरीरेषु नश्यत्स्वित्यत आह वासांसीति यथा नरो जीर्णानि वासांसि विहाय नवानि वस्त्राणि गृह्णाति स्वयं विद्यमान एव तथा जीर्णानि शरीराणि संयाति देही स्वयं एवं देहविनाशेऽप्यविक्रियो विनाशरहितः २२ ॥

रामानुजभाष्यं टी॰

यद्यपि नित्यानामात्मनां शरीरविच्छेदमात्रं क्रियते तथापि रमणीयभोगसाधनेषु नश्यत्सु तद्वियोगरूपशोकनिमित्तमस्त्येवेत्यत आह वासांसीति धर्मयुद्धे शरीरादधिकतमकल्याणशरीरग्रहणं शास्त्रादवगम्यत इति जीर्णानि वासांसि विहाय नवानि कल्याणानि वासांसि गृह्णतामिव हर्षनिमित्तमेवात्रोपलभ्यते २२

अभिनवगुप्तकृतटी॰ ॥

यथा वस्त्राच्छादितस्य देहस्य वस्त्रनाशे सत्यपि वस्त्रान्तराहतो न विनश्यति एवमात्मा देहान्तराहतः २२ ॥

न च देहान्तरगमनमस्यापूर्वं संयाति देहान्तरं गच्छति तेन सम्बध्यते इत्यर्थः

परमार्थप्रपा टी॰ ॥

नन्वात्मनोऽविनाशित्वे निरूप्यमेव परं तु तदधिष्ठितदेहस्य वधनाभये न शोक इति चेत्तत्राह वासांसीति उत्पत्स्यमानदेहानां कर्मनिबन्धनत्वेनावश्यंभावात्तत्र जीर्णदेहनाशेऽपीति न दोषावकाशः २२ ॥

वनमाली टी॰

ननु जीवो नित्यस्तस्य देहयोगवियोगो देहे कौमारादिवदिति तु कं तत्र कौमारादेर्देहादनतिभिन्नत्वात्तत्र देहादात्मनो विवेकं स्फुटतरं भवतीत्यतो देहादात्मनो विवेकं दर्शयति वासांसीति यथा नरो जीर्णानि वासांसि विहायानायासेन विक्रियारहित एव जीर्णानि वासांसि विहाय अपराणि नवानि गृह्णाति तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति अन्यानि निकृष्टानि नवान्यपि विहायोत्कृष्टानि गृह्णाति जीर्णानि वयसा च शरीराणि विहायोत्कृष्टभोगार्थानि अभिनवानि देवादिशरीराणि संयाति उत्कृष्टानि

मनुभाष्य

वासांस्मीति स्वतः प्रयोनिमित्तेस्त्राविनाशिनोपिकेनचि
न्निमित्तविशेषेणस्यात् ककच्छेदवद्दियतोविशेषनि
मित्तानिषेयति २२॥

भाषा अनुवाद

जो कहो कि आत्मा अविनाशी भीहै पर तो भी इसकी स्थूल इस देहका नाश देख कर हम शोच करतेहैं तो देखो जैसे मनुष्य जीर्ण कहे पुराने वस्त्र परित्याग कहे उतार कर और नये कपडे धारण करते अर्थात् पहिरतेहैं तैसही आत्मा पूर्व प्राचीन शरीर कहे देह छोड कर और नूतन कहे नई देह ग्रहण करताहै इससे कर्म्मके अनुसार देहका अवश्य होन हार जो जन्म और नाश तिसमे शोच करना तुम ऐसोंको उचित नही है २२ ॥

चौपई

जैसे वस्त्र जीर्णको कोईत्यागे और ओढे नवसोइ जीर्णदेह त्यागत्योंदेही नूतन औरदेह धरलेही २२॥

नैनंछिन्दन्तिशस्त्राणि नैनंदहतिपावकः
नचैनंक्लेदयन्त्यापो नशोषयतिमारुतः २३

शांकरभाष्यटी॰

कस्मादविक्रियएवेत्याह नैनंछिन्दन्तीति एनंप्रकृतंदेहिनं नछिन्दन्ति शस्त्राणि निरवयवत्वान्नावयवविभागं कुर्वन्ति शस्त्राण्यस्यादीनि तथा नैनं दहति पावकोऽग्निरपि न भस्मीकरोति तथा नचैनंक्लेदयन्त्यापोऽपांहि सावयवस्यवस्तुनः आर्द्रीभावकरणेन अवयवविश्लेषापादनेसामर्थ्यं तन्ननिरवयवआत्मनिसंभवति तथास्नेहवत् द्रव्यंस्नेहशोषणेननाशयति वायुरेनं त्वात्मानंनशोषयति मारुतोपि २३ ॥

आनंदगिरिकृतटीका ॥

पृथिव्यादिभूतचतुष्टयप्रयुक्तं विक्रियाभावादात्मनोऽसिद्धमविक्रियत्वमिति शंकते कस्मादिति यतोनभूतान्यात्मानं गोचरयितुमर्हन्त्यतोयुक्तमाकाशवत्तस्याविक्रियत्वमित्याह आहेत्यादिना २३ ॥

स्वामिकृतटीका ॥

कथंहंतीत्यनेनोक्तंवधसाधनाभावंदर्शयन् अविनाशित्वमात्मनः स्फुटीकरोति नैनमिति आपोनैनंक्लेदयंति मृदूकरणे नशिथिलंनकुर्वन्ति २३ ॥

पिशाचभाष्यटी॰

कथंपूर्वंनविक्रियतेइत्युक्तमतआह नैनंछिंदंतीति एवंप्रकृतंदेहिनंनछिंदतिनिरवयवत्वान्नावयवविभागंकुर्वन्ति शस्त्राणिवास्यादीनि तथानैनंदहतिपावकः अग्निरपिनभस्मीकरोति तथाचैनंनक्लेदयन्त्यापः अपांहिसावयववस्तुनि आर्द्रीभावकरणेनावयवविश्लेषणापादनेसामर्थ्यंननिरवयवआत्मनिसंभवति तथास्नेहद्रव्यंस्नेहशोषणेनशोषयति

गी॰
टी॰
द्वि॰

वायुः एवंचात्मानमस्त्रेहवंतंनशोषयतिमारुतोपि २३ ॥

रामानुजभाष्यम् टी॰ ॥

उक्तरूपविनाशित्वंतद्धिदेहनसर्वमिदंततमितिपूर्वोक्तमवि
नाशित्वंस्वस्वग्रहणायअजयनुद्धयति शस्त्राग्न्यंबुवायुछेद
दह नक्लेदनशोषणायात्मनः एतेप्रतिकर्तुंनशक्नुवंतिसर्वगत
त्वादात्मनःसर्वतत्वव्यापकस्वभावतयासर्वेभ्यःसूक्ष्मत्वाद
तेषामपिनहेत्वाव्यापकतयत्वाच्छेदनदहनक्लेदनशोषण
नां ॥ २३ ॥

अभिनवगुप्तकृत टी॰ ॥

नास्यनाशकारणंशस्त्रादिकिंचित्करंविटेकस्वभावस्यनाश्रि
तस्यनिरंशस्यस्वतंत्रस्यस्वभावोनरापन्याश्रयविनाशावय
वविभागविरोधिप्रादुर्भावादिप्रक्रमेणनाशयितुमशक्यत्वा
त् ॥ २३ ॥

परमार्थप्रपा टी॰ ॥

नैनमिति क्लेदनेनाममस्टइत्वहेतोःशिथिलीकरणंतथाविधं
नभवति २३ ॥

वनमाली टी॰

ननुशरीरनाशेसकृतोननप्रपतीत्याशंकात्मघाकर्तृनाशस
मग्रभावमाह नैनमिति २३ ॥

एवंशरीराणांसंयोगेचाप्यात्मनोनित्यत्वंदर्शितमिदानींयेशु
याःशरीरवियोगंकुर्वन्तितेयेनविनेष्टुंनशक्नुवन्तीति द
दृश्य नास्युनरपस्यनित्यत्वंदृढयति नैनमित्यादित्रिभिः नैनमि
ति शस्त्राणि(खड्गादीन्यतितीन्यपिएनमात्मानंनछिंदंति)
द्विभागंकर्तुंनशक्नुवन्ति पावकोनलोऽप्युग्रतापोपिएनं
हृतिभस्मीकर्तुंनशक्नोति+मारुतःसर्वरातिवेगवतरोपि
नैनशोषयति शुष्कंकर्तुंनशक्नोतियतःएतेहेतवोजडाः

चतुनः आपोऽप्यागाधत्वेनवत्योपि एनंनक्लेदयन्ति आर्द्रीकरणेनशिथिलीकर्तुंनशक्नुवन्ति

रोपार्जितधर्मफलभोगाय संयाति सम्यक् गर्भवासक्लेशं विने
व प्राप्नोति देही स्वकृष्टधर्मानुष्ठानाभीष्मादिरित्यर्थः अन्यत्त्व
तरे कल्याणनवरूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं
वा ब्राह्मं वेत्यादि स्कन्दे: २२ ॥

ऊहमवैजयन्ती टी॰

नन्वात्मनो नित्यत्वादजत्वादव्ययत्वाच्चाविनाशित्वस्यानन्दत्व
पर्यन्तपूर्वजन्मार्जितपुण्यपुञ्जैर्लब्धातिकमनीयरूपस्य नाना॰
भोगास्पदस्यापि प्रियतरस्यैवंभूतमभीष्मादिदेहस्य विनाशं क॰
थं करिष्यामीत्याशंकायामुत्तरमाह वासांसीति यथा जीर्णा
नि पुरातनानि वासांसि वस्त्राणि विहाय परित्यज्य विक्रियय प
वनरो मनुष्यः अपराणि त्यक्तवस्त्रादधिकतराण्यन्यानि नवा
नि नूतनानि गृह्णाति [illegible] करोति तथा जीर्णानि वयस्तपोभ्या
म् निकृष्टानि निकृष्टानि वा शरीराणि गात्राणि विहाय त्यक्त्वा
देही स्वधर्मानुष्ठानाय देहवान् जीवः अन्यानि त्यक्तदेहादनुत्
कृष्टपराणि नवानि निर्जराणि नित्यप्राप्तयौवनानीत्यर्थः सं
याति सम्यक् प्राप्नोति अयं भावः आजन्म स्वधर्मानुष्ठानपरा
भीष्मादयः पापाचरणतत्पराद्दुर्योधनादयश्चोभयेपि पुण्य
पुण्यकर्तारो यदि धर्मयुद्धे स्वस्वकलेवरं त्यक्ष्यन्ति तर्हि सर्वेह
कृतिनो भूत्वा त्यक्तदेहादधिकतमं दिव्यमंगलरूपं देहं दिवा
भोगं च प्राप्य देवगणैः सह दिवि मोदिष्यन्ते यदि त्वयुद्धवतिरि
कीयत्र जन्मवितत्कृतेशादौ देहान् हास्यन्ति तर्हि भीष्मादयः पु
ण्यवन्तोपि आलापगात्रसंस्पर्शनिःश्वाससहभोजनात्सं
वर्गनि च पापानि तैलबिन्दुरिवाम्भसीति वचनात् दुर्योधना॰
दिसंसर्गदोषवशात्पतिष्यन्ति दुर्योधनादयस्तु निश्चयेन नि
रयमेव गमिष्यन्ति तस्मा[illegible]डक्रमेतदनुसंधायैतत्त्वं युद्धं वि
धात्पापनिहन्तृपायो नास्तीति निश्चित्य अहो वत महत्पाप
कर्तुं व्यवसिता वयमिति स्वाभिन्याघ्रप्राप्ति भयरूपबुद्धिभ्रमं
त्यक्त्वा दुर्गतिनिहन्तये पुण्यफलं भोगप्राप्तये च त्वमेतं पाण्डु॰

गी॰
टी॰
द्वि॰

त्सितशरीरवियोगंकारयित्वाऽतिरमणीयदिव्यमंगलशरीरसं
योगंकारयतैवैतेनमहदुपकारकत्वंभविष्यति यद्यपकारकत्वं
त्वभ्रान्त्यायुद्धेनकरिष्यसितर्हितेषांस्वकृतभोगस्यविघ्नकर्तृत्व
मेवभविष्यसिमहोत्सवस्यानेशोककारणंमहदनुचितमिति

+ नन्वेवमात्मनोविनाशित्वेपिदेहानांविनाशि दिदेहानामनेक कार्यइत्याशंक्याहउक्ते ॥ +

मधुसूदनी टीका ॥ त्वाशुद्धस्यचतत्राशोकत्वात् कृतसाधनानामया

जीर्णानिविहायवस्त्राणिनवानिगृह्णातिविक्रियाशून्यएव
रोयथैवमेतावतैवनिर्विकारे अपराणीतिविशेषणमुत्कर्षातिश
याय प्रयोजनार्थंतेनयथानिकृष्टानिवस्त्राणिविहायोत्कृष्टानि
जनोगृह्णातीत्येतदुचितमेव तथाजीर्णानिवयसातपसाचकृ
शानिभीष्मादिशरीराणिविहाय अन्यानिदेवादिशरीराणिस
र्वोत्कृष्टानिचिरोपार्जितधर्मफलभोगायसंयातिसम्यक्गर्भवासा
दिक्लेशव्यतिरेकेणप्राप्नोतिदेहीप्रकृष्टधर्मानुष्ठानाद्देहवान्
भीष्मादिरित्यर्थः अन्यन्नवतरंकल्याणतरंरूपंकुरुतेपित्र्यं
वागांधर्ववादेववाप्राजापत्यंवाब्राह्मंवेत्यादिश्रुतेः एतदुक्तं
भवति भीष्मादयोहियावज्जीवंधर्मानुष्ठानक्लेशेनैवजर्जर
शरीरावर्तमानशरीरपातमंतरेणतत्फलभोगायासमर्था
यदिधर्मयुद्धेनस्वर्गप्रतिबंधकानिजर्जराणिशरीराणिपात
यित्वादिव्यदेहसंपादनेनस्वर्गभोगयोग्याःक्रियंतेत्वयातदा
त्वतउपकृताएवते दुर्योधनादीनामपिस्वर्गभोगयोग्यदे
हसंपादनान्महानुपकारएवतथाचात्यंतमुपकारकेयु
द्धेऽपकारकत्वभ्रमंमाकार्षीरिति अपराण्यन्यानिसंयाती
तिपदद्वयवशाद्भगवदभिप्रायएवमभ्यूहितः अन्येनतुदृ
ष्टान्तेनाविकृतत्वप्रतिपादनमात्मनःक्रियतइतिव्या
ख्यानमतिस्पष्टं [illegible] ॥२२॥

सदानंदी टी॰ ॥

ननुमाभूदात्मनोनाशस्तथापितेषांमहात्मनां कथंभीष्मादि
देहानांनाशःकार्योमयेतिचेन्न १ त्यक्त्वाजीर्णानिवस्त्राणि

163

शक्त्वात्त्वं विक्रियः ज्ञनो नवानि श्रेष्ठानि जीर्णानि वयसा तथा भीष्मादिक शरीराणि त्यक्त्वा भीष्मादिदेहिकः सर्वोत्कृष्टानि दिव्यादि शरीराणि प्रयात्यसौ ३ यावज्जीवं हि भीष्माद्यास्थमेनानुष्ठन् विदतः जर्जरीभूतदेहास्ते सर्वे स्वर्गाभिलाषिणः ४ जर्जराणि शरीराणि पातयित्वा रणे भवान् दिव्यदेहप्रदानेन ते षां सुप्रकृतिपरः ५ करोत्येवं हि युद्धे स्मिन् धर्मे सर्वोपकारिणि माकार्षीर्दौर्बल्यं त्वमित्यभिप्रायः ईशितुः ६ ॥ २२ ॥

नीलकंठी टी० ॥

न तु श्रात्मरणे यज्ञे तज्ज्ञानपुत्राः हस्तकेशाग्रीना दधीतेति श्रात्मा नेवधीयवर्णादि विशेषणवंतमेवाधिकत्यकर्मविषयः प्रवर्तते तेन नीलाद्युत्पलमिव देहादन्यश्रात्मावयार्थविं नशक्यतरत्वाशंक्याह वासांसीति देहीप्रेषानन्वाहेतिदेडस्य विशेषण त्वेपिनशेषानुवन्तस्वरूपांतर्गतत्वे एवं श्रात्मत्वादेरपि नत्र गीकामस्वरूपांतर्गतत्वमिति वस्त्रदेवदत्तयोविजडाजडयोर्देहात्मनोरत्यंतविलक्षणमस्तीति वस्त्रनाशेन देवदत्तनाशं मन्वानस्येव नवदेहनाशादात्मनाशं मन्वानस्यात्यंतमोढ्यमिति भावः स्पष्टार्थः श्लोकः ॥ २२ ॥

[illegible] ज्ञानेश्वरी टीका

नायं भूत्वा भवितेत्यादि व्याख्यानार्थप्रसंगादात्मनो नित्यस्य शाकृतकर्मभोगार्थं पूर्वपूर्वदेहत्यागं नरो नवदेहग्रहणं सोपपत्तिकमाह स्पष्टार्थमिदं पद्यम् २२ ॥

रामकंठी टीका

यथा कश्चित् पुरुषो जीर्णान्युपभुक्तानि वस्त्राणि त्यक्त्वा सपवस नन्यानि नवानि उपभोगक्षमाणि गृह्णाति तद्वत्तेन नजन्मादि विविधविकाराक्रान्तनानाशरीरसंयोगवियोगवशात्तत्रात्मनो वहिस्त्वमात्रेक लक्षणवियोग इतिनित्यएवायमनित्यः शरीरधर्मेर्मनागप्यसंस्पृष्टोयतः २२ ॥

लासिकी टीका

न देहनाशात्मनस्तनयमेऽनुपलभात्कथमविनाशित्वमि

गी.
टी.
द्वि.

164

यथा कश्चिज्जीर्णान्युपभोगाक्षमाणि वस्त्राणि
त्यक्त्वा स एव सन्नन्यानि नवानि उपभोगक्षमा-
णि गृह्णाति

तिदृष्टांतेन द्रढयति वासांसीति तथा देही अयमात्मा कर्मा-
भूतशरीरं कर्मक्षयेण जीर्णान्युपभोगाक्षमाणि विहायान्यानि
नवानि उपभोगक्षमाणि संयाति याप्नोति कर्मनिबन्धनानां
तनूनां देहानां अवश्यंभावित्वाज्जीर्णनाशे शोकावकाशो
त्यर्थः २२ ॥

पंचोलीटीका

आत्मनः प्रतिपादितमविनाशित्वं दृष्टांतेन द्रढयति वासांसीति नर
पुरुषः यथा येन प्रकारेण लोके जीर्णानि दुर्बलगतानि वासांसि वस्त्राणि
विहाय परित्यज्य अपराणि अन्यानि नवानि नूतनानि गृह्णाति उपादत्ते
ही आत्मा तथा तेन प्रकारेण जीर्णानि शरीराणि विहाय अन्यानि
नि संयाति देही आत्मा पुरुषवत् अविक्रिय एवेत्यर्थः २२

रसवीरसमिद्धोयिनी॥

नन्वस्तु देहस्यैव विनाशः स्थापितस्तस्य चेतनत्वाद्युपलंभा
थमात्मनो न विनाशित्वमिति व्यामोहनिवर्तनाय सदृष्टांतं
रपि नित्यत्वमस्य द्रढयति वासांसीति यथा चिरकालाच्छा
वधेन जीर्णस्य वस्त्रस्य त्यागे सत्युचितस्य नूतनस्य तस्यावरणा
न कश्चिद्धि नश्यति एवमात्मापि वयस्तपश्चादिना कृपानिदेह
त्यक्त्वा विरोपार्जितसुकृतफलभोगक्षमानि तानि नूतनानि दे
द्विपरीतकर्मि देहान्तराणि विनश्यतीति भीष्मादिदेहानां सुकृतसा
नो युद्धेन कथमहं विनाशं करोमीत्यर्जुनाशंकोत्तरिता अतो
गवदभिप्रायः युद्धेन भीष्मादीनां शरीरविनाशेनेनोपार्जितसु
तभोगाभावेन नापकारः स्यात्प्रत्युत यावज्जीवं धर्मानुष्ठानलेप
यीभूतदेहानामेतेषां स्वोपार्जितसुकृतफलभोगाशक्तत्यानं
तएव श्रेयानिति युद्धेन तान्निपातयित्वा कल्याणफलभोग
सत्रुवितदेहांतरसंपादनेन महानुपकार एव कृतः स्यादिति
स्यमहोपकारकत्वेन युद्धस्य त्वेपकारभ्रमेण पापशंकामा
ति ॥

शरीरस्य चेतनद्रव्यनाशकरणाय समर्थाश्चपि चेतनात्मस्व
विशिष्ट रूपस्य एणादि विनाशकरणाय प्रभवो न भवंति तस्मादेनमवि
नाशिनं विद्धीति भावः २३ ॥

नतुदेहनाशेतदंमंतरवर्तिनआत्मनः कुतो

मधुसूदनी टी॰ ॥

नविनाशोगृहदाहेतदंतर्वर्तिवत्तद्वदित्यतआह +

+ शस्त्राण्यस्यादीन्यतितीक्ष्णान्यपि एनं प्रकृतमात्मानं न छिन्द
न्ति अवयवविभागेन द्विधाकर्तुं न शक्नुवंति तथा पावकोऽग्नि
रतिप्रज्वलितोऽपि एनं न भस्मीकर्तुं शक्नोति न चैनमापोऽत्यंतवे
गवत्योपि आर्द्रीकरणेन विश्लिष्टावयवं कर्तुं शक्नुवंति मारु
तो वायुरतिप्रबलोऽपि एनं नीरसं कर्तुं शक्नोति सर्वनाशकारे
षु प्रकृतेषु उक्तसमये शस्त्रादीनां प्रकृतत्वादवयुत्य तद्वादेनोप
न्यासः पृथिव्यप्तेजोवायूनामेव नाशकत्वप्रसिद्धेस्तेषामेवो
पन्यासो नाकाशस्य [illegible]
[illegible] २३ ॥

सदानंदी टी॰ ॥

नतु देहविनाशेन कुतो नाशो न चात्मनः गृहदाहे यथादाहस्त
दंतरवर्तिनः १ तथेत्याशंक्य भगवानाह सर्वज्ञ ईश्वरः शा॰
स्त्राण्यंगविभागेन द्विधाकर्तुं चिदात्मकं २ न शक्नुवंति वह्निर्नो
भस्मीकर्तुं तमो विभुं न चार्द्रीकरणेनापः शक्नुवंत्येनमांतरं ३
विश्लिष्टांगकमात्मानं कर्तुं तद्वन्न मारुतः आत्मानं नीरसं क
र्तुं शक्नोति बलवत्तरः ४ प्रसिद्धा नाशका एते प्रभवंति न चात्म
नि च पृथिव्यप्वह्निवायूनां नाशकत्वप्रसिद्धितः ५ तेषामप्या
नरोऽस्यात्मा ते विनाते भ्रष्टघातकः ६ २३ ॥

नीलकंठी टी॰ ॥

कीदृशोऽसौ देहीत्यत आह नैनमिति एनं शस्त्राणि नाच्छिन्दं॰
ति न द्वेधा कुर्वंति अस्थूलत्वात् नहि पार्थिवपरमाणुवत्पा
कजरूपाद्याश्रयो भवितुमर्हतीत्याशंक्याह नैनं दहति पावक
इति अगुणत्वात् आपश्चैनं न क्लेदयंति अस्पर्शत्वात् स्पर्शव
द्द्रव्यमद्भिरार्द्रीकर्तव्यं न त्वस्पर्शं न शोषयति मारुतः अस्ते

गी॰
टी॰
द्वि॰

165

हृत्वात् एतेन अदीर्घमस्थूलमनणु अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यदिति श्रुतिप्रसिद्धानामदीर्घत्वाशब्दत्वादीनामपि संग्रहो ज्ञेयः २३ ॥

आनंदी टीका

उत्तरूपमशरं चापमित्यादिना यदपि शस्त्रास्त्रादिकमेतेषां हननोपकरणं त्वया संभावितं तेनापि देहस्यैव छेदादि न तु जीवस्येत्याह पावकेत्यादिना आग्नेयवारुणवायव्यास्त्राणां दाहादेः कार्यस्योक्तिः २३ ॥

रामकंठी टीका

एनमात्मानं शस्त्राणि खड्गादीनि शरीरमिव न छिंदंति न द्विधा कुर्वंति नैवाग्निरेनं दहति नापः क्लेदयंति न च मारुतः शोषं अपनयति छेदादिभिर्विक्रियमाणे शरीरे न तस्य निसर्गनिर्विकारस्य विकारसंसर्गः [illegible] २३ ॥

लासि की टीका

ननु देहनाशानंतरं तद्वर्तिन आत्मनोपि नाशप्रसंगो गृहदाहे तद्वर्तिपुरुषवदित्यत आह नैनमिति ४ २३ ॥


४ शस्त्राणि एनमात्मानं शरीरवन्न छिन्दन्ति एनं पावको न दहति एनमापो न क्लेदयन्ति विश्लिष्टावयवं न कुर्वन्ति एनं मारुतो न शोषयति निरवयवत्वात् पृथिव्यप्तेजोवायूनामेव नाशकत्वप्रसिद्धेस्तेषामेवोपन्यासो नाशकस्य

पंचोलीटीका

विनाशहेत्वभावादविनाशीत्याह नैनमिति शस्त्राणि असयादीनि एनं आत्मानं न छिंदंति निरवयवत्वात् अवयवविभागं न कुर्वंति तथा पावकोग्निरपि एनं न दहति न भस्मीकरोति तथा आपः एनं आत्मानं न क्लेदयंति आर्द्रीभावेन न शीर्णयंति अपां हि सावयवस्य वस्तुन आर्द्रीभावकरणेनावयवविश्लेषणे सामर्थ्यं न तु निरवयवात्मनि इह भवति मारुतः वायुरपि एनमात्मानं न शोषयति शुष्कं न करोति २३

रसाधीरसमिश्रोयिनी ॥

ननु दृश्ये वेश्मनि तदभ्यंतरवर्तिनां पुरुषाणां दोषः यथा भवति एवं देह विनाशे तदंतर्वर्तिनो देहिनोपि विनाशः कुतो नेत्याशंक्य पृथिव्यप्तेजोवायूनां विनाशकत्वेन प्रसिद्धानामशक्तत्वं रिति देहस्य दर्शयन्नी



नरयति नैनमिति प्रसह्यातिखड्गादीनि पार्थिवान्यवयवविभाजका
नि एनमात्मानं न छिंदंति अवयवविभागेन द्विधाकर्त्तुं न प्रभवंति
तथा पावको वह्निरेनं न दहति भस्मीकर्त्तुं न भवति तथैनमापो
जलानि न क्लेदयंत्यार्द्रीकरणेन न विश्लिष्टावयवं कर्त्तुं प्रकल्पंते
तथा तिप्रचंडोपि मारुतो वायुरेनं न शोषयति नीरसं कर्त्तुं न क्षमते
२२ ॥

मधुभाष्य

नैनमिति वर्त्तमाननिषेधात्स्यादुत्तरत्रेत्यत आह २३॥

168

भाषा अनुवाद

या श्लोकमें कहा जो आत्माके वधका साधना भाव कोहे नि रुपाय अर्थात् किसी प्रकारसे आत्माका वध नही होसकता है यह दिखाय करि अब अविनाशी है इसको दृढ करते हैं कि सकल अस्त्र शस्त्र इस आत्माको छेदन नही करि सकते और अग्नि भी इसको दग्ध करनेको समर्थ नही जल इसको आई कोइ गीला नही करि सकता और वायु भी इसको सुखाय नही सकती है क्यो कि यह अवयव रहित है और इन सबको सामर्थ्य अवयव सहितमें है अर्थात् भौतिक वस्तुमे कोइ पंचभूत निर्मित वस्तुमे इनकी सामर्थ्य है २३

दोहा

शस्त्र अछेद्य अदाह्य है अरु अक्लेद्य अशोष नित्य सर्वगत स्थाणु है अचल सनातन तोष २३॥

167

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः २४

शांकरभाष्ये टी॰ ॥

यत एवं तस्मात् अच्छेद्योऽयमिति यस्मादन्योन्यनाशहेतु
भूतानि एनमात्मानं नाशयितुं नोत्सहन्ते तस्मान्नित्यो
नित्यत्वात्सर्वगतः सर्वगतत्वात् स्थाणुरित्येतत् स्थिरत्वाद
चलोऽयमात्माऽतः सनातनश्चिरन्तनो न कारणात् कुत
श्चिन्निष्पन्नोऽभिनव इत्यर्थः न तेषां श्लोकानां पौनरुक्त्यं
चोदनीयं यतः एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रिय
त्वं चोक्तं न जायते म्रियते वा इत्यादिना तत्र यदेवात्मविषयं किं
चिदुच्यते तदेतस्मात् श्लोकार्थान्नातिरिच्यते किंचिच्छब्दतः
पुनरुक्तं किंचिदर्थत इति दुर्बोधत्वादात्मवस्तुनः पुनः पु
नः प्रसंगमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवा
न् वासुदेवः कथं नु नाम संसारिणामसंसारित्वबुद्धिगोच
रतामापन्नं सदव्यक्तं तत्त्वं संसारनिवृत्तये स्यादिति किंच
अव्यक्तोऽयमिति अव्यक्तः सर्वकारणविषयत्वान्न व्यज्यत इ
ति अव्यक्तोऽयमात्मा अत एवाचिन्त्योऽयं बुद्धीन्द्रियगोचरं वस्तु
तच्चिन्ताविषयत्वमापद्यते अयं त्वात्माऽनिन्द्रियगोचरत्वा
दचिन्त्योऽत एवाविकार्यो यथा क्षीरं दध्यादिना विकारि न त
था अयमात्मा निरवयवत्वाच्चाविक्रियो न हि निरवयवं किं
चिद्विक्रियात्मकं दृष्टमविक्रियत्वादविकार्योऽयमात्मोच्य
ते २४ ॥

आनंदगिरिकृतटी॰ ॥

पृथिव्यादिभूतप्रयुक्तच्छेदनाद्यविक्रियाभावे योग्यताभा
वं कारणमाह यत इति पूर्वार्द्धमुत्तरार्द्धे हेतुत्वेन योजयति

गी.
टी.
द्वि.

२४
१

168

यस्मादिति नित्यत्वादीनामन्योन्यं हेतुहेतुमद्भावं सूचयति
नित्यत्वादिना नचानित्यत्वं परमाणुष्वव्यभिचारादसाधकं
सर्वगतत्वस्येति वाच्यं तेषामेवाप्रामाणिकत्वेन व्यभिचारा
नवतारान्नच सर्वगतत्वेपि विक्रियाशक्तिमत्त्वमात्मनोऽस्ती
त्युक्तं विभुत्वेनाभिमतेन नभसि तदनुपलंभान्न विक्रियाश
क्तिमत्वे स्थैर्यमास्यात् इत्याशंक्य तथाविधस्य मृदादेरस्थिरत्वद
र्शनादित्याशयेनाह स्थिरत्वादिति स्वतो नित्यत्वेपि कारणा
न्नाशसंभवाद् उत्पत्तिरपि संभवितेति कुतश्चिरंतनत्वमित्या
शंक्याह नकारणादिति आत्मनोऽविक्रियत्वस्य न जायते
म्रियते वेत्यादिना साधितत्वात्तस्यैव पुनरभिधाने पुनरुक्ति
रित्याशंक्याह नतेषामिति अनाशंकनीयस्य चोद्यस्य प्रसंगं
दर्शयति यत इति अतो वेदाविनाशिनमित्यादो न पुनरुक्तेः पौ
नरुक्त्यमिति शेषः कथं तत्र पौनरुक्त्याशंकास्पदत्वमित्यपे
तत्राह तत्रेति वेदाविनाशिनमित्यादिश्लोकः सम्म्याप
स्पष्यते श्लोकशब्देन नजायते म्रियते वेत्यादिरुच्यते ना
हश्लोके जन्ममरणाद्यभावोऽभिलप्यते वेदेत्यादौ पुनरय
त्नयाद्यभावो विवक्षितः तत्र कथमर्थातिरेकाभावमादाय
पौनरुक्त्यं चोद्यते तत्राह + दुर्बोधत्वादिति पुनःपुनर्विधान
भेदेन वस्तु निरूपयतो भगवतोऽभिप्रायमित्याह कथंचि
ति त्वंपदार्थपरिशोधनस्य प्रकृतत्वात्तत्रैव हेत्वन्तरमा
ह किंचेति आत्मनो नित्यत्वादिलक्षणस्य तथैव प्रख्या
मितिनभवति तत्राह अव्यक्त इति मा न हि प्रत्यक्षतत्वं यु
त्प्रमेयत्वं तस्य किं न स्यादित्याशंक्याह अतएवेति तदेव प्र
पंचयति यद्धीति अतीन्द्रियत्वेपि सामान्यतो दृष्टविषय
त्वे भविष्यतीत्याशंक्य कूटस्थेनात्मना व्याप्तिलिंगाभावान्
त्वमित्याह अविकार्य इति अविकार्यत्वे व्यतिरेकदृष्टान्त
माह यथेति किंचात्मा न विक्रियते निरवयवद्रव्यत्वात्

किंचिदिति कथं तर्हि पौनरुक्त्यं न चोदनीयमिति मन्यसे तत्रा
ह +

निरवयवत्वाच्चेति

रवदितिव्यतिरेकानुमानमाह निरवयवत्वेपि विक्रियावत्त्वेका
त्वतिरित्याशंक्याह नहीति सावयवस्यैव विक्रियावत्त्वदर्शनात्
विक्रियावत्त्वे निरवयवत्वानुपपत्तिरित्यर्थः यद्धि सावयवं स
क्रियं तत्क्षीरादि तद्दध्यादिना विकारमापद्यते नच आत्मनः श्रुति
प्रमितनिरवयवत्वस्य सावयवत्वमतोऽविक्रियत्वान्नायं वि
कार्यो भवितुमलमिति फलितमाह अविक्रियत्वादिति २४ ॥

स्वामिकृतटीका ॥

तत्र हेतुमाह अच्छेद्य इत्यादि सार्धेन निरवयवत्वात् अच्छेद्योयं
अक्लेद्यश्चामूर्तत्वात् अदाह्यः द्रवत्वाभावादशोष्य इति इतश्च्छे
च्छेदादियोग्यो न भवति यतो नित्यः अविनाशी सर्वत्रगतः स्था
णुः स्थिरस्वभावः रूपांतरापत्तिशून्यः अचलः पूर्वरूपःपरित्या
गी सनातनः अनादिः २४ ॥

पैशाचभाष्य टी ॥

यत एवं तस्मादमूनि नाशहेतुभूतान्यात्मानं नाशयितुं नोत्सहं
ते तस्मान्नित्योयं नित्यत्वात्सर्वगतः सर्वगतत्वात्स्थाणुरिव स्था
स्थिरत्वात् णुत्वादचलोयं च सनातनः चिरंतनः नकारणात्कुतश्चिन्निष्पन्नो भि
नव इत्यर्थः कथं तु नाम संसारिणां बुद्धिगोचरतामापन्नः संसा
रनिमित्ताभावादिति पुनः पुनरुच्यते २४ ॥

रामानुजभाष्य टी ॥

अत आत्मा नित्यः स्थाणुरचलोयं सनातनः स्थिरस्वभावोऽप्रकंप्यः
पुरातनः छेदनादियोग्यानि वस्तूनि यैः प्रमाणैः तैरात्मान
व्यज्यत इत्यव्यक्तः अच्छेद्यादिविसजातीयः २४ ॥

अभिनवगुप्तकृत टी ॥

न च देहांतरगमनमस्य पूर्वदेहांतरे गच्छति तेन समस्य
ते रतार्थः २५ ॥ पूर्वश्लोकटीकया गतार्थत्वात्पृथङ्नास्ति टीका

परमार्थप्रपा टी ॥

अच्छेद्य इति निरवयवत्वादमूर्तत्वाद्द्रवत्वात्तथाविधो न भव

गी॰
टी॰
द्वि॰

इत्या

तिछेद्यत्वादिदेहगतमात्मन्यारोप्यते इत्याह तदुक्तं अयःपिंडग
तेवह्नौ लोहाकारत्वं ताडनं आरोप्यते तथा लोहे दाहकत्वादि
वह्निजमिति अध्यारोपितस्यैवासत्त्वमाह नित्य इत्यादि नित्योऽवि
नाशी सर्वगतो व्यापी छिन्नः स्थाणुः स्थिरस्वभावः रूपान्तरशून्य
अचलः पूर्वरूपापरित्यागी सनातनः अनादिः ॥ २४ ॥

वनमाली टीका ॥

शस्त्राद्यनाश्यत्वमुपपादयति अच्छेद्य इति निरवयवत्वादछे
द्यः अत एवादाह्यः अमूर्तत्वान्निरवयवत्वाच्चाक्लेद्यः अद्रवत्वा
दशोष्यः सर्वेषु देशेषु कालेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु नि
निरंतरं गच्छतीति नित्यः सर्वगतः नित्यत्वसर्वगतत्वयोः पृ
थग्विशेषणत्वे तयोः पूर्वमुक्तत्वात्पुनरुक्तिः स्यात् स्थाणुः
कूटस्थो निर्विकारः अचलो बाल्याद्यवस्थाशून्यः सनातनः
सर्वविकारात्प्रागेवैकाकारेण विद्यमानः २४ ॥

अत्रमैवजयन्ती टी॰ ॥

नन्वतितीव्रशस्त्रानलादयः कुतो नैनं विनाशयंतीत्यपेक्षा
यां हेतुमाह अच्छेद्योऽयमिति एवकारोऽवधारणार्थकः
न्ययोगो व्यवच्छिद्यते चशब्दः समु[illegible]यार्थकः यस्मादय
मात्माऽच्छेद्य एवच्छेदनानर्ह एव भवति तस्माच्छस्त्राण्येनं न छि
न्दंति यस्माच्चायमदाह्य एव दहनानर्ह एव तस्मादेनं पावको
न दहति यस्माच्चायमक्लेद्य एव क्लेदनानर्ह एव तस्मादेनं ना
पो न क्लेदयन्ति यस्माच्चायमशोष्य एव शोषणानर्ह एव त
स्मादेनं मारुतो न शोषयति ननु अस्याच्छेद्यत्वादय एव कुतो
त्यपेक्षायां क्रमेण चत्वारि हेतुगर्भितविशेषणान्याह नित्य
त्यः सर्वकालैकरूपः अतोऽच्छेद्यः सर्वगतः सर्वेषु अन्यादिप
र्थेष्वनुगतः आप्तः यतस्तेभ्योऽधिकतरातिसूक्ष्मरूपोऽयमतः
दन्तर्व्यापितेनैव क्रियते अतोऽदाह्यः ननु सर्वत अक्लि
अरूपकोऽयमित्याशंकायामाह स्थाणुरिति तिष्ठतीति स्थाणुः

स्थाणुः स्थावरः स्थाणुः स्थिरस्वभावोऽणुपरिमाणक इत्यर्थः
स्थाणुत्वादयमक्लेद्यः यः पदार्थोऽणुकायवयववान्स एव जल
संयोगेन शिथिलीभावं प्राप्नोति अयं त्वस्थिराणुरूपकत्वेन नि
रवयवस्तस्मादक्लेद्यः इत्यनेनात्मा विभुरिति शंका दूरतो नि
रस्ता आत्मनः उपाधिकृतमणुत्वं वा रयत्र शोष्यत्वे हेतुमाह
अचल इति स्वस्वरूपगुणादिभ्यो न चलतीत्यचलः यः पदा
र्थो निजस्वरूपादिकं त्यक्त्वा रूपान्तरं गच्छति स एव वातेन शो
ष्यो भवति अयं तु बंधमोक्षावस्थाप्राप्तोपि कदाचिदपि स्वा
भाविकाणुरूपंता नित्वादीन्गुणांश्चात्यजन्नेवावस्थितस्त
स्मादचलत्वान्मारुतेन न शोष्यः औपाधिकाणुवादे तु बुद्धे
र्गुणेनात्मगुणेन चैव आराग्रमात्रः ह्यवरोपि दृष्टः अणुरेष
आत्मा चेतसा वेदितव्यः वालाग्रशतभागस्य शतधा कल्पित
स्य च भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते इत्यादीना
मात्मनः स्वाभाविकाणुरूपकत्वप्रतिपादनपराणां श्रुती
नां विरोधस्तस्मादयं पक्षो हरतोऽनादरणीयः यस्मादेवं तस्मा
त्सनातनः पुरातनः २४ ॥

शस्त्रादीनां तन्नाशकत्वाऽसमर्थ्यं तस्य तत्र **मधुसूदनी टीका** ॥ नित्यनाशाभावे हेतुमाह +

+ यतोऽच्छेद्योऽयं अतो नैनं छिन्दन्ति शस्त्राणि अदाह्योऽयं यतोऽतो
नैनं दहति पावकः यतोऽक्लेद्योऽयं अतो नैनं क्लेदयन्त्यापः यतोऽ
शोष्योऽयमतो नैनं शोषयति मारुत इति क्रमेण योजनीयं एव
कारः प्रत्येकं संबध्यमानोऽच्छेद्यत्वाद्यवधारणार्थः वः समुच्चये
हेतौ वाच्छेदाद्यनर्हत्वे हेतुमाहोत्तरार्धेन नित्योऽयं पूर्वापरको
टिरहितोऽतोऽनाद्यः असर्वगतत्वे च नित्यत्वस्याद्यावहिका

लोके

रेव विभागे इति न्यायात् पराभ्युपगतपरमाण्वादीनामनभ्यु
पगमात् अयं सर्वगतो विभुरतो नित्य एव एतेन प्राप्यत्वं परा
कृतं यदि वायं विकारी स्यात्तदा सर्वगतो न स्यादयं तु स्थाणु
रविकारी अतः सर्वगत एव एतेन विकार्यत्वमपाकृतं यदि

गी॰
टी॰
द्वि॰
देवंतस्मा

120

वायंचलः क्रियावान्स्यात्तदाविकारीस्यात्घटादिवत् अयंतु
चलोतोनविकारी एतेनसंस्कार्यत्वंनिराकृतंपूर्वावस्थापरि
त्यागेनावस्थांतरापत्तिर्विक्रिया अवस्थैक्येपिचलनमात्रं
क्रियेतिविशेषः यस्मात्सनातनोयंसर्वदैकरूपः नकस्या
अपिक्रियायाःकर्मेत्यर्थःउत्पत्त्याप्तिविकृतिसंस्कृत्यन्यतरक्रि
याफलयोगोहिकर्मत्वंस्यात् अयंतुनित्यत्वान्नोत्पाद्यः अ
नित्यस्यैवघटादेरुत्पाद्यत्वात् सर्वगतत्वान्नआप्यः परिछि
न्नस्यैवपयआदेःआप्यत्वात् स्थाणुत्वादकार्यःविक्रियाव
तोघटादेरेवविकार्यत्वात् अचलत्वादसंस्कार्यः सक्रियस्यै
वदर्पणादेःसंस्कार्यत्वात् तथाचश्रुतयः आकाशवत्सर्व
गतश्चनित्यः वृक्षइवस्तब्धोदिवितिष्ठत्येकः निष्कलंनि
ष्क्रियंशांतमित्यादयः यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोया
ऽप्सुतिष्ठन्नद्भ्योंतरोयस्तेजसितिष्ठंस्तेजसोंतरोयोवायौति
ष्ठन्वायोरंतरइत्याद्याश्रुतयःसर्वगतस्यसर्वांतर्यामितयात
दविषयत्वंदर्शयंति योहिशब्दादौनतिष्ठतितंशब्दादयः
छिंदंति अयंतुशब्दादीनांसत्तास्फूर्तिप्रदत्वेनतेष्वेवकू
टस्थोंतर्यामी अतःकथमेनंशब्दादीनिस्वव्यापारविषयी
कुर्युरित्यभिप्रायः अत्रयेनहृदयंस्तपतितेजसेद्धइत्यादिश्रु
तयोनुसंधेयाः समाध्यायेचप्रकटीकरिष्यति श्रीभगवा
नितिदिक । [illegible]

॥ २४ ॥

सदानंदी टीका ॥

शब्दादेरात्मनोनाशासामर्थ्येहेतुर्वायमी अच्छेद्यत्वादयस्ते
ननित्यआत्मांतरोव्ययः १ अन्योन्यनाशकान्येवभूतान्यात्मा
नमंतरं नोत्सहंतेयतोहंतुंनाशशंकामतस्त्यज २ नित्यत्वा
त्सर्वगोव्यापीव्यापित्वात्स्थाणुवत्स्थिरः स्थिरत्वाच्चाक्रियापू
र्णःसदात्माचिरंतनः ३ नित्यत्वाच्चाप्युत्पाद्योनआप्यः।

सर्वगोयतः स्थाणुत्वादविकार्योयमसंस्कार्योचलत्वतः ४
संस्कारस्तुगुणाधानेदोषापनयनेनवा निर्गुणेचगुणाधा
नेस्वतःशुद्धेनचापरः ५ सत्तास्फूर्तिप्रदानात्तुशस्त्रादीना
मयंयतः ऐतर्यामितयाशस्त्राकथमेनमिमानिच ६ श
स्त्रादीनिप्रकृत्यंतंसर्वव्यापीवैकगोचरं १ २४ ॥

नीलकंठी टी० ॥

उक्तेहेतोरस्यशस्त्रादीनिछेदादीनकुर्वंतीत्याशंक्यतस्य
छेदाद्ययोग्यत्वादित्याह अच्छेद्योयमिति अत्राछेद्यत्वादे
र्द्वेकान्येवअस्थूलत्वादीनिकारणानिज्ञेयानि एवमच्छे
द्यत्वादिनास्थूलादीनभावरूपानुगुणानुक्त्वाभावरूपान
पिगुणानाह नित्यइति सर्वैर्विशेषणैरखंडैकरसस्यैवव
स्तुनोलक्ष्यत्वात् नित्यत्वादिभिरुत्पाद्यत्वादिकंनिराक्रि
यते यतोनित्यःअतोघटवदनुत्पाद्यःयतःसर्वगतःअतो
ग्रामवदप्राप्यः यतःस्थाणुःपूर्वरूपापरित्यागेनास्थिरस्व
भावःअतःक्षीरादिवदविकार्यःअचलःयथादर्पणःस्वतः
स्वच्छोप्यस्तुतोपिमलरूपेणावरणेनस्वाच्छ्यात्प्रच्याव्य
ते एवंस्थाणुरपिअन्यसंयोगाच्चाचल्यमप्राप्नुवन्तसच
दोषापकर्षणलक्षणंसंस्कारमपेक्षते अयंतुअचलत्वान्न
तथा एवंचउत्पत्याप्तिविकृतिसंस्कृतिरूपंचतुर्विधंक्रिया
फलमात्मनिनसंभवतीत्युक्तं तत्रहेतुः सनातनइतिसना
तनत्वंचानेनंतर्यं तच्चदेशतःकालतोवस्तुतश्चपरिछेदरा
हित्यं परममहत्परमाणूनांकालतःपरिछेदाभावोपिदेश
तःपरिछेदोस्ति आकाशस्यतदुभयाभावेपिवस्तुतःपरि
च्छेदोस्ति सोपित्रिविधःसजातीयविजातीयस्वगतभेदरू
पः यथा वृक्षस्यस्वगतोभेदःपत्रपुष्पफलादितः वृक्षा
न्तरात्सजातीयोविजातीयःशिलादितः तत्तुसनातनेनंतं
र्येणत्रिविधपरिछेदराहित्येनभवति अस्तीतिसनातनो
विकरमोयस्मात्तस्मान्नोत्पाद्याश्रयइत्यर्थः २४ ॥

त्व

गी॰
टी॰
द्वि॰

171

आनंदी टीका

एतदेव निगमयति यस्मादच्छेद्योयं निरवयवत्वादवयववि
भागेन संभवत्यतो नैनं छिन्दन्तीत्यादि पूर्वश्लोकेनास्यार्थस
संबन्धः नित्यः पूर्वापरकोटिरहितो नएव सर्वगतः स्थाणुः
स्थाणुरिव निर्विकारः अचलः स्वभावादप्रच्युतः सनातनश्चि
रकालीनः कारणहीनः २४ ॥

रामकंठी टीका

तथाहि— अयमात्माच्छेदादिक्रियाविकार्यो न भवति पूर्वोक्तस्यैव वि
वेचनमेतत् तथा नित्य इत्यादीनि विशेषणान्यविनाशित्वा
र्थानि परस्परसहायभूतानि प्रतिपत्तिदार्ढ्याय बहूनि प्रयु
क्तानि वेदितव्यानि [illegible] २४ ॥

लासिकी टीका

तत्र हेतुमाह निरवयवत्वात् [illegible]
[illegible] नित्य इत्यादी
नि पकार्थान्यपि बहूनि विशेषणानि प्रतिपत्तिदार्ढ्याय भग
वता सहोच्चारितानि २४ ॥

अच्छेद्योयमक्लेद्योयमशोष्यश्च पूर्वोक्ताददाह्यश्च इत्येतदभावादशोष्य इति भावः कुतश्छिन्नत्वदाहादियोग्यो न भवति यतो नित्यो विनाशी सर्वत्रगतः स्थिरस्वभावाद्रूपान्तरपतितश्च्युन्यः अचलः पूर्वरूपापरित्यागी सनातनो नादिः

पंचोलीटीका

अविनाशिहेतुत्वाभावे साधिते सिद्धमविनाशित्वमत्र वदति अ
च्छेद्योयमिति अयमात्मा अच्छेद्यः छेत्तुमशक्यः अयमात्मा दा
ह्यः दग्धुमशक्यः अक्लेद्यः आर्द्रभावेन शीर्णयितुमशक्यः तथा
अशोष्यः शोषयितुमशक्यः नित्यः अविनाशी सर्वगः सर्वव्यापी
स्थाणुः स्थिरः चलनरहितः चिरंतनः २४

रत्नावीरसमिद्धाधिनी ॥

ननु कथं न शस्त्रादीनामेतत्कर्मकच्छेदादौ शक्तिरित्यत्र हेतुमा
हाच्छेद्य इति च शब्दो हेतौ यस्मादयमात्माच्छेद्यत एव तस्मा
च्छस्त्रादीनि नैनं छेदादि प्रतियोगिनं संपादयितुं प्रभवंतीति योज

ना तत्रापि देहमाह नित्य इत्यादिना उत्पत्तिप्राप्तिविकृतिसंस्कृत्य
यतमक्रियाफलयोगप्रतियोगिकर्मेति सिद्धांतः नचायंतादृशा
क्रियाफलभागिति नास्यच्छेदादिक्रियायाः कर्मतोचितेति तथाहि
यतोयं नित्यः पूर्वापरकोटिरहितः अतोघटादिवन्नोत्पाद्यः यतः
सर्वगतोविभुरिति नित्यत्वे हेतुकथनं नतस्तत्प्राप्यः अवछि
न्नस्यैव जलादेः प्राप्तिविषयत्वात् यतश्चायं स्थाणुरविकारीति स
र्वगतत्वे हेतुः नतपयवद्दुग्धादिवन्न विकार्यः यतश्चायमचलो घटा
दिवन्न क्रियावान् नित्यस्थाणुत्वे हेतुः नतश्च दर्पणादिवन्न संस्कार्यः
यस्मादेवं तस्मात्सनातनोयं सर्वदैकस्वरूप इति भावः २४॥

मधुभाष्य

अच्छेद्य इति वर्तमानदर्शनायुक्तमयोग्यत्वमिति सूचयति
वर्तमानापदेशेन अतोयोग्यता नित्यसर्वगतादिविशेषणे
श्वरस्वरूपत्वात् शाश्वत इति एकरूपत्वमात्रमुक्तं स्थाणुश
ब्देन नैमित्तिकमन्यथात्वं निवारयति नित्यत्वसर्वगतत्ववि
शेषणं अन्यथा पुनरुक्तेः पंचोक्तावप्युक्तविशेषणोपा
दानात् नैवैकोपुनरुक्तिः पुंसाश्च बिंबधर्माः प्रतिबिंबे
विरोधेतत्रच रूपं रूपंप्रतिरूपो बभूव आभास एव चेत्यादि
श्रुतिस्मृतिसिद्धा नचांशत्वविरोधः तस्यैवांशत्वात् नचैक
रूपत्वाशता प्रमाणंचोभयविधवचनमेव नचांशस्य प्र
तिबिंबत्वं कल्प्यम् गाथ्यादिषुंशावाद्रूपादृष्टेरितरत्रा
दृष्टेः स्थाणुत्वेप्येतत्तेत्यादयविरुद्धमीश्वरस्य उभयविध
वाक्यादचिंत्यशक्तेश्च नचमायायैकं तथापीश्वरे ब्रह्मणिनो
विरुध्यते नयोगित्वादीश्वरत्वात् चित्रं तथैतत्तत्वायिकार्य
कारणं इत्यादेश्चर्यैतेव विरुद्धधर्माविरोधोक्तेः महाता

सर्पाश्च मोक्षोहिमहापुरुषार्थः तत्रापिमोक्षएवार्थः श्रुतेपुरेमि
रेथीतान तेमर्थ्येपुरेमिरे अतप्रामिसर्वंप्रापुर्ह इ:एवमंतरमंतयोः
पुण्यचितोलोकक्षीयत इत्यादिश्रुतिस्मृतिभ्यः सर्वविष्णुप्रसा
दादेवसिध्यति वासुदेवमनाराध्यकोमोक्षंसमवाप्नुयात् नु
ष्टेत्वतत्रकिमलभ्यमनंतऽईशे तत्प्रसादादवाप्नोति परांसिद्धिं
मव्ययः पर्वास्यएवभगवान्स्वयमेवदंतेतः सर्वास्मनाश्रितप
दोयदितिर्थ्यलोके तेवैविदंत्यतितरंति वदेवमायांनैषांमम
हमितिधीः श्वसृगालभक्ष्ये तस्मिन्यसत्वेकिमिदात्यलब्धमर्थ
मोर्थकामेरलमल्पकाले मत्तेयदस्मिन्भवइशजीवान्तापा
त्रयेणोपहतामप्यर्मं आत्मेहलभंत मत्तेभवत्प्रसादाद्धिकस्य
मोक्षोभवेदिह तमेवविदित्वातित्यादिश्रुतिस्मृतिभ्यः सर्वोकृ
ताना देवभवति लोकप्रसिद्धेः लोकसिद्धमविरुद्धमस्माप्य
गीकार्यं अदस्मानाखत्रायपिदोषहतोपितेनबहुतरोलेप
आसीदित्युत्कर्षमेववक्ति बहुतरकफलोसमसो तत्स्यनलो
मवद्दीयतइतिश्रुयंतराव यामामेवममसंमूढोजानातिपु
रुषोत्तममितितदुक्तेश्च सत्यसत्यपुनःसत्यंप्रोक्तंतत्र्यापिको
टिभिः विष्णुमाहात्म्यलेशस्यविभक्तस्यचकोटिधा पुनश्चा
नंतधातस्यपुनश्चापिसनंततया नैकांशसममाहात्म्याः श्री
शेषब्रह्मपंकजाः इतिनारदीये अन्योत्कर्षपेकंच तथैवम
स्तिपुमहाभारतमुत्तमं कोमन्युःपुंडरीकाक्षात्महाभारतं
हवेदित्यादि ग्रंथांतरसिद्धोत्कर्षमहाभारतविरुद्धं तत्र
नास्तिनारायणसमंनभूतंनभविष्यति एतेनसत्यवाक्येनस
र्वार्थान्साधयाम्यहं यस्यप्रसादजोब्रह्मारुद्रश्चकोप्यभ
वः २४॥

भाषा अनुवाद

इसका कारण यह कि आत्मा अस्त्र शस्त्रसे छिन्न भिन्न किंवा आगीसे दग्ध और जलसे आर्द्र और वायुसे शुष्कभी नहीं होसकताहै इसीसे आत्मा नित्य और अविनाशी तथा सर्वत्र विद्यमानहै और स्थिर स्वभाव अचल अनादिहै २४ ॥

दोहा

पावक नछेदत नजाहि की अग्निनदहदकोदाह जलनहिंर सकोभिजसकें वायुनसोषैजाह २४॥

173

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि २५

शांकरभाष्य टी॰ ॥

तस्मादेवं यथोक्तप्रकारेणैनमात्मानं विदित्वा त्वं नानुशो
चितुमर्हसि हन्ताहमेषांमयैते हन्यन्तेइति २५ ॥

आनंदगिरिकृत टी॰ ॥

आत्मयाथात्म्योपदेशमशेषाणामनुशोचत्वमित्युपक्रम्य वा
क्यार्थमुपसंहरति तस्मादिति अव्यक्तत्वाचिंत्यत्वाविकार्य
त्वनित्यत्वसर्वगतत्वादिरूपो यस्मादात्मानिर्धारितस्तस्मात
थैव ज्ञात्वानुशोचितस्तत्ज्ञानस्य फलवत्वादित्यर्थः प्रतिवे
धमनुशोकमेवाभिनयति हन्ताहमिति २५ ॥

स्वामिकृत टीका ॥

किंच अव्यक्तइति अव्यक्तश्चक्षुराद्यविषयः अचिंत्योमनसोप्य
विषयः अविकार्यः कर्मेंद्रियाणामप्यगोचरइत्यर्थः उक्तमर्थमुप
तिनित्यत्वादावभिव्यक्तोकिंप्रमाणयति उपसंहरति तस्मादि
ति २५ ॥

पिशाचभाष्य टी॰ ।

किंच अव्यक्तोयमिति सर्वेंद्रियाणामविषयत्वान्नव्यज्यतइत्यव्य
क्तः अव्यक्तोयमात्मा अतएवाचिंत्योयंयइंद्रियगोचरःसविष
यत्वमापद्यते अयंत्वात्मानिरिंद्रियगोचरत्वादचिंत्योऽविका
र्योयंयथादध्यातुंदुलादिना नतथात्मानिरवयवत्वादविक्रि
यः नहिनिरवयवत्वेविक्रियात्मकत्वंचदृष्टमविक्रियत्वा
दविकार्योयमात्मोच्यते तस्मादेवंयथोक्तप्रकारमेनमात्मा
नंविदित्वानानुशोचितुमर्हसि हंताहमेषांमयैमेहन्यंत
इति २५ ॥

रामानुजभाष्य टी॰

अचिन्त्यस्य सर्ववस्तुसजातीयत्वेनेतरस्वभावयुक्ततयाविं

गी॰
टी॰
हिं॰

174

नयितुमपिनार्हः अतश्चाविकार्यःविकारानर्हः तस्मादुक्त
लक्षणमेनमात्मानंविदित्वा तत्कृतेनानुशोचितुमर्हसि २५

अभिनवगुप्तकृत टी॰ ॥

देहस्यलक्षणमात्रमप्यनवस्थायित्वात् एवंभूतंविदित्वैनमा
त्मानंशोचितुंनार्हसि २५ ॥

परमार्थप्रपा टी॰ ॥

अथदेहात्मनोःसाक्षाद्वैधर्म्यदर्शनाद्देहेजन्ममरणसंभ
वात्ताविशोकोनकार्यइत्याह) एवंभूतस्त्वत्कथंनानुभूयत
इत्याह अव्यक्तइति चक्षुराद्यविषयःमनसाज्ञातव्यइतिचिं
त्यः अतएवदेहादिभिरविकार्यः विकारंनप्राप्यते अथो
पसंहरति तस्मादिति तस्मात्कारणादेवमनुनाप्रकारेण
निरूपितमेनमात्मानंविदित्वा अनुशोचितुंनार्हसि २५

वनमाली टी॰ ॥

अछेद्यत्वादौहेतुमाह अव्यक्तोयमिति छेद्यानिवस्तूनियैः
प्रमाणैर्व्यज्यन्तेतैरात्मानव्यज्यतइत्यव्यक्तः अतःछेद्यादिवि
लक्षणःअचिंत्यःसर्ववस्तुविलक्षणस्वभावत्वेनतत्स्वभाव
प्रकारतयाचिंतयितुमपिनार्हः अतएवाविकार्यःविकारा
नर्हः तस्मादुक्तलक्षणमेनमात्मानंविदित्वाशोचितुं
नार्हसि २५ ॥

[illegible]वैजयन्ती टी॰ ॥

किंच अव्यक्तोयमिति अव्यक्तः [illegible]चक्षुरादीन्द्रियै
र्नव्यज्यतइत्यव्यक्तः पंचज्ञानेंद्रियागोचरोऽयम् अथच अ
चिन्त्यः चिंतनाविषयोऽयं सर्ववस्तुविलक्षणत्वादितरव
स्तुवच्चिंतयितुमयोग्यइत्यर्थः अतोयमविकार्यःकर्मेंद्रि
यैर्विकारायोग्यः पदत्रयेनास्यबाह्यान्तःकरणाविषयत्वाद
पिच्छेदनादेरभावत्वंसूचितम् उपसंहरति यस्मात्तु तिभि
रच्छेद्यत्वादिगुणविशिष्टोयमात्मेत्युच्यते तस्मादेवमुक्तल

त्तएनेमनमात्मानंविदित्वाचेतनाचेतनवस्तुमात्रेणापय
र्ययमितिज्ञात्वानद्रष्टुंशोचितुंस्वजनंहिकथंहत्वासुखि
नःस्याममाधवेत्यादिरूपंशोकंकर्तुंत्वमर्हसियोग्योनभ
वसि २५ ॥

+छेद्यत्वादिग्राहकप्रमाणाभावा मधुसूदनी टी॰ ॥ दपि तदभाववत्त्वमाह अव्यक्तोयमित्यर्धेन+ द्

+योहींद्रियगोचरोभवतिसव्यक्तइत्युच्यते अयंतुरू
पादिहीनत्वान्नतथाऽतोनव्यक्तोतश्छेद्यत्वादिग्राहकमित्य
र्थः प्रत्यक्षाभावेप्यनुमानंस्यादित्यतआह अचिंत्योयंचिंत्यो
नुमेयस्तद्भिन्नलक्षणोयं क्वचित्प्रत्यक्षोहिवह्न्यादिर्गृहीतव्या
प्तिकस्यधूमादेर्दर्शनात् क्वचिदनुमेयोभवति अप्रत्यक्षत्वेन
व्याप्तिग्रहणासंभवान्नानुमेयत्वमितिभावः अप्रत्यक्षस्या
पीन्द्रियादेःसामान्यतोदृष्टानुमानविषयत्वंदृष्टमतआह
अविकार्योयंयद्धिक्रियावदिमद्वारादिकंतत्स्वकार्यान्यथा
नुपपत्याकल्प्यमानमर्थापत्तेःसामान्यतोदृष्टानुमानस्य
चविषयोभवति अयंतुनविकार्योनविक्रियावानतोनार्था
पत्तेःसामान्यतोदृष्टस्यवाविषयइत्यर्थः लौकिकशब्दस्या
पिप्रत्यक्षादिपूर्वकत्वान्नतद्विषयेनैवनिषेधः ननुवेदेनैवत
स्यछेद्यत्वादिगृहीष्यतइत्यतआहउच्यते वेदेनसोपकर
णेनअछेद्योयमक्लेद्यादिरूपपवा[illegible]यमुच्यतेतात्पर्येणप्रति
पाद्यते अतोनवेदस्यतत्प्रतिपादकस्यापिछेद्यत्वादिप्रति
पादकमित्यर्थः अत्रैनंछिंदंतीत्यत्रशस्त्रादीनांतन्नाश
कसामर्थ्याभावउक्तः अछेद्योयमित्यादौतस्यछेदादिक
र्मत्वायोग्यत्वमुक्तं अव्यक्तोयमित्यत्रतच्छेदादिग्राहकमा
नाभावउक्तइत्यपौनरुक्त्यंद्रष्टव्यं वेदाविनाशिनमित्या
दीनांतुश्लोकानामर्थतःशब्दतश्चपौनरुक्त्यंभाष्यकृद्भिः
परिहृतंदुर्बोधत्वादात्मवस्तुनःपुनःपुनःप्रसंगमापाद्या
पाद्यशब्दांतरेणतदेववस्तुनिरूपयतिभगवान्वासुदेवः
कथंनुनामसंसारिणांबुद्धिगो[illegible]चरमापन्नंतत्त्वंसंसारनि

गी॰
टी॰
द्वि॰

हन्तव्ये स्यादिति वदद्भिः एवं पूर्वोक्तयुक्तिभिरात्मनो नित्यत्वे
निर्विकारत्वे च सिद्धे तव शोको नोपपन्न इत्युपसंहरति तस्मा
दित्यर्धेन एतादृशात्मस्वरूपावेदनस्य शोककारणनिवर्त
कत्वात्तस्मिन्सति शोको नोचितः कारणाभावे कार्याभावस्या
वश्यकत्वात् तेनात्मानमविदित्वा यदन्वशोचस्तद्युक्तमेव
आत्मानं विदित्वा तु नानुशोचितुमर्हसीत्यभिप्रायः एवमा
त्मनो निर्विकारत्वेनाशोच्यत्वमुक्तमिदानीं तु विकारवत्व
मभ्युत्यापि श्लोकद्वयेनाशोच्यत्वं प्रतिपादयति भगवान् तत्रा
त्माज्ञानस्वरूपः प्रतिक्षणविनाशीति सौगताः देह एवात्मा
स चास्थिरोपि तु क्षणपरिणामी जायते नश्यति चेति प्रत्यक्ष
सिद्धमेवेति लोकायतिकाः देहातिरिक्तोपि देहेन सहै
व जायते नश्यति चेत्यन्ये सर्गाद्यकाल एवाकाशवज्जायते
देहभेदेप्यनुवर्तमान एवाकल्पस्थायी नश्यति प्रलय इत्य
परे नित्य एवात्मा जायते म्रियते चेति तार्किकाः तथाहि प्रे
त्यभावो जन्म स चापूर्वदेहेन्द्रियादिसंबंधः
एवं मरणमपि पूर्वदेहेन्द्रियादिवि
च्छेदः इदं चोभयं धर्माधर्मनिमित्तत्वात्तदाधारस्य नित्यस्यैव
मुख्यं अनित्यस्य तु कृतहान्यकृताभ्यागमप्रसंगेन धर्माध
र्माधारत्वानुपपत्तेर्न जन्ममरणे मुख्ये इति वदंति नित्यस्या
प्यात्मनः कर्मशाक्रलीजन्मनाशाकाशस्यैव देहजन्मना
न्मतन्नौ शास्त्रमवगतं तदुभयमौपाधिकमस्तु मुख्यमेवेत्यन्ये
नयाः नित्यत्वपक्षेपि शोच्यत्वमात्मनो निषेधयति ॥ २५ ॥

सदानंदी टी॰ ॥

मानातीतं यतो ब्रह्म वस्तु तद्वोधमद्वयं तस्मात्संगमापा
द्यते देवाह पुनः पुनः १ कथं तु नाम जीवानां मग्नानां शो
कसागरे बुद्धिगोचरतापन्नं तत्त्वं बोधाद्धि शक्यते २ स्पष्टं
वे भगवान्स्वीयं कृपालुत्वं व्यनक्त्यजः पौनरुक्त्यमतो नैवा
शोकानां शाहृतार्थतः ३ इन्द्रियैर्व्यज्यते स्थूलदेहादिकं

उच्यते । आत्मा रूपादिहीनत्वान्नायं प्रत्यक्षगोचरः ४ प्रत्य
क्षेण गृहीतोऽर्थोऽनुमेयः स्यान्नैवैष कश्चित् नाप्रत्यक्षेऽनुमेय
त्वमचिंत्यतो हि येभवेत् ५ रूपादिमानकार्येण विना हि
लिंगदेहकः चक्षुरादिसमूहात्मा तद्विज्ञेयमिहाथवा ६
न वा सामान्यतो दृष्टानुमानविषयोऽप्ययं निर्धर्मकतया वा
चामगोचरतया तथा ७ यद्विक्रियावद्रूपादि तदर्थापत्ति
गोचरः अयं तु विक्रियाशून्यो नार्थापत्त्यादिगोचरः ८ वे
देनापि सदात्मायमव्यक्तादिस्वरूपतः प्रतिपादित आबो
धतात्पर्येण न शंकितः ९ विकारं स्थूलसूक्ष्माख्यं कार्य
भावादवस्थितं अर्हतीति विकार्यं वा स्वज्ञानं त्रिगुणात्मकं १०
कारणाख्यं शरीरं यत्तत्रैसाक्षिकगोचरः तदन्यः प्रत्यगा
त्मायमविकार्य उदाहृतः ११ एवं देहत्रयादन्यमात्मानं स
र्वसाक्षिणं ज्ञात्वा नैवं महाशोकं कर्तुमर्हसि बोधवान् १२। २५

नीलकंठी टीका ॥

एवं ज्ञेयं वस्तूक्त्वा तत्त्वं तत्राथ स्तदेहत्रयनिरासेनैव परोतीक
त्वमित्याह अव्यक्तोऽयमिति व्यक्तं स्थूलशरीरं प्रत्यक्षगम्यं त
देतोऽन्यं प्रत्यगात्मा तथा अचिंत्योऽयं चिंत्यं चिंतायोग्यं रूपा
दिमत्काशाकार्येणानुमेयं चक्षुरादिसमुदायात्मकं लिंगश
रीरमचिंत्यं ततोऽप्यन्योऽयं तथा अविकार्योऽयं विकारं स्थूल
सूक्ष्मकार्यभावेनावस्थानमर्हतीति विकार्यं त्रिगुणात्मकं
मूलाज्ञानं कारणशरीरं सुषुप्तौ स्थितमस्य न किंचिदवेदिषमि
ति परामर्शाद्दर्शनाद्दहं न जानामीत्यनुभवाच्च साक्षिकग
म्यं ततोऽप्यन्योऽयं उच्यते अव्यक्तादिनिषेधमुखेन न तु शृंगग्रा
हिकया ऽयमेवंविध इति विधिमुखेनोच्यते यस्मादेवमयमु
च्यते तस्मादेनं विदित्वा नानुशोचितुमर्हसि तरति शोक
मात्मविदिति श्रुतेरात्मविद्भूत्वा बंधुवियोगजं शोकं मा का
र्षीरित्यर्थः उक्तं चात्मनोऽवस्थात्रयातीतत्वं स्वप्ननिद्रायुता

गी॰
टी॰
हिं॰

वायोश्चात्मन्स्वस्वरूपमनिद्रया ननिद्रैनैवचस्वरूपमंतर्यपश्यंति निश्चिताइति २५ ॥

आनंदी टीका

अव्यक्तः कस्मापीन्द्रियस्यागोचरः अतएवाचिंत्योबुद्धेरगोचरः अविकार्यः केनापिप्रकारेणविकारेनेतुमशक्यः २५

रामकंटी टीका

तथाचाव्ययम्

शब्दादिव्यक्तार्थविषयाणांश्रोत्रादीनामिंद्रियाणामविषयभूतत्वादयमव्यक्तइत्युच्यते तथावेदैकैकस्वभावत्वादंतःकरणेनापीदन्तया विषयीकर्तुमशक्यइत्यचिंत्यविंतनक्रियाया अगोचरः तथासर्वदाचैतन्यमात्रातिरिक्तधर्मान्तरासंस्पर्शादविकार्योविक्रियानेतुमशक्यः तस्मादेवमुक्तेनप्रकारेण सर्वतःसर्वेन्द्रियगोचरादर्थादत्यंतव्यतिरिक्तंवेदकत्वेन सर्वार्थव्यापकमेनमात्मानंबुद्ध्वाशरीरविनाशेनतद्विनाशभ्रमेणानेनमनुशोचितुमर्हसि [illegible] लोत्पादिनाग्रंथेनवितत्यप्रतिपादि [illegible] २५ ॥

तात्सिकी टीका

नैवमात्मनोजन्मविनाशाभावाच्छोकोनकार्यः [illegible] २५ ॥

पंचोलीटीका

यस्मादयमात्माअव्यक्तःइंद्रियैःनअभिव्यज्यतेअचिंत्यःबुद्धेरगोचरःनिरवयवत्वात् अविकार्यःविक्रियारहितःअविनाशित्वेनआत्मशोकाभावेउपसंहरति तस्मादेवमितितस्मात्पनआत्मानंअच्छेद्यंअदाह्यंअक्लेद्यंअशोष्यंनित्यंसर्वव्यापिनंस्थिरंअचलंसनातनंअव्यक्तमचिंत्यंअविकार्यंएवंविदित्वानअनुशोचितुमर्हसि २५

किंच अव्यक्तश्चक्षुराद्यविषयः अचिन्त्यो मनसोप्यविषयः अविकार्यः कर्मेन्द्रियाणामप्यगोचरः उच्यते इति नित्यत्वादिनाविभुत्वोक्तिप्रमाणयति उपसंहरति तस्मादिति

असंगत्वात्

रमावीरमभिद्योतिनी ॥

अथप्रत्यक्षादिप्रमाणाविरुद्धत्वेनाच्छेद्यत्वादि प्रतिपादितं दार्ढ्या
याह अव्यक्तोयमिति अयमात्माव्यक्तो रूपादिहीनस्तथा चक्षुरादी
न्द्रियागोचर इति न प्रत्यक्षेण तच्छेद्यत्वादिकमुपलभ्यते तथायम
चिंत्यो मनोविषयो नानुमेयः प्रत्यक्षस्यैव व्याप्तिग्रहणसंभवादिति
तथायमविकार्यः विक्रियाहीन इति नार्थापत्तिविषयो विक्रिया
वच्चक्षुरादिकं हि स्वकार्यान्यथानुपपत्त्या कल्प्यमानमर्थापत्तेः सा
मान्यतो दृष्टानुमानस्य च विषयो भवति एतादृशोऽयमुच्यते श्रु
त्या तात्पर्येण प्रतिपाद्यते इति न वेदस्यापि तच्छेद्यत्वापादकत्वमि
ति भावः उपसंहरति तस्मादेवमिति तस्मादेवमुक्तेन प्रकारेणेन
मात्मानमविनाशिनं बुद्ध्वा शरीरविनाशेन तद्विनाशभ्रमेणानु
शोचितुं नार्हसि अयं भावः एवमविदितात्मविषयनित्यताकस्य
तवानुशोचनं युक्तमेव संप्रति तु तद्विदुषस्तव तन्नार्हतीति ॥२५॥

मधुभाष्य ॥

नत्वत्समोस्त्यादिषु साधारण्येनावसर एवमहं तं तमुत्कर्षं विलो
कि अन्यत्र यत्किंचिदुक्तं वृष्णिसाधारण्येनावसरे तदपि स्या
देरपि वेदादावस्ति त्वमग्ने इन्द्रो वृषभः सतामसि त्वं विष्णुरुरु
गायो नमस्यः विषस्मादिंद्र उत्तर इत्यादिषु तदुक्तं विरोधाद
तथाहि स्कान्दे शैवे यदंतरं व्याघ्रहरिण्योर्वने यदंतरं मेरुगि
रीन्द्रविन्ध्ययोः यदंतरं सूर्यखद्योतबिंबयोस्तदंतरं रुद्रमहेन्द्रयो
रपि यदंतरं सिंहगजेन्द्रयोर्वने यदंतरं सूर्यप्रापणकयोर्दिवि यदं
तरं जाह्नविसूर्यकन्ययोस्तदंतरं खद्योतगिरीशयोरपि यदंतरं प्र
लयजवातविस्फुषोर्यदंतरं स्तम्भहिरण्यगर्भयोः स्फुलिंगसंव
र्तकयोर्यदंतरं तदंतरं विष्णुहिरण्यगर्भयोः अनंततावान्महावि
ष्णोस्तदंतरमनंतकं माहात्म्यस्तवनार्थाय तदाहरणमीरितं

तस्मोऽस्त्यधिको वापि नास्ति कश्चित्कदाचन एतेन सत्यकामेन
तमेव प्रविशाम्यहमित्याद्याह तत्रैव शिवप्रति मार्कण्डेयवचनं
संसारार्णवनिर्मग्न इदानीं मुक्तिमेष्यसीत्यादि पाद्मे योवै मार्क
ण्डेयकथाप्रबंधेषि वाभिषिच्य विसार्येव मुक्तिमाह अहं भोगप्र
दो वत्स मोक्षदश्च जनार्दन इत्यादिस्मन्नब्रह्मविरोधाच्च वेदश्रुति
दत्ताद्यनुरोधेन योज्यः यदि विद्यादित्यादिवचनात् अनिरो
धाच्छैवादिशांकयान्यथा तत्रापीष्टसिद्धिर्नाम वैष्णवात् अतो
भगवच्छास्त्रैकपर्वं सर्वागमानां महत्तात्पर्यं तथापि स्वतः प्रामा
ण्यासंभवो वाच्यते अविरोधात् न च प्रमाणसिद्धस्यान्यशास्त्रदृष्ट
स्यापह्नवो युक्तः यस्मिन्वै विद्यादर्थानां स्वतःप्रामाण्यानंगीकारे
वमानोक्तावदोषत्वं च साधयेदित्यतिप्रसंगः अनन्यापेक्षया
वतस्त्वसिद्धमागमानां नारायणपरा वेदाः सर्वे वेदा यत्पद
दमामनंति वासुदेवपरा वेदा इति न चैतन्निरुद्धं ईश्वरनियम
नात् अनादौ चेतनासिद्ध इत्यकमेव कालक्षेत्यादौ प्रयोजकत्व
प्रयोजकत्वस्य पूर्वोक्तन्यायेन अतः सिद्धमेवतत् तथा नत्याय
नादित्यशक्तित्वं पञ्चयुक्तं अतो न मायामयमेकं अचलत्वं अ
द्वयमनानंदमहः स्वमसत्त्वेन अतं अमहा इत्यादिवत् क्रियाद्व
यः तपो मे हृदयं साक्षात् विद्याक्रियाकृतिरित्याद्युक्तेः अत
न मायामयं सर्वं पैश्वर्यादिवाचिभगशब्दे नैव संबोधादिनाथ
नेनाभगेत्यादौ स्वरूपत्वान्न मायामयत्वं युक्तं विज्ञानमानि
दमास मनंतमात्रैः मध्यनंत एणो नंते गुणातोनंतविग्रहे
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च
इत्यादिवचनात् अतएव व्याप्यकादिरूपः अस्त्वेवमात्मनो नित्य
त्वे तथापि देहसंयोगवियोगात्मकजन्मिरतीत वेत्याह
२५॥

भाषा अनुवाद

यह आत्मा अव्यक्त अर्थात् चक्षुरादिकर्म्म इंद्रियोंका विषय
नही यह कहचुकेहै और अचिन्त्य अर्थात् मनका भी अ-
गम्य ध्यानसे वाहरहै और अविकारी अर्थात् जन्मनाश
अथवा छोटा वडा नया पुराना किसी रूपमे वदलता नही
ऐसेही तत्वज्ञानी लोग कहतेहै इससे जान बूझकर तुम
जन्मनाश शून्य कहे रहित आत्माके स्वरूपको अच्छी तर
ह जान बूझकर तुम इस झूठे शोकको परित्यागकरो २५

दोहा

व्यक्ति हीन चिंतनरहित अविकारी कह्यों सोय तातें ये
सें जानि इह शोचहियोग्यन तोय २५॥

अथचैनंनित्यजातं नित्यंवामन्यसेमृतं तथा
पित्वंमहाबाहो नैवंशोचितुमर्हसि २६ ॥

शांकरभाष्यटी॰ ॥

आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते अथचैनमिति अथ
चेत्यभ्युपगमार्थः एनंप्रकृतमात्मानं नित्यजातं लोकप्रसि
द्ध्याप्रत्यनेकशरीरोत्पत्ति जातोजातइति वा मन्यसे तथाप्र
ति तन्नाशंनित्यंवा मन्यसेमृतं मृतोमृतइति तथापि
भावेपि आत्मनित्वंमहाबाहो नैवंशोचितुमर्हसि जन्मव
तोनाशो नाशवतो जन्मचेत्येतावेवश्यंभाविनाविति २६ ॥

आनंदगिरिकृतटी॰ ॥

आत्मनोनित्यत्वस्यप्रागेवसिद्धत्वादुत्तरश्लोकानुपपत्तिरित्या
शंक्याह आत्मनइति अनित्यत्वमिति च्छेदः शाक्यानांलोका
यतानांवा मतमिदमापरामृश्यते औत्तरार्द्धेनस्य पूर्वोक्तमा
त्मयाथात्म्यं कृत्वापि तस्मिन्निर्द्धारणासिद्धेर्द्वयोर्मतयोरन्य
तरमताभ्युपगमः शंकितस्तदर्थोनिपातद्वयप्रयोगइत्याह
अथचेति प्रकृतस्यात्मनोनित्यत्वादिलक्षणस्य पुनःपुनः
जातत्वाभिमानोमानाभावादसंभावीत्याह लोकेति नित्य
जातत्वाभिनिवेशं पौनःपुन्येन मृतत्वाभिनिवेशंवाहतः
स्यादित्याशंक्याह तथेति परकीयमतमनुभाषितमभ्युप
त्याहो वत महत्पापंकर्तुंव्यवसितावयमित्यादेस्त्वदीयशो
कस्य निरवकाशत्वमित्याह तथापीति एवमर्जुनस्यदृश्य
मानमनुशोकप्रकारं दर्शयित्वा तस्यकर्तुमयोग्यत्वे हेतु
माह जन्मवतइति जन्मवतोनाशो नाशवतश्चजन्मेत्ये
तावेवश्यंभाविनौमिथोव्याप्तावितियोजना २६ ॥

स्वामिकृतटीका ॥

तदेवमात्मनोजन्मविनाशाभावात् नशोकःकार्यइत्युक्तम्
इदानींदेहेनसहात्मनोजन्मतद्विनाशेनचविनाशमंगीकृ
त्यापिनशोकःकार्यइत्याह अथचेति अथयद्यपिएनमात्मा
नंनित्यंसर्वदातत्तद्देहेजातेजातंमन्यसे तथातद्देहेमृतेमृ
तंमन्यसेपुण्यपापयोस्तत्फलभूतयोश्चजन्ममरणयोरागा
मित्वात् तथापित्वंशोचितुंनार्हसि २६ ॥

पिशाचभाष्यं टी. ॥

आत्मनस्तुहननमभ्युपगम्यैतदुच्यते अथचैनमिति अथ
चेत्यभ्युपगमार्थेप्रकृतमेनंनित्यजातंलोकप्रसिद्ध्यानित्य
जातंनित्यंजातंनित्यवामृतंमन्यसेतथाप्येवमपित्वंमहा
बाहोएवमात्मानंशोचितुंनार्हसि जन्ममरणयोरस्यस्वा
भाविकत्वात् २६ ॥

रामानुजभाष्यं टी.

अथनित्यजातेनित्यमृतेदेहमेवैनमात्मानंमन्यसे नदेहव्य
तिरिक्तमुक्तलक्षणंतथापिएवमतिमात्रंशोचितुंनार्हसि
परिणामस्वभावस्य देहस्योत्पत्तिविनाशयोरवर्जनीय
त्वात् २६ ॥

अभिनवगुप्तकृत टी. ॥

अथाप्येनंदेहंमन्यसेनित्यजातंप्रवाहस्याविनाशात् तथा
पिनशोच्यता क्षणिकप्रक्रियया वानित्यविनाशिनंतथा
पिकाशोच्यता एवंयद्यात्मनस्तैर्देहयोगवियोगाभ्यांनित्य
जातंत्वंनित्यमृतंत्वंवामन्यसे तथापिसर्वथाशोचनंप्रा
माणिकानामयुक्तम् २६ ॥

परमार्थप्रपा टी.

अथदेहात्मनोःसाहचर्यदर्शनाद्देहेनसहजन्ममरणमंगी
कृत्यापिशोकोनकार्यइत्याह अथचैनमिति अथयद्यपि
नित्यंसर्वदाएनमात्मानंतद्देहेनसहजातंमृतंवा मन्यसे

यतः पुण्यपापयोस्तत्फलभूतयोर्जन्ममरणयोरात्मगामि-
त्वात्तथापि न त्वं शोचितुमर्हसि २६ ॥

वनमाली टी० ॥

आत्मनो नित्यत्वेनाशोच्यत्वमुक्त्वेदानीं विकारवत्त्वमभ्युपेत्या-
पि श्लोकद्वयेनाशोच्यत्वं प्रतिपादयति अथेति तत्रात्मज्ञान-
स्वरूपं प्रतिक्षणं विनाशीति सौगताः देह एवात्मा स च स्थिरो
ऽप्युत्तरोत्तरक्षणपरिणामी जायते नश्यति चेति लोकायतिकाः इ-
ति पक्षान्तरेऽप्यथशब्दः हे महाबाहो पुरुषधौरेयेति सोपहा-
सं एनमाहृशी बुद्धिस्त्वं न युक्ता तथा हि क्षणिकत्वपक्षे
देहात्मपक्षे च अहो बत महत्पापं कर्तुं व्यवसिता वयमि-
त्येवं शोचितुं नार्हसि एतन्मते जन्मान्तराभावेन पापासंभ-
वात्पापभयेनैव हि त्वं शोचसि तच्चैतादृशादर्शनेन संभ-
वतीत्यर्थः क्षणिकत्वपक्षे च दृष्टमपि दुःखादिकं न संभव-
ति वधविनाशदर्शित्वाभावादित्यर्थः २६ ॥

उत्तममवैजयन्ती टी० ॥

एवमात्मनो नित्यत्वेन जन्ममरणाभाववत्त्वात्त्वया शोको न क-
र्तव्य इत्युक्तमिदानीमस्य देहजन्माधीनं जन्म देहमरणाधीनं
मरणं च मत्वापि यदि शोकं करोषि तथापि शोककरणम-
नुचितमित्याह अथ चैनमिति अथ शब्दो यद्यर्थे चेत्यप्यर्थे
यद्यपि देवदत्तस्य पुत्रो जातो देवदत्तो मृत इति लोके देहस्यो-
त्पत्तिविनाशं च दृष्ट्वा देह एवात्मा इति बुद्ध्या एनं देहातिरिक्त-
लक्षणमात्मानं नित्यजातं नियतमेवायमुत्पन्नो भवतीति
वा शब्दः समुच्चयार्थे नित्यं मृतं च नियतमेवायं मृतो भवतीति च म-
न्यसे लोकदृष्ट्यात्मनि जन्ममरणे कल्पयसि तथापि हे म-
हाबाहो पुरुषाग्रगण्य एवं शोचितुं अहो बत महत्पापं कर्तुं
व्यवसिता वयमित्यादिरूपकं शोकं कर्तुं त्वं नार्हसि योग्यो
न भवसि परिणामात्मकस्य देहस्य जन्ममरणयोरनिवा-

गी॰
टी॰
हि॰

येत्वादवश्यंपतद्भवत्येवतदर्थेशोककरणंव्यर्थंआत्मनोपितद्वि
लक्षणत्वेनजन्मनाशाभावेछोकाभावइत्याशयः २६ ॥

मधुसूदनी टी॰ ॥

अथचेतिपक्षांतरेचोद्यपरिहारौयदित्वंवैधत्वादात्मवस्तुनोऽसकृच्छ्र
वणाद्यवधारणसामर्थ्यान्मदुक्तपक्षानंगीकारेणपक्षांत
रमभ्युपैषितथाप्यनित्यत्वपक्षमेवाश्रित्ययद्येनमात्मानंनि
त्यजातंनित्यंमृतंवामन्यसेवाशब्दःचार्थोक्षणिकत्वपक्षे
प्रतिक्षणंपक्षांतरेप्रावश्यकत्वान्नित्यंनियतंजातोऽयं मृतो
ऽयमितिलौकिकप्रत्ययवशेनयदिकल्पयसि तथापि महा
हा
बाहोपुरुषधौरेयेतिसोपसंक्रमताभ्युपगमात्वथेनार्हशो
ऊहृष्टिर्नसंभवतीतिसानुकंपंवा एवं अहोबतमहत्पापं
कर्तुंव्यवसितावयमित्यादियथाशोचसि एवंप्रकारंश्रु
शोककर्तुंस्वयमपित्वंनार्हशपवसन्नार्हसियोग्योनभव
सि क्षणिकत्वपक्षेदेहात्मवादपक्षेदेहेनसहजन्मविना
शपक्षेच जन्मांतराभावेनपापभयासंभवात् पापभयं
वत्वलत्वमनुशोचसि तच्चैनार्हशोदर्शनेनसंभवतीत्यर्थः
क्षणिकत्वपक्षेचहृष्टमपिदुःखंनसंभवतिबंधुविनाशाद
र्शित्वाभावादित्यधिकं पक्षांतरेहृष्टदुःखनिमित्तंशोकंस
भवन्नातुमेवंकारः हृष्टदुःखनिमित्तशोकसंभवेप्यहृ
ष्टदुःखनिमित्तःशोकःसर्वथानोचितइत्यर्थःप्रथमश्लो
स्य ।

॥ २६ ॥

सदानंदी टी॰ ॥

इत्यात्मनोविकारित्वादशोच्यत्वमुक्तमिदानींविकारि
त्वमभ्युपेत्यशोच्यताधुना १ यदित्वंवैधमात्मानंस्फुरत्वात्संस्म
त्वादपि नावबोद्धुंसमर्थोसिस्वीकरोषिमतांतरं २ जातं

तित्त्वेन नष्टं मन्यसे सौगतानुगः जातोऽयं वा विनष्टोऽयम
न्यसे लौकिकानुगः ३ तथापि नोचितः शोकः किंपुनर्वै
दिके मते त्वयीह शोकदृष्टिर्न संभवेत्पुरुषर्षभ ४ सौ
गते चाथ चार्वाके मते जन्मान्तरं नहि अतस्ते पापभीतिः
स्याद्दृष्टदुःखं न सौगते ५ यदीह शोमतेऽदृष्टे नैव शोककल
वोचितः किंपुनः श्रौतसिद्धान्तविदस्ते शोकिता नहि ६ २६

नीलकंठी टीका ॥

एवं तत्त्वदृष्ट्या शोको नोचित इत्युक्तं इदानीं प्राकृतजनदृ
ष्ट्यापि शोको नोचित इत्याह अथचेदिति नित्यनियमेन
जातं नित्यजातमिति चार्वाकपक्षः नित्यं सर्वदा जातमि
ति क्षणिकविज्ञानवादिपक्षः नित्यं स्वाश्रयपूर्वदेहेंद्रिय
संबंधाज्जातमिति तार्किकादिपक्षः एवं नित्यं वा मन्यसे
मृतमित्यपि योज्यं पक्षत्रयेपि शोको न युक्तः महाबाहो
इति युद्धार्थमुत्साहयति २६ ॥

ज्ञानेदी टीका

एवं जीवात्मनो निर्विकारत्वादशोच्यत्वमाह स्पष्टोऽर्थः २६

रामकंठी टीका

+ अथवा मदुपदिष्टोपपत्तिक्रमेण यथोक्तमर्थमप्रतिपद्यमा
नस्त्वमेनमात्मानं नित्यजातं नित्यं वा मन्यसे मृतं तथापि त्वं ना
पि प्रकारेणानेन विनाशित्वेन शोचितुमर्हसि इदमत्र तात्प
र्यम् आत्मविषया द्वयी प्रतिपत्तिः संभाव्यते नित्यो वा स्याद
नित्यो वा तृतीयः पक्षो न संभवति तत्र नित्यत्वप्रतिपत्त्याय
द्येनं नित्यजातमेव सदैवोत्पत्तिविनाशरहितं मन्यसे तथा
प्यस्याविनाशित्वाच्छोकस्य कोऽवसरः अथ विनाशप्रतिपत्त्या
नित्यमेव मृतं सत्तारहितमेनं मन्यसे तथापि नित्यविनष्ट
त्वादस्याशोचनीयत्वाभावः ग्रन्थेनैवैव्याचष्टे यद्येनमा
त्मानं नित्यं सदैव जन्ममरणाभ्यामुपक्रमनित्यत्वान्मन्य
से तथाप्येनं शोचितुं नार्हसि [illegible]
[illegible]

+ एवं तमात्तुषेणेत्यादिना ग्रंथेन वितत्य प्रतिपादितामपि सकलप्रकरणप्रतिपाद्यस्य ब्रह्मात्मैक्यतत्त्वस्य शरीरशरीरिव्यतिरेकोपपत्तिप्रतिपादनरूपां प्रथमां भूमिकां सहृदयनिर्मलप्रज्ञावधानविशेषावसेयत्वात्सम्यगप्रतिपद्यमानमर्जुनं मत्वा नो भगवान्स्वैपहासान्तरालेपेण बोधयितुमाह +

गी.
टी.
द्वि.

[illegible] २६ ॥

[1] अथ चय्यप्येनमात्मानं नित्यं सर्वदा

[1] मन्यसे आपातनोऽङ्गीकृत्य नतु तात्त्वेण

लालजी की टीका

जन्मविनाशो देहसंबंधादंगीकृत्यापि शोको न कार्य इत्याह अथ चेति । तत्तद्देहे जाते जातं तथा तद्देहे मृते मृतं मन्यसे पुण्यपापयोस्तत्फलभूतयोश्च जन्ममरणयोरात्मगामित्वात् तथापि त्वं शोचितुं नार्हसि २६ ॥

पंचोलीटीका

देहादीनां विनाशेपि आत्मनोऽविनाशित्वात् शोकमोहो न कार्यौ इति उक्तं इदानीं देहविनाशेन आत्मनोपि विनाशमंगीकृत्याह अथ चेनं इति एवं तदंगीकारे पन मात्मानं नित्यजातं शरीरेण सह सर्वदा जायमानं अथवा नित्यमृतं मन्यसे तथापि हे महाबाहो त्वं एवं आत्मानं शोचितुं न अर्हसि २६

गूढार्थदीपिनी ॥

एवमशोच्याननन्वशोचस्त्वमित्यादिग्रन्थेन प्रतिपादितं शारीरविवेकोपपत्तिदर्शनेन पुरुषस्य शोकानार्हत्वं शुक्तिमप्रतिपद्यमानमर्जुनं मत्वा नो भगवान्देहेनैव सहात्मनो जन्म दर्शनात्तद्विनाशे चात्मविनाशमङ्गीकुर्वाणं किं नाववम् अङ्गीकार्य तावद् अभ्युपेत्यापि शोकानार्हत्वमेव श्लोकद्वयेनोपपादयति अथ चेति अथ चेति पक्षान्तरे अथ च यद्यपि मदुपदिष्टोपपत्तिक्रमेण यथोक्तमर्थमनुपपद्यमानस्त्वमेनं देहिनं नित्यजातं नित्यं सदा जाते देहे न विनाशनानामध्यस्थिते सत्तत्तद्देहजन्मसमकालजन्मानं मन्यसे अभ्युपैषि वा बाहुः सम्बन्धेन नित्यंमृतं तत्तद्देहविनाशकालीनविनाशविशिष्टं च मन्यसे देहानां जन्मम[?]र धर्माणां संबंधेनात्मनोपि तद्धर्मत्वं प्रवाहवदविच्छिन्नं मितिमोहविजृंभिते पक्षेपि भवति तथापि हे महाबाहो पुरुषधौरेय त्वं मोहावेशाद्यायपवमर्हसि महत्वापकर्तव्यवसितावमित्याह पुक्तप्रकारेण शोचितुं नार्हसि

इति

मधुभाष्य

प्रश्नेति कुतो मोक्षः नियतत्वादित्याह २८॥

भाषा अनुवाद

विचारिकरि देखो जबकि आत्माके जन्म तथा नाशका अ
भावहै तौ फेरि आत्माके अर्थ शोक करना उचित नहींहै
यह बात निर्धार कर ठहराई गई अब जो देहके जन्म और
नाशसे आत्माका जन्म नाशहै ऐसा अंगीकार करि मानो
तौभी शोच करना अनुचितहै यह कहतेहैं कि पुण्य औ
र पाप तथा तत्फल स्वर्ग दुःख और जन्म नाश इन सबका
आत्माके साथ सम्बन्ध रहनेसे यद्यपि देहके जन्म होनेसे
आत्माका जन्म और देहके नाशसे आत्मा का नाश इस री
तिसे जन्मनाश को नित्य मानो तौ भी सो जन्मनाश अव
श्यभावी अर्थात् निश्चय होने वालाहै फेरिभी उसके अ
र्थ तुमको शोचना योग्य नहीं है २६ ॥

दोहा

नित्यजन्मैं अथवामरैं नित्यहि मानत जोहि तौभीऐसें
महाभुज तोहि न शोचन सोहि २६ ॥

183

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि २७

शांकरभाष्यं टी० ॥

तथा च सति जातस्येति जातस्य हि लब्धजन्मनो ध्रुवोऽव्यभिचारी मृत्युर्मरणं ध्रुवं जन्म मृतस्य च तस्मादपरिहार्योऽयं जन्ममरणलक्षणोऽर्थस्तस्मिन्नपरिहार्येऽर्थे न त्वं शोचितुमर्हसि २७ ॥

आनंदगिरिकृत टी०

तयोरवश्यंभावित्वे सत्यनुशोकस्याकर्तव्यत्वे हेत्वन्तरमाह तथा चेति २७ ॥

स्वामिकृत टीका ॥

कुतश्चानुशोच्यत आह जातस्येति हि यस्माज्जातस्यारंभककर्मक्षये मृत्युः ध्रुवो निश्चितः मृतस्य तज्जन्महेतुकर्मणा जन्मापि ध्रुवमेव तस्मादेवमपरिहार्येऽवश्यंभाविनि जन्ममरणलक्षणेऽर्थे त्वं विद्वान् शोचितुं नार्हसि यतोऽयं न भवसि २७ ॥

पैशाचभाष्यं टी० ॥

तदेव दर्शयति जातस्येति जन्मवतो नाशः नाशवतो जन्मस्वाभाविकस्तद्परिहार्योऽयं तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि २७ ॥

रामानुजभाष्यं टी०

उत्पन्नस्य विनाशो ध्रुवः अवर्जनीय उपलभ्यते तथा विनष्टस्यापि जन्मावर्जनीयं कथमिदमुपलभ्यते नष्टस्योत्पत्तिरिति सत एवोत्पत्तिरुपलब्धा असतश्चानुपलब्धेः सदुच्यते उत्पत्तिविनाशादयः सतो द्रव्यस्यावस्थाविशेषाः तन्तुप्रभृतिद्रव्याणां सन्निवेशरचनाविशेषयुक्तानि पटादी

मुच्यते असत्कार्यवादिनां चैतद्दोषो नोपलभ्यते नहि तत्र तत्तत्सं
स्थानविशेषातिरेकेणान्यत्पदार्थान्तरं प्रतीयते कारकव्यापा
रनामान्तरभजनव्यवहारविशेषाणामेतावतैवोपपत्तेः न
वद्रव्यान्तरकल्पनायुक्ता अत उत्पत्तिविनाशादयः सतो द्रव्य
स्यावस्थाविशेषाः उत्पन्नाख्यामवस्थामापन्नस्य द्रव्यस्य त
द्विरोध्यवस्थान्तरप्राप्तिर्विनाश इत्युच्यते मृद्द्रव्यस्य पिण्डत्व
घटत्वकपालत्वचूर्णत्वादिवत्परिणामपरंपराव[र्ज]नीया
तत्र पूर्वावस्थस्य द्रव्यस्योत्तरावस्थाप्राप्तिर्विनाशः सैव तदव
स्थास्योत्पत्तिः एवमुत्पत्तिविनाशाख्यपरिणामपरंपराप
रिणामिनो द्रव्यस्यापरिहार्यत्वेन तत्र शोचितुमर्हसि २७

अभिनवगुप्तकृत टी॰

नचैतदन्यथा नित्यत्वानित्यत्वमुपपत्तिमत् यतः जन्मप
वानन्तरं नाशो नाशादनन्तरं जन्मेति चक्रवदयं जन्मम
रणसंतान इति किं परिमाणं शोच्यतामिति २७ ॥

परमार्थप्रपा टी॰ ॥

उतरस्माह जातस्येति हि यस्माज्जातस्यस्वारंभककर्मक्षये
मृत्युर्ध्रुवो निश्चितः मृतस्य च तद्देहकृतेन कर्मणा जन्मापि
ध्रुवमेव तस्मादेवमपरिहार्येर्थे अवश्यंभाविनि जन्मम
रणलक्षणेर्थे त्वं विद्वान् शोचितुं नार्हसि २७ ॥

वनमाली टी॰ ॥

नन्वात्मनः स्थायित्वपक्षेऽहमाहत्य दुःखसंभवात् कथं न शो
चामीत्यत आह जातस्येति यतः जातस्य स्वकृतकर्मवशा
लब्धदेहेन्द्रियादिसंबंधस्य स्थिरस्यात्मनो ध्रुवश्चावश्यंभावी
मृत्युस्तच्छरीरादिविच्छेदः तथा मृतस्य विगतदेहेन्द्रियसं
बंधकस्य ध्रुवं जन्म प्राक्तनदेहकृतकर्मफलभोगार्थं सानु
शयस्यैव ममाविणः अतस्तत्वान्नयुक्तोऽपु व्यभिचारः तस्मा
देवमपरिहार्येर्थे परिहर्तुमशक्ये जन्ममरणादिरूपेर्थे

विद्वान्शोचितुंनार्हसि २६ ॥

कृतमैवजयन्ती टी॰ ॥

कृतोदेहस्याशोच्यत्वमित्यपेक्षायामाह जातस्येति हियस्मा
त्जातस्यउत्पन्नस्यमृत्युर्विनाशोध्रुवोनिश्चितोभवतिचपु
नःमृतस्यविनष्टस्यजन्मोत्पत्तिर्ध्रुवंनिश्चितंभवति तस्मादे
वमपरिहार्येनिवार्येर्थेजन्ममरणरूपेत्वमज्ञकंशोचितुं
शि॰ शोकंकर्तुंनार्हसियोग्योनभवसि जातस्यमृत्युर्मृतस्यजन्म
इत्युक्त्याऽसद्वस्तुनएवावश्यंविशेषोजन्ममरणादिशब्दैर॰
भिधीयते नत्वसतः खपुष्पादेःयतःसतएवमृदादेःपिण्ड
के॰ त्वपालत्वघटत्वचूर्णत्वाद्यवस्थादृष्टत्वादितिश्रीकृष्णस्या
भिप्रायः २७ ॥

नन्वात्मनःशाश्वतत्वेसत्त्वस्याधित्वपक्षेच मधुसूदनी टी॰ ॥ नित्यत्वपक्षेचदृष्टादृष्टदुःखसंभवा तद्द्वयेनशोचामी त्यतआह द्वितीयश्लोकेन +

+ हियस्माज्जातस्यस्वकृतधर्माधर्मादिवशाल्लब्धशरीरेंद्रिया
दिसंबंधस्यास्थिरस्यात्मनोध्रुवश्चावश्यंभावीमृत्युस्तच्छरीरादि
विच्छेदः तदारंभककर्मक्षयनिमित्तःसंयोगस्यवियोगाव
सानत्वात् तथाध्रुवंजन्ममृतस्यचप्राग्देहकृतकर्मफ॰
लोपभोगार्थंसानुशयस्यैवप्रसक्तत्वान्नजीवन्मुक्तेर्व्यभि॰
चारः तस्मादेवमपरिहार्येपरिहर्तुमशक्येऽस्मिन्जन्मम
रणलक्षणेर्थेविषयेत्वमेवंविद्वान्नशोचितुमर्हसि तथाच
वक्ष्यति ऋतेपित्वांनभविष्यंतिसर्वइति यदिहित्वयायुद्धे
नाहन्यमानाएतेजीवेयुरेवतदायुद्धायशोकस्तवोचितःस्या
त् एतेतुकर्मक्षयात्स्वयमेव म्रियंतइतितत्परिहारासम
र्थस्यतवदृष्टदुःखनिमित्तःशोकोनोचितइतिभावः एव
मदृष्टदुःखनिमित्तेपिशोके तस्मादपरिहार्येर्थेइत्येवोत्तरं
युद्धाख्येहिककर्मत्वान्नित्यस्यनियतमग्निहोत्रादिवत् नचयु
द्धसंप्रहारइत्यस्माज्ज्ञातोस्त्वत्वं शत्रुप्राणवियोगानुकूलश
स्त्रप्रहाररूपं विहितत्वादग्नीषोमीयादिहिंसावन्नप्रत्यवाय

जनकं तथा च गौतमः स्मरति न दोषो हिंसायामाहवे अन्य
त्र व्यसनात्सारथ्यनायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्ट
स्थलवृक्षारूढदूतगोब्राह्मणादिभ्य इति ब्राह्मणग्रहणं चात्रा
योद्धब्राह्मणविषयं गवादिप्रायपाठादिति स्थितं एतच्च सर्वं
स्वधर्ममपि चावेक्ष्येत्यत्र स्पष्टीकरिष्यते तथा च युद्धलक्षणेऽ
र्थेऽग्निहोत्रादिवद्विहितत्वादपरिहार्ये परिहर्तुमशक्ये तदक
रणे प्रत्यवायप्रसंगात् त्वमर्हसि दुःखभयेन शोचितुं नार्ह
सीति पूर्ववत् यदि तु युद्धाख्यं कर्म काम्यमेव यथाहवेषु यु
ध्यन्ते भूम्यर्थमपराङ्मुखाः अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो
यथेति याज्ञवल्क्यवचनात् हतो वा प्राप्स्यसि स्वर्गं जित्वा वा
भोक्ष्यसे महीमिति भगवद्वचनाच्च तदापि प्रारब्धस्य काम्यस्या
पि आवश्यपरिसमापनीयत्वेन नित्यतुल्यत्वात्तन्न्यायाच्च युद्ध
स्यारब्धत्वादपरिहार्यत्वं तुल्यमेव अथवात्मानित्यत्वप
क्षेऽप्येवं श्लोकद्वयमङ्गेन सर्वमास्तिकस्य वेदबाह्यमताभ्युप
गमासंभवात् अत्र योजना नित्यश्चासौ देहेन्द्रियादिसंब
न्धवशाज्जातश्चेति नित्यजातस्तं एनमात्मानं नित्यमपि संतं जा
तं चेन्मन्यसे तथा नित्यमपि संतं मृतं चेन्मन्यसे तथापि त्वं ना
नुशोचितुमर्हसीति प्रत्यज्ञाय हेतुमाह जातस्य हीत्यादिना
नित्यस्य जातत्वं मृतत्वं च प्राग्व्याख्यातं स्पष्टमन्यत् भाष्यम
प्यस्मिन्पक्षे योजनीयं ।

२२ ॥

सदानंदी टी. ॥

ननु नित्यत्वपक्षेऽहं शोचामीहात्मनो यतः हननाद्दुःखमहादुः
संभवोऽस्तीति भीतितः १ मैवं यतोऽस्य जातस्य स्वकृतैः सुकृतादि
भिः लब्धदेहाधियोगस्याधिरस्यास्यात्मनोऽध्रुवः २ तच्छरीरा

दिविछेदस्तद्धेतोः कर्मणः क्षये तथामृतस्य प्रागेदेहकृतक
र्मफलस्य च ३ भोगार्थस्याध्रुवं जन्म देहिनोऽज्ञस्य संसृतौ
परिहर्त्तुमशक्येऽस्मिन्मृत्युजन्मादिगोचरे ४ तस्मादेवं विजा
नंस्त्वं कथं शोचितुमर्हसि जीवेयुश्चेत्त्वदेवैते हन्यमाना स्त्वत्
याऽरणे ५ तदायुद्धाय शोकस्ते योग्यः स्यात्तन्निवृत्तये एतेस्व
येमरिष्यंति यदा कर्मक्षये तदा ६ अवश्यंभाविनि ह्यर्थे नैव
शोकस्तवोचितः ७ २७ ॥

नीलकंठी टी० ॥

शोचितुं नार्हसीत्युक्तं तत्र हेतुमाह जातस्येति ध्रुवोऽपरिहा
र्यः मृत्युर्मरणं अपरिहार्ये अर्थे मरणादौ त्वद्व्यापारं विनापि
अवश्यंभाविनि विषये न त्वं शोचितुमर्हसि वक्ष्यति च मयै
वैते निहताः पूर्वमेवेति २७ ॥

आनंदी टीका

अत्रोपपत्तिमाह स्पष्टम् २७ ॥

+ एतमेव जन्ममरणप्रवाहाविच्छेदं केचिद

रामकंठी टीका

नित्यत्वेनावगम्यमानस्याप्यात्मनः प्रतिपादयितुमाहु +

+ हिशब्दो हेतौ यस्माज्जातस्य जन्मलक्षणविकारभाजो देहस्य
वात्मत्वेन प्रतिपन्नस्य ध्रुवोऽवश्यंभावी मृत्युर्विनाशाख्यो वि
कार एवमेव मृतस्य विनष्टस्य जन्मावश्यंभावीति कस्यचिज्ज
न्ममरणविकारलक्षणयोग इति तत्वमविचारयतोपि लो
कस्यायं प्रवादः स्थित एव जातो म्रियते मृतो जायत इत्येवंवि
धस्तस्माल्लोकप्रवाददृष्ट्यापि शोकस्यानुपपत्तेरेव [illegible]
[illegible] शोकपरिहाराया[illegible] २७ ॥

मृतस्य त

लासिकी टीका

[illegible] तस्यारंभ
[illegible] मृत्युः
[illegible] वो

कृत इत्यत आह हि यस्मान्निश्चितः [illegible] नेह
हेहकृतेन कर्मणा जन्मापि ध्रुवमेव अपरिहार्येऽवश्यंभावि र्थे तस्मात्
नि[illegible] जन्ममरणलक्षणेऽर्थे त्वमबुद्धः शोचितुं नार्हसि यो
ग्यो न भवसि २७ ॥

पंचोली टीका

गी॰ टी॰ हि॰

तत्रापिहेतुमाह जातस्येतिहियस्माज्जातस्यतस्यलब्धजन्मन
ध्रुवश्चाव्यभिचारीमृत्युःचध्रुवंमृतस्यध्रुवमव्यभिचारिजन्मतस्मा
त्वमपरिहार्येर्थेअनिराकरणीयेअर्थेपनमात्मानंशोचितुमर्ह
सि २७

रत्नवीरससिद्धोधिनी॥

ऊतोनममपोचनानार्हंतीत्यपेक्षायांहेतुमाह जातस्येति हिय
स्मात् जातस्यादृष्टवशाल्लब्धदेहसंबंधस्यदेहिनोमृत्युस्तत्तदे
हवियोगस्तदारंभककर्मक्षयनिमित्तोध्रुवोनिश्चितःसंयोगस्य
वियोगपर्यवसायित्वात्संयोगाविप्रयोगांताइतिन्यायात् तथा
मृतस्यपूर्वदेहवियुक्तस्यदेहिनोदृष्टवशादेवततदेहारब्धकर्म
फलभोगार्थंजन्मदेहांतरसंबंधोध्रुवंनिश्चितं यस्मादेवंतस्मादु
परिहार्येऽवश्यंभावित्वात्परिहर्तुमशक्येस्मिन्नर्थेजन्ममरणरूपे
विषयेत्वमेवंवस्तुयाथात्म्यवेत्ताशोचितुंनार्हसि यदप्यभिप्रा
यःदेहिनःपूर्वदेहवियोगदेहांतरसंयोगयोरवश्यंभावादेतेऽ
पिभीष्मादयोदेहिनोभवतासानुकंपेनस्वकर्तृकवधकर्मता
मनापाद्यमानाअपिकर्मक्षयात्स्वयमेवदेहवियोगप्रतियो
गिनोभवंतीतितत्परिहारायाकस्यतवशोकोनोचितइति २७॥

मधुभाष्य

जातस्येति तदेवस्पष्टयति २७ ॥

भाषा अनुवाद

काहेसे शोचना योग्य नहीहै इसका हेतु कहतेहै कि जिसलिये जो वस्तु जन्म ग्रहण करतीहै उसके प्रारब्ध कर्मके क्षय होनेसे निश्चय उसकी मृत्यु अर्थात् नाश होताहै ऐसेही मरेकाभी पूर्व देहकृत कर्म वशते फेर अवश्यही जन्म होताहै इसीसे एवंभूत अनिवार्यार्थ अवश्य भावी कहे होने वाले जन्म और मरणके विषयमे तुमको शोच करना योग्य होता नही क्यो कि तुम विद्वान कहे पंडितहो पंडितका अर्थ यहहै कि सत असत् की विवेकिनी कहे विचार करने वाली बुद्धिको पंडा कहतेहै सो जिसको होय सो पंडितहै आत्मासे भिन्न जो कुछ सो असत् सत एक आत्माही है २७ ॥

दोहा

जो जन्में सो निश्चय मरै मरै सो निश्चय जात ताते जतन न अर्थको तै तिह शोचन तात २०॥

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत अ
व्यक्तनिधनान्येव तत्र का परिदेवना २८ ॥

शांकरभाष्य टी॰

कार्यकारणसंघातात्मकान्यपि भूतान्युद्दिश्य शोको न युक्तः
कर्तुं यतः अव्यक्तादीनीति अव्यक्तादीन्यव्यक्तमदर्शनमनु
पलब्धिरादिर्येषां भूतानां पुत्रमित्रादिकार्यकारणसंघातात्म
कानां तानि अव्यक्तादीनि भूतानि प्रागुत्पत्तेः उत्पन्नानि च प्रा
क्मरणाद्व्यक्तमध्यान्यव्यक्तनिधनान्येव पुनरव्यक्तमदर्श
नं निधनं मरणं येषां तानि अव्यक्तनिधनानि मरणादूर्ध्वम
व्यक्ततामेव प्रतिपद्यन्ते इत्यर्थः तथा चोक्तं अदर्शनादापति
तः पुनश्चादर्शनं गतः नासौ तव न तस्य त्वं वृथा का परिदेव
नेति तत्र का परिदेवना को वा प्रलापः अदृष्टदृष्टप्रनष्टभ्रा
न्तिभूतेष्वित्यर्थः २८ ॥

आनंदगिरिकृत टी॰ ॥

आत्मानमुपदिश्याप्यशोकस्य कर्तुमयोग्यत्वेपि भूतसंघाता
त्मकानि भूतान्युद्दिश्य तस्य कर्तव्यत्वमाशंक्याह कार्येति
समनन्तरश्लोकस्तत्र हेतुरित्याह यत इति चात्वपदर्शनमा
हेति आवर्तयति अनुपलब्धिरिति नहि यथोक्तसंघातरू
पाणि भूतानि पूर्वमुत्पत्तेरुपलभ्यन्ते तेन तानि तथाव्यपदे
शभांजि भवन्तीत्यर्थः किं तन्मध्ये यदेषां व्यक्तमिष्यते तदा
ह उत्पन्नानीति उत्पत्तेरूर्ध्वं मरणाच्च पूर्वं व्यावहारिकं सत्त्वम
ध्यमेषां व्यक्तमिति तथोच्यते जन्मादुत्सारित्वविलयस्यायुक्त
मिति मत्वा तात्पर्यार्थमाह मरणादिति उक्तेऽर्थे पौराणि॰
कसम्मतिमाह तथा चेति तत्रेत्यस्यार्थमाह अदृष्टेति पूर्व
मदृष्टानि सन्ति पुनर्दृष्टानि तान्येव पुनर्नष्टानि तदेवं भ्रान्ति
विषयतया घटिकायन्त्रवच्चक्रीभूतेषु भूतेषु शोकनिमि॰
त्तस्य प्रलापस्य नावकाशोऽस्तीत्यर्थः २८ ॥

गी॰
टी॰
द्वि॰

स्वामिकृत टी॰ ॥

किंच देहानां च स्वभावं पर्यालोच्य तदुपाधिके आत्मनो जन्ममरणे
शोको न कार्य इत्याह अव्यक्तादीनीति अव्यक्तं प्रधानं तदेवादिः
उत्पत्तेः पूर्वरूपं येषां तानि अव्यक्तादीनि भूतानि शरीराणि कार
णात्मना स्थितानामेवोत्पत्तेः तथा व्यक्तमभिव्यक्तं मध्यं जन्मम
रणान्तरालस्थितिलक्षणं येषां अव्यक्ते निधनं लयो येषां तानि नि
मान्येवंभूतान्येव तत्र तेषु का परिदेवना कः शोकनिमित्तो वि
लापः प्रतिबुद्धस्य स्वप्नदृष्टवस्तुष्विव शोको न युज्यत इत्यर्थः २८

पिशाचभाष्ये टी॰ ॥

कार्यकारणयमेव तोपि पतात्र हि शुष्पशोको न युक्तः कर्त्तव्यतः
अव्यक्तादीनीति अव्यक्तमदर्शनमनुपलब्धिर्येषां भूतानां ता
न्यव्यक्तादीनि प्रागुत्पत्तेः उत्पन्नानि च प्राक् विनाशात् व्यक्त
मध्यानि व्यक्तान्तरालानि अव्यक्तनिधनान्येव पुनः पुनरप्य
दर्शनं मरणं येषां तानि अव्यक्तनिधनानि मरणादूर्ध्वमव्यक्त
मेव प्रतिपद्यन्त इत्यर्थः तथा चोक्तं अदर्शनादिहायातः पुन
श्चादर्शनं गत इति तत्र का परिदेवना को वा विप्रलापः दृष्ट
नष्टभ्रान्तिभूतेषु भूतेष्विवेत्यर्थः २८ ॥

व॰ रामानुजभाष्ये टी॰

सतो द्रव्यस्य पूर्वावस्थाविरोध्यवस्थान्तरप्राप्तिदर्शने योऽल्पीयान्
शोकः सोपि मनुष्यादिभूतेषु न संभवतीत्याह मनुष्यादिभू
तानि सत्त्वद्रव्याण्यनुपलब्धपूर्वावस्थान्यनुपलब्धोत्तरावस्था
नि तेषु तेषु स्वभावेषु वर्तन्त इति न तत्र परिदेवनानिमित्तमस्ति

अभिनवगुप्तकृत टी॰ ॥

अपि च नित्याः सन्त्वनित्या वा यस्तावदस्य शोचकस्तं प्रत्येवमा
दावव्यक्तः अन्ते चाव्यक्तः मध्ये तस्य व्यक्तता विकार इति अत
त विकारे शोचनीयं न स्वभावे किंच यत्तन्मूलकारणं किंचि
दभिमतं तदेव यथाक्रमं विचित्रस्वभावतया स्वात्मन्यध्यदर्शि
तत्तदनन्तसृष्टिस्थितिसंहृतिवैचित्र्यं नित्यमेव तथास्वभावेति

ह॰

कस्य शोचना २८ ॥

परमार्थप्रपा टी० ॥

प्रथ देहस्य गतिरज्ञानमूलिकेति पर्यालोच्य तदुपाधिकः शो
कोऽप्यज्ञानकृत इत्याह अव्यक्तादीनीति अव्यक्तं प्रधानं तदेवा
दिरुत्पत्तेः पूर्वरूपं येषां तानि अव्यक्तादीनि भूतानि शरीराणि
कारणरूपावस्थितानामेवोत्पत्तेः तथा व्यक्तमभिव्यक्तं मध्यं
जन्ममरणान्तराले स्थितिरूपं येषां अव्यक्ते निधने लयो येषां
मेवंविधानामज्ञानरूपादिमध्यावसानानां नानाशोका परिदे
वनाकिंडः स्वप्नमेव विनष्टभ्रान्तवदित्यर्थः एवं स्वाप्नशोको
पगमेजागरत्येव प्रतीकारः नहत्वाज्ञानोत्पन्ने शोके तावदा
त्मज्ञानमेव प्रतीकारः २८ ॥

वनमाली टी० ॥

तथात्मनामशोच्यत्वेपि भूतसंघातशरीराण्युद्दिश्य शोचामीत्य
त आह अव्यक्तादीनीति अव्यक्तं प्रधानमादिरुत्पत्तेः पूर्वरूपं
येषां तानि प्राणीह शानि तेषु का परिदेवना कः शोकनिमित्तक
प्रलापः शरीराणि प्रकृतेरवस्थानरूपाणि कारणवशात्ते
ष्वभिव्यज्यन्ते कदाचिदनभिव्यक्तीभवंति यथा दंडादिना घटादि
रूपतया व्यवस्थाभिभूयते घटत्वाद्यवस्थाभिव्यज्यते सत्कार्यवा
देद्रव्यनाशाभावात्तथैमे देहाः अतः परमानंदस्वरूपा विभो
वलक्षणमोक्षहेतुभगवदापरोक्ष्यसाधनस्वधर्मोतद्प्रच्या
वकं शोकं कर्तुं त्वं नार्हसीति भावः २८ ॥

तथा व्यक्तमभिव्यक्तं मध्यं जन्ममरणान्तराले स्थितिरूपं येषां तानि व्यक्तमध्यानि अव्यक्ते निधनं लयो येषां तानि

ऊरुमवैजयन्ती टी० ॥

एवमप्यनिविनाशानर्हस्यात्मनस्तद्देहस्य देहस्य च सर्वथा
शोककारणमयोग्यमित्युक्तमिदानीं देहस्यादिमध्यान्ताव
स्थाहृत्वं वस्तुस्याशोच्यत्वमाह अव्यक्तादीनि एवंकारत्रि
विशेषणेस्सह संबध्यते हे भारत भूतानि शरीराणि अव्य
क्तादीन्येव अव्यक्तः प्रधानं आदिः कारणं येषां तानि उत्पत्तेः
प्राक्कार्याणि स्वकारणरूपेणैवतिष्ठंतीत्यर्थः पुनः व्यक्त
मध्यान्येव व्यक्तं स्फुटं मध्यं जन्मारभ्य मरणान्तास्थितिरूपं

व्य

गी॰
टी॰
द्वि॰

189

२८
२

येषांतानिपुनरपि अव्यक्तनिधनान्येवाव्यक्ते स्वकारणे
ऽप्रधानेनिधनंलयोयेषांतानि एवमवस्थात्रयभवनस्व
भावकानियानिसंतितत्रमनुष्यादिभूतेषुपरिदेवना
शोकनिमित्तकोविलापःकः नकोपीत्यर्थः प्रत्येवंभूते
ह विवेकोनास्तिसएवतदज्ञानकृतमोहेनशोचतिते
त्वेवंशोककरणमनुचितमितिभावः २८ ॥

+ तदेवंसर्वप्रकारेणात्मनोऽशोच्यत्वमुपपादितं
कानिशरीराणिदृष्टिसृष्ट+
शोचामीत्यर्जुनाशंका
मपनुदतिभगवान्+

मधुसूदनी टी॰ ॥ अथेदानीमात्मनोऽशोच्य

आदौजन्मनःप्रागव्यक्तान्यनुपलब्धानिभूतानिपृथिव्या
दिभूतमयानिशरीराणिमध्येजन्मानंतरंमरणात्प्राक्
व्यक्तान्युपलब्धानिसंति निधनेपुनरव्यक्तान्येवभवंति
यथास्वप्नेंद्रजालादौप्रतिभासमात्रजीवनानिशुक्तिरूप्या
दिवदज्ञानात्पूर्वंचाधिष्ठितानि दृष्टिसृष्ट्यभ्युपगमात्
तथाचादावंतेचयन्नास्तिवर्तमानेपितत्तथेतिन्यायेनम
ध्येपिनसंत्येवैतानि नासतोविद्यतेभावइतिप्रागुक्तेः
एवंसतितत्रतेषुमिथ्याभूतेषुस्वप्नवत्तुच्छेषुभूतेषुकापरि
देवना कोवादुःखप्रलापः नकोप्युचितइत्यर्थः नहिस्व
प्ने बहुविधान्बंधूनुपलभ्यप्रतिबुद्धस्तद्विच्छेदेनशोचतिपृथ
ग्जनोपि एतदेवोक्तंपुराणे अदर्शनादापतितःपुनश्चाद
र्शनंगतः भूतसंघइतिशेषः तथाचशरीराणिप्रतिशो
कोनोचितइतिभावः आकाशादिमहाभूताभिप्रायेणवा
श्लोकोयोज्यः अव्यक्तमव्याकृतमविद्योपहितंचैतन्यमा
दिःप्रागवस्थायेषांतानि तथाव्यक्तेनामरूपाभ्यामेवा
विषयकाभ्यांप्रकटीभूतेनतत्त्वेनपरमार्थसदात्मनाम
ध्यंस्थितिरवस्थायेषांतानिदृश्यानिभूतान्याकाशादीनि अव्यक्त
निधनान्येवाव्यक्तेस्वकारणेप्रदीपघटादीनांनिधनंप्र
लयोयेषांतेषुभूतेषुकापरिदेवनेतिपूर्ववत् तथाचश्रु
तिः तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रिय
तेत्यादिरव्यक्तोपादानतांसर्वस्यप्रपंचस्यदर्शयति लय
स्थानत्वंतुतस्यार्थसिद्धंकारणएवकार्यस्यदर्शनात् ग्रं

वा

र्थांतरेच विस्तरः तथाऽज्ञानकल्पितत्वेन तुच्छान्याकाशादीनि
भूतान्यपि हि अपशोको नोचितस्तेन तत्कार्याण्यपि हि अपनोचितइ
तिकिन्नु वक्तव्यमिति भावः अथवा सर्वदा तेषामव्यक्तरूपेण
विद्यमानत्वादविच्छेदाभावेन तन्निमित्तः प्रलापो नोचितइ
त्यर्थः भारतेत्यनेन संबोधयन् शुद्धवंशोद्भवत्वेन शास्त्रीय
मर्थं प्रतिपत्तुमर्हसि किमिति न प्रतिपद्यसे इति सूचयति २८ व

[illegible] आदिवहवः [illegible] अन्य ऽ वनःपुनरेव
नवक्रैवाह [illegible] जिन्यायात् त्वद
त्कार्याणि [illegible] तत्रान्येषामपि नवैलालापरि
त्तानीदृश्य शोकः [illegible]
[illegible]
[illegible] त्मनोऽविनेत्यभेदमाह २८ ॥

सदानंदी टी० ॥

तदेवमात्मनो युक्त्याऽशोच्यत्वं प्रतिपादितं अथेदानीमशो-
च्यत्वमात्मनो भौतिकानि मान् १ देहानुदिश्य शोचामीत्या
शंकाहाह अव्यक्तेति जन्मनः प्राक् शरीराणि भूतकार्याणि स
र्वथा २ अदृष्टानि तथा मध्ये जन्मने हडूईस्टेनः पुरा उपलब्धानि स
र्वतेप्यदृष्टानि भवंति च ३ यथा स्वप्नेंद्रजालादौ प्रतिभासस
मानि वै भूतानीह तथाज्ञानात्प्रागूर्ध्वं नाशितानि च ४ आदाव
ते च यन्नास्ति वर्तमानेपि तत्तथा इतिन्यायेन मध्येपि न संत्यता
नि सर्वशः ५ तथा चात्यंततुच्छेषु तेषु तत्त्वविदस्तव कोवाऽ
त्वप्रलापो येन कोपीहोचितस्तव ६ नहि स्वप्ने स्वपुत्रादीनुप
लभ्य हृष्यज्जनः प्रबुद्धस्तद्वियोगेन शोचति त्वं किमपहो ७
अदर्शनादापतितः पुनश्चादर्शनं गतः नासौ तव न तस्य त्वं
वृथा किं परिदेवना ८ शुद्धवंशोद्भवत्वेन शास्त्रीयं ज्ञानम-
र्हसि प्राप्तुंत्वमत्र भगवानाह भारत प्राहतः ९ ॥ २८

नीलकंठी टी० ॥

अस्त्वात्मनोऽशोच्यत्वं तथापि इष्टदेहविनाशजः शोको भवत्ये

वेन्याशंक्यसकारणमप्यदेहादेर्मिथ्यात्वंसाधयति अव्यक्तादीनी
ति भूतानिवियदादीनितद्विकारभूतानिजरायुजादीनिच न
व्यक्तमव्यक्तंमज्ञानंआदिर्येषांतथाविधानि व्यक्तः स्पष्टः मध्य
उत्पत्तिमारभ्यमरणात्प्रागवस्थायेषां अव्यक्तेएवनिधनंल
योयेषामिति अयमर्थः रज्जूरगादिकारणमज्ञानंनरज्जव
तुउरगवदाव्यक्तमास्ति परीक्ष्यमाणेचनदृष्टिपथमवत
ति अतस्तदव्यक्तं ततउत्पन्नः सर्पस्तत्रैवलीयतेनरज्ज्वां
आत्मनिकल्पितानांभूतानांआदिरंतस्थाव्यक्तमेव तेनआ
द्यंतेचयन्नास्तिवर्तमानेपितत्तथेतिन्यायेनमध्येभासमा
नान्यपितानिरज्जूरगवत्असंत्येव एवंविधेतत्रतस्मिन्वि
षयेकापरिदेवनाकोवाविलापः नहिमरुमरीचिकाजले
नष्टइतिकश्चित्तत्वविद्विलपति अतएवभूतानांरज्जूरगादी
नामिवप्रतीतिसमकालिकींदृष्टिमभिप्रेत्यकोषीतकिब्राह्म
णेस्वापप्रबोधयोर्जगदत्ययोदयोपदेशेन सयदास्वपितितदैनं
वाक्सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैरूपैः सहाप्येति श्रोत्रं स
र्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति सयदाप्रबुध्य
तेऽथैतस्मादात्मनः सर्वेप्राणायथायतनंविप्रतिष्ठंतेप्राणे
देवादेवेभ्योलोकाइति प्राणाश्चक्षुरादीन्द्रियाणि देवाआ
दत्यारकाः सूर्यादयः लोकाः रूपादयः नन्विहान्यप्र
आत्मैवसर्वभूतानांलयोदयस्थानमित्युच्यतेनान्यत् तत्क
थमेषामव्यक्तेलयोदयस्थानमित्युच्यते सत्यं अज्ञानाश्र
त्वाद्ब्रह्मणितथात्वव्यपदेशोनवस्तुगत्या नहिअपरिणामि
नः कूटस्थस्यस्वस्मद्वत्कार्यप्रविलयोदयस्थानत्वंसंभवति य
थोक्तं अस्पष्टैतेंद्रजालस्ययदुपादानकारणं अज्ञानंतदु
श्रित्यब्रह्मकारणमुच्यतेइति २८ ॥

आनंदी टीका

अपिच अव्यक्तः एवं मदृष्टादिर्येषांतानिभूतानिप्राणिनः अ
दर्शनादपतितः पुनश्चादर्शनंगतः नैषादिवेत्तिनत्वनेकश्चि

त्किमत्र शोचसि इति स्मृतिवाक्यार्थानुसारेणैषोयमर्थः अ
थ च अव्यक्ते पंचानां भूतानां सूक्ष्मावस्थाप्रकृतिलक्षणादिर्ये
षामिति वक्ष्यमाणः प्राकृतसर्गोपि सूचितः २८ ॥

*अन्यमपि प्रकारं शोकपरिहारायाह+ रामकंठी टीका

पृथिव्यादिभूतसन्निवेशविशेषशरीरात्मकत्वात्सर्वप्राणिषु
तेषु भूतशब्देनाभिधीयते तान्येतानि भूतानि अव्यक्तादीनि अव
न्त एव रूपाणि तथैवाव्यक्तनिधनानि परोक्षपर्यन्तानि न
तानि एवमेवंविधान्यायतनेष्ववंविधानि भवन्तीति
ते तेनोद्वयोरपि तयोः कार्ययोः नानुशोच्यानि यद्यपि
मध्यानि व्यक्तानि तेन तेन रूपेणावेद्यमानानि मध्यावस्था जन्मवि
नाशान्तरालवर्तिनी दशा येषां तथाविधान्यनुशोच्यान्येव
कावस्थायामेषां हि भ्रममात्रमेव स्थैर्यप्रतिपत्तिः एतानि हि
येन येन प्रकारेण कल्प्यन्ते तेन तेन विनश्वराण्येव तृणका
निवाभवन्तु परिणामित्वादाविर्भवन्ति तिरोभवन्ति मोक्षान्ता
निवाभवन्तु सर्वथा विकल्प्यमानान्येकस्य स्थिरस्य रूपस्यासं
भवादेशाद्यान्येव तिदेहात्मकभूतसन्निवेशमात्रत्वेन प्रति
पत्तृकः परिदेवनावसरः इति [illegible]
[illegible]
[illegible]
[illegible]
[illegible] २८ ॥

लालकी टीका

प्राणिनो नित्याः सत्वनित्या वा यस्माद्वयोः शोचकत्वं प्रत्यवा
मृशान्यत्वेइत्याह अव्यक्तादीनीति अव्यक्तमदर्शनमनुपल
ब्धिरादिर्येषां तानि भूतानि पृथिव्यादिभूतसंघातात्मकाः श
रीराणि ... व्यक्तमध्यानि व्य
क्तं ... एव रूपाणि तथा व्यक्तं मध्यावस्थाजन्मम
रणान्तराल ... तेन तेन रूपेणावेद्यमानानि मध्यावस्था ... नाव
नाशान्तरालमध्यवर्तिनी येषां तानि अव्यक्तनिधनान्येव तथा
... पर्यन्तानि मरणादूर्ध्वमव्यक्ततामेव प्रतिपद्यन्ते तथा
... अदर्शनादापतिताः पुनश्चादर्शनं गताः नत्वं सोवद

गी॰
टी॰
द्वि॰

तत्र का परिदेवना कः शोकनिमित्तो विलापः प्रतिबुद्धस्य स्वप्नदृष्टबन्धुविव शोको न युज्यते इत्यर्थः आदावन्ते च यन्नास्ति वर्तमानोपि तत्तथेति न्यायात्

नत्वेनंकः सन्कमनुशोचसीति २८ ॥

पंचोलीटीका

यद्यपि आत्मनि शोको न युक्तस्तथापि देहेंद्रियादिभूतसंघातमुद्दिश्य शोको युक्त इत्याशंक्याह अव्यक्तेति हे भारत भूतानि अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानि मरणादनंतरं अदृश्यानि तत्र का परिदेवना को वाक्प्रलापः २८

रघावीरसमिद्धोधिनी ॥

पुनरपि शोकपरिहारप्रकारमेवाह अव्यक्तादीनीति हे भारतेति शुद्धवंशोत्पन्नत्वेन शास्त्रीयार्थप्रतिपत्त्यर्हो सि त्वं किमिति न प्रतिपद्यसे इति स्मारयितुं संबोधनं भूतानि पृथिव्यादिभूतमयानि शरीराणि अव्यक्तादीनि न व्यक्तः प्रत्यक्षः आदिः पूर्वरूपं येषां तानि तं तादृशानि भवंति तथा व्यक्तेन तेन रूपेणावेद्यमानेन मध्ये जन्मानंतरं प्राक्मरणाद्वर्तमानेन कौमाराद्यवस्थास्वरूपं येषां तानि तादृशानि भवंति तथाव्यक्तं निधनं पर्यंतो येषां तानि तादृशान्येव भवंति एवं विधान्येतान्यासन्नेवं प्रकाराणि भविष्यंतीति न केनापि ज्ञायते इत्याद्यंतयोः परोक्षता मध्ये तु स्वप्नेंद्रजालवद्दृश्यमानमेतत्का स्थिरतेति भावः एवं च तिरोभावे जाते तत्र तेषु नित्येषु देहेषु का वा परिदेवना अपि तु न कोपि दुःखप्रलापः अन्यथा स्वप्ने दृष्टानां वस्तूनां संयोगस्य मतिप्रबोधे विच्छेदादपि शोच्यता स्यात् न च तत्प्राकृतोपि शोचनं दृष्टः का कथा भवादृशस्येति देहान्यत्वबुद्धिमचितस्तव शोक इत्यभिप्रायः २८ ॥

मधुभाष्य

अव्यक्तादीनिति देहयोगवियोगस्य नियतत्वादात्मनस्त्वस्वरूपत्वात्सर्वथा नाशान्न शोकः कार्य इत्युपसंहरति अथ सामर्थ्यं पुनर्दर्शयति २९ ॥

भाषा अनुवाद

और जो कहो कि देहादिका स्वभाव जो जन्म मरण आदि तदुपाधिक आत्माका जन्म मरण विचारि करि शोचतेहै तो भी शोच करना न चाहिये इसपर कहतेहै कि अव्यक्ता दि अर्थात् अव्यक्त कहे प्राणियोंकी उत्पत्ति का मूल कारण जो प्रकृति माया सो प्राणियोंकी उत्पत्तिके पूर्व कारण रूप सब जीवों को अपने भीतर लीन करके अव्यक्त कहे अप्रकट रहती है और व्यक्त मध्य अर्थात् जन्म मरण के मध्यमे सकल प्राणी वर्तमान अवस्थामे विराजमान रहतेहै और अव्यक्त निधन अर्थात् अन्तमे स्वकारण जो माया तिसमे सब प्राणी लीन होके रहते इससे हे अर्जुन ऐसे रहने वाले प्राणियोंकी मृत्युमे किसी तरह शोच करना न चहिये जैसे जगे हुये मनुष्यको स्वप्नमे देखी भई वस्तुके अर्थ शोचकरना अयोग्यहै जैसे यह भी जानो २८ ॥

दोहा॥

भारत आदि अव्यक्त यह भूत मध्य मे व्यक्त अव्यक्त अंत में होत इनका प्रलाप नहीं सक्त २८॥

192

आश्चर्यवत्पश्यति कश्चिदेन माश्चर्यवद्वद-
ति तथैव चान्यः आश्चर्यवच्चैनमन्यः शृणो-
ति श्रुत्वाप्येनं वेद न चैव कश्चित् २९ ॥

शांकरभाष्यटी॰

दुर्विज्ञेयोयं प्रकृत आत्मा किं त्वामेवैकं उपालभेत्साधा
रणे भ्रांतिनिमित्ते कथं दुर्विज्ञेयोयमात्मेत्यत आह आश्च
र्यवदिति आश्चर्यवदाश्चर्यं अदृष्टपूर्वमद्भुतमकस्माद्दृ
श्यमानं तेन तुल्यमाश्चर्यवदाश्चर्यमिवैनमात्मानं पश्य
ति कश्चिदाश्चर्यवदेनं वदति तथैव चान्यः आश्चर्यवच्चैन
मन्यः शृणोति श्रुत्वा दृष्ट्वोक्त्वाप्यात्मानं वेद न चैव कश्चि
दथवा योयमात्मानं पश्यति स आश्चर्यतुल्यो यो वद
ति यश्च शृणोति सोनेकसहस्रेषु कश्चिदेव भवत्यतो दु
र्बोध आत्मेत्यभिप्रायः २९ ॥

आनंदगिरिकृतटी॰ ॥

अर्जुनं अनुपालंभं दर्शयित्वा प्रकृतस्यात्मनो दुर्विज्ञेय
त्वान्नं अनुपालंभो न संभवतीति मन्वानः सन्नाह दुर्विज्ञे
य इति तथा चात्माज्ञाननिमित्तविप्रलंभस्य साधारणत्वा
दसाधारणोपालंभस्य निरवकाशतेत्याह किं त्वामेवेति
अहंप्रत्ययवेद्यत्वादात्मनो दुर्विज्ञेयत्वमसिद्धमिति शंकते
कथमिति विशिष्टस्यात्मनोऽहंप्रत्ययस्य दृष्टत्वेपि केवल
स्य तदभावादस्ति दुर्विज्ञेयतेति श्लोकमवतारयति आ
हेति आश्चर्यवदिति आद्येन पादेनात्मविषयदर्शनस्य
दुर्लभत्वं दर्शयता द्रष्टा दुर्लभ उच्यते द्वितीयेन च तद्वि
षयवदनस्य दुर्लभत्वोक्तेरुपदेष्टुस्तथात्वं कथ्यते तृ
तीयेन तदीयश्रवणस्य दुर्लभत्वद्वारा श्रोतुर्विरलता वि
वक्षिता श्रवणदर्शनोक्तीनां भावेपि तद्विषयसाक्षात्का

गी॰
टी॰
हिं

१९३

रस्यामनायासलभ्यत्वं चतुर्थेनाभिमतमिति विभागः आत्मगोचरदर्शनादिदुर्लभत्वद्वारा दुर्बोधत्वमात्मनः साधयति। आश्चर्यवदिति संप्रत्यात्मनि द्रष्टृवक्तृश्रोतृः साक्षात्कर्तृश्च दुर्लभत्वाभिधानेन तदीयं दुर्बोधत्वं कथयति अथ चेति व्याख्यानद्वयेपि फलितमाह अत इति २९ ॥

स्वामिकृत टी॰ ॥

किंच देहानां च स्वभावं पर्यालोच्य तदुपाधिके आत्मनो जन्ममरणे शोको न कार्य इत्याह अव्यक्तादीनीति अव्यक्तं प्रधानं तेनादिः उत्पत्तेः पूर्वरूपं येषां तानि अव्यक्तादीनि भूतानि शरीराणि कार्यकरणसंघातात्मकानि व्यक्तं मध्यं जन्ममरणयोरन्तरालं स्थितिलक्षणं येषां अव्यक्ते निधनं लये येषां तान्यव्यक्तनिधनान्येवंभूतान्येव तत्र कुतस्तर्हि विद्वांसोपि लोके शोचंति आत्माज्ञानादेवेत्याशयेनात्मनो दुर्विज्ञेयतामाह आश्चर्यवदिति कश्चिदेनमात्मानं शास्त्राचार्योपदेशाभ्यां पश्यन्नाश्चर्यवत्पश्यति सर्वगतस्य नित्यज्ञानानंदस्वभावस्यात्मनो लौकिकत्वादैंद्रजालिकवदघटमानं पश्यन्निव विस्मयेन पश्यति असंभावनाभिभूतत्वात् तथा आश्चर्यवदेवान्यो वदति शृणोति चान्यः कश्चित्तु विपरीतभावनाभिभूतः श्रुत्वापि नैव वेद चशब्दादुक्त्वापि दृष्ट्वापि न सम्यग्वेदेति द्रष्टव्यम् २९

पिशाचभाष्यम्

दुर्बोधोयं प्रकृत आत्मा किं नामैवैकमनुपालभे साधारणे भ्रांतिनिमित्ते कथं दुर्विज्ञेय आत्मेति तत आह आश्चर्यवदिति आश्चर्यवदाश्चर्यमद्भुतं तत्स्वार्थे वतिप्रत्ययः आश्चर्यमेवाश्चर्यवत् अदृष्टपूर्वमद्भुतमकस्माद्दृश्यमानमाश्चर्यमेवमाश्चर्यमेनमात्मानं कश्चित्पश्यतीत्याश्चर्यं तथैवमपरमात्मानमन्यः कश्चिद्वदतीत्येतदाश्चर्यं श्रुत्वाह श्रुत्वाप्येनं न वेदेत्याश्चर्यमतो दुर्बोध आत्मेत्यभिप्रायः २९

मा॰

रामानुजभाष्यं टी॰

एवंशरीरात्मवादेपिनातिशोकनिमित्तमित्युक्त्वाशरीराति
रिक्तस्याश्चर्यस्वरूपस्यात्मनोद्रष्टावक्ताश्रोताश्रवणायत्तात्म
निश्चयोदुर्लभइत्याह एवमुक्तस्वभावंस्वेतरसमस्तवस्तु
विसजातीयतयाश्चर्यवदवस्थितमनंतेषुजंतुषुमहताः
तपसाक्षीणपापउपचितपुण्यस्तथाविधःकश्चित्पश्यति
तथाविधःकश्चित्परस्मैवदति एवंकश्चिदेवशृणोति श्रुत्वा
एनंयथावदवस्थिततत्त्वतोनकश्चिद्वेदचकाराद्दृष्टृवक्तृ
श्रोतृष्वपितत्त्वतोदर्शनंतत्त्वतोवदनंतत्त्वतः श्रवणंदुर्ल
भमित्युक्तंभवति २९ ॥

अभिनवगुप्तकृतटी॰ ॥

एवंविधंच आश्चर्यवत्पश्यतिननुयद्येवमयमात्माविनाशी
किमितिसर्वेणतथैवनोपलभ्यते यतोद्भुतवत्कश्चिदेव
पश्यति श्रुत्वापिनकश्चिदेवजानाति नवेत्ति २९ ॥

परमार्थप्रपा टी॰ ॥

नन्वातिदुर्गममित्याह आश्चर्यवदिति अनादिजन्मकोटिषु
दृष्टपजातदर्शनसंततिविष्टदृष्टिः अमात्यकस्माच्छास्त्राचार्यो
पदेशान्निराकाराहितविवेकरसमात्मानमाश्चर्यवत्पश्य
ति यतःआगन्तुभूतवस्तुदर्शनश्रवणवाआश्चर्यजन
कंभवति दृष्टांताभावात्सूक्ष्ममानइत्यर्थः तथान्योयः क
श्चिदनभिज्ञातात्मतत्त्वः शास्त्रश्रुतेनशब्दमात्रेणवदति
सोप्याश्चर्यवत् ततःश्रोतापितथैवाएवमुक्तेषुत्रिष्वपिक
श्चिदेवेनमात्मानंनवेद तथात्वमपिसनिरूपितमात्मानं
आश्चर्यवन्मत्वाहश्यहृद्याभितिविशेनयार्किंचिद्वदसिनिरूप
तोसावयानंतथाभवितव्यमित्यर्थः अथैतदर्थसर्वशाखा
शाखानिवपि श्रवणायापिबहुभिर्योनलभ्यः शुश्रूएवंतैरपिब

तस्मादस्मि

गी.
टी.
द्वि.

१९४

हुवोयंनविदुः आचार्यैर्वक्ताकुशलैस्सलब्धावाश्चार्योज्ञाता कु
शलानुशिष्टइति भाष्यं यःपरमात्मासदाचार्यादपिश्रवणाय
श्रवणार्थंबहुभिर्नलभ्यः बहूनांसुलभोनभवति किंतुदैव
वशात्कस्यापीत्यर्थः तथापरमात्मानंशृण्वंतोपिबहवःनवि
द्युःनाविदन् किंतुकश्चिदेव तथास्यात्मनोलब्धोप्रकुशलश्चा
र्यआश्चर्योभवतिशृण्वति तथा प्रकुशलानुशिष्टउपदिष्टोज्ञा
ताशिष्योप्याश्चर्योभवति २९ ॥

वनमाली टीका ॥

ननुविद्वांसोपिबहवस्तएवंशोचंति ननुकुतोवक्तृज्ञातृश्रो
तृणांचाद्विषयस्यात्मनोदुर्ज्ञेयत्वाहेत्याशंकायामात्मनोदु
र्ज्ञेयत्वमाह आश्चर्यवदिति एनंदेहिनंदेहेंद्रियादावनाद्यवि
वशाद्देहेममेत्यभिमानिनंकश्चिदाचार्योपदेशलब्धविवेकः
आश्चर्यवत्आश्चर्यंपश्यति विधिवत्कृतमितिवत्स्वार्थेव
तिः तादृशएवकश्चिदन्योन्यस्मैवदतिसोप्याश्चर्यवत् आ
श्चर्यःदुर्लभइत्यर्थः अन्यःकश्चिदेनंशृणोतिसोप्याश्चर्यवदा
श्चर्यःदुर्लभःश्रुत्वापिशममादिसाधनसंपत्तिहीनःश्रुत्वाप्येनं
वेद अत्रवक्तृईष्टरूपेणतपानन्यत्वमपितुदृष्टव्यकृजनोपलया
यद्वाश्चर्यवत्सर्वत्रदर्शनादिक्रियाविशेषणं कर्तृकर्मणोः
र्विशेषणं आत्मातत्त्वानंतत्त्वानावेत्येतन्निरूपमाश्चर्यं अ
नाद्यविद्यावशाद्देहेंद्रियासक्तोहंत्रियइतिदेहादिसंवलितज
पाठस्यमागामन्यस्मात्लब्धविवेकेपितात्विकंतत्त्वंसम्यक्ज्ञाती
याः इतिभावः २९ ॥

कृष्णमैवैजयन्ती टी. ॥

नन्वेवंचेतनस्यात्मानंज्ञात्वासर्वेपिशोकंकुतोनत्यजंतीत्याशं
कायामात्मज्ञानस्यदुर्लभत्वमाह आश्चर्यवदितिदेहेंद्रिया
द्यचेतनवस्तुविजातीयत्वेनस्वभावकमेनमात्मानंसर्वेष्वा

णिमात्रेणमथोऽनेकजन्मार्जितपुण्यपुंजैरेवासमस्तं शा
मसंप्रदायसच्छास्त्रसहितयकः सदाचार्यवान्यः कश्चि
दतिदिष्टः पुरुषः आश्चर्यवत्पश्यति विस्मयेनैवलनेय
स्मादात्मनो नित्यज्ञानानंदस्वरूपत्वेन जन्मादिविकारशू
न्यत्वेन च सर्वघटपटाद्यचेतनपदार्थेभ्यो विलक्षणत्वम
स्ति अथ च तद्दृष्टः पुरुषस्यानाविद्यावृतज्ञानत्वेन विप
रीतबुद्धित्वमप्यस्ति तस्मात्किमिदंरूपमिति विस्मयेनैवे
क्षत इत्यर्थः तथैव च तथाविधमेनमात्मानं तथाविधो यः
कश्चिदन्योऽपि आश्चर्यवद्वदति एवं अन्योऽपि कश्चित् शृणो
ति शास्त्राचार्यादिभ्यो यथावदेनं श्रुत्वापि यथार्थेनः क ९
श्चित् न वेद न जानाति च शब्दात्स्वरूपगुणादि निश्चये
इष्टवक्तृश्रोतृणामतिदुर्लभत्वं दर्शितम् २९ ॥

+ नन्वविद्वांसोऽपि बहवः शोचंति नत्विमामेवत मधुसूदनी टीका॥ नः अनेरेव उपालभसे

+ एवं अकृते देहिनमाश्चर्येणाद्भुतेन तुल्यतया वर्तमानमाविद्यकनानावि
धविरुद्धधर्मतया संतमप्यसंतमिव स्वप्रकाशचैतन्यरूप
मपि जडमिवानंदघनमपि दुःखिनमिव निर्विकारमपि स
विकारमिव नित्यमप्यनित्यमिव प्रकाशमानमप्यप्रकाश
मानमिव ब्रह्माभिन्नमपि तद्भिन्नमिव मुक्तमपि बद्धमिवाद्वि
तीयमपि सद्वितीयमिव संभावितविचित्रानेकाकारप्रती
तिविषयं पश्यति शास्त्राचार्योपदेशाभ्यामाविद्यकसर्वद्वै
तनिषेधेन परमात्मस्वरूपमात्राकारायां वेदांतमहावाक्य
जन्यायां सर्वसुकृतफलभूतायामंतःकरणवृत्तौ प्रतिफ
लितं समाधिपरिपाकेन साक्षात्करोति कश्चित् शमदमा
दिसाधनसंपन्नचरमशरीरः कश्चिदेव न तु सर्वः तथापि
कश्चिदेनं यत्पश्यति तदाश्चर्यवदिति क्रियाविशेषणं आ
त्मदर्शनमप्याश्चर्यवदेव यत्स्वरूपतो मिथ्याभूतमपि सत्य
स्यैवजनकमाविकमप्यविद्यां विद्यातिकं अविद्यास्वपघ्नन्

वत्

स

द्य

या

अस्माकं वक्रेरेव हि नज्ञाऽशोच्या
नानन्वशोचत इति न्यायात्
तद्वच
नाथप्रति
पत्तिरपिम मन्दोषः तत्रा
न्येषामपि तवैवात्मा पति
ज्ञानादेव शोकः आत्मप्रति
पत्तिस्तु तवान्येषामिव सा
शयदोषादिति नोक्तदोष
द्वयमित्यभिप्रेत्यात्मनो
दुर्विज्ञेयतामाह +

गी॰
टी॰
हि॰

तत्कार्यंतयास्वात्मानमप्युपहंतीति तथाय:कश्चिदेतं
पश्यतिसश्चाश्चर्यवदितिकर्तृविशेषणं यतोसौनिहत्ता
विद्यातत्कार्योपिप्रारब्धकर्मप्राबल्यात्तद्धानिर्व्यवहरति
सर्वदासमाधिनिष्ठोपिव्युत्तिष्ठतिव्युत्थितोपिपुन:समाधि
मनुभवतीतिप्रारब्धकर्मवैचित्र्यचरित:प्रागुक्तप्रज्ञान
त्वात्सकललोकस्पृहणीयो:तत्राश्चर्यवदेवभवति तदे
तत्त्रयमप्याश्चर्यमात्मातत्ज्ञानंतत्ज्ञाताचेतिपरमदुर्वि
ज्ञेयमात्मानंत्वंकथमनायासेनजानीयाइत्यभिप्राय:
एवमुपदेष्टुरभावादप्यात्मादुर्विज्ञेय: योह्यात्मानंजानाति
सएवतमन्यस्मैब्रुवत् प्रज्ञस्योपदेष्टुत्वासंभवाज्ञानंलब्ध

विद्याद्वि

105

ब्रूयात्

समाहितचित्त: श्रयेणकथंब्रवीतु व्युत्थितचित्तोपिपरे
णज्ञातुमशक्य: यथाकथंचित्ज्ञातोपिलाभपूजाख्या
त्यादिप्रयोजनानपेक्षित्वान्नब्रवीत्येव कथंचित्कारुण्य
मात्रेणब्रुवंस्तुपरमेश्वरवदत्यंतदुर्लभएवेत्याह आश्चर्य
वद्वदतितथैवचान्यइतियथाजानातितथैववदति एतमि
त्यनुकर्षणार्थ:चकार:सचान्य:सर्वाज्ञजनविलक्षण:
तय:पश्यति ततोन्यइतिव्याख्यातान् तत्रापिकर्मणोक्रिया
याकर्तरिचाश्चर्यवदितियोज्यंतत्रकर्मण:कर्तुश्चप्रागाश्च
र्यंत्वंव्याख्यातं क्रियायास्तुव्याख्यायते सर्वशब्दावाच
शुद्धस्यात्मनोयद्वदनंतदाश्चर्यवत् तथाचश्रुति: यतोवा
चोनिवर्ततेअप्राप्यमनसासहेति केनापिशब्देनावाच्य
शुद्धस्यात्मनो[illegible]
[illegible] विशिष्टशक्तेन
णयाकल्पितसंबंधेनपदेनजहदजहत्स्वार्थल
नतद्रूपनिर्विकल्पकलक्षणतावच्छेदकंनतत्रैवप्रतिपाद
प्रत्ययाविनाशंकिंविकल्पकसाक्षात्कारस्वरूपमत्याश्चर्यमित्यर्थ:
त्यापकवाक्यवततलक्षणंविनासंबंधान्तंसप्रमाति
तत्त्वमस्यादिवाक्येनयदात्मतत्

नं तदाश्चर्यवच्छब्दशक्तेरचिंत्यत्वात् न च विना संबंधबोधनेऽ-
तिप्रसंगः लक्षणापक्षेपि तुल्यत्वात् शक्यसंबंधस्यानेकसा-
धारणत्वात् तात्पर्यविशेषान्नियम इति चेत् तस्यापि सर्वान्
प्रत्यविशेषात्कश्चिदेव तात्पर्यविशेषमवधारयति न सर्व इ-
ति चेत् हंत तर्हि पुरुषगत एव कश्चिद्विशेषो निर्दोषत्वरूपो
नियामकः स चास्मिन्पक्षेपि न दंडवारितः तथा च यादृश-
शुद्धांतःकरणस्य तात्पर्यानुसंधानपुरःसरं लक्षणया वा-
क्यार्थबोधो भवद्भिरंगीक्रियते तादृशस्यैव केवलः शब्द-
विशेषोऽखंडसाक्षात्कारं विनापि संबंधेन जनयतीति किम-
नुपपन्नं एतस्मिन्पक्षे शब्दस्य विषयत्वाद्यतो वाचो निवर्तं-
त इति श्रुतिरनुपपन्ना अयं च भगवदभिप्रायो वार्त्तिककारैः प्र-
पंचितः दुर्बलत्वादविद्याया आत्मत्वाद्बोधरूपिणः शब्दश-
क्तेरचिंत्यत्वाद्विद्मस्तं मोहहानितः अगृहीत्वैव संबंधमभि-
धानादेव यद्धियः हित्वा निद्रां प्रबुध्यन्ते सुषुप्ते बोधिताः परैः जा-
ग्रद्वन्नयतः शब्दं सुषुप्ते वेत्ति कश्चन ध्वस्तेतो ज्ञानतोऽज्ञाने
ब्रह्मास्मीति भवेत्फलं अविद्याघातिनः शब्दाद्याहं ब्रह्मेति धी-
र्भवेत् नश्यत्यविद्यया सार्धं हत्वा रोगमिवौषधमित्यादिना
ग्रंथेन तदेवं [illegible] कर्मणोः वचनक्रियायाश्चात्माश्चर्यवद्रू-
पत्वादात्मनोऽदुर्विज्ञानत्वमुक्त्वा श्रोतृदुर्लभत्वादपि तदाह
आश्चर्यवदेनमन्यः शृणोति श्रुत्वाप्येनं वेदेति अन्यो द्रष्टुर्वक्तु-
श्चोक्ताद्विलक्षणो मुमुक्षुस्त्वर्वकारं ब्रह्मविदं विधिवदुपसन्न
एनं शृणोति श्रवणाख्यविचारविषयीकरोति वेदांतवाक्य-
तात्पर्यनिश्चयेनावधारयतीति यावत् श्रुत्वा चैनं मननानि-
दिध्यासनपरिपाकाद्वेदापि साक्षात्करोत्यपि आश्चर्यवत् ता-
थाश्चर्यवत्पश्यति कश्चिदेनमिति व्याख्याते अत्रापि कर्त्रा-
श्चर्यरूपत्वमनेकजन्मानुष्ठितसुकृतक्षालितमनोमलत-
या दुर्लभत्वात् तथा च वक्ष्यते मनुष्याणां सहस्रेषु कश्चिद्यत-
ति सिद्धये यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः इति अ

वर्ण्ययापिवहुभिर्योनलभ्यः शृण्वंतोपिवहवोयंनविद्युःआ
श्चर्योवक्ताकुशलोस्यलब्धाश्चर्योज्ञाताकुशलानुशिष्टइ
तिश्रुतेश्च एवंश्रवणश्रोतव्ययोराश्चर्यत्वंप्राग्वद्व्याख्येयं नन
यःश्रवणमननादिकंकरोतिसआत्मानंवेदेति किमाश्चर्य
मतमाह नचैवकश्चिदिति चकारःक्रियाकर्मपदयोरनु
षंगार्थःकश्चिदेनंनैववेदश्रवणादिकंकुर्वन्नपि नदकुर्वं
स्तुवेदेतिकिमुवक्तव्यं ऐहिकमप्रस्तुतंप्रतिबंधेतद्दर्शना
दितिन्यायात् उक्तंचवार्तिककारैः कुतस्तज्ज्ञानमितिचे
त्तद्धिबंधपरिक्षयात् असावपिचभूतोवाभावीवावर्ततेय
वेति श्रवणादिकुर्वतामपिप्रतिबंधपरिक्षयादेवज्ञानंजा
यते अन्यथातुनसचप्रतिबंधपरिक्षयःकस्यचिद्भूतएव
यथाहिरण्यगर्भस्य [illegible] यथाश्वेत
केतोः तथाचप्रतिबंधक्षयस्यातिदुर्लभत्वात् यात्पापस्य
कर्मणइतिस्मृतेश्च दुर्विज्ञेयोयमात्मेतिनिर्गलितोर्थः य
दितुश्रुत्वाप्येनंवेदनचैवकश्चिदित्येवंव्याख्यायेत तदाआ
श्चर्योज्ञाताकुशलानुशिष्टइतिश्रुत्येकवाक्यतानस्यात् य
ततामपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतइतिभगवद्वचनवि
रोधश्चेतिविहद्विविनयःत्वेतव्यः अथवानैवकश्चिदित्य
स्यसर्वत्रसंबंधः कश्चिदेनंनपश्यतिनवदतिनशृणोतिश्रु
त्वापिनवेदेतिपंचप्रकाराउक्ताः कश्चित्पश्यत्येवनवदति
कश्चित्पश्यतिवदतिचकश्चित्तद्वचनंशृणोतिनतदर्थं
जानातिचकश्चित्तच्छ्रुत्वापिनजानातिकश्चिच्चसर्वबहिर्भू
तइति अविदुष्यत्वेपि असंभावनाविपरीतभावनाभिभूत
त्वादाश्चर्यतुल्यत्वं दर्शनवदनश्रवणेष्वितिनिगदव्याख्या
तःश्लोकः चतुर्थपादेतुदृष्ट्वोक्त्वाश्रुत्वापीतियोजना ॥

कस्यचिद्भावी यथावामदेवस्य कस्यचिद्वर्तते

ज्ञानमु त्पद्यतेपुं

२

र्विज्ञेयोयमात्माकिंत्वामेवैकमुपालभे मायावरणेहिविश्रांतिनि
मित्तेसुखडःखेदे ष्ठएउत्वमात्मतत्वस्यदुर्ज्ञेयत्वमिहोच्यते पं:
श्रकृतमात्मानमाश्चर्येणाद्भुतेनहि २ तत्वंमायाविपर्यासक
ल्पनाधारमद्वतं शास्त्राचार्योपदेशाभ्यांसर्वद्वैतनिषेधतः ३
वेदांतवाक्यजन्यायांधीवृत्तौप्रतिबिंबितं समाधिपरिपाकेन
कश्चिच्छोत्यादिसंयुतः ४ पश्यत्यनेनसर्वोपिदौर्लभ्यंतत्वदर्शि
नः यत्पश्यतितदाश्चर्यवदित्येवंक्रियान्वयि ५ तथात्मदर्शनं
यच्चतदप्याश्चर्यवद्यतः यत्स्वरूपांश्वाशृंतंसत्यस्यांजकंवि
भोः ६ यःपश्यतिसम्राश्चर्यवन्निरीक्ष्योमुमुक्षुभिः यतोसौतत्व
विद्ध्यासीभूतोप्यन्यवदेवच ७ सदाचारेप्रवृत्तःसन्देहवानिवल
क्ष्यते आत्मानंहिब्रतज्ज्ञानमेतदाश्चर्यवत्त्वयं ८ दुर्विज्ञेयमतो
सौनेजानीयाःकथमंजसा तथोपदेष्टुर्दौर्लभ्यात्दुर्विज्ञेयस्ततो
प्यसौ ९ यआत्मानंविजानातिस्वयंत्रैतरोजनः यतोऽन्तः
सोपदेष्टृत्वासंभवोभ्रांतिशालिनः १० ज्ञानीयस्तुसमाधिस्थः
सकथंशायशोवदेत् व्युत्थितोपिपरिणासौज्ञातंशक्यःकथ
सुधीः ११ यथाकथंचिज्ज्ञातोपिपूजाख्यात्यादिकेफले निःस्प
हत्वाच्चनब्रूयात्कथंचित्करुणावशात् १२ ब्रुवतीशावदेवाः
सोदृशोकोन्यतदुर्लभः यथावेत्तितथावक्तियएनंसाक्षिणंपरं
सर्वोज्ञ:ननभिन्नोसौसम्राश्चर्यवदेवहि अनिर्देश्यस्यशुद्धस्य
निर्विकल्पस्यसाक्षिणः १३ आत्मनोवचनंयत्स्यात्तदाश्चर्यवदे
वच विनाशास्त्रयादितातत्वमादिवाक्यैःप्रबोधनं १४ यदद्वैता
त्मतत्वस्यतदाश्चर्यवदित्यहो श्रद्दशक्तेरचिंत्यत्वाडकबस्य
विरुद्धैः १५ दुर्बलत्वादविद्यायाआत्मत्वाद्बोधरूपिणः श्र
वशक्तेरचिंत्यत्वाद्विश्रस्तमोहहानतः १७ श्रशृह्मीत्वेवसंबंधे
रभिधानाभिधेययोः हित्वानिद्रांप्रबुध्यंतेसुषुप्तेबोधितापु
रुः मात्रदृत्वयतःशाद्वंसुषुप्तेवेतिकश्चन धत्तेतोवचसात्मा
नंश्रस्मासीतिभवेत्फलं १९ अविद्यायातिनःशालाया[illegible]

गी॰
टी॰
हिं॰

१९७

तिधीर्भवेत् नश्यत्यविषयासाङ्गं हत्वा रोगमिवौषधं २० एवं
वक्तव्यश्चात्मायं वक्ता च वचनक्रिया त्रयमाश्चर्यवद्यस्माद्वि
ज्ञेयं हेतोऽपि सः २१ अन्योऽप्युक्तवक्तारं यथाशास्त्रमुपेत्य यः
वेदांतवाक्यतात्पर्यं निश्चिनोति विचारतः २२ श्रुत्वा चैनं तथा
मत्वा निदिध्यास्य निरंतरं साक्षात्करोति तथ्यं तदाश्चर्यव
दित्यपि २३ श्रोतनं श्रवणं श्रोता चैतदाश्चर्यवत्त्रयं गुरोः श्रु
तियश्चैनमश्रुत्वे ध्यायतीह यः २४ स वेदात्मानमित्यत्र किमा
श्चर्यमिवेति चेत् कश्चिदेनं श्रुत्वा हि श्रवणादिपरोऽपि सन्
प्रतिबंधवशान्नैनं वेदस्वात्मानमञ्जते नन्वेतर्हि न कोऽप्येनं ज
नीयादिति चेन्नहि २५ जायते तत्त्वविज्ञानं श्रवणादिप्रय
त्नतः प्रतिबंधक्षयादेव तदुक्तं वार्तिके स्फुटं २६ कृतलक्षण
मिति चेन्नहि बंधपरिक्षयात् असावपि च भूतो वा भावी वा
वर्ततेऽथवा २७ ह्येतोहिरण्यगर्भस्य वामदेवस्य भाष्यं वर्तते
तकेनोऽश्रुतत्त्वयोऽप्यतिदुर्लभः नचैव कश्चिदित्यस्य सर्वथैवा
न्वयोऽस्तु वा कश्चित्पश्यति नो वक्ति कश्चित्पश्यति वक्ति च
कश्चिच्छृणोति तद्वाक्यं तदर्थं वेत्ति तत्त्वतः कश्चिच्छ्रुत्वापि
वेत्ति कश्चित्सर्वं बहिष्कृतः ३० एवं पंचप्रकाराश्च श्रीमद्भ
गवता स्फुटं ३१ २९ ॥

नीलकंठी टी॰ ॥

नन्वत्र पंजरतल्पस्य सर्वप्रमाणसिद्धस्य वियदादिप्रपंचस्य
कथं रज्जूरगादिवदज्ञानप्रभवत्वेनात्मनस्तच्छून्यत्वमुच्यते कथं
वा कर्मज्ञानकांडापेक्षितमात्मनो यज्ञादिकर्तृत्वं श्रवणादिक
र्तृत्वं चापह्नूयत इत्याशंक्याह आश्चर्यवदिति कश्चित्तत्त्वज्ञा
नत्वप्रतीतानंतरं लोकोत्कं भूतग्राममाश्चर्यवत् आश्चर्यं तं प
श्यति तथा कश्चिदेनमाश्चर्यवद्वदति सत्यत्वेनानिर्वा
च्यत्वेन ... आकाशमपि ... अनिर्वचनीयेनैव लोकाप्रसिद्धेन रूपेणोपा
पादयति तथाहि रज्जूरगवत्प्रपंचः संप्रत्येवेह नानाविकिंच

नेतिश्रुत्यानबाध्येत प्रसंगश्चेन्नप्रतीयेत तस्मादनिर्वचनीयो
यमिति तदिदंसर्वव्यवहारादस्यापिप्रपंचस्यमिथ्यात्वाप
पादनमत्याश्चर्यमित्यर्थः तथाप्यनेप्रपंचंश्रुन्यश्चाश्चर्यव
च्छृणोति इमेलोकाइमेदेवाइमेवेदाइदंसर्वंयदयमात्मे
तिप्रत्यक्षेणश्रुनात्मतयाउपलभ्यमानस्यापिप्रपंचस्ययत्
प्रत्यगभिन्नत्वेनश्रवणंतदत्यंतमाश्चर्यं नहीयंश्रुतिर्यज
मानःप्रस्तरइत्यादिवदुपचरितार्था प्रपंचस्यात्मनःपृथ
केआत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदंस
र्वंविदितंभवतीत्येकविज्ञानात्सर्वविज्ञानप्रतिज्ञोपरोधा
पत्तेः नचप्रतिज्ञाप्यौपचारिकी प्रदेशांतरेश्रुतस्ययथासो
म्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्यादितिदृष्टांतस्या
परोधापत्तेः तस्मात्प्रतिज्ञादृष्टांतनिगमनानामेकवाक्य
त्वात् नप्रपंचस्यात्मान्यत्वं तत्त्वभेदश्रुतिर्हिप्रत्यक्षविरोधादा
श्चर्यमिवशृणोति तथाकश्चिदेनंप्रपंचंप्रत्यगनन्यत्वेनश्रुत्वा
अपिशास्त्रात्उक्तात्समाधिदृष्टांतेरुपपाद्यदृष्ट्वाध्यानेनचसाक्षा
त्कृत्वापितत्त्वतोनैवेदनजानाति तथाहि आत्माहिप्रज्ञातीव
विक्षेपतःपरिहीयतइतिवक्ष्यति तस्मादात्मैकात्म्यंभवत्येव
प्रपंचस्यरज्जूरगादितुल्यत्वेनतुच्छत्वं यद्वापनमात्मानेक
त्वभोक्तृत्वदुःखित्वानित्यत्वजडत्वसंगित्वपरिछिन्नत्वादि
धर्मवत्तयाप्रसिद्धमपितत्त्वमसीत्यागमोत्थयाब्रह्माकारांतः
करणवृत्त्याब्रह्मविद्याविद्ययाऽकर्तारमभोक्तारमानंदघनं
सत्यचिद्रूपमसंगमनंतमपरोक्षीकरोतीतिमहदाश्चर्यं य
त्पश्यतितदाश्चर्यवदितिक्रियाविशेषणंवा आविद्यकम
पिदर्शनमविद्यांस्वात्मानंचकर्तृकरणभावद्विवर्तयतीति
सदायःपश्यतिसआश्चर्यवदितिकर्तृविशेषणं यतपक
एवंविद्वान्समाधिव्युत्थानयोःपरस्परविरुद्धमात्मनोब्रह्म
भावंजीवभावंचयावदारब्धकर्मक्षयमनुभवतीति तथा
वाक्यजन्मातीतमप्यात्मानंयद्वाचावदति तदप्याश्चर्यं घट

198

हीतसंगतिकेनापिग्राह्येनयथास्वप्नः प्रबोध्यतेतद्वत् यथो
क्तवार्त्तिके प्रगृहीत्वैवसंबंधमभिधानाभिधेययोः हित्वा
निद्रांप्रबुध्यतेस्वप्नेबोधितःपरैः जाग्रद्वत्रयतः शुद्धं
ब्रह्मैवेतिकश्चन ध्यस्तेतोज्ञानेनाज्ञानेब्रह्मास्मीतिभवेत्फ
ले प्रविद्याद्यातिनःशाह्याद्याहंब्रह्मेतिधीर्भवेत् नपुनःस्व
विषयासाद्वैहत्वारोगमिवौषधमिति तथायःश्रृणोतिसो
पिश्चाश्चर्यवत् प्रतिउर्लभइत्यर्थः श्रवणायापिबहुभिर्यो
नलभ्यइतिश्रुतेः श्रुत्वैवंतोपिबहवोयत्रविदुरितिश्रुति
द्वितीयपादार्थसंगृह्णाति श्रुत्वाप्येनमिति आश्चर्योवक्ता
कुशलोस्यलब्धाश्चर्योज्ञाताकुशलेनानुशिष्टइतिउत्त
राईस्यश्लोकपूर्वार्द्धेनसंगृहीतइतिज्ञेयं उर्विज्ञेयोयमा
त्मातस्यैतज्ज्ञानार्थंयत्नस्त्वेतिभावः २९ ॥

धानेदी टीका

अर्जुनेनैवंदेहिदेहयोर्नित्यानित्यत्वविचारेप्रश्नप्रतिप्रश्ना
भावादनवधानंमत्वाक्षुभितइवसोपालंभमाह एवंनह
न्यतेहन्यमानेशरीरेइत्यादियुक्तिदर्शितस्वरूपमपिभीष्मा
दिजीववर्गं कश्चिद्देहाहंभावनावाननात्मज्ञोजनः आश्च
र्यवदसंभाव्यमिवपश्यति सतिदेहेउपलभ्यते देहनाशे
तेनोपलभ्यते इतिदृश्यस्यदेहस्यध्वंसात्तत्त्वेनविनश्यती
त्यर्थः अन्योवक्तामहद्विधःसर्वज्ञःपरमेश्वरः एनमुक्तं
[illegible]जीववर्गमाश्चर्यवदसंभाव्यंवक्तिकिंकाका युक्ति
संभाव्यमेववक्तीत्यर्थः चपुनःअन्यःअर्जुनादपरः श्रो
माश्चर्यवच्छृणोति आमोक्षःसत्यतयासंभाव्यमेवश्रृणोत्याव
ति यथायमर्जुनःएनमविनाशिनंश्रुत्वापिनैवावधान
यति तथाश्रुत्वाप्येनंकिंनवेद अपितु सर्वएवाभ्यासं
यतमानोनवेदेति अक्तेनोपयोगात्स्वहृदयंगमोयमर्थोजनी
नावधानार्थम् यस्त्वत्रश्रीपादैर्व्याख्यातस्तस्य
मत्वनप्रहृदबोधाजनोपदेशाविषयइतिसहृदयाःप्रमा

+इदानीं बहुप्रकारोऽप्ययमर्थोऽतिगंभीरत्वान्मया स्वावधारयितुमनुष्ठातुं चाशक्य इत्यर्जुनस्यैतद
र्थविषयमनुव्यवसायं परिहर्तुं प्रकृष्टप्रयत्नप्रतिपत्तव्यतामस्यार्थस्य दर्शयितुमाह +

तम् २९ ॥

रामकंठी टीका

+एनमात्मानं यथाप्रतिपादितस्वरूपं कश्चिन्मनुष्यसहस्रेषु म
ध्यमकृष्टपुण्यपरिपाकवशाद्बहूनां जन्मनामन्ते पश्यति त
त्वतः प्रत्यभिज्ञानेन साक्षात्कुरुते योऽपि पश्यति स आश्चर्यव
द्यथाश्चर्यं कश्चिददृष्टपूर्वमद्भुतं कदाचित्कथंचित्क्षणमात्रं
पश्यति तद्वदेनं कश्चित्कृतपुण्यः क्षणमात्रं पश्यति तथैवा
द्भुतरूपमिव प्रतिभासमानं कश्चिदेव तथाविधमेनं वदति प
रप्रबोधनाय चाचष्टे तथैव कश्चिन्नादृशमेव परेण प्रतिपाद्यमानं
शृणोत्यवधारयति कश्चिन्नैव प्रतिभगवदनुग्रहेणानधिष्ठितत
त्वादविद्योपहतान्तःकरणमेनं यथाप्रतिपादितस्वरूपमात्मा
नं श्रुत्वापि कश्चिन्नत्प्रतिपादनकुशलादाचार्यादपि न वेद त
त्वेन न जानाति स च तथाविधोऽनुपदेश्य एव त्वं पुनर्भक्तिश्र
द्धादिगुणसूचितभगवदनुग्रहत्वात्पात्रमेवैतत्तत्त्वोपदेशस्य
न चोपदेशको भवेत्यर्थः किमनेन तात्पर्यम् अस्मात्मनो गुरुशि
ष्यक्रमेण स्वयमनुभवेन वा संवेद्यत्वात्केचित्पुण्यभाजः प्रति
पन्नारः किन्तु निरंतराभ्यासपरिशीलनविशीर्णकल्मषक
लविकल्पावरणान्तर्विनैव वैमल्येन सर्वकालमाश्रितया
वासया प्रतिपत्तिपात्रमिति विरलविरलो लोकः कश्चिदेव चर
मजन्माभवेदिति यथोक्तेन क्रमेण सम्यगवधारणीयं

२९ ॥

लालकी टीका

ननु तर्हि विद्वांसोऽपि लोके श्रावन्ति आत्मज्ञानादेवेत्याशयेना
त्मनो दुर्विज्ञेयत्वमाह आश्चर्यवदिति आश्चर्यमदृष्टमद्भुत
मस्माकं दृश्यमानं तेन तुल्यं शास्त्राचार्योपदेशाभ्यां पश्यति
साक्षात्करोति नित्यज्ञानानंदस्वभावस्यात्मनो लौकिकत्वा
दिंद्रजालमिवाचरमानं पश्यन्निव विस्मयेन पश्यति असंभा
वनाभिभूतत्वात् श्रुत्वाप्येनं ईश्वरानुग्रहभाजनः कश्चिदेव

अनेकसहस्रेषु कश्चिदु
त्कृष्टपुण्यः एनमात्मान
माश्चर्यवत्

+ तदुक्तं श्रीकुलयुक्तौ आत्माचैवात्मनाज्ञातो यदा भवति साधकैः तदा विस्मयमात्मावै
आत्मन्येव प्रपश्यति तथैनमन्यः परप्रबोधनाय आश्चर्यवद्वदति तथान्यः परेण
प्रबोध्यमान एनमाश्चर्यवच्छृणोति तथा वा [illegible] विस्मयो योगभूमिकेति

तथाच श्रुतिः यमेवैष वृणुते तेन लभ्य इति

गी॰ टी॰ हि॰

+श्रुत ॰न

कश्चिद्विपरीतभावनाभिभूतः श्रुत्वाप्येनं आत्मानं सम्यग्वेद २९

पंचोलीटीका

न केवलं तेषां एव विदुषामपि आत्मापरिज्ञानात् शोकमोहौ भवतः आत्मपरिज्ञानं च दुर्विज्ञेयत्वादात्मन इत्यभिप्रायोक्तं येन दुर्विज्ञेयत्वमात्मन आह आश्चर्यवदिति कश्चित् एनं आत्मानं आश्चर्यवत् अद्भुतं पूर्वमदृष्टमुच्यमानं यथा तद्वदिति च पुनः एनमात्मानमन्य आश्चर्यवत् अश्रुतपूर्वं अद्भुतं श्रूयमाणं यथा तद्वत् शृणोति दृष्ट्वा उक्त्वा श्रुत्वापि एनमात्मानं कश्चिन्न वेद २९

श्रीवीरसिंहबोधिनी॥

ननु यदि शरीरे देशे नापि न शोकोऽचितो तर्हि किमिति विदुषामपि तदभिभूतत्वं दृश्यत इत्यर्जुनाभिप्रायमशंक्यात्मतत्त्वस्य दुर्बोध्यत्वं देहत्वेन प्रतिपादयति आश्चर्यवदिति कश्चिदेतेन प्रतिपादितं स्वरूपमात्मानमाश्चर्यवद् दृष्टवत् अद्भुतवत् उपपश्यति प्रशस्ताचार्योपदेशाभ्यासवशात् विस्मयमानमिव साक्षात्करोति तथान्यः सर्वविलक्षणमेवं तथैव वदति एतमेव शिष्येभ्यः कथयति तथैवान्यो गुरुमुपसद्य तत्प्रतिपादितमात्मानमाश्चर्यवत् संभाव्यमानमिव शृणोति श्रुत्वापि कश्चिच्च कालेऽदर्शनवचने समुच्चिनोति श्रुत्वा दृष्ट्वोदित्वापि कश्चिदपि एनमात्मानं सम्यक् न वेदेत्यात्मनोऽल्पप्रयत्नेन दुर्ज्ञेयत्वात् इदानीं तज्ज्ञाने प्रयत्नबाहुल्यस्यानुपयोगित्वमेवेति मा वद २९ विनाशेनात्मविनाशं संभाव्य शोकाविष्टो भूरिति तात्पर्यम्

मधुभाष्य

आश्चर्यवदिति दुर्लभत्वेनेत्यर्थः तथाश्चर्यं लोके दुर्लभं तथापीश्वरस्वरूपत्वात् आत्मत्वाच्चात्मनस्तद्रूपं सांख्यज्ञानं शुद्धात्मज्ञानं विज्ञानं सांख्यमित्यभिधीयत इति भगवद्वचनाद्धा

योगउपाय: दृष्टायोगा: प्रयुक्ताश्चतुंसांख्यय: प्रसिद्धय
इतिवचनाद्भागवते नेतरौ सांख्ययोगौ उपादेयत्वेन विव
क्षितौऽत्र चित्सामस्त्येन कर्मयोग इत्यादि प्रयोगाव
निंदितत्वाच्चेतरयोर्मोक्षधर्मे भिन्नमतत्वमुक्तां पंचरा
त्रस्तत्या वेदानांचैकार्थत्वाविरोध: पार्थक्यंतु सांख्याद्य
पेक्षयाप्युक्तं तत्रैव चित्रशिखंडीप्रमुखे पंचरात्रमूले वेदै
र्लोकैश्च एवमेव सर्वत्र सांख्ययोगपाशुपत उपादेयत्वाव
कोवर्णनीय: युक्तेश्च ज्ञानं हि सर्वजैव मुक्तं उपायश्चव
ल्यते मुच्यतेऽनयेति बुद्धि: सांख्ययोगपाशुपत उपादेयत्वा
वकोवर्णनीय: युक्तेश्च विषयो यया वा बाध्यते मार्ग
मिहितेत्यर्थ: योग इमां बुद्धिं श्रृणिवत्युक्तम् ब्रह्मादिषु
ह्वयोमतभेदात् तत्कथमेकत्र निष्ठा करोमीत्यत आह
२९ ॥

200

भाषा अनुवाद

तो फेरि वडे विद्वान लोग जो शोक करते चले आतेहैं सो केवल आत्मा विषयक अज्ञानता ही से होता इस अभिप्रायमे आत्मा की दुर्ज्ञेयता कहे ज्ञान कठिनता का निरूपण करतेहैं कि कोई तो शास्त्र आलोचना करिके इस आत्माको जानिके भी आश्चर्य ऐसा जानते अर्थात् सर्वगत नित्य ज्ञान और आनंद स्वरूप आत्माके अलौकिकत्वसे असंभव जो इंद्रजालिक कौतुक तिसके समान देखि आश्चर्यसे चवडायकर विस्मययुक्त होतेहैं और कोई आश्चर्यकेनाई कहते कोई आश्चर्यके तुल्य सुनते और कोई आत्मज्ञानरूप विपरीत कहे उलटी भावनासे अभिभूतहोके इस आत्माका तत्व सुनिके भी जानि सकते नही अर्थात् बहुत देखि सुनिके भी इसी तरहसे आत्मा का जानना अति कठिन है २९ ॥

दोहा

कोउ आश्चर्यवत देखें यह कहे आश्चर्यवतआन और आश्चर्यवत यह सुने अश्रवणकरे भीन जान॥ २९॥

देही नित्यमवध्योऽयं देहे सर्वस्य भारत तस्मा
त्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ३० ॥

शांकरभाष्य टी० ॥

अथेदानीं प्रकरणार्थमुपसंहरन् ब्रूते देहीति यस्माद्देही
शरीरे नित्यं सर्वावस्थास्ववध्यो निरवयवत्वान्नित्यत्वाच्च त
अवध्योऽयं देहे शरीरे सर्वस्य सर्वगतत्वात् स्थावरादिषु स्थि
तोऽपि सर्वस्य प्राणिजातस्य देहे वध्यमानेऽपि अयं देही न व
ध्यो यस्मात्तस्माद्भीष्मादीनि सर्वाणि भूतान्युद्दिश्य न त्वं शो
चितुमर्हसि ३० ॥

आनंदगिरिकृत टीका ॥

श्लोकान्तरमुत्थापयति अथेति आत्मनो दुर्ज्ञानत्वप्रदर्शना
नन्तरमितियावत् वस्तुवृत्तापेक्षया शोकमोहयोरकर्तव्य
त्वे प्रकरणार्थः देहे वध्यमानेऽपि देहिनोऽवध्यत्वाभावे फलि
तमाह यस्मादिति हेतुभागं विभजते सर्वस्येति फलितप्र
दर्शनपरं श्लोकार्द्धं व्याचष्टे तस्माद्भीष्मादीनीति ३० ॥

स्वामिकृत टीका ॥

तदेवं दुर्बोधमात्मतत्त्वं संक्षेपेणोपदिशन्नशोच्यत्वमुपसंह
रति देहीति ३० ॥

पिशाचभाष्य टीका ॥

अथेदानीं प्रकरणमुपसंह्रियते देहीति तस्माद्भीष्मादीनि
सर्वाणि भूतान्युद्दिश्य न त्वं शोचितुमर्हसि ३० ॥

रामानुजभाष्य टी० ॥

सर्वस्य देवादिदेहिनो देहे वध्यमानेऽप्ययं देही नित्यमवध्य इ
ति मन्तव्यः तस्मात्सर्वाणि देवादिस्थावरान्तानि भूतानि विष
माकाराण्युक्तेन स्वभावेन स्वरूपतः समानानि नित्यानि
च देहतस्तु वैषम्यं ततो देवादि सर्वाणि भूतान्युद्दिश्य न शो
चितुमर्हसि न केवलं भीष्मादीन्प्रति ३० ॥

अभिनवगुप्तकृत टी॰ ॥

अतो नित्यमात्मनो विनाशित्वम् ॥ ३० ॥

परमार्थप्रपा टी॰

अथ प्रकृतमनुसरति देही नित्यमिति देही शरीरे बालकत्वा
त्मनि नित्यं निरंतरमवध्यः वधार्हो न भवतीति नित्यत्वेऽशोकं ए
क एव सर्वस्य भूतजातस्य देहे वर्तत इति व्यापकत्वेऽशोकं तस्मा
त्कारणात्सर्वाणि भूतानि आत्मन्यहं तदादीनि शोचितं नार्ह
सि तन्निमित्तं शोको व्यर्थः अथ देहनिमित्तं चेत्तर्हि तस्मादधि
करणीभूतात्तस्मादात्मनः सकाशात्सर्वाणि भूतान्याविर्भ
वंतीति देहानामथास्य स्वरूपत्वं निरूपितं एतदेव बृहदार
ण्यके पठ्यते स यथोर्णनाभिस्तंतुनोच्चरेद्यथाग्नेः क्षुद्रा वि
स्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे लोकाः सर्वे देवाः
सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंति तस्योपनिषत्स
त्यस्य सत्यमिति प्राणा वै सत्यं तेषामेव सत्यं भाष्ये पूर्वश्लो
कार्थे अथ यदा सुषुप्तो भवति न कस्यचन वेदेत्यादि श्रुत्या सु
षुप्तो मनसि परमात्मनि लीने सति तत्कालीनः स्थूलसूक्ष्म
प्रपंचोऽपि लीनो भवेदिति प्रतिपादितं अथ पुनर्जागरावस्था
यां मनसि बहिर्मुखे जाते सति प्राक्तनसंस्कारैर्यथापूर्वं मनः प्रपंच
आविर्भवति धाता यथापूर्वमकल्पयदिति श्रुतेः एवं सुषुप्तौ
प्रपंचलये जागरे पुनराविर्भावे च दृष्टांतमाह स यथेति ऊर्ण
सूत्रविशेषो नाभौ यस्यासावूर्णनाभिः कीटविशेषः स यथा प्र
वेशोत्पादितेन पुनर्ग्रस्यमानेन तंतुना उच्चरेत् ऊर्ध्वं चरेत्
यावत्सर्वं तंतुग्रस्तो भवति तद्वन्मनः सर्वसंस्काररूपं तंतुं ग्रसि
त्वा स्वयमपि लीनं भवति अथ पुनः प्रपंचोदये दृष्टांतमाह
यथेति यथा हन्यमानादुल्मुकादेः सकाशाद्युगपदेव क्षुद्रा
लघीयांसः सहस्रशो विस्फुलिंगा अग्निकणा व्युच्चरंति उद्ग
च्छंति एवमेवास्मादात्मनो मनसः सकाशात्सर्वे सूक्ष्म
प्रपंचरूपाः प्राणास्तथा स्थूलप्रपंचरूपाः सर्वे भूर्भुवः स्वराद्याः

लोकाः सर्वे देवाः इंद्रादयः सर्वाणि भूतानि स्थावरजंगमात्म
कानि सर्व एते आत्मनो देहाद्व्युच्चरंति निर्गच्छन्ति तस्य परमात्म
न उपनिषत् ज्ञानं सत्यस्य सत्यमिति वदंति एतदेव प्रकटी
करोति वै इति ज्ञानव्यवहारे प्राणा उच्छ्वासप्राणादयो हिरण्य
गर्भाद्याः सत्यं तेषामपि एष आत्मा सत्यमेव सत्यत्वमर्यादेत्य
र्थः एवं च भयव्यापि शोकाद्युदय इत्यर्थः तदुक्तमध्यात्म
मीमांसायां इंद्रे इंद्राणीरतौ ते प्रविशति मनसि रेतसा साक
मेतदुक्तं तद्धि प्रजाते स सकलकरणे नैन गर्भे दधाना साव
कैलीयमाना पुनरुदयमिता जागरादौ प्रसूते कीटी वाणी।
मिवासावुन्नहुतवहतो निःसरंति स्फुलिंगा इति ३० ॥

वनमाली टीका ॥

उपसंहरति देहीति सर्वस्य प्राणिजातस्य देहे वध्यमानेऽप्ययं
देही जीवो वध्यो न भवतीति नित्यं नियतं यस्मात्तस्मात्सर्वाणि
भूतानि स्थूलानि सूक्ष्माणि न भीष्मादिभावापन्नानि शोचितुं
नार्हसि स्थूलदेहस्याशोच्यत्वमपरिहार्यत्वात् लिंगदेहः
स्याशोच्यत्वमात्मवदेवावध्यत्वादिति न स्थूलदेहस्य लिंगदे
हस्य वाशोच्यत्वमुक्तमिति भावः ३० ॥

अथ वैजयन्ती टी० ॥

एवमात्मज्ञानस्य दुर्लभत्वमुक्त्वेदानीमात्मनोऽवध्यतयाऽ
शोच्यतां वदन्नुपसंहरति देहीति हे भारत सर्वस्य ब्रह्मादिः
स्थावरान्तस्य देहिनः केनाप्युपायेन वध्यमानेऽपि देहे देही जी
वः यतो नित्यः सर्वकालैकरसस्वरूपस्वभावस्ततोऽवध्यः
वध्यो न हि भवति यस्मादेवं तस्मात्सर्वाणि ब्रह्मादिपिपीलि
कान्तानि न केवलं भीष्मादीनि देहस्वभावेन स्थूलसूक्ष्मादि
विषमाकाराण्यपि स्वस्वरूपेण समानानि भूतानि समु
द्दिश्य शोचितुं शोकं कर्तुं त्वं नार्हसि न योग्यो भवसि ३० ॥ साधनमुक्त्वाउपसंहरति+

*सर्वप्राणिसाधारणभ्रमनिवृत्ति मधुसूदनी टी० ॥ साधनमुक्तमुपसंहरति देही लिंगदेहोपाधिरा

सर्वस्य प्राणिजातस्य देहे वध्यमानेऽप्ययं देही

नियतं

गी० टी० हिं०

मावधो न भवतीति नित्यं यस्मात्तस्मात्सर्वाणि भूतानि स्थूला
नि सूक्ष्माणि च भीष्मादिभावापन्नान्युद्दिश्य त्वं न शोचितुमर्ह
सि स्थूलदेहस्याशोच्यत्वमपरिहार्यत्वाल्लिंगदेहस्याशोच्य
मात्मवद्देवावध्यत्वादिति न स्थूलदेहस्य लिंगदेहस्यात्मनो वा
शोच्यत्वं युक्तमिति भावः [illegible] स्थूल [illegible] शरीर [illegible] यत्तत्त्वा
[illegible] विवेकेन मिथ्या [illegible]
[illegible] वादि [illegible] तर्वं प्राणि [illegible] वणम
[illegible] विवेकेन [illegible]
[illegible] त्रियुक्ता [illegible] यमें [illegible] दि [illegible]
[illegible] दोष [illegible]
[illegible] क [illegible] मनव
नानात्वं बोधयति भगवान् ३०॥

सदानंदी टी०॥

इदानीं सकलप्राणिसमानस्य धर्मस्य च निहन्तिसाधनं प्र
क्रमं उपसंहरतीश्वरः १ सर्वस्य प्राणिजातस्य वध्यमानेपि
देहे देही न वध्यते यस्मान्न्रियते शुद्धवंशज २ तस्मात्सर्वाणि
भूतानि भीष्मादीनि ममत्वतः ३ उद्दिश्य त्वं न योग्योसि शोचितुं वि
मूढबुद्धिवत् ३ नाशस्यापरिहार्यत्वात्स्थूलस्याशोच्यतैव
ता लिंगस्याशोच्यता चात्मवदवध्यत्वहेतुना ४ आमोक्षम
विनाशोस्य लिंगदेहस्य संभवेत् सूक्ष्मोप्रलये चास्य सूक्ष्म
रूपेण संस्थितिः ५ न स्थूलस्य न सूक्ष्मस्य नात्मनो वा शोच्य
ता अतो निरस्य शोको न कार्यः सुविवेकिभिः ६ तं
व स्थूलसूक्ष्माभ्यां तादात्म्याध्यासतोन्तरं मिथ्याभूतोपि सं
सारः सत्यवद्भासते भ्रमात् ७ अविकारणं वै तत्र सर्वानर्थ
कबीजभूः सर्वसाधारणं भ्रांतिरज्ञेनस्यापि बोधतः ८ नि
वार्यानेनाशं वै देहद्वयविवेकतः आत्मत्वं हि भगवानत्र
वानर्थकणावशात् ९ ३०॥

तं

नीलकंठी टीका

प्रकृतमर्थमुपसंहरति देहीति सर्वाणिभूतानिकथमे
तेषांनाश्रल्पबलाबलवत्तरेणमयाहंतव्याःकथमेषांउ
च्छेदयएतेविनाजीविष्यंति कथंवाहंभीष्मादिभिर्गुरुभि
र्विनाजीविष्यामीतिशोचितुंनार्हसीत्यर्थः ३० ॥

ज्ञानेश्वरी टीका

एवमुपालंभपूर्वमुपदेशमसंहृदयेसन्निवेशयोत्कापिमुक्त
मेवोपसंहारार्थमाह यतएवतस्माद्भीष्मादीनतु विरम्यता
नुशोचितुमर्हसि ३० ॥

स्मान्नाहेनात्रयोगेपनापिभवनाभ — वितव्यम् यदयमत्रनिश्चयइत्याह +

रामकंठी टीका

प्रबंधमनेनत्रप्रतिपादितंदेहादिममत्वेयपदार्थोत्वमन्व
तिरिक्तंवेदकत्वमात्रेण, वेद्यत्वमात्रेण
वस्यवेदकत्वमात्रेकलत्त्वाणोदेहीदेहस्यवेद्यत्वमात्रेम
वास्यवेदकत्वमात्रेणस्वामीपरः प्रमाता सर्वस्यदेहमात्रेम
मत्वेनाभिमन्यमानस्यमायीयस्यप्रमातृजन्तुजातस्यत
त्वतस्तन्नाद्रूपदेहशरीरएकएवव्यापकतयानिष्ट्वि
समततेमवावध्योहंतंविनाशयितुमशक्यः नष्टागमापा
यधर्मकाणांनानाविधानांसर्ववेद्यत्वमात्रस्वभावानांश
रीराणांविनाशे तद्यापकस्यैकस्यानवच्छिन्नमहिम्नोवेदक
त्वमात्रव्यभिचार्यैकलत्त्वणस्यसत्यस्यात्मनोविनाशःसंभ
वति यतएवमतस्तस्याविनाशित्वेननित्यस्यानुशोचितुंता
वन्नार्हस्येवतस्माद्विनाशैकस्वभावानिभूतानि पृथिव्यादिस
र्वविशेषात्मकानिशरीराण्येवशरीरत्वेनप्रतिपन्नानि
नष्टस्यनाविनश्यन्ति पशुपत्रनुशोचितुंपरिदेवितुंनार्हसि
विवेकिनःकःशोकस्यावसरइत्यर्थः

[illegible]

३० ॥

भूतः

लासिकी टीका

नदयमत्रनिश्चयइत्याह देहीति देहेवध्यमानेपि

प्राणिजातस्य

सर्वस्यमायीयस्यप्रमातुः

यतः एवं तस्मात्सर्वाणीति

देही

+तितं

यस्मात् हे भारत प्राणिनात्मनस्यत्र परः प्रमातात्मा अ-
वध्योहन्तुमशक्यः विवेकित्वादिति भावः ३० ॥

पंचोलीटीका

यस्मादात्मनो दुर्विज्ञेयत्वात् आत्माज्ञानकृतो सर्वस्य शोकः
मोहो निर्मूलो विवेकिना न कर्तव्या वित्यभिप्रायेण अशोच्याति
त्यादिप्रकरणप्रतिपादितमर्थमुपसंहरति देहीति हे भारत
अयं देही सर्वस्य देहे हन्यमानेपि नित्यमवध्यस्तस्मात्सर्वाणि
भीष्मद्रोणादीनि भूतानि उद्दिश्य शोचितुं नार्हसि ३०

रणवीरसमिद्धोधिनी ॥

आसां शरीर शरीरि व्यतिरेकोपपत्ति प्रदर्शनादि युक्तिरसकृदेव
तन्नित्यत्वानित्यत्व प्रतिपादनतदुर्ज्ञेयतादि युक्तिप्रदर्शन
इदं तावदत्र वक्तुं तत्त्वमिति संक्षिप्य वदन्नुक्तमेवार्थोपपादितमु-
पसंहरति देहीति देहे शरीरे वध्यमानेपि अयं प्रतिपादितस्-
वरूपो देही नित्यं नियतं सर्वदा वध्यो न हन्यत इति तस्मात्स-
र्वाणि भूतानि भीष्मादिशरीराणि त्वं प्रोचितुं नार्हसि योग्यो
न भवसीत्यर्थः ३० ॥

मधुभाष्य

३० ॥

॥

गी॰
टी॰
हि॰

204

भाषा अनुवाद

इस प्रकार आत्माका दुर्विज्ञेय स्वभाव अर्थात् बड़े क
ष्टसे भी इसका जानना कठिन यह संक्षेपसे उपदेश
करिके अब शोक न करना इस विषयमे कहतेहै कि
जैसे सब प्राणियों की नश्वर कहे नाश होने वाली देह
मे वर्तमान यह देही कहे आत्मा देह नाश होनेसे भी
इसका नाश नही क्यो कि सो आत्मा नित्य और अवध्य
है इसीसे भूत जो प्राणी तिनकी देह नाशके अर्थ तुम
को शोक करना उचित होता नहीं ३० ॥

दोहा

भारत जीव अवध्य नित सर्व देह मे पाइ तातें भूतसमस्त
को तुंनहि योग्य संदेह ३०॥

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि धर्म्याद्धि
युद्धाच्छ्रेयोन्यत्क्षत्रियस्य न विद्यते ३१ ॥

शांकरभाष्यं

इह परमार्थतत्त्वापेक्षायां शोको वा मोहो वा न संभवतीत्युक्तं न के
वलं परमार्थतत्त्वापेक्षायामेव किंतु स्वधर्ममिति स्वधर्ममपि स्वोध
र्मः क्षत्रियस्य धर्मः युद्धं तमप्यवेक्ष्य त्वं न विकंपितुं प्रचलितुमर्हसि
क्षत्रियस्य स्वाभाविकाद्धर्मादात्मस्वाभाव्यादित्यभिप्रायः तच्च युद्धं
पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थं चेति धर्मादनपेतं परं ध
र्म्यं तस्माद्धर्म्यात् युद्धात् श्रेयोन्यत् क्षत्रियस्य न विद्यते हि यस्मात्

आनंदगिरिकृतटीका

श्लोकांतरमवतारयन् वृत्तं कीर्तयति इहेति पूर्वश्लोकः सप्तम्यर्थः
यत्पारमार्थिकं तत्त्वं तदपेक्षायामेव केवलं शोकमोहयोरसंभवो
न भवति किंतु स्वधर्ममपि चावेक्ष्येति संबंधः स्वकीयं क्षात्रधर्ममत्र
संधाय ततश्चलनं परिहर्तव्यमित्यर्थः यद्धि क्षत्रियस्य स्वधर्मादनपेतं
श्रेयःसाधनं तदेव मया त्वं वर्जितव्यमित्याशंक्याह धर्म्याद्धीति ज्ञा
तिप्रयुक्तं स्वाभाविकं स्वधर्ममेव विशिनष्टि क्षत्रियस्येति पुनर्नका
रोपादानमन्वयार्थं प्रचलितुमयोग्यत्वे प्रतियोगिनं दर्शयति स्वा
भाविकादिति स्वाभाविकत्वमशास्त्रीयत्वमिति शंकां वारयितुं क्षत्रियस्वभा
नान्यर्थमाह आत्मेति आत्मनः स्वस्याङ्गेनस्य स्वाभाव्यं
वप्रयुक्तं वर्णाश्रमोचितं कर्मेतु स्यादित्यर्थः धर्मार्थं प्रजापरिपाल
नार्थं च प्रवर्तमानस्य युद्धादुपरिरंसा अज्ञानत्वेत्याशंक्याह तच्चे
ति ततोपि श्रेयस्करं किंचिदन्यत् युद्धादुपरतिरुचितेत्याशं
क्याह तस्मादिति तस्मात् युद्धात्प्रचलनमनुचितमिति विशेषः ३१

स्वामिकृतटीका

यच्चोक्तमर्जुनेनैव वेपथुश्च शरीरे मे रोमहर्षश्च जायते इति तदयु
क्तमित्याह स्वधर्ममिति आत्मनो नाशाभावादेवैतेषां हननेपि वि
कंपितुं नार्हसि किंच स्वधर्ममप्यवेक्ष्य विकंपितुं नार्हसीति संबं
धः यच्चोक्तं न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे इत्यादि तत्रा

गी॰
टी॰
द्वि॰

206

र्म्यादिति धर्मादनपेतान्न्यायात् युद्धादन्यत् श्रेयः क्षत्रियस्य न
विद्यते ३१ ॥

पैशाचभाष्यं ॥

परमार्थतत्त्वापेक्षया शोकमोहौ न संभवत इत्युक्तं न केवलं परमा
र्थतत्त्वापेक्षया शोकमोहयोरकर्तव्यता अपि तु अनेनाह स्वधर्ममपी
ति स्वधर्ममपि स्वधर्मः क्षत्रियस्य युद्धं तदपेक्ष्य त्वं विकंपितुं ना
र्हसि प्रचलितुं नार्हसि स्वाभाविकाद् युद्धात् स्वधर्मात् क्षत्रियस्य न विद्य
ते हि यस्मात् ३१ ॥

रामानुजभाष्यं ॥

अपि चेदं शास्त्रीयं युद्धं प्राणिमारणमपि अग्नीषोमीयवत् स्वधर्ममवे
क्ष्य न विकंपितुमर्हसि धर्म्याद्धि न्यायतः प्रवृत्तात् युद्धादन्यन्न हि क्षत्रि
यस्य श्रेयो विद्यते शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दानमी
श्वरभावश्च क्षात्रं कर्म स्वभावजमिति वक्ष्यते अग्नीषोमीयादिषु
च न हिंसा पशोर्हीनतरत्वागादिदेहपरित्यागपूर्वककल्याणतरदे
हस्वर्गप्रापकत्वेन श्रुतेः संज्ञपनस्य न वा उ एतन्म्रियसे न रिष्यसि दे
वाँ इदेषि पथिभिः सुगेभिः यत्र यंति सुकृतो नापि दुष्कृतस्तत्र त्वा
देवः सविता दधात्विति श्रूयते इह च युद्धे मृतानां कल्याणतरदे
हप्राप्तिं वासांसि जीर्णानीत्यादिना अतश्चिकित्सकशस्त्रक्षता
दिकरणमातुरस्येवास्य रक्षणमेवाग्नीषोमीयादिकर्मसंज्ञप
ने ३१ ॥

अभिनवगुप्तकृतटी॰ ॥

स्वधर्मस्य चानपहार्यत्वात् युद्धविषयः कम्पो न युक्तः ३१ ॥

परमार्थप्रपा टी॰ ॥

अथास्तां तव मतत्वाभिमता हृदयपद्धतिस्त्वयापि शोको न युज्यते इ
ह स्वधर्ममपीति स्वधर्मं श्रुतिस्मृतिसिद्धं च धर्ममेवावेक्ष्यमाणो
वापि विकंपितुं भयं प्राप्तुं नार्हसि अयत्नमेव धर्मं कथयेत्याह धर्म्या
दिति क्षत्रियस्य धर्म्यान्न्यायागताद् युद्धादन्यद्धिंसाद्यनुष्ठाने पा
पजनकं न विद्यते अथ यागजो नोपकारस्तु ते तत्तान्यथं प्रति
हिंसा [illegible] तिः न क्रियो हि पमन्यत्र जनन धर्मं तदेतत् क्षत्रियस्य
[illegible] न्यथा वा नाप्यथो प्रवलीयान् बलीयांसं समाशंसते धर्मे
यथा राज्ञैवं योधे अधर्मः सर्वे तत्तस्मात् त्वं चरन्नमा कुरु धर्मे च

तिधर्मंवावदंतंसत्यंवदतीति एतद्ध्येवैतदुभयंभवतीतिभाष्यं ततस्मा
दंतंतेश्रेयोरूपंधर्ममत्यसृजतातिसृष्टे स्थानीयमसृजत तदेतद्ध
ल्माणंतत्किंतत्क्षत्रस्यक्षत्रियजाते तत्रंताच्चलक्षणोधर्मस्तस्माद्धर्मो
त्परमुत्कृष्टंनास्ति यतः धर्मेणकृत्वा अबलीयान्दुर्बलोपिबलीयां
ससमर्थमपिसमाशंसतेसम्यक्प्रकारेणाभिपति यथाराज्ञास्ववशं
नकृत्वा दुर्बलोपिसमर्थमर्थंमाह्वयति तथेत्यर्थः एवंवैइतिनि
श्चयेनसर्वेलोकायोधर्मस्ससत्यंसत्यस्यज्ञापकः तत्तस्मात्कारणात्त
त्ववदंतंपुरुषंधर्ममेववदंतीत्याहुः वा इत्यथवाधर्ममेववदंतंपुरुषंसं
सवदंतीत्याहुरेवंसत्यधर्मयोरेकार्थवाचकत्वमस्तीत्युक्तंहीति
निश्चयेनैतद्धर्मसत्याभिधानमुभयमेताभवतिब्रह्मरूपंभवतित
त्वमसितत्सद्ब्रह्मेतिश्रुतेः ॥ ३१ ॥ इतिपरमार्थप्रपाटीका ॥

वनमालीटीका

पापमेवाश्रयेदित्युक्तवतोऽर्जुनस्य युद्धे स्वधर्मे धर्मभ्रांतिं निवारयति स्व
धर्ममपीति द्वे युद्धं प्राणिहिंसारूपमपि भीष्मघ्नस्तु हिंसावहिहित
त्वेन स्वधर्मत्वादवश्यमनुष्ठेयमित्यवेक्ष्य विकंपितुं चलितुं युद्धं स्वकु
नार्हसि यदुक्तं केनचच्छ्रेयोऽनुपश्यामीति तत्राह धर्म्यादिति धर्मादन
पेतं धर्म्यं तस्मात् श्रेयःसाधनं क्षत्रियस्य न विद्यते ३१ ॥

कुसुमवैजयंतीटीका

आत्मनो जन्ममरणाभावाच्छोकाभाव इत्युक्त्वाधुनैहिकामुष्मिकसु
खप्रदं स्वधर्ममपि दृष्ट्वा तस्य शोककरत्वेन वमहदेवायोग्यमित्याह
ष्टिभिः स्वधर्ममिति स्वधर्मस्य स्वस्य क्षत्रियस्य युद्धरूपमसाधारणं ध
र्ममवेक्ष्य निरीक्ष्य चापि शब्दाभ्यां देहात्मनोर्विवेकावेक्ष्य विकंपि
तुं विशेषेण कंपितुं वेपितुं नार्हसि त्वं योग्यो न भवसि हि यस्मात्
धर्मात्मसाधारणधर्मरूपात् युद्धादन्यत् श्रेयः सुखकरं क्षत्रियस्य
तद्धर्माश्रितस्य न विद्यते न भवति ३१ ॥

मधुसूदनीटीका

न देवं स्थूलसूक्ष्मशरीरद्वयतत्कारणाविद्याख्योपाधित्रयाविवेकेन मि
थ्याभूतस्यापि संसारस्य सत्यत्वात्मधर्मत्वादिप्रतिभासरूपं सर्वप्राणि
साधारणमर्जुनस्य भ्रमं निराकर्तुमुपाधित्रयविवेकेनात्मस्वरूपमभि
हितवान् संप्रति युद्धाख्ये स्वधर्मे हिंसादिबाहुल्येनाधर्मत्वप्रतिभासरू
पमर्जुनस्यैव करुणादिदोषनिबंधनमसाधारणं भ्रमं निराकर्तुं हिंसा
दिमत्त्वेपि युद्धस्य स्वधर्मत्वेनाधर्मत्वाभावं बोधयति भगवान् न केवलं
परमार्थतत्त्वमेवावेक्ष्य किं तु स्वधर्ममपि क्षत्रियधर्ममपि युद्धाऽपरांमु
खत्वरूपमवेक्ष्य शास्त्रतः पर्यालोच्य विकंपितुं विचलितुं धर्मादधर्म
त्वभ्रांत्या निवर्तितुं नार्हसि तत्रैवं सति यद्यप्येते न पश्यंतीत्यादिना
नरके नियतं वासो भवतीत्यंतेन युद्धस्य पापहेतुत्वं त्वया यदुक्तं कथं
भीष्ममहं संख्ये इत्यादिना च गुरुवधब्रह्मवधादिकरणं यदभिहितं न
त्सर्वं धर्मशास्त्रापर्यालोचनादेवोक्तं कस्मात् हि यस्माद्धर्म्यात् सपरं
युद्धस्वधर्मापनयेनायुद्धादन्यत् क्षत्रियस्य श्रेयः श्रेयःसाधनं न विद्य
ते युद्धमेव हि पृथिवीजयद्वारेण प्रजारक्षणब्राह्मणशुश्रूषादिद्वारा त्र

गी.
टी.
टि.

धर्मनिर्वाहकमिति तदेव क्षत्रियस्य प्रशस्ततममित्यभिप्रायः तथाचोक्तं प
राशरेण क्षत्रियोहि प्रजारक्षन्शस्त्रपाणिःप्रदंडवान् निर्जित्यपरसैन्या
निक्षितिंधर्मेणपालयेत् मनुनापि समोत्तमाधमैराजात्वाहूतःपाल
यन्प्रजाः ननिवर्तेतसंग्रामात्क्षात्रंधर्ममनुस्मरन् संग्रामेष्वनिवर्ति
त्वंप्रजानांचैवपालनं शुश्रूषाब्राह्मणानांचराज्ञःश्रेयस्करंपरमित्या
दि राजशब्दश्चक्षत्रियजातिमात्रवाचीतिस्थितमेवेष्ट्यधिकरणे त
नभूमिपालस्यैवायंधर्मइतिनभ्रमितव्यं उदाहृतवचनेपि क्षत्रि
योहीतिक्षात्रंधर्ममितिचस्पष्टंलिंगं तस्मात्क्षत्रियस्ययुद्धंप्रशस्तोध
र्मइतिसाधुभगवताभिहितं अपशवो[illegible]प
[illegible]निवृत्त[illegible]भगवताभिहितं अपशवोवान्येगो
अश्वेभ्यः पशवोगोअश्वाइतिवत्प्रशंसालक्षणयाफलादन्यस्य
श्रेयःसाधनंनविद्यते इत्युक्तमितिनदोषःयतेनफलान्तरशस्तनं
किंचिदनिष्टातेननोनिहन्तितविनेतिनिरस्तं नचश्रेयोनपश्यामि
हत्वास्वजनमाहवेइत्यनेनदपि ३१

सदानंदीटीका

देहद्वयविवेकेन सर्वसाधारणोभ्रमः निराकृतोथयुद्धाख्येस्वधर्मे
मेताभ्रमे १ अर्जुनस्यनिराकर्तुमसाधारणमीश्वरः स्वधर्मत्वेनयु
द्धस्याधर्मत्वाभावमाहवै २ वस्तुतस्त्वमवेक्ष्यैवकार्यंयुद्धंनकेवलं
किंतुयुद्धादवैमख्यंक्षात्रंधर्मंहिशाश्वतः ३ पर्यालोच्यस्वधर्मत्वंतनि
वर्तितुमर्हसि यस्माद्रणादवैमख्यधर्मयुक्तात्स्वपरस्यच ४ तच्छ्रेयः
साधनंसम्यग्विद्यतेन्यद्धिशाश्वतः नयद्रेणसंग्रामःप्रजारक्षणतत्प
था ५ विप्रभक्त्यापनःक्षात्रधर्मनिर्वाहकोभवेत् तथोक्तोमनुना
धर्मोराज्ञोयुद्धादिलक्षणः ६ समोत्तमाधमैराजाचाहूतःपालयन्प्र
जाः ननिवर्तेतसंग्रामात्क्षात्रधर्ममनुस्मरन् ७ नचश्रेयोनपश्यामी
त्येतेनैवनिराकृतं ८ ३१ ॥

नीलकंठटीका

अर्जुनस्यअनात्मनिदेहेआत्मधीरूपोमोहोनिवारितः इदानीं स्व
धर्मेयुद्धेअधर्मधीरूपंमोहं[illegible]निवारयति स्वधर्ममपीत्यादिना युद्धंत

यस्मात्स्वधर्मः तमवेक्ष्यापि विकंपितुं चलितुं नार्हसि हि यस्मात् धर्म्यात् धर्मा
दनपेतात् युद्धात् अन्यत् क्षत्रियस्य श्रेयः प्रशस्ततरं नास्ति ३१ ॥

आनंदी टीका

एवं देहिदेहयोर्भेदज्ञापनेनाशोच्यत्वं प्रतिपाद्येदानीं स्वधर्मेयु
द्धे स्वधर्मत्वमारोपितेन तन्निरसितं यद्युद्धे युद्धः स्यात्त्रिविघ्नितत्त्वहितः
इति ग्राथितो नरं चवकं प्रश्लोति धर्मादृ धर्मे शास्त्रोपदिष्टात्
प्रजापालनादिभिरन्याचरणादि श्रेयो निःश्रेयसकरं न ज्ञानं कर्म
वा सश्रुद्धितं श्रेयस्करमित्यपास्य हृदितम् ३१ ॥

+ श्रयप्रतिपादितो पपत्त्या तात्त्विकमात्मस्व यजात्मवितामिमानो ही पेनच्चव युधा उ

रामकंठी टीका

रूपं स प्रतिपत्तमशक्रमर्जुनेनमन्यमानो भगवान् तत्त्वि दे ये स्वकर्मणि प्रवर्तयितुमाह +

+ स्वधर्ममपि चावेक्ष्येत्यादि श्लोकसप्तकेन त्रिगदेव्याख्यातम् ३१

केवलं परत त्वदेवंया + नक्षत्रियस्य स्वधर्मे युद्धमवेक्ष्य न

लालकी टीका

विकंपितुमर्हसि धर्मस्यानपरिहार्यत्वात् यतो धर्म्याद्धर्मा दानपेतात् युद्धात् प्रशस्यतरं क्षत्रियस्यान्यन्नास्ति +

+ तदुक्तं मनुना समोत्तमाधमै राजा त्वाहूतः पालयन्प्रजाः न निव
र्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन् संग्रामेष्वनिवर्तित्वं प्रजानां चै
व पालनम् शुश्रूषा ब्राह्मणानां च राज्ञः श्रेयस्करं परं राजा क्ष
त्रियः ३१ + एवं सकामे पि ... स्वर्गहेतुत्वात्त्वात्याज्यं किंतु ... विवेक ... +

पंचोलीटीका

नकेवलं परमार्थदृष्ट्या शोको अयुक्तः स्वधर्मदृष्ट्यापि शोको न युक्तः
इत्याशयः स्वधर्ममपीति च पुनः स्वधर्ममपि क्षत्रियस्य स्वकीयं
युद्धलक्षणं धर्मं अवेक्ष्य विचार्य विकंपितुं प्रचलितुं न अर्हसि हि य
स्मात् क्षत्रियस्य धर्म्यात् युद्धात् धर्मादनपेतात् संग्रामात् अन्यत् श्रेयः
न विद्यते ३१

रसावीरसमिद्धोयिनी ॥

एवं देहिनो वध्यत्वाशोकानर्हतां प्रतिपाद्य हिंसाप्रायत्वाद्युद्धस्या
धर्मत्वाभिमाननिबंधनं वेपथुश्च शरीरे रोमहर्षश्च जायते इत्या
दिना प्रकाशितं देहकंपादिकं निराकर्तुं युद्धस्य स्वधर्मत्वेनाधर्म
त्वाभिमानं बोधयति स्वधर्ममपीति न केवलं देहिनो वध्यत्ववि
वेकेनैव नव कंपानर्हता किं तु स्वधर्ममपि युद्धापरांमुखतालक्ष
णं क्षत्रियजात्युचितधर्ममपि चावेक्ष्य पर्यालोच्य विकं
पितुं धर्मे धर्मत्वभ्रांत्या तस्माद्विचलितुं नार्हसीत्यर्थः यतेन वधय

ध्येतेन पश्यंतीत्याशंक्य नरके नियतं वासो भवतीत्यनुशुश्रुमेत्यंते
नग्रंथेन सामान्यतउक्तं कथं भीष्ममहं संख्ये इत्यादिना विशि
ष्योक्तं च गुरुवधादिनिबंधनं गुरुहत्यापापहेतुत्वमाशंकितमपा
स्तं नतु धर्मांतराणामपि श्रेयःसाधनत्वेन प्रसिद्धानां सत्वेऽतो
गुरुवधनिषेधान्नयसीत्यत आह धर्म्यादिति हि यस्मात्क्षत्रियस्य
र्म्यादपेतं मुखत्वेन तत्राधर्मादनपेता हिंसाप्रायादपि युद्धाद
दहिंसामयमपि भैक्षचर्यादिकं न श्रेयःश्रेयःसाधनं न विद्यते
धावपताकारः क्षत्रियो हि प्रजारक्षन्शस्त्रपाणिः प्रदंडयन् नि
त्यपरसैन्यानि क्षितिं धर्मेण पालयेदिति मनुरपि समोत्तमाध
मैराजा चाहूतः पालयन्प्रजाः न निवर्तेत संग्रामात्क्षात्रं धर्ममनु
स्मरन्निति तथा संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनं शुश्रूषा
ब्राह्मणानां च राज्ञः श्रेयस्करं परमिति राजा चात्र क्षत्रियजातिः
सामान्यतउच्यते एतेन चनच श्रेयोनुपश्यामि हत्वा स्वजनमा
हव इत्यत्रोक्तं नाशंका निरस्ता ३१॥

३१॥

मधुभाष्य

ऽर्हसीत्यत्रोनेन पश्यन्नीत्यादिना नरके नियतं वासो भवतीत्यनेन यत्पापहेतुत्वं युद्धस्योक्तं यद्वा
कथं भीष्ममहं संख्ये इत्यत्र गुरुवधब्रह्मवधाद्युपकरणमभिसंधितं तत्सर्वमेकप्रहारेणैव परिहरति भगवान्

रामचंद्रसरस्वतीकृतटीका

स्वधर्ममपि चावेक्ष्येति अपि च स्वधर्मं युद्धलक्षणमवेक्ष्य तत्स्वरूपं न
त्वतो ज्ञात्वा विकंपितुं युद्धाच्चलितुं नार्हसि अनवेक्षितयुद्धस्वरूपस्य
हि यानरकपातायुद्धाद्वयसीत्यर्थः अयं भावः युद्धशब्दस्य संप्रहाराणां
द्वातोर्निष्पन्नत्वात्संप्रहारशब्देन च सम्यग्वैरिप्राणवियोगानुकूलः प्रहा
रः संप्रहारइति व्युत्पत्त्या वैरिप्राणवियोगानुकूलप्रहारक्रियाप्रतीतेश्च
कृतत्वं नंगीकारेपि वा युद्धशब्दस्यास्मिन्नेवार्थे रूढत्वं एतादृशं युद्धं
ते भूम्यर्थमपराङ्मुखाः अकुटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथेति
याज्ञवल्क्यवचने संग्रामे प्रहृतानां विजयिनो भूम्यादिकं तदहतानां त
योगिवत्स्वर्गएव फलमित्युक्ते विजये मरणे वा वैरिमरणादधिकस्य प्र
हारकरणकवैरिमारणात्मकस्य युद्धाख्यस्य कर्मणो ऐहिकामुष्मिकाभि
मतफलत्वदर्शनाद्वैरिहिंसाफलकसंप्रहारमात्रस्य युद्धत्वाभावात्साध
नांशापानित्याद्यहिंसायाश्च विधिस्पष्टतया परिहृत्यत्च विशेषविषयत्वा
मान्यमवर्तनत्रुनि न्यायेन न हिंस्यात्सर्वभूतानि न ब्राह्मणो हंतव्य इत्यादि
निषेधाविषयत्वात् फलांशे या हिंसा वैदिकी सा निषिध्यत इति भेदोक्ते
स्साधनांशापनित्याहिंसाया निषेधाविषयत्वप्रतीतेः कर्मस्वरूपांतः
पातिनी हिंसा नरकादिहेतुः अन्यथा अग्निष्टोमीयं पशुमालभेत ब्र
ह्मणे ब्राह्मणमालभेतेत्यादि हिंसानामपि नरकादिफलहेतुत्वेगतेः स
वैतेष्वेन श्येनादीनांतु फले हिंसाफलांशे विधेरतत्ज्ञापकत्वाभावात्त्र
धिषम्हतिरिति भवतस्तानरकादिसाधनमिति यत्नगोतमवचनं न
दोषो हिंसायामाहवेन्यत्र अस्त्रसारथ्यनायुधकृतांजलिप्रकीर्णकेशप
राङ्मुखोपविष्टस्थलवृक्षारूढ गोब्राह्मणगवादिभ्य इति यत्त्र
शंखवचनेन पानीयं पिबंतं न भुंजानं नोपानहौ मुंचंतं नावर्मार्णं न स
वर्मानं न स्त्रियं न करेणुं न वाजिनं न सारथिं न सूतं न दूतं न ब्राह्मणं
न राजानं मोजो हन्यादिति नन्त्र दूतगवादिप्राप्यपाठादत्रात्र हन्तिब्रा
ह्मणविषयः किंच तात्रेण कर्मणा जीवेद्धिंसावाप्यापदि द्विजः इत्या
पद्धर्मतया ब्राह्मणस्य युद्धं प्राप्तं तत्र यदि तात्रयधर्मेणापि वर्तमानो ब्रा
ह्मणोः वध्यः स्यात्तर्हि क्षत्रियैर्ब्राह्मणसैन्यमेव संपाद्यं परं जयः कर्तव्य

गी॰
टी॰
३॰

210

इतिचतुरंगसेनासंपादनेऽप्यर्थमेवस्यादित्यादिबहुवक्तव्यं किम
त्राभिनिवेशेन स्वधर्ममपिचावेक्ष्येतिवदतोभगवतोयमभिसंधिर्म
मप्रतिभाति यदत्रदुर्विनीतत्वेनत्वत्तः श्वेतुमर्हतीत्यलं नत्विद
मस्माकमनेनैवधर्मेणराजसूयादीन् स्वधर्मान् तत्परिहारेणाक
रिष्यामइत्याशंक्याह धर्म्याद्धीति श्रेयः शब्देन श्रेयः साधनं ल
क्ष्यते हिशब्दः प्रसिद्धौ न विद्यते प्रशस्ततरमितिशेषः कुतोऽन्य
च्छ्रेयो न विद्यत इत्याशंक्योक्तं धर्म्यादिति धर्मो वर्णाश्रमधर्मा
स्तेभ्योऽनपेतमितिवर्णाश्रमधर्मरक्षणमपियस्यफलमित्यर्थ
तत्रशब्दाद्वर्णाश्रमधर्मभ्रंशात्प्रसक्तत्राणायनइत्यर्थेतिस्त्रका
त्तत्रशब्दनिष्पत्तेरयमर्थोवसीयते राजसूयाद्यनुष्ठानान्नैतत्फ
लंलभ्यत इतिभावः ननुकिंप्रातःसन्ध्यायकं विद्वेरिणं यथाक
चित्तंपाघसंध्यावंदनाग्निहोत्रादिवद्युद्धं कर्तव्यमित्याशंक्य नेदंनि
यतनिमित्तं किंत्वनियतनिमित्तं सदैहिकामुष्मिकफलदा
यीतिसर्वकर्मवैलक्षण्यमाह ३१ ॥

भाषा अनुवाद

प्रथम अध्यायके २९ श्लोकमे अर्जुनने कहाहै कि हमारी शरीरको
पती औ रोम खडेहोते हाथसे धनुषबाण गिरेपडतेहै सो यहभी
अयोग्य असंभवहै जिसहेतु स्वधर्म्म जोहै संग्राममे प्रवृत्त हो
के भीष्म पितामह आदिके हनन करनेसे अविनाशी आत्माका
विनाश मानि तुमारा डरना औ कांपना यह युक्तिसे सिद्धहोता
नही और ३१ श्लोकमे कहाहै कि ये अपने जनोंको नाशकरि हम
श्रेयकेहे कल्याननही देखतेउसपरकहतेहै किधर्म्मयुक्तजो न्या
य युद्ध जिसकी अपेक्षा अर्थात् उससे. बढिकर क्षत्रियोंको औ
कौन कल्याण करनेवाला कर्म्महै अर्थात् कोईभी नहीं ३१॥

दोहा

धर्महि अपनो देखके नहितु वेपथुयोग युद्धधर्मसें श्रेयद
ष और न क्षत्रिकोलोग ३१॥

यदृच्छयाचोपपन्नं स्वर्गद्वारमपावृतं सुखिनः
क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ३२ ॥

शांकरभाष्यं

कुतश्च तद्युद्धं कर्तव्यं इत्युच्यते यदृच्छयेति यदृच्छया चाप्रा
र्थितमागतमुपपन्नं स्वर्गद्वारमपावृतमुद्घाटितं ये एतदीदृशं
युद्धं लभन्ते क्षत्रियाः हे पार्थ किन्न सुखिनस्ते ३२ ॥

आनन्दगिरिकृतटीका

युद्धस्य गर्वाद्यनेकप्राणिहिंसात्मकस्याहिंसा शास्त्रविरोधान्ना
स्ति कर्तव्यतेति शङ्कते कुतश्चेति अग्नीषोमीयहिंसावद्युद्धमपि
तत्रपस्य विहितत्वादनुष्ठेयं सामान्यशास्त्रतो विशेषशास्त्रस्य
बलीयस्त्वादित्याह उच्यत इति तथापि युद्धे प्रवृत्तानामैहिका
मुष्मिकस्यापि सुखाभावादुपरतिरेव ततो युक्ता प्रतिभातीत्या
शंक्याह यदृच्छयेति चिरेण चिरतरेण कालेनैव यागाद्यनुष्ठा
यिना स्वर्गादिभाजो भवन्ति युध्यमानास्तु क्षत्रिया बहिर्मुख
ताविहीनाः सहसैव स्वर्गादिसुखभोक्तारस्तेन तव कर्तव्यमेव
युद्धमिति व्याख्यानेन सूचयति यदृच्छयेत्यादिना इहामुत्र च भवि
सुखवतामेव क्षत्रियाणां स्वधर्मभूतयुद्धसिद्धेस्तादर्थ्येनोपात्ते
शोकमोहौ हित्वा कर्तव्यमित्यर्थः ३२ ॥

स्वामिकृतटीका

किंच महतिश्रेयसि स्वयमेवोपागते सति कृतोविकंपसे इत्याह यदृच्छ
येति यदृच्छयाऽप्रार्थितमेवोपपन्नं प्राप्तमीदृशं युद्धं सुखिनः सभाग्या
एव लभन्ते यतो निरावरणं स्वर्गद्वारमेवैतत् युद्धायपर्वविधयं युद्धं
लभन्तेन एव सुखिन इत्यर्थः एतेन स्वजनं हि कथं हत्वा सुखिनः स्याम
माधवेतियदुक्तं तन्निरस्तं भवति ३२ ॥

पिशाचभाष्यं

कुतश्च युद्धं कर्तव्यमित्युच्यते यदृच्छयाचोपपन्नमागतं ३२ ॥

रामानुजभाष्यं

यदृच्छयाचोपपन्नमिति अप्रयत्नोपनीतमिदं निरतिशयसुखोपायभू
तं निर्विघ्नमीदृशं युद्धं सुखिनः पुण्यवन्तः क्षत्रिया लभन्ते ३२ ॥

अथ क्षत्त्रधर्ममेव द्रढीकुर्वन्नाह यदृच्छयेति भोगार्थं ईदृशं जयाजयादिमिश्रितं प्रारब्धमिति युद्धं स्वर्गद्वार
सुखिनः सुकृतिनः क्षत्रिया लभन्ते अन्यस्य दुर्लभत्वमाह स्वर्गेति पुनः कीदृशं
मपावृतं निरावरणं यदृच्छया अप्रार्थनया उपपन्नं सिद्धं भवतीति ॥ ३२ ॥

गी॰ टी॰ द्वि॰

अभिनवगुप्तटीका

अन्येपि ये कामभयाः क्षत्रियास्तेपीदृशं युद्धं स्वर्गहेतुमात्रत्याज्यं
किं पुनर्यस्मै ते शंज्ञानमुपदिष्टमिति तात्पर्यम् न पुनः स्वर्गपर्यवसायी
श्लोकः ॥ ३२ ॥

परमार्थप्रपाटीका

अपि च यदेवमाह श्रुतेर्हि स्यादितः श्लोकद्वयेन यदेतदुक्तं
येन युद्धकर्मणा कार्यं धर्म्यं धर्मसाधकं तेनापि [illegible] सितं हि
[illegible]
परलोकप्रतीतिर्वयं [illegible] अनेन [illegible]
[illegible] परिहाराः स्वीकृताः ॥ ३२ ॥

वनमालीटीका

किं च महति श्रेयसि स्वयमेव लब्धे विलंबो न कार्य इत्याह यदृच्छयेति
यदृच्छया केनापि भाग्येन अप्रार्थितं प्राप्तं सकामानामपावृतं निरावर
णं स्वर्गस्य द्वारं निःकामस्य मोक्षोपयुक्तं सुखिनो भाग्यवन्तः क्षत्रिया
ईदृशं युद्धं लभन्ते ॥ ३२ ॥

उत्तमवैजयन्तीटीका

किं च ईदृशः स्वयंभूतो युद्धस्य निरतिशयपुण्यवद्भिरेव क्षत्रियैर्ल
भ्यते न तु सर्वैः स्वल्पपुण्यकृद्भिरित्याह यदृच्छयेति यदृच्छया अय
त्नेन उपपन्नं प्राप्तं स्वर्गद्वारं स्वर्गप्राप्ते रूपायभूतं अपावृतं विघ्न
पकपाटाद्यावरणरहितं ईदृशं एवं प्रकारकं युद्धं च शब्दोऽवधा
रणार्थकः सुखिनः पुण्यवन्तः सुखस्य पुण्यफलत्वात् पुण्यफ
लसाधनयोरेकभावेन स्वर्गग्रहणेन पुण्यग्रहणं तात्पर्यार्थमि
त्यभिप्रायः क्षत्रियाः लभन्ते प्राप्नुवन्ति न त्वपुण्यवन्त इत्यर्थः ॥ ३२ ॥

मधुसूदनीटीका

ननु युद्धस्य कर्त्तव्यत्वेऽपि पितृभीष्मद्रोणादिभिर्गुरुभिः सह हननकर्त्तृत्वे
न मतिर्गरिष्ठत्वादित्याशंक्याह यदृच्छया स्वप्रयत्नव्यतिरेकेणाप्र
पारतो अप्रार्थनयैवोपस्थिते ईदृशे भीष्मद्रोणादिवीरपुरुषप्रति
योगिके सकीर्तिराज्यलाभहेतुफलसाधने युद्धे ये क्षत्रियाः प्रतिया
गित्वेन लभन्ते ते सुखिनः सुखभाजनं यतस्तेन तापामेव [illegible]
लोराज्यस्य च लाभात् परान्ययवातिशीघ्रमेव स्वर्गस्य लाभात्
द स्वर्गद्वारमपावृतं [illegible] अनुमानं अप्रतिबद्धं स्वर्गसाधनं युद्धं

पानेनैव स्वर्गजनकं ज्योतिष्टोमादिकं विहितरेण देहपातस्य प्रतिबंधाभावस्य चापेक्षणादित्यर्थः स्वर्गद्वारमित्यनेन श्येनादिवत्प्रत्यवायशंका परिहृता श्येनादयो विहिता अपि फलदोषेण दुष्टाः तत्फलस्य शत्रुवधस्य न हिंस्यात्सर्वभूतानि ब्राह्मणं न हन्यादि शास्त्रनिषिद्धस्य प्रत्यवायजनकत्वात् फले विधेरभावाच्च न विधिस्पृष्टे निषेधानवकाश इति न्यायावतारः फलं चैकेहिले स्वर्गः स च न निषिद्धः तथाच मनुः आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षिताः युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखा इति फले त्वग्नीषोमाद्यालंभवद्धिंसनत्वात्र निषेधेन स्पृष्टुं शक्यते षोडशिग्रहणादिवत् ग्रहणाग्रहणयोस्तुल्यबलतया विकल्पवत्सामान्यशास्त्रस्य विशेषशास्त्रेण संकोचसंभवात् न चाविधिस्पृष्टे निषेधानवकाश इति न्यायाद्युद्धेन प्रत्यवायजनकं नापि भीष्मद्रोणादिगुरुब्राह्मणादिवधनिमित्तो दोषः तेषामाततायित्वात् तदुक्तं मनुना गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आततायिनमायान्तं हन्यादेवाविचारयन् आततायिनमायान्तमपि वेदान्तगं रणे जिघांसीयादिति जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् नाततायिवधे दोषो हन्तुर्भवति कश्चनेत्यादि वासी सन् इत्यादित्यर्थः नाततायिवधे दोषो हन्तुर्भवति अर्थशास्त्रात्तु बलवन्नन्तु स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरिति याज्ञवल्क्यवचनात् आततायिब्राह्मणवधेऽपि प्रत्यवायोऽस्त्येव ब्राह्मणं न हन्यादिति हि दृष्टप्रयोजनानपेक्षत्वाद्धर्मशास्त्रं जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेदिति ब्राह्मणमालभेत स्वसुखजीवनार्थत्वादर्थशास्त्रं अत्रोच्यते ब्राह्मणो ब्राह्मणमालभेत इत्यत्र दृष्टं निर्वृत्तविधायकमपि धर्मशास्त्रमेव सुखदुःखसमे कृत्वेत्यत्र दृष्टप्रयोजनप्रयोजनानपेक्षत्वस्य वक्तुमाणत्वात् याज्ञवल्क्यवचनं तु दृष्टप्रयोजनेऽदृष्टप्रयोजनाभावे भूम्यादिहरणविषयमित्यदोषः मिताक्षराकारस्यैतद्वर्णं मौर्यसन्निपाते क्षेत्राद्धिरणपतनदेवेति द्वादशवार्षिकप्रायश्चित्तस्यैव तथापरास्तस्यापत्तं वेन विधानात्मिन्नलक्ष्यार्थशास्त्रानुसारेण चतुष्पादव्यवहारे शत्रोरपि जये धर्मशास्त्रातिक्रमो न कर्तव्य इत्येतेन समं वचनमेतत्याह भवत्येवं न नो हानिः चतुष्पाद्व्यवहारेऽयथाप्रतिष्ठितो

त्यादि

पा

ततो लेख्यं यथावेदितमर्थिना समामासतदर्द्धाहोनामजात्यादिचिह्नि
तं कृत्वा स्यात्र ते लेख्यं पूर्ववेदकसन्निधौ ततोर्थी लेखयेत्सद्यः प्रतिज्ञा
तार्थसाधनं तस्मिन्नेवास्ति हिमामोतिविपरीतमथोन्यथाः चतुष्पाद्य
वहारोयं विवादेषूपदर्शितः प्रतिवादिनोग्रे वादिना निवेदितस्यार्थस्य
संवत्सरादिचिह्नं तलेखनं भाषाप्रतिज्ञापत्रं इत्येकःपादः यथा लखवा
शतमयं मे धारयति इति प्रतिज्ञायो नाहं धारयामीत्युल्लेखनं द्विती
यःपादः ततः प्रतिज्ञायोसाध्यं प्रथमवादी लेखयेत् लिखितं साक्षी च म
म वर्तते इति तृतीयःपादः ततो वादुक्तस्य लिखितादिप्रमाणस्य सि
द्धस्तं तयार्थःपादः इति विवादे चतुष्पाद्व्यवहारो यमे शास्त्रे प्रदर्शितः
तदेवं युद्धकरणे सखोक्तेः स्वजनं हि कथं हत्वा सुखिनः स्याम माधवे
त्यर्जुनोक्तमपाकृतं ३२ ॥

ननु भीष्मादिभिः सार्धं गुरुभिर्नो विजानतः स्वधर्मोप्यतिनिंद्यत्वादि

स्वयानंदीटीका

त्याशंक्याह केशवः १ स्वधर्मत्वेति वेत्स्यभीष्मादिप्रतियोगिकं
सोदि साधयते युद्धं प्रतियोगितया चये २ लभंते क्षत्रियास्ते वै भवंति
सुखभागिनः प्रतिबंधं विना स्वर्गहेतुर्युद्धमिदं यतः ३ आततायि
नं भीष्मादीनो वधेन च न दोषोस्ति तदेवोक्तं मनुनाप्यर्मभाषवता ४
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आततायिनमायांतं हन्या
देवाविचारयन् ५ आततायिनमायांतमपि वेदांतपारगं जिघांसंतं
जिघांसीयान्न तेन ब्रह्महा भवेत् ६ नाततायिवधे दोषो हंतुर्भवति क
श्चन गुरुणा ब्राह्मणेनापि वकृतेन महर्षिणा ७ भीष्मस्याप्यभवद्यु
द्धे जामदग्न्येन तेन गुरोः व्रतस्थ वापि शास्त्रेण युद्धं कार्यं न येषाते ८ ३२॥

किंच यदृच्छयाचोपपन्नं

नीलकंठीटीका

यदृच्छया अप्रार्थितमप्युपपन्नमुपस्थितं स्वर्गद्वारं अप्रा
वृतमहाटितं ये क्षत्रिया लभंते ते सुखिनो धन्या भवंतीति संबंधः ३२॥

आनंदी टीका

यदृच्छयायत्नविनोपपन्नम् स्वर्गद्वारमपावृतमुद्घाटितम् सुखिनः भाग्यवन्तः ३२ ॥

रामकेदी टीका

एवं स्वर्गादि अनित्यफलप्राप्तिहेतुःप्रवृत्तिलक्षणधर्मसमाश्रयणेनापि ३२ ॥

ला[illegible] की टीका

~~एवं [illegible]~~ ~~[illegible]~~, यदृच्छयेति; यद्वायएवंविधंयुद्धंलभन्ते तएवसुखिनः भविष्यत्स्वर्गसुखभाजइत्यर्थः ३२ ॥

पंचोलीटीका

स्वधर्मलक्षणेयुद्धकरणेकारणांतरमाह यदृच्छेति हेपार्थ ईदृशंयुद्धंसुखिनःपुण्यवंतःक्षत्रियालभंते कीदृशंअपावृतं स्वर्गद्वारंउद्घाटितकपाटंस्वर्गद्वारमित्यर्थः चपुनःयदृच्छयाउपपन्नंअप्रार्थितमागतं ३२

भगवीरमसिद्धोधिनी॥

नकेवलमयायुद्धंसर्वथाप्रत्याख्यायते न्ययाप्यादावेवोधोगस्यानारंभणीयतैवस्यात् किंत भीष्मद्रोणादिगुरुप्रतियोगिकं नदकीर्तिनिरयगतिनिमित्तत्वादैहिकामुष्मिकोभयप्रत्यवायजनकादतिगर्हितंकथमेवोचितयेनकर्तव्यताविषयःस्यादित्याशंकानेकमपत्नप्राप्योपिमहाश्रेयस्तद्व्यतिरेकेनैवोपगतिकथंउभोयमवान्यथावभासोयमेतबुद्ध्यातउपेक्षसइतिप्रतिपादयन्नाह यदृच्छयेति वोवधारणे यदृच्छाव विनैवप्रार्थनादैववशेनेति यावत् उपपन्नमुपस्थितमीदृशंभीष्मद्रोणादिमहावीरगुरुप्रतियोगिकंयुद्धंसमरकर्म सुखिनःसर्वविद्यतेभाविसेनयेषांतेतादृशाःसर्वप्रकृतयतिविशिष्टप्रकृष्टकुल देवाभ्युदितानां

स्वर्गं सर्वदा रमेचैतत्

किंतुवैपदिष्टविरे[illegible] कस्येत्याह

यदृच्छया प्रार्थितमेवोपनतं आर्यभीदृशं युद्धं सुखिनः सभाग्याएवक्षत्रियालभंते यतो निरावरणं स्वर्गद्वारमेवैतत्

विपरीतेदोषमाह

भाष्यवंतपवनश्चनर्विधिवंचिताः क्षत्रियाः प्राणुद्धननप्रजापा
लनधर्मिणः शुक्रपर्वीणलभंते प्रतियोगितया प्राप्नुवंति यत्तप
नदपाहननमप्रतिबद्धमविलंबेन प्रवेशदायिनं स्वर्गद्वारं स्वर्गद्व
हारमिव प्रवेशप्रसाधनीभूतं नपुनः प्रत्यवायजनकं फलस्य स्वर्ग
स्य प्राद्रवेशमिथोन्योन्यं जिघांसंतो महीक्षितः युध्यमाना परंश
क्त्या स्वर्गं यान्त्यपराङ्मुखा इत्यादिना मन्वादिभिर्विहितत्वात्
निषिद्धफलजनकमेवहिकमतजनकं नवभीष्मद्रोणादिगु
रुब्राह्मणादिवधनिमित्तदोषजनकतया तत्वमत्यवेतिवाच्यं॥
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आततायिनमायांतं हन्या
देवाविचारयन् आततायिनमायांतमपि वेदांतगं रणे जिघां
संतं जिघांसीयान्नतेन ब्रह्महा भवेत् नाततायिवधे दोषो ह
भवति कश्चनेत्यादिना तत्रैव तदभावस्य प्रतिपादनात् नाप्य
त्योर्विरोधेन्यायवत्तु बलवान्व्यवहारतः अर्थशास्त्रात्तु बलवद्धर्म
शास्त्रमिति स्थितिरिति याज्ञवल्क्यस्मृतेर्ब्राह्मणं न हन्यादिति धर्म
शास्त्रमेव विरोधे न पुनर्जिघांसंतमित्यर्थशास्त्रं दृष्टप्रयो
नार्थत्वात्तस्येति प्रत्यवायजनकत्वस्य तादवस्थ्यमिति स्वर्गवदि
समर्थस्य त्वस्य तु पदे वक्ष्यमाणप्रकारेण दृष्टप्रयोजनमात्रं वेदमूल
विहितस्य युद्धस्य विधिविषयतया जिघांसंतमित्यस्य धर्म
मननत्वाव्यभिचारात् अस्यैवेदमस्य युद्धस्य सति जयेऽस्य की
देवहिकस्य पराजये वा स्वर्गादेरामुष्मिकस्य फलस्य सद्भाव
मन्वेकथं दृष्टादृष्टोभयफलं तत्र वर्तते न रोचते इति मा पा
कीर्तिं धर्मं ततः हिंसको भूरिति तात्पर्यं एतेन च स्वजनं हि
दत्वा माधविनः स्याम माधवेत्यत्र नोक्तिनिरस्ता ३२

यदृच्छयेति यदृच्छया प्रार्थितमेवकेनविन्निमित्तेनोपपन्नं च
द्वारस्वर्गीयत्रपापिनः प्रत्यर्थितोवधेभूयान्प्रचारः एवंविधंमार
णं अपाहतैरितं स्वर्गद्वारंस्वर्गफलकमित्यर्थः ४ एवंविधमेतद्युद्ध
नः तत्क्रियास्मदर्पितकायवाङ्केनसोयेतत्क्रियास्तेइहपार्थलभंते
नास्येतस्मात्तवेदृशंयुद्धं स्वल्पफल[illegible]मितिभावः ५ तत्त्विदंफलसा
धनंप्राप्तेवैहिकमामुष्मिकंफलंनेच्छामि नकांक्षेविजयंकृष्णेत्यपि
श्लोकराज्यस्येष्टत्वात् कथंममकर्तव्यमतयोपदिश्यतेइत्या
शंक्याकरणेदोषमाह ३३॥

४ विजयेहरिशिरस्त्वं साम्राज्य
भोगादिफलत्वेनास्येति स
त्रि ऐहिकफलसाधनमित्यर्थः

और जो कहो कि गुरु आदि अनेक प्राणियोंकी हिंसा युद्धमे हो
गी औ शास्त्रमे अहिंसा परम धर्म कहाहै इससे युद्ध कर
ना अति अनुचित है इसपर कहते कि जैसे वेद विहित जो यज्ञ
मे हिंसा सो हिंसा नहीहैं तैसे शास्त्र संमत जो क्षत्रीका परमध
र्म युद्ध तिसमे हिंसा औ पापकी कल्पना वृथा करते हो औ
र परमश्रेय रूप महाफल आपसे आप तुमको उपस्थित क
रे प्राप्त भयाहै इससे अब तुम किस कारण कम्पमान होते हो
यह कहते है कि हे अर्जुन वे मांगे वे यत्न किये आपसे प्राप्त
परम श्रेय करैहै कल्याणका साधन युद्ध जिससे परम कल्याण
सिद्ध होय ऐसा युद्ध अति भाग्यवान क्षत्रीलोग पावते हैं क्योंकि
इससे स्वर्गका द्वार वे रोंक टोंक खुला रहता है अथवा जो इस
प्रकारका युद्ध पावें सोई सुखी हैं इस श्लोकसे प्रथम अध्याका
बत्तीसवां श्लोक कहागया कि किसतरह आत्मीय जनोंको ना
श करि सुखी होयगे इसी बातका भगवानने उत्तर दियाहै ३२॥

दोहा॥

युद्ध पार प्रापत भयो स्वर्ग द्वार अनेयास पार्थ ऐसे युद्ध
को लहैं क्षत्री सुखी हास॥ ३२॥

216

अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ततः स्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि ३३ ॥

शांकरभाष्यं

एवं कर्तव्यताप्राप्तमपि अथेति अथत्वमिमंधर्म्यं धर्मादनपेतं विहितं संग्रामंयुद्धंनकरिष्यसि चेत् ततस्तदकरणात् स्वधर्मं कीर्तिंच महादेवादिसमागमनिमित्तांहित्वा केवलं पापमवाप्स्यसि ३३ ॥

आनंदगिरिकृतटीका

स्वधर्मस्य युद्धस्य अद्ध्याकरणे स्वर्गादिमहाफलप्राप्तिं प्रदर्श्य तदकरणे प्रत्यवायप्राप्तिं प्रदर्शयन्ननंतरश्लोकगतार्थशब्दार्थं कथयति एवमिति विहितत्वे फलवत्त्वमित्यनेन प्रकारेणेत्यर्थः अन्वंश्चेदित्यनूद्यते महादेवादीत्यादिशब्देन महेन्द्रादयो गृह्यंते ३३ ॥

स्वामिकृतटीका

विपक्षेदोषमाह अथचेत्त्वमिति ३३ ॥

पिशाचभाष

कर्तव्यतयाप्राप्तमपि अथेति धर्म्यंधर्मानपेतं ३३ ॥

रामानुजभाष

अथत्वमिदमस्वधर्मभूतमपिसमारब्धंसंग्रामंमोहान्नकरिष्यसिचेत्ततःप्रारब्धस्यस्वधर्मस्याकरणात्स्वधर्मफलंनिरतिशयसुखंविजयेननिरतिशयांकीर्तिंचहित्वापापंनिरतिशयमवाप्स्यसि ३३ ॥

अभिनवगुप्तटीका

भययाचभवान्युद्धान्निवर्त्ततेतदेवशतशाखमुपनिपतिष्यतिभवतइत्याह ३३ ॥

परमार्थप्रपाटीका

अथविपक्षेदोषमाह अथचेदित्यादितःश्लोकचतुष्टयेन अथेत्यनंतरमहंकिमनाकार्यंधर्म्यंधर्मसाधकसंग्रामत्वंनकरिष्यसि तर्हिस्वधर्मंबहिष्कृतोभूत्वा तथाइहलोकश्लाघनीयांकीर्तिंच हित्वापापंपरलोकप्रतिबंधकमेवाप्स्यसि अनेनपापमेवाश्रयेदस्मा नित्युक्तस्यपरिहारः स्वचितः ३३ ॥ ॥

यंप्राप्नोति जीवतो मरणसमयपर्यंतं दुःखं भवति अकीर्त्तेस्तु
मरणानंतरमपि भवतीत्यर्थः ३४ ॥

वनमालीटीका

युद्धाकरणे दोषमाह अथेति प्रारब्धस्यानित्यत्वात्त्यागे पापमवा
प्स्यसीत्यर्थः ३३ ॥

कुसुमवैजयंतीटीका

यस्य गोत्रवधरूपपापस्य भयात्त्वं युद्धं न करोषि तत्पापं त्वद्युद्धा
करणादेव भविष्यतीत्याह अथ चेदिति अथ च त्वं इमं प्रत्यक्षविषयं
धर्म्यं क्षत्रियस्य धर्मरूपं संग्रामं युद्धं चेत् यदि पापभयात् न क
रिष्यसि ततस्तर्हि स्वधर्मं स्वकीयधर्मं अथ स्वर्गप्रापिणीं कीर्त्तिं
च हित्वा परित्यज्य पापं अवाप्स्यसि स्वकीयसनातनयुद्धरूप
धर्माकरणाद् धर्मोल्लंघने निरतिशयं पापं प्राप्स्यसीत्यर्थः ३३ ॥

मधुसूदनीटीका

ननु नाहं युद्धफलकामः न कांक्षे विजयं कृष्ण अपि त्रैलोक्यरा
ज्यस्येत्युक्तत्वात् न कथं मया कर्तव्यमित्याशंक्य अकरणे दोषमाह
अथेति पक्षांतरे इमं भीष्मद्रोणादिवीरपुरुषप्रतियोगिकं धर्म्यं
हिंसादिदोषेणादुष्टमतो धर्मादनपेतं वा स च मनुना दर्शि
तः न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् न कर्णिभिर्नापि दि
ग्धैर्नाग्निज्वलिततेजनैः न च हन्यात्स्थलारूढं न क्लीबं न कृतां
जलिं न मुक्तकेशं नासीनं न तवास्मीतिवादिनं न सुप्तं न विस
न्नाहं न नग्नं न निरायुधं नायुध्यमानं पश्यंतं न परेण समागतं
नायुधव्यसनप्राप्तं नार्त्तं नातिपरिक्षतं न भीतं न परावृत्तं सतां
धर्ममनुस्मरन्निति सतां धर्ममुल्लंघ्य प्रवर्तमानो हि पापीयान्
स्यात् त्वं तु परैराहूतोपि सद्धर्मोपेतमपि संग्रामं युद्धं न करिष्य
सि धर्मतो लोकतो वा भीतः पराहतो भविष्यसि चेत् ततः इति
निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत् इत्यादिशास्त्रतो वि
हितस्य युद्धस्याकरणात् स्वधर्मं हित्वा अनुष्ठाय कीर्त्तिं च महादे
वादिसमागमनिमित्तां हित्वा न निवर्त्तेत संग्रामादिति शास्त्रवि
हितसंग्रामनिवृत्त्या [illegible] चरणजन्यं पापमेव केवलमवाप्स्य

सि नत्वधर्मकीर्तिंत्वमिप्रायः अथवाऽनेकजन्मार्जितंधर्मसत्कारा संहृनि
प्रहतंपापमेवंप्राप्स्यसीत्यर्थः यस्मात्त्वंपराहतत्वमेतेदुष्टाश्चवेष्टिति
अतःपराहतहतः सन्चिरेणार्जितनिजसुकृतपरित्यागे नपरो
पार्जितदुष्कृतमात्रभाग्माभूरित्यभिप्रायः तथाचमनुः यस्तुभी
तःपराहतः संग्रामेहन्यतेपरैः भर्तुर्यद्दुष्कृतंकिंचित्तत्सर्वंप्रति
पद्यते यच्चास्यसुकृतंकिंचिदमुत्रार्थमुपार्जितं भर्तातत्सर्वमाद
त्तेपराहतहतस्येति याज्ञवल्क्योपि राजासुकृतमादत्तेहताना
पार्जितं भर्तातत्सर्वमादत्तेपराहतहतस्येति यानपलायी
राजासुकृतमादत्तेहतानांविपलायिनामिति तेनयदुक्तंपाप
मेवाश्रयेदस्मान्हत्वैतानाततायिनः एतान्नहन्तुमिच्छामिघ्नतो
पिमधुसूदनेतितन्निराकृतंभवति ३३ ॥

सदानंदीटीका

ननुयुद्धफलंनाहमाकांक्षेतेनमयाकथं युद्धंकार्यमित्यत्येवमाशं
क्याहाचद्दूषणं १ यदिधर्म्यमिमंभीष्मद्रोणादिप्रतियोगिकं आ
हतोपिपरैरेवसंग्रामंनकरिष्यसि २ भविष्यसिपराहतोभीतोधर्मा
त्स्वयंतदा बहुजन्मार्जितंधर्मंत्यक्त्वाकीर्तिंचप्राप्स्यसि ३ तनि
वैतनसंग्रामादितिशास्त्रनिषेधतः विहिताचरणत्यागात्वंहिपाप
मवाप्स्यसि ४ यस्मात्त्वंतेनपराहतत्वंहतिंअतएवशत्रवःस्वधर्मत्याग
तत्तस्मात्समात्वंदुष्कृतभाग्भव ५ ३३ ॥

नीलकंठीटीका

युद्धत्यागेइष्टनाशोनिष्टप्राप्तिश्चभवतीत्याह अथचेदिति ३३॥

आनंदी टीका

युद्धस्याकरणे प्रत्यवायं दर्शयति उभयोरेव लोकयोः प्रत्यवाय इत्यर्थः ३३ ॥

रामकंठी टीका

स्पष्टार्थः ३३ ॥ ॥ ॥

लासि की टीका

णे दोषमाह

कीर्तिं महादेवादिसमागमनिमित्तां + तथा च मनुः यस्तु भीतः पराहतः संग्रामाद्धन्यते परैः भर्तुर्यद्दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं भर्ता तत्सर्वमादत्ते पराहतहतस्य तु इति ३३ ॥ ततः स्वधर्मं परित्याग[illegible] +

हित्वा पापमवाप्स्यसि +

पंचोलीटीका

स्वधर्म अकरणे दोषमाह अथ चेदिति हे अर्जुन अथ चेत्त्वं इमं धर्म्यं धर्मादनपेतं संग्रामं युद्धं न करिष्यसि ततः स्वधर्मं क्षत्रियस्य धर्मं च पुनः कीर्तिं महादेवादिसमागमनिमित्तां ख्यातिं हित्वा पापमकीर्तिं च प्राप्स्यसि ३३

महावीरसमिद्बोधिनी॥

नन्वेवमपि न कांक्षे विजयं कृष्ण न च राज्यं सुखानि चेत्यादिना युद्धफलमपाकृत्याख्यातं तत्किमिति तदेवोद्दिश्य भूयोपि मां प्रवर्तयसीत्याशंक्य तदननुष्ठाने दोषमाह अथ चेदिति अथेति पक्षांतरे इममिति भीष्मादिमहावीरपुरुषप्रतियोगिकं धर्म्यमिति नकुरैगाश्रुयेद्दन्याश्रुध्यमानो रणोविस्मृतः नक्लीबमिव नापितं सन्नाभिवादितं न जनैः न च दन्याकुलानाहृफं न क्लीवे न कृतांजलिं न मुक्तकेशं नासीनं न तवास्मीति वादिनं न सुप्तं न विसन्नाहं न नग्नं न निरायुधं नायुध्यमानं पश्यंतं न परेण समागतं नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतं न भीतं न परावृत्तं सतां धर्ममनुस्मरन् इतिमनुप्रोक्तात्स्वधर्मादनपेतं संग्रामं

ष्ठेदं परैराहूतोऽपि मत्तां युद्धेऽपि न करिष्यसि मानुष्यस्यसि तो
कृपधर्माभ्यां भीतः सन्पराहूतो भविष्यसि चेत् ततः निमित्तयपा
मैन्यानिवर्तितधर्मेण पालयेत् इत्यादिना पराशरादिभिः प्राप्त
विहितस्य संग्रामस्याकरणात् स्वधर्मं हित्वा कीर्तिं च महादेवादि
भिः सह संग्रामकरणेनार्जितां महतीं च हित्वा केवलं पापं नाभि
वर्तेत संग्रामादित्यादिना मन्वादिभिर्निषिद्धसंग्रामनिवृत्त्या
चरणजन्यं किल्बिषमेवावाप्स्यसीति भावः अथवा पापं किं ति
यस्त्वभीतः पराहूतः संग्रामे हन्यते परैः भर्तुर्यद्दुष्कृतं किंचि
त्तत्सर्वं प्रतिपद्यते यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं भ
र्तां तत्सर्वमादत्ते पराहृत्य हतस्य तु राजा सुकृतमादत्ते हतानां
विपलायिनामित्यादिना मनुयाज्ञवल्क्यादिभिः प्रतिपादितं भवति
य सुकृतत्यागः एवं पराजितदुष्कृतरूपमित्यर्थः एतदुक्तं भवति
यदि त्वं युद्धात्परावर्तसे तदा त्वमेतैर्वा हनिष्यसि ततश्च भी
जन्मार्जितस्वकीयसुकृतपरित्यागेन परोपार्जितदुष्कृतस्य भि
क्षाभूरिति एतेन च पापमेवाप्स्यसे तस्मात् एतान्न हन्तुमिच्छा
मीत्यादि निराकृतं भवति ३३॥

३३॥ मधुभाष्य

श्चयवेदिति इमम्मिनिगुणानुवादः यर्म्मम्मितिचपापमवाप्स्यसीति
राजासहहनमा[illegible]दत्त इतिगहोस्म जेरित्यर्थः पवमिष्टभ्रंशोनिष्टप्रा
प्तिश्चदर्शिना श्रुतिर्भिष्टैःराएपपिप्रहत्वर्थंदर्शयतिभगवान् श्रकी
र्त्तिंचापीतित्रिभिः [illegible]
[illegible]विषयत्वविरहं [illegible]
[illegible]देहपात्रे निश्चितश्रेयोमिलितमनलसविशेषत्वा
[illegible]विवेकप्रदर्शिताः वेदाविनाशिनं[illegible]नित्यं[illegible]
[illegible]मोहनष्टशोकनिरस्ता[illegible] प्रवर्तनाय[illegible]
[illegible]विशेषमवस्था[illegible]
[illegible]भगवानापेक्ष[illegible]
प्ति ॥ २२ ॥

220

भाषाअनुवाद

और जोयह स्वधर्म्मरूप संग्राम नकरोगे तोकेवल फलप्राप्ति नहोगी यही नहीं है और उलटा प्रत्यवायकहे अधर्मभीहोगा सोईदोष कहतेहैं किजोतुमइस धर्म्म जनक उपस्थित कहे प्राप्तभये युद्धकरनेमेप्रवृत्त न होउगे तोतुम अपना धर्म और कीर्त्तिकेत्याग करनेसे अवश्य पापके भागी होउगे इसमे सन्देह नहीहैं ३३ ॥

दोहा

और तुहं यह धर्म को युद्धको नाहिकरेग तोनिजधर्म कीर्तिकोतजके पापलभेग ३३ ॥

221

अकीर्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययां सम्भावितस्य चाकीर्ति र्मरणादतिरिच्यते ३४

शांकरभाष्य

न केवलं स्वधर्मकीर्तिपरित्यागः अकीर्तिमिति अकीर्तिं चापि युद्धे भूतानि कथयिष्यन्ति ते तवाव्ययां दीर्घकालां धर्मात्मा शूर इत्येवमादिभिर्गुणैः सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते सम्भावितस्य चाकीर्तेर्वरं मरणमित्यर्थः ३४ ॥

आनन्दगिरिकृतटीका

युद्धाकरणे क्षत्रियस्य प्रत्यवायमात्रमधिकमापाद्य शिष्टगर्हालक्षणं दीर्घकालभाविनमैहिकमपि प्रत्यवायं प्रतिलम्भयति न केवलमिति युद्धे स्वमरणसन्देहात्तत्परिहारार्थमकीर्तिरपि सोढव्या स्वात्मसंरक्षणस्य श्रेयस्करत्वादित्याशंक्याह धर्मात्मेति मान्यानामकीर्त्तिर्भवति मरणादपि दुःसहेति तात्पर्यार्थमाह सम्भावितस्येति ३४ ॥

स्वामिकृतटीका

किं चाकीर्तिमिति अव्ययां शाश्वतीं संभावितस्य बहुमानितस्याकीर्तिर्मरणादतिरिच्यते अधिका भवति ३४ ॥

पिशाचभाष्य

न केवलं स्वधर्मकीर्तिपरित्यागः संभावितस्य धर्मात्मा शूर इत्यादिगुणैः संभावितस्याकीर्तेर्वरं मरणमित्यर्थः ३४ ॥

रामानुजभाष्य

न केवलं निरतिशयसुखकीर्तिहानिमात्रं पार्थो युद्धे प्रारब्धे पलायनत इत्यव्ययां सर्वदेशकालव्यापिनीमकीर्तिं च समर्थोऽयं समर्था निसर्वाणि भूतानि कथयिष्यन्ति ततः किमिति चेत् शौर्यवीर्यपराक्रमादिभिः सर्वसंभावितस्य तद्विपर्ययाज्जाता ह्यकीर्त्तिर्मरणादतिरिच्यते एवंविधायामकीर्त्तेर्मरणमेव श्रेय इत्यर्थः ३४ ॥

गी॰ टी॰ द्वि॰

अभिनवगुप्तटीका नास्ति ३४॥

परमार्थप्रपाटीका

किंच अकीर्तिमिति भूतानि लोकास्ते अव्ययामाकल्पस्थायिनीमकी
र्तिमपयशः कथयिष्यंति यतो यादृशानादस्य अकीर्तेर्यं नास्ति संभा
वितस्य ख्यातस्य पुरुषस्य अकीर्तिर्मरणादपि अतिरिच्यते अतिशयेन अ
भोति जीवतो मरणसमयपर्यंतं दुःखं भवति अकीर्तेस्तु मरणानंतरमपि भवती
त्यर्थः॥ ३४

वनमालीटीका

एवं कीर्तिधर्मयोरिष्टयोरप्राप्तिरनिष्टस्य च पापस्य प्राप्तिश्चेह परित्या
गे दर्शिता तत्र पापाख्यमनिष्टमव्यवधानेफलदमामुष्मिकत्वात् शिष्ट
निंदारूपमनिष्टमासन्नफलमपि सह्यमित्याह अकीर्तिमिति भूता
नि देवर्षिमनुष्यादीनि ते च अव्ययां दीर्घकालीनां धर्मात्मायं न सूरो
यमित्येवं रूपां कथयिष्यंति संकथाप्रसंगे न च युद्धे स्वमरणसंदेहात
न्परिहारार्थमकीर्तिः सोढव्या आत्मरक्षणस्यापेक्षितत्वात् उक्तं च
शांतिपर्वणि सम्यग्दानेन भेदेन समस्तैरुत वा पृथक् विजेतुं प्रयते
तारीन्न युद्धेन कदाचन अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः
पराजयश्च संग्रामे तस्माद्युद्धं विवर्जयेत् त्रयाणामप्युपायानां पूर्वोक्ता
नामसंभवे तथा युध्येत संपन्नो विजयेत रिपून्यथेति तत्राह संभावित
स्येति अनन्यलभ्यगुणस्य पुरुषस्याकीर्तिर्मरणादधिका भवति ३४॥

उत्तमवैजयंतीटीका

किंच न केवलं स्वधर्मकीर्त्योः परित्यागात् पापमेव भवेत् संसारेऽकी
र्तिरपि भविष्यति सा च श्रेष्ठस्य मरणादप्यधिकतरा भवतीत्याह अकी
र्तिमिति तेन तव अव्ययां चिरकालस्थायिनीं अकीर्तिं युद्धेनेन महांतमार्गं
कृत्वा किंचिदपि पुरुषार्थेन कृतो न धर्मवान् यत्नोऽनेन दत्तियधर्म
स्य करः इत्येवं भूतां अकीर्तिं अपशो भूतानि सुरासुरनरादीनि कथयिष्यं
ति अवदिष्यंति न च मरणभयादहं कीर्त्यादिकं सर्वं त्यजामीति वे
त्याह संभावितस्य शत्रुमित्रोदासीनानां सर्वेषां मध्ये प्रतिष्ठितस्य लो
कत्रयविजयसामग्रीसंपन्नस्य तव अकीर्तिः निंदात्मिकाजनवाणीम
रणात् प्राणत्यागात् न अतिरिच्यते अधिकतरा भवति शरीरत्यागादनंतर

मपिद्यामादिकृतप्रबंधयुद्धाख्यपरिमितमयुगपर्य्यंतस्थास्यतीतिभावः ३३॥

मधुसूदनीटीका

एवंकीर्तिधर्मयोरिष्टयोरप्राप्तिरनिष्टस्यचपापस्यप्राप्तिर्युद्धपरित्यागे
दर्शिता तत्रपापाख्यमनिष्टमव्यवधानेनदुःखफलदमामुष्मिकत्वात्
शिष्टगर्हालक्षणंत्वनिष्टमासन्नफलदमन्यदप्यस्तीत्याह भूतानिदे
वर्षिमनुष्यादीनितेतवअव्ययांदीर्घकालामकीर्तिंनधर्मात्मायंनशू
रोयमित्येवंरूपांकथयिष्यंत्यन्योन्यंकथाप्रसंगेअत्रचापीतिपाठेकी
र्तिधर्मनाशसमुच्चयार्थौनकेवलंकीर्तिधर्मौहित्वापापंप्राप्स्यसि अ
पित्वकीर्तिंचप्राप्स्यसिनकेवलंत्वमेवतांप्राप्स्यसि अपितुभूतान्यपि
कथयिष्यंतीतिवानिपातयोरर्थः ननुयुद्धेस्वमरणसंदेहात्तत्परि
हारार्थमकीर्तिरपिसोढव्याआत्मरक्षणस्यात्यंतापेक्षितत्वात् त
थाचोक्तंशांतिपर्वणि साम्नादानेनभेदेनसमस्तैरुतवापृथक् विजेतुं
प्रयतेतारीन्नयुद्धेनकदाचन अनित्योविजयोयस्माद्दृश्यतेयुध्यमा
नयोः पराजयश्चसंग्रामेतस्माद्युद्धंविवर्जयेत् त्रयाणामप्युपायानां
पूर्वोक्तानामसंभवे तथायुध्येतसंपन्नोविजयेतरिपून्यथेति एवमे
वमनुनाप्युक्तं तथाच मरणभीतस्यकिमकीर्तिदुःखमितिशंका
मपनुदति संभावितस्यधर्मात्माशूरइत्येवमादिभिरनन्यलभ्यैर्गुणैर्ब
हुमतस्यजनस्याकीर्तिर्मरणादप्यतिरिच्यते अधिकाभवतिचाहीतो
एवंयस्मात्अतःकीर्तेर्मरणमेववरंसूततत्वात् त्वमप्यतिसंभावितो
सिमहादेवादिसमागमेन अतोनाकीर्तिदुःखंसोढुंशक्तोसीतिभि
प्रायः उदाहृतवचनंत्वर्थशास्त्रत्वान्ननिवर्तेतसंग्रामादित्यादिधर्मशा
स्त्रदुर्बलमितिभावः ३४॥

सदानंदीटीका

एवंयुद्धपरित्यागाद्धर्मत्यागस्तन्निंदा उक्तेदानीमतोनिंदाफलंदुः
सहमुच्यते १ देवर्ष्यादीनिभूतानिदीर्घकालामनर्थदां नधर्मात्मा
नशूरोयमित्येवंहिपरस्परं २ अकीर्तिंकथयिष्यंतिगुणैःसंभावि
तस्यते ननुस्वमृत्युसंदेहाद्रणेनहर्जनायच ३ अकीर्तिरपिसोढव्या
प्रियाःप्राणाहिदेहिनः तथाचमृत्युभीतस्यकिमकीर्त्येतिचेद्गुण ४
धर्मात्माशूरइत्येवमादिभिःप्रवरैर्गुणैः लोकबहुमतस्यास्याप्यकाकी

र्त्तिर्मरिनेरपि ५ महादेवादिसंग्रामेत्वंचसंभाविनोयतः अतोप्यकी
र्त्तिजेदुःखंजातमोदुंनशक्तोमि ८ ३४ ॥

नीलकंठीटीका

अव्ययांदीर्घेकालां ३४ ॥

आनंदी टीका

अव्ययामनवच्छिन्नांदीर्घकालाम् संभावितस्यशौर्यादिगु॰
णवत्वेनोत्भावितस्याकीर्तेर्मरणंवरमित्यर्थः ३४

रामकंठी टी॰

स्पष्टार्थः ३४ ॥

लालकी टीका

ननुमरणादकीर्तिरेववरंनेत्याह ~~संभावितस्येति~~ धर्मात्मा
शूरइत्यादिगुणैः संभावितस्यबहुमानितस्या अकीर्तिर्मरणा
दतिरिच्यते अधिका भवति ३४

पंचोलीटीका

नकेवलंप्रत्यवायएवभवेत् अकीर्तिरपिस्यादित्याह अकीर्तिंचा
पीतिचअपरंभूतान्यपितेतवअव्ययांदीर्घकालांअकीर्तिंकथयि ९
ष्यंतिचपुनःसंभावितस्यधर्मात्मा शूर इत्यस्यमरणात्अतिरिच्यते अ
धिकाभवति ३४

नपरंस्वधर्मपरि
त्यागएवभवतन्
अकीर्त्या आत्म ५
नो कल्यान्तस्था
यिनी भूतानि प्र
णेतो देवादयः

रणवीरसमिद्बोधिनी॥

अस्यं च कीर्तिधर्मयोरिष्टयोर्निवृत्तिरनिष्टस्यच पापस्यापत्तिर्दु॰
ष्कृतकरणफलंदर्शितं पुनरप्यनिष्टांतरमन्यमस्य दर्शयति अकी
र्तिमिति नकेवलंकीर्तिधर्मौपरिहायपापमेवावाप्स्यसि किंत
कीर्तिंनायंधर्मात्मानायंशूरइत्यादिरूपांगर्हणीयांवापिप्राप्स्यसि
किंपुनर्भूतानि देवासुरमनुष्यादीनिवापि तेतव तामव्यया
माकल्पस्थायिनींकथयिष्यंतिवदिष्यंति ननुसान्नाशनेनमे
देनसमस्तैरथवापृथक् विजेतुंप्रयतेतारीन्नयुद्धेनकदाचन
अनित्योविजयोयस्मात् दृश्यतेयुद्ध्यमानयोः पराजयश्चसंग्रामे
तस्मात्युद्धंविवर्जयेत् त्रयाणामप्युपायानांपूर्वोक्तानामसंभ
वे तथायुद्धेनसंपन्नोविजयेतरिपून्यथेत्यादिप्राणत्यागुदेव
मरणस्य संदिग्धत्वादात्मनश्चात्यंतरक्षणीयत्वादकीर्तिरपि

सोढव्येति मरणभीतस्य कियदकीर्तिदुःखमित्यत आह संभा
वितस्येत्यादि संभावितस्य धर्मात्मा शूरोऽयमित्येवं बहुमानितस्य
जनस्याकीर्तिर्मरणादप्यतिरिच्यतेऽधिकी भवति अकीर्तेः स
काशात्तन्मरणमेव वरमिति धर्मानुपालनस्मात्स्वजननिवर्तितसं
ग्रामादिमादिरूपादर्थपालनात्॥ साम्राज्यानेनेत्यादिरूपस्य दौर्ब
ल्यं प्रथर्यपालनात्तवबलवद्धर्मपालनमिति स्थितिरिति यावत्तवबल्वा
स्तते रितिभावः ३४॥

मधुभाष्य

३४॥

भाषाअनुवाद

और जो कहोकि स्वधर्म्म औ कीर्त्तिजाय हम हिंसानकरैंगे तो युद्धनकरने सेकेवल स्वधर्म्म औ कीर्त्तिहीका त्याग नहीहै और भीहै सोकहतेहैंकि युद्ध छोड़नेसेलोग तमारा अयश कहैंगे औ निन्दा करैंगे और वह अयश चिरकाल कहे बहुतदिनों तक संसारमे रहैगा औरउत्तम क्षत्रियोंके बीच युद्धकरनेमे प्रसिद्ध वीरहौ देखोजो जिस बातमे ख्यातकहे नामीहैं औलोक उसको प्रतिष्ठित बड़ाकरि जानतेहैं तोफेरिउसका उसी बातमे अयशयह मरनेसेभी अधिकहैं औरसबपाप औदोषोंकादाताहै इसको अच्छी तरह विचारकर देखो ३४ ॥

दोहा

निंदतेरी अखंड जन करहेनाहि संदेह अपयशमानी पुरुषको मृत्यु अधिक कसोपद ३७ ॥

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं ३५ ॥

शांकरभाष्य

किं च भयादिति भयात् कर्णादिभ्यो रणात् युद्धादुपरतं निवृत्तं मंस्यन्ते चिन्तयिष्यन्ति न कृपयेति त्वां महारथा दुर्योधनप्रभृतयः के मंस्यन्ते इत्याह येषां च त्वं दुर्योधनादीनां बहुमतो बहुभिर्गुणैर्युक्त इत्येवं बहुमतो भूत्वा पुनस्त्वं यास्यसि लाघवं लघुभावं ३५॥

आनन्दगिरिकृतटीका

इतश्च त्वया युद्धं कर्तव्यमित्याह किं चेति प्राणिषु कृपया नाहं युद्धं करिष्यामीत्याशंक्याह भयादिति महारथानेव विशिनष्टि येषां चेति दुर्योधनादिभिस्त्वोपहास्यतानिरसनार्थं संग्रामे प्रवृत्तिरवश्यंभाविनीत्यर्थः ३५ ॥

स्वामिकृतटीका

किं च भयादिति येषां बहुगुणत्वेन त्वं पूर्वं संमतो भूः त एव भयेन संग्रामात्त्वां निवृत्तं मन्येरन् ततश्च पूर्वं बहुमतो भूत्वा लाघवं यास्यसि ३५ ॥

पिशाचभाष्य

भयात्कर्णादिभिः रणाद्युद्धादुपरतं निवृत्तं के मंस्यन्ते चिंतयिष्यंति न कृपयेति त्वां महारथाः दुर्योधनप्रभृतयः के मंस्यन्त इत्यत्राह येषां च दुर्योधनादीनां त्वं बहुमतः भूत्वा पुनर्यास्यसि लाघवं लघुभावं ते मंस्यन्ते ३५ ॥

रामानुजभाष्य

बंधुस्नेहात्कारुण्याच्च निवृत्तस्य पुरुषस्य ममाकीर्त्तिः कथमागमिष्यतीत्यत आह येषां कलहकर्तृदुर्योधनादीनां महारथानामितः पूर्वं त्वं शूरो वैरीति बहुमतो भूत्वा इदानीं युद्धे समुपस्थिते निवृत्तव्यापारतया लाघवं संग्रहनं यास्यसि ते महारथास्त्वां भयाद्युद्धादुपरतं मंस्यन्ते शूराणां हि वैरिणां शत्रुभयादृते बंधुस्नेहादिना युद्धादुपरतिर्नोपपद्यते ३५ ॥

[नास्ति] उपक्रम ३५ ॥

अभिनवगुप्तटीका

परमार्थप्रपाटीका

अथ संभावितत्वमेवाह भयादिति ते महारथास्त्वां भयान्निमित्तभूताद्रणात्त्वं णामादुपरतं पराहतं मंस्यन्ते मन्येरन् न त्वसत्कृपयेति ते के येषां वीरा

गी.
टी.
द्वि

226

ण्णां त्वं बहुर्यथा भवति तथा मतः सन् मतो भूत्वा लाघवं लघुत्वं यास्य-
सि प्राप्स्यसि ३५ ॥

वनमालीटीका

ननु मत्प्रभावमजानन्तो मां निंदंतु भीष्मादयो ज्ञातमत्प्रभावाः करुणया
निवृत्तो युद्धादनिंद्यमिति स्तोष्यंतीत्यत आह भयादिति कर्णादिभ्यो भ-
यान्निवृत्तो न कृपयेति त्वां मंस्यंते भीष्मदुर्योधनादयो महारथाः कथमत
आह येषामेव भीष्मादीनां त्वं बहुमतो बहुभिर्गुणैर्युक्तोयमित्येवं मतः
न एव त्वां भयाद्रणादुपरतं मंस्यंते मतो भूत्वा युद्धादुपरत इति शेषः ला-
घवं मनादरविषयत्वं यास्यसि सर्वेषामिति शेषः येषामेव त्वं प्राग्बहु-
मतो भूत्वा तेषामेव न्यूनादृशो भूत्वा लाघवं यास्यसीति वा ३५ ॥

ऊममवैजयंतीटीका

ननु एवं युद्धपरित्यागधर्मे भयाद्युद्धादुपरतस्य मम मा कीर्तिर्मा धार्मिकाः क-
रोतु दुर्योधनादयः कथयिष्यंतिचेत्कथयंतु अथ मे ज्ञा भीष्मादयस्तु मम मज्ञा
यामेव करिष्यंति न त्वकीर्तिमिति चेन्नत्राह भयाद्रणादिति महारथश-
ब्दः इतरथादीनामुपलक्षणं महारथाः भीष्माचार्यादयोपि भयात् भूर-
मर्जुनमेव वधिष्यामि ननु युधिष्ठिरादीनित्येवंरूपां कर्णप्रतिज्ञां ज्ञात्वा
मरणभयान्नृतपापभयाद्वा स्वेरकारुण्याद्वा रणात् संग्रामात् उपरतं
निवृत्तं त्वां मंस्यंते ज्ञास्यंति तेषां मध्ये जयविजयकरो ऽयमस्माग्रे कोपि
स्यास्यतीति वरं तौ विग्रहाग्रहवतो सुराणां भीष्मादीनां मध्ये बहुमतः ब-
हुभिः शौर्यवीर्यधैर्यादिगुणगणैः मतः माननीयो भूत्वा भूयस्तु पुन-
रपि त्वं लाघवं नत्वं यास्यसि प्राप्स्यसि ३५ ॥

मधुसूदनीटीका

ननूदासीनाजनना मां निंदंतु नाम भीष्मद्रोणादयस्तु महारथाः कारुणि-
कत्वेन स्तोष्यंति मामित्यत आह कर्णादिभ्यो भयात् युद्धान्निवृत्तं न क-
पयेति त्वां मंस्यंते भीष्मद्रोणदुर्योधनादयो महारथाः ननु ते मां बहुम-
न्यमानाः कथं भीतं मंस्यंते इत्यत आह येषामेव भीष्मादीनां त्वं बहुमतो
बहुभिर्गुणैर्युक्तोयमर्जुनः इत्येवं मतः न एव त्वां महारथा भयादुपरतं
मंस्यंते इत्यन्वयः मतो भूत्वा युद्धादुपरत इति शेषः लाघवमनादरवि-
षयत्वं यास्यसि प्राप्स्यसि सर्वेषामिति शेषः येषामेव त्वं प्राग्बहुमतोभूः तेषामे

वतोदृष्टोभूत्वालाघवंयास्यसीतिवा ३५ ॥

सदानंदीटीका

ननुनिंदेतुमांलोकाउदासीनाःपृथग्जनाः भीष्मद्रोणादयस्तत्रास्तोषं
सेवेतिचेन्नुण १ शल्यकर्णादिसर्वेभ्योभयाद्युद्धात्पराङ्मुखं मंस्यंतेत्वा
नकेवयाभीष्मद्रोणादयोपिते २ बहुमन्यंतयतेमांजिष्णुभीष्मादयोव
ते कथंभीतंहिमंस्यंतेइत्याशंक्याहकेशवः ३ येषांत्वंभीष्ममुख्यानां
गौरवाधनर्मेमतः अभूस्तेषांपराहृतोलघुतामेवयास्यसि ४ ३५ ॥

नीलकंठीटीका

अकीर्तिमेवाह भयादिति त्वंबहुमतोभूत्वास्वतएवश्रुतिस्ताव्यह
नःमनलाववंलघुभाव [illegible] कातर्यात्वंयेषांपुरतोयास्यसितेमहार
थास्त्वां भयाद्रणादुपरतंमंस्यंतइतियोजना ३५ ॥

ज्ञानेदी टीका

स्पष्टम् ३५ ॥

रामकंठी टीका

स्पष्टार्थः ३५ ॥

लासिकी टीका

नन्वन्ये जना मां निंदन्तु महारथास्तु कर्मणि कातरमालक्ष्य लोकाः प्रातु माम् इत्यत आह भयादिति भूत्वा एव भयेन संग्रामात्त्वां निहंतुं मन्येरन् न तु कृपया ततः पूर्वं बहुमतो भूत्वा लाघवं यास्यसि ३५

येषां भीष्मादीनां बहुगुणत्वेन पूर्वं संभूतो

पंचोलीटीका

तदेव विवृणोति भयादिति त्वं महारथाः दुर्योधनकर्णादयः त्वां रणात् उपरतं निवृत्तं मंस्यन्ते चिंतयिष्यंति च पुनः येषां दुर्योधनादीनां बहुमतो भूत्वा बहुभिर्गुणैर्युक्त इत्येवं मतो भूत्वा लाघवं यास्यसि प्राप्स्यसि ३५

रणवीरसमिद्धोधिनी ॥

ननु निंदंतु नाम प्राकृता जना महारथास्तु मां वंदेयुरेवेत्यत आह भयादिति महारथा भीष्मद्रोणादयस्त्वां कर्णादिभ्यो भयाद्धेतो रणादुपरतं पराङ्मुखं मंस्यंते किं हे शूरा महारथाः पराङ्मुखं मंस्यंते नेत्याह येषामिति येषां महारथानां भीष्मादीनां त्वं बहुमतोसि तेपि न पुनरद्य तिरस्कार एवेत्यर्थः एवंवा पूर्वं त्वं बहुमतो भूत्वा लाघवं प्राप्स्यसि ३५

मधुभाष्य

३५ ॥

भाषाअनुवाद

भगवान कहतेहैंकि अर्जुन तुमको अवश्यहि करना ही उचितहैं क्यों कि तुमतो यह जानतेहो कि प्राणियोंके उपर कृपाकरि हम संग्राम कोछोड़तेपर महारथी वीर तुमको भयसे युद्ध विमुख जानैंगे जो तुमको सर्वकहि पहिले सकलगुणसंपन्न करेयुक्त जानतेथेवेलोग अब तुमको कर्ण आदिक योद्धोकें भयसे युद्ध विमुख मानैंगे देखो जिन दुर्योधन आदिकों कीतुम बहुत मत करे मान रहे उनके निकट अब तुमकेसे लघुकहेहलके होउगे तो इस हंसीके डरसे युद्ध करना अवश्यहैं ३५॥

दोहा॥

रण विमुख भयो त्रासतें महारथी मानहितोहि जिनमहिं तें बहुमानीयं तिनमे लघुता होहि ३५॥

अवाच्यवादांश्च बहून्वदिष्यंति तवाहिताः निंद
न्तस्तव सामर्थ्यं ततो दुःखतरं नु किं ३६ ॥

शांकरभाष्य

किंच अवाच्यवादानिति अवाच्यवादान् अवक्तव्यवादान् च बहून
नेकप्रकारान् वदिष्यन्ति तवाहिताः शत्रवः निन्दन्तः कुत्सयंतस्त
व त्वदीयं सामर्थ्यं निमित्तकवचादियुद्धनिमित्तं तस्मात्ततो निन्दा
प्राप्तेर्दुःखात् दुःखतरं नु किं ततः कष्टतरं दुःखं नास्तीत्यर्थः ३६ ॥

आनन्दगिरिकृतटीका

इतश्चत्वं युद्धाद्‌परमे माकार्षीरित्याह किंचेति ननु भीष्मद्रोणादिव
धप्रयुक्तं कष्टतरं दुःखमसहमानो युद्धान्निवृत्तः स्वसामर्थ्यनिन्दादि
प्राप्तकृतं सोढुं शक्ष्यामीत्याशंक्याह तत इति ३६ ॥

स्वामिकृतटीका

किंचअवाच्येति अवाच्यावादानवचनानर्हान्शब्दान्तवाहितास्त्वच्छत्र
वोवदिष्यंति ३६ ॥

पिशाचभाष्य

किंच अवाच्यवादानवक्तव्यवादांश्चबहूननेकप्रकारान्वदिष्यंतितवा
हिताः शत्रवः निंदंतः कुत्सयंतः तवसामर्थ्यं निवातकवचादिजयसाम
र्थ्यमिति ततः तस्मान्निंदाप्राप्तात्दुःखतरं नु किं ततः कष्टतरं नास्ती
त्यर्थः ३६ ॥

रामानुजभाष्य

किंच त्वत्शूराणामस्माकं सन्निधौ कथमयं पार्थः स्यात् शंक्यादस्मत्सन्नि
धानादन्यत्रास्य सामर्थ्यमिति तव सामर्थ्यं निंदंतः शूराणामग्रे अवाच्य
वादांश्च बहून्वदिष्यंति तव शत्रवो धार्तराष्ट्राः ततोऽधिकतरं दुःखं किं तव
एवं वदावाच्यश्रवणात्मरणमेव श्रेय इति त्वमेव मन्यसे ३६ ॥

अभिनवगुप्तटीका नास्ति उपक्रमे ३६ ॥

परमार्थप्रपाटीका

किंच अवाच्यवादानिति तवाहिताः सिद्धवैविरोधादयो दोः अवाच्यान्व
क्तुमहीन्वादानपवादान्वदिष्यंति किंभूताः तव सामर्थ्यं निंदंतस्ततोऽपि दुःख
तरं किंच ३६ ॥

गी॰
टी॰
हि

२३०

वनमालीटीका

ननु दुर्योधनादयो मां मोक्ष्यन्ते युद्धान्निवृत्ते त्वद्दिष्टत्वादत आह अवाच्ये
ति अहिताः शत्रवो दुर्योधनादयस्तव सामर्थ्यं निंदंतः बहूनवाच्यावा
न्वक्तुमयोग्यान्शब्दान्वदिष्यंति ततः शत्रुनिंदाजन्यदुःखादधिकं दुः
खं किं न किमपीत्यर्थः ३६ ॥

ऊस्मवैजयंतीटीका

न केवलं युद्धाकरणात्त्वं लाघवं यास्यसि अपि तु शत्रुभिर्गीयमानं निजा
६ सामर्थ्यं शृण्वन्महद्दुःखमपि प्राप्स्यसीत्याह अवाच्येति न बलिवातक
वादिवयेन न सहायरूपेण बाणरावणादिहेना खंडलोभिमातम
गकरं चैवमादिसुरासुरादिलोकत्रयप्रसिद्धं सामर्थ्यं निंदंतः विश
टांतः पुंडरीकपवित्रता जनाग्रे गीतवाघतत्यादिश्लेषवायेसरः पुंडरीक
स्तावविधावेत्वं वीराणामस्माकमग्रे स्थातुमपि नाशक्रोदिति बहुलिं
दोङ्गर्वे तस्य त्वत्तवाहितास्तव शत्रवो दुर्योधनकर्णशकुन्यादयो बह ६
ननेकान् अवाच्यवादान् क्लीबकातरादिरूपान्वदिष्यन्ति यस्मादंस्य
राणमध्ये कथयिष्यन्ति ततस्तस्माद्दुःखतरं दुःखातिशयेन दुःखिवि
तर्कं किमस्ति न किमप्यस्तीत्यर्थः ३६ ॥

मधुसूदनीटीका

ननु भीष्मादयो महारथास्त्वां भयादुपरतं मंस्यंते दुर्योधनादयस्तु शत्रवो बहु
मंस्यंते मा युद्धनिवृत्तात्तु [illegible] पकारित्वादि न॰
त्यत आह तवासाधारणं यत्सामर्थ्यं लोकप्रसिद्धं तन्निंदंतस्तव शत्रवो दु नू॰
र्योधनादयोऽवाच्यान्वादान् वचनानर्हान् शंढतिलादिरूपान् शब्दान्बहु
ननेकप्रकारान्वदिष्यन्ति ननु बहुमंस्यंते इत्यभिप्रायः अ
वाच्यानवसामर्थ्यस्य निंदायोग्यत्वेन वनिंदंतोऽहिताश्चावाच्यवादान्वदिष्य
न्तीत्यन्वयः ननु भीष्मद्रोणादिवधप्रयुक्तं कष्टतरं दुःखमसह्यमातो युद्धा
न्निवृत्तः शत्रुकृतेन सामर्थ्यनिंदनादिदुःखं सोढुं शक्नोमीत्यत आह ततः
तस्मान्निंदाप्राप्तिदुःखात्किं नु दुःखतरं ततोऽधिकं किमपि दुःखं नास्ती
त्यर्थः ३६ ॥

सदानंदटीका

ननु भीष्मादयः सर्वे मामन्यंतां गुणोर्युक्तं शत्रवो बहुमंस्यंते मां तु

यीयनादयः १ यतोयुद्धनिवृत्तस्यैवं प्राणरक्षेतिचेत्तत्रा नवलोकप्र
सिद्धयन्सामार्थ्यं शत्रवस्तव २ निंदंतस्तेवदिष्यंतिवहून् शत्रवस्त्वनिंदि
तान् यतेषांटत्निलापवमादीन्वक्तुमयोग्यकान् ३ किंतेनततोधिकंदुः
खमिहलोकेपरत्रवा ४ ३६ ॥

नीलकंठीटीका

किंच अवाच्यवादान्वक्तुमयोग्यान् शत्रुक्ष्ठतिलोर्जुनइत्यादीन् सा
मर्थ्यं निंदंतः धिगस्यशौर्यंयो भीष्मादिभयात्पलायितइति इदं
वचनं मरणादप्यधिकंदुःखं इतोन्यद्दुःखंतरमधिकंदुःखंकिं
नकिमपीत्यर्थः ३६ ॥

आनंदी टीका

वाकिमितिवितर्के अतो नान्यद्दुःखमित्यर्थः ३६ ॥

रामकंठी टीका

सुगमोर्थः ३६ +वध

लासिकी ~~[illegible]~~ टीका

नतु भीष्मादयो न बहु मन्यन्ते दुर्योधनादयः शत्रवो वा इति निंद
हस्या तदुपकारित्वाद्बहुमन्यन्ते इत्यत आह अवाच्येति निंदा
या दुःखतरं दुःखं नास्त्येवेत्यर्थः "नतु भीष्मादिदुःखान्निंदा
दुःखे सौख्यं शकामित्यत आह ततो दुःखतरमिति ततो" ॥३६॥

शत्रवो दुर्योधनादय स्तव सामर्थ्यं निंदंतो बहुवचनानर्हान् हूनपपूहान्वदिष्यंति

पंचोलीटीका

तव अपरं तव अहिताः तव अरयः बहून् अनेकप्रकारान् अवाच्यवा
दान् अवक्तव्यवादान् वदिष्यंति किं कुर्वंतः तव सामर्थ्यं निंदंतः ऊ
तस्य ततः ततो निंदाप्राप्तदुःखात् दुःखतरं इति प्रश्ने किं अन्यत् दुःखतरं द
६

रसावीरसप्रबोधिनी॥

किंच अवाच्येति तवासाधारणं सामर्थ्यं स्तुतियोग्यं निंदंत
स्तवाहिता दुर्योधनादयो बहूननेकविधानवाच्यवादान्व
चनानर्हान् षंढतिलादिरूपानपवादान्वदिष्यंति ततस्त
स्मादपरं किं नु दुःखतरं ततोधिकं किमपि दुःखं नास्तीति भा
वः ३६॥

मधुभाष्य

३६॥

भाषाअनुवाद

इससे अब तुम युद्धसे निवृत्त न होउ जो कहीकि भीष्मतथा द्रोण आदिका वधवडा कष्ट है तो देखो तुमारे शत्रुगण तुमारी सामर्थ्य को निन्दा करते हुये तुमारे प्रति अनेक अनेक अयोग्य बहुत वचन कहेंगे तो इससे और दुःखकौन है यह कष्टसे भी महाकष्ट है ३६ ॥

दोहा

कहिन योग्य नवाद बहु कथहिंगे तव वैरि ताते को दुःख अधिक है पौरुष निंदत तेरि ३६॥

232

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं तस्मा
दुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ३७ ॥

शांकरभाष्य

युद्धे पुनः क्रियमाणे कर्णादिभिः किं हतो वेति हतो वा प्राप्स्यसि स्व
र्गं हतः सन् स्वर्गं प्राप्स्यसि जित्वा कर्णादीन् शूरान् भोक्ष्यसे म
हीं उभयथापि तव लाभ एवेत्यभिप्रायः यत एवं तस्मादुत्ति
ष्ठ कौन्तेय युद्धाय कृतनिश्चयः जेष्यामि शत्रून् मरिष्यामि वे
ति निश्चयं कृत्वेत्यर्थः ३७ ॥

आनन्दगिरिकृतटीका

नहि युद्धे गर्वादि वयं वशान्मथ्यस्या निन्दा ततो निहन्तौ शत्रूनिदे
मुभयतः पाशरज्जुरित्याशंक्याह युद्धे पुनरिति जये पराजये च
लाभ ध्रौव्याद्युद्धार्थमुत्थानमावश्यकमित्याह तस्मादिति नहि प
रिशुद्धकुलस्य युद्धायोद्युक्तस्य तस्मादुपरमः साधीयानित्याह कौ
न्तेयेति जये पराजये चेत्येतदुभयथेत्युच्यते जयादिनियमाभावेपि
लाभनियमे फलितमाह यत इति कृतनिश्चयत्वमेव विशदय
ति जेष्यामीति ३७ ॥

स्वामिकृतटीका

यच्चोक्तं न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुरिति
तत्राह हतो वेति पक्षद्वयेपि तव लाभ एवेत्यर्थः ३७ ॥

पिशाचभाष्य

युद्धे पुनः कर्णादिभिः क्रियमाणे हतो वेति जित्वा जयं प्राप्य वा भोक्ष्यसे
महीं पृथ्वीं उभयथापि ते लाभ इत्यभिप्रायः यत एवं तस्मादुत्तिष्ठ कौन्तेय
कृतनिश्चयः जेष्यामि परान् मरिष्यामि निश्चयं कृत्वेत्यर्थः ३७ ॥

वेति

रामानुजभाष्य

...मपि श्रेयो भव
त्यतः स्वरेण त्वमनापरेषां हननमात्मनो वा परैर्हननमुभयमपि श्रेयो भव
तीत्याह धर्म्ये युद्धे परैर्हतश्चेत्तत एव परमं निःश्रेयसं प्राप्स्यसि परान्वा हत्वा
विदितं राज्यं भोक्ष्यसे धर्मस्य परमनिःश्रेयस... युद्धाख्यस्य धर्मस्य परमुराम
सोपायत्वात्त्वं च परमं निःश्रेयसं प्राप्स्यसि तस्माद्युद्धायोद्योगं परयुद्धसा
धनत्वात्तव चैवं यु
र्द्धलक्षणमोक्षसाधनमितिनिश्चित्य तदर्थमुत्तिष्ठ कृतनिश्चयस्त्वं ...

क्रमित्यभिप्रायः ३० ॥

गी.
टी.
द्वि.

अभिनवगुप्तटीका

श्लोकपंचकमिदमभ्युपगम्यवादरूपमुच्यते यदि लौकिकेनव्यवहारेण
लाभवोऽस्त्यघ्याप्यवश्यानुष्ठेयमेतत् ३७ ॥

परमार्थप्रपाटीका

ननु मरणे मरणावतपव स्वर्गप्राप्तिश्रवणात्तत्र जयत्वेतो जीवा
त इत्याह हत इति रणे मृतस्य स्वाराज्यं जीवतः साम्राज्यमित्यर्थः ३७
३७ ॥ ३७ ॥

वनमालीटीका

पडक्तेनवैनद्विमृश्यादितत्रपक्षद्वयेपि महालाभ इत्याह हत इति
शत्रून् जेष्यामि मरिष्यामि वेति कृतनिश्चयः युद्धायोत्तिष्ठ ३७ ॥

उत्तमवैजयंतीटीका

ननु हे यदि युद्धं करिष्यामि तर्हि मम गोत्रादिवधजन्यं पापं भविष्यति न
करिष्यामि चेत्तर्हि महानिर्लोके निन्दा च भविष्यतीत्येवं कृतेपि दोषो
ऽकृतेपि दोषस्तत्र द्वयोर्मध्ये मम श्रेयस्करः को भवेदित्याशंक्याकरणाक
रणमेवेहामुत्रलोके च कल्याणकरमित्याह हतो वेति द्वाभ्यां वेत्यथवा
रणे शत्रुभिरेतैर्दुर्योधनादिभिस्त्वं हतस्त्वं तर्हि स्वर्गमेव स्वः स्वर्गं वनीति
स्वर्गो देवं दत्तमेव प्राप्स्यसि न चेंद्राशतेनोद्भवत्वात्पुनरपीन्द्रभावमे
गमिष्यसि न तन्नमिव यावत्पुण्यं तावत्स्वर्लोके भुक्त्वा पुनः पतिष्य
तीति भावः यद्वा स्वर्गमेव स्वर्लोकमेव प्राप्स्यसि न तु गोत्रवधज
पापान्निरयादिकमित्यर्थः वाऽथवा जित्वा यतान् शत्रून् विजित्य
हारोग्ये णास्यास्यसि चेत्तर्हि महीं समुद्रमेखलां धरां त्वं भोक्ष्यसे
गं करिष्यसि यस्मात्त्वयमं भूतसंग्रामकरणेनैवेहामुत्र च तव परम
स्त्वलाभो भविष्यति तस्मात् हे तत निश्चयस्सन् ममापमेव परम त्वेन
यशो मार्गो नास्तीति रुद्धविश्वास सम्यक्तो ममेश्वरस्य पैतृष्ठ श्रेयस्वेव यो
वैतत्करणेनाति प्रथमा स इति मध्यम पुरैकवचन प्रयोगेण न वैव तो
त्रादयो परा राज्यं करिष्यति युधिष्ठिरादीनामपि न दुर्योधनादीनां
हननेनेति सूचितम् ३७ ॥

युद्धाय संग्रामं कर्तुमुत्तिष्ठ तत्ववादिकं परिधाय सज्जीकृतं चापमाधाय प्राञ्जलिमुखो
भव यतस्त्वं कुन्तीपुत्रोऽसि ॥

मधुसूदनीटीका

ननुतर्हियुद्धेगुर्वादिवधवशान्मध्यस्थकृतानिंदा ततोनिवृत्तौतुश
त्रुकृतानिंदेत्युभयतः पाशारज्जुरित्याशंक्य जयेपराजयेचलाभध्रौव्यादु
युद्धार्थमेवोत्थानमावश्यकमित्याह स्पष्टंपूर्वार्धंयस्मादुभयथापिते
लाभः तस्माज्जेष्यामिशत्रून्मरिष्यामिवेतिकृतनिश्चयः सन्युद्धायोत्ति
ष्ठअनंतरफलसंदेहेपियुद्धकर्तव्यतायानिश्चितत्वात् एतेनचैतद्वि
द्मःकतरन्नोगरीयइत्यादिपरिहृतम् ३७ ॥

सदानंदीटीका

ननुतर्हिसंकुलेयुद्धेनिंदाशत्रुकृताभवेत् कृतेमध्यस्थ[illegible]निंदास्या
द्भीष्मादीनांवधादपि १ इत्येवंस्यादुभयतःपाशारज्जुर्ममेतिचेत् स्वधर्म
करणान्निंदानमध्यस्थकृताभवेत् २ नहिस्वधर्मनिष्ठानांनिकृष्टापिका न्या
[illegible]चन जयेपराजयेवातेलाभध्रौव्याद्रणायभोः ३ उत्थानमुचितंतस्मा
दुत्तिष्ठनचतेक्षतिः जेष्यामिवामरिष्यामीत्येवंकृत्वाविनिश्चयं ४ ३७॥

नीलकंठीटीका

यद्वाजयेमयदिवानोजयेयुरित्युक्तंतत्राह हतोवेति रणेस्थितस्यस्वर्गो
वाराज्यंवासिद्धमस्तीतिपदद्वयमपिहितावहमित्यर्थः ३७ ॥

आनंदी टीका

युद्धेत्वक्रियमाणेग्लाणव्वोभयवेत्याह ३७ ॥

रामकंठी टीका

सर्वथात्स्वकर्मोनत्याज्यएवयात्रैतेनिरतिशयनित्यफलत्वाति
हेतुमितिलक्षणायर्थेनसमायुधेत्रैनैतदपरित्यागेकोदोषइ
तिचहतोवेत्याशनोपदेशोयुक्तइतिसिद्धान्तीजयेवत्याह ३७ ॥

लासिकी टीका

एतोयथाकथंचिद्युद्धमनुष्ठेयमेवेत्याह हतइति जेष्यामिश
त्रून्मरिष्यामिवेतिनिश्चयंकृत्वा एतद्द्वयेपितवलाभएवेत्यर्थः
३७ ॥

पंचोलीटीका

युद्धेक्रियमाणेजये अजयेपि संदिहानस्यप्रवृत्तिसिद्ध्यर्थंउभयत्रा
लाभमाह हतोवेति हेअर्जुनअश्रयवात्वंहतः सन्स्वर्गंप्राप्स्यसिवाश
त्रून्शत्रून्जित्वामहींभोक्ष्यसेहेकौंतेयततएवतस्मात्कृतनिश्चयो
जेष्यामिशत्रून् मरिष्यामिवेतिनिश्चयंकृत्वा युद्धायउत्तिष्ठ ३७

रणवीरसमिद्धोधिनी ॥

एवंच युद्धानुष्ठाने सर्वथालाभएवेत्याह हतोवेति निगदव्या
ख्यातमिदं किंतुयस्मादेतद्द्वयेपितवलाभस्तस्मात्कृतनिश्च
यो वयंयुद्धंकर्तव्यंसर्वथाफलवत्वादितिदृढीकृतचितोयुद्धा
योत्तिष्ठोद्युक्तोभवेति ३७ ॥

मधुभाष्य

३७ ॥

236

तोयुद्धकरि गरुआदिके वधसे निन्दाओ संग्राम छोडनेसे शत्रुनिन्दा
करैंगे इसतरहविथा चिन्ताके ऊपर कहतेहैं और दूसरे अध्यायके छठ
यें श्लोकमे जोअर्जुनने कहाकि इनको हम मारैंयायेई हमे जय करि
लेंय इसकाभी उत्तर श्रीकृष्ण करतेहैं किजय करैगेया पराजय
पावैंगे इसकीनिश्चय करिके उठोजो कहाकि इसदैव आधीनजय
पराजय काक्या निश्चयहै तोइस युद्धमे जो तमारीमरण होयगीतोस्व
र्गवासपावोगे और जोशत्रुवोंको जीतोगेतो पृथ्वीका राज्य ओ भो
ग करोगे तिससे हेकौंतेय अर्जुन युद्ध करनेकीनिश्चय करिके उ
ठो तमारे दोनो हाथलडुआहैं ३७ ॥

दोहा

मरैं तु पावैं स्वर्गको जीतैं भोग हूंगो महीभोग तातें उठ ऊ
ति ननय कर निश्चय युद्धयोग ३७॥

237

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ततो
युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ३८ ॥

शांकरभाष्य

तथा युद्धं स्वधर्म इत्येवं युध्यमानस्य उपदेशमिमं शृणु सुखदुः
खेइति सुखदुःखे समे तुल्ये कृत्वा रागद्वेषावप्यकृत्वेत्येतत् त
था लाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व
घटस्व नैवं युद्धं कुर्वन् पापफलमवाप्स्यसि इत्येष उपदेशः प्रासं
गिकः ३८ ॥

आनन्दगिरिकृतटीका

पापभीरुतया युद्धाय निश्चयं कृत्वा नोत्थातुं शक्नोमीत्याशंक्याह
तथेति युद्धस्य स्वधर्मतया कर्तव्यत्वे सतीति यावत् सुखजीवन
मरणादिनिमित्तयोः सुखदुःखयोः समताकरणं कथमिति तत्राह
रागद्वेषाविति लाभः क्षेत्रकोशादिप्राप्तिः अलाभस्तद्विपर्ययः न्याये
न युद्धेनापरिभूतेन परस्य परिभवो जयस्तद्विपर्ययस्त्वजयः त
योः लाभालाभयोर्जयाजययोश्च समताकरणं समानमेव रागद्वेषा
वकृत्वेत्यनेन दर्शयितुं तथेत्युक्तं यथोक्तोपदेशवशात् परमार्थदर्शी
नप्रकरणे युद्धकर्तव्यतोक्तेः समुच्चयपरत्वे शास्त्रस्य प्राममित्याशं
क्याह एषइति क्षत्रियस्य तद्धर्मभूतयुद्धकर्तव्यतानुवादप्रसङ्गा
त्तत्वादस्योपदेशस्य नानेन विरोधेन समुच्चयः सिध्यतीत्यर्थः ३८ ॥

स्वामिकृतटीका

यदप्युक्तं पापमेवाश्रयेदस्मानिति तत्राह सुखदुःखे इति सुखदुःखे समे
कृत्वा तथा तयोः कारणभूतौ लाभालाभावपि तयोरपि कारणभूतौ ज
याजयावपि समौ कृत्वा एतेषां समत्वे कारणं हर्षविषादराहित्यं युज्यस्व
सन्नद्धो भव सुखाभिलाषं हित्वा स्वधर्मबुद्ध्या युध्यमानः पापं न प्राप्स्यसीत्यर्थः ३८ ॥

पिशाचभाष्य

ततः स्वधर्म इत्येवं युद्धस्व उपदेशमिमं शृणु सुखदुःखे समे कृत्वा ला
भालाभौ जयाजयौ च समे कृत्वेत्येष उपदेशः प्ररोचनार्थः प्रासंगिकश्च

गी॰
टी॰
द्वि

कथं तु देहे लौकिकन्यायः स्वधर्ममपि चावेक्ष्येत्यादि श्लोकैरुक्तः ततात्प
र्येण परमार्थदर्शनमिदं प्रोक्तं ३८ ॥

रामानुजभाष्य

अथ युद्धार्थिनो ज्ञानप्रकारमाह एवं देहातिरिक्तमस्पृष्टसमस्तदेहस्व
भावं नित्यमात्मानं ज्ञात्वा युद्धे चावर्जनीये शस्त्रपातादिनिमित्तसुखदुः
खार्थलाभालाभजयपराजयेष्वविकृतबुद्धिः स्वर्गादिफलाभिसंधिरहि
तः केवलकार्यबुद्ध्या युद्धमारभस्व एवं कुर्वाणो न पापमवाप्स्यसि पापं सु
खदुःखरूपं संसारं वैधान्नोप्स्यसीत्यर्थः ३८ ॥

नावाप्स्यसे संसारं

अभिनवगुप्तटीका

न चानेन स्वधर्मेनयैव कर्माणि कुर्वतो न कदाचित्पापसंबंधः ३८ ॥

परमार्थप्रपाटीका

अथ धर्मयुद्धस्वरूपमाह सुखदुःखे इति सुखदुःखे समे कृत्वा
तथा तयोः कारणीभूतौ लाभालाभौ जयाजयौ च समौ कृत्वा
हर्षविषादरहितो भूत्वा युध्यस्वेत्यर्थः एवमनेन प्रकारेण यु
द्धं कृत्वा पापं न प्राप्स्यसि ३८ ॥ ॥

वनमालीटीका

अतः त्रिविधस्य युद्धानुष्ठानप्रकारमाह सुखेति सुखं वैधयिनीसुख
दुःखे लाभालाभौ जयाजयौ समे मया लक्ष्म्या सहितेन हरौ कृत्वा विवेक
ते ज्ञात्वा नवधीश्वरात्वाय च वैषयिके सुखदुःखे च समे अस्माभिर्न
तौ मोतो पायविरूढत्वाद्धेयत्वेन समे तस्य कर्तव्यज्ञातान तन्नाय
यादौ हर्षविषादादिरहितः सन् युद्धाय युज्यस्व अत्र देहाभव देहादि
व्यतिरिक्तज्ञानानंदस्वरूपः श्रीहरिप्रेरितोऽहं तत्प्रीत्यर्थं स्वविहितं
मे करिष्य इति मनसि चिंतयन् अविद्यासहकृतेन स्वामित्वमवेयेन युद्धानुष्ठा
नकृतेमानपि पापं तत्कृतं फलार्थं देहादिसंसारं नावाप्स्यसि किं तु मुक्तो
व भविष्यसीत्यर्थः ३८ ॥

मी

ऊसमवैजयंतीटीका

किंचसुखदुःखइतिद्वंद्वंसुखदुःखेरिपूणांवधेसुखंमित्राणांवधेदुःखंचते
देसमेकृत्वातयोःपुण्यापुण्यकर्मजनितत्वेनावश्यंभावित्वाद्रागमापाद्य
ताद्वेषंचविचारेणतुल्येकृत्वातथैवलाभालाभौसुखराज्यादेर्लाभस्तदला
भश्चतयोरपिदुःखार्जनादौविपरीतदर्शनेनस्वाधीनत्वाभावात्तावपिसमौ
कृत्वातथैवजयाजयौस्वबलैःशत्रूणांजयःपरबलैस्तुस्वबलस्याजयस्तयो
रपिदैवाधीनत्वात्तावपिसमौकृत्वाएवमेतदभ्यस्तसर्वमीश्वररूपंपश्यन्‌वसिर
त्यातिननपराधीनस्यममबलपौरुषादिनेतिनिश्चित्यततोऽनंतरंस्वासा
धारणधर्मभूतायुद्धाययुज्यस्वशृंगारत्तककवचादीन्धारयित्वावहक
तंसनद्धस्वयुद्धमारभस्वएवंमोक्षपर्यंतफलाभिकांक्षांहित्वास्वधर्मंयु
द्धापुरुषकस्मिन्निवेशेहिंसापरगोत्रादिवधजंपापंनावाप्स्यसिनप्राप्स्य
सि १८ ॥

मधुसूदनीटीका

नन्वेवंस्वर्गमुद्दिश्ययुद्धकरणेनस्यान्नित्यत्वाभावात्‌ राज्यमुद्दिश्य
युद्धकरणेत्वर्थशास्त्रत्वाद्धर्मशास्त्रापेक्षयादौर्बल्यंस्यात्‌ ततश्चकाम्य
स्याकरणेऽकृतः पापंह्यर्थस्यगुरुब्राह्मणादिवधस्यऽतोपयम्येवम त
त्याज्यवेतिशंकायामाहसुखेतिसमताकारणेनाग्रहेराहि
त्यसुखेनतत्कारणेलाभेनतत्कारणेजयेचरागमकृत्वा एवंदुःखेनहेतोःव
लाभेनहेतोःपराजयेद्वेषमकृत्वा ततोयुद्धाययुज्यस्वसन्नद्धोभव एवंसुख
कामनोदुःखनिवृत्तिकामनोवाविहायस्वधर्मबुद्ध्यायुध्यमानोगुरुब्रा
ह्मणादिवधनिमित्तंनित्यकर्माकरणनिमित्तंचपापंनप्राप्स्यसि यत्फ
लकामनयाकरोतिगुरुब्राह्मणादिवधनिमित्तंपापंप्राप्नोति योवानक
रोतिसनित्यकर्माऽकरणनिमित्तं अतःफलकामनामंतरेणकुर्वन्‌
उभयविधमपिपापंनप्राप्नोति प्रागेवव्याख्यातोऽभिप्रायः हतोवाप्रा
प्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीमितित्वानुषंगिकफलकथनमितित
दोषः तथाचापस्तंबःस्मरति तद्यथाम्रफलार्थेनिमित्तेछायागंधइत्य
नूत्पद्यते एवंधर्मंचर्यमाणमर्थाअनूत्पद्यंतेनोचेदनूत्पद्यंते न
धर्महानिर्भवतीति अतोयुद्धशास्त्रस्याभावात्पापमेवाश्रयेदस्मानितिनि
निराकृतंभवति १८ ॥

स्याद्यिप्रास्वं

मधुसूदनीटीका

गी.
टी.
हि.

तत्रैवं स्वधर्ममित्येवं युध्यमानस्य ते परं उपदेशं शृणु त्वं समे सुखदुःखे समे
इति १ सुखं तत्कारणं लाभे तद्विमित्रे जयेऽपि च प्रहृत्वा रागमेवं च दुःखे
तत्कारणे ततो २ तद्विमित्रे जये चाप्यहत्वा द्वेषं ततः परं युद्धाय भव
सन्नद्धो नैवं पापमवाप्स्यसि ३ फलाभिलाषया कुर्वन् गुरुविप्रवधा
दिकं प्राप्नोति किल्बिषं घोरं तन्निमित्तमयं पुमान् ४ विना फलाभिलाषं
तु धर्ममित्येवमाचरन् नैवं पापमवाप्नोति महेशाज्ञानुपालनात् ५
हतो वेत्यादिना प्रोक्तं फलेनत्वानुषंगिकं न काम्यकर्म संग्रामः किंतु नि
त्यं स्वधर्मतः ६ ॥ ३८ ॥

नीलकंठीटीका

स्वधर्मस्य युद्धस्याकरणे धर्मकीर्त्योर्नाशः पापावाप्तिश्चोक्ता ध्येवेदितिश्री
केन भगवता यद्यप्युक्तं तथापि युद्धस्य ब्रह्मनाभिमते काम्यत्वपक्षे ब्रह्मैव
तमहत्त्वापकर्त्वं भवतिता वये यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः
तितत्करणे पापसंकिरस्तितोतिवारयितुमिति रूयोः समत्वलक्षणं लाभा
ह सुखदुःखे इति समे कृत्वा सुखदुःखे ये तयोः तद्धेत्वोः राज्यलाभालाभयो
तो योस्तद्धेत्वोर्जयाजययोः रागद्वेषावकृत्वेत्यर्थः केवलं स्वधर्मो युद्धमिति मत्वा
युद्धाय युज्यस्व घटस्व एवं कुर्वन् पापं नावाप्स्यसि यस्तु राज्यलाभेन
सुखहेतुं करोति तस्यास्त्येव पापमिति भावः कथं तर्हि स्वधर्मेऽपि ताव
दिने पि युद्धे हतो वा प्राप्स्यसि स्वर्गमित्यादि फलस्मरणं श्रानुषंगिक
मिति ब्रूमः तथा चापस्तंबः तद्यथाम्रे फलार्थे निर्मिते छाया गंधा
अनूत्पद्यते एवं धर्मं चर्यमाणमर्था अनूत्पद्यंते न धर्महानिर्भवतीति श्रा
म्रनिदर्शनेन प्रतिपादयति ३८ ॥

आनंदी टीका

एवंलोकदृष्टेननष्टकर्मणाभिमुखीकृतश्रेयःकारणंज्ञानमप्र
कर्मणामस्यस्वयमुदृष्टिशाति रागद्वेषाभ्यांविनाप्रवृत्तस्यतत्त्वि
यैसैवस्वधर्मोविश्रुणात्रुष्टेयइतिश्रुद्धार्थश्रुद्धकोभवएवमने
नप्रकारेणस्वधर्मोनुष्ठानाद्धन्यहृतनेशांकितेपापेनास्पृश्यसि
सर्वदास्वकर्मोनुष्ठानाद्भोगापवर्गाववश्यमस्यसीत्यर्थः ॥ २८ ॥

रामकंठी टीका

एवमनेनप्रकारेणवर्तमानःपापंज्ञातिवधादितःसंभावमा
नंकिल्बिषंनावेस्पसिलिप्यसेकथंवर्तमानःप्रयमेतावघथो
परिदृष्टार्थोनिःसंशयप्रतिपत्तिप्रवृत्तनिष्कमप्रज्ञाप्रतिभित्ता
तसमस्तशाणप्रमर्वावस्थाव्यापकसामान्यसंविन्मात्रस्वं
भावैनित्यनिकृन्तनानेदनिर्भेरतयास्वरूपव्यतिरिक्तप्रापप
दार्थानन्तरविश्वाविरहितेसत्यात्मन्यकृत्रिमपात्मताभिमान
मास्थाय मायार्थमोहजनितेदेहादिष्वनात्मभूतभावात्मप्रत्य
यलक्षणविपर्यज्ञानैः सर्वप्राणिभिरुपादेयतयाहेयतया
वपरिकल्पितभेदप्रतिलक्षणविनश्वरेषुभावेडुभवेदुपज
हीसमेदृष्टयात्मनिदृश्यतामात्रेणसवद्धमोक्षेणाप्रकातिप
नितविशेषात्मकविकारतयानिर्विशेषत्वात्तथालाभालाभौ
न्यायसंपाद्य एवमेवतद्वद्वस्तुतौ राज्यादिलिप्सितार्थविशेषोसंपाद्य
नैयायपिहेतुभूतौजयपराजयौ तथैवसमौनिर्विशेषौसंपाद्य ... खलु
नत्वनायथावस्थितेनरूपेणनिश्चित्येत्यर्थः एतेहिकालवेशे
षोविघ्नमात्रेणसंबद्धाः वेदकस्यात्मनोनकिंचिद्धिकावलेश
रूपादयितेनमाः यथानीलपीतादयःप्रकाशात्वमात्रेणसंबद्धाः
त्वःप्रकाशस्यालोकस्यनकांचिद्विशेषंनीलपीतादिकमुत्प
ादयितेशक्नाः केवलप्रकाशत्वमात्रेणकेनरूपेणतत्रसंबद्धाः
लेदेनतस्मादात्मनोपाधिप्रतिपत्तेरननन्त
मेतत्त्वावादीनांसमीकृत्य ततपूतत्त्वमाधिप्रतिहितायस्वकर्म
तोयुज्यस्वसमस्थस्व यथोक्तज्ञाननिष्ठतयास्वकर्माणिकृत्वा
नवाप्स्यसि:

४२ वेद्यत्नमावदएंपसांग्र एवं प्रवादीनि

३८ ॥

लाक्षिकी [illegible] टीका

ननुगुरुब्राह्मणवधात्पापमेवाश्रयेदित्यत्रोपदेशंश्रुणुत्विन्याह सुखेदुःखेइति सुखाभिलाषंहित्वा स्वधर्मेणुञ्जायुद्धमानः पापंनशाप्स्यसीत्यर्थः ३८ ॥

पंचोलीटीका

गुर्वादीनांअपिवधेयथापापसंबंधोनभवतितंप्रकारमाह सुखेदुःखेइति सुखेदुःखेतथालाभालाभौजयाजयौसमेतुल्यौकृत्वातत्र रागद्वेषौअकृत्वाततोयुद्धायपुञ्जस्वचरक्षयंपापंनअवाप्स्यसि सुखेरागेदुःखेद्वेषरहितः तथाहृष्टविहीनयौजयाजयौसमौकृत्वायु धुद्धंकुर्वन्पापफलंनप्राप्स्यसिइत्यर्थः ३८

गणेशीयसमभिद्योधिनी ॥

ननुस्वर्गोद्देशेनक्रियमाणत्वाद्युद्धस्यकाम्यत्वेनार्थधर्मत्वंनगीतं गुरुब्राह्मणादिवधादिरूपस्यतस्यानुष्ठानंचधर्मधर्मत्वंगी तं तथाचार्थधर्मत्वाद्बलवद्धर्मधर्मत्वमितिस्थितिरितियाज्ञ वल्क्यस्मृतेः संग्रामाकरणंधर्ममेवनपुनः पापापादकमि कथमयमुत्तमिमंधर्मेमितिश्लोकार्थसंगतिरित्याशंकयाह सुखेदुःखेइति एतेषांसुखेदुःखेत्यादीनांसमत्वेकारणंनिवृत्त धर्मपराक्रमश्रवणेनहर्षविषादराहित्यं ततश्चवीरवर्यानिश्च या युद्धकर्मानुतिष्ठेदिति नत्वत्स्वधर्मतथैवकर्माणिकुर्वतोऽपा पसंबंधइतिभावः ३८॥

३८ ॥

मधुभाष्य

[illegible]तिविनः। किंवास्माभिस्तत्रहचनैस्त्वां प्रणामतिरित्यादिसंशके
भयविषयफलविरक्तेश्चापाततस्त्वात्मज्ञानयुतं प्रतिज्ञातमित्यामा
त्रकृतेदेहयात्रे निश्चित श्रेयोजिज्ञासमालक्ष्यविशेषतस्त्वात्मानात्म
विवेकमुपदिष्टः वेदाविनाशिनमित्यादिनाममतालक्षणमोहतुल्य
शोकनिरासःकृतः अमस्तत्त्वायकल्पते [illegible]इतिनिश्चित
श्रेयोप्यायानं तदुक्तं विशेषतस्त्ववस्यामः एवंसमतितत्त्वज्ञानमार्गेना =
लंबसेवेत्यभिप्रायत्वात् भगवानाद्येकर्तव्यमुपदिशति [illegible]
सुखदुःखेइति यदि ज्ञा[illegible]नमार्गमवलंबसे तर्हि एवंकृत्वा युद्धाययुद्धं
कर्तव्यमुच्यस्वचेदस्व किंकुर्वेत्यतआह सुखदुःखेसमेकृत्वेति यथा
दुःखेहेयं एवंसुखमपिहेयंकृत्वेत्यर्थः एवंलाभालाभजयाजयेष्व
पिव्याख्येयं निष्कामएवंस्वधर्ममनुतिष्ठेतिभावः ननुज्ञानमार्गोऽ
स्त्वंतेनकर्मकस्मात्कर्तव्यमतआह नैवमिति एवमनेनप्रका
रेणकर्माणिकृते पापंपापाकारमंतःकरणपरिणाममसंभावा
वनादिनावाप्स्यसि शुद्धांतःकरणएवंभविष्यसीत्यर्थः ३८ ॥

भाषाअनुवाद

जोकदाचित् वधरूपनरकपापहीकी निश्चयकरि उसके डरसे यु
द्धमेनिश्चयकरकेनहींउठिसकते यहकहोतो सुहृद मित्रोंकेजी
वन औ मरणनिमित्तक सुख औ दुखकीसमानकहतेहैं किप्रथ
म सुख औदुख तथालाभ औहानि जय पराजय इनकोसमान
करि औ प्रीति विरोधकोभीत्यागकरिके तबयुद्धमे प्रवृत्तहोउ
इसप्रकारसे युद्धकरनेमे पापतुमको नलगेगा ३८॥
पापनप्राप्त होयगा अर्थात्

दोहा

लाभ अलाभ सुखदुःखसमकर जीतअजीतहिं दोय तिस
तें युद्धको युगतहो पापनपैसें दोय ३८॥

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु बुद्ध्या
युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ३९ ॥

शांकरभाष्य

शोकमोहापनयनाय लौकिको न्यायः स्वधर्ममपि चावेक्ष्येत्याद्यैः
श्लोकैरुक्तो न तु तात्पर्येण परमार्थदर्शनं त्विह प्रकृतं तच्चोक्तमुपसं
हृत्य एषा तेऽभिहितेति शास्त्रविषयविभागप्रदर्शनाय इह हि प्रदर्शिते
पुनः शास्त्रविषयविभागे उपरिष्टात् ज्ञानयोगेन सांख्यानां कर्मयोगेन
योगिनामिति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्त्तिष्यति श्रोतारश्च विष माम
यविभागेन सुखं ग्रहीष्यन्तीत्यत आह एषा तेऽभिहिता सां
ख्ये परमार्थवस्तुविवेकविषये बुद्धिर्ज्ञानं साक्षात् शोकमोहादिसंसा
रहेतुदोषनिवृत्तिकारणं योगे तु तत्प्राप्त्युपाये निःसंगतया द्वन्द्वप्रहाण
पूर्वकमीश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे च इमा
मनन्तरमेवोच्यमानां बुद्धिं शृणु तां च बुद्धिं स्तौति प्ररोचनार्थं बुद्ध्या यया
योगविषयया युक्तो हे पार्थ कर्मबन्धं कर्मैव धर्माधर्माख्यो बन्धः क
र्मबन्धः तं प्रहास्यसि ईश्वरप्रसादनिमित्तज्ञानप्राप्तेरित्यभिप्रायः ३९ ॥

आनंदगिरिकृतटीका

नेन स्वधर्ममपि चावेक्ष्येत्यादिश्लोकैर्न्यायावष्टम्भेन शोकमोहापनय
स्य तात्पर्यं लौकिकत्वात्तस्मिन्नुपसंहर्त्तव्ये किमिति परमार्थदर्शनमुप
संह्रियते तत्राह शोकेति स्वधर्ममपीत्यादिभिरनन्तरश्लोकैः शोकमो
हयोः स्वजनमरणगर्वादिविषयशोकानिमित्तयोः सम्यग्ज्ञानप्रतिब
न्धकयोरपनयार्थं वर्णाश्रमवतो धर्ममनुतिष्ठतः स्वर्गादि सिध्यति
इत्यन्वयव्यतिरेकात्मको लोकप्रसिद्धो न्यायो यद्यपि दर्शितस्तथा
पि नासौ तात्पर्येणोक्त इत्यर्थः किं तर्हि तात्पर्येणोक्तं तदाह परमार्थेति
न त्वेवाहं जातु नासमित्यादि समनन्तराध्याये उक्तं न जायते म्रियते वा
कदाचिदित्यादिना प्रतिपादितमित्यर्थः उपसंहारप्रयोजनमाह शास्त्रेति
तस्य वस्तुतो विषयो निष्ठाद्वयं तस्य विभक्तस्य तेनैव विभागेन प्रद
र्शनार्थं परमार्थदर्शनोपसंहार इत्यर्थः ननु किमित्यत्र शास्त्रस्य विष
यविभागः प्रदर्श्यते उत्तरत्रैव तद्विभागप्रवृत्तिप्रतिपत्त्योः सम्भवादि
ति तत्राह इह हीति शास्त्रप्रवृत्तेः श्रोतृप्रतिपत्तेश्च सौकर्यार्थमादौ

गी० टी० द्वि

विषयविभागसूचनमित्यर्थः । उपसंहारस्य फलवत्त्वमेवमुक्त्वा तमे
वोपसंहारमवतारयति अतश्चारेति परमार्थात्मतत्त्वविषयां ज्ञान
निष्ठामुक्तामुपसंहृत्य वक्ष्यमाणां संगृह्णाति योगेत्यादिना तामेव बु
द्धिं विशिष्टफलवत्त्वेनाभिष्टौति बुद्धेरिति ततोपसंहारभागं विभ
जते एषेत्यादिना बुद्धिशब्दस्यान्तःकरणविषयत्वं व्यावर्तयति ज्ञाना
न्मीति तस्य सहकारिनिरपेक्षस्य विशिष्टफलवत्त्वमाचष्टे ज्ञानादि
ति शोकमोहौ रागद्वेषौ कर्तृत्वं भोक्तृत्वमित्यादिरनर्थः संसारस्तस्य
हेतुर्दोषः स्वाज्ञानं तस्य निवृत्तौ निरपेक्षं कारणं ज्ञानमज्ञाननिवृत्तौ
ज्ञानस्यान्वयव्यतिरेकसमधिगतसाधनत्वादित्यर्थः । योगेति मार्गविभा
दिव्याकुर्वन् योगशास्त्रस्य प्रकृतेश्चित्तवृत्तिनिरोधविषयत्वं व्याव
र्त्तयति तत्रामीति प्रकृतमुक्तमुपयुक्तं ज्ञानं तत्पदेन परामृश्यते तेषु
नोदयोपायमेव प्रकटयति निःसंगतयेति फलाभिसन्धिवैधुर्यं बु
निःसंगत्वं बुद्धेस्तत्र प्रयोजनमाह परोक्षतार्थमिति अभिष्टुतां बुद्धिं
हिःश्रद्धानत्वा सत्यनुष्ठातारमधिकरोति तेन स्वान्तर्थ्यवतीत्यर्थः तत्त्वज्ञान
कर्मानुष्ठानविषयबुद्ध्या कर्मबन्धस्य कुतो निवृत्तिर्नहि तत्त्वज्ञान ३९ ॥
मन्तरेण समूलं कर्म हातुं शक्यमित्याशंक्याह ईश्वर इति

स्वामिकृतटीका

उपदिष्टं ज्ञानयोगमुपसंहरन् तत्साधनं कर्मयोगं प्रस्तौति एषेति
सम्यक्ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति संख्या सम्यक्ज्ञानं तस्यां
प्रकाशमानमात्मतत्त्वं सांख्यं तस्मिन् करणीया बुद्धिरेषा तवाभिहि
ता एवमभिहितायामपि सांख्यबुद्धौ तव चेदात्मतत्त्वमपरोक्षं न
भवति तर्ह्यन्तःकरणशुद्धिद्वारात्मतत्त्वापरोक्षार्थं कर्मयोगे त्विमां बुद्धिं
शृणु यया बुद्ध्या युक्तः परमेश्वरार्पितकर्मयोगेन शुद्धान्तःकरणः सन्
तत्प्रसादलब्धापरोक्षज्ञानेन कर्मात्मकं बन्धं प्रकर्षेण हास्यसि त्यक्ष्यसि

पैशाचभाष्य

तत्रोक्तमुपसंहरति एषेति एषा तेऽभ्यमभिहिता उक्ता सांख्ये परमा
त्मवस्तुविवेकविषये बुद्धिर्ज्ञानं साक्षात् शोकमोहादिसंसारहेतुदोष
कारणं योगे तत्प्राप्त्युपाये निःसंगतया द्वंद्वप्रहाणपूर्वकमीश्वराराध
नार्थे कर्मानुष्ठाने समाधियोगे च इमामनन्तरमेवोच्यमानां बुद्धिं शृ

तां बुद्धिं स्तौति श्रोतॄणां प्ररोचनार्थं बुद्ध्या यया योगविषयया युक्तः हे
पार्थ कर्मबंधः कर्मैव बंधः अथ मोक्षबंधः तं प्रहास्यसि ईश्वरप्रसादनिमित्त
ज्ञानेन प्राप्स्यसीत्यभिप्रायः ३९ ॥

रामानुजभाष्य

एवमात्मयाथात्म्यज्ञानमुपदिश्य तत्पूर्वकं मोक्षसाधनभूतं कर्मयो
गं वक्तुमारभते संख्या बुद्धिः अवधारणीयमात्मतत्वं सांख्यं ज्ञातव्ये
आत्मतत्वे ज्ञातव्ये या बुद्धिरभिधेया न त्वेवाहमित्यारभ्य तस्मात्सर्वाणि
भूतानीत्यंतेन समभिहिता आत्मज्ञानपूर्वकमोक्षसाधनभूतकर्मानु
ष्ठाने या बुद्धिर्योगो वक्तव्यः स इह योगशब्देनोच्यते दूरेण ह्यवरं कर्म बुद्धि
योगादिति वक्ष्यते तत्र योगे या बुद्धिर्वक्तव्या तामिमामभिधीयमानां शृणु य
या बुद्ध्या युक्तः कर्मबंधं प्रहास्यसि कर्मणां बंधः कर्मबंधः संसार इत्यर्थः ३९ ॥

अभिनवगुप्तटीका

एषा वनत्व सांख्ये सम्यग्ज्ञाने बुद्धिर्निश्चयात्मिकोक्ता एषैव च यया योगे
कर्मकौशले युज्यमानेन त्वेवं शृणु यया बुद्ध्या कर्मणामेवं यकत्वं त्यक्ष्यसि नहि
कर्माणि स्वयं बध्नंति जडत्वात् अतः स्वयमात्मा कर्मभिर्वासनात्मकैरात्मा
नं बध्नाति ३९ ॥

परमार्थप्रपाटीका

अथोपदिष्टं ज्ञानयोगमुपसंहरन् स्वधर्ममयोक्तत्वात्कर्मयो
गं प्रशंसन्नाह एषेति सम्यक् ख्यायते प्रकाश्यते आत्मतत्वमन
येति संख्या सम्यक्ज्ञानं तस्मिन्प्रकाश्यमानमात्मतत्वं सांख्यं तत्र
साधनीभूता या बुद्धिः एषा ते इति तुभ्यमभिहिता कथिता एवं क
थितायामपि सांख्यबुद्धौ तव चेदात्मतत्वमपरोक्षं न भवति तर्हि अं
तःकरणशुद्धिद्वारात्मतत्वमपरोक्षं कर्तुं कर्मयोगे त्विमां वक्ष्य
माणां बुद्धिं शृणु एवं पापबुद्ध्या कर्मात्मकं बंधं प्रहास्यसि त्य ३९ ॥
क्ष्यसि ३९ ॥ ३९ ॥

॥ वनमालीटीका

उपदिष्टज्ञानोपक्रमे ज्ञानपूर्वकं ज्ञानोपायं विहितसत्कर्मसमाधिरूपं व
क्तुं प्रतिजानीते एषेति सम्यक्ख्यायते ज्ञायते यया सा संख्या बुद्धिः तया

वधारणीयमात्मतत्त्वं सांख्यं तस्मिन् सांख्ये तज्ज्ञानाय याभिधेयं सा न त्वेवा
हमित्यारभ्य तस्मात्सर्वाणि भूतानीत्यंतेनाभिहिता आत्मयाथात्म्यानुसं
धानपूर्वकनिःकामकर्मात्रचित्तैकाग्र्यहेतत्वाद्युज्यते चित्तमेकाग्रं क्रियते
नेनेति युज्यत्वाद्योगः देनोच्यते तद्योगे यावक्ष्यमाणा बुद्धिस्तामिमामभिधी
यमानां शृणु यया बुद्ध्या युक्तः कर्मबंधं कर्मरूपो प्रवाहतो नाद्यो मविद्योपदा
स्यसि मदीयमिदं कर्माहं कर्तेत्याद्यभिमानात् सन्न्यासः कुत्सनाविनमेक
र्मानुष्ठानेन ततो मय्यचला भक्तिस्ततो मदापरोक्ष्यं ततो मत्कृपया प्रसाद
स्ततो विद्यानिवृत्तिपूर्वकानंदाविर्भावरूपो मोक्षस्तदितिभावः ३९ ॥

ऊसमवैजयंतीटीका

एवं देहादिव्यतिरिक्तमात्मतत्त्वमुपदिश्येदानीं तदुपसंहरन्मोक्षोपायभू
तं कर्मयोगमुपदेष्टुकामो भगवांस्तमेव प्रस्तौति एषा त इति सांख्ये स
म्यक्ख्यायते निश्चीयते तत्त्वत्रयं यया सा सांख्या बुद्धिः उपनिषन्निष्ठा तया देहे
न्द्रियाद्येन न वैलक्षण्येन निश्चीयमाने यदात्मतत्त्वे तत्सांख्यं तस्मिन्सांख्ये
आत्मतत्त्वे तत्स्वरूपादिविज्ञानाय या बुद्धिः कर्तव्याभवेत्सा एषा बुद्धिस्ते
एषा मयाऽभिहिता कथिता कैः न त्वेवाहमित्यादिभिर्देही नित्यमवध्यो
यमवध्यो ममित्यन्तैरेकोनविंशतिश्लोकैः यदिमदुक्तस्वभावेऽतिनरस्त
बुद्धिः करणीया भवेत्तामिमां मया वक्ष्यमाणां बुद्धिं त्वं शृणु सावधाने
नमनसा त्वं स्ववर्णोक्तकर्मयोगविषयिणाः बुद्धेः फलदानत्वेन प्र
शंसति हे पार्थ कर्मयोगे निश्चयात्मकया यया बुद्ध्या युक्तस्त्वं कर्मबंधं जीवा
नां कर्मणां बंधो यस्मिन्सः कर्मबंधः संसारं तं प्रहास्यसि प्रकर्षेणात्य
न्तं त्यक्ष्यसि अनादिकर्मनिमित्तको यः संसारस्तं स्वधर्मभूतेन युद्धादिकर्मणा
शिथिलं करिष्यसि चेत्तर्हि त्वं मोक्षं प्राप्स्यसीत्यर्थः ३९ ॥

मधुसूदनीटीका

ननु भवतः स्वधर्मबुद्ध्या युध्यमानस्य पापाभावः तथापि मोक्षप्रतियुद्ध
कर्तव्यतोपदेशस्त्वयोचितः यथा न वेत्ति हंता रमित्यादिना कथं सगु
णस्यः कर्ताभोक्ता सुखदुःखरूपोहमस्मीति युद्धकृतान्फलभोक्ता इति कर्मप्रतिदेयात्
तेषां भवति विरोधात् तानकर्मणोः समुच्चयासंभवात् प्रकाशतमसोरिव
श्रेयश्चार्जुनाभिप्रेयोऽप्यायसी चेदित्यत्र प्रश्नो भविष्यति तस्मादेकमेवमा

प्रतिष्ठानस्य कर्मणश्चोपदेशो नोपपद्यते इति चेन्न विद्वदविद्वदवस्था
भेदेन ज्ञानकर्मोपदेशोपपत्तेरित्याह भगवान् प्रधानत्वादाहमित्या
द्येकोनविंशतिश्लोकैः ते तुभ्यमभिहिता सांख्ये सम्यक्ख्यायते सर्वो
पाधिरहितत्वया प्रतिपाद्यते परमात्मतत्त्वमनयेति संख्योपनिषत्
तयैव तात्पर्यपरिसमाप्त्या प्रतिपाद्यते यः स सांख्यः औपनिषदः पुरुष
इत्यर्थः तस्मिन् बुद्धिस्तन्मात्रविषयं ज्ञानं सर्वानर्थनिवृत्तिकारणत्वोप्र
त्तिर्मयोक्ता तेनात्मदर्शनवतः क्वचिदपि कर्मोच्यते तस्य कार्यं न विद्यते
इति वक्ष्यमाणत्वात् यदि पुनरेवं मयोक्तेऽपि तवैषा बुद्धिर्नोदेति वि
त्तदोषात् तदापनयेनात्मतत्त्वसाक्षात्कारायकर्मयोग एव त्वया
नुष्ठेयः तस्मिन् योगे कर्मयोगे त्वं करणीयामिमां सुखदुःखे समे कृत्वे
त्यादावुक्तां फलाभिसंधित्यागलक्षणां बुद्धिं विस्तरेण मया वक्ष्यमाणां शृ
णु तुशब्दः पूर्वबुद्धेर्योगविषयत्वव्यतिरेकसूचनार्थः तथा च शुद्धान्तः
करणे प्रति ज्ञानोपदेशः अशुद्धान्तःकरणे प्रति कर्मोपदेश इति कृतः समु
च्चयोपशोकयाविरोधावकाश इत्यभिप्रायः योगविषयां बुद्धिं फलकथनेन
स्तौति यया व्यवसायात्मिकया बुद्ध्या कर्मसु युक्तस्त्वं कर्मनिमित्तं बन्धं
शाश्वयाशुद्धिलक्षणं ज्ञानप्रतिबन्धं प्रकर्षेण पुनः प्रतिबन्धान्तररूपे
ण हास्यस्यसि अयं भावः कर्मनिमित्तो ज्ञानप्रतिबन्धः कर्मणैव धर्मो
ख्येनापनेतुं शक्यते धर्मेण पापमपनुदतीति श्रुतेः श्रवणादिलक्षणो
विचारस्तु कर्मात्मकप्रतिबन्धरहितस्य असंभावनादिप्रतिबन्धं दृष्टद्वारे
णापनयतीति न कर्मप्रतिबन्धनिराकरणायोपदेष्टुं शक्यतेऽतोऽत्र त्वत
मलिनोऽन्तःकरणत्वाद्बहिरंगसाधनं कर्मैव त्वयानुष्ठेयं नाधुना श्रवण
दियोग्यतापि तव जाताहरेत्तत्रानयोग्यतेति तथा च वक्ष्यति कर्मण्येवा
धिकारस्ते इति एतेन सांख्यबुद्धेरन्तरंगसाधनं श्रवणादि विहाय बहिरंग
साधने कर्मैव भगवता किमित्यर्जुनो योयदि प्रपत इति निरस्तं कर्मबन्धं
मे सारमीश्वरप्रसादनिमित्तज्ञानप्राप्त्या प्रहास्यसीति प्राचां व्याख्यानेन
ध्याहारदोषः कर्मपदवैयर्थ्यं च परिहर्तव्यं ३९ ॥

सदानन्दटीका

नन्वयं धर्मेऽधियामास्तु युध्यमानस्य मे शुभं तथापि युद्धकार्यं नोपदेशस्ते नमो

प्रति १ योग्योयस्मात्पुरातस्यकर्मोहेपत्रयोदितः तस्यकर्तृत्वरूपोहमिति
ज्ञानेपुनर्भवेत् २ पुंडहत्वायफलंभोक्ष्येइतिज्ञानेविरोधतः तस्मात्रैयोगा
धेनमोप्रतिज्ञानकर्मणोः ३ उपदेशःकथंयोग्यःस्यादित्यत्राहमाधवः ज्ञा
नकर्मोपदेशःस्याद्वस्थाभेदतोयतः ४ एकंमत्वापिशास्त्रीयोव्यवस्थानु
सारतोजन ततेवेत्यनआरभ्यतभ्यमेषापुरोदिता ५ तत्त्वसंख्यायतेसर्वो
पाधिस्वत्वतयातया संख्योपनिषदेतस्याप्रतिपाद्यःपरःपुमान् ६ सांख्य
लब्धात्रविषयेज्ञानंमत्वाननाशक्ये मयोक्तंत्वाप्रतीस्येवंज्ञानितःकर्मतोपि
ते ७ यद्येवंतेमदुक्तेर्थेचित्तदोषात्त्वयीर्भवेत् तदानदोषनाशार्थंतत्
ज्ञानोदयायच ८ कर्मयोगोस्यनष्टेयस्तयाशुद्धिकारकः तस्मिन्यो
गेतकर्तव्यामिमोनैष्कर्म्यशालिनी ९ सर्वत्रसमतारूपोबुद्धिर्नि
विस्तराद्गुणः तन्नाबुद्धेःपुरोक्तायाभेदैःस्याःसूच्यतेधियः १० तेन
शुद्धधियोज्ञानेकर्मोशुद्धधियःस्मृते यथानिश्चयरूपिण्याबुद्ध्यानिबं
धुक्तःस्वकर्मसु ११ वैधंकर्मतिमित्तंत्वमाशयाशुद्धिलक्षणं प्रतिबंधं
निजज्ञानेप्रकर्षेणैवहास्यसि १२ धर्माधर्मात्मकंकर्मैववर्धयन्तंप्रहा
स्यसि ईशप्रसादतस्तत्त्वज्ञानलाभसुखेनवा १३ ॥ ३९ ॥

नीलकंठीटीका

एवमर्जुनस्यसर्वोक्तौहावपिमोहावपनीतौ तत्रकर्मज्ञानयोरिहं
कर्मेतिकर्तृत्वकार्येति त्वयोरात्मन्यसंभवदुक्तः ततोबुद्धायपुनः
लब्धिनियोगस्वाद्वानेः तस्यकर्तृराकाशवत्सर्वगतस्यातियोज्यत्वेसंभव
नीतिपरस्परव्याहतमेतदितीमामाणिकोप्रियकारिभेदेनउभयोज्ञान
वस्यापयत्परिहरति प्रधानेति प्रधानेनत्र्यंसमभिहितास्तृणोप्यनकाण्ड
गुणोश्चेत्यादिनात्वंयमर्मपिचावेष्टियतःआक्षेनसैदर्भेलोक
मारव्येसम्यक्ख्यायतेप्रकाश्यतेवस्तुतत्त्वमनयेतिसंख्या पनिषत्तसं
तत्रविदितेसांख्येसौपनिषदेब्रह्मणिविषयेबुद्धिर्ज्ञानंसंसारनिवर्तकं
प्रधानेसांख्येबुद्धिरभिहितेतिसंबंधः योगोपि स्थ्यापि सुखेोः समीभूत्वा
समत्वंयोगउच्यतइति वक्ष्यमाणलक्षणेविषये तच्छब्दःसर्वेषांलोके
एषघोननार्थः वक्ष्यतिचतत्तानकर्मनिष्ठयोर्विभित्राधिकारितां
तद्विधानिष्ठापुराप्रोक्तामयानघ ज्ञानयोगेनसांख्यानांकर्मयोगेन

योगिनामिति एतेन ज्ञानकर्मणोः समुच्चयपक्षोप्याख्याता इमां स्वय
मेमपि चावेदस्यमित्यादिनाऽनेन ग्रन्थेनोक्तामपि विस्तरेणाभिधीयमानो
ऽरुण इमामेव बुद्धिं स्तौति सार्धेन तु कुर्वन्नित्यादिना नत्कर्मबंधप्रहा
णमात्मज्ञानेनैव श्रूयते तमेवात्मपदं विदित्वा न लिप्यते कर्मणा पा
पकेनेति श्रुतेः कर्मयोगस्तु कर्मबंधं दृढीकरिष्यत्येवेति कथमुच्यते
कर्मबंधं प्रहास्यसीति चेन्न श्रुतिबलादिति ब्रूमः तथाहि ईशावास्यमिदं
सर्वं यत्किंचिज्जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा गृधः कस्यचिद्धनं
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतोऽस्ति न क
र्म लिप्यते नरे इति श्रुतिरीश्वरीश्वरेणेदं सर्वं संभितमस्तीति न कश्चित्किं
२४ चित्स्वयाकर्तुं प्रभवति अतः सर्वत्र समतामहीनः सन् भोक्तृत्वकर्तृत्वा
भिमानत्यागेन भोगान् भुंक्ष्व कर्माणि च कुरु एवं कुर्वति त्वयि कर्मलेपो ना
स्तीत्यतोऽन्यदुपायान्तरं च नास्तीति वदति न स्मर्तृ कनककामनीयसादिवत्
केन विहिणोघरूपो णोपेतेन कर्मैव सजातीयोच्छेदं इति मित्रं भविष्यतीति
युक्तमतः कर्मयोगेनापि कर्मबंधं प्रहास्यसीति ३४ ॥ ॥

244

ज्ञानेश्वरी टीका

यदिनिष्कामनयानुष्ठेयस्यास्यफलंकिमपिनशाध्यंतद्यर्थमेत
द्दृष्टानमितिशंकापनोदायाह ज्ञानसमुचितकर्मानुष्ठेनस्यश्रे॰
यः शास्त्रिरेवफलमित्युपदेशादेहिदेहयोर्नित्यानित्यविचार
णयाज्ञानविषयामतिसुदृढपूर्वककर्मविषयांलक्षयित्वमुपक
मते सांख्यसम्पदेहिदेहयोर्नित्यानित्यविचारणाजेदेन वाप
नेज्ञानेपधाबुद्धिस्तवोक्ता त्वपुनःयोगेयुक्तोकर्मणःकरणश्र
कौरफलाकांक्षाविनानुष्ठानेयथायोगबुद्ध्यायुक्तस्समुचि॰
तःकर्मणाबंधबंधकत्वंत्यक्ष्यसि फलाकांक्षांविनावश्यपूर्वकं
कर्मकृतेनबन्धकंनभवतीत्यर्थः ॥ १५ ॥

रामकंठी टीका

निश्चित्यज्ञानविषयांमतिसुक्तकल्याणमत्वा तांक्रियाविष
यावत्कर्मसूपक्रममाणस्त
प्रवज्ञानकर्मणीसांख्ययो
गशब्दाभ्यांव्यवहरन्नाह +
ज्ञानक्रियासमुच्चयमेवोपदेश्यतयावि

इदमात्मादिसत् इदंदेहादिग्रसत् इतिहेयोपादेयपदार्थपरि
गणनासंख्यानामधिकृत्यकृतंशास्त्रमन्वर्थंतयासुसंख्यंसांख्य
मिस्राप्यते तेऽत्रकंज्ञानमपिसांख्यंनतुकपिलादिप्रणीतं॰
नस्यनानात्मवादपरमार्थत्वात् तस्मिन्सांख्यविषयेपधाप्रबंधे
नश्रतिपादिताबुद्धिः प्रज्ञातवोपदिष्टा यथायज्ञतया तत्सांख्ये॰
सम्यग्युज्यतेबुध्यतेवा उक्तज्ञानसमधिगम्यनपरमार्थलक्षणे
नार्थेसंबंधोयोगः तेडत्वात्कर्मैवयोगशब्देनेहोक्तम् नहि
केवलस्यज्ञानस्ययोगार्थसंबंधहेतुत्वंसंभवति किंतुतद्युग
नस्यकर्मणएववतिप्रबन्धेनवक्ष्यते इत्येवंविधेयोगेकर्मणीमा
वक्ष्यमाणांबुद्धिंशृणु प्रवधारय यथाकर्मैवतत्त्वतोमोक्षकारणं
तया विज्ञायनेतत्पवाह यथावक्ष्यमाणयाबुद्ध्यायुक्तःसन्
कर्मकृतेनज्ञानेनविषयबन्धमस्वाम [illegible]
मि [illegible]
[illegible]
॥ १५ ॥

[illegible] टीका

लोसिकी

शोकापनयनायस्वयममपिचावेक्षेत्यादिभिःश्लोकैःशास्त्रमि॰
कौलौकिकोन्यायउक्तो नततात्पर्यंणेति प्रकृतेपरमार्थद॰

गी॰
टी॰
द्वि॰

श्रीनेउपसंहरन्नेव कर्मयोगं प्रस्तौति एषेति कर्मकृतं बोधयन्नु त्पजननविषयं बोधमस्मात्ते प्रहास्यसि त्यक्ष्यसि नाहं शंकर्मा नुष्ठानमिहोपदेक्ष्यते येन सकलमुक्तजननबन्धहेतोरपि कर्मणो मोक्षहेतुत्वमेव पर्यवस्येत् यत इह बोधक्रियासमुच्चयस्यैवोपदेश्यत्वात् योगे परमात्म समाधाने इमां बुद्धिं वक्ष्यमाणां बोधं शृणु ३९ ॥

पंचोलीटीका

सांख्ययोगमुपदिश्योपसंहरन् तत्साधनकर्मयोगं अधिकरोति एषात इति हे अर्जुन एषा ते तुभ्यं बुद्धिर्ज्ञानं सांख्ये परमार्थवस्तुविवेकविषये अभिहितं तत्पुनः योगे ईश्वराराधनार्थकर्मानुष्ठाने इमां वक्ष्यमाणां बुद्धिं शृणु हे पार्थ यया योगविषयया बुद्ध्या कर्मबन्धं धर्माधर्मलक्षणं प्रहास्यसि त्यक्ष्यसि ३९

रसावीरमसिद्धोधिनी ॥

एषेति संख्याति संकलयति योऽर्थमिति संख्यं शुद्धं आत्मस्वरूपम् ... तेइति सूत्रेणकः तत्र वदीयते कार्यमवद् इत्यधिकारे कुश ... भ्याकिति सूत्रेणाण् प्रत्ययान्ततया सांख्यमात्मा तत्प्रतिपादक ... तादिस्थापनाया नवतु हि निश्चयात्मिकोक्ता एषेव वच यथा योगो ... मकौशलं व्यवहारादिस्थापनारूपे प्रयुज्यते तथैव सावधानवितो ... व श्रवणबुद्धाकर्मणां च बन्धत्यागात्कर्माभावाभिमानेन किं धर्मा ... नां बंधं गुरूनहत्वा हि महानुभावानित्यादिरूपं विरतिसंधा ... नउत्तमिव तं त्यक्ष्यसीत्यर्थः ३९ ॥

मधुभाष्य

३९ ॥

245

रामचंद्रसरस्वतीटीका

प्रधानइति सम्यक्ख्यायतेप्रकाश्यतेऽस्मिन्नात्मतत्त्वमनयेति संख्याने
त्वेत्तानेनमस्तंवैधीसांख्यः प्रत्यगात्मानहिषयाबुद्धिरेषा वेदाविना
शिनंनित्यंयएनमजमव्ययमित्यादिभिरभिहिता इदानींयोगेतक
र्मयोगेत्वयेतिनेश्रु संभावनाविपरीतभावनोपलतांतःकरणाध्य
॥ धीमिमांनिष्कामतयाकर्मणिकृतेऽस्याशयशुद्धिस्ततोज्ञानेनमुक्तिरिती
मोपदृसंबंधितयाइदानींभक्तांबुद्धिंशृणुश्रवधारयेतिमाख्येयतामे
वपथानफलसंबंधेनस्तौति बुध्येति ययानयाबुध्यायुक्तःसकलकर्म
कृतबंधंप्रहास्यसि अनयाबुध्याकर्मणिकृतेज्ञानायामाशयशुद्धौप्र
शुत्पन्नादात्मतत्वज्ञानान्मोक्षोभविष्यतीत्यर्थः सर्वेषांकर्मणांविना
नोसत्वौविविदिषोत्पत्तौवासंयोगपृथक्त्वेनविनियुक्तत्वान्नत्रवाशय
शुद्धेरविहारत्वादितिभावः ननुकर्मजन्माशयशुद्धिः तयवतीभवेत
ततश्चनत्वयेत त्रिभिर्वैस्तानमपिनभवेत् कर्त्रादिवैगुण्येऽपिवाप्रत्यवा
यःतःकर्मस्यात् नचसाकल्येनाहेकर्मणापनष्टातुहमइत्याशंक्याह ॥

भाषाअनुवाद

सर्वकथितजोज्ञानयोग उसकोकहिकरि अबउसका साधनजो कर्म्मयो
गसोकहतेहैंकि वस्तुओं तत्वको प्रकाशकरनेवाला सांख्यनामक तत
ज्ञान तुमसेकहागया अर्थात तत्वज्ञानके विषयमेजोबुद्धिसोमैंने तु
मकोकहाहै इससेजोतुमारेतत्वज्ञानका बोधनहोय तोफिरिचित्तशुद्धि
केद्वारा तत्वज्ञान उत्पन्नहोनेकेअर्थअबयह कर्म्मयोग अर्थात् कर्म्मयो
गकेविषय कीबुद्धिहमकहतेहैं सोसावधानहोसुनोकिहे अर्जुनजिस
से ईश्वरार्पित कर्म्मकेद्वाराचित्तकी शुद्धिहीकर ईश्वरकेप्रसादसे प्रत
से ज्ञानकोप्राप्तकरि अर्थात्पापकरिइस बन्धसे अनायास अर्थात्सह
जमेछूटि जाउगे ३९ ॥

दोहा

यह कहीतो मति सांख्यमे योगविषैं सुनयाहि पार्थजिह
बुद्धियुक्त तेकर्मबंधनजयाहि ३९॥

नेहाभिक्रमनाशोऽस्तिप्रत्यवायोनविद्यते स्वल्पम
प्यस्यधर्मस्यत्रायतेमहतोभयात् ४० ॥

शांकरभाष्य

किंचान्यत् नेहाभीति नेहमोक्षमार्गे कर्मयोगे अभिक्रमनाशोऽभिक्र
मणमभिक्रमःप्रारम्भः तस्यनाशोनास्तियथाकृष्यादेर्योगविषये
प्रारम्भस्य नानैकान्तिकफलत्वमित्यर्थः किंचनापिचिकित्साव
त्प्रत्यवायोविद्यते किंतुभवतिस्वल्पस्य योगधर्मस्यानुष्ठितंत्राय
ते रक्षति महतःसंसारभयात् जन्ममरणादिलक्षणात् ४० ॥

आनन्दगिरिकृतटीका

ननुकर्मानुष्ठानस्यानैकान्तिकफलत्वेनाकिंचित्करत्वादनेकानर्थ
कलुषितत्वेन दोषवत्वाच्च योगबुद्धिरपिनश्रद्धेयेति तत्राह किंचेति
अन्यच्च किंचिदुच्यते कर्मानुष्ठानस्यावश्यकत्वे तत्कारणमिति
यावत् कर्मणासह समाधेरनुष्ठातुमशक्यत्वादनेकान्तरायस
म्भवात्तत्फलस्यच साक्षात्कारस्य दीर्घकालाभ्याससाध्यस्यैकस्मिन्
जन्मन्यसम्भवादर्धयोगी भ्रंशेनानर्थंच निपतेदित्याशंक्याह ने
हेति प्रतीकत्वेनोपात्तस्यनकारस्य पुनरन्वयात् गुणत्वेन नास्तीत्यनु
वादः यत्तु कर्मानुष्ठानस्यानैकान्तिकफलत्वेनाकिंचित्करत्वमुक्तं
तत्र हृषयनियथेति कृषिवाणिज्यादेरारम्भस्या[illegible]नियतफले स
म्भावनामात्रोपनीतत्वात् तथा कर्मणि वैदिके प्रारम्भस्यफलम
नियते पुण्यते शास्त्रविरोधादित्यर्थः यत्तुक्रमनेकानर्थकलुषितत्वे
न दोषवदनुष्ठानमिति तत्राह किंचेति इतोपि कर्मानुष्ठानमावश्य
कमिति प्रतिज्ञाय हेत्वन्तरमेवस्फुटयति नापीति चिकित्सायांहि
क्रियमाणायां व्यतिरेको वामरणे वा प्रत्यवायोपि संभाव्यते
कर्मविपाकस्य दुर्विवेकत्वात्र तथा कर्मानुष्ठाने दोषोस्तिवि
हितत्वादित्यर्थः संप्रतिकर्मानुष्ठानस्यफलंदर्शयति किंत्विति उ
त्तरार्धं व्याकुर्वन्विवक्षितं फलं कथयति स्वल्पमपीति सम्यग
ज्ञानोत्पादनद्वारेण रक्षणं विवक्षितं सर्वपापप्रसक्तोपि ध्याय
न्निमिषमच्युतं भूयस्तपस्वी भवति पंक्तिपावन इतिस्मृतेरित्यर्थः ४०॥

पावन

न तु कृष्यादिवत्कर्मणां कदाचिद्विघ्नबाहुल्येन फलव्यभिचारात् सं
भाग्यवैगुण्येन च प्रत्यवायसंभवात् अतः कर्मयोगेन कर्मैव प्रहातुं
न त्वाह नेहेति इह निष्कामकर्मयोगे अभिक्रमस्य प्रारंभस्य नाशो निष्फ
लत्वं नास्ति प्रत्यवायश्च न विद्यते ईश्वरोद्देशेनैव विघ्नवैगुण्यादिसंभ
वात् किंचास्य धर्मस्य स्वल्पमपि उपक्रममात्रमपि कृतं महतो भयात्
संसारात्त्रायते रक्षति न तु काम्यकर्मवत् किंचिद्वैगुण्यादिना नैष्फ
ल्यमस्येत्यर्थः ४० ॥

पिशाचभाष्य

किंच नेहेति इह मोक्षमार्गे अभिक्रमनाशः अभिक्रमणमभिक्रमः प्रा
रंभस्तन्नाशो नास्ति यथा कृष्यादेः मोक्षविषये प्रारंभस्य नानैकांतिकफ
लत्वमित्यर्थः किंच चिकित्सावत्प्रत्यवायो न विद्यते किं न भवति स्व
ल्पमप्यस्य धर्मस्य मोक्षसाधनानुष्ठितं त्रायते रक्षति संसारभयाज्जन्मम
रणादिलक्षणात् ४० ॥

रामानुजभाष्य

व्यवसायात्मबुद्धियुक्तस्य कर्मणो माहात्म्यमाह इह कर्मयोगे नाभिक्रमना
शोस्ति अभिक्रमः आरंभः नाशः फलसाधनभावनाशः आरब्धस्य सम
स्य विच्छिन्नस्यापि न निःफलत्वं आरब्धस्य विच्छेदे प्रत्यवायो न विद्यते
स्य कर्मयोगाख्यस्य धर्मस्य स्वल्पांशोपि महतो भयात्संसारात्त्रायते
अयमर्थः पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते इत्यत्र प्रपंचयिष्य
ते अन्यानि हि लौकिकानि वैदिकानि च साधनानि विच्छिन्नानि न
हि फलप्रसवाय भवंति अन्यत् प्रत्यवायाय च भवंति ४० ॥

अभिनवगुप्तटीका

अस्यां बुद्धावभिक्रमेणोपायेन प्रमादेन नाशो न भवति प्रमादस्याभा
वात् यथा च परिमितेन श्रीखंडकणेन ज्वालायमानोपि तैलकटाहः
सद्यः शीतो भवति एवमनया स्वल्पयापि योगबुद्ध्या महाभयं संसार
रूपं विनश्यति ४० ॥

परमार्थप्रपाटीका

अथ परमेश्वरार्पणतयोक्तकर्मणि क्रियमाणे इष्टादिभ्यो विघ्नो नास्तीत्याह नेहा
भिक्रमेति इह निष्कामकर्मणि अभिक्रमस्य कर्मारंभस्य विघ्नादिभिर्नाशो
नास्ति यतस्तत्र परमेश्वर एव विघ्नहर्ता तदुक्तं त्वां सेवतां सुरकृता बहवोंतरा

पाः स्वीको विलिख्य व्रजनतां परमपदं ते नान्यस्य बहिर्हि विबलिं ददतः स्वमा
ययाथ ते पदं त्वमविनायादेविघ्नमूर्ध्नि इत्युक्तत्वात् अथ हिंसाप्रधानेक
र्मणि कथमीश्वराद्दर इत्याह प्रत्यवाय इति प्रत्यवायः पापं नास्ति अग्राबो
मीयं पशुमालभेतेत्यादिवाक्यैर्वैधबोधितत्वात् किंच अस्य परमेश्व
र. ष तानघाह्लितस्य स्वधर्मस्य स्वल्पमपि कृतं महतो भयात् संसारात् त्रायते रक्षति ननु काम्यकर्मादि यतः पुण्य तयेष्वनःसंसारप्रवणात् ४० ॥

वनमालीटीका

ननु कर्मकरणे विघ्नबाहुल्येन फलाभावप्रत्यवाययोः प्रसंगस्तत्राह
नेहेति इह निःकामकर्मणि अभिक्रमस्योपक्रमस्य नाशो निष्फलत्वरू
पो नास्ति प्रारब्धस्यांगवैकल्यादिना विघ्नैः प्रत्यवायश्च न विद्यते स्वल्प
मप्यस्य धर्मस्यानुष्ठानं महतो भयात् संसारात् त्रायते अयं भावः ब्रला
पूर्णपूर्वकनिःकामस्य कर्मणा अभिक्रम्यते कर्मणारभ्यते यत्फलं तस्य
नाशः तद्यथेह कर्मचितो लोकः एवमेवामुत्र पुण्यचितो लोकः क्षी
यत इत्यस्तु क्षोन भवति निःकामकर्मफलसंतानः करणश्रुतेः पापक्षय
स्य नाशासंभावात् अंगवैगुण्य एव हेतुकवैगुण्यं तद्धेतुकप्रत्यवायश्च न
विद्यते तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा
नाशकेनेति श्रुत्या नित्यानामेव विविदिषाहेतुत्वानेवोदिश्य इरितत्वयहारा
विहितत्वे नत्र च सर्वांगोपसंहारनियमाभावात् काम्यानामपि संयो
गपृथक्त्वन्यायेन विनियोग इति एतेपि फलाभिसंधिरहितत्वेन नैवैधीति
त्यवल्पत्वात् दर्शाज्जुहोति दध्नेन्द्रियकामस्येत्यादौ संयोगस्य दर्भोति
त्वकामस्य तयोर्विधायकस्य शास्त्रस्य पृथक्त्वेन भिन्नत्वेन दर्शो नित्य
तेकाम्यत्वे च यथा न हृदि निहन्यायार्थः नहि काम्यनित्याग्निहोत्रयो
स्यत. कश्चिद्विशेषोस्ति फलाभिसंधितदभावाभ्यामेव नकाम्यत्वनि
त्यत्वव्यपदेश इति ४० ॥

ॐ नमो वैजयंतीटीका

ननु गर्भगाधनेकदोषव्याप्तानां सकामादिरूपानंतविघ्नयुक्तानां कर्म
णां समाप्त्यभावत्वेन फलाभावत्वात्कथं कर्मयोगेन संसारनिवृत्तिः प्र
त्युतारब्धस्यासमाप्तिश्चेति प्रत्यवायदोषपवभवेदित्याशंकायां का
म्यनिषिद्धाभ्यां विरहितस्य निष्कामस्य कर्मणः श्रेष्ठत्वमाह नेहाभि
क्रमनाश इति इह भगवदर्पणरूपे फलानुसंधानरहिते कर्मयो
गेऽभिक्रमनाशः अभिक्रम्यते क्रियया प्रारभ्यते यत्फलं सोऽभिक्रमः त

स्य नाशः फलाभावो नास्ति यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र
पुण्यजितो लोकः क्षीयत इत्यादिश्रुतिवाक्यैः क्षीणे पुण्ये मर्त्यलोकं वि
शन्तीत्यत्रैव वक्ष्यमाणत्वाद्यथा काम्यकर्मणः फलक्षयः श्रूयते तथा नि
ष्कामस्य फलनाशो नास्तीत्यर्थः प्रत्यवायश्च कदाचित्केनापि विघ्नादिना
स्य कर्मयोगस्य विच्छिन्नत्वेपि इह प्रत्यवायः मन्त्राद्यंगवैगुण्यनिमित्तको
दोषविशेषो न विद्यते यतोस्य निष्कामत्वेन भगवदाराधनविषयत्वे
नैव सर्वदोषोपशमनकत्वम् यस्मादेवं तस्मादस्य भगवत्परिच
र्यात्मकस्य धर्मस्य स्वल्पमपि अनुष्ठितं लेशतरमपि महतो भयात्
गर्भजन्मजरायुवस्थाद्यनेकविधाधिव्याधिजन्यदुःखपुंजरू
पसंसारात् त्रायते रक्षति यथा ब्रह्मरुद्रेंद्रादिदेवोपासकानां तत्तल्लो
कावाप्तये महता कष्टरूपेण यज्ञाद्यनुष्ठानेन तोषितानामप्यय
तत्तदनुष्ठानस्य देशकालमन्त्रद्रव्याद्यंगानां निर्विघ्नेन परिपूर्णत्वे सा
हितत्वेसितत्वेहि तत्तल्लोकं प्राप्य पुनः पुण्यफलक्षये सति तत्तल्लोकात्
पतन्ति यदि वा तस्य देशाद्यंगपूर्तिर्न स्यात् तर्हि ते प्रत्यवायदोषभागिनो
भवन्ति तथास्य भगवद्धर्मस्यानुष्ठातारो न भवन्ति तेषामारब्धस्या
मासस्यापि कर्मणः फलं भवत्येव यच्च कदाचित् देशाद्यंगाभावे
महद्धर्मोऽशिथिलत्वेन तेषां प्रत्यवायदोषोपि न भवेदिति भावः ॥४०॥

मधुसूदनीटीका

ननु तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा
नाशकेनेति श्रुत्या विविदिषायां ज्ञाने चोदिष्टः संयोगपृथक्त्वन्यायेन स
र्वकर्मणां विनियोगात् तत्र चान्तःकरणशुद्धिद्वारेण कर्मणां प्रतिकर्मा
नुष्ठाने विधीयते तत्र तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पु
ण्यचितो लोकः क्षीयत इति श्रुतिबोधितस्य फलनाशस्य संभवात्
ज्ञाने विविदिषायां चोदिष्टः क्रियमाणस्य यज्ञादेः काम्यत्वात्सर्वांगोपसं
हारेणानुष्ठेयस्य यत्किंचिदंगासंपत्तावपि वैगुण्यापत्ते
दिवाकर्विहितानां च सर्वेषां कर्मणामेकेन पुरुषेणानुष्ठातुम
शक्यत्वात् अतः कर्मयोगानुष्ठानं न श्रेयः
इह भगवान् नेहाभिक्रमनाशोऽस्तीति फलप्रत्याशेत्यर्थः
नाशः फलाभावो नास्तीत्यादिना प्रतिपादितः इह निःकामकर्मयोगे नाभि

पतत्फलस्य शुद्धेः पापक्षयरूपत्वेन लोकशब्दवाच्यभोग्यत्वाभावेन चक्र
याः संभवात् वेदानुवचनेनेत्यादिविविदिषायाः कर्मफलत्वादेतस्य
वाक्यविधानेनाज्ञातत्वेन निहत्य फलजनकस्य फलमजनयित्वा नाशासं
भवादिह फलनाशो नास्तीति साधूक्तं नेहेति। तथा चेहेति यानि दास्य
फलेन तत्कर्मणि फले कोऽत्र परित्यज्य कृते कर्म विशुद्धिहृदि त न
याप्रत्यवायः श्रेगवैगुण्यनिर्वचनं वैगुण्यमिह न विद्यते तमिति
वाक्येन नित्यानामेवोपात्तदुरितक्षयद्वारेण विविदिषायां विनियोगा
त् तत्र च सर्वांगोपसंहारनियमाभावात् काम्यानामपि संयोगपृथ
क्त्वन्यायेन विनियोग इति यत्तेपि फलाभिसंधिरहितत्वेन नैष्ठिनित्य
त्वात् न हि काम्यनित्ययोर्विरोधयोः स्वतः कश्चिद्विशेषोस्ति फ
लाभिसंधितदभावाभ्यामेव तु काम्यत्वनित्यत्वव्यपदेशः इदं च
प्रदर्शितं वार्तिके वेदानुवचनादीनामैकात्म्यज्ञानेतमेतमिति वाक्य
नेन नित्यानां वक्ष्यते विधिः यद्वा विविदिषार्थत्वं काम्यानामपि कर्मणां
तमेतमिति वाक्येन संयोगस्य पृथक्त्वत इति तथा च फलाभिसं
धिना क्रियमाणेष्वेव कर्मणि सर्वांगोपसंहारनियमात् हि लक्षणेषु
त्वर्थकर्मणि प्रतिनिध्यादिना समाप्तिसंभवान्नांगवैगुण्यनिमित्तः
प्रत्यवायोस्तीत्यर्थः तथास्य शुद्ध्यर्थस्य धर्मस्य तमेतमित्यादिवाक्य
विहितस्य मध्ये स्वल्पमपि संख्येतिकर्तव्यतया वा यथाशक्ति भ
गवदाराधनार्थं किंचिदप्यनुष्ठितं सन्महतः संसारभयात्त्रायते भ
गवत्प्रसादसंपादनानुष्ठातारं रक्षति सर्वपापप्रसक्तोपि ध्यायन्नि
मिषमच्युतं भूयस्तपस्वी भवति पंक्तिपावनपावन इत्यादिस्मृतेः
तमेतमिति वाक्ये समुच्चयविधायकाभावाच्छ्रद्धाशुद्धितारतम्या
देवानुष्ठानतारतम्योपपत्तेर्युक्तमुक्तं कर्मैवं प्रशस्यसीति ४०॥

सपानंदीटीका

श्रुत्या तमेतमित्यादिगिरा विविदिषाधियो। उभे उद्दिश्य संयोगपृथ
क्त्वात्सर्वकर्मणां १ विनियोगः कृतस्तत्र धीशुद्धेर्द्वारभावतः तथा
मोक्षस्य त्वनुष्ठाने कर्मणां च विधीयते २ नयप्येहेति वाक्येन फलना
शस्यासंभवात् शुभत्वादिफले कर्मे काम्ये सर्वांगसंयुते ३ प्रत्यवेय
वायः किं विगुणे त्याय तस्तत्र वैगुण्यं किं चैकेन नरेण च
प्रकृति विदंगासपन्ने हेतुके स्यायतस्तत्र वैगुण्यं सर्वेषामायुषोंतेप्यशक्याः
प्रसेनेत्यादिवाक्येन विहितानां हि कर्मणां

नाशी

ति नजन्मः१

गी॰
टी॰
हि॰

त्वात्कर्त्तव्यमेवच ५ वेदं महात्म्यमीत्येवं फलस्याशाकृतो मम ३
त्यागं कारणं भगवान्नारायणउदाहरति: ६ इह निष्कामकर्मस्वेवं
योमार्गे सुनिश्चिते अभिक्रमः कर्मफले कर्मणामारभ्यते यतः ७ तत्प
ये देहेति वाक्येन तस्य नाशो न हीरितः यतस्तत्फलस्य परीसृष्टे भोग्य
त्वाभावतोपि च ८ नचेष्टे हेति या निंदा सा फलेन तु कर्मणा फले
ष्वात परित्यज्य कृतं कर्म विशुद्धिकृत ९ प्रत्यवायो गवैगुण्येहेत
वैगुण्यमत्र तु नमेतनमितिवाक्येन निस्मानां विनियोगतः १० शुभ
त्सोपि निहेतुत्वे काम्यानामपि कर्मणां संयोगस्य पृथक्त्वात्तु फलसं
विवर्जनात् ११ एकस्य तूभयार्थत्वे स्यात्संयोगपृथक्त्वतः अत्र विनि
स्यव्रतपस्य पुमर्थत्वं यथेष्यते १२ नहि कश्चिद्विशेषोस्ति काम्यनि
त्यहोत्रयोः स्वतः किंतु फले बाधा भावाभ्यां कृता भिदा १३ इत्थं
द्वयंन्यस्तं वार्तिके श्रीसुरेश्वरैः वेदानुवचनादीनामैकात्म्यं तान
ते १४ नमेतनमितिवाक्येन निस्मानां वस्तते विधिः यदा विविदिषार्थं
त्वे काम्यानामपि कर्मणां १५ नमेतनमितिवाक्येन संयोगस्य पृथक्त्वतः
तथा च काम्यकर्मापि सर्वांगैः संयुतं यतः १६ फलाभिसंधिनाकार्यं त
निष्कामबुद्धिना एवं सत्यंगवैगुण्ये हेतुकः प्रत्यवायकः १७ नास्त्ये
तस्य शुद्ध्यर्थस्य कर्मणः शुद्धिकारिणः शुद्ध्यर्थस्यास्य धर्मस्य स्वल्पम
प्यकर्मस्य १८ नमेतनमितिवाक्येन विहितेष्वप्यनुष्ठिते यथाशक्ति
राध्ये सत्त्वायने संसृते र्भयात् १९ हरिप्रसादसंसिद्धा कर्त्तारं परि
ति सर्वपापप्रसक्तोपि ध्यायन्निमिषमच्युतं २० भूयस्तपस्वी भवति
पंक्तिपावनपावनः इत्युक्तत्वात्तोहेतोः कर्मैवं यं महात्म्यमिति २१ ॥ ४० ॥

नीलकंठीटीका

एतदेवोपपादयति नेहेति इह कर्मबंधप्रहाणार्थे कर्मयोगे त्वनुष्ठीयमाने
अभिक्रम्यते आरभ्यते इत्यभिक्रमः कर्मारंभः कर्मैव वा तस्य नाशो नास्ति
अन्यत्तु फलं दत्वा नश्यति न त्विदमिष्टफलस्याजननात् नचैतत्सम
पि काम्यांतःपातित्वान्नित्याकरणजनितः प्रत्यवायउत्पद्यते
दनुष्ठितस्य बंधप्रहाणप्रत्यवायपरिहाराख्यफलद्वयहेतुत्वाद्विनि
योगादित्याशंक्याह प्रत्यवायो न विद्यत इति तमेतं वेदानुवचनेन ब्राह्म
णा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुत्या संयोगपृथ
क्त्वन्यायेन दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिश्रुत्या अनित्यस्य ब्रह्मवेदनार्थयो
ने

मिव नित्यानामपि कर्मणां विविदिषार्थत्वे विनियोगबलात्सिध्यति न
तु स्वकाम्यैर्नैव प्रयोगेणानित्यस्यापि सिद्धेर्नित्याकरणनिमित्तो वा का
म्यानामवैगुण्यानुपसंहारनिमित्तो वा प्रत्यवायो विद्यते नित्यानामेव वि
नियोगात् इह च यथाशक्त्युपबंधस्यानुज्ञानात् वार्त्तिके तु काम्याना
मप्यत्र विनियोगो दृष्टः यथा वेदानुवचनादीनामैकात्म्यज्ञानजन्मने तमे
तमिति वाक्येन नित्यानां कृत्स्ने विधिः यद्वा विविदिषार्थत्वे काम्यानामपि
कर्मणां तमेतमिति वाक्येन संयोगस्य पृथक्त्वेन इति प्रसिद्धत्वे काम्या
नामपि तस्य फलत्वान्नित्यवद्यथाशक्त्युपबंधो भविष्यतीति न सर्वांगा
नुपसंहारजनितः प्रत्यवायो विद्यते स्वल्पमप्यस्य योगधर्मस्यानुष्ठिते
अनुपभुक्तबीजकल्पं जन्मजन्मांतराभ्यस्ते दानमध्ययनं तपः तेनैवाभ्या
सयोगेन न तस्यैवाभ्यसने पुनरिति स्मृतेरुत्तरोत्तरसंस्कारापादनद्वारास्म
गानीयद्वहेतुनिमित्ते सत्कामादिदोषवत्त्वपगद्वारा महतो भयात्संसारात्त्रा
यते तस्मात्त्वयानधिकारिणा कर्मयोग एवानुष्ठेय इति भावः ४० ॥

आनंदी टीका १

इहावश्यकेकर्मणिफलाकांक्षांविनाक्रियमाणेभिक्रमस्या
नुष्ठानस्यनाशोनिष्फलत्वंनास्ति अननुष्ठानादिप्रत्यवायः
विहिताकरणादिवमोक्षप्राप्तिप्रतिबंधकोविघ्नोनविद्यतेन
जायते यतः अस्यस्वकर्मानुष्ठानस्यस्वल्पमपिलेशोपिमहतः
लोभयादनवरतंजन्ममरणादिसंसरणभयाद्रक्षति अतोप
देशासर्वस्वज्ञानकर्मसमुच्चयेवाचकक्षतिस्तीनोप्राप्ति
विलानांसर्वासामर्थोऽसन्त्येयः ४० ॥

लसंमहफजनवंधहेतोरपिकर्मणोमोक्षहेतुत्वमेवपर्य
वसानयतएवास्यकर्मयो
गस्यचित्तवृत्तिनिरोधल
क्षणयोगातिरिक्तशक्ति
तोऽप्रतिपादयितुमाह +

रामकंठी टीका

+ महर्शक्रियाऽनुष्ठानमिहोपदेदत्याह तदेवनमक
+ इहास्मिन्नकालेकर्मयोगेचित्तवृत्तिनिरोधलक्षणयोगवदे
भिक्रमनाशोनास्ति सहियथोपदिष्टक्रमस्याभ्याससमस्तसं
मिकाभिर्निर्वर्त्यस्वरूपत्वात् पूर्वपूर्वभूमिकानामनन्तरभा
वेनानरभूमिकारोहणरूपक्रमोल्लंघनलक्षणेतिक्रमे सति
विनश्यति स्वरूपमेवनलभते सतादृशोविनाशइहयोगस
मनन्तरवत्त्वमाणोपपन्नानविद्यते तथा तत्र ततदंगवैकः
ल्यादसम्यगनुष्ठितोवाध्यादिर्वर्तमानशरीरानुभवनीयः प्रत्यवा
योगेवासस्वप्रदुःखादिभिर्विघ्नकरीरानुभवनीयःप्रत्यवा
यानन्द्रयोगः संभवति यतः पूर्ववत्सोपिनविद्यते यतोस्य
धर्मस्ययथोक्तज्ञानपूर्वकतया शास्त्रचोदितस्वकर्मानुष्ठा
नसमाधिरूपस्यसदाचारविशेषस्यसंबन्धिस्वल्पमपिपरिमि
तकालवानुष्ठितेस्वरूपमहतःसमस्तभयहेतोरनात्मन्या
त्मत्वत्यलक्षणाद्भयात्साधसादनुष्ठातारंयोगिनंत्रायतेपरि
रक्षति अनन्तनूसंबन्धंतिरस्करोतीत्यर्थः यत्रहियर्मेसत
तमननमितिसमस्तवस्तुष्टैकहेतुसामान्यसंविद्रूपपर
मकाशैकलक्षणस्वात्मप्रत्यवमर्शोनिरूहलवः समाधिःसमु
द्भिमानेतेनवनिर्वर्त्यसंपूर्णस्वरूपोविधीयते सचविभातमा
ऽशः समस्तफलसंपादयति तथाचवक्ष्यति स्थित्वास्यामंतका
लेपिब्रह्मनिर्वाणमृच्छतीति नतोस्मिन्पूर्वापरक्रमाभावलक्षणः
मिकाःसंपाद्यचित्तवृत्तिनिरोधलक्षणयोगवद्विनाशप्रत्यवा

गी॰
टी॰
हि॰

यौनसंभवतः नचास्यप्रस्तुतस्यकर्मयोगलक्षणस्यधर्मस्य
प्रकर्षप्रतिपादनाद्विरोधः योगस्यसर्वात्मनापरिहारोवगं
तव्यः सप्ततंतुतन्त्रानादिक्रियाविशेषवत्सर्वोपरस्मादि
नियतकालाद्नुष्ठेयतयानियतेतिकर्तव्यताकोनभवेत्
व [illegible]
[illegible]
[illegible] ध॰ ॥

लासिकी [illegible] टीका

अस्यकर्मयोगस्यचित्तवृत्तिनिरोधलक्षणयोगातिरिक्तशक्ति
नोप्रतिपादयति नेति चित्तवृत्तिनिरोधलक्षणयोगवद्भा
क्रमेणातिक्रमेणप्रमोदेननाशश्चात्मनोदर्शनेपरामर्शोभा
वोनास्ति अन्यत्रयोगेचित्तवृत्तिनिरोधएवमन्तेस्वात्मपराम
र्शोनान्यसाधनो ध॰ ॥

पंचोलीटीका

अत्रफलव्यभिचारप्रत्यवायादिकमपिवैगुण्यकृतंनसंभावितंकृषि
यागादिवदित्याह नेहाभिक्रमेतिइहमोक्षमार्गेकर्मयोगेअभिक्रमः
प्रारंभः तस्यकृष्यादिवन्नाशोनास्तितथापिचिकित्सावत् इहमोक्ष
मार्गेकर्मयोगेप्रत्यवायोनविद्यतेनास्ति अस्ययोगधर्मस्यस्वल्पमपि
अनुष्ठितंमहतोभयात्संसारभयात्रक्षति ध॰

रणवीरसमिद्बोधिनी ॥

नेहेति इहास्यांसर्वनिवृत्तिजायांबुद्धावपिक्रमेणसंबंधिवांध
दननृपापपरायेनप्रमादेन नाशोनास्ति प्रमादस्याभावात्
तथाप्रत्यवायःपातुबलोकर्षोपिनास्ति मदनुग्रहादिति
एवमनयाएतमात्रयासदसद्विवेकयाद्विरूपाबुद्ध्यामहाभयं
तत्स्वदेहप्रविप्रपकर्षंभेत्स्यामीतिचिंताकुलत्वं विनश्यति बुद्धि
नानिदुर्मेधानामपिवृद्धानांभेदस्यस्वकरत्वात् ध॰ ॥

अथ भाष्य

ध॰ ॥

नेहेति अभिक्रमणे प्रारभ्यते यत्कर्मणो नस्य नाशो यस्तं इत्येहेत्यनेनो
क्तः सदृहनालिलोकशब्दवाच्ययोग्यताभावाच्छिन्नश्च देंग्र तोक्तानोदृशेनक
र्मविधानान्नप्यानुपपत्त्यावीतरद्यापारूपकल्पमानांतःकरणशुद्धिः
कथंसकार्योवात्तयंगच्छेदिति भावः नत्वनेकशेषरावाद्यैः तद्यथेहे
तियानिंदासायफलेननुकर्मणिफलेच्छांनुपरित्यज्यकृतेनकर्मविशुद्धि
कृदिति प्रत्यवायइति काम्यपदवकर्मणिसकलांगोपसंहाररउक्तः न
वमप्येवेति भावः नचसाकल्येनकर्मणाशयश्चैवकर्तव्यानीतिनियमो
स्तीत्याह स्वल्पमपीति अस्यकर्मात्मकस्यापियधर्मस्ययत्स्वल्पमपिकर्म
रूपंसंख्ययेतिकर्तव्यतयावानन्महतोभयात् संसारसर्पसमन्यात्त्राय
तेअतोनसर्वा कर्माण्यवश्यंकर्तव्यानीतिभावः ननुयथाकर्मजैद्वै
नानाकर्माणिक्रियंतेनथाज्ञानार्थिभिरपिक्रियंतांतथाचयज्ञेनदाने
नेत्यादिदर्शयति यस्यैतेष्टाव सर्वेशान्तेकाराद्यभिक्रयतेइत्याशंक्या
ह ४० ॥ ४० ॥

भाषाअनुवाद

औरजोकहोकि जैसे खेती औ वनिज वैपार आदिकर्मोंमे कदाचित्कहे
कभूंकभूं विघ्नोकी बाहुल्यकहे बहुतायतसेफलकेहानिकीभी सम्भा
वनाहै अर्थात् निष्फलपरिश्रम भीहोताहै औरमंत्र अनुष्ठानकहे जप
यज्ञ आदिकमे भीविघ्न अथवा अङ्ग विकल होनेसे प्रत्यवायकहे दोष
औ कर्म्मनिष्फलहोताहै तैसेजोयहकर्म्मजोविघ्नोकेमारे हरानहोउठे
तौ कैसे कर्मबन्धकीहानीकहे नाशहोगा औरउलटादोष लगनेका
डरहैं इसवास्तेभगवानकहतेहैं कियहनिष्काम कर्म्मयोगकाआरम्भ
करनेसे जोथूरा नभीहोउठे तौभीनिष्कामकर्म्म निष्फलहोतान
ही औरइसमे दोष पापभी नहीलगताहैं जिसहेत ईश्वरको उद्देश
करि अर्थात् ईश्वरके अर्थ किये कर्ममे विघ्नहोतेहतनही और ईश्वरार
पनके अर्थ इसधर्मके थोडे आचरनसे भीवडेभयानक संसारसेरक्षा
होतीहैं अर्थात् ईश्वरार्पित कर्मरक्षाकरताहै इससेवहकाम्य कर्मकी
तरह कछुअङ्ग विकल होनेसेभी निष्फलनही होताहै तात्पर्य्य यह
कि ईश्वरार्थकर्मकरनेसे जोदोष नलगे और महत् फलहै तोमाता
न ईश्वरकी आज्ञाकरनेमे क्याकहनाहै ४० ॥

दोहा

नाहियादिक्रमनाशहै विघ्नव्यापेकोप लेशमीयाहिध
र्मकारक्षत बहुभयसोप ४० ॥

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनां ४१ ॥

शांकरभाष्य

येयं सांख्ये बुद्धिरुक्ता योगे च वक्ष्यमाणलक्षणा सा व्यवसायेति व्यवसायात्मिका निश्चयस्वभावा एकैव बुद्धिरितरविपरीतबुद्धिशाखाभेदस्य सम्यक् प्रमाणजनितत्वादिह श्रेयोमार्गे हे कुरुनन्दन याः पुनरितरा बुद्धयो यासां शाखाभेदप्रचारवशादनन्तोऽपारोऽनुपरतः संसारोऽपि नित्यप्रततो विस्तीर्णो भवति प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्चोपरतास्वनन्तभेदबुद्धिषु संसारोऽप्युपरमते ता बुद्धयो बहुशाखा बह्व्यः शाखा यासां ता बहुशाखा बहुभेदा इत्येतत्प्रतिशाखाभेदेन ह्यनन्ताश्च बुद्धयः केषामव्यवसायिनां प्रमाणजनितविवेकबुद्धिरहितानां इत्यर्थः ४१ ॥

बाधिका

आनन्दगिरिकृतटीका

ननु बुद्धिद्वयातिरिक्तानि बुद्ध्यन्तराण्यपि काणादादिशास्त्रप्रसिद्धानि विद्यन्ते तथा च कथं बुद्धिद्वयमेव भगवतोपदिष्टमिति तत्राह येयमिति वैदिका प्रमाणभूता बुद्धिरित्याह व्यवसायात्मिकेति बुद्ध्यन्तराण्यविवेकमूलान्यप्रमाणानीत्याह बहुशाखा हीति व्यवसायात्मिकाया बुद्धेः श्रेयोमार्गे प्रवृत्ताया विवक्षितं फलमाह कुरुनन्दनेति प्रकृतबुद्धिद्वयापेक्षया इतरा विपरीता अप्रमाणजनिताः स्वकपोलकल्पिता या बुद्धयस्तासां शाखाभेदः संसारहेतुस्तस्य बाधिकेति यावत् तत्र हेतुः सम्यगिति निर्दोषवेदवाक्यसमुत्थं उक्तमुपायोपेयभूतं बुद्धिद्वयं साक्षात् पारम्पर्येण संसारनिवर्तकमित्यर्थः उत्तरार्धं व्याचष्टे याः पुनरिति प्रकृतबुद्धिद्वयापार्थान्तरत्वमितरत्वं तासामनर्थहेतुत्वं दर्शयति यासामिति अप्रामाणिकबुद्धीनां प्रसक्तानुप्रसक्त्या जायमानानामतीव बुद्धिपरिणामविशेषाः शाखाभेदास्तेषां प्रचारः प्रवृत्तिः तद्वशादित्येतत् अनन्तत्वं सम्यग्ज्ञानमन्तरेण निवृत्तिविरहितत्वं अपारत्वं कार्यस्येव सतो वस्तुभूतकारणविरहितत्वं अनुपरतत्वं स्फोरयति नित्येति कथं तर्हि तन्निवृत्तिस्तत्परिसमाप्तिस्तत्राह प्रमाणेति श्रुत्यन्वयव्यतिरेकाभ्यामनुमानेनागमेन च पदार्थपरिशोधनद्वारेण परिनिष्पन्ना विवेकात्मिका या बुद्धिस्तन्निमित्तं प्रकृताविपरीतबुद्धयोऽव्यावर्तन्ते नीकृत्य सम्यक्त्वसमग्रबोधानन्दोऽयात

सुमती

गी॰
टी॰
हि॰

नात्वसंख्यातास्तु आहन्त्यांतु निरालम्बनतया संसारोऽपि स्यात्तमशान्त
वत्वपरतो भवतीत्यर्थः याः उत्तरित्रुपक्रान्ता तत्त्वज्ञानापनोद्या संसा
रास्पदीभूता विपरीतबुद्धिरनन्तकामता ताबुद्धयस्ति बुद्धीनां हन्तस्य बहु
तो बहुशाखित्वं तत्राह बहुभेदा इत्येतदिति एकैका बुद्धिमति शाख
भेदोवान्तरविशेषेण बुद्धीनामसंख्येत्वं प्रख्यातमित्याह प्रतिशाखमेवि
बुद्धीनामानन्त्यप्रसिद्धिहि प्रयोजनार्थो हि शब्दः सम्यग्ज्ञानवतो यथोक्त
बुद्धिभेदभाक्त्वमप्रसिद्धमित्याशंक्याप्रत्याह केषामित्यादिना ४१ ॥

२५३

स्वामिकृतटीका

कृतं इत्यपेक्षायामभयोर्वैषम्यमाह व्यवसायेति इह ईश्वराराधनलक्षणे
कर्मयोगे व्यवसायात्मिका परमेश्वरभक्त्यैव तरिष्यामीति निश्चयात्मिका
कैवैकनिष्ठैव बुद्धिर्भवति अव्यवसायिनां तु बहिर्मुखानां कामिनां कामा
नामानन्त्यादनन्ताः तत्रापि हि कर्मफलगुणफलादिभेदात् बहुशाखा
श्च बुद्धयो भवन्ति ईश्वराराधनार्थे हि नित्यनैमित्तिके कर्मणि किंचिदङ्गवैगु
ण्येनापि न नश्यति यथाशक्नुयात् तथाकुर्यादिति हि तद्विधीयते न
ह्येवं काम्ये कर्मणि ईश्वरोद्देशेनैव गुणोपादानमात् ततस्तथा काम्यकर्मग्रन्तो महद्वै
षम्यमितिभावः ४१ ॥

पिशाचभाष्य

व्यवसायात्मिका निश्चयात्मिका बुद्धिः सा इह योगे अव्यवसायिनां पुरुषा
र्थसाधिका अव्यवसायिनां बुद्धयो बहुशाखा बहुरूपा अनन्ताश्च भवन्ति
नताः पुरुषार्थं प्रतिसाधना इत्यभिप्रायः ४१ ॥

रामानुजभाष्य

काम्यकर्मविषयाया बुद्धेर्मोक्षसाधनभूतकर्मविषया बुद्धिर्विशिनष्टि व्य
वसायात्मिकेति सर्वेषु कर्मसु व्यवसायात्मिका बुद्धिरेका मुमुक्षुणानुष्ठ
ष्ठेयेकर्मणि बुद्धिर्व्यवसायात्मिका बुद्धिः व्यवसायो निश्चयः सा हि बु
द्धिरात्मयाथात्म्यनिश्चयपूर्विका काम्यकर्मविषया बुद्धिरव्यवसायात्मि
का तत्र हि कामनाधिकारे देहातिरिक्तात्मज्ञानमात्रमपेक्षितं ना
त्मस्वरूपयाथात्म्यनिश्चयं स्वरूपयाथात्म्यनिश्चये सति स्वर्गादिफला
र्थित्वतत्साधनानुष्ठानतत्फलानुभवानामसंभवात् विरोधाच्च सेयं
व्यवसायात्मिका बुद्धिरेकफलसाधनविषयतयैका एकस्मै मोक्षफला
यमुमुक्षुणैः सर्वाणि कर्माणि विधीयन्ते अतः शास्त्रार्थस्यैकत्वात्सर्वकर्म

विषयाबुद्धिरेकैव यथैकफलसाधनतयाग्नेयादीनां षण्णामेककर्म्यैव
तांकानामेकशास्त्रार्थतयान्तर्विषयाबुद्धिरेकान्तदृदित्यर्थः अव्यवसा
यिनांतु स्वर्गपुत्रपश्वन्नाद्यादिफलसाधनकर्माधिकृतानांबुद्धयः फला
नंत्यादनंताः तत्रापिबहुशाखाः एकस्मैफलायचोदितेपिदर्शपूर्णमा
सादौकल्पेआयुराशास्ते सुप्रजास्त्वमाशास्ते इत्याद्यवगतावान्तरफलभेदे
नबहुशाखात्वंचविद्यते अतोऽव्यवसायिनांबुद्धयोऽनंताबहुशाखाश्चप्र
युक्तंभवतिनित्यघनैमित्तिकेषुकर्मसुप्रधानफलान्यवांतरफलानिचयानि
श्रूयमाणानितानिसर्वाणिपरित्यज्यमोक्षैकफलतयासर्वाणिकर्माण्ये
कशास्त्रार्थतयानुष्टेयानिचस्ववर्णाश्रमोचितानितत्रत्कलानिपरित्यज्य
ऽतसाधनतयानित्यनैमित्तिकैरेकीकृत्ययथाबलमनुष्टेयानि ४१॥

अभिनवगुप्तटीका

तत्रैषाबुद्धिरसर्वानीयते किंतर्हि अव्यवसायात्मिकामर्दस्येकैवसहजार्थीः
निश्चेतव्यवशात्तु बहुत्वंगच्छति ४१ ॥

परमार्थप्रपाटीका

अथतदेवंप्रकटयति व्यवसायेति इह परमेश्वराराधनरूपेकर्मयोगेव्य
वसायात्मिकापरमेश्वरभजनादेवहृष्टतरिष्यामीति निश्चयात्मि
काबुद्धिः सातदेकैवएकनिष्ठैवभवति अथव्यवसायिनांकामा
त्मनांयाबुद्धयस्ताबहुशाखाः कामात्कामांतरजनकाभवंति
कामानामनंतत्वात् जायामेस्यादथप्रजायेयापपवित्तंमेस्यादित्या
दिश्रुतेश्च ४१ ॥

वनमालीटीका

तमेतमितिवाक्यविहितानांसाधनानामेकार्थकत्वमाह व्यवसायेति
हेकुरुनंदन इह श्रेयोमार्गेव्यवसायात्मिका सांख्यविषयायोगविषया
चबुद्धिरेकैवफलस्यमोक्षरूपस्यैकत्वात् अव्यवसायिनांसकामानांबुद्ध

आत्मतत्वनिश्चयात्मिका

गी॰ टी॰ हिं॰

१५४

योऽनंताः तत्रापि बहुशाखाः पशुपुत्रस्वर्गादिफलानां भेदात् ४१ ॥

ऊह्नमवैजयंतीटीका

एवं सकामकर्मिणः सकामान्निष्कामस्य माहात्म्यमधिकमुक्तेदा
नीं सकामकर्मविषयिण्या बुद्धेर्निष्कामकर्मविषयिण्या भेदोऽपि पापि
केन श्रेष्ठतामाह व्यवसायात्मिकेति हे कुरुनंदन कुरुकुलोद्भव
रहस्यास्मिन्प्रणीतो भगवदर्चनादिरूपे कर्मयोगे व्यवसायात्मिका श्रीकृ
ष्णो मां सर्वविज्ञातिरह्यति उत्तरभवाब्धेस्तारयिष्यत्येव कृत्स्नानुग्र
हेणैवममसर्वकर्मसेत्स्यति ममोपायोऽयः सर्वं कृत्स्नप्रवेश्यैव विश्वास
एवैक सर्वैकर्मफलदातरि भगवति मयि व्यवसायो निश्चयः आत्मास
रूपयस्मात्तथा मत्रि व्यवसायात्मिका या बुद्धिः सा एकैव मर्त्यैव यतोऽस्याः
नानादेवोपासनं नास्ति नानाफलविषयादिराहित्ये न सा यतनां प्र
न्यैकदैवतिष्ठतास्ति न सा अन्यैव मनः तत्त्विहपाठ प्रणीया तत्र एव सर्वे
संसारनिवृत्तिर्भवति नान्यथेत्यर्थः यत्तु अव्यवसायिनामतिस्थिरबुद्धी
नां नानादेवोपासकानां कृष्णविमुखानां नराणां बुद्धयः बहुशाखाः
धरायन पुत्रकलत्रपशुस्वर्गादिनैकाः भिन्ना बहुरूपाः शाखा इव शाखा
यासां ताः तत्रापि अनंताः भूतपतिमाराध्यते नैश्वर्यं ऐहं भविष्यामीति ततः स्वरा
भविष्यामीत्येवं मन्वथाधिपत्यप्रभृति ब्रह्माधिपत्यपर्यंतं मत्वा तेन रा
धनयाधिकं लघुपितृसमायाश्रयरिपूर्तिस्थितेन तत्रत्संतेन तेरप्यनंताचा
तोऽनंताः अनंतमनोरथानां भवन्ति अयं भावः निषिद्धवत्काम्यकर्माणां स
पापेव हरनः परित्यज्य नित्यनैमित्तिकानां भगवत्समर्पणात्मके
त्यागेन फलमात्राणां एव त्यक्तेश्वराज्ञापालनरूपेण तत्कर्मांचरन्मुमु
क्षो मोक्षमेव प्राप्नोति न तु तत्काम्यकर्माचारी इव पुनः संसारपतितो
भवतीति ४१ ॥

मधुसूदनीटीका

एतदुपपादनाय तमेतमिति वाक्यविहितानामेकार्थत्वमाह इह
यो मार्गैन मेतमिति वाक्यैर्वा व्यवसायात्मिका आत्मतत्त्वनिश्च्य

बुद्धिरेकैव चतुर्णामाश्रमाणां साध्याविवक्षिता वेदवचनेनेत्यादौ तृ-
तीयाविभक्त्या प्रत्येकं निरपेक्षसाधनत्वबोधनात् भिन्नार्थत्वे समुच्च-
यः स्यात् एकार्थत्वे विदर्शपूर्णमासाभ्यामितिवत् द्वंद्वसमासेन प्र-
ग्नेयं च प्रजापतये चेतिवद्व्यस्तेन न तथात्र किंचित्प्रमाणमस्तीत्यर्थः सा-
ख्यविषया योगविषया च बुद्धिरेकफलत्वादेका व्यवसायात्मिका सर्वे
विपरीतबुद्धीनां बाधिका निर्दोषवेदवाक्यसमुत्थत्वादितरास्त्वव्यवसा-
यिनो बुद्धयो बाध्या इत्यर्थः इति भाष्यकृतः अन्येतु परमेश्वराराधनेनैव सं-
सारं तरिष्यामीति निश्चयात्मिका एकनिष्ठैव बुद्धिरिह कर्मयोगे भव-
तीत्यर्थमाहुः सर्वथापि तत्त्वज्ञानकांडानुसारेण स्वल्पमप्यस्य धर्मस्य
त्रायते महतो भयादित्युपपत्तेः कर्मकांडे पुनः बहुशाखा अनेकभेदाः
कामानामनेकभेदत्वात् अनंताश्च कर्मफलगुणफलादिप्रकारोप-
शाखाभेदात् बुद्धयो भवंत्यव्यवसायिनां तत्तत्फलकामानां बुद्धीनाम-
नंत्यप्रसिद्धिरेवेति नात्यंतं हि शाहः अनंतः कामस्य कर्मापेक्षया महद्वैलक्ष-
ण्यं मुमुक्षार्थकर्मणामित्यभिप्रायः ४१ ॥

सदानंदीटीका

पतन्निष्ठार्थमाह शास्त्रमेतन्मितिवाक्यतः विहितानां फलैकत्वं कर्मणां
गृहिकारिणां १ श्रेयोमार्गेष्ववाक्येनमेतन्मितिवैदिके बुद्धिरेकै-
व साध्यात्मिकत्वनिश्चयरूपिणी २ चतुर्णामाश्रमाणां च सैव साध्या-
[illegible] विवक्षिता एकैव सांख्ये योगे च फलैक्यान्निश्चयात्मिका ३
सा विपरीतबुद्धीनां बाधिका वेदवाक्यजा ईश्वराराधनेनैव तरिष्या-
मीह संसृतिं ४ इत्येकैवास्ति वा बुद्धिर्भक्तानां निश्चयात्मिका इतरा-
स्त्वयियो बाध्या मिथ्याज्ञानवतां नृणां ५ कामभेदात्तथा शाखाभेदा-
त्रानाभिदायुताः संसारानंत्यहेतुत्वादनंता मूढचेतसां ६ ४१ ॥

नीलकंठीटीका

गी॰ टी॰ द्वि॰

२५

नन्वेवं सांख्ययोगयोर्महाभयात्त्राणहेतुत्वं तुल्यं चेत्कोनयोर्विशेषः इत्या
शंक्य सांख्यानां पातशंका नास्ति योगिनां तु यावद्विदेहकैवल्यं पा
तशंकास्तीत्याह व्यवसायात्मिकेति व्यवसायस्तत्वनिश्चयस्तदा
त्मिकानदाकारा बुद्धिरंतःकरणवृत्तिः अहं ब्रह्मास्मीतिवाक्यज
न्या ब्रह्माकारांतःकरणवृत्तिर्ब्रह्मविद्याभिधाना समस्तहृदयांतर
बाधेन सम्यगभ्युदितापकायकैवसकृद्विभातोह्येष ब्रह्मलोक
इति श्रुतेः ब्रह्मैव लोको ब्रह्मलोक इति ब्रह्मैव न हि सकृत्तत्वज्ञाने
स्तित्ज्ञानतः कर्तव्यं वा किंचिदवशिष्यते कृतकृत्यत्वाद्ब्रह्मविद
स्तेनोऽस्य पातशंका नास्ति अव्यवसायिनाम ज्ञानिनां तु बुद्धयोऽनंताः
नास्य सम्यक् केवलं शास्त्राणि इदमेव ममश्रेयः इति निश्चयस्य उल्लेभ
नानाकाराविद श्रेयस्यापि श्रेयो बुद्धौ सत्यां पातशंकास्तीति महांस्तयो
र्विशेष इति भावः ४१ ॥

ज्ञानेश्वरी टीका

तस्मात्समुच्चितयोः ज्ञानकर्मणोरेकस्यैव फलस्य निःश्रेयस
स्यारंभकत्वात् बुद्धिरपि समुच्चयात्मिकायैकैवेत्याह हे कुरु
नंदन इत्यश्वकारेण समुच्चिताभ्यां ज्ञानकर्मभ्यां निश्रेयसंप्रा
प्तिमिति निश्चयात्मिका बुद्धिरेकैव अव्यवसायिनां निश्चया
भावात् ज्ञानेन विना कर्मकान्तरतानाम् तथा कर्मसंन्यस्यकेव
लं ज्ञानमेवाभ्यस्यतां बुद्धयः बहुशाखाः संशयविपर्यादिभि
र्बहुप्रकारैर्भिन्ना अनन्ताश्च भवन्ति ४१ ॥

+ अभिसुविशुद्धभक्तिश्रद्धादिगुणव्यक्तिरहचित

रामकंठी टीका

विवेकजज्ञानाविर्भावोभवान्दृशोयिकृतः नसर्वः कश्चिदिति प्रतिपाद यितमाह +

+व्यवसायो निश्चयः स आत्मा स्वरूपं यस्याः सा तथा रूपा स्वभाव
तो बुद्धिरेकत्वमेव निश्चयमात्मादिसदर्थविषयोऽपि संभ
वति देहादि असदर्थविषयोऽपि संभवति अयं यो सदर्थविषयः
स निश्चयाभासो निश्चय एव न भवति अतः सदर्थविषयस्या
व्यवसायरहितानामव्यवसायिनां बुद्धयो बहुशाखा एकास्मि
न्नर्थे नानाविकल्पजालालापर्यवसिताश्च

[illegible]

४१ ॥

लासिकी ... टीका

शुद्धसदर्थात्मनिश्चयस्वभावा अस्मिन्योगे भवादृशोलब्धात्मबो
धो यिकृतो न सर्वः कश्चिदित्याह व्यवसायेति बहुशाखा अ
न्यदेहप्राणादिष्वभिमानानां नानात्वात् ब्रह्मादिकीटपर्यन्तेषु
कैव विपरीतभावनाया बाधितत्वात् ४१ ॥

पंचोली टीका

सांख्ययोगबुद्धेः इतरस्याः काम्यकर्मबुद्धेश्च वैलक्षण्यमाह व्यवसा
यात्मिकेति हे कुरुनंदन इह श्रेयोमार्गे व्यवसायात्मिका निश्चय

गी॰ टी॰ हि॰

स्वभावाबुद्धिः एकैवहियस्मात् अव्यवसायात्मिकानां अनिश्चित
बुद्धीनां बुद्धयः बहुशाखाः बहुभेदभिन्नाः च पुनः बहुशाखाभेदेन
अनंताः अंतशून्याः ४१

रणवीरसमिद्बोधिनी

तामेव बुद्धिं विशिनष्टि व्यवसायेति कुरुनंदनेति संबोधनपद
योत्यायमर्थः फलितः कोहं का क्रिया ममोचितेति विवेकशालि
नी मतिरेकैव अथवा अस्मादेव्यवसायः स्यादिति कोषान्तकुल
चितोद्यमलक्षणा बुद्धिरेकैव सहजा फलानंत्यमदेत्यर्थः अव्य
वसायिनां सदसद्विवेकनिश्चयहीनानां मतिभिन्नमतीनां देव
पराणां च बुद्धयः स्वनिश्चितानि तत्तत्प्रत्यवाय का मिकीर्वपर्त
गादिफलनिमग्नानि अतएव स्वनात्युचितोद्यमवन्त्यवेति तात्प
र्यः ४२॥

मधुभाष्य॥

व्यवसायात्मिका बुद्धिरिति सम्यग्युक्तिनिर्णितानां मतानामे
कमेवेत्यर्थः सुर वैदिकानि मतान्यव्यवसायात्मिकानि न
तु वैदिकानि तेपि हि केचित्कर्माणि स्वर्गादिफलान्याहुरित्य
तआह ॥ ४२॥

व्यवसायात्मिकेति हे कुरुनंदन अर्जुन इह ज्ञानमार्गे व्यवसायात्म
नत्वनिश्चयात्मिका एका चतुर्णामाश्रमाणां साध्यानां तस्याध्यैनाधीय
मपि विविच्य साध्यानत्वेकस्याभ्यस्तस्यानभ्यस्तस्य वा द्वित्राणां वा उपयो
गे समाने किं सर्वानुष्ठानेनेत्यत आह यदिवेन[?]द्या ब्रह्मचर्यादेव प्रव
जेदिति ब्रह्मचारिणोपि प्रव्रज्याश्रुतेस्तस्याहिताग्निसाध्यकर्माभावेन वि
विदिषासंन्यासो न स्यादिक कर्मकांडतो वैषम्यमाह बहुशाखाइति
अव्यवसायिनां तु हृदयोऽनंताफलानां बहु[?]त्वात्तनंतस्याय नंतामपि
नेत्रच्छा[?]रोक्तानां बहुत्वादिति मत्वैषम्यमिति भावः तन्नु यदि
कर्मसत्वशुद्धिद्वारात्मतत्त्वात्मिकां बुद्धिं जनयति कुतस्तर्हि सका
मैरपि क्रियमाणं स्वसामर्थ्यमामोसत्त्वशुद्धिद्वारा तादृशीं बुद्धिं ते
षामपि जनयति नहि गृहदाहकामेन दत्तोग्निर्गेहं दहत्यपि सप्रका
शकतो जहातीत्याशंक्याह ॥

भाषाअनुवाद

जोकहेकि कणाद आदि आचार्योंके मतमेज्ञानकर्म उपासनारूप
अनेकप्रकारकीबुद्धिकहीहै औरआपयहांज्ञानयोग रूप औ कर्म
रूपदोहीप्रकारबुद्धिके कहासोकैसेसंभवहोय इसअभिप्रायपर उ
करनदोनोकेभी विपरीतकरके उलटाभिन्नप्रकार कहतेहैं किहे
कुरुनन्दन अर्जुनयहईश्वर आराधनरूप कर्मयोगमे व्यवसायात्मि
का अर्थात् भगवद्भक्तिकेद्वारा अवश्यही उद्धारहोगा ऐसीनिश्च
यात्मिका कहेनिश्चयरूप बुद्धिकीनिष्ठा एकहीहै और अव्यवसा
यी अर्थात् आराधनके बहिर्मुखकामी कहे सकामकर्म करनेवा
लोकी अनन्त वासनासे अनेकप्रकारकी बुद्धिहोतीहै और उसमे
भीकर्म्मकाफल और अश्वमेध राजसूय आदि यज्ञका अङ्ग दिग्वि
जयकी भांति गुण कला आदिनानाप्रकार बहुतशाखा प्रशाखा
विशिष्ट बुद्धि उत्पन्न होतीहै परन्तुभगवत् आराधनके अर्थनित्य
कर्म्मयानैमित्तिक कर्म्मकुछअङ्ग विकलकरे अक्षरा भीहोनेसेनष्ट
नहींजाताहैं यथासाध्यकरे जितनाया जैसा अपनेसे होसके उतना
ही और वैसाहीकरो यही उसधर्मकीविधिहै ईश्वरार्पित कर्म वि
घ्न और दोषको शान्तकरिदेता इससे उसके करनेमे कदाचित् वै
गुण्य नहीहोती अर्थात् उसकोविगुणनही कहसकतेहै और
काम्यकर्म्म तैसानहीं इससेदोनोकेबीच बड़ा अन्तरहैसोएक
बुद्धिहोकेरहो ४१ ॥

दोहा

बुद्धिजो उत्साहनी कुरु नंद एककहंत अनउद्यमीकी
बुद्धियां शाखाबहुत अनंत ४१॥

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः वेद
वादरताः पार्थ नान्यदस्तीति वादिनः ४२ ॥

शांकरभाष्य

येषां व्यवसायात्मिका बुद्धिर्नास्ति तेषां यामिमामिति यामिमां व
क्ष्यमाणां पुष्पितां पुष्पित इव वृक्षः शोभमानां श्रूयमाणरमणीयां
वाचं वाक्यलक्षणां प्रवदन्ति केऽविपश्चितः अल्पमेधसः अविवे
किन इत्यर्थः वेदवादरता इति वेदवादरताः बह्वर्थवादफलसा
धनप्रकाशकेषु वेदवाक्येषु रता हे पार्थ नान्यत् स्वर्गपश्वादिफ
लसाधनेभ्यः कर्मभ्योऽस्तीत्येवंवादिनो वदनशीलाः ४२ ॥

आनन्दगिरिकृतटीका

यदि सांख्ययोगरूपैकैव प्रमाणभूता बुद्धिस्तर्हि सैव सर्वेषां चित्ते कि
मिति स्थिरा न भवति तत्राह येषामिति तेषामिमां पुष्पितां वाचं प्र
वदन्ति तयापहृतचेतसां कामिनां कामवशात्त्रिव्यवसायात्मिका बु
द्धिर्न प्रायः स्थिरा भवतीत्याह यामिमामिति इमामित्यध्ययनविधुपा
त्तत्वेन प्रसिद्धत्वं कर्मकाण्डरूपया वाचो विवक्ष्यते वक्ष्यमाणत्वं
क्रियाविशेषबहुलामित्यादौ द्रष्टव्यं किंशुकोऽपि पुष्पशाली
शोभमानोऽनुभूयते न पुनः रूपभोग्यफलभागी लक्ष्यते तेनेयम
पि कर्मकाण्डात्मिका श्रूयमाणदशायां रमणीया वागुपलभ्य
ते साध्यसाधनसम्बन्धप्रतिभानात् तेषां निरतिशयफलभागि
नी भवति कर्मानुष्ठानफलस्यानित्यत्वादिति मत्वाह पुष्पितामि
ति वाक्यत्वेन लक्ष्यते प्रथ्यर्थवत्प्रतिभानाद्बलवत्तत्त्वेन वाक्यमर्था
भासत्वादित्याह वाक्यलक्षणामिति प्रवक्तृणां वेदवाक्यतात्पर्य
परिज्ञानाभावं सूचयति अविपश्चित इति वेदवादा वेदवाक्यानि
तानि च बहूनामर्थवादानां फलानां साधनानां च विधिशेषाणां
प्रकाशकानि तेषु रतिरासक्तिस्तन्निष्ठत्वं तद्वत्त्वमपि तेषां विशेषण
मित्याह वेदवादेति कर्मकाण्डनिष्ठत्वे फलं कथयति नान्यदिति ई
श्वरो वा मोक्षो वा नास्तीत्येवं वदन्तो नास्तिकाः सम्यग्ज्ञानवन्तो न भवन्तीत्यर्थः ४२॥

गी॰
टी॰
हि॰

259

स्वामिकृतटीका

ननु कामिनोपि कष्टात्कामार्थानविहाय व्यवसायात्मिकामेव बुद्धिं किं न कुर्वन्ति तत्राह यामिमामिति पुष्पितां विषलतावदापातरमणीयां प्रकृष्टां परमार्थफलपरामेव वदन्ति वाचं स्वर्गादिफलश्रुतिं ये तेषां तया वाचापहृतचेतसां व्यवसायात्मिका बुद्धिर्न विधीयत इति तृतीयेनान्वयः किमिति तथा वदन्ति यतः अविपश्चितो मूढाः तत्र हेतुर्वेदे ये वादा अर्थवादाः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोममममृता अभूमेत्यादयः तेष्वेव रताः प्रीताः अत एवातः परमन्यदीश्वरतत्त्वं नास्तीति वदनशीलाः ४२ ॥

पिशाचभाष्य

यामिमां वैदिकीं वेदभवां नन्द्रव्यगुणकर्मणां स्वर्गादिफलोत्पादनसमर्थानां फलपूर्वभावित्वात् पुष्पमिव पुष्पं तानि च पुष्पितानि येषां पुष्पितानां प्रतिपादिका वागपि पुष्पिता तां वाचं वदन्ति अविपश्चितः अपण्डिताः वेदस्य वादो वदनं वेदवादः तत्र रताः सक्ताः वेदवादरताः वेदवाक्यप्रतिपादितस्वर्गादिफलाशापाशबद्धाः सर्वे स्वर्गादिफलादपवर्गाख्यं सुखं नास्तीति वादिनः वेदवशीलाः ४२ ॥

रामानुजभाष्य

अथ कामात्मकर्माणि हन्तारो वदन्ति यामिमां पुष्पितां पुष्पमात्रफलामापातरमणीयां वाचमविपश्चितोऽल्पज्ञा भोगैश्वर्यगतिं प्रति वदन्ते मात्रं प्रवदन्ति वेदवादरताः वेदेषु स्वर्गादिफलवादास्तेषु सक्ताः नान्यदस्तीति वादिनः तत्सङ्गातिरेकेण स्वर्गादेरधिकं फलं नान्यदस्तीति वदन्तः ४२ ॥

अभिनवगुप्तटीका

परमार्थप्रपाटीका

अथ ये कामिनो ये तां व्यवसायबुद्धिं कथं न नयन्ति एतत् तत्राह यामिमामिति यथा लोके पुष्पं हि फलोद्गमं सूचयति एवं पुष्पितां फलाभिसंधिं सूचयन्तीं वेदवाचं अविपश्चितः तत्तात्पर्यमज्ञात्वैव वदन्ति

समर्थयंति कथं नान्यदस्तीतिवादिनः एतद्व्यतिरेकेणान्यत्क्वचेतिनान्य
र्थेनास्तीत्यभिनिवेशवंतः अतएववेदप्रथ्यैवादेरतास्तत्रैवतात्पर्यमव
धारयंतः यद्वा अर्थेत्वाचरतिमाययेषवाचंस्वर्गकामफलामपुष्पामि
तिश्रुतौपुष्पफलेहिदेवधात्मेइतिनिरुक्तेः पुष्पस्थानीयदेवतोपा
सनाविषयांवाचंवेदवाणींप्रवदंतीति ४२ ॥

वनमालीटी॰

अव्यवसायिनामपिव्यवसायात्मिकाबुद्धिः कुतो न भवतिप्रमाणस्यस
र्वसाधारणत्वादित्याशंक्यप्रतिबंधकसद्भावान्नभवतीत्याहयामिमांत्रि
भिः यामिमांवाचंवदंतितयापहृतचेतसांव्यवसायात्मिकाबुद्धिर्नभवतीत्यु
त्तरेणान्वयः इमामध्ययनविधुपात्तत्वेनप्रसिद्धांपुष्पितांपुष्पितापला
शवद्गापातरमणीयांनिरतिशयफलाभावात् कुतः यतोजन्मकर्मफ
लप्रदांजन्मपूर्वशरीरसंबंधः तदधीनेचकर्मतत्तद्वर्णाश्रमाभिमान
निमित्तं तद्धेतुकफलंप्रचपश्चस्वर्गादिकंनश्वरं नान्यद्वजीवानिःकु
पाजल्लाद्वारकवटीयंत्रवदविच्छेदेनददातीतितथातां कुतएवमत
आह भोगैश्वर्यगतिंप्रतिक्रियाविशेषबहुलां अमृतपानोर्वशीवि
हारपारिजातपरिमलादिनिबंधनोयोभोगस्तत्कारणंचयदैश्वर्यंदे
वादिस्वामित्वंतयोर्गतिंप्राप्तिंप्रतिसाधनभूतायेक्रियाविशेषादर्शपू
र्णमासादयस्तैर्बहुलांप्रतिवाहुल्येनभोगादिफलायक्रियाकला
पप्रतिपादिकांवाचंवदंति अविपश्चितविचारजन्यमात्पर्यवीतस्य
न्यः अतएवचातुर्मास्ययाजिनःसुकृतंभवतीत्यादिदेवयवादोक्त
अरताः अयमेवावेदार्थइतिमिथ्याविश्वासेनसंतुष्टाः स्वर्गादेरन्यत
स्थानमोक्षादिकंफलंनास्तीतिवादिनः ४२ ॥

कृष्णमेवेजयंतीटी॰ ॥

ननुव्यवसायिनोबुद्धयः कुतोहेतोरनंताबहुशाखाश्चभवंतितेषां
व्यवसायात्मिकाबुद्धिः कस्माद्वानभवतीत्याशंकायांत्रिभिःश्लोकैराह
यामिमामिति इमामहत्त्वयंहवैचातुर्मास्ययाजिनःसुकृतंभवति अ
पामसोमममृताअभूमेत्येवरूपांपुष्पितांशिंशपापुष्पवदापातर
मणीयांवाचंयेवदंतितेयावावाश्रयहृतचेतसोतेषामव्यवसायि
नो व्यवसायात्मिकाबुद्धिःसमाधौनविधीयतइतितृतीयेनान्वयः

गी॰
टी॰
द्वि॰

एवंयेवदंतितेकेइत्यपेक्षायामाह अविपश्चितःचेतनाचेतनेस्वरस्व
रूपादिज्ञानहीनामूर्खाइत्यर्थः अतएववेदवादरताःवेदेषुवेदांतगी
तेषुस्वर्गादिफलप्रतिपादकेषुवाक्येषुयेवादाः स्तुतिरूपार्थवादास्ते
ष्वेवरताःप्रीतियुक्ताएवमेववेदस्यार्थःइत्येवंदुराग्रहेणअज्ञापशु
वल्लोभातिशयसक्ताइत्यर्थः अतएवमपियेतानान्यदस्तीतिवादि
नःपारिजातादिकुसुमामोदेनन्दनाद्यमरवनेउर्वश्यादिस्वर्वेश्या
भिःसहविहारोऽमृतपानमित्येवमादिस्वर्गभोगादिसुखादन्यत्कि
मपिमोक्षादिफलंनास्तीतिवदनस्वभावाः ४२ ॥

मधुसूदनी टीका ॥

अव्यवसायिनामपिव्यवसायात्मिकाबुद्धिःकुतोनभवतिप्रमाणस
तुल्यत्वादित्याशंक्यप्रतिबंधकसद्भावान्नभवतीत्याहत्रिभिः यामि
मांवाचंवदंतितयावाचाऽपहृतचेतसामविपश्चितांव्यवसायात्मि
काबुद्धिर्नभवतीत्यर्थः इमामध्ययनविध्युपात्तत्वेनप्रसिद्धांपुष्पि
तांपुष्पितपलाशवदापातरमणीयांसाध्यसाधनसंबंधप्रतिभाना
न्निरतिशयफलाभावाच्च कुतोनिरतिशयफलत्वाभावस्तदाह जन्म
कर्मफलप्रदां जन्मचास्वेशरीरेंद्रियादिसंबंधलक्षणं तदधीनं
कर्मतद्वर्णाश्रमाभिमाननिमित्तं तदधीनंचकर्मफलंपुत्रपशुस्वर्गादि
लक्षणंचैतेसर्वेजातिप्रकर्षेणप्रदीयंत्रवदविच्छेदेनददातीति
भ्रांता अतएवमतआह भोगैश्वर्यगतिंप्रति क्रियाविशेषबहुलां
यमृतपानोर्वशीविहारपारिजातपरिमलादिनिबन्धनोयोभोग
स्तत्कारणंचयत्तदैश्वर्यं देवादिस्वामित्वं तयोर्गतिंप्राप्तिंप्रतिसाधन
तायेक्रियाविशेषाः अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादयस्तैर्बहु
लांविस्तृतांअतिबाहुल्येन भोगैश्वर्यसाधनक्रियाकलापप्रति
पादिकामितियावत् कर्मकांडस्यज्ञानकांडापेक्षयासर्वत्रातिविस्त
तत्वप्रसिद्धेः एतादृशींकर्मकांडलक्षणांवाचंप्रवदंतिप्रकृष्टपरमा
र्थस्वर्गादिफलमभ्युपगच्छंतिकेयेअविपश्चितः विचारजन्यतात्पर्या
र्थपरिज्ञानशून्याः अतएववेदवादरताःवेदेयेसंतिवादाअर्थवादा
अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीत्येवमादयस्तेष्वेव
रताआपातार्थसत्यत्वेन एवमेवैतदितिमिथ्याविश्वासेनसंतुष्टाः

र्थं अत एव नान्यदस्तीतिवादिनः कर्मकांडापेक्षया नास्त्यन्य
ज्ज्ञानकांडं सर्वस्यापि वेदस्य कार्यपरत्वात्कर्मफलापेक्षया च
नास्त्यन्यन्नित्यं निरतिशयं ज्ञानफलमिति वदनशीलाः म
हतामर्थं येन ज्ञानकांडविरुद्धार्थभाषिण इत्यर्थः कुतो मोक्षद्वे
षिणस्ते यतः कामात्मानः काम्यमानविषयशताकुलचित्तत्वे
न काममयाः एवं सति मोक्षमपि कुतो न कामयन्ते यतः स्व
र्गपराः स्वर्ग एवोर्वश्याद्युपेतत्वेन पर उत्कर्षो येषां ते तथा स्व
र्गातिरिक्तः पुरुषार्थो नास्तीति भ्रान्ता विवेकवैराग्याभा
वान्मोक्षकथामपि सोढुमक्षमा इति यावत् तेषां च पूर्वोक्त
योर्भोगैश्वर्ययोः प्रसक्तानां क्षयित्वादिदोषादर्शनेन निवेशि
तान्तःकरणानां तया क्रियाविशेषबहुलया वाचापहृतमा
च्छादितं चेतो विवेकविज्ञानं येषां तथाभूतानां अर्थवादाः
स्तुत्यर्थाः तात्पर्यविषये प्रमाणान्तराबाधिते वेदस्य प्रामा
ण्यमिति सुप्रसिद्धमपि ज्ञातुमशक्तानां समाधावन्तःकरणे
व्यवसायात्मिका बुद्धिर्न विधीयते न भवतीत्यर्थः समाधिवि
षया व्यवसायात्मिका बुद्धिस्तेषां न भवतीति वा अधिकरणे
विषये वा सप्तम्यास्तुल्यत्वात् विधीयत इति कर्मकर्तरि लकारः
समाधीयतेऽस्मिन्सर्वमिति व्युत्पत्त्या समाधिरन्तःकरणं वा पर
मात्मा वेति नाप्रसिद्धार्थकल्पनं अहं ब्रह्मेत्यवस्थाने समाधिस्त
न्निमित्तं व्यवसायात्मिका बुद्धिर्नोत्पद्यत इति व्याख्याने तु रूढि
रेवाहता अयं भावः यद्यपि काम्यान्यग्निहोत्रादीनि शुद्ध्यर्थेभ्यो
न विशिष्यन्ते तथापि फलाभिसंधिदोषान्नाशयशुद्धिं संपाद
यन्ति भोगानुगुणां तु बुद्धिं ज्ञानोपयोगिनीं एतदेव दर्शयि
तुं भोगैश्वर्यप्रसक्तानां इति पुनरुपात्तं फलाभिसंधिमन्तरेण
नुष्ठितानि ज्ञानोपयोगिनीं बुद्धिमादधतीति सिद्धं विपश्चि
दविपश्चितोः फलवैलक्षण्यं विस्तरेणैव तदर्थं प्रतिपाद
यिष्यते ४४ ॥

यानिश्चयवतांनानाप्रतिबंधवशात्तमा व्यवसायात्मिका
बुद्धिर्भवतीत्याह मापतिः १ यामिमांवक्ष्यमाणांहिवार्च
श्रवणशोभनां आपातरमणीयांचप्रफुल्लितपलाशवत्
देहेंद्रियादिसंबंधरूपंजन्मददातिया तदधीनंचयत्कर्म
तदधीनंफलंतथा ३ ददातीतिजटीयंत्रवदविच्छेदतश्च
नां सुधापानोर्वशीक्रीडास्रग्गंधादिनिबंधनः ४ भोगस्तद्व
त्वैश्वर्यदेवादिस्वामित्वंतयोः प्राप्तिंप्रतिक्रियाभेदाः साधन
त्वेनयेमता ५ तैर्विस्तरांककर्ममयीप्रवदंत्यविपश्चितः विवा
दजन्यतात्पर्यज्ञानशून्याःस्वरागिणः ६ येर्थवादाःश्रुतौस
तिरोचनार्थाहिकर्मणां प्रसक्तयेहवेवात्ऋमांस्यया जिनर
त्यपि ७ तेष्वेववेदतात्पर्यमितिविश्वासतत्पराः पशुपुत्राधि
रूढभ्यःकर्मभ्योनान्यदस्तितत् ८ ज्ञानेनतत्फलंदानञ्च
नेःकर्मपरत्वतः प्रतिबंधान्तरेमेवंविरुद्धार्थकभाषिणः ९
विषयाकुलचित्तत्वात्सदाकाममयाःशठाः स्वर्गापवर्गयोर्येषां
पुरुषार्थत्वयामतः १० वैराग्यादिबहिर्भूत्वात्सुधामोदकयाम
पि नवदेतेननतल्लेषांभोगादौलग्नचेतसां ११ तयापहृतौश्च
वावायेषामाच्छादितंमनः समाधिविषयाबुद्धिर्नोतेषांनि
श्चयात्मिका १२ प्रहेत्वहेत्वपव्स्थानेसमाधिस्तन्निबन्धना
व्यवसायात्मिकाबुद्धिस्तेषांनोत्पद्यतेध्रुवा १३ ४२ ॥

नीलकंठीटीका

उत्तरार्धमेवविवृणोतियामिमामित्यादिनायांपुष्पितांपुष्पित
द्रुमवद्दूरतोरमणीयांवाचं श्रुत्यैहवैचातुर्मास्ययाजिनः सुकृ
तंभवतिअपामसोमममृताअभूमेत्येवंरूपांप्रवदंतिअविपश्चि
तः अश्रवसायिनोमूढाः यतोवेदवादरताः वेदांतर्गतेष्वर्थ
र्थवादेषुयस्यपर्णमयीजुहूर्भवतिनपापंश्लोकंशृणोतीत्येव
मादिषुरताः बद्धश्रद्धाः अतएवकर्मणोन्यत् आत्मज्ञानेनतत्फ
लंमोक्षनास्तीतिवादिनोवदनशीलाः ४२ ॥

262

+ यतः सर्वाभिकांक्षापरिहारैकहेतौ परमार्थसत्यात्मनि अलब्धबुद्धिप्रतिष्ठाः इदं प्राप्यमिदं प्राप्यमित्यनित्य
मर्थं प्राप्यतया लब्धमानानन्तविविधभ्रान्तिं लभन्त इत्येवं विधानां पुरुषाणां स्वर्गादिभोगमात्रपरत्वेन प्रति
पन्नानां या बुद्धिः सा वक्तुं शक्या न ते परस्मिन्धर्मे न नियुज्यन्त इत्याह +

आनंदी टीका

तत्र कर्मिणो केवलं दर्शयति वेदानां वादेषु पाठमात्रेषु रताः
परमार्थतात्पर्यानभिज्ञाः अतएव नान्यदस्तीति वादिनः याव
ज्जीवमग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादिश्रुतेः ४२ ।

रामकंठी टी॰

+ सैषा व्यवसायात्मिका निश्चयस्वभावा बुद्धिर्भोगैश्वर्यप्रसक्तानां
+ प्रसंसमाधौ आत्मलक्षणपरमार्थतत्त्वविषये प्रणिधानेन वि
धीयते नावतिष्ठते तस्मात्तदर्थप्रतिपत्तियोग्यत्वाभावात् ये
हि भोगानामिष्टानां विषयाणामैश्वर्यस्य प्रकर्षेण वस्तुत्व
परिहाररूपेणातिशयेनासक्तानि येषां तत्परा एव ते भोगा
सक्तानां भोगात्मकानित्यक्तव्यवसायात्मिका बुद्धिः समाधि
विषये व्यवसायेनालम्बते एवं कीदृशानां तेषां भोगैश्वर्यप्रसक्ता
नां समाधौ बुद्धिर्न विधीयते तया वाचापहृतचेतसां स्वीकृत
मानसां कया वाचा यामिमां पुष्पितां परमार्थबोधलक्षणफ
लरहितत्वात् भोगरूपपुष्पमात्रसंयुक्तां प्रसिद्धां वाचं वेदवा
दरता अविपश्चितो वदन्ति या च वदन्ते वेदशाखा ज्ञानशून्यक्रि
यामात्रविधायकवेदैकदेशवचनोपगताः तस्य तथाविध
स्य वेदस्य वादाभिधाने परं प्रकृष्टं तदेव तत्त्वमेषां तेन तथोक्ताः
अतएव नान्यदस्तीति वादिनः स्वर्गादिफलप्राप्तिहेतुभूतानां
क्रियाविशेषाणां विधायकाद्वेदादृतेन्यच्छास्त्रं नास्त्येवेति वद
नशीलाः अतएवाविपश्चितः यज्ञादिक्रियाफलभूतानित्या
ल्पविसातिशयभोगमात्ररूपमर्थं पुमर्थफलत्वेन प्रतिपन्नाः
क्षणेन विद्वांसो येऽपि विनाशिविशुद्धनिरतिशयमात्मतत्त्वल
क्षणमेतद्विपरीतमर्थं फलत्वेन प्रतिपादयन्ते ते विपश्चित्त्वभ
जन्ते [illegible] ४२

[illegible] टीका

स्वर्गादिभोगमात्रपरत्वेन प्रतिपन्नानां अव्यवसायिनो बुद्धिः प
क्वाते परस्मिन्धर्मे न नियुज्यन्त इत्याह यामिति यामिमां वेदवा
वकर्मकाण्डलक्षणं अविपश्चितो विवेकिनः प्रबोधशून्या वेद
वादरता वेदार्थवादाः अतएव स्वर्गात्परमोस्ति याजिनः स्वकृत

भवति अपामसोमममृता अभूमेत्याद्यास्तेषुरताः शीलाः नान्य
त्स्वाप्यमीश्वरतत्वमितिवदनशीलाः ४२ ॥

पंचोलीटीका

सांख्ययोगबुद्धोप्रवृत्तिसिद्ध्यर्थमितरस्याकामकर्मबुद्धेप्रवर्तमाना
नांसांख्ययोगबुद्धिप्राप्त्यभावलक्षणंदोषमाह यामिमामिति हेपा
र्थवेदवादरता अर्थवादफलसाधनप्रकाशकेषुवेदवाक्येषुरताः
अविपश्चितः अविवेकिनः यामिमांपुष्पितांपुष्पितवृक्षइवशोभनां
वाचंप्रवदंतिस्वर्गपश्वादिफलसाधनेभ्योकर्मभ्योअन्यत्नास्तीति
वादिनः ४२

रणवीरसमिद्बोधिनी॥

अनिश्चितमतीनांप्रपंचमाह यामिमामितित्रिभिः यांवाचंवेदवा
दरतांपुष्पितांपुष्पोत्थितपुष्पलतावत्पुष्पितामापातमात्ररमणी
यांवेदवादरताः वेदानांवादेऽर्थवादेरताः अर्थवादश्चप्राशस्त्य
निंदान्यतरवाक्यमर्थवादः सचविधिशेषोनिषेधशेषश्चेतिविधो
ऽपिद्वेधागुणवादानुवादभूतार्थवादभेदात् प्रमाणांतरविरो
ध्येऽर्थवादेगुणवादः प्रमाणांतरावगतार्थबोधकोऽनुवादः प्रमाण
माणांतरविरोधतत्प्राप्तिरहितार्थबोधकोभूतार्थवादः तथाचोक्तं
प्राभाकरः विरोधेगुणवादःस्यादनुवादोऽवधारितेभूतार्थवाद
स्तद्धानादर्थवादस्त्रिधामतः इति तत्राद्य वायव्यंश्वेतमाल
भेतेतिविधिवाक्यं वायुर्वैक्षेपिष्ठादेवतेतिनिषेधवाक्यमित्याद्यर्थ
र्थवादात्परंवेदेषुनान्यत्किंचित्साध्योननममस्तीत्येवंवादिनःस
र्वापवेत्यर्थः ४२॥

मधुभाष्य॥

यामिमामिति यामाहुरस्यपेत्यन्वयः मोक्षफलपेक्षयस्वर्गादि
पुष्पवत्पुष्पितां वाचंप्रवदंति वेदवादरताः कर्मादिवाचकवेद
वादरताः वेदेयन्मुखतउच्यते तत्रैवरताः नान्यदस्तीतिवादि

263

नः परोक्षविषया वेदाः परोक्षप्रिया इव हि देवाः मां वि
यते भिर्यत्ते मामिज्यादिभिः पारोक्ष्येणायो भगवंतं व
दंति भोगैश्वर्ययति प्राप्तिं प्रति तत्प्राप्ति फलाय व वेदा इ
ति वदंतीत्यर्थः तेषां सम्यग्भुक्ति निर्णयात्मिका बुद्धिः
समाधौ समाध्यर्थेन विधीयते सम्यग्दृग्णीतार्थानां द्वीप
रे मनः समाधानं सम्यग्भवति तद्धि मोक्षसाधनं अतं चैत
दन्यत्र न तस्य तत्वग्रहणाय सा नाहीयसी रपि वाचः स
समासन् स्व मे निकृत्या ट्ट मेधि सो व्यंन यस्य देया नु मि
तेस्व र्यस्यात् इति तां योगबुद्धिमाह त्रैगुण्यविषया वेदा इ
त्यादिना अतनर द पोय वेदानां परोक्षार्थत्वात् त्रिगुणा संबंधि
स्वर्गादिप्रतीतोऽर्थ इव भाति परोक्षवादी वेदोयमिति हि क्रमः
यतः प्रातीतकेऽर्थे भ्रांतिमाकुर्वित्यर्थः वाक्ये विषयकं तव
स्तुत्वतो वचनं स्मृतमित्यभिधानात् न तु वेदपक्षो निषि
ध्यते वेदेरामायणे चैव पुराणे भारते तथा आदावंते च म
ध्ये च विष्णुः सर्वत्र गीयते सर्वे वेदा यत्पदमामनंति वेदोऽखि
लो धर्ममूलं स्मृतिशीले च तद्विदां आचारश्चैव साधूना मा
त्मनस्तुष्टिरेव च वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्यय
इति वेदानां सर्वात्मनाविष्णुपरत्वोक्तेः तद्विदितस्य तद्धि
तहृस्य धर्माधर्मत्वोक्तेश्च तथापि काम्यकर्मणां फलं
ज्ञानिनां न भवतीति साम्यमेवेत्यत आह ४५॥

यामिमामिति त्रिभिः अत्र यामित्यत्र लिंगविभक्तिविपरिणामेन ये इत्य
भिलेयं तयेत्यत्रापि तेनैव प्रकारेण तेषामिति नेयं कर्मणां प्रकृतत्वा
त्कर्मभिरिति शेषो ज्ञेयः ततश्चायमन्वयः तया उक्तया अपहृतचेतसा
तेषां भक्तानां कर्मभिर्व्यवसायात्मिका बुद्धिर्न विधीयत इति अपहृत
चेतसामिति वशीकृतचेतसामित्यर्थः तया कया तेषां केषामित्यपेक्षा
यामेवं योज्यं यामिमां वाचं पुष्पितां भोगैश्वर्यगतिं प्रति प्रवदंति
मामिति पुरोवस्थितवदुपदेशेन तस्या वाचः अव्याहतप्रसरत्वं वेदो
नयति पुष्पितामिति पुष्पवच्छ्रयानादात्मिकरमणीयां वदन्फलो
न्यवेरसर्वे रूपायाश्चनुष्ठानसव्यपेक्षतया व्यवहितत्वात्तदुपयोग्य
स्वदेशांतरकालांतरभावितया व्यवहिततरतामाह यथा पुष्पो
त्रमाकालांतरे फलं तदुपभोगस्य व्यवहितत्वं तद्वद्योगेते स्वर्गं क
र्मोपि कालांतरे फलं तस्य गतिज्ञानं यथा वाचामित्यर्थः प्रतिर्लक्षणा
र्थे कर्मप्रवचनीयः ततश्च वाग्लक्षणं प्रवदतो विपश्चितो लक्षणस्या
धिकारमात्रे [illegible] बोधिकां वाचं प्राप्यं वदंतीति प्राप्तिकि
प्राजनितो लक्षणाभावः प्रवदंतीति प्राप्ताः स्व इदानीं स्वर्गमिमा
दिमकर्षेण वदंतीत्यर्थः अत्रापवर्गे प्राप्ते सर्वं समस्तमिति अ
विपश्चितस्त्वमत्के अविपश्चितो ते को हेतुस्तत्राह वेदवादरता इति वा
दशब्देन अर्थवादाः भामाश्शेहेतस्तत्भामाया इवार्थवादानां ग्रहणे त
था च वेदसंबंधिनोऽर्थवादास्तेरताः प्राप्तिप्रामावेदग्रहणं मिथ्यात्वप
रिहारार्थं स्पष्टवचसा पुष्पेयजमानो जसा स्वर्गं लोकमेतीत्यादयो
वर्तमानत्वेन स्वर्गप्राप्तिबोधका वैदिका अर्थवादाः कथं मिथ्या स्युः स्त
स्यान्यामायववयं स्वर्गमिति मन्यमाना अविपश्चितो भवंतीत्यर्थः त
नार्थवादाः सत्यार्था इति चेद्वाचो वं किं न स्युः एवं तीत्याशंकां विशिन
ष्टि नान्यदस्तीति एषामर्थवादानामभिधेयांतरं प्रयोजनांतरं
नान्यदस्तीति ॥४२॥
नान्यास्तीति वेदप्रवादावशाद्वदनशीलाः

भाषाअनुवाद

सूनहै तोपेरि
गोकहोकि सांख्ययोगरूप बुद्धिपकही प्रमाण
वही सबके चित्तमेक्यों नहीस्थिरहोती अर्थात् जोसकामअन
है वेभीये कष्टरूप सकलकामनात्यागकरि भगवभक्ति
हीसे मुक्तहोयगे ऐसीनिश्चयरूपबुद्धिकाहेसे नहीकरते
हैं तिसपर कहतेहैंकि विषलता इन्द्रस्तनकीतरह अति
सुंदरयहजो उत्तम स्वर्गआदि फलसुनावने वाली श्रुतिकहे
वेदवाक्य जिसको कामीकहे सकाममनुष्यसबकहतेहैं
सोई स्वर्गआदि फलश्रुतिरूपवेदवाक्यसे विचारसून्य मनुष्यो
को अर्थात् विस्वास करनेवालोंको भगवद्भक्तिमे निश्चय
सक्तहोयगे ऐसी बुद्धिउत्पन्न नहीहोतीहैं इसस्लोकके आगि
वाले तीनस्लोकोंकेसाथ इसस्लोककी अन्वयहै जोकहोकिवे
मनुष्यऐस काहेलिये करतेहै तोउनका सिद्धान्तकहतेहैं
कि जिसलिये वेसबलोग अतिमूढ अज्ञानीहै उनकेअज्ञान
मे हेत कहतेहै किवेदके बीचमेजो सबवाक्यहै सोकेवल अर्थ
सा परकहै अर्थात् चतुर्मासयाजीयोंको अक्षय स्वर्गहोता औ
पत्तं शोषमे सोमलता पीकरिअमरहोतेहैं इत्यादिजोपलास
पुष्पके समानपुष्पित वेदवाक्यहै निर्गन्धफूलके तुल्यइन्हीं
वेदवाक्योंसे काम्यकर्मसेवेलोग निरतहै इससेकहतेकियह
वेदोक्त स्वर्गआदि फलकोछोडकर औरईश्वरतत्व प्राप्तकरनेयो
ग्यवस्तुकछ नहीहै इसीमतकोवेकहतेहै ४२ ॥

दोहा ॥

जो इह पुष्पित वाणीकोकहित अपंडितवीर वेदवादमें
पार्थरतकहें याते सारन और ४२ ॥

266

कामात्मानः स्वर्गपरा जन्मकर्म्मफलप्रदां क्रियावि-
शेषबहुलां भोगैश्वर्यगतिं प्रति ४३

शांकरभाष्य

तेच कामात्मेति कामात्मानः कामस्वभावाः कामपरा इत्यर्थः स्व
र्गेति स्वर्गपराः स्वर्गः परः पुरुषार्थो येषां ते स्वर्गपराः स्वर्गप्रधा
नाः जन्मकर्म्मफलप्रदां कर्म्मणः फलं कर्म्मफलं जन्मैव कर्म्मणः
फलं जन्मकर्म्मफलं तत्प्रददातीति जन्मकर्म्मफलप्रदां तां वा
चं प्रवदन्तीत्यनुषज्यते क्रियाविशेषबहुलां क्रियाणां विशेषाः
क्रियाविशेषाः तेबहुला यस्यां वाचि तां स्वर्गपशुपुत्राद्यर्थाः
यया वाचा बाहुल्येन प्रकाश्यन्ते भोगैश्वर्यगतिं प्रति भोगश्च
ऐश्वर्यञ्च भोगैश्वर्ये तयोर्गतिः प्राप्तिः भोगैश्वर्यगतिः तां प्रति
साधनभूतास्ते क्रियाविशेषाः तद्बहुलां तां वाचं प्रवदन्तो मूढाः
संसारे परिवर्त्तन्त इत्यभिप्रायः ४३ ॥

आनन्दगिरिकृतटीका

प्रकृतान् प्रवक्तॄनविवेकिनो व्यवसायात्मिकाबुद्धिभाक्त्वासम्भ
वसिद्ध्यर्थं विधान्तरेण विशिनष्टि तेचेति तेषां संसारपरिवर्त्त
मानपरिदर्शनार्थं प्रस्तुतां वाचमेव विशिनष्टि जन्मेति ततु
सा कामस्वभावत्वमयुक्तं चेतनस्येच्छावतस्तदात्मत्वानुपपत्ते
रिति तत्राह कामपरा इति तत्परत्वं तत्तत्फलार्थित्वेन तत्तदुपा
येषु कर्म्मस्वेव प्रवृत्ततया कर्म्मसंन्यासपूर्वकात् ज्ञानाद्धरिर्म
खत्वं तत्र कर्म्मनिष्ठानामपि परमपुरुषार्थोपेततया मोक्षोपाये
ज्ञाने भवत्याभिमन्तव्यमिति तेष्वाह स्वर्गेति तत्परत्वं तस्मिन्नेवासु
केनयानतिरिक्तपुरुषार्थराहित्यनिश्चयवत्त्वं उच्चावचमध्यमरे

गी.
टी.
हि.

267

हयभेदग्रहणं जन्मवाचोयर्योनफलप्रदत्वमप्रामाणिकमित्याशंक्या
नुष्टानद्वारा तदुपपत्तिरित्याह क्रियेति क्रियाणामनुष्टानानां या
गदानादीनां विशेषा देशकालाधिकारिप्रयुक्ताः समाहृतेकाह
लक्षणास्तेस्वल्पसां वाविप्राचुर्येण प्रतिभान्तीत्यर्थः कथंयथो
क्तायां वाचिक्रियविशेषाणां वाहुल्येनावस्थानमित्याशंक्य प्रका
रपत्वेनैनदिशरयति स्वर्गेति तथापितेषां मोक्षोपायत्वोपपत्ते
स्तन्निष्टानां मोक्षाभिमुख्यं भविष्यति नेत्याह भोगेति यथोक्तां
वाचमभिवदतां पर्यवसानं दर्शयति तद्बहुलामिति ४३ ॥

स्वामिकृतटीका

अतएवकामात्मानइति कामात्मानःकामाकुलचित्ताः अतःस्वर्ग
एवपरःपुरुषार्थोयेषांतेजन्मवतत्वकर्माणिचतत्फलानिचप्रददाती
तितथातांभोगैश्वर्ययोर्गतिंप्राप्तिंप्रतिसाधनभूतायेक्रियाविशेषा
स्तेवहुलायस्यांतांप्रवदंतीत्यन्वयः ४३ ॥

पिशाचभाष्य

कथंभूतास्तेअविपश्चितइत्यत्राह कामात्मनःकामिनःस्वर्गपराःस्वर्ग
प्रधानाः जन्मकर्मफलानिचजन्मकर्मफलानिप्रददंतीतिजन्मक
र्मफलप्रदातांवाचंक्रियाविशेषवहुलां क्रियाणांविशेषाःक्रियावि
शेषाःपाकयज्ञादयः वहूनर्थान्लातीतिप्रतिपादयतीतिवहुलाः
क्रियाविशेषवहुलातां भोगैश्वर्यगतिं भोगःशब्दादिविषयलाभः
ऐश्वर्यमणिमादिभोगैश्वर्ययोर्गतिः तांप्रतितल्लक्षणांभोगैश्वर्य
गतिंशब्दादिविषयलाभगतिप्राप्तिभूतामित्यर्थः तांवाचंप्रत्य
तदर्थंपुरुषार्थंवुद्धिमाकार्षीरित्यर्थः तथाचश्रुतिः स्ववाप्येतेअ
दृढायज्ञरूपाअष्टादशोक्तमवरंयेषुकर्मेत्यादि कस्मात्तावागूत्वा

न्येत्यत्राह यदि सा वाक् प्रमाणं तेन उपादीयते तदनुष्ठानेन तत्
फलप्राप्तौ च प्रवृत्तिः स्यात् ४३ ॥

रामानुजभाष्य

कामात्मनः कामप्रवणमनसः स्वर्गपराः स्वर्गपरायणाः स्वर्गा
दिफलावसाने पुनर्जन्मकर्माख्यफलप्रदां क्रियाविशेषबहुलां
भोगैश्वर्यप्रसक्ता
नत्वज्ञानरहितनया क्रियाविशेषप्रचुरां
नोनेसोपवार्याख्यानतत्परा ४३ ॥

अभिनवगुप्तटीका नास्ति

~~...न्नानैव प्रनपवजन्मनः कर्मैवफलमिष्टं नेत्रेदिपश्चितः ... सिद्धं कालविनयावेदयावापवचिंतावलावपुरुषास्तानपेम ४३ ॥ माधवीयाः नत्रफलनिरूपणादि...~~

परमार्थप्रपाटीका

ग्रंथैतत्प्रकटयन्नाह कामात्मान इति कामात्मानोऽभिलाषाक्रा
न्ताः स्वर्गपर एव परं उत्कृष्टं येषां ते न जन्मकर्म
लविनाशनपव स्वर्गपराः स्वर्गप एव परं उत्कृष्टं येषां ते जन्मकर्म
फलप्रदां जन्म च तत्राकर्मैव फलं च प्रददातीति तां भोगैश्वर्यगतिं प्र
वदंति भोगाश्वभादिपैश्वर्यं देवाधिपतित्वं तयोर्गतिः प्राप्तिस्तां किंभूता
क्रियाविशेषबहुलां भोगैश्वर्यप्राप्तिं प्रतिसाधनभूता ये क्रियावि
शेषास्तैर्बहुलां पुष्टां प्रतिप्रयासंसाध्याम् ४३ ॥

वनमालीटीका

कामात्मानः कामाकुलितचित्ताः स्वर्ग एव परः पुरुषार्थ इति तात्पर्यं
येषां ते ४३ ॥

(margin: स्वर्गपराः स्वर्ग)

ऊ सम वैजयंतीटीका

किंच एवमपि कृतः यतः कामात्मान इति कामात्मानः पुत्रकल
त्ररूपराज्यारोग्याद्यनेकविधरूपेषु कामेषु आत्मानः मनो येषां
ते नानाविषयविततमनसः नतु ते यथेष्टं नरा निविदं
षोनेनथा नानाविषयविततमनयस्मः नतु ते यथेष्टं नरानि
तथा कामयत्नेनथा सर्वैश्वर्यं तमपि कृतेन कामयत्र इति चेत्रा
ह स्वर्गपरा इति स्वर्ग एव परः परमः सर्वोत्कृष्टो येषां ते तथा का
मा कामनचिनत्वेनस्वर्गे पुण्यादि विशिष्टात्स्वर्गादि सुखादन्यं सर्वं पर

गी॰
टी॰
टि॰

स्वर्गं परमप्राप्यं सर्वातिशयसुखरूपं मन्यमाना जानंतीत्यर्थः
वाचं विशिनष्टि जन्मकर्मफलप्रदां जन्म स्वर्गादिभोगान्यशरी-
शिष्टकर्मजन्ममनुष्यादिदेहेन्द्रियादिविभोवरूपं कर्म तत्तत्कुलो-
चितमिंद्रियक्रियात्मकं फलं पामयरायन पशुपुत्रकलत्राद्य-
नित्यवस्तुरूपं जन्म च कर्म च फलं च तानि प्रकर्षेण ददाति
नः किं विशिष्टो भोगैः स्वर्यं गतिं प्रति क्रियाविशेषबहुलां
भोगः स्वर्वैश्वर्याधर्मस्तयानादिः पैश्वर्यं स्वर्गाधिपत्यं तयोर्भो-
गतिः प्राप्तिस्तां प्रति तदर्थमेव ये क्रियास्तासां मध्ये विशेषाः श्रे-
ष्ठाः अग्निहोत्रदर्शपूर्णमासामावास्यादयस्तैर्बहु-
लेकलापं यस्यास्तथा तां प्रवदन्तीति सम्बन्धः ॥ ४३ ॥

मधुसूदनीटीका द्वाचत्वारिंशे उक्तार्थं

[illegible] जन्म चा[illegible]विशेषा[illegible] [illegible]
[illegible] तदर्थीनं च [illegible]
[illegible] स्वर्गादि[illegible] विनश्वरं तानि प्रकर्षेण च ददाती[illegible]
[illegible] ददाति [illegible] भोगैश्व-
र्याति प्रति क्रियाविशेषबहुला [illegible] विशिष्ट-
[illegible] वृ-
[illegible] भोगैश्वर्य-
विशेषा[illegible] माससोमयागादयः [illegible]
[illegible] क्रियाकलापप्रति-
[illegible] [illegible]
[illegible] [illegible] प्रव-
[illegible] [illegible] कर्मकांड[illegible] [illegible]
[illegible] फल[illegible] [illegible]
[illegible] [illegible] वेद[illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible]
[illegible] [illegible] [illegible]

कांडापेक्षया नास्त्यन्यत् ज्ञानकांडं सर्वस्य विवेदस्य कार्यपरत्वात्
कर्मफलापेक्षया [illegible] इति वदनशीलाः
नरकाप्रबंधेन [illegible] लोले दैवि
नालेयतः कामात्मनः काम्यमानविषयशताज्ञलविघ्नेन कामम
मा: एवं सति मोक्षमपि कुतो न कामयंते यतः स्वर्गपराः स्वर्गएव
धर्म्या पुरुषार्थत्वेन परउत्कृष्टोपेयो तेन यात्स्वर्गातिरिक्तः प्रकृष्टार्थेना
मीनत्वभावेनीविवेकवैराग्यभावात् मोक्षकथामपि सोढुमस
मारीनियावत् ४३ ॥

सदानंदीटीका [illegible]त्वारिंशोत्तरार्थे

सोनेनननत्फलेवान् वेदः कर्मपरत्वतः प्रतिबंधात्रयस्त्येवं विरु
द्धार्थकभाषिणः ४ विषयाञ्जलविघ्नात्सदाकाममयाः शु
[illegible] वा: स्वर्गएवं परो येषां [illegible] नयानतः [illegible] भोगादौ लग्नचे
[illegible] मोक्षकथामपि न तत्रैतेन त्वसे [illegible]
तसो ॥११॥४३ ॥

नीलकंठीटीका

तथा भोगस्य ऐश्वर्यं च तयोर्गतिः प्राप्तिस्तां प्रति तु दर्शयंतीत्यर्थः कीदृशीं भोगे
कामात्मानः कामयुक्तचित्ताः अत एव स्वर्गपराः कीदृशीं भोगे
ऐश्वर्यगतिं जन्मकर्मफलप्रदां प्राप्तभोगैश्वर्यो हि पुरुषस्तदा तत्
नावासितः पुनर्भोगैश्वर्यं प्राप्तये जन्म लभते तदर्थं कर्माणि च
करोति एवं कर्मफलं जन्म च नेतो भोगादिकं प्राप्नोतीति चक्रवत् परिभ्रमतीत्यर्थः किंच क्रियाविशेषैर्बहुला य
नेन निष्ठा तस्य तो भवतीत्यर्थः किंच क्रियाविशेषबहुला य
स्यां तथाविधत्वया प्राप्तधिकं तथा तथा भोगैश्वर्यप्राप्तिरुपा
स्यात्प्राविनत्वया या प्राप्ताप्राधिकं तत्साध्येषु पिकर्मसु फलतो भात्स
पिकामित्यर्थः एतेनास्तेताया सत्साधनभूताः पिक्रियाविशे
नेन तरस्युक्ते भाष्ये भोगैश्वर्यगतिं प्रति साधनभूतं कर्मफलं तत्र्यरोववा
चात्र मिनदोत्तारयः नदकलं जन्म रूपं यतक्
चमेवेति व्याख्याते ४३ ॥

आनंदी टीका

केवलेनकर्मणास्वर्गशब्दवाच्यंनिरतिशयंसुखमेवप्राप्यं
ततोज्ञानप्राप्यमपवर्गाख्यंफलंनास्तीतिविवादशीलाप्र
मत्ताये तएवकामात्मानः अत्यन्तश्रेष्ठःकामः तस्मिन्नात्मामनोयेषां
अतएवजन्मनादेवलोकादावुत्पत्त्याकर्मणःफलप्रदांतथा
क्रियाणांकाम्ययज्ञविधीनांविशेषैर्भेदैः बहुलांनानाविधां
भोगप्रमानांविषयाणामास्वादे ऐश्वर्यंसामर्थ्यंतत्प्रगतिंप्र
लिंहवादिजन्मनाविषयास्वादसामर्थ्यंस्वर्गपरएवपरश्चल्क
हाभिलषणीयोयेषाम् ४२ ॥

+ अतएवाविपश्चिन्नश्रुतिपादकानि तेषांविशेषा एणाह +

रामकंठी टीका

++ तथाच कामात्मनःकामाःप्रियाःशब्दादयःस्वर्गस्वभूतत्वादा
त्मायेषामतएवकामात्मत्वात्स्वर्गपराः उत्तमभोगाधिकरणं
स्वर्गःप्राप्यत यापरःप्रकृष्टोयेषांतेतथाविधः तथाजन्मक
र्मफलप्रदः भोगप्रदत्वेयेवशुभभाव्यजन्मकाविदपियोन्यत
ऐश्वर्यंभवतियस्मिन्नुसति धर्माधर्मात्मकंकर्मतस्मिन्नुसति
लाभिलषणंफलमित्येतान्याहुःप्रमिच्छवः अतएवभोगैश्वर्य
भोगैश्वर्याधिपत्यगतीविविधमार्गान्फलभूतान्प्राप्ति त
त्सायनभूताःक्रियाविशेषाः नानाविधयज्ञदानतपःप्रभृत
यः कर्मभेदाःबहुलाभूयांसोयेषांनकेवलंनित्यनैमित्तिक
क्रियामात्रसक्ताः यावत्काम्यानपिक्रियाविशेषान्विस्तार
यन्तः इत्येवंविधाःप्रवक्तारोयेषांवाचंवदन्ति ४२ ॥

लासिकी टीका

कामाविषयाआत्मवत्परप्रेमास्पदत्वादात्मायेषांते अतएव
स्वर्गपराःस्वर्गएवपरःपुरुषार्थोयेषांते पुष्पितांभविष्यत्स्वर्ग
फलेनरम्यांवदन्ति कीदृशींतां जन्मकर्मफलप्रदां जन्मयो
नपतेःसंचारःकर्मधर्माधर्मात्मकंफलंसुखदुःखे तेनाप्रददा
तीति तथाविधाम् ४२ ॥ नि

पंचोलीटीका

नेवकामात्मानःकामपराःस्वर्गपरःपुरुषार्थोयेषांतेस्वर्गपराः

गी॰
टी॰
हिं॰

किंलक्षणां वाचं जन्मकर्मफलप्रदां जन्मैव कर्मफलं प्रददाति
इति जन्मकर्मफलप्रदां स्वर्गपशुपुत्रादिलक्षणां ग्रर्थापयावाचा
वाहुल्येन प्रकाशयंतीति ये ते भोगैश्वर्यप्राप्तिं प्रतिसाधनभूताः तेक्रि
याविशेषवहुला तां वाचं प्रवदंति मूढाः संसारे प्रवर्ततइत्यभि
प्रायः ४३

२७०

रणवीरसमिद्धोधिनी

तन्मोक्षमेव प्रकटयति कामात्मान इति ऐहिकमेव विषयं पाम
यसुखं विशेषयंति तत्स्वरूपाः स्वर्गपराः स्वर्गः परो हि येषां क्रिया
गौस्यायासमसाध्यत्वात् अत एव जन्मनी हेव कर्मणः क्रियाविमो
माणस्य फलं विषयसुखं प्रकर्षेण ददातीति क्रियावि ४४
षा ये हिक विषयव्यवहारास्ते वैकुंठलोकग्रामा मित्यर्थः

मधुभाष्य

४३॥

तेनतात्वैवकर्मकुर्वतांशास्त्रज्ञानांकथमीदृशीब्रह्माप्रतन
उक्तेकामात्मानइति काम्यमानमात्रासक्तांतःकरणाःशास्त्र
लोअपिनार्थवादादिविवेकंसहंतइत्यर्थः तथाचनारदीये
श्रेयोहिवाकोचनरस्तरेद्गुणपस्यपापस्यनिरतभूते उक्ताराम
देवरगांश्रुतीहानानारायणश्चेतितथार्थवादाः नतुकाम्यमानेमो
तफलमपिफलतीत्यतआह स्वर्गपरा इति स्वर्गःपरउत्कृष्टोपे
क्षातथाभूताविवे कविरक्ताभावान्नमोतेकथामपिसहंतइति
भावः नतुनहिस्वर्गेस्यात्तत्फलवादस्तमपवकिंमहत्ताअतो
वावेविशिनष्टि जन्मेति जन्मनैवयत्कर्मफलेनत्प्रदामिति न
यानात्पत्वेनस्वर्गादिभोग्यत्वेःतोः वश्यंभाविपुनर्जन्मेतिभावः
नतन्ततोहिस्वर्गभोगकालस्यकोवधिरित्यतस्तामेवविशिनष्टि
क्रियाविशेषेति क्रियाविशेषाअग्निहोत्रदर्शपूर्णमासाज्यो
तिष्टोमादयस्तैर्बहुलाप्रकटनाहिस्तरेत्यर्थः एवंचफलस
कर्मनिष्पत्तेरितिन्यायेनफलकालावधिःसंकल्पइतिभावः४३
मवत्वेनतस्यावैहतंतेनेषांसत्त्वमुहिंस्वमहिम्नैवकिमितितक
रोनीत्यतआह ॥

भाषाअनुवाद

अतएवकामात्मा कहे कर्म वुद्धीस्वर्गादि फल प्राप्तिरूप कामना
हीहै परमपुरुषार्थ जिनकेमतमे ऐसेजोमूढहैं तेईजन्मकर्मत
या स्वर्गआदि फलदेनिवाली जो वेदवाक्य सवहैं औरभोग ऐश्वर्य
प्राप्तहोनेके अर्थसाधन भूत जोवेदोक्त कहे वेदविहित अनेक अ
नेक क्रियोंकी प्राधिक्य कहे वहुतायतहै जिनमेमूढजन ऐसे
वचनवोलनेहै अर्थात् जन्महीहै कर्मकाफल तिसकेदेनेवा
ली वाक्योंको कहतेहैं ४३ ॥

दोहा

जो अभिलाखीस्वर्गपर जन्मकर्म फलदेत क्रियाकर्मसो
बहुकरैं भोगऐश्वर्यगतिदेत ४३॥

272

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसा
यात्मिकाबुद्धिः समाधौनविधीयते ४४ ॥

शांकरभाष्यं

तेषांचभोगेति भोगैश्वर्यप्रसक्तानां भोगः कर्तव्यऐश्वर्यं चेति
भोगैश्वर्ययोरेवप्रवणवतां तदात्मभूतानां तयाक्रियाविशेषव
हुलाया वाचापहृतचेतसामाच्छादितविवेकप्रज्ञानांव्यव
सायात्मिका सांख्येयोगेवायाबुद्धिः समाधौ समाधीयते ऽस्मि
न्पुरुषोपभोगायसर्वमिति समाधिरन्तः करणंबुद्धिः तस्मि
न्समाधौनविधीयतेनभवतीत्यर्थः ४४ ॥

आनंदगिरिकृतटीका ॥

ननुकर्मकांडनिष्ठानां कर्मानुष्ठायिनामपि बुद्धिशुद्धिद्वारेण
नित्यानित्यवस्तुविवेकद्वारा मो
क्षः करणे साध्यसाधनभूतबुद्धिद्वयसमुदायसंभवात्ततो मो
क्षोभविष्यति नेत्याह तेषांचेति तदात्मभूतानां तयोरेव भोगै
श्वर्ययोरात्मकत्वेनारोपितयोरभिनिविष्टचेतसि तादात्म्य
ध्यासवतां बहिर्मुखाणामित्यर्थः तथापि शास्त्रानुसारिण्या
विवेकप्रज्ञया व्यवसायात्मिकाबुद्धिस्तेषामुदेष्यतीत्याशंक्या
ह तयेति ननुसमाधिः संप्रज्ञातादिभेदेनद्विधोच्यते तत्र बुद्धि
र्विविधिरप्रसक्तः सनुकथं निषिध्यते तत्राह समाधीयत
इति ४४ ॥

स्वामिकृतटीका ॥

ततश्चभोगैश्वर्येति भोगैश्वर्ययोः प्रसक्तानामभिनिविष्टानां
तयापुष्पितयावाचापहृतमाकृष्टंचेतोयेषांतेषांसमाधिश्चि
त्तैकाग्र्ये परमेश्वरैकाग्र्यामितुव्यवसायात्मिकाबु
द्धिर्नविधीयते कर्मकर्तरिप्रयोगः नोत्पद्यतेइत्यर्थः ४४ ॥

पैशाचभाष्यं ॥

गी॰
टी॰
द्वि॰

273

तेनच भोगैश्वर्यप्रसक्तानां भोगैश्वर्ययोरेव प्रणयवतां तयावाचा
अपहृतचेतसां आच्छादितविवेकप्रज्ञानां व्यवसायात्मिका सांख्य
योगेषु या बुद्धिः समाधौ परमात्मावबोध इयमेव बुद्धिः परमपुरु
षार्थतया कर्तव्यत्वेन निश्चिता सा बुद्धिस्तावल्लक्षणत्वादपि ते
षां न भवति तस्मादियं वाक् परमपुरुषार्थविरोधित्वात्त्याज्येत्यभिप्रा
यः ४४ ॥

रामानुजभाष्यटी॰

तेषां भोगैश्वर्यप्रसक्तानां तस्यावाच्यात्मनुरूपया भोगैश्वर्यविषय बुद्धिः
या तया वाचापहृतात्मज्ञानानां यथोदिता व्यवसायात्मिका बुद्धिः स
समाधीयतेऽस्मिन्नात्मज्ञानमिति समाधिर्मनः तेषां मनस्यात्मयाथात्म्यनि
श्चयपूर्वकमोक्षसाधनभूतकर्मविषया बुद्धिः कदाचिदपि नो
त्पद्यत इत्यर्थः अतः काम्येषु कर्मसु मुमुक्षुणा न संगः कर्तव्यः
४४ ॥

अभिनवगुप्तकृतटी॰

स्पष्टोऽर्थः ४४ ॥

परमार्थप्रपाटीका

भोगैश्वर्यप्रसक्तानामिति भोगैश्वर्ययोः प्रसक्तानां तया पुष्पित
वद्वाण्या अपहृतं चेतो येषां तेषां पुरुषाणां तथैव वाण्या समा
धौ परमेश्वराराधने ऐकाग्र्ये व्यवसायात्मिका बुद्धिर्न विधीयते नोत्प
द्यते तदुक्तं मोहं चिन्मात्रमेव निर्विचिंतनं ध्यानमुच्यते ध्यानस्या
विस्मृतिः सम्यक्समाधिरभिधीयत इति ४४ ॥

वनमाली टी॰

तया वेदवाचा अपहृतचेतसां आकृष्टमनसां भोगैश्वर्ययोः प्रस
क्तानां तेषां बुद्धिः व्यवसायात्मिका सती समाधौ एकाग्रतायां
न विधीयते ४४ ॥

ऊसमैवेजयन्ती टी॰ ॥

अतोहेतोस्तेषांभोगैश्वर्यप्रसक्तानांभोगैश्वर्ययोः स्वर्गोन्तपा
नत्वस्वामित्वयोरेवप्रकर्षेणसक्तानिविष्टास्तेषांयथेहकर्मवि
तोलोकःक्षीयतएवमेवामुत्रपुण्यजितोलोकःक्षीयतेइत्यादिवा
क्यानवलोकनेनतयोर्निर्वेदाद्यभावत्वात्तेषांभगवत्याम्प्रभाव
इतिभावः अतएवतयावाचाअपहृतचेतसां अपहृतमाकृष्टं
चेतोयेषांतेषामव्यवसायिनांकामिनांव्यवसायिनांकामिनो
व्यवसायात्मिकाबुद्धिःसमाधौसम्यगाधीयतेआत्मस्वरूपंय
स्मिन्नितिसमाधिर्मनस्तस्मिन्मनसिनविधीयतेनोत्पद्यतेतेषां
निरतिशयप्रबलप्रचंडप्रज्वलितकामानिलमित्तमायसक
दाहसमानमानसेपीयूषवल्लीतुल्यास्तैकोपायभूतात्मतत्व
निश्चयपूर्वकभगवत्परिचर्यात्मिकानिष्फलकामिकाबुद्धिर्न
मेरोहतीत्यभिप्रायः ४४ ॥

मधुसूदनीटी० ॥
द्वाचत्वारिंशोऽङ्कार्थ ४४

सदानंदीटीका द्वाचत्वारिंशोऽङ्कार्थ ४४

भोगेति तयापुष्पितयावाचाअपहृतचेतसांबुद्धिःसमाधौसमाध्य
नुष्ठानकालेव्यवसायात्मिकाव्यवसायोज्ञानंतेनतदात्मिकाशुद्धचिन्मात्रा
कारानविधीयतेनभवति कर्मकर्त्तरिलकारः विरक्तस्यहिबुद्धिःसमा
धौचिन्मात्राकाराभवतिननुभोगायासक्तस्येतिस्पष्टमेव भाष्येतुसमा
धौअन्तःकरणेव्यवसायात्मिकाबुद्धिर्नभवतीतिव्याख्याते यद्वासमा
ध्यनुष्ठानार्थमेवनिश्चयात्मिकातेषांबुद्धिर्नभवतीतिव्याख्येयं ४४॥

आनंदी टीका

परमार्थद
र्शिनः ॥ ताः अविपश्चितः विशेषेण पश्यन्तीति विपश्चितः विपश्चितस्तेचेतयन्ती
र्शिनः तद्दर्शनरहितान् इति विज्ञानि विपश्चि परमार्थविशेषम
तिवितश्चते विपश्चितः इति श्रुत्यनुगमात् ॥ वेदात्मिकां प
श्यन्तः विचारहीनाः यामिमां प्रसिद्धांवाचं वेदात्मिकां पुष्पितमेवे
वमखरवाणीं ऽप्छितां परमार्थफलानवेतयाह ष्पितां प्रवदन्ति
वेमनोहरैस्तत्वं नपानाघैः विषयैरेव पुष्पैर्विकसितां प्रवदन्ति तयावाचा
स्वर्गादियज्ञफलतात्पर्यैवक्ष्यतितिरितिप्रलपन्ति भोगैश्वर्यप्रसक्ताः
पहृतचेतसां विचारहीनानाम् अतएव हि भोगैश्वर्यप्रसक्तानाम
नां निश्चयात्मिका बुद्धिः समाधौ न विधीयते उक्तवंश्यमाणप्र
कारा ज्ञानकर्मसमुच्चयान्तु किंतु तस्मिन् समाधाने विषये
तिन करोति विधीयते इति कर्मकर्तरि यक् ॥४४॥

रामकंठी टीका

नयावर्जितचित्तानां भोगासक्तानां बुद्धिः समाधौ न विधीयते इति
सम्बन्धः इदमत्र तात्पर्यम् येस्वयमेव प्रबोधशून्या त्वादागमात्र
पराः केनचित्तथाविधेनैवार्थप्रशंसद्भिः परिपाष्यमाणा नाहकं
कल्पाः परमार्थप्राप्तिव्यवसायाहरमपकर्षन्ति इति तथावि
धानां बुद्धिः कथं समाधौ विधीयतामर्हति [illegible] ॥४॥
[illegible]
[illegible]
[illegible]

लासिकी [illegible] टीका

भोगैश्वर्यप्रसक्तानां
भोगैश्वर्ये च प्रकर्षेण निश्चितत्वं सहदत्तमरपविहारेण आत्यागा
सीन चित्तानां वेदवाचाऽपवर्जितमनसाम विपश्चितां ॥ इह स्मृ
त्यसमाधानविषया [illegible] सकाशेनेतद्हस्मृ
त्याम् ॥४४॥

४
१ अ समाधौ कर्मणापि विषये
अपहृतचेतसां
व्यवसायात्मिका बुद्धिः
न विधीयते न निपुज्यते मयानत

पंचोलीटीका

तेषां च भोगैश्वर्ययोः प्रीतिं प्रतित याबाचाच्छादितविवेकबुद्धीनां
सां व्यवसायात्मिका समाधौ चित्तेन विधीयते न जा
यते कर्मकर्तरि प्रयोगः नोत्पद्यत इत्यर्थः ॥४४॥

रणवीरसमिद्धोधिनी।।

तया विषयतृष्णया विगलितचित्तानां व्यवसायात्मिका: उद्योगलक्षणा मतिः समाधौ सम्यगासमंताद्धीयतेऽस्मिन्क्रियते स्वाद्विव्यवस्थायश्चेति समाधिपदार्थेनतत्त्ववेदविद्या बोध्यते तत्र न विधीयते नोत्पद्यते कर्मकर्तरि प्रयोगः ४४।।

मधुभाष्य।।

४४।।

276

रामचंद्रसरस्वतीटीका

भोगैश्वर्यप्रसक्तानामिति भोगो रैश्वर्ये तिलोत्तमालिंगनादिजः ऐश्वर्यं देवादिस्वाम्यं तत्र प्रकर्षेण सक्तानां करणाइत्यर्थः। प्रायभावः यद्यप्य नेकफलकं कर्म तथापि यस्मिन्प्रयोगे यदर्थतया संकल्पः क्रियते तत् प्रयोगे पृथक् हृदन देवफलं ददाति नहि सर्वेभ्यो ज्योतिष्टोम इति विनियोगे बुद्ध्या कामिभिः क श्चित्सर्वफलसाधनतात्पर्यसिद्धान्तो व्यवसायपर्ण बुद्धि व्यवसायात्मिका बुद्धिर्निश्चयरूपेति समाधानं हृदिस्थं तत्र व्यवसायात्मिका बुद्धिः स्फुटं तद्गुणपर्यक मेक तत्र भवति समाधौ व्यवसायात्मिका बुद्धिः समप्रयत्नात्सर्वस्य ॥ ४४ ॥ वेदाः कर्मसाध्यं स्वर्गादि प्राप्नोति तत्सीमा प्रकाशका

१५ः
१ ४४
१

भाषाअनुवाद

भोग औ ऐश्वर्य्यमे आसक्त तथा ऊपर लिखी विष लताके नु
ल्य सुन्दर वेदवाक्यसे आकृष्टकरे हरि गयाहै चित्त जिनका
उनकी समाधि अर्थात् चित्तकी एकाग्रता रूप परमेश्वरमे जो
एक निष्ठा तिसमे निश्चयात्मिका बुद्धिहोतीनही इससेकर्मरूप
एकोबुद्धि उसमे कर्त्तत्व रूप अहंकार अर्थात् हमकर्ताहै इस
वासनाकेमारे उनविचारोंकी ऐसी एकनिष्ठा निश्चयात्मिका
बुद्धि आपसे उत्पन्नकैसेहोयपहकहा ४४ ॥

दोहा

भोगऐश्वर्य लंपटसदा तेहिं बुद्धि हरेचित तिनकिमतिव्य
वसायनी होत समाधिनस्थित ४४ ॥

278

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्म
वान् ४५ ॥

शांकरभाष्यं

ये एवं विवेकबुद्धिरहिताः तेषां कामात्मनां यत्फलं तदाह
त्रैगुण्येति त्रैगुण्यविषयाः त्रैगुण्यं संसारो विषयः प्रका
शयितव्यो येषां ते वेदास्त्रैगुण्यविषयास्त्वं तु निस्त्रैगुण्यो भ
वार्जुन निष्कामो भवेत्यर्थः निर्द्वन्द्वः सुखदुःखहेतू सप्रतिप
क्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ ततो निर्गतो निर्द्वन्द्वो भव त्वं नित्य
सत्त्वस्थः सत्त्वगुणाश्रितो भव तथा निर्योगक्षेमोऽनुपात्तस्योपादा
नं योग उपात्तस्य रक्षणं क्षेमः योगक्षेमप्रधानस्य श्रेयसि प्रवृत्ति
र्दुष्करा इत्यतो निर्योगक्षेमो भवात्मवानप्रमत्तश्च भव एष तवोप
देशः स्वधर्ममनुतिष्ठतः ४५ ॥

आनंदगिरिकृतटीका

अविवेकिनामपि वेदाभ्यासवतां विवेकबुद्धिरुदेष्यतीत्याशंक्याह
य एवमिति तर्हि वेदार्थे तया कामात्मना प्रशस्तेत्याशंक्याह निस्त्रै
गुण्य इति भवेति पदं निर्द्वन्द्वादिविशेषणेष्वपि प्रत्येकं सम्बध्यते
त्रयाणां सत्त्वादीनां गुणानां पुण्यपापव्यामिश्रकर्मतत्फलसम्ब
न्धलक्षणः समाहारस्त्रैगुण्यमित्यंगीकृत्य व्याचष्टे संसार इति वेदश
ब्देनात्र कर्मकाण्डमेव गृह्यते तदभ्यासवतां तदर्थानुष्ठानद्वारा
संसारध्रौव्यान्न विवेकावसरोऽस्तीत्यर्थः तर्हि संसारपरिवर्जनार्थं विवे
कसिद्धये किं कर्तव्यमित्याशंक्याह त्वं त्विति कथं निस्त्रैगुण्यो भवेति
गुणत्रयस्य राहित्यं विधीयते नित्यसत्त्वस्थो भवेति वाक्यशेषवि
रोधादित्याशंक्याह निष्काम इति सप्रतिपक्षत्वं परस्परविरोधि
त्वे पदार्थौ शीतोष्णादिलक्षणौ निष्कामत्वे द्वन्द्वान्निर्गतत्वे शी
तोष्णादिसहिष्णुत्वे हेतुमकान्तत्रापि हेत्वपेक्षायां सदा सत्त्वगुणा

गी॰ टी॰ हि॰

श्रितत्वे हेतुमाह नित्येति योगक्षेमव्यापृतत्वेन सो रजस्तमोभ्याम
संसृष्टे सत्वमात्रे समाश्रितत्वमशक्यमित्याशंक्याह नयेति योग
क्षेम योजीवनहेतुतया पुरुषार्थसाधनत्वात्तिर्योगक्षेमो भवेति कु
तो विधिरित्याशंक्याह योगेति योगक्षेमप्रधानत्वे सर्वस्य सारासक
नम मिति ततो निर्योगक्षेमं शक्यमित्याशंक्याह आत्मवानिति अप्रमा
दो मनसो विषयपारवश्यप्रसक्तत्वे श्रयणस्योक्तोपदेशस्य अप्रमत्त
विषयत्वादर्जुनस्य अप्रमत्तत्वमिह विवक्षितमिति तेनाह पथश्च

९८९

स्वामिकृतटीका

ननु यदि स्वर्गादिकं परमं फलं न भवति तर्हि किमिति वेदैस्तत्साधनत
या कर्माणि विधीयंते तत्राह त्रैगुण्येति त्रिगुणात्मकाः सकामाधि
कारिणस्तद्विषयास्तेषां कर्मफलसंबंधप्रतिपादका वेदाः त्वंतु निस्त्रैगु
ण्यो निष्कामो भव तत्रोपायमाह निर्द्वंद्वः सुखदुःखशीतोष्णादियुग
लानि द्वंद्वानि तद्रहितो भव तानि सहस्वेत्यर्थः कथमित्यत आह नित्य
सत्वस्थः सत्वं धैर्यमवलंब्येत्यर्थः तथा निर्योगक्षेमः अप्राप्तस्वीका
रो योगः प्राप्तपरिपालनं क्षेमस्तद्रहितः आत्मवान् [illegible] अप्रमत्तः न
हि द्वंद्वाकुलस्य योगक्षेमव्यापृतचित्तस्य प्रमादिनस्त्रैगुण्यातिक्रमः सं
भवतीति ४५ ॥

पिशाचभाष्य

केनोपायेन सा वाक् त्यज्यत इत्यत्राह त्रैगुण्येति त्रैगुण्यं गुणास्त्रैगुण्यं स
त्वरजस्तमांसि तत्कार्यत्वाद्रागद्वेषौ त्रैगुण्यं तौ तौ विषयो येषां ते वेदा
स्त्रैगुण्यविषयाः निस्त्रैगुण्यविषयो निस्त्रैगुण्यो भव उपायैः लितत्र
द्वेषो भवेत्यर्थः निर्गतशीतोष्णादिः निर्द्वंद्वः नित्यसत्वस्थः सदा सत्वगुणस्थः
पानस्तथा निर्योगक्षेमो अनुपात्तस्योपादानं योग उपात्तस्य रक्षणं क्षेमः
योगक्षेमप्रसक्तस्य श्रेयसि प्रवृत्तिर्दुष्करेत्यतो निर्योगक्षेमो भव अप्र
तवतस्या वाचस्त्यागोपदेशः ४५ ॥

रामानुजभाष्य

एवमत्यंताल्पफलानि पुनर्जन्मप्रसवानि कर्माणि मानाधिल्ल महती

भोपिवत्सलतरतयात्मोपजीवनेप्रवृत्तावेदाः किमर्थंवदंतिकथं
सावेदादितोनित्यत्वाज्ज्ञतयोच्यंतेइत्यत्राह यथोत्गुणास्त्रैगुण्येसत्व
रजस्तमांसिसत्वरजस्तमःप्रचुराः पुरुषास्त्रैगुण्यशब्देनोच्यंतेत
द्विषयावेदाः तमःप्रचुराणांरजःप्रचुराणांसत्वप्रचुराणांचव
त्सलतयैवहितमवबोधयंतिवेदाः यत्तेषांस्वगुणानुगुणेन
स्वर्गादिसाधनमेवहितेनावबोधयंतितद्दैवतेरजस्तमःप्रचुर
णांसात्विकफलमोक्षाविज्ञत्वाः स्वापेक्षितफलमज्ञानतः का
मशावर्णेपविवशाश्रनुपायेउपायभ्रांत्याप्रणाशाभवेयुः अतस्ते
गुण्यविषयावेदास्त्वंतुनिस्त्रैगुण्योभवइदानींसत्वप्रचुरस्त्वंतदे
ववर्द्धयतत्रान्योन्यसंकीर्णगुणत्रयप्रचुरोभवनतस्मात्तुर्यवद्ध
थैत्यर्थः निर्द्वंद्वः निर्गतसकलसांसारिकस्वभावः नित्यसत्वं
स्थः गुणद्वयरहितनित्यप्रहृष्टसत्वस्थोभवकथमितिचेत्तुनि
र्योगःक्षेमः आत्मस्वरूपतत्वलाभायबहिर्भूतानामप्राप्तानांयो
गक्षेमनोचवर्त्तेमपरित्यज्यात्मवान्भवआत्मस्वरूपान्वेषणपरो
भव पर्यंवर्तमानस्यरजस्तमःप्रचुरत्वान्नश्यंतिसत्वंचवर्द्धते ४५

अभिनवगुप्तकृतटीका ॥

अतएवच वेदास्त्रैगुण्येनकरणेनविशेषेणसित्वंतिबध्नंति न
बंधकाः यस्मात्स्वतः स्वमोहबुद्ध्याकर्माणिवैदिकानिकि
षमाणानिबंधकानि अतस्त्रैगुण्यंकामरूपंत्याज्यं यदितुवेद
दूषणपरमेतदभविष्यत्तदकर्तव्यकरणेबाधचदिष्यत वेदाद
न्यस्यस्वधर्मनिष्पादकत्वभावात् येषांतुफलाभिलाषोविग
लितस्तेषांनवेदाबंधकाः ४५ ॥

परमार्थप्रपाटी॰

नचयदिस्वर्गादिकंफलंतस्मान्नहिंवेदैस्तत्साधनभूतानिकर्मा
णांकथंविधीयतइत्याशंक्यातद्विधायकश्रुतिवाक्यानामन्यत्ता
त्पर्यमस्तीत्याह त्रैगुण्येति अयमर्थः केवलंवेदानांत्रैगुण्यविषयत्वे
सिद्धेमस्तंभगवदुपदिश्यमानस्यनिस्त्रैगुण्यस्यवेदामूलकत्वे
नोपदेशानर्होत्वा तस्माद्व्याख्यातंप्रमाणेन तथावेदैश्चसर्वैरहमेव

वेद्योऽस्त्यतो भगवतैव प्रतिपादनाददोऽन्यथा व्याख्यायते यथाऽ
धिकारं सत्त्वादित्रिगुणसंबंधियत्फलं तत्त्रैगुण्यं तदेव विषयो
निरूपणीयत्वेन येषां ते येषु तथाविधा वेदाः संति त्वं तु सात्त्विक
फले नित्यसत्त्वस्थः सन् निस्त्रैगुण्यो भव नित्यं शुद्धं यत्तस्मिंश्च तत्र स्थि
तो निष्ठः सन्नुत्तेन तत्त्वज्ञानोत्पन्नेन गुणत्रयातीतो भव अथ सामा
न्यतः सत्त्वस्वरूपं तु उपासनायां पदं वेचकत्वं वा कार्यवितेषु त
देव सत्त्वमिश्रकादृढेनोपासनायां शबलशुद्धत्वभेदेन द्वियाम
त्वेनिरूक्तमास्ति तत्रैकं स्वर्गादिलवप्रापकमन्यत्तत्त्वज्ञानप्रतदेव भ
गवतापैश्रनिरूपयिष्यते तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनाम
यं सुखसंगेन बध्नाति ज्ञानसंगेन चानघेति श्रुतिरपि तैत्तिरीयो
पनिषत्सु वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्ध
सत्त्वाः ते ब्रह्मलोके तु परांतकाले परामृताः परिमुच्यंति सर्वे
इति ब्रह्मैव लोकः ब्रह्मलोकः शेषं स्पष्टं तथा च शुद्धसत्त्वेन रजस्त
मसी अभिभूय तथा तत्त्वज्ञानोत्पादकफलन्यायेन सत्त्वोपरमोऽपि त
तो निस्त्रैगुण्यत्वमेव पर्यवसन्नमित्यर्थः यद्वा त्रैगुण्यमेव विषयं
त्रैगुण्यविषयं तत्प्रापयंतीति तथा कुर्वंतीति त्रैगुण्यविषयाः एवं वि
धा ये वेदाः प्रथमे निरूपितमपि त्रिगुणसंबंधि स्वर्गादिफलं त्रैगु
ण्यं तद्विषयं प्रांतके जन्ममरणप्रवाहमावहति तेन बंधहेतुत्वात् पु
नरुपनिषद्विभागस्तथा पवेति रूपयंतीति तेन तथा श्रुतिरपि भि
तपश्ची पुत्रैषणाया लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं च
रंतीति ननु एवं श्रुतस्यापि कथं तेषां विधानमिति चेत् श्रु
इति हि काम्यायेन कर्मप्रवृत्तौ प्रलोभनपरत्वात् प्रथमर्थः भ
रोगपत्तरूपवद्यथेति केशसाध्यं तु कर्मस्वरूपं साक्षात् न निवर्तक
वति श्रुतेरोचनार्थाफलश्रुतिरिति यथा रोगार्तः शिशुर्लोभि
कतुभेषजं न गृह्णाति तत्र शर्करादिनिति मात्रा प्रलोभ्य
तः शर्करामात्रमौषधं ग्राहयति मातृवत्तात्पर्यमारोप्य तत्त्वं
प्रतत्वं निस्त्रैगुण्यो भवेति गुणातीत प्रकारकवेदार्थभजस्व अपि
वेदकं तेन त्रैगुण्यमविषयरूपत्वमाह निर्द्वंद्व इत्यादि द्वंद्वानि

शीतोष्णादीनि तत्सहिष्णुर्भव तथाऽप्राप्तस्य प्राप्तिर्योगः प्राप्तस्य
संरक्षणं क्षेमः तथा सावधानत्वं प्रमत्तानि दुःखहेतून् निस्त्रैगुण्यवि
षये संभवतीति विषयरूपत्वं निस्त्रैगुण्येन तदभाव इति नियम
तेस्या धैर्यवान् आत्मवान् सावधानः ४५ ॥

वनमाली टी०

प्रतिज्ञातां योगबुद्धिमाह षप्सप्ताभिः नतु परमाप्नोति कारुणि
कोवेदः स्वभावादेव विषयभोगजंलंपटं जीवं सकामं त्यत दुःखप्र
दुरंसरति देहकर्मणि कथं प्रवर्तयति कथं वा वैदिको वेदोक्तं क
र्मपरित्यजेदित्यत आह त्रैगुण्येति त्रयो गुणाः सत्त्वादयः तेषां सं
बंधि स्वर्गादि तदेव विषयप्रायाततः प्रतिपाद्यं फलं येषां ते त्रैगुण्य
विषया वेदाः सत्त्वादिकार्यस्वर्गादिप्रतिपादकाः त्वं तु निस्त्रैगुण्यो
त्रैगुण्यविषयात्स्वर्गादेर्निर्गतो भव मुख्यतात्पर्येण स्वर्गादिपर
त्वं वेदस्य मा विज्ञीत्यर्थः सर्वे वेदा यत्पदमामनंतीति श्रुतेः वेदैश्च
सर्वैरहमेव वेद्य इतीहापि वक्ष्यमाणत्वेन मुख्यवेदार्थो निर्गुणः
हितो माद्वयमेव तत्परो भव वेदा बहिर्मुखानां फलश्रुत्या कर्माणि
विश्वासाय पश्चादनित्यत्वादिबोधनेन तांस्त्याजयित्वा पूर्णसच्चिदा
नंदघन श्रीहरिप्रीतिसाधननिष्कामकर्मप्रतिपादनद्वारा मोक्षं
प्रापयति यतो तत्त्वमप्यापातार्थं त्यक्त्वा मुख्यार्थपरो भव यथा
बालानामतिवारणयौषधं पाययितुं गुडादिकं प्रदर्शयति विश्वा
साय ददाति च न तु गुडभक्षणे तात्पर्यं तथा बहिर्मुखान् स्वधर्मं नि
ष्कामकर्मणि प्रवर्तयितुमनूद्य ततो मोक्षमार्गे प्रवर्तयितुं क
र्माण्याह वेदस्तात्पर्यं तु मोक्षे तत्र नित्यसत्त्वस्थः नित्यविशुद्धस
त्त्वे श्रीहरेराश्रितो भव मनसा तन्निष्ठो भवेत्यर्थः अप्राप्तलाभो यो
गः आप्तरक्षणं क्षेमः ताभ्यां रहितः इति निर्वीह्यातिविक्तस्य यत्नं
माकार्षीरित्यर्थः आत्मवान् स्वामी परमात्मा यस्यास्तीति ज्ञान
वान् ४५ ॥

ऊत्तमवैजयन्ती टी॰

नन्वेवं चेत्सकललोकहितायप्रवृत्तावेदानिष्कामान्येवकर्म
णिकथंनवदंतिकथंवास्वभावतोविषयप्रवणान्जीवानन
नेकस्वर्गादिसुखरूपाणिकाम्यकर्माणिप्रदर्शयित्वातान
नेकदुःखरूपेसंसारेपातयंतियतस्तेऽहिताइववदंतस्
तेषांवैषम्यनैर्घृण्यादयोऽनेकदोषाभवे
युरित्याशंक्याह यथाधिकारमेवोप
दिशंतिनतुसर्वान्प्रतिसर्वकर्माण्ये
वेत्याह त्रैगुण्यविषयाइतित्र
याणांगुणानां सत्व ॥

रजस्तमसां साम्यावस्थायेषु ते सकामाः पुरुषार्थास्ते गुणशब्देनोक्तास्तेनेत्यपववि
षयायेषां ते त्रैगुण्यविषया वेदाः भवंति सात्विकाद्ब्रह्मेंद्रादीन् राजसायक्षर
क्षसादीन् तामसाभूतप्रेतपिशाचादीन् तन्नन्यतीत्व इंद्रादीश्च यजेदुपरि
मेवं सात्विकराजसतामसान् पुरुषानुद्दिश्य तत्तदधिकारानुसारेणावतन्न
उचितं कर्मोपदिशति तन्न सर्वोऽपि सर्वं कर्मेयजन्ते सात्विका देवान्
यक्षरक्षांसि राजसा भूतप्रेतपिशाचादीन्यजन्ते तामसा जना इत्यादिना
सात्विकादिश्रद्धावतो देवादियजनप्रकारं वस्तेनेत्थमेव यतो वेदा यस्य
यस्य पुरुषस्य यस्मिन् यस्मिन् कर्मण्यधिकारस्तेन पुरुषेण तत्तद्देवकर्मो
परिशेषतो वेदानां वैषम्यादिदोषो न भवतीति भावः ननु यद्येवं तर्हि गु
णत्रयाणां मध्ये कस्मिन् गुणे ममाधिकारः इत्यपेक्षायामाह निस्त्रैगुण्य
इति हे अर्जुन त्वं तु निस्त्रैगुण्यो भव त्रयाणां रजस्तमसां संकीर्णरूपाणां गु
णानां भावस्त्रैगुण्यं निर्गतं त्रैगुण्यं यस्मात् स तथा त्वं भव राजसतामस
सांकीर्णपुरुषविषयकानि वाक्यानि परित्यज्य केवलानि सात्विकवा
क्यान्येव गृहाणेत्यर्थः ननु निस्त्रैगुण्यस्येति पदस्य सत्वादिगुणत्र
याभावरूपश्चार्थो लोके प्रसिद्धस्तान् रजस्तमसोः संकीर्णरूपगुणत्रया
भावरूपोऽर्थस्तत्तया कस्माल्लभ्यते यच्च केवलसत्वगुणस्यैवग्रहण
मपि कस्मात् क्रियते इति शंकानिवारणाय विशेषणमाह निर्द्वंद्व इति
निर्गते द्वंद्वे राजसतामसपुरुषविषयके वाक्ये यस्मात् त्रयाणामन्नतदावया
नो विषयस्त्वमा भवेत्यर्थः इत एव तत्रैव सांकीर्णवाक्यमपि तिरस्कृत्य परिग्रहे
राजसतामसेन त्वत्त्वं तर्हि सांकीर्णस्यकावार्तेत्यर्थः नन्नु सत्वे स्थित सेव मम
किं फलं भविष्यतीत्यपेक्षायामाह नित्यसत्वस्थ इति यदि त्वं नित्यमेवेष्टा
निष्टफलप्रदेषु सर्वेषु कालेष्वपि इंद्रियविषयसंसर्गनिमित्तकामक्रोधादीन्
विहाय सत्वे सत्वगुणे स्थितो भविष्यसि तर्हि आत्मवानपि भविष्यसि आत्मा
तेन तत्तत्स्वस्वरूपगुणादिविचारवानपि भविष्यसि यदा आत्मा मनस्त
हियतेव स्वसत्वे विषयकामादित्यागेन वशीभूतमनाभविष्यसि नन्व
निमवलेन्द्रियावर्जनीयविषयविहृतवित्तस्य मम कथमात्मस्वरूपा
देर्विचारः कथं वा मनसः स्वाधीनता भवेदिति चेत्तत्राह निर्योगक्षेम
नि इति अप्राप्तानामात्मस्वरूपादिप्राप्त्युपायविरोधिनां शब्दादिविषयाणां
स्वीकारो योगस्तेषां प्राप्तानां पालनं च क्षेमः निर्गतौ योगक्षेमौ यस्मात्स

गी. टी. हि.

थाभूतस्त्वमेवमप्रवृत्तैर्दुर्लभाः पर्वतेन द्यर्थीममेवसंतिपतनेषोपालकस्था हमेवनान्यस्मेवमभिनिवेशेनेनप्रवृत्तस्त्वसिवेत्तसैवनिर्विषयकाममनास्तत्त्वान्तस्वरूपादिविचारयोग्यो भविष्यसि नान्यथेत्यभिप्रायः ४५॥

मधुसूदनीटीका

ननु सकामानां मा भूदाशयदोषाद्व्यवसायात्मिका बुद्धिः निःकामानां तु व्यवसायात्मिकया [illegible] बुद्ध्या कर्म कुर्वतां कर्मणां भाव्यात्स्वर्गादिफलप्राप्तौ ज्ञानप्रतिबंधः समान इत्याशंक्याह त्रयाणां गुणानां कर्म त्रैगुण्यं काममूलः संसारः स एव प्रकाश्यत्वेन विषयो येषां तादृशाः कर्मकांडात्मकाः यो यत्फलकामस्तस्यैव तत्फलं वेदा यथंतीत्यर्थः सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति योगेपि सकृदनुष्ठानात् सर्वफलप्राप्तिर्भवतीति तन्न कामनाविरहात् यत्फलकामनयानुतिष्ठति तदेव फलं तत्प्रयोगः इति स्थितं योगसिद्ध्यधिकरणे यस्मादेवं कामनाविरहे फलविरहः तस्मात्त्वं निस्त्रैगुण्यो निष्कामो भव हे अर्जुन एतेन कामस्याभावात्संसारो निरस्तः ननु शीतोष्णादिद्वंद्वप्रतीकाराय वस्त्राद्यपेक्षणात्कुतो निष्कामत्वमत आह निर्द्वंद्वः सर्वत्र भवेति संबध्यते द्वंद्वः मात्रास्पर्शाः क्षिप्त्वाद्वायेन शीतोष्णादिद्वंद्वसहिष्णुर्भवा मत्र सर्वं स्वे कथं वा सोढव्यमित्यपेक्षायामाह नित्यसत्त्वस्थः नित्यमचंचलं यत्सत्त्वं धैर्यापरपर्यायं तस्मिन्स्थितेति तथा रजस्तमोभ्यामभिभूतसत्त्वो हि शीतोष्णादिपीडया मरिष्यामीति मन्वानो धर्माद्विमुखो भवति त्वं तु रजस्तमसी अभिभूय सत्त्वमात्रावलंबनो भव ननु शीतोष्णादिसहनेपि क्षुत्पिपासादिप्रतीकारार्थं किंचिदन्नपानाद्यपात्रं चरत्नाणीयमिति तदर्थं यत्ने क्रियमाणे कुतः सत्त्वस्थत्वमित्यत आह निर्योगक्षेमः अलब्धलाभो योगः लब्धपरिरक्षणं क्षेमः तद्रहितो भव चित्तविक्षेपकारिपरिग्रहरहितो भवेत्यर्थः नचैवं चिंता कर्तव्या कथमेवं सति जीविष्यामीति यतः सर्वांतर्यामी परमेश्वर एव योगक्षेमादि निर्वाहयिष्यतीत्याह आत्मवान् आत्मा परमात्मा ध्येयत्वेन योगक्षेमादिनिर्वाहकत्वेन च यस्य स आत्मवान् सर्वकामनापरित्यागेन परमेश्वरमाराधयतो मम स एव देहयात्रामपेक्षितं संपादयिष्यतीति निश्चित्य निश्चिंतो भवेत्यर्थः आत्मवानप्रमत्तो भवेति वा ४५ ॥

सदानंदीटीका

नतुमाभूत्सकामतोव्यवसायात्मिकामतिः निष्कामतोनत्यावुद्ध्या
निमकर्मादिकुर्वतां १ स्वर्गमोक्षकर्मसामर्थ्यात्मनिर्वृषः समोभवेन् तेषां
मपात्मविज्ञानेहस्याशंकाह सर्वभूः २ गुणातोकर्मसंसारस्त्रयाणांका
ममूलकः सप्रकाश्यतयायेषांविषयस्तात्र शास्त्रयः ३ कर्मकांडात्म
कावेदास्तत्रकामात्रसारतः वोयर्यंनिफलेकामाभावेनिष्कामताप
नः ४ प्रवदातनत्यात्वंतुनिष्कामोभवसर्वदा पतेनुकर्मसामर्थ्यान्ते
सारोस्तीत्यपाकृतं ५ ननुद्वंद्वप्रतीकारसिद्धयेपेक्ष्यतेखिलं वस्त्राश
नादिचेन्नहिंकथंनिष्कामतेतिचेत ६ मात्रास्पर्शास्तुहेतूकन्यायेत्रै
वविवेकतः भवद्वंद्वसहिष्णुत्वमालंब्यासंगमासितिग ७ सोढव्या
कथंदुःखमसह्यमितिचेद्गुण यत्नत्वमचलंधैर्यंतदालंबीसंभव दौं ८
प्रलयलाभोयोगःस्यात्तत्क्षेमोलब्धस्यरक्षणं नद्वन्द्वोभवपीडत्रिवि
तेपकमलेत्यज ९ जीविष्यामिकथंनैवचिंताकार्यायतोहरिः सर्वा
नर्यामिस्वरूपेणयोगक्षेमकरस्तव १० प्राप्ताप्राप्येपतयायस्यपरमेश्व
रस्तकः वर्ततेपालकत्वेनसदासत्वेभवात्मवान ११ सदाकृष्णप
दालंबिपस्यचेतःसमाहितं सनिर्द्वंद्वःसमत्वस्थोनिःसंकल्पाःस
दासुखी १२ ॥ ४५ ॥

नीलकंठीटीका

कस्यतर्हिसमाधौबुद्धिर्भवतीत्यतआह त्रैगुण्येति त्रैगुण्यंगुणत्रय
कार्यंऊर्ध्वमध्याधोगतिरूपंसंसरणंतदेवप्रकाश्यत्वेनविषयो
येषांतादृशाःकर्मकांडपरावेदाः त्वंतुनिस्त्रैगुण्योभव ऊर्ध्वगता
वपिविरक्तोभवेत्यर्थः वस्तुतिचनतद्गुणप्रधानंगतित्रयं ऊर्ध्वंग
च्छंतिसत्त्वस्थाइति दिव्येष्वपिविषयेष्वविरक्तः समाधावपिक्रिय
नइतिभावः किलतत्त्वेसोनिस्त्रैगुण्यइत्यतआह निर्द्वंद्वइति सु
खदुःखेमानापमानौशत्रुमित्रेशीतोष्णेइत्यादीनिर्द्वंद्वानिसमप्रतिप
तपरार्थरूपाणितेभ्योनिर्गतोनिर्द्वंद्वः सर्वत्रसमबुद्धिरित्यर्थः न
नवायमानमघ्राणादि किंकथंशीतादिवत्तंतंप्राकाश्यमनआह नि
त्यसत्त्वस्थइतिनित्यंसर्वदासत्त्वंधैर्यंसत्त्वगुणोवातदाश्रितोभूत्वा

गी॰ धीरो हि सर्वं सोढुं शक्तः सात्त्विको वा प्रारब्धकर्मोपस्थापितमिदं
टी॰ दुःखमपरिहार्यं किमनेन मनसेति जानन् सर्वं सोढुं शक्तोस्त्येव
हि॰ नन्वसंतुःसहेत्तयादिदुःखं कथं निस्त्रैगुण्येन सर्वथा प्रवृत्ति
स्त्यैव न सोढुं शक्यमत आह नियोगक्षेमरहित अप्राप्तस्य प्राप्तिर्यो
गः प्राप्तसंरक्षणं क्षेमः एतद्द्वयमपि प्रारब्धकर्माधीनमिति
ततोपि निर्गत इत्यर्थः तत्र हेतुः यत आत्मवान् जितचित्तः स
हि सर्वोत्तयापत्यप्रवनाकुलो नित्यसत्त्वमतया निरुद्धमस्त्व भव
नीति त्वमप्येतादृशो निस्त्रैगुण्यो भवेत्यर्थः ४५ ॥

293

ज्ञानेरी टीका

जेतेत्यादयः श्रुतयः प्र
पतेदेवप्रपंचयति वेदाः स्वर्गकामोयजेत भावेन स्व हे अर्जुनः त्वमोह
मार्थानभिसंधानात् त्रयाणां गुणानां भावेन स्व हे अर्जुनः त्वमोह
जनकत्वेनकारणेन विषया विधिरेवत्रिबध्नन्तीति श्रुत्यना
विषयाबन्धकास्सन्ति हे अर्जुनः त्वमोह बुध्यास्त्वोदिकाम न
याक्रियमाणानि वैदिकानि कर्माणि बन्धकानि भवन्तीत्यः
थः निस्त्रैगुण्यो भव स्वबोदि बुद्ध्वा निवर्तस्वेत्यर्थः कथमित्या
ह निर्द्वन्द्वः हे अर्जुनः वैराग्य द्वेषौ शीतोष्णौ कामक्रोधौ सहमा
नः सत्वं धैर्यमवलम्ब्य स्थितः अत एव योगादलब्धलाभात् दे
मात्सब्ध्यस्य पालनाच्च निर्गतः आत्मवान् निष्कामतया नित्यनै
मित्तिकानि कर्माणि कुर्वाणः ज्ञानैकनिष्ठ इत्यर्थः ४५ ॥

त्वमपि पाण्डित्याभिरोचना वचनवंचमानचित्तत्वं विहाय यथोपदिष्टविज्ञाननिष्ठो भवेत्याह +

भावतः अत्यन्तविज्ञानोपदेशपात्रभूत

रामकंठी टीका हे अर्जुनः त्वमोहमय
त्रैगुण्यम् हे अर्जुनः विषयः समा
सत्वरजस्तमांसि त्रयोगुणाः एव त्रैगुण्यं त्रैगुण्यविषयं त्रैगुण्य
बुद्धिमयत्वात् त्रैगुण्यविषयश्चाश्रयोयस्य सत्रैगुण्यविषयः
विश्वरूपवर्गः उपचारात् त्रैगुण्यशब्देनोच्यते तदेवं विषयः तेन
विषयो गोचरो येषां ते तथाभूता वेदाः यद्वा हे अर्जुन यतस्ते सर्वे तोव
स्यामि हे त्वत्क्रियाविशेषत्वे वेदैर्नियुज्यते विशेषणः सत्यः आत्मा आ
तिरिक्तरूपः सर्वगतप्रकोयथोक्तविशेषणः नास्ति तत निस्त्रैगु
ण्येनप्रतिपद्यते ततस्तेषां सत्रैवात्मानाभिगुणेवैदकैक
णः गुणत्रयातीतो वेद्यतत्त्वमात्रेण हे अर्जुनः विविक्तस्वभावः
स्वभावः संबन्धी नवत इमकोगुणेभ्योत्पन्न विविक्तस्वभावात्म
परमार्थतो यमात्मानमीदृशमात्मत्वेन प्रत्यवरूपत्रात्मवान्
वपरमार्थसन्तमेवात्मानं न प्रकोपदेश प्रतिपत्ति प्राधिल्यादस
न्तमिव माकार्षीरित्यर्थः यदा त्रिगुणत्रयातीत स्वभावमात्मा
नमात्मतया प्रतिपद्यसे तदा निर्द्वन्द्वो भव एतानि हि द्वंद्वानि
जरामरणादिभ्यः क्लेशेभ्यो निष्क्रान्तो भव यतस्तु निर्द्वं
द्वनात्मनि त्रिगुणेर्द्वन्द्वैः आत्मप्रत्ययनिबन्धानि यतस्त्वं सद्वं
हस्तेनो नित्यसत्वस्थो भव नित्यमविनाशियत्सत्वं सत्वं योगक्षेमो विभ
स्तत्राश्रितनएव उपलब्ध्यप्रतिष्ठ एतानि हृष्टः सन्निर्योगक्षेमो

गी॰ टी॰ द्वि॰

294

व अप्राप्तस्य प्राप्यस्य वस्तुनः प्राप्तिर्योगः प्राप्तस्य परिरक्षणं क्षे
मः निष्क्रान्तस्ताभ्यां निर्योगक्षेमः तथाविधो भव नहि नित्यसं
पूर्णत्वात्सर्वतो निरभिलाषात्मनः प्राप्यं किंचित्स्वं भवति नवा
पूर्वं तया प्राप्तस्य कस्यचिदंशस्य विनाशाशंकया परिरक्षणं मे
विपर्ययप्रत्ययगृहीतात्माभासदेहाधिनिबन्धन एव योगक्षे
इति न तो बाह्यात्मप्रत्ययतया सत्यात्मप्रत्यवमर्षादात्मवा
भव नतु भोगैश्वर्यप्रसक्तत्वान्नहि निधर्मानुष्ठानैकनिष्ठाप
देशप्रकृष्टविषयत्वेन विधीयमानक्रियाविशेषैः निकेतवाते
पदेशाशानसंकुले वेदप्रावेसर्वमनुष्ठेयं तथा वगन्तव्यम्

[illegible]
[illegible]

लासिकी [illegible] टीका

अतस्त्वं विज्ञानपात्रमसलेकामनिष्टचित्ततो विहाय क्रियमा
णापि कर्माणि यथोपदिष्टविज्ञाननिष्ठो भवेत्याह त्रैगुण्येति
त्रयोगुणाः सत्वरजस्तमांसि त्रयोगुणा एव त्रैगुण्यं संसारिप्र
पंचः स्वपरविषये स्वबन्धबोधधी अनित्याणि त्रैगुण्यपचारात् त
द्विषया वेदाः कर्मकांडात्मकाः वेदानां च ज्ञानयोरन्तरात्मक
कर्म[illegible]प्रतिपादकत्वात् अथवा त्रैगुण्येन सकामत्वेन विषया
बन्धका वेदा विशेषेणास्मिन्वतीति विषयाः+ [illegible] यथानि
योगक्षेमः अप्राप्तस्य परिरक्षणं क्षेमस्तद्रहितो भव+ द्वन्द्वः
शीतोष्णादिद्वन्द्वसहनशीलः ईदृशः सन्नात्मवान्भव अप्रमत्तव
शैसाधकं तृणाबाधकं परिहरेत्यर्थः ४५ ॥

षिभोऽरूप। त्वं त्वनीदृशो
नि स्त्रैगुण्यः त्रैगुण्यादि
क्रान्तः सत्व भिन्नलाष
इति यावत् आत्मवान् प्र
मत्तो भव आत्मानं प्रत्यवमृ
श्य भव अन्येनात्मनः प्र
त्यवमर्षाभावात् नहु नम
न उप्रमा न हि सिद्धौ संविद
ण्य परामर्षे तूपावेतदेहा
दि अभावेन जउनाय
तुल्यो वप्राप्तदात्मनीति +

पंचोलीटीका

यदि काम्यकर्मकांडैः स्वर्गादिकं परमं फलं न भवति नहि वेदैः किमि
ति तत्साधनतया कर्माणि विधीयंते तत्राह त्रैगुण्येति हे अर्जुन वे
दाः त्रैगुण्यविषयाः त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते
संसारविषयाः त्वं तु पुनर्निस्त्रैगुण्यो निष्कामो भव निर्द्वन्द्वः द्वन्द्वं सं
प्रतिपक्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ ततो निर्गतो निर्द्वन्द्वो भव सुखदुः
खयोः शीतोष्णादिकयोः प्राप्तयोः विक्रियारहितः उभयोरपि सम
इत्यर्थः नित्यसत्वस्थः सदा सत्वगुणाश्रितो भव अप्राप्तस्योपार्जनं

योगः उपात्तस्य रक्षणं क्षेमः योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दु-
ष्करेत्यतो निर्योगक्षेमो योगक्षेमाभिलाषारहितो भव आत्मवान्
अप्रमत्तश्च भव एष तवोपदेशः ४५

रणवीरसमिद्धोधिनी॥

त्रैगुण्येति अत्र चेत्थं वाक्यच्छेदः त्रैगुण्यविषया वेदा इति निस्त्रै-
गुण्य इति भवार्जुन निर्द्वन्द्व इत्यादि वेदा इति बहुवचनेन प्रवृत्ति-
लक्षणा वेदत्रयी कथ्यते सा च सत्त्वरजस्तमः प्रधाना कर्मणा
बोध्या तत्र सत्त्वप्रधाना प्रभातस्थानीया रक्तरजःप्रधानं च म-
ध्याह्नस्थानीयं तमः प्रधानं सायं तत्र सर्वे साम्प्रदायिका
शान्तिरूपिणमिति तेनावदाम्भो तत्र त्रयस्य वर्णस्य यस्य वाग्रमस्य
त्रैगुण्येनाचारेण सर्वथा वित्यं तस्यत त्रिरूपं परमो धर्म इति
निस्त्रैगुण्य इति अत्रापि वेद इत्यत्र पञ्चप्रकवचनात् सब ध्यते
प्रवृत्तिलक्षणा या वेदत्रयी तस्या वेदो गुणातीतविषयो अप्र-
प्रतिपादकः तेनाधुनातनप्रयोजनं नास्ति अत्याश्रमविषय
व्यति-
रेकात् भवार्जुनेति निर्द्वन्द्वो भव द्वन्द्वाः शीतोष्णादयः स्वाभाविकं द्वन्द्वं ते सत्त्व-
स्थितो भवेत्यर्थः तथा नित्यं सत्त्वसंस्थानाभाविकं लब्धस्य परिपालनं क्षेमः
तिष्ठतीति अलब्धस्य लाभो योगः ४५॥
नरहरिर्नोपि सन्नात्मवान्महाहृदयः

मधुभाष्य

४५॥

295

त्रैगुण्येति त्रैगुण्यं गुणत्रयसमाहारात्मा संसारस्तद्विषयास्तत्साधन
समर्पकतया न हि विषया वेदाः कर्मकांडात्मकाः संबंधिनस्तथाहारः तेनस्या
त्मवान् भवेति संबंधः आत्माविद्युनेजिज्ञास्यत्वेनास्य [illegible] स्यात्मवान्
आत्मस्वात्नैकपरो भवेत्यर्थः ननु केकर्मणाभावात्संसारो भविष्यतीति न
त्राह निस्त्रैगुण्य इति त्रैगुण्यशब्देनात्र त्रैगुण्यात्मकसंसारमूलभूताः
कामा गृह्यंते तेभ्यो निष्क्रांतो निष्कामो भवेत्यर्थः एवं च ब्रह्मार्पणबुध्या
लोके कर्मसु कल्पितत्वात्तत्फले दोषस्यतीति भावः ननु परलोकफलेच्छा
भावेपि सुखार्थं कर्माचरतः [illegible] दिवापापनिकारार्थैहिकवस्त्रादिफले
च्छोद्भवो रागततः किमपराधमात्मशिक्षितेत्यत आह निर्द्वंद्व इति शीतोष्ण
दिसहिष्णुर्भवेत्यर्थः कथं वा शीतोष्णादीनि सोढुं शक्यं तत इत्याशंक्या
ह नित्यसत्त्वस्थ इति नित्यमचलं यत्सत्त्वं सत्त्वगुणस्तत्स्थस्तद्बहुः सत्त्वाधिका
स्त्वं सोढुं शक्ष्यसीति भावः ननु कलत्राद्यर्थं किंचिदनुपादानमुपादेयं उ
पात्तं च रक्षणीयं स्यात्तत्र च प्रयत्ने सत्त्वं भज्येतेत्यत आह निर्योगक्षेम इति ४
प्रपरिग्रहो भवेति भावः नन्वेवं वैदिकानां कर्मजन्यफलभोगजनितै
रागैर्दैवविकल्पवा[illegible]त्माहमगवान्या [illegible] ॥

स्मी

भाषाअनुवाद

स्वर्गआदिफलजो परमफलनहींहै तौफेरिवेदोंने किसलिये स्वर्ग
आदिफलके साधन नानाप्रकारके कर्मोंका विधानकियाहै तोकह
तेहै किसकामअधिकारी जनोके अर्थवेदकर्म फलका प्रतिपादन
अर्थात् करतेहै परन्तु तुमनिष्कामहोउ निष्कामहोनेकी उपाय
पहरहै किनिर्द्वंद्व अर्थात् सुखदुःखशीतउष्णहानिलाभ जन्मम
रण आदिसे रहितहोउ अर्थात् येसबसहो जोकहोकि कैसेरहन (अवलम्बन)
(काहेते) कोसमर्थहैं तौ कि धैर्य करिके सहो और अप्राप्तवस्तुकीप्राप्ति करनेकी
इच्छाजोयोगहै औप्राप्तभई वस्तुकीरक्षाकरनाजोक्षेमहै इनदोनोंकी
परित्याग करिके सावधानहोउ क्योंकिसुखदुःखमे आसक्त औ अप्राप्त
वस्तुकी इच्छाप्राप्तका रक्षण इसमेव्याकुलचित्त असावधानजोहै
वहनिष्काम कैसेहोसकेगा त्रैगुण्यजो त्रिगुणात्मक संसारसोहै वि
षयकरे कथनीय जिनकोअैसेजोवेदहैं परन्तुमनिस्त्रैगुण्यकहे सं
सारिकभावसुखदुःखादिसेरहितहोउ ४५ ॥

दोहा

त्रयगुण विषयवेदहैं त्रिगुणविनाहोपार्थ द्वंद्वरहितनित्यि
तसत्वमे योगक्षेम सामर्थ ४५ ॥

यावानर्थ उदपाने सर्वतः संप्लुतोदके तावा
सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६ ॥

शांकरभाष्य

सर्वेषु वेदोक्तेषु कर्मसु यान्युक्तान्यनन्तानि फलानि तानि
नापेक्ष्यन्ते चेत् किमर्थं तानीश्वरायेत्यनुष्ठीयन्त इत्युच्यते शृणु या
वानिति यथा लोके कूपतडागाद्यनेकस्मिन् उदपाने परिच्छिन्नो
दके यावान् यावत्परिमाणः स्नानपानादिरर्थः फलं प्रयोजनं
स सर्वोऽर्थः सर्वतःसंप्लुतोदकेऽपि योऽर्थस्तावानेव संपद्यते त
त्रान्तर्भवतीत्यर्थः एवं तावांस्तावत्परिमाण एव संपद्यते सर्वे
षु वेदेषु वेदोक्तेषु कर्मसु योऽर्थो यत् कर्मफलं सोऽर्थो ब्राह्मण
स्य संन्यासिनः परमार्थतत्त्वं विजानतो योऽर्थो यत् विज्ञानफलं
सर्वतः संप्लुतोदकस्थानीयं तस्मिंस्तावानेव संपद्यते तत्रैवान्त
र्भवतीत्यर्थः यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं त
दभिसमेति यत्किंचित् प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेदेति
श्रुतेः सर्वं कर्माखिलमिति च वक्ष्यति तस्मात्प्राक् ज्ञाननिष्ठाधि
कारप्राप्ते कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्त
व्यं ४६ ॥ ४६ ॥

आनंदगिरिकृतटीका

ईश्वरार्पणधिया स्वधर्मानुष्ठानेऽपि फलकामनाभावाद्वैफल्यं योग
मार्गस्येति मन्वानः शंकते सर्वेष्विति कर्ममार्गस्य फलवत्त्वं प्रति
जानीते उच्यत इति किं तत्फलमित्युक्ते तद्विषयं श्लोकमवतारय
ति यावानिति यथोदपाने कूपादौ परिच्छिन्नोदके स्नानाचमनादिरर्थो
यावानस्यपाने स तावानपरिच्छिन्ने सर्वतःसंप्लुतोदके समुद्रेऽन्तर्भव
ति परिच्छिन्नोदकानामपरिच्छिन्नोदकांशत्वात्तथा सर्वेषु वेदोक्ते
षु कर्मसु यावानर्थो विषयविशेषोपरक्तः सुखविशेषो जायते स
तावानात्मविदः स्वरूपभूते सुखेऽन्तर्भवति परिच्छिन्नानंदानामपरि
च्छिन्नानंदांशत्वाभ्युपगमादेतस्यैवानंदस्यान्यानि भूतानि मात्रा.

गी०
टी०
हि०

मपजीवन्तीति श्रुतेः तथाचापरिच्छिन्नात्मानन्दप्राप्तिपर्यवसायितो
योगमार्गस्य नास्ति वैफल्यमित्याह यावानिति उक्तमर्थमन्तरयोज
नया प्रकटयति यथेति उदकं पीयतेऽस्मिन्निति उदपानं कूपादि
परिच्छिन्नोदकविषयत्वमुदपानशब्दस्य दर्शयति कूपेतिकूपादि
गतस्याभिधेयस्य समुद्रेऽन्तर्भावासम्भवात् कथमिदमित्यमित्या
शंकार्थशब्दस्य प्रयोजनविषयत्वं व्युत्पादयति फलमिति यत्न
लत्वेनलीयते तत्फलमित्युच्यते तत्कथं तडागादिकृतं स्नान
पानादि तथेत्याशंक्य तस्याल्पीयसोनाशोपपत्तेरित्याह प्रयो
जनमिति तडागादिप्रयुक्तप्रयोजनस्य समुद्रनिमित्तप्रयोजनान्त
मात्रत्वमयुक्तमन्यस्यान्यात्मत्वानुपपत्तेरित्याशंक्याह तत्रेति घटा
काशादेरिव महाकाशे परिच्छिन्नोदककार्यस्यापरिच्छिन्नोदकका
र्येऽन्तर्भावः सम्भवति तत्स्यामाविनरापेक्षाभावादित्यर्थः पूर्वार्द्धं
दृष्टान्तभूतमेवं व्याख्याय दार्ष्टान्तिकमुत्तरार्द्धं व्याकरोति एवमि
त्यादिना कर्मब्रह्मयोरर्थस्तूक्तोऽब्धनक्ति यत्तत्कर्मफलमिति सर्वेष्वि
जानतो ब्राह्मणस्य योर्थस्तावानेव संपद्यत इति सम्बन्धः तदेव
स्पष्टयति विज्ञानेति तस्मिन्नन्तर्भवतीति शेषः कथं कर्मफलं ला
नफलेऽन्तर्भवतीत्यत्र प्रमाणमाह सर्वमिति यत्किमपि प्रजाः
साधुकर्म कुर्वन्ति तत्सर्वं सपुरुषोऽभिसमेति प्राप्नोति यः पुरुषः
वेद विजानाति यद्ब्रह्म स [illegible] वेद तद्वेद्यमिति श्रुतेरर्थः कर्म
फलस्य सगुणज्ञानफलेऽन्तर्भावः संवर्गविद्यायां सूच्यते कथमेता
वता निर्गुणज्ञानफले कर्मफलान्तर्भावः सम्भवतीत्याशंक्याह
सर्वमिति तर्हि ज्ञाननैष्ठैव कर्तव्या तावतैव कर्मफलस्य ल
ब्धतया कर्मानुष्ठानानपेक्षणादित्याशंक्याह तस्मादिति योगमा
र्गस्य निष्फलत्वाभावस्तत्त्वहार्थः ४६ ॥

स्वामिकृतटीका

ननु वेदोक्तनानाफलपरित्यागेन निष्कामतयेश्वराराधनविषयया व्य
वसायात्मिका बुद्धिः कुबुद्धिरेवेत्याशंक्याह यावानर्थ इति उदकं पीयतेऽ
स्मिन्निति उदपानं वापीकूपादि तस्मिन्स्वल्पोदके एकत्र कृत्स्नस्यार्थस्य

भवात् तत्रतत्रपरिभ्रमणेन विभागशो यावान् स्नानपानादिरर्थः प्र
योजनं भवति तावान् सर्वोप्यर्थः सर्वतःसंप्लुतोदके महाह्रदे एकत्रैव य
था भवति एवं यावान् सर्वेषु वेदेषु तत्कर्मफलरूपोऽर्थः तावान् सर्वोपि वि
ज्ञानतो व्यवसायात्मिकबुद्धियुक्तस्य ब्राह्मणस्य ब्रह्मनिष्ठस्य भवत्येव
ब्रह्मानंदे क्षुद्रानंदानामंतर्भूतत्वात् एतस्यैवानंदस्यान्यानि भूतानि
मात्रामुपजीवंतीति श्रुतेः तस्मादियमेव सुबुद्धिरित्यर्थः ४८ ॥

पिशाचभाष्यं

तोननिष्टैंकार्यमूनबुद्धेर्व्यवसायिनो योगनिष्ठस्य श्रौतस्मार्तफला
नवाभिलक्षणो दोष इति चेन्नैवं यतः यावानिति यथा लोके कूपत
डाकाद्यनेकस्मिन्नुदपाने उदके पीयते तस्मिंस्त्रिसमुदयाने जलाशयस्त
स्मिन् जलाशये यावान् यावत्प्रमाणः स्नानपानादिरर्थः फलं सर्वो
र्थः सर्वतस्संप्लुतोदके कूपतडाकाद्यविभागेन स्थिते जलसमूहे भवत्येव य
थैवं तथा वेदविहितयागदानादिसाधनसाध्यो यावानर्थस्तावान् विज्ञा
नतो कामहतस्य ब्राह्मणस्य भवति सर्वं तदभिसमेति यत्किंच प्रजाः साधु कु
र्वंति यस्तद्वेद समेवेति श्रुतेः सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत
इति च वक्ष्यत इति ४८ ॥

रामानुजभाष्यं

न च वेदोदितं सर्वं सर्वस्योपादेयं यथा सर्वार्थपरिकल्पिते सर्वतःसंप्लु
तोदके उदपाने पिपासोर्यावानर्थः यावदेव प्रयोजनं तावदेव तेनोपादीय
ते न सर्वं एवं सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ब्रह्मसंबंधि ब्रह्मणः वे
दार्थं विजानतः मुमुक्षोः वैदिकस्य मुमुक्षोर्यदेव मोक्षसाधनं तदेवोपादेयं
नान्यत् ४८ ॥ ४९ ॥

अभिनवगुप्तटीका

यतो वेदाः परं तेषां समस्तज्ञानोपयोगिनः ज्ञानपथाह यस्य स्वधर्ममात्रे
तानेव प्रायाप्त्ये परिमितादपि वेदभाषितात्कार्यम् ४८ ॥

परमार्थप्रपाटीका

ज्ञानपव ज्ञाने वेदतात्पर्यं स्फुटयंस्तौति यावानिति उदउदकायोपतंय
स्मिन्नित्युदपाने तस्मिन्पानपर्यंतोदके नित्यहीरपल्वलादौ भ्रमणे कृत
वतः प्रकृतमस्य यावानर्थः सिध्यति तावान् सर्वतः सर्वोप्यर्थः एकत्रसंस्र

गी॰ टी॰ हि॰

तोदके महाह्रदे सिध्यति एवं यावान्सर्वेषु पूर्वोत्तरमीमांसादिषं
शास्त्रेषु कर्मनैष्कर्म्याद्यर्थो निरूपितोऽस्ति तावान्विजानतो वि
शेषेण वेदतात्पर्यं जीवतो ब्राह्मणस्य ब्रह्मज्ञस्य पुरुषस्य संन्यसतो
दकस्थानीयेषु वेदेषु सिध्यति ४६ ॥

वनमालीटीका

ननु स्वर्गसुखानि कस्मात् स्वर्गादिफलं विहाय कथं कर्म कार्यं न हि प्रयो
जनं विना मन्दोऽपि प्रवर्तते न च भगवदाराधनादेव तत्सर्वफलं सा
दितवांश्च तदाराधनात् भक्तिरेव स्यात् न पुत्रादिप्राप्तिरित्याश
कां सर्वफलानां भगवदाराधनलभ्यफलेऽन्तर्भूतत्वादित्याह यावानि
तियथोदपाने कूपादौ यावानर्थः प्रयोजनं जलपानादिकं तावा
र्थः स्नानादि सर्वतः सर्वस्मिन् संप्लुतोदके ह्रदादौ भवति एवं फल
यावत्सर्वेषु वेदेषु काम्यकर्मणो यत्फलं स्वर्गादिकं तावत्फलं परो
क्षविज्ञानतः परोक्षज्ञानिनो ब्राह्मणस्य परोक्षज्ञानतद्दाराधनलाभेऽ
न्तर्भावितानि भवति तस्मिन् प्रसक्ते किमित्यल्पफलं पुमर्थकामे
श्री
लसमाश्रितानन्दलतोऽन्तरेणनाविः श्रेयसंमहत्फलं प्रयातेति
वोक्तः स्वयंभावः पुत्रादीनां न स्वतः पुरुषार्थत्वं किं तु तज्जन्यसुखमेव
पुरुषार्थं तत्त्वे वेषयिकसातिशयेन स्वर्गादिः स्वसंभिन्नं च भगवदीय
नाविर्भूतेन स्वरूपानन्देन ... तिशय्यतित्यद्रः स्वासंभिन्नं सुखं वैषयिकं
विकानन्देभ्यः समूहीकृतेभ्योऽपि कोटिगुणितानन्दस्वरूपत्वात्
मोविहायानन्दाधीकथं तन्मयवर्तेतेति ४६ ॥

इत्यभिप्रायः

कृष्णमैवजयंतीटीका

ननु निष्कामसकामकर्मप्रतिपादकानि सात्विकराजसतामसादीनि
सर्वाण्येव वाक्यानि सर्वैरपि कुतो न गृह्यन्ते यतस्तेषामेव वेदः
विशेषेण जीवाभयप्रदत्वसामर्थ्ययोगः स्यादित्याशंकायां पुरुषार्थ
स्याधिकारानुसारेणैव यावत्प्रयोजनं तावदेव वाक्यं गृह्णातीति
सर्वस्मिन्निवर्तमहत्त्वेनैव रूपाकानिति सर्वतः सर्वापरोक्षात्

णोदीपस्तस्मिंल्लुतोदके सम्यक्लुतेऽप्याममसुदकं यस्मिंस्तस्मिन्नेवंभूते
यस्मिन्नस्मिन्नुदपाने उदजले पीयत इत्युदपानसरित्समुद्रसरःकू
पादिनस्मिन्जलाभिलाषिनः पिपासोः पुरुषस्य ग्रर्थः मज्जनपाना
स्वरमद्वालनादिरूपके प्रयोजने यावान् यावत्स्यादिति तस्मिंस्तस्मिं
न्नुदपाने तावदेवोदकं जलाभिलाषिना पुरुषेणागृह्यते न तु समग्र
मुदकं एवं सर्वेषु वेदेषु वेदेष्विति बहुवचनप्रयोगेणोवचनाणामपि
गृह्यतेऽसिद्धेऽसति पुनः सर्वेष्विति पदं तु स्मृतिसूत्रपुराणादिसंग्रहा
र्थं ज्ञेयम् सर्वेषु स्मृतिसूत्रपुराणादिषु वेदेषु ऋग्यजुस्सामाथर्वसु
वेदविहितं श्रोतस्मार्तं कर्म तस्य विजानतोऽनुभववतः संसारनि
वृत्तये ब्राह्मणस्य पुरुषस्य ब्रह्मप्राप्तये प्रयोजने तावान् तावदेव
विहितविधिः सर्वकर्मणस्त्तोः यावत्स्वधर्मानुष्ठाने प्रयोजने तावान् तावदेव
वाक्येनेनगृह्यते न तु समस्तम् अयंभावः यथा वायसाः स्वहाप्युदव
त्तविचारहीनाः सर्वमेवमहदिति यत्तेषामप्यमेवाधिकारः हेतवस्त
पयसो मध्ये जलेहित्वाऽन्यमेव पिबन्तीति यत्तेषामप्यमेव स्वभा
वः तथा राजसतामसाः सकामिनोऽनेकदेवोपासकाजनाः नानादेवा
नेकसाधनानेकफलप्रतिपादकान्येव वाक्यानि गृह्णन्ति यत्तेषां
महिमत्त्वत्वेन नित्यसंसाराधिकारित्वं सात्विकामुमुक्षवस्तु साधनसा
ध्यत्वेन मन्त्रप्रतिपादकान्येव गृह्णन्ति यत्तेषामेकनिष्ठत्वेन मुक्त्या
धिकारित्वमिति ४६ ॥

मधुसूदनीटीका

ननु वेदोक्तानामनेककर्मणां तत्तदनेकफलानां परित्यागेन कर्मजनिते नैवेत्थं शोकनीयं सर्वकामनापरित्यागेन कर्मकरणमिति चेत्तत्राह नैवमुक्ते कर्मजनित
राने दैवं वितःस्यामिति यस्मात् उदपाने हृदजलाशये जानावेक व
चनेन यावानर्थः यावत्स्नानपानादिप्रयोजनं भवति सर्वतः संप्लुतोद
के महति जलाशये तावानर्थो भवत्येव यथाहि पर्वतनिर्झराः सर्वतः
स्रवन्तः कचिदुपत्यकायामेकत्र मिलन्ति तत्र प्रत्येकं जायमानमुदक
प्रयोजने समुदिते सन्तरां भवति सर्वेषां निर्झराणामेकत्रैव कासारे
नर्भावात् एवं सर्वेषु वेदेषूक्तेषु काम्यकर्मसु यावानर्थो हिरण्यगर्भा
नन्दपर्यन्तः तावान् विजानतो ब्रह्मतत्त्वं साक्षात्कृतवतो ब्राह्मणस्य ब्रह्म
भूतस्यानन्दान्तर्भावात् ब्रह्मानन्दा नामंतर्भावा
ब्रह्मभूतस्यैव भवत्येवत्तद्ब्रह्मानन्दांशत्वात्

गी.
टी.
द्वि.

300

त एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः एकस्मा
न्नानंदस्याऽविद्याकल्पिततत्तदुपाधिपरिच्छेदमादायाशेषविषय
देशो आकाशस्येव घटाद्यवच्छेदकल्पनया तथा च निःकामकर्मभि
शुद्धांतःकरणस्य तत्त्वात्मज्ञानोदये परब्रह्मानंदप्राप्तिः स्यात्तथैव वस
र्वानंदप्राप्तौ न क्षुद्रानंदाप्राप्तिनिर्वेधनवेयत्याविकाशः अतः परमा
नंदप्रापकाय तत्त्वज्ञानाय निष्कामकर्माण्यविकृत्यभिप्रायः अत्र य
यातत्याभवतीतिपदत्रयाध्याहारः यावांस्तावानितिपदद्वयानंत
गत्व द्राष्टांतिके द्रष्टव्यः ४६ ॥

सदानंदीटीका

सर्वकामपरित्यागाद्धैविवेकोद्देशतः कर्मजात्कर्मकुर्वंश्चेत्स्यैवंमा
मान्तसंकुरु १ यावत्स्नानपानादिफलं तद्धि जलाशये ताव
त्फलं भवत्येव महत्यपि जलाशये २ यथाद्विनिकेतः सर्वं सर्वं तत्ते
कविद्भुवि मिलत्येकत्र तत्रापि प्रत्येकं यत्प्रयोजनं ३ तत्सर्वं तत्र ब्र
नरामेकत्रापि जलाशये एवमेवागमोक्तेषु सर्वेषु काम्यकर्मसु ४
यावानर्थोऽस्ति हैरण्यगर्भानंदावसानकः तावान्ब्रह्माद्वयानंदसाक्षा
त्कृतवतो विदः ५ ब्राह्मणस्य भवत्येव ब्रह्मीभूतस्य सर्वथा यथा

२

वितायां विलयोऽस्ति यस्मिन्दूरेऽपि संयंति तमेव वाचः तथानंदविदे
सह नैकराशिसंयांति सर्वाणि सुखानि भूरि ७ क्षुद्रानंदाः समस्ता
ये ब्रह्मानंदलवायनः अविद्याकल्पितोपाधितारतम्यादनेकधा ब्र
ह्मानंदस्तु सर्वत्र व्यापकः सत्य आंतरः ८ जडदुःखात्मकाकारव
र्जिते कुत्र वा सुखे सच्चिदानंदमद्वैते सुखे ब्रह्मण्येव सर्वतः ९ तथाच प्राप्तिः
शुद्धचित्तस्य तत्र निष्कामकर्मभिः आत्मज्ञानोदये ब्रह्मानंदप्राप्ति
सतो भवेत् १० सर्वानंदपदप्राप्तौ क्षुद्रानंदलवेषु ते मा सकामी
त्यतस्तत्त्वज्ञानलाभाय सर्वथा ११ ईश्वरार्पणया बुद्ध्या कुरु कर्मा
ण्यहंकृतिः १२ ॥ ४६ ॥

नीलकंठीटीका

ननु आत्मवत्त्वे चित्तशुद्धौ सत्यामेव भवति सा च सकलवेदोक्तकर्मा
नुष्ठानसाध्या अतो नित्यैर्गुण्येन तु दुर्लभमित्याशंक्याह यावानिति

सर्वतःसंप्लुतोदकेमहतिउदपानेजलाशयेपुरुषस्ययावानर्थो
यावत्स्नानपानादिकंप्रयोजनंस्वेष्टमात्रजलनिर्वर्त्यंभवतिनहि
स्त्रजलाशयप्रभयनिर्वर्त्यं तावानेवार्थोविजानतोब्रह्मतत्त्वविचिनस्य
ब्राह्मणस्यब्रह्मबुभूषोः सर्वेषुवेदेषुवैदिकदेशोपनिषद्ब्रह्मश्रवणमात्र
निर्वर्त्योभवति नहिकृत्स्नवेदार्थानुष्ठानंस्वासित्यर्थमपेक्षते एके
नजन्मनाकृत्स्नवेदार्थानुष्ठानासंभवात् ऐहिकेनजन्मांतरीयेण
योगपादिनाचित्तशुद्धौसत्यामुपनिषद्ब्रह्मश्रवणात्त्रिस्रैगुण्येनासंभवती
तिभावः एतदास्यसर्वतःसंप्लुतोदकस्थानीयेब्रह्मज्ञानेपुरुषस्य
तावानर्थःकृत्स्नोपिभवतियावांस्त्वनेककूपकूपोदपानस्थानीये
पुंसकलवेदोक्तकर्मस्वनुष्ठितेषुभवति ब्रह्मानंदेतद्दानेदाता
मंतर्भावात् तथाचश्रुतिर्ज्ञानेसर्वकर्मफलांतर्भावंदर्शयति
यथा कृतायाविजितायाधरेयाःसंयंत्येवमेवैनंसर्वंतदभिसमे
तियत्किंचप्रजाःसाधुकुर्वंतियस्तद्वेदयत्सवेदेति वक्ष्यति सर्वं
कर्माखिलंपार्थज्ञानेपरिसमाप्यतइति गंगाजलस्यज्ञानोदयात्प्रा
गवटकूपोपमानिकर्माणिकर्तव्यानीतिभावइतिव्याचख्युः श्रीम
स्यतेसर्वार्थैस्त्वनेकस्मिन्यथातथाभवतीतिपदचवलष्टपाख्याहा
रः पावावन्तावानपदयोस्तसंगस्वदार्थौनिकेदृष्टव्याः ४८ ॥

301

आनंदी टीका भवितव्यमित्याह सर्व

षेणएवविधेषुवेदेषुउदपानपरेणेन भवितव्यमित्याह सर्व
तः सर्वदिक्षु संप्लुतोदके उदकप्राप्तौ उदपानेन तडागादौ यावान
र्थः स्नानपानादिप्रयोजनं भवति यावता स्वल्पमात्रेणैव प्रयो
जनं निर्वहति तावन्मात्रमेवोपादेयम् न सर्वतोवगाहनीयं
तथैव तावानेव विज्ञानतः ब्राह्मणस्य ब्रह्मणि भक्तिमतो ज्ञानि
नः ब्रह्मार्थवाक्यार्थः यथा सुसंपूर्णादपि ह्रदादेः स्नानादिसा
धसंपादनमात्रार्थं स्तोकमेव जलमुपादीयते न तु परितोवगाहः प्रतिपादकेभ्यः
सेन तथा नानाविधकाम्यनित्यनैमित्तिककर्मप्रतिपादकेभ्यः सर्वेभ्यो वेदेभ्यः काम्याभियोगस्य काज्ञानसमुद्भवितव्यमेव प्रति
पादकेभ्यो वेदैकदेशेन तात्पर्येण भवितव्यमिति ४६ ॥

रामकंठी टीका सिद्धिर्भवति तावदेव तेन तदुपादेयं न तु यावद्वेदेन प्रतिपत्तव्यमित्याह + तावानेव विज्ञानतो
ब्राह्मणस्य विज्ञानवतो ब्राह्मणस्य ब्रह्मवेदिनः सर्वेषु निखि
लेषु सरहस्येषु वेदेषु यावानर्थः
प्रयोजनम् यावता ग्रा
सेनैकदेशेन परमार्थोप
लब्धिलक्षणार्थक्रिया
निष्पत्तिर्भवति

तावदपरमार्थोपलब्धिलक्षणस्याभिप्रेतार्थक्रिया वे ^

सर्वतः सर्वासु दिक्षु संप्लुतसलिले उदपाने ह्रदप्रस्रवणादौ व
पिपासोपशमनाय यथा किं
चित्तेनैव यावानर्थः यावन्मात्रमेकदेशात् तत्स्थात् प्रयोजनं तावदेव तेनोविधि
यासमर्थसलिललवोपयोगमात्रं प्रयोजनं भवति यथात्र विनेना
सहस्रसंकुलादप्युपादानम् किं तु कर्म भवति यथार्थक्रिया
र्थेन तस्मात् जलाशयात्स्वार्थक्रिया उपादीयते
निर्वहति तथा वेदेभ्योपि समर्पितमात्रमेव
उपादानक्रियाविषय
जलाशयः परिज्ञानात् अवग
देकस्तोकमुपादीयते न सर्वो जलाशयः ज्ञानजिज्ञासुनातदवग
विविधार्थसार्थसंपूर्णादपि वेदशास्त्रात् जिज्ञासुस्वमितिग्रंथ
ममात्रोपयोग्येवार्थ उपादातव्यो न तु सर्वमेव शास्त्र
४६ ॥

यावान्स्नानपानादिरर्थः
सर्वतः संप्लुतोदके समुद्र
जले ह्रदादौ यथा भवति
न सर्वो ह्रद उपादेयः तथा
सर्वेषु सरहस्येषु वेदेषु वि
ज्ञानतो विज्ञानवतो ब्राह्मण
स्य ब्रह्मवेदिनः ४

लास्विकी टीका नन्वेवं कर्मणो वेदात्सर्वकर्मावश्येयत्वमा
नत्वं नानाकर्मकलापप्रतिपादकवेदात्सर्वं कर्मा ... यावानिति यथा
त्रेवायमात्रोपयोगि उपादेयमित्याशंक्याह यावानिति तस्मादुपादेयः
स्नानपानादि यावत्प्रयोजनं भवति न स
तावानेव ... यावन्मात्रं प्रयोगीत्यर्थः प्रयोजनं भवति
तावानेव परमार्थोपलब्धिमात्रोपयोगी अर्थः ४६ ॥
र्थः कर्मकलापमुपादेयमित्यर्थः

गीं
टीं
द्विं

पंचोलीटीका

स्वधर्ममनुतिष्ठतः सर्वेषुवेदोक्तेषुकर्मसुयान्यनंतानंतानिफला
नितानिनापेक्षंतेचेत् ईश्वरार्थमपिनिरर्थकर्मकिमर्थमनुतिष्ठ
तेइत्यत्राह यावानिति यावानर्थउदपानेवापीकूपतडागादौया
वानर्थः यावत्प्रयोजनंस्नानपानादि सर्वतःसंप्लुतोदकेमहतिज
लाशयेतावानर्थोभवत्येव तावत्सर्वेषुप्रयोजनंस्वर्गादिसर्वेषुब्र
विदःफलेविद्यतेतत्रांतर्भवतीत्यर्थः तथासर्ववेदोदितकर्मप्र
योजनंस्वर्गादिसर्वेषुब्रह्मविदःफलेविद्यतेतत्रांतर्भवतीत्यर्थः त
स्मादीश्वरार्थकर्मक्रियमाणंस्वर्गादिफलेभ्यःनिरतिशयफल
जनकंभवतीत्यर्थः ४६

रमावीमसमिद्धाथिनी॥

यावानिति उदपानेकूपादौयावानर्थः स्नानाचमनादिप्रयो
जनं तावानेव सर्वतःसंप्लुतोदके परिपूर्णजलेसम्भवे भ
वतीत्यर्थः एवं सर्वेषुवेदेषुस्वर्गादिषुयावानर्थःकर्मफल
सर्वंतावानर्थः ब्राह्मणस्यब्रह्मवेदः वेदनशीलेनपोत्रम्नानि
पः सचाप्यकांततार्हन्वेदोविज्ञेयः तज्जानातीति ब्राह्मणः
तस्यविजानतः विशेषेणनादेकंतादृशरूपवसर्वंनियं
वंजानातिपत्तस्येत्यर्थः एतादृशस्यविदितधनुर्विद्याल
स्यातिविकातस्ययोऽकामस्यत्तद्विषयस्यकर्मफले
भजानितसखातिपातेंतर्भवतीत्यर्थः ४८॥

मधुभाष्य

यावानर्थइति यथायावानर्थप्रयोजनमुदपानेकूपेभवति
वान्सर्वतः संप्लुतोदकेनांतर्भवत्येव एवंसर्वेषुवेदेषुयत्फल
हिजानतोज्ञानिनोब्राह्मणस्यफलेनांतर्भवति ब्रह्मजानातीतिब्रा
ह्मणःऽपरोक्षज्ञानी सहिब्रह्मगच्छति विजानतइति ज्ञान
तस्यदर्शयति कामात्मतानिंदाकृता कथमेषांस्वर्गकामा
नेत्यादौकामस्यापिविहितत्वादित्यतआह ४६॥

वानर्थइति अत्रोदपानइत्येकवचनं जात्यभिप्रायं उदपानशब्देन
जलाशयमात्रवाचिनाजलाशयविशेषाः पर्वतनिस्सृतनिर्झराख्य
लक्ष्यंतेतेनतत्र उदपानेषु पर्वतनिस्सृतनिर्झरेषु प्रत्येकमुदकमेवाया
पावानर्थस्तत्तन्निर्झरोदकपानजन्यतृप्तिलक्षणस्तावानर्थः सर्वतः
सर्वेभ्योप्येभ्यः पर्वतनिर्झरेभ्यः संप्लुतमागतमुदकं यस्मिन्पर्वताध
स्थितकासारेषु यथा भवति तथा सर्वेषु वेदेषु यावानर्थः तत्रैकमेव
त्यफलभोगजनितानंदलक्षणः तावान्विजानतो निरतिशयानं
दमासिमापनत्वलक्षणवैशिष्ट्यवदैकात्म्यज्ञानवतो ब्राह्मणस्य ब्रल
शुश्रूषा भवतीति यथा तथा भवति शब्दाध्याहारे योजना सर्वेषामा
नंदानामत्रैवानंदेऽन्तर्भूतत्वादिति भावः एतस्यैवानंदस्येति श्रु
सर्वोत्र निगूढः तदेवं महता प्रबंधेन प्रपंचितमाशयस्पष्टीक
मेकतेभ्यस्त्वमखप्रतिपन्नैः सशोचं दर्शयतिवासुदेवः ॥

303

भाषाअनुवाद

जोकहोकि वेदोक्त कर्म्म औ तत्रत्कामनाके फलसकलत्यागक
रि निष्कामईश्वराराधनके अर्थजोव्यवसायात्मिका बुद्धिसोकुछ
हिहै इसशङ्काको निवारनकरते हुये कहतेहैं कि जिससे जलपा
नकियाजायसो उदपान अर्थात् बावडीकुआ तालतिनमेजो अ
र्थ जलहोतो सबकामसाधनेके अर्थ अर्थात् स्नानपानआदि
करनेके अर्थ नहांनहांभ्रमण करिके सबकामसिद्धहोयंगे प
रन्तु सर्वतोदक कहेएव महाकुण्ड जिसमे अगाधजलभराहै उ
सपकहीसेसबनिर्वाहहोसकतेहैं तैसेही वेदोक्तजो कर्म्मके फल
सो सबभगवंभक्तियुक्त ब्रह्मपरायण पुरुषको भक्तिही सेमि
लतेहैं देखाये स्वर्गआदि सम्पूर्णतुच्छसुख ब्रह्मानन्दके भीतर
हीअन्तरभूतहैं इसब्रह्मानन्दके कणमात्र आनन्दकोप्राप्तहोके
सर्वप्राणीजीतेरहतेहैं यहश्रुतिमेकहाहै इससे निश्चयात्मिका
जोबुद्धि सोईसबुद्धिहै ४८ ॥

दोहा

कूपादिकमेंकार्यहोय सोसबसागरमांहि पसेजो सब
वेदमे सोब्रह्मज्ञानी इक पाहि ४८॥

304

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन मा
कर्मफलहेतुर्भूर्मा ते संगोस्त्वकर्मणि ॥ ४७॥

शांकरभाष्य

तवच कर्मण्येवाधिकारो न ज्ञाननिष्ठायां तेन तत्र च कर्म कु
र्वतो मा फलेष्वधिकारोऽस्तु कर्मफलतृष्णा मा भूत् कदाचन क
स्यांचिदप्यवस्थायामित्यर्थः यदा कर्मफले तृष्णा ते स्यात् तदा क
र्मफलप्राप्तेर्हेतुः स्याः एवं मा कर्मफलहेतुर्भूः यदा हि कर्मफल
तृष्णाप्रयुक्तः कर्मणि प्रवर्तते तदा कर्मफलस्यैव जन्मनो हेतु
र्भवेत् यदि कर्मफलं नेष्यते किं कर्मणा दुःखरूपेणेति मा
ते संगोस्त्वकर्मण्यकरणे प्रीतिर्मा भूत् ४७ ॥

आनंदगिरिकृतटीका

तर्हि परम्परया पुरुषार्थसाधनं योगमार्गं परित्यज्य साक्षादेव पुरु
षार्थकारणमात्मज्ञानं तदर्थमुपदेष्टव्यं तस्मै हि स्पृहयति म
नो मदीयमित्याशंक्याह तव चेति तर्हि तत्फलाभिलाषोपि
स्यादिति नेत्याह मा फलेष्विति पूर्वोक्तमेवार्थं प्रपंचयति मा कर्मे
ति फलाभिसन्ध्यसम्भवे कर्माकरणमेव श्रेयस्यामीत्याशंक्याह
मा त इति ज्ञानानधिकारिणोपि कर्मत्यागप्रसक्तिं निवारयति क
र्मण्येवेति कर्मण्येवेत्येवकारार्थमाह न ज्ञानेनेति नहि तत्र ज्ञानलक्षणे
स्यापरिपक्वकषायस्य स्त्वोधिकारः सिद्ध्यतीत्यर्थः फलेस्तर्हि
सम्बन्धो दुर्वारः स्यादित्याह नेति कर्मण्येवाधिकारस्तेनेति मम
र्थः फलेष्वधिकाराभावे स्फोरयति कर्मणेति कर्मानुष्ठानात् प्रागू
र्ध्वं तत्काले चेत्येतत् कदाचनेति विवक्षितमित्याह कस्यांचिदिति
फलाभिसन्धाने दोषमाह यदेति एवं कर्मफलतृष्णाद्वारेणेत्यर्थः क
र्मफलहेतुत्वे विवृणोति यदाहीति नहि विफलक्लेशात्मकं क
र्म न कर्तव्यमिति शंकामनुभाष्य दूषयति यदीत्यादिना अकर्मणि
ते संगो माभूदित्युक्तमेव स्पष्टयति अकरण इति ॥ ४७ ॥

स्वामिकृतटीका

तर्हि सर्वकर्मफलानि परमेश्वराराधनादेव भविष्यन्तीत्यभिसं-
धाय प्रवर्तेतेत्याशंक्याह कर्मण्येवेति ते तव तत्त्वज्ञा-
नार्थिनः कर्मण्येवाधिकारः तत्फलेषु कदाचन अधिकारः का-
मोमास्तु ननु कर्मणि कृते तत्फलं स्यादेव भोजने कृते तृप्तिव-
दित्याशंक्याह माकर्मफलहेतुर्भूः कर्मफलप्रवृत्तिहेतुर्यस्य
तथाभूतो माभूः कामितस्यैव स्वर्गादेर्नियोज्यविशेषणत्वेन तत्फ-
लत्वादकामितं फलं न स्यादिति भावः अत एव कर्मफलं बंधकं
भविष्यतीति भयात् अकर्मणि कर्माकरणे तव संगो निष्ठा मास्तु

पैशाचभाष्यं

कर्मण्येवाधिकारः न ज्ञाननिष्ठायां तेन तव तत्र कर्म कुर्वतो मा फलेषु
अधिकारोस्तु कर्मफलं तस्मा माभूत् कदाचन कस्यांचिदवस्थायामि-
त्यर्थः यदा कर्मफलं तस्मात्स्यात् तस्मान्मा कर्मफलहेतुर्भूः यदा हि क-
र्मफलं तस्य प्रवृत्ताः कर्मणि प्रवर्तते तदा कर्मफलस्यैव जन्मनो
हेतुर्भवेत् यदि कर्मफलं नेष्यते किं कर्मणा दुःखरूपेणेति ॥
तिमास्ते तव संयोगोस्त्व कर्मणि अकरणे प्रीतिर्माभूत् ४७

रामानुजभाष्यं

अतः सत्त्वस्थस्य मुमुक्षोस्तावदेवोपादेयमित्याह नित्ये नैमित्तिके
काम्ये च केनचित्फलविशेषेण संबद्धतया श्रूयमाणे कर्मणि नि-
त्यसत्त्वस्थस्य मुमुक्षोस्ते कर्ममात्राधिकारः अधिकारस्तत्संबं-
धितयावगतेषु फलेषु न कदाचिदप्यधिकारः सफलस्य बं-
धरूपत्वात् फलरहितस्य केवलस्य मदाराधनरूपस्य मोक्षहेतुत्वा-
त् मा कर्मफलयोर्हेतुर्भूः त्वयानुष्ठेये कर्मणि तव कर्तृत्वमप्य-
नुसंधेयं फलस्यापि त्वत्कर्तृकत्वादेतदुभयं हेतुरित्यननुसंधेयं तदुभयं
गुणेषु वा सर्वेश्वरे मयि वानुसंधेयमित्यनंतरमेव वक्ष्यते एवमनुसंधाय
कर्म कुरु मा ते संगोस्त्वकर्मणि अननुष्ठाने न योत्स्यामीति यत्त्वयाभिहितं तत्र
संगो मास्तु उक्तेन प्रकारेण युद्धादिकर्मण्येव संगोस्त्वित्यर्थः ४७ ॥

अभिनवगुप्तटीका

ऽनस्य कर्ममात्रे त्वया कृतो भवतु कर्मफलेषु ननु कर्मणि कृते नो
तरीय कर्तव्यैव फलमाप्नोति मैवं तत्र हि यदि त्वं फलकामनाका
लक्ष्यामो भवसि तदा कर्मणां फले प्रतिहेतुत्वे यदप्रा[illegible]मात्रे फले
ज्ञानेनानिच्छोऽस्ति दिति कर्माभावेन यः संगः स एव गाढग्रहरूपो मिथ्या
ज्ञानस्वरूपः इति त्याज्य एव ४७ ॥

परमार्थप्रपाटीका

यथोक्तमप्रमेयपर्यवसितमर्थमहि कर्माणीति तत्त्वज्ञानार्थिनां ते
तव ईश्वररूपया कर्मण्येवाधिकारोऽस्तु पंचफलेष्वधिकारो मास्तु स्वर्गा
दिफलभोगाधिकारो मास्त्वित्याशी तथात्वमपि कर्मफले हेतुर्मा
भूः कर्मफलभोगे हेतुर्निमित्तं माभवं तव वितत कर्मफलसंकल्पादि
नेस्पृशत अथ संगात्कर्मणः फलावश्यभावनियम इति प्रसिद्धेः फ
लं भविष्यत्येव तस्मात्कर्मैव न कार्यमित्याशंक्याह मतितत्र कर्माणि क
माकरणे संगो निष्ठा मास्तु सत्वमित्र हि शुपईश्वरार्पणत्वेन भाजनसाम
ग्रीसंपादनवत्कर्म कार्यमित्यर्थः ४७

वनमालीटीका

ननु निष्कामकर्मणात्मज्ञाने संपाद्य परमानंद प्रेप्से क्रियते चेत्तथम
नेश्चात्मज्ञानमेव संपाद्यतां किं बहुआयासैः कर्मभिर्बहिरंगसाधनैः प्रा
नैर्विक्षेपकैरित्यत आह कर्मणीति ज्ञानिमात्रोपलतरणि ज्ञाति
नो पि नव कर्मण्येवाधिकारो न फलेषु फलकामेषु मोक्षप्रतिबंध
कत्वात् अज्ञानिनः कामेष्वधिकारो नास्तीति किमु वाच्यं व्रलापरो
त्तत्वानेकामानो प्रतिबंधकत्वात् ननु मयेदं भोक्तव्यमिति बुद्ध्याभावे
पि कर्म स्वसामर्थ्यादेव फलं जनयिष्यतीति चेत्तत्राह मा कर्मफलहेतुन
भूः फलकामनया हि कर्मकर्तुर्वै फलस्य हेतुत्वं तस्मादकामो भवसि त्वं तति
ष्काम सन् कर्मफलहेतुर्माभूः न हि निःकामेन भगवदर्पणबुद्ध्या कृतं
महाराय तत्तूपं कर्म मन्त्रीत्यतिरिक्तफलाय कल्पते ननु यदि फलं ते
च्छाने तर्हि किं कर्मणा दुःखरूपेणेति तत्राह माते संगोऽस्त्वकर्मणि
कर्मणो मन्त्रसादरूपमहाफलहेतुत्वेन तिः फलत्वाभावात् ४७ ॥

ॐ स्तमवैजयंतीटीका

ननु चेवं चेतनहीं ममापि वेदेषु यष्टैव कर्म [illegible] जितो लोकः स्तीयते एवमेवामत्र

गी॰ टी॰ हि॰

पुण्यचितो लोकः क्षीयत इत्यादीनां कर्मफलानित्यत्वप्रतिपादकानां
वाक्यानामेवार्थमङ्गीकृत्य सर्वाणि नित्यनैमित्तिकादीन्यपि कर्माणि
त्यक्त्वा वनमेव गमिष्यामीति किमिति घोररूपेण युद्धकर्मणेति चेन्मै
वं वक्तव्यं तत्त्ववेदित्वे भवितुमधिकारो नास्त्येव किंतु कर्मकर्तव्यमेवास्तीत्याह
कर्मण्येवेति एवकारोऽन्ययोगव्यवच्छेदार्थकस्तेन सहेतुकं विवेकादि
रहितं राजसतामसादिरूपं वैराग्यादिकं व्यावर्तते एकवचनेन
नसतामसादिककर्मव्याहृत्यर्थम् संसारान्निर्वेदवतो मोक्षार्थिन
स्तेतव कर्मण्येव राजसतामसं कर्म विहाय सात्विके मदाराधनादि
रूपे वैधकर्मणि तेजोऽष्टनिद्रास्यादि निजवर्णस्वभावजनिते युद्धादौ एवा
धिकारः न तु राजसतामसादिषु वैराग्यादिषु न त्वहं कर्म करिष्या
मि चेत्कर्मणा बध्यते जन्तुरित्यादिवचनान्ममापि बन्धनं भविष्य
तीति चेत्तत्राह मा फलेषु इहामुत्र चानेकविधसुखभोगादिरूपेषु
कदाचन कस्मिंश्चित्कालेऽपि न वाधिकारो मास्तु यतः फलसक्तस्यै
व कर्मणः संसारहेतुत्वं मदर्पितफलरूपस्य निष्फलस्य तु ना
मिरूपमोक्षहेतुत्वात् न तु तवाधिकारोऽस्त्येव न तु फलरहिते
पि कर्मणा मोक्षः कथं स्यादतो नास्त्यकृतः कृतेनेत्यकर्माणि च
त्तं प्रतिपादयन्तीति चेत्तत्राह मा कर्मफलहेतुर्भूरिति कर्माणि
फलानि च न ध्यानेषु हेतुः स्वं नैव कर्त्ता त्वं मा भूः कर्मसु क्रियमाणेषु वा
हमेवेदं कार्यमकरवं करोमि करिष्यामि चेति फलेषु तत्फल
हमेवैतस्य सुखभोगादिरूपस्य फलस्य कर्त्तेत्येवं कर्मणां तत्फ
लानां च प्रयोजककर्त्ता त्वं मा भूः किंतु भगवता कृष्णेनैव कारितं
कर्म मया कृतं न महं करोमि करिष्यामीत्येवं यात्मनः प्रयोजक
कर्तृत्वादिकं त्यक्त्वा स्वस्य प्रयोज्यत्वं मत्वा च कर्म करिष्यामीत्येवं क
र्मणि कर्मैव न भविष्यतीति नैव मोक्षं प्राप्स्यसीत्यर्थः कर्माधिकारिणां
स्तु कर्माकरणे एव तत्र हेतुरपवर्तिष्यत इति किं तु न त्वयः कर्मणा
न स्मि मुमुक्षोः संगोऽपि मा भवत्वित्याह मा ते संगोऽस्त्वकर्मणि
ति एक कर्माणि कर्मरहिते पुरुषे नेतव संगः सम्बन्धो मास्तु नैव
वन एवमपि तु कर्मफलेऽनेककामाक्रान्तचित्तः

पासके मदाराधनकर्मरहिते पुरुषे तव मबंधोपि संसारदुःखं ददातीति नहि
सामात्मस्वयमेवाकर्मस्थास्यति वतदुःखं भविष्यतीति किमु वक्तव्यमित्य
भिप्रायः ४७ ॥

मधुसूदनीटीका

ननुनिष्कामकर्मभिरात्मज्ञानं संपाद्य परमानंदप्राप्तिः क्रियते चेदात्म
ज्ञानमेव न हि संपाद्यं किं बहुआयासैः कर्मभिर्बहिरंगसाधनभूतैरित्याशे
ङ्क्याह नेनवाशुद्धांतःकरणस्य तात्विकज्ञानोत्पत्त्ययोग्यस्य कर्मण्येवा
न्तःकरणशोधके धिकारो मयेदं कर्तव्यमिति बोधो न तु ज्ञाननिष्ठारूपे
वेदांतवाक्यविचारादौ कर्म च कुर्वतस्तव फलेषु स्वर्गादिषु कदाचन
कस्यांचिदप्यवस्थायां कर्मानुष्ठानात्प्रागूर्ध्वं तत्काले वा प्राधिकारो मयेदं भो
क्तव्यमिति बोधो मास्तु ननु मयेदं भोक्तव्यमिति बुद्ध्यभावेपि कर्मस्व
सामर्थ्यादेव फलं जनयिष्यतीति चेत्तत्राह मा कर्मफलहेतुर्भूः फलका
मनया हि कर्म कुर्वन् फलस्य हेतुरुत्पादको भवति त्वं तु निष्कामः सन् कर्म
फलहेतुर्माभूः तर्हि निःकामेन भगवदर्पणबुद्ध्या कृतेन कर्मफलाय
कल्पनं स्त्वके फलाभावे पि कर्मणां माते संगोस्त्वकर्मणि यदि फलं
नेष्यते किं कर्मणा दुःखरूपेणेत्यकारणे न च प्रीतिर्माभूत ४७ ॥

सदानंदीटीका

नन्वात्मबोधः संपाद्यो यदि निष्कामकर्मभिः आनंदायनदातव्ये यन्तित
तेष्ठमनुत्तमैः १ आत्मबोधे क्रियायासशनैः कर्मभिरेव चेत् मेवंस
अशुद्धे तेन बुद्धिशोधककर्मणि २ मयेदं कार्यमित्येवास्तु बोधः कर्म
कुर्वतः नवा वेदांतवाक्यानां विचारे नेधिकारिता ३ कर्माणि कुर्व
तो नः सम्यक्फलेषु स्वर्गादिषु कर्मानुष्ठानकाले वा प्रागूर्ध्वं वा कदाच
न ४ मयेदमिह भोक्तव्यमिति बोधोपि मास्तु ते मयेदमिह भोक्त
व्यमिति बुद्धिं विनापि न तत् ५ स्वसामर्थ्यात्फलं कर्म जनयिष्यति चे
ह्लेण फलकामनया कर्म कुर्वन्नुत्पादको भवेत् ६ मा कर्मफलहेतु
र्भूः त्वं तु निष्काम एव सन् निष्कामेन कृतं कर्म कृष्णार्पणधियास्व
ये ७ फलाय कल्पते नैव नत्थैवत्वं सदाकुरु फलं चेन्नेष्यते नहि किं

गी॰ स्याद्दुःखात्मकर्मणा ८ इति बुद्ध्या तव प्रीतिर्माभूदकरणे करा स॥४७॥

टी॰ नीलकंठीटीका

हि॰ ननु ममापि श्रौपनिषदात्मज्ञानार्थिनः शमप्रवेशस्तत्कथं मां यु
ध्येत्वति प्रेरयसीत्याशंक्याह कर्मण्येवेति कर्मण्येवाधिकारो न ज्ञा
ननिष्ठायां मा फलेषु संगोस्त्वित्यपकृष्यते कर्मफलं स्वर्गपश्वा
दिर्हेतुः कर्मसु प्रवर्तकं यस्य तादृशो माभूः स्वकर्मणि अकर्माकर
णेपि न वसंगो मास्तु ॥ ४७ ॥

आनंदी टीका

श्रमयोगयुक्तिमाह कर्माणि रागद्वेषाभ्यां विना स्वजातिविहितेषु
एव ते वाधिकारः कर्तव्यम् मा निषिद्धे कदाचन फलेषु नाधिका
रः यागजन्यहिंसायामिव ब्राह्मणस्य युद्धजन्ये गुरुबन्धुवधादिना पा
पेश्च न कर्तव्यम् उक्तवक्ष्यमाणया बुद्ध्या तेह्लोपो नास्तीत्यर्थः अ
तएव कर्मणो युद्धस्य फले हिंसायां हेतुः प्राकृतः फलस्य हेतुत्वा
शयस्य सहेतुर्वादपरो माभूत् तथा हेत्ववादात्स्या मे न योस्य इति इ
स्य मा कर्मणि कर्माकरणे तव संगश्चाग्रहो मास्तु ४७ ॥

अथविज्ञानतासर्वशास्त्रेभ्यो यदुपादेयं तदर्जनं रामकंठी टीका प्रस्तुत अपदेष्टुमाह

नवसेश्रवेवापदिष्टं तत्वज्ञानोपपत्तिश्च हढहढप्रतिपत्तिवशा
निर्वेदहादिभ्योव्याहतमानात्मश्रुत्याय त्वसत्वहैतविस्मयज्योतीरू
पपरं तत्वमहमित्यात्मत्वेन प्रतिपद्यमानस्य सतः कर्मण्यधिकारो
कृ यत्कर्म कायवाङ्मनोभिर्निर्वर्त्यव्यापारविशेषात्मकं वर्णाश्रम
विभागेन देशकालावस्थापेक्षगुणभेदगौणविविधेतिकर्तव्यताकला
पेन नित्यादिभेदेनावश्यकर्तव्यतया शास्त्रेषु विहितं तस्मिन्नधिका
रः कर्तव्यं भवतु तदधिकृतस्वार्थसिद्धये प्रवर्तितत्वमित्यर्थः यतः क
मनावश्चीरत्वाव्यभिचारि न कदाचित्केनचित्त्यक्तुं शक्यम् ततश्च स एव
यस्यापावस्थायो कश्चिन्नियमविशेषोऽवलंबनीय एव कर्मनियमवदित्यमशक्यः स
कर्मविशेषतां प्राप्नोति आश्रमांतरकर्मनियमवत् त्यागाभिधानः सत
वास्मना कर्मत्यागः किंच प्रसिद्धतां नामात्यागेऽपि त्यागो द्वेषतो विना
नत्वज्ञानबाधसतामेवाविष्करोति तथाविधस्य यतो प्रियमर्थं विना
कस्यचिदर्थस्य हानेन संभवति नचोपादित्सितं [illegible]
द्वेष्यतासंभवतीति कर्मत्यागाभिधाने [illegible]
[illegible]
[illegible] यादिचतत्वस्मैकत्वा
[illegible] त्यागत्वेनाभिमतम् तथा
क्कर्मणां यथेष्टमनियमेनानुष्ठानमपोप्यतत्व ज्ञतामेवानु
तिमवेवज्ञा रागद्वेषवशान्यथात्वानुपपत्त्या सोऽपि कर्मतावा निहनतानतः
स्यात्वरभिव्यनक्तीत्यकर्मतावाविरुद्धकर्मतावा सर्वसाम्पलत
निजानंदनिर्भरं तत्वमात्मत्वेन प्रतिपद्यमानस्य सर्वेशिनो योगिनो
णोपरमं समाधिमधिकृत्ततः तत्वज्ञानाभिनिवेशिनो

रागद्वेषप्रसंगो दुर्निवारः

गी॰
टी॰
हि॰

इयमप्यनुपपन्नमिति तथाविधस्य तव कर्मण्येवाधिकारोस्तु तत्तेषां कर्मणामनात्मज्ञजनसमुचितनानाभिसंधानप्रार्थितेषु इहामुत्रिकविविधभोगात्मकेषु बन्धहेतुषु फलेष्वधिकारो माभूत् तत्वं तत्तया फलान्यधिकल्प्य तेषु तेषु कर्मसु प्रवर्तते तेषां तेनाक्रियमाणान्येव कर्माणि वासनारूपतया तानि करणभू तान्येवावतिष्ठन्ते अतस्तानि त्यक्तक्रियाफलोपभोगस्य तव विवि वासनारूपस्य तेषु तेषु योन्यन्तरेषु तत्तस्य जन्मनः पुनःपुनः कारणतां प्रतिपद्यन्ते जन्मवतस्तस्य कर्मणः कर्म च तत्तस्य तन्निशमा लस्य हेतुत्वं भजन्ते इति वासनाजन्मकर्मफलचक्रमेतदनिशं प्रवर्त वर्तमानमज्ञानां बन्धाय कल्पते इति त्वमपि सामान्यपुरुषवदेवं कर्मफलहेतुर्माभूः उक्तया प्रक्रियया कर्मणां शुभाशुभानां विवि फलानि सुखदुःखात्मकानि हेतुर्जन्मनो निमित्तं यस्य स तथा यथा न भवसि तथोक्तज्ञाननिष्ठः सन् कुर्वन्नेव कर्माणि ज्ञानाग्निनादग्धबीजतामापादयन्परमेश्वरस्वभावसमापत्तिलक्ष क्षणं मोक्षमवाप्नुहीत्यर्थः अन्यच्च कस्यांचिदवस्थायां प्रसक्तस्य कर्मपरिहारस्य विधीयमानत्वाद्घटकर्मेति मन्यसे तन्न तादृ शकर्मणि संगस्ते तव माभूत् नचापि हि संगः कर्मान्तरवत् हेतुरेव तत्क्रममेव प्राक [illegible] ४७ ॥

ला स्त्रिकी [illegible] टीका

अथ विजानतः सर्वशास्त्रेभ्यो यदुपादेयं तदर्जुन तदुहिश्यापदेश माह कर्मणीति कायवाङ्मनोभिर्निर्वर्त्ये वैदिके स्वाभाविके नित्ये कर्मण्येवाधिकारः कर्तव्यतया तवास्तु यतः फलाभिसंधिना क्रिय माणानि कर्माणि चित्तभूमौ वासनारूपेण बीजभावं प्राप्य फलानां चारं प्रापयन्ते अतः कर्मफलहेतुः कर्मणां शुभाशुभानां सुख दुःखात्मकानि हेतुर्जन्मनो निमित्तं [illegible] तथा विधो माभूः वत् यथोक्तबोधनिष्ठस्य हि कर्माणि ज्ञानाग्निना दग्धबीजानि त पद्यन्ते तथा कर्मणि अकर्मणि अकरणेऽपि संगोऽस्तु निष्ठा मास्तु इति

पंचोलीटीका

सर्वकर्मफलेच्छा न फलेच्छं न भवति चेत्तर्हि सर्वैर्ज्ञानमेव संपादनीयं किं कर्मणा इत्याशंका [illegible] अधिकारिभेदकर्म चेति कर्मण्येवेति अर्जुन ते तव कर्मण्येवाधिकारः न ज्ञाननिष्ठायां कदाचन कर्म

फलेषु दृष्टानुश्रविकफलेषु कदाचनाधिकारो माभूत्

तदुक्तं न कर्माणि त्यजेद्योगी कर्मभिस्त्यज्यते ह्यसौ कर्मणां मूलभूतस्य संकल्पस्यैव नाशतः इति [illegible] पृथक् पृथग्वर्त्यैः परित्यज्यते कर्मणां [illegible] परित्यज्यते पापि [illegible] नरं [illegible] इति +

दवस्थायां फलेषु कर्मफलतृष्णा माभूत्कर्मफलहेतुः कर्मफ
लसाधको माभूः तेन तव अकर्मणि कर्माकरणे संगः प्रीतिः मास्तु

रणवीरसमिद्बोधिनी॥

कर्मण्युक्तं तस्मिन्स्वधर्मएवाधिकारोस्तु तव फलेषु मिषड्डोदा
दे अधिकारः कदापि मास्त्विति नाहं कर्तेत्यहंकारपरित्या॰
गात् ईश्वरस्यैव सर्वनियंतृत्वात् एवं हि कर्मफलस्य हिंसा॰
मकस्य हेतुः अहमेव कर्तेति कारणं माभूः ईश्वरस्यैव सर्व॰
कर्तृत्वात् एवं चेत्किं कर्मणा दुःखरूपेणेत्याशंकायाह माते
ऽति अकर्मणि स्वधर्मपरित्यागरूपे संगो मास्तु प्रत्यवायद
र्शनात् ४७॥

मधुभाष्य॥

कर्मण्येवेति नन्वस्त्युपलक्षणार्थं तत्त्वज्ञानिनापि न फलकर्म
व्यक्ता किंस्वन्येषामिति नन्वस्ति केषांचिन्मतेस्तीति सहितानी
नरापराद्धस्य मोहादिस्वभिभवादेः यदि तेषांशुद्धसत्वानान॰
स्यात् ज्ञानं कान्येषां उपदेशादेस्य सिद्धं ज्ञानं तेषां पार्थाद्भिवे
णभत्याति ज्ञानिगणनाद्य कामनिषेधएवात्र फलानिषु॰॥
स्वांतं श्रेणभवति नहि कर्मफलानि कर्माभावे यतोपि भवति
भवंति च काम्यकर्मणो विपर्ययप्रयत्नेष्वविरोधे अतः कर्मा
करणएव प्रत्यवायः नतु ज्ञानादिना वाक्यमनया फलाप्राप्तो
अनकर्मण्येवाधिकारः अतस्तु देवकार्थं मतु कामेन ज्ञानादि
निषेधेन वा फलप्राप्तिः कामवचनानां तु तात्पर्यं भगवतैवो॰
क्तं रोचनार्थं फलश्रुतिः यथा भैषज्यरोचनमित्यादि भागवते।
अतः कामी यजेतेत्यर्थः निष्कामं ज्ञानपूर्वं चेति वचनात् वध्य
मानो भयश्च वसंते वसंते ज्योतिषा यजेतेत्यादिश्रुतिश्च अतमा
कर्मफलहेतुर्भूः कर्मफलं तत्कृतो हेतुर्यस्य सकर्मफलहेतुः

स मा भूः नर्हि न करोमीत्यत आह मात इति कर्माकरणेऽस्ते
माभूदित्यर्थः अन्यफलाभावेऽपि मत्प्रसादाख्यफलभावात्
शक्राद्वृतस्य श्रुत्वा हृणीमहे तेपरितोषणेत्यादिमदाचार
त् अनिंदनाद्विष्णोषतः तयनिंदनाच्चसामान्यविशेषोबाधत
इति च प्रसिद्धं सर्वानानयनैकमेवमित्यादौ अतानैकात्मता
मे स्पृहयंतिकचित् भक्तिमन्विच्छंतो ब्रह्मजिज्ञासां विनायत्र
तांइच्छव्य इत्यादिवचनेभ्यः स्वार्थमेवकंप्रतिनतथास्ते दः
किंददासीत्युक्ते सेवादियाचकंप्रतिबहूत्वरत्निंदइतिलोकप्र
सिद्धन्यायाच्च भक्तिज्ञानादिप्रार्थनाकार्येतिसिद्धं एवंश्लोकौ
स्पष्टयति ४७॥

रामानंदसरस्वतीटीका

कर्मण्येवाधिकारस्त इति तत्त्वज्ञानकामस्य । तव कर्मण्येवाधिकार
स्ते नार्थज्ञानमस्तु । एवकारस्यार्थमाह मा फलेष्विति फलेष्वपि
कारः स्यात्मास्तु स्वयमेव फलं दास्यतीति चेत्तत्राह मा कर्मफलहे
तुर्भूरिति फलकामः सन्कर्म करिष्यन्नेव फलहेतुर्भविष्यसि न
हि निष्कामेन ब्रह्मार्पणबुद्ध्याकृतं कर्म फलाय कल्पत इति भावः
तर्हि ज्ञानार्थमेव प्रयतेनेति किं कर्मणेत्याशंक्याह मा ते संगोस्त्विति
अकर्मणि कर्माकरणे ते असंभावनाद्युपहतचेतसो जिज्ञासोः श्रमा
संगश्चा [स्या] स्त्वित्यर्थः ननु मा फलेष्वधिकारस्तेस्त्विति त्वयोक्तं तत्र मो
क्षोपि सकलानर्थनिवृत्त्यविनाभूतानतिशयानंदात्मकत्वात्परम
फलं पुरुषार्थरूपं तत्र चेत्तत्राप्यधिकारवर्जनात्तत्साधनज्ञानसाधने
प्रयोजनाभावात् किं ब्रह्मार्पणबुद्ध्या कर्मकरणमेव पुरुषार्थस्तत्रापि
९ हारब्धकर्मणः प्रकृतत्वात् कर्मण्येवाधिकार इत्येकवचनेन
नस्यैव प्रकरणात् किं तन्मात्रमेव कर्तव्यं किं तु नःकरणशुद्धिद्वा
राब्धवसायात्मिकाया बुद्धेः सिद्धये यदेतत्कर्तव्यं तदा कः कामा
दस्य विशेष इत्याशंक्य परिहरन्नाह ॥

भाषाअनुवाद

जोऐसा कहतेहैंकि समस्त कर्मकाफल परमेश्वर की आरा
धनाकरने हींसे होगा तोहमभगवतका आराधनहीं सब छो
डकरकेरै और कर्म करनेसेक्याप्रयोजनहै इसशङ्काकी निवारन
करनेसिद्धान्त कहतेहैं तत्वज्ञानके अर्थीजोतमसो तुमकोकर्म
मात्रकरनेका अधिकारहै औरबन्धनकाहेतुभूत कर्मकेफलकी
अभिलाषकरिये अनेकप्रकारकी कामनाकरनेमेकभी तुमारा
अधिकारनहींहै जोकहोकि कर्मकरनेसे उसका फलअवश्यही
होगा जैसेकिआहार करनेसे तृप्ति होतीहीहै कहतेहैंकिसोहो
यपरउसका पुन्यपापनहीं लगता जैसेअज्ञानबालक जोनी
चकाअन्नखाय तउसकाधर्मनजाय क्योंकिधर्मनाशके अर्थन
हींखायासोतुमफलके अर्थकर्ममे प्रवृत्तनहोउ निष्कामकर्मक
रो जोकर्मफलकीतृष्णासेकर्मकरोगेतोकर्मफल प्राप्ति केहेतु
होउगे जवफलकोइच्छासे कर्ममे प्रवृत्तहोगाहै तबफल
औ जन्मदोनोकाहेतुहो जाताहै नीच ऊंचयोनिमे जनमि फल
भोगताहै औरजोकर्मफलकोनचाहे तोदुखरूपकर्म करनेसेक्या
प्रयोजनहै ऐसीमतिभीतुमकोमतिहोय अर्थात् नकरनेमेभीरु
चिनहोयतात्पर्य यहकि सकाम कर्मनकरो निष्कामतोअवश्यक
रो ॥४७॥

दोहा

कर्महिमे अधिकार तव कहुन फलके माहि तुमतफ
लमें हेतुहो तो कर्महिमे संगनाहि ४७॥

311

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सि
द्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ४८ ॥

शांकरभाष्यं

यदि कर्मफलप्रयुक्तेन न कर्तव्यं कर्म कथं तर्हि कर्तव्यमित्यु
च्यते योगस्थेति योगस्थः सन् कुरु कर्माणि केवलमीश्वरार्थं त
त्रापीश्वरो मे तुष्यत्विति संगं त्यक्त्वा धनंजय फलतृष्णाशून्येन
क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिः
तद्विपर्ययजासिद्धिस्तयोः सिद्ध्यसिद्ध्योरपि समस्तुल्यो भूत्वा
कुरु कर्माणि कोऽसौ योगो यत्रस्थः कुर्वित्युक्तमिदमेव तत् सि
द्ध्यसिद्ध्योः समत्वं योग उच्यते ४८ ॥

आनन्दगिरिकृतटीका

आसक्तिकारणेन युक्तश्चेत् तर्हि क्लेशात्मकं कर्म किमुद्दिश्य कर्त
व्यमित्याशंकामनूद्य श्लोकान्तरमवतारयति यदीत्यादिना वर्त
मानयोगमुद्दिश्य तन्निष्ठो भूत्वा कर्माणि क्लेशात्मकान्यपि विहि
तत्वादनुष्ठेयानीत्याह योगस्थः सन्निति कर्मानुष्ठानस्योद्देश्यं
दर्शयति केवलमिति फलान्तरापेक्षामन्तरेणेश्वरार्थं तत्प्रसाद
नार्थमनुष्ठानमित्यर्थः तर्हि ईश्वरसन्तोषोऽभिलाषगोचरीभूतो
भविष्यति नेत्याह तत्रापीति ईश्वरप्रसादनार्थे कर्मानुष्ठाने सि
नेपीत्यर्थः संगं त्यक्त्वा कुर्विति पूर्वेण सम्बन्धः आकाङ्क्षितं पूर
यित्वा सिद्धिशब्दार्थमाह फलेति तद्विपर्ययजामसत्त्वाशुद्धिजन्या
ज्ञानानाप्तिलक्षणेति यावत्कर्मानुतिष्ठतो योगमुद्दिश्य शेषम
यो[illegible]क्तमाकांक्षापूर्वकं प्रकटयति कोऽसावित्यादिना ४८ ॥

स्वामिकृतटीका

किं तर्हि योगस्थ इति योगः परमेश्वरपरता तत्र स्थित्वा कर्माणि कुरु
तथा संगं कर्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराश्रयेणैव कुरु तत्फ
लस्यापि ज्ञानस्य सिद्ध्यसिद्ध्योः समो भूत्वा केवलमीश्वरार्पणेनैव कुरु
यत एवंभूतं समत्वमेव योग उच्यते सद्भिश्चित्तसमाधानरूपत्वात् ४८ ॥

पिशाचभाष्ये

गी॰ टी॰ हि॰

यदि कर्मफलत्युक्ते न न कर्तव्यं कर्म कथं तर्हि कर्तव्यमित्यत्रोच्यते योगस्थः सङ्गं कुरु प्रवृत्तेष्ट्यं कर्माणि केवलमीश्वरार्थं ईश्वरो मे तुष्यतीति सङ्गं त्यक्त्वा धनंजय फलतृष्णासङ्गेन क्रियमाणे सत्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिस्तद्विपर्ययो सिद्धिस्तयोः सिद्ध्यसिद्ध्योरपि समस्तुल्यो भूत्वा कुरु कर्माणि कोसौ योगः इदमेव तत् सिद्ध्यसिद्ध्योः समत्वं योग उच्यते ४८॥

रामानुजभाष्ये

एतदेव स्पष्टीकरोति राज्यबन्धुप्रभृतिषु सङ्गं त्यक्त्वा युद्धादीनि कर्माणि योगस्थः कुरु तदन्तर्भूतविजयादि सिद्ध्यसिद्ध्योः समो भूत्वा कुरु तदिदं सिद्ध्यसिद्ध्योः समत्वं योगस्थ इत्यत्र योगशब्देनोच्यते योगः सिद्ध्यसिद्ध्योः समत्वरूपं चित्तसमाधानं ४८॥

२ योगे स्थित्वा कर्माणि कुरु सामत्वं च योगः

अभिनवगुप्तटीका

किं तर्हि योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय यस्य सर्वे समारम्भा निराशीर्बन्धनास्त्विह त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान् योगे स्थित्वा कर्माणि कुरु सामत्वं च योगः यस्य सर्वे इति यस्य सर्वे व्यापारा आशीरूपेण बन्धनेन न युक्ता अभिलाषो हि बन्धकः ४८॥

परमार्थप्रपाटीका

तर्हि कथमित्याह योगस्थ इति योगः परमेश्वरमात्रिथं तत्रैव कृतनिश्चयो योगस्थः एवंविधो भूत्वा कर्माणि कुरु अत एव हे धनंजय धनस्वर्गादि सर्वं जयति त्वं च्छत्वेन त्यजति तथाविधत्वं जयसीत्यर्थः किं कृत्वा सङ्गं त्यक्त्वा कर्तृत्वाभिनिवेशं परित्यज्य पुनः किं कृत्वा सिद्ध्यसिद्ध्योः समो भूत्वा सिद्धावसिद्धौ वा हर्षविषादरहितो भूत्वा यतः समत्वं निर्विकारत्वमेव योग इत्युच्यते ४८॥

वनमालीटीका

सर्वो कर्मैव विहन्यतेति योगस्थ इति हे धनंजय त्वं योगस्थः सन् संग
फलाभिलाषं कर्तृत्वाभिमानं च त्यक्त्वा कर्माणि कुरु संगत्यागोपाय
माह सिद्ध्यसिद्ध्योः समो भूत्वा फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्य
क्त्वा केवलमदाराधनबुद्ध्या कर्माणि कुर्वित्यर्थः ननु योगशब्देन प्रा
क् कर्मोक्तं तत्र योगस्थः कर्माणि कुर्विति उच्यते नः कथमेतद् हेतुं शंका
मनस्याह समत्वं योग उच्यते यदेतत् सिद्ध्यसिद्ध्योः समत्वं इदमेव यो
गस्थ इत्यत्र योगशब्देनोच्यते न तु कर्मेति न कोपि विरोध इत्यर्थः सु
खदुःखे समे कृत्वेत्यत्र जयपराजयसाम्येन युद्धमात्रकर्तव्यताप्रकृतत्वादु
क्ता इह तु सर्वफलकर्तव्यतेति विशेषः ४८ ॥

कुसुमवैजयंतीटीका

यस्मादेवं तस्मात् योगस्थ इति हे धनंजय योगस्थः योगोऽत्रात्मज्ञान
पूर्वकम् युद्धोद्यमाराधनरूपकर्मोच्यते तस्मिंस्तिष्ठतीति तथा
सत्त्वं मदेकनिष्ठः सन् कर्माणि यानि स्ववर्णोचितानि त्वत्तेऽभिहि
तयुद्धादीनि तानि सर्वाणि कुरु परं तु संगं त्यक्त्वा सर्वोत्कर्म युद्ध
स्य फलस्य वा समत्वं यं परित्यज्य पुनः सिद्ध्यसिद्ध्योः जयपराजयादिरू
पयोः समः जयादौ गर्वशून्यः पराजयादौ अविहितसममनाः भूत्वा य
द्धीकृष्णः करोति तदेव भवतीत्यात्मा नमाली ये चेश्वराधीनमत्वात
योः समो भूत्वेत्यर्थः तस्मादीदृशः समत्वं चित्तस्थैर्यं यत्तस्य वयो
गशब्देनोच्यतेऽभिधीयते संबोधयन्नेव यदि समरे द्वन्द्वेरैश्वर्यादियतानि वि
नित्यतान्यनलादिभ्योऽन्येभ्यः स्वदत्तवानसि तर्हि कर्मफलत्यागे
जयपराजयादिसमत्वेन च कोऽतिप्रयास इति सूचितम् ४८ ॥

मधुसूदनीटीका

सर्वो कर्मैव विहन्यतेति हे धनंजय त्वं योगस्थः सन् संगं फलाभिला
षं कर्तृत्वाभिनिवेशं च त्यक्त्वा कर्माणि कुरु तत्र बहुवचनात्कर्मणो
वाधिकारस्तस्य तत्र जातावेकवचनं संगत्यागोपायमाह सिद्ध्य
सिद्ध्योः समो भूत्वा फलसिद्धौ हर्षं फलासिद्धौ च विषादं त्यक्त्वा के

वलमीश्वराराधनबुद्ध्याकर्माणिकुर्वित्यर्थः ननुयोगशब्देनसांकर्मा
नुष्ठानयोगस्थःकर्माणिकुर्वित्युच्यते पुनःकथमेतदोद्देशकस्मि
त्वतआह समत्वंयोगउच्यते यदेतत्सिद्ध्योःसमत्वं इदमेवयोगस्थ
इत्यत्रयोगशब्देनोच्यते ननुकर्मणिनकोपिविरोधइत्यर्थः अत्रच
वीर्यसोत्तरोर्थेनव्याख्यानेक्रियतइत्ययोनरुक्तमितिभाष्यकारीयः
पंथाः सुखदुःखेसमेकृत्वेत्यत्रजयाजययोःसाम्येनयुद्धमात्रकर्त
व्यतामुक्तमत्रतुकृत्स्ना अत्रइष्टानिष्टसर्वकर्मकर्तव्यमितिविशेषः ४८॥

सर्वफलपरित्यागेन ४

313

सदानंदीटीका

कथंकर्तव्यमितिचेत्तत्राभूत्वासमाहितःयोगस्थःसत्फलेकामं
त्वेत्वाभिमतिंतथा १ त्यक्त्वात्वंकुरुकर्माणिफलसार्पणधियासदा
त्यक्त्वासर्वफलप्राप्तौविषादेनहिपर्यये कोसौयोगसर्वेयोगस्थःक
र्मकुर्वित्युच्यते सिद्ध्यसिद्ध्योःसमत्वयत्स्वयोगइहकथ्यते २ ॥ ४८॥

नीलकंठीटीका

एतदेवविवृणोति योगस्थइति योगस्थःसन्संगंफलतृष्णांकर्तृ
त्वाभिमानंचत्यक्त्वाकर्माणिज्ञानार्थंकुरुहेधनंजय सिद्ध्यसि[illegible]
कर्मफलस्यविविदिषादेःसिद्धौअसिद्धौवासमोहर्षविषादशून्यो
भूत्वाकर्माणिकुर्वितिसंबंधः इदमेवसिद्ध्यसिद्ध्योःसमत्वंयोग
इत्युच्यते ४८ ॥ ४८ ॥

४स्फुटोर्थः ४८

ज्ञानेश्वरी टी॰

नहिं कथमिदं कार्यमित्याह यस्य सर्वे समारंभाः निराशीर्बंधना
स्त्विह त्यागे यस्य हुतं सर्वं स त्यागी स च बुद्धिमान् समारभ्यन्त इति
समारंभाः कर्माणि निर्गता आशीः फलस्पृहैव बंधनं येषां ते यस्य
श्रमः त्यागे सर्वकर्मफलत्यागमित्यादिनाष्टादशे सिद्धान्ते यस्य
सर्वकर्म हुतं क्रियमाणमेव दग्धबीजवत्स सर्वशक्तिहीनं
कृतं स त्यागी स च बुद्धिमान् स्वार्थसंपादनपटुः न कर्मसंन्या॰
सीत्यर्थः ४८ ॥

^ततएवमनः^

रामकंठी टीका

इह शास्त्रविहितानां कर्मणामनुष्ठाने यथोक्तात्माद्वैतज्ञान
निष्ठत्वलक्षणः समाधिर्योग उच्यते यथा कपिलादिप्रणीत
स्य सांख्यसंज्ञकस्य ज्ञानस्य पातंजलादिप्रणीते चित्तवृत्तिनिरो
धलक्षणे योगे निष्ठा तथेहोपदिष्टस्यात्माद्वैतज्ञानस्य कर्मा
नुष्ठानसमाधौ निष्ठेति योगशब्देन सोऽप्युक्तः तथा तद्दशायो
गस्थितः शास्त्रमात्ररूपविहारेण कृतप्रतिष्ठः सन्यथोक्तानिक
मोक्षसिद्धिरूपफलप्राप्तिहेतुत्वप्रति
पत्त्या प्रतिष्ठकर्मसंगं तत्तदभिसंहितफलं परिहृत्य अतएव सि
ह्यानावन्मात्रेणापायलीनचित्तत्वे ऽस्य कापि द्वयोरपि निर्विकारत्वात्स
नाफलसंपन्नो प्रसिद्धोच तद्विद्याते द्वयोरपि परिपूर्णो यथा
मानिर्विशेषाभूत्वा यथोक्तज्ञाननिष्ठत्वात्प्रसिद्धस्य कर्मणः फलेनानि
त्कोविशेषो यथोक्तज्ञाननिष्ठत्वात्सर्वस्य बालकोविशेष इति स
न्यायतत्त्वमत्स्वधर्मजनितानेदत्तस्य कश्चित्तु विवेकुः तःसमत्वं सर्वा
वैनसिद्धेनासिद्धेनवा कश्चित्त्वविकुः यथोक्तयोगनिष्ठोभवयतः सामप्रा
वैसाम्यदशायां हठो यथोक्तयोगनिष्ठो भवेद्योग उच्यते योगिनो लक्षण
वरवस्थाविकारलेशासंस्पृष्टत्वमेवैतद्योगनिष्ठस्य त्यागे यस्य हुतं
मेववास्य निष्ठत्यर्थः अतएवैतद्योगनिष्ठस्त्विह त्यागे यस्य हुतं
मान्॰ यस्य सर्वे समारंभाः निराशीर्बंधनास्त्विह यथोक्तयोगाधिकारिणः पु
सर्वं स त्यागी स च बुद्धिमान् यस्य यथोक्तयोगाधिकारिणः पुरुषभाविनो
दः सर्वे समारंभाः सर्वाः क्रियाः प्रवृत्तयो या वा आशीरनित्यभो
गाभिलाषः सर्वाः क्रियाः सत्यागीति संबन्धः आशीरनित्यभो
नानिराशीर्बन्धना भवन्ति संसारहेतुत्वादस्मात्तत्र माशीर्बं
नाविषयाकांक्षा तदेव बन्धनं

गी.
टी.
द्वि.

धनंनिष्क्रांतापाशीर्बंधनात्त्रिराशीर्बंधनाः भोगात्मबंधरहिता
त्यर्थः अतएवावश्यानुष्ठेयकर्मस्वरूपं सर्वं शुभमशुभं वा त्यागेफ
लाशासंन्यासेकृतेमयाविवबीजजातेफलप्रसवसामर्थ्यविना
शायनिवृत्तिं मे सएवंविधोनित्यकर्मानुष्ठेतेवत्यागीत्यागवान्
नपुनः क्लेशभीरुत्वाद्विनाकर्मण्येवत्यजेस्त्यागीभवतीतियुक्ति
रेवअग्रेवोक्ष्यामस एवंचैवंविधः पुमानिशाम्याज्ञानयुक्तोनत्वयुः
कर्मत्यागादिमात्रेज्ञानेमन्यते अतएवंविधोत्कृष्टबुद्धियुक्तं
कर्मसमाचरेत् नकेवलमित्याह ४८ ॥

लासिकी [illegible] टीका

पूर्वोक्तमेवविवृणोति योगस्थइति संगंफलाभिसंधिनाद
णिलीनचित्तत्वंत्यक्त्वा तथाफलस्यासिद्ध्यसिद्धोः समभा
वादरहितोभूत्वा योगस्थःसन् कर्मानुष्ठीयमानेपि आत्म
स्थितत्वमप्रमत्ततायोगस्तत्राश्रितःसन् कर्माणिकुरु यतः
मत्वंसर्वास्ववस्थास्तुनिर्विकारत्वंयोगः योगलक्षणमुच्यते
नेनश्लोकेनअर्जुनमुपदिशद्बुद्धियोगकर्मयोगयोर्लक्षणं
गपडुपदिष्टम् ४८ ॥

पंचोली टीका

यदिफलमुक्तेकर्मनकर्तव्यंकथंतर्हिकर्तव्यंतत्राह योगस्थ
इति हेधनंजयसंगंत्यक्त्वाईश्वरतुष्टिमप्यप्रार्थयन् ईश्वरोमे
प्रीतइत्याप्रार्थयन् योगस्थः केवलमीश्वरार्थं कर्माणिकुरुत्वं
भूत्वावत् किंकृत्वासिद्ध्यसिद्ध्योः समोभूत्वामनः शुद्धिः ज्ञा
नप्राप्तिः सिद्धिः तद्विपरीतात्वसिद्धिः तयोः समः त्वंभूत्वा ॥
कर्माणिकुरुसिद्ध्यसिद्धिसमत्वंयोगउच्यते ४८

रणवीरसमसिद्धोधिनी ॥

योगेसाम्येस्थितःकर्माणिस्वधर्मोचितानि फलाभिसंधिनाविना
त्यक्त्वाकुरु किंच सिद्ध्यसिद्ध्योः समः इति अस्माकर्मसिद्धिः परमेश्वरा
द्वितीयाक्रमसिद्धिरस्माकंसिद्धिरित्याद्यपिनिर्विकारोभवेतितात्
पर्यार्थः ४८ ॥

मधुभाष्य॥

योगस्थइति योगस्थः उपायस्थः संगंफलतृष्णेदं त्यक्त्वात
तु एवसिद्ध्यसिद्ध्याःसमोभूत्वा सपवचमयोक्तोयोगः इ
तस्मयोगायुज्यस्वेत्याह ४८॥

योगं स्थः कुरुकर्माणीति योगस्संबंधः परमात्मना तादात्म्यलक्षणस्तस्य
स्थितो निवृत्तस्वभावस्त्वं हे धनंजय कर्माणि कुर्विति संबंधः अयंभावः
फलेनामलोकेनतुच्छेनैवकर्मणासाध्यंतेनवमोक्षस्तस्यख्यातस्यचित्तःस
त्वात्पृथगर्थत्वोक्तिस्त्वौपचारात्परमात्मस्वरूपस्यैवतेनभेदभ्रमो
पाधिनिरसनमेवतत्त्वज्ञानप्रयोजनमितिनकेवलंकर्मकरणमेव
प्रयोजनमितिकर्माणीतिचवदताद्वितीयाशंकापरिहृता नित्या
दीनिकुर्वित्यर्थः तृतीयशंकापरिहृता सिद्ध्यसिद्ध्योरिति अन्तः
करणशुद्धिद्वाराज्ञानशुद्धिमैत्तु यद्वातानिसिद्धिमे स्थितिसंकल्प
कर्ममाकार्षीरित्यर्थः संगंत्यक्त्वेत्येकांतरेत्यर्थः यद्वासंगःकि
याकर्तृककर्मरूपासंबंधस्तन्मुक्तासर्वत्रासंहृष्टिंविधायेत्यर्थः
नत्वत्रयोगोजीवपरैक्यमुच्यते पूर्वंतुयोगेतिमास्पृणित्यत्रकर्म
योगशब्देनोक्तेनकिंकेनसंगतमित्यत आह समत्वंयोगउच्यत
इनिकर्मनिष्ठसिद्ध्यसिद्धिसमत्वंयदिदमपियोगप्राप्तिसाधनत्वा
लोगतंजीवनमितिचयोगशब्देनोच्यतइत्यर्थः नत्वाशयमुक्तंभवेति
स्यादीनिकर्माणितावदनुष्ठेयानिनचतत्रायंशास्त्रनिषेधोयन्नूनं
गामेवतानिसंपादनीयानीतिकिंतल्लाभेयथामिलितैरंगैःसमा
पनीयानिननस्विन्नादृश्येहिकल्लानिकाम्यानिकृतानिगवादि यतंसं
पाद्यथोक्तैरंगैरेवसंपादितैस्तैःसत्वशुद्धिःस्यादेवनीयेत्याशंकाह ॥

भाषाअनुवाद

तोफिरिक्या करना चहिये सो कहते हैं कि हे धनंजय अर्जुन योग कहे ईश्वर मे जो एक निष्ठा उसी मे स्थित होय कर्म करो और हंमी इसके कर्ता हैं ऐसा अभिमान त्याग करि केवल ईश्वरार्पण बुद्धि से कर्म करो अर्थात् निष्काम कर्म का फलरूप तत्वज्ञान की प्राप्ति अप्राप्ति मे समता पूर्वक कहे समचित्त हो केवल ईश्वरार्पण जानि कर्म अनुष्ठान करो जिस हेत ऐसी ही समता को साधुलोग योग कहते हैं क्यों कि इसी मे चित्त स्थिर होता है यह सुबोधिनी का अर्थ है ईश्वरार्पण शब्द का भाव अर्थ यह है कि हम अपने हृदय मे टिके अन्तर्यामी हमारी वासना के अनुसार शुभ अशुभ जिस कर्म मे हम को लगावते उसी को हम उनकी प्रेरणा से करते हैं ऐसे विचार ते किये सब कर्मों को भगवत अर्पण करते हैं सोई पंचदशी मे कहा है ज्ञानामि धर्मं न च मे प्रवृत्ति र्जानाम्यधर्मं न च मे निवृत्तिः त्वया हृषीकेश हृदि स्थितेन यथा नियुक्तोस्मि तथा करोमि ४८॥

दोहा

स्थित ह्वो अर्जुन योग मैं करहु कर्म संग त्याग ह्वो सम सिद्धि असिद्धि मैं कहत समय योग विभाग ४८

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय बुद्धौ शर
णमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

शांकरभाष्यं

यत् पुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्मोक्तं एतस्मा
त्कर्मणः दूरेणेति दूरेणातिविप्रकर्षेण अत्यन्तमेव ह्यवर
मधमं निकृष्टं कर्म फलार्थिना क्रियमाणं बुद्धियोगात् सम
त्वबुद्धियुक्तात् कर्मणो जन्ममरणादिहेतुत्वात् हे धनंजय यत
एवं ततः योगविषयायां बुद्धौ तत्परिपाकजायां वा सांख्यबुद्धौ शर
णमाश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व परमार्थज्ञानशर
णो भवेत्यर्थः यतोवरं कर्म कुर्वाणाः कृपणाः दीनाः फलहेतवः
फलतृष्णाप्रयुक्ताः सन्तः यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लो
कात् प्रैति स कृपण इति श्रुतेः ॥ ४९ ॥

आनंदगिरिकृतटीका

किमिति योगस्थेन तत्त्वज्ञानमुद्दिश्य कर्मकर्तव्यं फलाभिलाषे
पि तदनुष्ठानस्य सुलभत्वादित्याशंक्य यथोक्तयोगयुक्ते कर्मस्व
वत्तन्तरश्लोकमुत्थापयति यत्पुनरित्यवरं कर्मबुद्धिसमत्वविरु
द्धमिति शेषः बुद्धियुक्तस्य बुद्धियोगापेक्षितं प्रकर्षं सूचयति बुद्धीति
बुद्धिसमत्वासमत्वयोर्याभ्यां कर्मणि प्रकर्षनिकर्षयोर्भावे करणीयं
नियत्वं तद्बुद्धाविति यत्तु फलेच्छयापि कर्मानुष्ठानं सकाममिति न
ताहकृपणेति निकृष्टं कर्मैव विशिनष्टि फलार्थिनेति कस्मात्
प्रतियोगिनः सकाशादिदं निकृष्टमित्याशंक्य प्रतीकमुपादा
य व्याचष्टे बुद्धीत्यादिना फलाभिलाषेण क्रियमाणस्य कर्मणो
निकृष्टत्वे हेतुमाह जन्मेति समत्वबुद्धियुक्तात् कर्मणः तद्धीनस्य
कर्मणो जन्मादिहेतुत्वेन निकृष्टत्वे फलितमाह यत इति योगवि
षया बुद्धिः समत्वबुद्धिः बुद्धिशब्दस्यार्थान्तरमाह तत्परिपाकेति
तद्धेतुत्वेन समत्वबुद्धिसमन्वितं कर्म गृह्यते तस्य परिपाकस्तत्फल

गी। टी। हि।

भूता बुद्धिः शुद्धिः शरणशब्दस्य पर्य्यायं गृहीत्वा विवक्षितमर्थमाह आश्रयेति समासे मोक्षविवक्षितत्वाद्द्वितीयं पक्षं गृहीत्वा वाक्यार्थमाह परमार्थं तथाविधज्ञानशरणत्वे हेतुमाह यत इति फलहेतव इति विवृणोति फलेति तेन परमार्थज्ञानशरणत्वेन वस्तुतो विशेषः परमार्थज्ञानवर्ज्जितस्य कृपणत्वे श्रुतिं प्रमाणयति यो वा इति अक्षरस्थूलादिविशेषणमेतदित्युच्यते ४९ ॥

स्वामिकृतटीका

काम्यं तु कर्माति निकृष्टमित्याह दूरेणेति बुद्ध्या व्यवसायात्मिकया कृतः कर्मयोगो बुद्धियोगः बुद्धिसाधनभूतो वा तस्मात्सकाशादन्यत्काम्यं कर्म दूरेणावरमत्यन्तमपकृष्टं हि यस्मादेवं तस्माद्बुद्धौ ज्ञाने शरणमाश्रयं कर्मयोगमन्विच्छ अनुतिष्ठ यद्वा बुद्धौ शरणं त्रातारमीश्वरमाश्रयेत्यर्थः फलहेतवस्तु सकामा नराः कृपणा दीना यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः ४९ ॥ ४९ ॥

पिशाचभाष्ये

यत्तु नस्समत्वबुद्धियुक्तो मोक्षपरायणतार्थं कर्म न स्यात् कर्मणः दूरेण अत्यन्तं दूरमेवावरमधमं निकृष्टं कर्म फलार्थिनां क्रियमाणं बुद्धियोगात् समत्वबुद्धियुक्तात् कर्मणः जन्ममरणादिहेतुत्वादित्यर्थः अतएव योगविषयायां बुद्धौ तत्पाकजायां सांख्यबुद्धौ शरणमाश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व परमार्थज्ञानशरणो भवेत्यर्थः यतोऽवरं कर्म कुर्वाणाः फलतृष्णाप्रयुक्ताः सन्तो यो वा एतदक्षरमविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः ४९ ॥

रामानुजभाष्यं

किमर्थमिदमसकृदुच्यत इत्यत आह यो यं प्रयानफलगम्यविषयो बोतरफलसिद्ध्यसिद्ध्योः समत्वविषयस्य बुद्धियोगस्य युक्तात्कर्मणः इतरत् कर्म दूरेणावरमहदेन दूयोस्तत्कर्मापकर्षरूपं वैरूप्यं उक्तं बुद्धियोगयुक्तं कर्म निखिलसांसारिकसमस्तदुःखनिवर्त्तकं परमपुरुषार्थलक्ष

णं मोक्षं प्रापयति इतरस्तु परिमितदुःखरूपसंसारमिति अतः कर्मणि
क्रियमाणे उक्तया बुद्धौ शरणमन्विच्छ शरणं वा सम्यग्ज्ञानं तस्यामेव
बुद्धौ वर्तस्वेत्यर्थः कृपणा हेतवः फलसंगादिना कर्म कुर्वाणाः कृप
णाः संसारिणो भवेयुः ४९ ॥

अभिनवगुप्तकृतटी.

बुद्धियोगात्किल हेतोरवरं दूरफलं विफलं कर्म दूरीभवति अतस्त्वं ह
र्षेण बुद्धौ शरणमन्विच्छ आर्यय स्वयेन सा बुद्धिर्लभ्यते ४९ ॥

परमार्थप्रपा टी.

अथ एवं ज्ञानयोगं प्रशंसन्नाह दूरेणेति भो धनंजय बुद्धियोगाज्ज्ञान
योगात्मकात् आशात्फलोद्देशेन कृतं कर्म दूरेणात्यंतमवरमपकृष्टं तथा
ऽपि विनश्चित्तशुद्धिद्वारा ज्ञानयोगस्य हेतुरेव कर्म कर्तव्यं तस्मात्त्वं बु
द्धौ ज्ञाने शरण्यकर्मयोगमन्विच्छ आश्रयेत्यर्थः हि यस्मात्कारणात्फ
लहेतवः कर्मकरणे फलमेव हेतुः कारणमिति मन्वानाः पुरुषाः कृ
पणा विषयसुखलंपटाः यद्वा फलव्यतिरेकेण निरर्थकं कर्मा येषां न
यवः कथं कर्तव्यमिति तेषां कार्पण्यं श्रुतिरपि यो वा एतदक्षरमविदि
त्वा गार्ग्यस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वा प्रैति
स ब्राह्मण इति भाष्ये भो गार्गि वचक्नवियः पुरुषः एतदक्षरं परं ब्रह्म
अविदित्वा अज्ञात्वा फलोद्देशेन कर्म कृत्वा अस्मान्मनुष्यलोकाल्लोका
न्तरं प्रैति मृत्वा गच्छति स कृपणः स्वविषयभोगेषु तथा एतदक्षरं वि
दित्वा प्रैति स ब्राह्मणः ब्रह्मरूपो भवति ४९ ॥

वनमाली टीका ॥

ज्ञानानर्थ इत्यत्र कर्मफलस्य ज्ञानफलापेक्षयाल्पतायोगं कुर्वित्यु
क्तं तत्र हेतुं वक्तुमाह दूरेणेति परमात्मविषयबुद्धियोगात्कर्मावरं हे
धनंजय हि यतस्ततो बुद्धौ परमात्मबुद्धौ शरणं पापत्रयद्वारा तद्
बुद्धियोगाद्व्यवस्थया यारत्नं कर्म तदाराधनरूपं परमात्मविषयबुद्धियोगा
त्कर्मावरं सकाम कर्मयोगमिच्छ कर्तेमिच्छ येन फलहेतवः फल
कामावरं कर्म कुर्वंति ते कृपणाः अत्यंतदीनाः सर्वदा जन्ममरण
दिवशीयं भ्रमणेन परवशाः यो वा एतदक्षरं गार्गि विदित्वास्माल्लो
कात्प्रैति स कृपण इति श्रुतेः ॥ यथादिकृपणा श्रुतिर्दुःखेन धनम

नैयंतीयत्किंचित्तुच्छसुखमात्रलोभेनदानादिजनितंमहत्सुखमः
भवितेनशक्नुवंतीत्यात्मानमेववंचयंति तथामहताडुःखेनकर्मा
णुवाणाःक्षुद्रफलमात्रलोभेनपरमानंदानुभवेनवंचिताइत्यहो
मौढ्यंतेषामितिकृपणापदेननिंदितं ४९ ॥

उत्तमवैजयंतीटीका

प्रवंभूतान्निष्कामकर्मणःसकाशात्सकामंकर्मनिरतिशयेनापकृ
ष्टमित्याह दूरेणेति हेधनंजय हियस्माद्बुद्धियोगात्फलरहितेन
र्त्तृत्वाद्यभिमानशून्येनेश्वराराधनरूपेणैवकर्मणेहामुत्रचसुखंभ
तिनान्यथात्यवंनिश्चयवतीयाबुद्धिस्तयानिश्चयात्मिकयाबुद्ध्या
नीयःकर्मयोगःसबुद्धियोगस्तस्माद्बुद्धियोगान्निष्कामकर्मणःस
काशादितरत्काम्यंकर्मदूरेणातिशयेनावरंनिकृष्टंभवतितस्मा
बुद्धौव्यवसायात्मिकायांशरणंनिवासंरक्षकंवान्विच्छानुतिष्ठ
द्धिमात्मेयसंदेवेच्छाऊरुषेत्यर्थः ननुबुद्धियोगात्काम्यकर्मणःऊ
वरत्वमित्याशंक्यतत्कर्तृणांफलनिमित्तत्वेनकृपणत्वमवः
त्याहकृपणाःफलहेतवइतिफलान्येवपशुपुत्रादीन्येवहेतवः
जनानि येषांतेतथासकामिनःपुरुषाःकृपणाःअतिदीनानि
सारिणोभवंतीत्यर्थः धनंजयेतिसंबोधनेनयथात्वंशौर्यवी
दार्यादिगुणेनशत्रून्पराजित्यतेषांधनमजयस्तथाकाम्यक
कंशत्रुंनिरस्कृत्यनिष्कामकर्मरूपंधनंजयनीवेत्वंकृपणोभवि
सीतिसूचितं ४९ ॥

मधुसूदनीटीका

ननुकिंकर्मानुष्ठानमेवपुरुषार्थोयेननिष्फलमेवसदाकर्तव्य
स्यच्यते प्रयोजनमनुदिश्यनमंदोपिप्रवर्तत इतिन्यायात्तदुक्तं
कामनयैवकर्मानुष्ठानमितिचेत्तत्राह बुद्धियोगादात्मबुद्धि
नभूतान्निष्कामकर्मयोगात् दूरेणातिविप्रकर्षेणावरमधमंक
फलाभिसंधानाक्रियमाणंजन्ममरणहेतुभूतं प्रथ्यवायकर्म
द्धियोगात्दूरेणावरंसर्वमपिकर्महियस्मात् हेधनंजय तस्माद्
द्धौपरमात्मबुद्धौसर्वानर्थनिवर्तिकायांशरणंप्रतिबंधक
यत्नरहितंनिष्कामकर्मयोगंप्रान्विच्छकर्मेभिच्छयेतफल

फलकामाश्चावरं कर्म कुर्वन्ति ते कृपणाः सर्वदा जन्ममरणादिघटीयं
त्रभ्रमणेन परवशाः अत्यन्तदीना इत्यर्थः यो वा एतदक्षरं गार्ग्यविदित्वा
स्माल्लोकात्प्रैति स कृपण इति श्रुतेः तथा च त्वमपि कृपणो मा भूः किं
तु सर्वानर्थनिवर्तकात्मज्ञानोत्पादकं निष्कामकर्मयोगमेवानुतिष्ठेत्य
भिप्रायः यथा हि कृपणा जना अतिदुःखेन धनमर्जयन्तो यत्किंचित्
दृष्टसुखमात्रलोभेन दानादिजनितं महत्सुखमनुभवितुं न शक्नु
वन्तीत्यात्मानमेव वंचयन्ति तथा महता दुःखेन कर्माणि कुर्वाणाः स्व
ल्पफलमात्रलोभेन परमानंदानुभवेन वंचिता इत्यहो दौर्भाग्यमो
वैतेषामिति कृपणपदेन ध्वनितं ॥४९॥

सदानंदी टीका

ननु निष्कामकर्माणि कर्तव्यानि कुतो मम प्रयोजनमनुद्दिश्य न मं
दोऽपि प्रवर्तते १ इति न्यायाद्धरेः कर्मानुष्ठाने फलवांछया किमर्थं
निष्फलं कर्म कर्तव्यमिति चेच्छृणु २ फलकामनया कर्मकृतं जन्मा
दिहेतुकं निकृष्टत्वविज्ञानहेतोर्निष्कामकर्मणः ३ यद्वात्मबु
द्धियोगात्तत्कर्म हेयं यतोऽखिलं निकृष्टं किं पुनर्वाच्यं नैकृष्टकाम्य
कर्मणः ४ सर्वानर्थनिवर्तिन्यां बुद्धौ तस्माद्धनंजय प्रतिबंधकपा
पक्षयेणापरित्यक्तं ५ निष्कामकर्मयोगं त्वं कर्तुमिच्छसि स्थिरो भ
व फलकामनया कर्म ये कुर्वन्त्यविचक्षणाः ६ कृपणास्ते सदाज
न्मसंसृत्याश्रमं यान्ति ते यथातिकृपणा लोके दुःखेनाप्यर्जितं धनं
दानादिजनितभोगकर्तृशक्ता भवंति न तथा सततप्रयत्नेन कुर्वा
णाः कर्म वैदिकं ७ स्वज्ञानेनाभिलाषेण वंचिताः कृपणाः स्वर्गा
दिभोग्यमेतेषां मोक्षं चेत्याशयो हरेः ८ ॥४९॥

नीलकंठी टी०

इममेव बुद्धियोगं स्तौति दूरेणेति कर्मफलकामेन क्रियमाणं बुद्धि
योगात्सर्वोत्कृष्टान्निष्कामात्मकर्मणः दूरेण हि प्रसिद्धं अवरमत्यन्तनिकृ
ष्टं यतस्तस्माद्बुद्धौ योगरूपायां तत्फलभूतायां सांख्यरूपायां वा तन्निमि
त्तं शरणं रक्षितारं आश्रयं वा ईश्वरं अन्विच्छ प्रार्थयस्व तत्प्रीत्यर्थं कर्मा
णि कुर्वित्यर्थः यतः फलहेतवः फलमेव हेतुः प्रवर्तकं येषां ते तादृशाः
कृपणाः दीनाः भवंति यो वा एतदक्षरं गार्ग्यविदित्वा
अस्माल्लोकात्प्रैति स कृपण इति श्रुतेः ॥४९॥

ज्ञानेश्वरी टीका

अतएवंविधज्ञानपूर्वकं कर्म कार्यं न केवलमित्याह हि यस्मात्
अवरं ज्ञानहीनं कर्म बुद्धिः ज्ञानं बुध्यते इति योगः कर्मबुद्धियो
गाज्ज्ञानसंयुक्तात्कर्मणः सका[illegible]शाद्दूरेणातिनिन्दितं श्रेयःसा
धयितृत्वमित्यर्थः अतो यस्य सर्वे समारम्भेऽन्तके ज्ञाने शरण
मन्विच्छ अत एव तत्परो भव कृपणा ज्ञानहीनाः फलहेतवः फला
र्थं कर्माणि प्रवर्तन्ते इत्यर्थः ४९ ॥

रामकंठी टीका

यस्माद्बुद्धियोगाद्यथोक्तज्ञानसमाधानाद्दूरेणातिशयेन केव-
लं तद्विरहितं कर्मावरं निकृष्टं ज्ञानशून्यं कर्म संसारहेतुत्वात्त
तोऽत्यन्तावममित्यर्थः अतस्त्वं बुद्धौ यथोक्ते सम्यक् ज्ञाने शरण
माश्रयमन्विच्छ अभिकांक्षितामेवोपायतयावलम्बस्वेत्यर्थः
ये तावत् फलहेतवः अनित्यभोगलक्षणं फलमेव हेतुस्तत्साध
नक्रियासु प्रयोजकं कारणं येषां ते ज्ञानशून्यकर्ममात्रा
नुष्ठायिनः कृपणास्तुच्छफलार्थित्वाद्धीनास्ते जातिशरीरा
द्यभिमानावच्छिन्नमत एवानित्यभोगात्मकफलं तस्मात्तरमात्मा
नं मन्यमानाः सन्तो दुराचाराः [illegible]
[illegible] ४९ ॥

लासिकी [illegible] टीका

एवंविधोक्तरूपबुद्धियुक्तं कर्म समाचरेन्न केवलमित्याह दूरेणे
ति यथोक्तबोधसमाधानात् हि यस्मात् रिक्तकर्म दूरेणावरम
त्यन्तावमम् बोधशून्यस्य कर्मणः [illegible] संसारहेतुत्वा
त् अतो बुद्धौ सम्यग्बोधनिमित्ते [illegible]रणमाश्रयमन्विच्छ उपायतया
कर्मावलम्बस्वेत्यर्थः बुद्ध्यानविशायां हि कर्मानुष्ठाने परामर्
शावलंबनेनात्मनः प्रमातृत्वेनासदाभासमानतया यथास
म्यग्बोधवृद्धिर्न तथा समाधिदशायां तस्याः कदाचित्कत्वात् एत
त्सर्वदा समाधानयत्नादेव संचेतयन्ते नान्ये प्रमादिनः यतः फल
हेतवः फलमेव तत्साधन[illegible]कर्मसु हेतुः प्रयोजको येषां ते फ
लाभिसन्धिना बोधशून्यकर्मानुष्ठायिनः कृपणा महाफलरूप
त्वत्तुच्छफलार्थित्वाद्धीनाः + ४९ ॥

+ तथा च श्रुतिः यो वा एतदक्षरमविदित्वा
गार्ग्यस्माल्लोकात्प्रैति स कृपण इति

गीं
टीं
द्विं

321

पंचोलीटीका

यत्पुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्म एव तस्मात्काम्यं कर्म दूरेणेति हि यस्मात् हे धनंजय बुद्धियोगात्समत्वबुद्धियुक्तात् कर्मणः सकाशात्फलार्थिकर्म दूरेण अतिविप्रकर्षेण अवरं निकृष्टं बुद्धौ परमेश्वरार्पणे कर्मबुद्धौ वा शरणमाश्रयमन्विच्छ प्रार्थय स्वपरमार्थज्ञानशरणो भव फलहेतवः फलतृष्णाप्रयुक्ताः कृपणाः दीनाः ४९

रत्नपीरसमिद्बोधिनी॥

दूरेणेति हि माद्धे वधारणे बुद्धियोगादिति हेत्वर्थे पंचमी बुद्धिः सद्विवेकरूपा तस्या यो योगः संगतिस्तस्माद्धेतोः अवरमनुत्कृष्टं धर्मपरित्यागाच्छून्यफलमिति यावत् यत्कर्म स्वस्ववर्णाश्रमाचा विहितं तद्दूरेण भवति तेन न किंचित्प्रयोजनमस्तीति भावः प्राप्यतस्यां बुद्धौ शरणमन्विच्छ प्रार्थयस्व येन सा बुद्धिर्लभ्यते सा बुद्धिर्लभ्यते लोके वा तत्र उपदेष्टृत्वेनाहमेवातो मामेव प्रार्थयस्वेति ये च फलहेतवो हननादिरूपक्रियाफलस्य नरकादिप्राप्तिलक्षणस्य हेतवः कारणभूताः एते हत्वा गुरून्नरकं गंतास्मीत्यभिमानिनः कृपणा अतिवक्का बुद्धिलेशस्याप्यभावादिति भावः ४९

मधुभाष्य॥

दूरेणेति बुद्धियोगात् ज्ञानलक्षणादुपायात् दूरेणातीव अतो बुद्धौ शरणं ज्ञानेष्यति फलं कर्मकृतो देवयेषां ते फलहेतवः ज्ञानफलमाह ४९॥

म

गमचेद्हृसरस्वतीटीका

दूरेणेति ह्यवरं श्रेष्ठं मोक्षाख्यं फलं स्यात्त्ववरं चित्तशुद्ध्यादियज्ञादिनिकृष्टफल
त्वादेवावरत्वं फलगतं तस्यावरत्वस्य साधनेऽपचारादेवं विषयकर्मं बुद्धि
योगात्तत्त्वज्ञानसाधनभूतात् योगात्कर्मयोगाद्धियतो दूरेण निकृष्ट
मित्यर्थः तस्माद्बुद्धौ निमित्तभूतायां यच्छरणमवश्यमादेयं निष्पादित
दन्विच्छांगीकुरु तत्सदूरत्वमेवोपपादयति कृपणाः यथाहुः कृपणाः श्रुति
रीताणि या [illegible] अग्राह्यैतामकारइति साधवत्वात्तदूरे परिहरंति एवं तत्त्व
बुभुत्सवोपि फलहेतुत्कर्मविशेषात् दूरे परिहरंतीत्यर्थः अथवावरं
कर्म बुद्धिसाधनयोगाद्दूरेणोपकारकं तद्भिन्नफलदानद्वारा निष्पादितक
र्मसाधयतिसाधितं तच्चनित्यादिकर्म बुद्धिं साधयतीति यस्मात्तस्मात्ते फ
लहेतवस्त्रिवर्गादिभिरिष्टलाभसाधकाः पुरुषाः कृपणाः धनलुब्धा रवे ४९
त्यर्थः यथाकथंचिदपि साधितैर्नित्यादिभिर्बुद्धिसिद्धेरिति भावः तेदेना
वनामवेपेन निष्कामं कर्म कर्तव्यमिति उपदिश्य तस्य प्रयोजनं दर्श
यन्नुपसंहरति हरिः ४९ ॥ ४९ ॥

कृपणास्व

भाषाअनुवाद

जिननेकाम्यकर्महैं सबकोनिकृष्टकहेनकारेकहतेहै अवसायात्मि
काबुद्धिकेद्वारा कियेजोकर्मयोग उनकानामबुद्धियोग और बहुता
नेसाधनकाउपायहै निष्कामबुद्धियोगकीअपेक्षासब काम्यकर्मअत्य
न्तअपकृष्टजोकाम्यकर्मऐसानहुउहरातोहे धनंजयबुद्धिशब्दवाच्य
कहेतान जिसकोआश्रयकरि निष्कामकर्मयोगरूप भक्तियोगका
अनुष्टानकरो चिन्तनीयापालनकरनेवाले ईश्वरहीकोबुद्धिका
आश्रयकरो कर्मफलकेअभिलाषीजोनर सोकृपण औहीनहै
श्रुतिमेकहाहैकिहेगार्गिइसअक्षरस्वरूप ब्रह्मकोनजानि जोसं
सारसे लोकान्तरगामी होतेहैं वेइकृपण अर्थात निकृष्टहै इससे
बुद्धिकहेतान उसमेआश्रय लेउ ४९ ॥

दोहा

हेअर्जुनबहुहूरउरे बुद्धियोगसेकर्म बुद्धिपारणाकों
सकाम कृपणफलदेतधर्म ॥४९॥

323

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते तस्मा
द्योगाय युज्यस्व योगः कर्मसु कौशलं ॥ ५० ॥

शांकरभाष्यं

समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति त
च्छृणु बुद्धीति बुद्धियुक्तः समत्वकर्मविषयया बुद्ध्या युक्तो बुद्धियु
क्तः स जहाति परित्यजति इहास्मिन् लोके उभे सुकृतदुष्कृते पुण्य
पापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यतः तस्मात् समत्वबुद्धियोगाय
युज्यस्व घटस्व योगो हि कर्मसु कौशलं स्वधर्माख्येषु कर्मसु वर्त
मानस्य या सिद्ध्यसिद्ध्योः समत्वबुद्धिरीश्वरार्पितचेतस्तया तत् कौ
शलं कुशलभावस्तद्धि कौशलं यद्बन्धनस्वभावान्यपि कर्माणि
समत्वबुद्ध्या स्वभावात् निवर्तन्ते तस्मात् समत्वबुद्धियुक्तो भव त्वं ५०

आनन्दगिरिकृतटीका

पूर्वोक्तसमत्वबुद्धियुक्तस्य स्वधर्मानुष्ठाने प्रवृत्तस्य किं स्यादित्या
शंक्याह समत्वेति बुद्धियुक्तः स्वधर्माख्यं कर्मानुतिष्ठन्निति शेषः
बुद्धियोगस्य फलवत्त्वे फलितमाह तस्मादिति पूर्वार्धं व्याचष्टे
बुद्धीत्यादिना ननु समत्वबुद्धिमात्रात् पुण्यपापनिवृत्तिर्युक्ता पर
मार्थदर्शनवतस्तन्निवृत्तिप्रसिद्धेरिति तत्राह सत्त्वेति उत्तरार्धं व्या
चष्टे तस्मादिति स्वधर्ममनुतिष्ठतो यथोक्तयोगार्थं किमर्थं यत्नो यो
नीयमित्याशंक्याह योगो हीति तर्हि यथोक्तयोगसामर्थ्यादेव
दर्शितफलसिद्धेरनास्था स्वधर्मानुष्ठाने प्राप्तेत्याशंक्याह स्वधर्माख्ये
ष्विति ईश्वरार्पितचेतस्तया कर्मसु वर्तमानस्यानुष्ठाननिष्ठस्य या
यथोक्ता बुद्धिस्तत्तेषु कौशलमिति योजना कर्मणां बन्धस्वभावत्वात्
ननु तदनुष्ठाने बन्धावहः स्यादित्याशंक्य कौशलमेव विशदयति तद्धी
ति समत्वबुद्धेरेवं फलवत्त्वे स्थिते फलितमुपसंहरति तस्मादिति ५०

स्वामिकृतटीका

बुद्धियोगयुक्तं प्रशंसन्नाह बुद्धियुक्त इति सुकृतं स्वर्गादिप्रापकं दुः
ष्कृतं निरयप्रापकं ते उभे इहैव जन्मनि परमेश्वरप्रसादेन जहाति त्यजति

गी॰ टी॰ हि॰

तस्माद्योगाय तदर्थाय कर्मयोगाय युज्यस्व घटस्व यतो योगः कर्मसु कौशलं यद्बन्धकानामपि तेषामीश्वराराधनेन मोक्षपरत्वसंपादनं चातुर्यं स एव योगः ५० ॥

पिशाचभाष्यं

समत्वबुद्धियुक्तस्तु कर्म चानुतिष्ठन् फलं प्राप्नोति तेन बुद्धियुक्तः समत्वबुद्ध्या युक्तः जहातीह अस्मिंल्लोके उभे सुकृतदुष्कृते पुण्यपापे समत्वबुद्धिस्तानप्राप्तिद्वारेण तस्मात्समत्वबुद्धियोगाय युज्यस्व घटस्व योगः कर्मसु कौशलं स्वधर्माख्येषु कर्मसु वर्तमानस्य या सिद्ध्यसिद्ध्योः समत्वबुद्धिरीश्वरार्पितचेतस्तया तत् कौशलं यतो येन कौशलं परं स्वभावात्पापकर्माणि समत्वबुद्ध्या स्वभावान्निवर्तन्ते तेन समत्वबुद्धियुक्तो भवत ५० ॥

रामानुजभाष्यं

बुद्धियोगयुक्तः कर्म कुर्वाण उभे सुकृतदुष्कृते अनादिकालसंचिते अनन्ते बन्धहेतुभूते जहाति तस्मादुक्ताय बुद्धियोगाय युज्यस्व योगः कर्मसु कौशलं कर्मसु क्रियमाणेषु कौशलं तदेव युज्यत इति योगस्यार्थः ५० ॥ ५० ॥

अभिनवगुप्तटीका

उभे इति परस्परव्यभिचारं दर्शयति तस्मात् यथा हि सुकृतदुःखेन नश्यति तथा कारणमेव परमं कौशलमिति भावः ५० ॥

परमार्थप्रपाटीका

अथ ज्ञानेन सर्पणं सत्त्वाह बुद्धियुक्त इति बुद्धिर्विज्ञानं तेन युक्तो ज्ञानी पुरुषः स्वर्गप्रापकं तथा दुःकृतं मधमयोनिप्रापकं तेउभे जहाति त्यजति श्रुतिरपि पापमकरवमित्यतः कल्याणमकरवमिति भावयेन नेनस्यतः साधसाधुनी नैनं कृताकृते तपत इति तथा कल्याणमतः ज्ञानोत्पत्त्यनन्तरं नैनं दुःकृतमकरवमिति पापमकरवमकार्षमिति तपतः सुकृतं तपतः कालागिन्नगर्भः सुकृतमकरवमिति तेउभे साधसाधुनी सुकृतदुःकृते न तपतो नैनं तरति उभे ह्येवैष एते आत्मानं स्पृणुते तथा पापं तेन न जानिते पुण्यं कृतेनैवासकृतेनैवासाधुसाधुनी न तपतः नाकामतः तस्माद्धीतेजुह

नेः अनुष्ठितेऽननुष्ठितेफलदानायसमर्थत्वमेवतदर्थः त
स्मात्त्वंयोगायपरमेश्वराराधनायेयुज्यस्वघटस्व अथयोगस्यस्व
रूपमाह योगः कर्मसुकौशलं बंधजनकेषुकर्मसुअबंधजन
कत्वसंपादकत्वं [illegible] कौशलं ५० ॥

वनमालीटीका

एवंबुद्धियोगाभावेदोषमुक्त्वातद्गुणमाह बुद्धीति इहकर्मसु
बुद्धियुक्तःसमत्वबुद्धियुक्तोजहातित्यजतिउभेसुकृतदुष्कृतेपुण्यपा
पे सत्वशुद्धिज्ञानप्राप्तिद्वारेणयस्मादेवंतस्मात्त्वंबुद्धियोगाययुज्य
स्वउद्युक्तोभव यस्मादीदृशःसमत्वयोगोभगवदर्पितचेतसस्तदाराध
नैःकामकर्मसुप्रवर्तमानस्यकौशलंपटुत्वंहेतुत्वात्मापिकर्मणां
वेपनिहत्यैकंपरमात्मनोदाविर्भावरूपमोक्षपर्यवसायित्वं[illegible]तत्कौ
शलेऽनुभावःतदयिगमजन्तरसु[illegible]योरन्नेषविनाशोनइपदेशादि
नित्यत्वेन नयथापुष्करपलाशश्चापोनश्लिष्यंतेतेनपथैषीकातूलमग्नौप्रो
तंप्रदूयेततद्धीयंतेचास्यकर्मीणितस्मिन्दृष्टेपरावरइतिश्रुत्यावत्कर्मस्तु
तेप्रदूयेतसीयंतेचास्यकर्मीणितस्मिन्दृष्टेपरावरइतिश्रुत्याबद्धर्मर
पाविद्यायाभगवद्धानेननाशोबोध्यते नतुपुण्यंस्वर्गादिफलदंतस्य
नित्यत्वमभगवदाराधनरूपेनिःकामकर्मसु[illegible]सेतानादिफलेउक्तत
स्यसर्वस्यैवनाशोनिष्टत्वात् नतुदेहांतरारंभकयोरेवनाश आरंभ
कयोस्तुभोगादेवनाशः नाभुक्तंक्षीयतेकर्मकल्पकोटिशतैरपीति
श्रुतेंप्रारब्धाभिप्रायत्वादिति ५० ॥

अथसमवैजयंतीटीका

ननुबुद्धियुक्तस्यैवपुरुषस्यकिंफलंस्यादित्यपेक्षायामाह बुद्धियु
क्तइति यस्माद्बुद्धियोगयुक्तःसन्पुरुषःइहास्मिन्नेवजन्मनिउभेसु
कृतदुष्कृतेअनंतजन्मसंचितेऊर्ध्वगतिप्रापकेपुण्यपुण्येज
हातित्यजतितस्माद्धेतोस्त्वंयोगायनिष्कामकर्मयोगाययुज्यस्वयुक्तो
भवननुपुण्येनपापमपनुदतीतिश्रुतेःसुकृतेनदुष्कृतस्यैवना
शःस्यात्नतुकेनापिसुकृतस्यबुद्धियुक्तस्तूभेसुकृतदुष्कृतेज
हातीतिकथमुपपद्यतेइत्याशंकायामाह योगःकर्मसुकौशलमि

गी. टी. द्वि.

325

निर्योयंभगवत्परिचर्यारूपोयोगःकर्मयोगस्तदेवशुभाशुभमिश्रिते
षुकर्मसुमध्येयान्येवभगवत्त्वाप्तिप्रतिबंधकानिभवंतितेषांसर्वे
षामपिनाशेकौशलंकुशलत्वंचेतनस्यभावःकौशलंचानर्थमार्गतेस्त
योगाविघ्नविनाशेऽतिचतुरशिरोमणिर्भवतीत्यर्थः यद्वाकुशलंदे
मंतदेवकौशलंतेनरूपस्यार्थेऽपितेनरूपस्यभगवतःप्राप्तिसाधन
त्वेनास्यापितेनरूपत्वंभवतीत्यर्थः ५० ॥

मधुसूदनीटीका

एवंबुद्धियोगाभावेदोषमुक्त्वातद्भावेगुणमाह इहकर्मसुबुद्धियु
क्तःसमत्वबुद्ध्यायुक्तोजहातिपरित्यजतिउभेसुकृतदुष्कृतेपुण्य
पापेसत्वशुद्धिज्ञानप्राप्तिद्वारेण यस्मादेवंतस्मात्समत्वबुद्धियो
गायतत्फलायत्वंघटस्वोद्युक्तोभव यस्मादीदृशःसमत्वबुद्धियोगः ई
श्वरार्पितचेतसःकर्मसुप्रवर्तमानस्यकौशलंकुशलभावः यद्
बन्धहेतूनामपिकर्मणांतदभावोमोक्षपर्यवसायित्वंतन्महत्कौश
लं समत्वबुद्धियुक्तःकर्मयोगःकर्मात्मापिसन्दुष्टकर्मत्वंक
रोतीतिमहत्कुशलःतेनतत्कुशलोपायतःचेतनोपिसन्स्वजाती
यदुष्टत्वंनकरोतीतिव्यतिरेकोऽत्रध्वनितः अथवाइह समत्व
बुद्धियुक्तेकर्मणिकृतेसतिसत्वशुद्धिद्वारेणबुद्धियुक्तःपरमात्म
साक्षात्कारवान्सन्जहात्युभेसुकृतदुष्कृते तस्मात्समत्वबुद्धिय
फलायकर्मयोगाययुज्यस्व यस्मात्कर्मसुमध्येसमत्वबुद्धियु
क्तःकर्मयोगःकौशलंकुशलोदुष्टकर्मनिवारणचतुरः समर्थः ५

सदानंदीटीका

समत्वबुद्धियुक्तःसन्स्वधर्ममनुतिष्ठति पुमांस्तस्यफलंयस्मात
दुत्तरेणोच्यते समत्वप्रज्ञयायुक्तःसत्वशुद्ध्यात्मबोधतःजहा
तिपुण्यपापेद्वेसमूलेसफलेकृते २ जीवन्नेवपुमांश्चस्वस्थीभूतोभव
तिविविक्तवान् यस्मादेवंततःसाम्यबुद्धियोगायसर्वथा ३ उद्यु
क्तोभवयोगोसौवर्तमानस्यकर्मसु मोक्षपर्यवसायित्वादतिदक्षि
तोमतः ४ ॥ ५० ॥

नीलकंठीटीका

किंचबुद्धीति बुद्धियुक्तः समत्वयुक्तः योगाय समत्वबुद्धियोगाय
युज्यस्व घटस्व योगः सिद्ध्यसिद्ध्योः समत्वबुद्धिः कर्मसु बंधकेष्व
पि कौशलं बंधनिवर्तकत्वसंपादनं ननुबुद्धियुक्तः कर्मभिरुक्ते
सजन्न धर्मेणपापमपनुदतीति श्रुतिः सुकृतेन सजातीयत्वात्ते
ङेष्यरिहराभिनिकथमभेसुकृतदुष्कृते जहातीत्युच्यते सत्वशुद्धि
ज्ञानोत्पत्तिद्वारेतिशेषः सर्वोचस्तदुष्कृतत्यागमकरीत्यागम्यकरी
भुपैत्यफलत्यागात्सुकृतत्यागोपिकर्मयोगिनोभवति उक्तं
नफलवक्मोतप्रतिबंधकतत्फलस्यानुत्पादात् यत्तप्राप्तस्तं
वीकोसत्रहत्तानिदर्शनेन नांतरीयकं सुकृतफलमुक्तं नतत्फलत्वे
नोपपद्यते नांतरीयकत्वादेव तस्मात्फलद्वारामोक्षस्यप्रतिबंधके
क्रियमाणेपर्वसुकृतदुष्कृते कर्मयोगीजहातिसातीत्नसंवितेऽपिते
जहातीतितयोर्विशेषवद्यमाह ५० ॥

326

श्रानंदी टीका

बुद्धियुक्तः ज्ञानसमुच्चितकर्मकर्ता उभे सुकृतदुष्कृते जहाति
रागद्वेषाभ्यां विनाशहेतुत्वात्तयोः फलेन न संबध्यते तस्माद्योगा
य ज्ञानकर्मणोः समुच्चयाय युज्यस्व योगी भव योगः ज्ञानसमुच्च
य एव कर्मसु कौशलं कर्तुः प्रवीणता ५० ॥

+ अत एव विलक्षणमज्ञानिनः स्वरूपं प्रति पादयितुमाह +

रामकंठी टीका

+ इहात्मैव परमेश्वर एकं तत्त्वं सर्वं वस्तु मायया महिम्ना ज्ञेयभावा
पादनेन सर्वस्य कार्यजातस्यैकः कर्ता पारमार्थिकः विचित्रं च
इदं कार्यं निर्मिमाणः स्वेच्छामात्रं भवति किं न तस्योपादानमपेक्ष
तेनापि सहकारिणं न चेदमित्यमवभासमानमपि कार्यं विश्वा
त्मकस्वरूपत्वादतिरिक्तं विकारलेशं किंचिदर्पयितुं प्रभवति न
देवं विधनित्यनिरतिशयैश्वर्ययुक्तमेकं तत्त्वमात्मत्वेन निष्प्र
पंचं यथा प्रतिपत्त्यायः प्रत्यवमृशति स बुद्ध्या परमेश्वरबोधेन
सम्यग्ज्ञानेन युक्तः संबद्धः इहोच्यते स देवं विधः इहापि देहपा
तेन कर्मयोगाधिकृतः कुर्वन्नपि कर्माणीश्वरभावानुप्रवेशात्सर्वं
समत्वेन पश्यन्निदं स्वर्गादिसुखफलहेतुत्वात्सुकृतं सत्कर्मेदं
दुःखहेतुत्वात् दुष्कृतं दुष्कर्मेत्यनुत्पन्नविवेकज्ञानैकविध
महर्षिभिः परिकल्पितभेदे सुकृतदुष्कृते द्वे अपि जहाति त्यज
ति न तस्य योगिनः सर्वसमत्वसमाहितस्य क्रियमाणमपि क
र्म सुकृतदुष्कृतलक्षणं भेदं जनयतीत्यर्थः एवमनेन श्लोका
र्थेन तत्त्वज्ञानवान्नियतं कर्म कुर्यादेव न च तत्र पारमार्थिकं स
मत्वमुपदिष्टं भवति यत एवं तस्मात्त्वं योगाय स्वकर्मा
दसद्विकल्पमार्गापर्येटितस्पदिष्टं भवति ... युज्यस्व योगाय स्वकर्मा
कृततत्त्वज्ञानाभिनिविष्टः सन्समाधेयं युज्यस्व क्रियमाणेषु यत्कौशल
तृष्णानन्तरेण युक्तो भव यतः कर्मसु क्रियमाणेषु यत्कौशलं समाधिविहितानां
युक्तो ज्ञाननिष्ठत्वेन साधकारित्वं स एव योगः ५० ॥

... टीका

लासिकी ... ग्रन्थसम्बन्ध

[illegible] समाहितः ... कर्माणि कुर्वन्नपि बुद्धियुक्तत्वादीश्वरा
त्मबोधे समाहितः ... महिमानमाह बुद्धीति ईश्वरा
त्मबोधसमाहितस्य ... कर्मानुष्ठानमहिमानमाह सर्वयोगाय समाधानाय
भावानुप्रवेशादुभे उएपापे समग्रबुद्धत्वं योगाय समाधानाय

बुद्ध्या प्रत्यगात्मबोधे युक्तः समाहितः इह नित्यनिकर्माणि कुर्वन्नपि

त्यजति तदुक्तं कुलार्णवे तत्र निष्ठस्य कर्माणि
प्रयान्ति नैव लिम्पन्ति पुण्यपापानि संक्षयं ...
क्रियमाणानि बाधनेति तस्मात्

गी॰
टी॰
टि॰

स्वस्वरूपसमत्वमर्थरूपाययुज्यस्वघटस्वकर्मानुष्ठानद्वारेण युक्तोभव यतः कर्मसुक्रियमाणेषु कौशलं बाधनिष्ठत्वं योगः नान्यः केवलं निरोधलक्षणः ५० ॥

पंचोलीटीका

समत्वबुद्धियुक्तः सन्स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तदाह बुद्धियुक्त इति बुद्धियुक्तः समत्वविषयया बुद्ध्या युक्तः इहास्मिँल्लोके उभे सुकृतदुःकृते पुण्यपापे जहाति परित्यजति तस्मात् योगाय समत्वबुद्धियोगाय युज्यस्व घटस्व योगः समत्वबुद्धिः कर्मसु कौशलं बंधकमपि कर्म समत्वबुद्धियुक्तं विमुक्तिहेतुरिति ५०

रामवीरसमिहोधिनी॥

बुद्धियुक्त इति एवं च मदर्पितया पूर्वोक्तलक्षणया बुद्ध्या युक्तस्य पुण्यपापसंबंधो नास्तीति ततो हेतोर्योगाय स्वोचितकर्मविधयकोपालम्भयोगरूपेण तदर्थं युज्यस्व सन्नद्धो भवेति ५०

मधुभाष्य॥

बुद्धियुक्त इति सुकृतमप्यप्रियं मानुष्यादिफलं जहाति नह्यस्फलमुपासनादिनिमित्तं न तदा सकर्म क्षीयते अविदित्वास्मिन्नयं लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवतीत्यादि श्रुतिभ्यः अतः कर्मन्नयश्रुतिरस्तानि कि या सर्वत्र अभयत्नयश्रुतिरनिष्टविषया नहीष्टपुण्यं च विषया स प्रयोजनं न वेष्टनाप्नोत्तानि नोयुक्तः इष्टाश्च के विहित मस्ति यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां कामभिर्वा यानेवो अस्माद्वा आत्मनो यद्यत्कामयते तत्तत्सृजते बहु भिकामहरण्यन्तु मं वदन् सपकयाभवतीत्यादि श्रुतिभ्यः

र्मत्वेन विरोधः अत्र भ
वेध्यात्मस्वरूपस्य तु न दृष्टत्वाकर्मत्वेन विरोधः अत्र भ
शक्तिश्चेच्छन्नप्रमास्य तु तेषु नच शरीरपातनात्स्ववैमत
सतत्र पर्येति एतमानंदमयमात्मानमुपसंक्रम्येत्यादु
नरस्य श्रवणात् नचैकीभूत एव ब्रह्मणात् अत्रस्य हि प
भेदाने किन्तु दुःखतरं भवेदित्यादिनिंदनान्मोक्षधर्मे परि
द्वये पृथग्भोगाभिधानाच्च सूकादीनां पृथक्पृथक्त्वे जगा
व्यापारवर्ज्यमित्याद्यैश्वर्यमर्यादोक्तेश्च अदृष्टानमुपाधि
स्यममसाम्यमागताइति च उपाधिनाशेनापायप्रतिवि
वस्य नचैकीभूतस्य पृथग्ज्ञानेमानंपश्यामः आसदुःखीना
समिति ज्ञानविधावैषम्यस्य अनेन रूपेणेति च भेदाभावा
त नच प्रति बिंबस्याबिंबैकलोके पश्यामः उपाधिनाशे
मानेवा ममास्याहि परेज्ञान इति दुःखात्मकशोकेः यावद्
स्वभावित्वादित्युपाधिनित्यत्वाभिधानाच्च अतोन्यथैववर्तं
प्रतीयमानमप्यौपचारिकं दृष्टञ्चतेभगवतोभिन्नान्
देहेन प्रतिपन्नत्वंवासपकथेत्यादिषु भेदेनप्रतीयते विरो
धेनयुक्तिमतामेवबलवत्वं युक्तयश्चाशोक्ताः अत्रस्यही
स्यादयः अतोजलेजलैकीभावववदेकीभावः अंकं च यथो
दकमुद्धृतमुद्धृतं यथानयइत्यादौ तथाप्यन्योन्यात्मकेसृष्ट
समभवः अस्ति चैवं तस्मद्देपिहारि मद्भावान्यथादृष्टिः ता
पवायोर्दृष्टोतस्य सन्दृष्टिः प्रांसितव्रतइति मद्भावोममसम
र्णानांभेदज्ञानाच्च नचैतत्सावंत्येतप्रसंगनाना दयः तथा
पतेपदं दिवे कल्प्यमितिनिषेधायवनाच्छदीये सविचारश्रुति
र्णयः कृतोमोक्षधर्मेषु बलवाश्च सविचारोनिर्णयोवाक्य
माजात् अतोयत्रनान्यत्पश्यतीत्याद्यपितदधीनसत्तादिवा
वि अन्यथाकथमैषार्यादिःस्यात् नवतन्मयामयमित्युक्त
म अन्यथाकथंतत्रैवसपकथेत्यादिषु स्यात् नचनरदेवेशादीः

त्मा स्येत्यादिविशेषः कैवल्यप्राप्त्या तच्छरीरत्यागं अभौतिका
नि चित्तानि नित्यो पार्थिवनिर्मितानीश्वरसात्त्विकत्यात् तथा वो
के शरीरं जायते तेषां बोद्धव्याः कल्पयेवत इति नारायणस्य
मकल्पे वदंति च लौकिके हि कैवल्ये अभावपादे अप्रष्ठ
मनानेकेश्वरः एवास इत्यादिषु निरुक्तस्य भावाच्चनता
निषाशरीराणि तथादिश्रुतिः अशरीरेतच्छरीरमभवदिति
न हि तानि विषयीस्युर्विभवंति सर्गेपि नोपजायंते प्रलयेन व्य
थंति चेति वचनात् प्रयोगाच्च अतिन्द्रियार्थ नादनायत्रनिष
दानुपायिनः देहेंद्रियाद्वीनानां वैकुंठपुरवासिनामित्या
दिरुष्ट देहेष्वेव नैषधान्यायोगीमुक्तिः बहुनात्र किमुक्तेन
यावच्छेतेन न गच्छति योगी तावन्न मुक्तः स्यादेष शास्त्रस्य नि
र्णयः इत्यादिस्मरणात् तदन्यमुक्तिनिषेधात् येत्वेवम
गवंतं प्रविशंतितेपि पश्यंते वयांति योग्यत्वं चात्र विव
क्षितं युधिष्ठिर प्रश्न उत्तर निर्दनाच्च सायुज्यं च यदवन् त
उक्तेश्च भुंजते पुरुषं प्राप्य यथादेवस्तथादयः तथा मुक्ता
नुसमायांतामासान्योगान्सुभुंजत इति नारायणश्रुतेः कल्प
ल्पे अतोनिष्टस्येव वियोगः सोस्येव सर्वात्मना अन्त्यो
म वैकुंठः एव विवर्जिताः अशोकमहिमा तत्र पश्यगावानप्र
वर्तीत्यादिश्रुतिभ्यः विशेषवचनाभावाच्च येषां त्वीषद्दु
पयतेते न सायुज्यं प्राप्ताः सामीप्याद्ये वतेषां अतः प्रारब्ध
कर्मशेषभावात् तदूर्ध्वं कासायुज्यं गच्छति तथोक्तं सकलम
दयः स्वाधिकारादनंतरं प्रविशंति परं देवं विष्णुनाश्रय
णाय इति व्यासयोगे अतो निष्टस्य सर्वात्मनाविप्रयोगः स्मि
अस्मत्स्वभिच्छामि परब्रह्मन्तनादेनेत्यादिना अस्मा दिवि
तस्मिन्सायितनयात् नमो नमस्ते किं विद्यथ कैवास्य अत्र दिव
स्तेनैव सर्वमानेदवा अतो नीणचारं महादित्यादेवपु श्रुत्याम
दादप्यधिकतमस्वरूपं च मोक्ष इति सिद्धं अतो योगा
नोपायायवत् हि...कोपकल्पनं गउपादसमाद ५०॥

बुद्धियुक्त इति बुद्धेस्तत्त्वज्ञानस्य साधनत्वेन संबंधियद्युक्तं योगः तद्युक्तस्मि
न्निति बुद्धियुक्तः पुमान् यतः इह मानुष्यप्रदेहे उभे सुकृते विधाद्यमा तदुष्कृ
पवें कर्ममात्रं कर्मयोगोद्भवपापुण्या जहाति तस्माद्योगाय कर्मयोगाय
कर्मयोगं कर्तुं युज्यस्व घटस्व समर्थः अंततोऽर्जुनं निंदन् कर्मयोगं स्तौति यो
गइति कर्मसु मध्ये योगो यः सर्वोत्तमं कुशलमिति भेदेन कर्म धर्मिभा
त्वेन किंवक्तव्यं कौशलमेव योगः यः कर्मात्मैव सन् दुष्टकर्मत्वयं करोति
त्वन चेतनाः सन् सज्ञानीयदुष्टनिग्रहे शोकमोहादिभाग्भवसीति
सुपमाभिसंधिः तत् किं बुद्धिद्वारा सर्वकर्मनाशमात्रमेव कर्मयोग
स्यफलेन त्याग सति सर्वस्वहानिरापन्ने त्याशंकामपनुदन्नजि
तात्तिनं निःश्रेयसउपयोगितां तस्य दर्शयति देवकीनंदनः ५०॥

भाषाअर्थवार

सर्वलोकहाकि सुखदुःख आदिमे समान बुद्धि होकर स्वधर्मको करैतो बुद्धियोगयुक्त होनेसे क्या होताहै सोई बुद्धियोगकी श्रेष्ठताकर तेहैं कि सुकृतजो पुण्य स्वर्गआदिका देनहार औरदुःकृतजो पापनर कका सम्प्राप्तिकरनेकासाधन इनदोनोंको बुद्धियोगयुक्त पुरुष इसी ज न्ममे भगवान् की कृपासे परित्यागकरतेहैं तिससे अर्जुनतुम बु द्धियोगरूप निष्कामकर्मकरो जिससेयोग कर्मकेबीचमे कौशल कहे चातुर्यहै अर्थात् सकलकर्मबन्धनहोनेके कारणहै तौभी ई श्वरकीआराधनासेमुक्तिप्राप्तिकरना चातुर्यहै इसीकोयोगकहते सोबुद्धियोगयुक्तहोउ ५० ॥ ५० ॥

दोहा ॥

बुद्धिवानत्यागतजनदे सुभअसुभ दृढ़लोप तातेयोगमे युक्तह्वै योगदिकुशल कर्ममेदोप ५० ॥

33°

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्म
बन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ५१ ॥

शांकरभाष्यं

यस्मात्कर्मजमिति कर्मजं फलं त्यक्त्वेति व्यवहितेन सम्बन्धः इ
ष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं बुद्धियुक्ताः समत्वबु
द्धियुक्ताः सन्तो हि यस्मात् फलं त्यक्त्वा परित्यज्य मनीषिणो ज्ञानि
नो भूत्वा जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धो जन्मबन्धस्तेन विनि
र्मुक्ताः जीवन्त एव जन्मबन्धात् विनिर्मुक्ताः सन्तः पदं परमं विष्णो
र्मोक्षाख्यं गच्छन्त्यनामयं सर्वोपद्रवरहितमित्यर्थः अथवा बुद्धियो
गाद्धनंजयेत्यारभ्य परमार्थदर्शनलक्षणैव सर्वतःसंप्लुतोदक
स्थानीया कर्मयोगजा सत्त्वशुद्धिर्दर्शिता साक्षात् सुकृतदुष्कृत
प्रहाणादिहेतुत्वश्रवणात् ५१ ॥

आनन्दगिरिकृतटीका

समत्वबुद्धियुक्तस्य सुकृतदुष्कृततत्फलपरित्यागेऽपि कथं मो
क्षः स्यादित्याशंक्याह यस्मादिति समत्वबुद्ध्या यस्मात्कर्माण्यनुष्ठी
यमानानि दुरितादि त्याजयन्ति तस्मात्परम्परयासौ मुक्तिहेतुरित्य
र्थः मनीषिणो हि ज्ञानातिशयवन्तो बुद्धियुक्ताः सन्तः स्वधर्माख्ये
कर्मणि निष्ठावन्तस्ततो जातं फलं देहप्रदं तेहित्वा जन्मलक्षणाद्ब
न्धाद्विनिर्मुक्ता वैष्णवं पदं सर्वसंसारसंस्पर्शशून्यं प्राप्नुवन्तीति श्लो
कोक्तमर्थं श्लोकयोजनया दर्शयति कर्मजमित्यादिना इष्टो देहो
देवादिलक्षणोऽनिष्टो देहस्तिर्यगादिलक्षणस्तत्प्राप्तिरेव कर्मणो
जातं फलं तद्यथोक्तबुद्धियुक्ता ज्ञानिनो भूत्वा तद्बलादेव परित्यज्य
बन्धविनिर्मुक्तिपूर्वकं जीवन्मुक्ताः सन्तो विदेहकैवल्यभाजो भवन्ती
त्यर्थः बुद्धियोगादित्यादौ बुद्धिशब्दस्य समत्वबुद्धिरर्थो व्याख्यातः
सम्प्रति परम्परां परिहृत्य सुकृतदुष्कृतप्रहाणहेतुत्वस्य समत्वबु
द्धावसिद्धेः बुद्धिशब्दस्य योग्यमर्थान्तरं कथयति अथवेति श्रुतबुद्धि
ब्रह्मगोचरत्वेनानवच्छिन्नत्वं तस्याः सूचयन् बुद्ध्यन्तराद्विशेषं दर्शय

[गी.] [गी.] [हि.]

तिसर्वेन इति अस्माधारणं निमित्तं तस्मान्निर्दिशति कर्मेति यथोक्त
बुद्धिशाह्यार्थेन देवमाह साक्षादिति जन्मबन्धविनिर्मोकादिरपदि
शाह्यार्थः ५१ ॥ ५१ ॥

स्वामिकृतटीका

कर्मणां मोक्षसाधनप्रकारमाह कर्मजमिति कर्मजं फलं त्यक्त्वा केव
लमीश्वराराधनार्थं कर्म कुर्वाणा मनीषिणो ज्ञानिनो भूत्वा जन्म
रूपेण बन्धेन विनिर्मुक्ताः सन्तः अनामयं सर्वोपद्रवरहितं वि
ष्णोः पदं मोक्षाख्यं गच्छन्तीति ५१ ॥

पिशाचभाष्यं

इतश्च फलसंगं त्यक्त्वा स्वधर्मे बुद्धियुक्तान् स्थापयितुं सुखदुःखप्राप्तिन
[कर्मफलं] तेनांत्यक्त्वा बुद्धियुक्ताः ज्ञानिनः मनीषिणो मननशीलाः जन्म
नो बंधो जन्मबंधः तेन विनिर्मुक्ताः जीवंत एव जन्मबंधनिमित्ता [ज्ञाती]
नामेतः पदं वैष्णवं मोक्षाख्यं गच्छन्त्यनामयं सर्वोपद्रवरहितमि
त्यर्थः ॥ ५१ ॥ ५१ ॥

रामानुजभाष्यं

बुद्धियुक्ताः कर्मजं फलं त्यक्त्वा जन्मबंधविनिर्मुक्ताः अनामयं
पदं गच्छन्ति हि प्रसिद्धमेतत्सर्वासु उपनिषत्स्वित्यर्थः ५१ ॥

अभिनवगुप्तटीका

योगबुद्धियुक्ताः कर्मणां फलं त्यक्त्वा जन्मबंधं त्यजंति ब्रह्मसत्ता
मवाप्नुवंति ५१ ॥ ५१ ॥

परमार्थप्रपाटीका

अथ कौशलेन कृतानां कर्मणां मोक्षसाधनत्वमाह कर्मजमिति
व्यवसायात्मिकबुद्धियुक्ता मनीषिणो ज्ञानिनः कर्मजं फलं
[त्यक्त्वा] सक्षात्तरणावदगणं अनामयं सर्वोपद्रवरहितं पदं गच्छंति किं
भूताः जन्मबंधविनिर्मुक्ताः कर्मजफले हि युक्तः जन्मबंधरू
रूपेण तस्मादिशेषेण निर्मुक्ताः ५१ ॥

वनमालीटीका

उक्तं माहात्म्यं फलकर्मकृतस्य च त्यागात्महाफलप्राप्तिर्भव
[त्या]

नीत्याह कर्मजमिति समत्वबुद्धियुक्ताः कर्मजं फलं स्वर्गादिकं त्य
क्त्वा स्वर्गादिकामनां विहाय विहितं कर्म कृत्वा परमेश्वराय स
मर्प्य बुद्धियुक्ताः शास्त्रजन्यपरेशपरोक्षज्ञानिनो भूत्वा तत्तद्द्वारा
मनीषिणोऽपरोक्षज्ञानिनो भूत्वा जन्मादिरूपबंधात् संसारात्
नितरां निर्मुक्ताः सन्तः अनामयं पदं श्रीवैकुंठाख्यं अभिव्यक्तपूर्णा
नंदस्वरूपं वा श्रीहरिलोकविशेषं विग्रहविशेषेण स्थितं त्रयमध्य
नामयम् अनश्वरं गच्छन्तीति बहुवचनेन मुक्तो भेदो न भवति नालो
कविशेषप्रतिगमनेनेति सिद्धं ५१ ॥

ऊसमवैजयंतीटीका

ननु सर्वेषामपि सुकृते नैव सुखं भवति तस्य त्यागादपरस्तदधिकः
को वा लाभो भविष्यतीत्यपेक्षायामाह कर्मजमिति मनीषिणः निष्का
मश्रीहरिं भजन्ते नैव सर्वभवबंधनिवृत्तिर्भवति नान्येनोपायेनेति मे
वंरूपा व्यवसायात्मिका मनीषा बुद्धिर्विद्यते येषां ते तथा अत एव
बुद्धियुक्ताः सिद्ध्यसिद्ध्योः समत्वबुद्धिविशिष्टाः जन्मबंधविनिर्मुक्ताः
तेनः जन्म स्थूलदेहस्य प्राप्तिर्बंधो लिंगदेहस्य च ताभ्यां विशेषेण निर्मु
क्ताः स्वतः कर्मजं सुकृतकर्मोद्भवमपि सुखभोगादिरूपं फलं त्यक्त्वा
इहामुत्र च सुखादेः तुच्छत्वनिश्चयेन तत्परित्यज्य अनामयं आम
यो जन्ममरणादिरूपो रोगस्तद्रहितं पदं वैकुंठं मम स्थानं गच्छंति य
त्र गत्वा चतुर्मुखादिलोकसुखमपि निरय निरयत्वं मत्वाः तत्राप्यपारा
नंदाकूपारे मग्नाः सन्तो मद्भक्ताः पुनः सांसारिकानि दुःखसुखं नानु
भवंतीत्यभिप्रायः ५१ ॥

मधुसूदनीटीका

ननु दुष्कृतहानमपेक्षितं न तु सुकृतहानं पुरुषार्थभ्रंशापत्तेरित्याशंक्य
तत्फलत्यागे परमपुरुषार्थफलमाह समत्वबुद्धियुक्ता हि यस्मा
त्कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थं कर्माणि कुर्वाणाः सत्वशु
द्धिद्वारेण मनीषिणस्तत्त्वमस्यादिवाक्यजन्यमनीषावंतो भवंति
नाहशाश्च संतो जन्मात्मकेन बंधेन विनिर्मुक्ताः विशेषेण त्वेति कल
लतमो निरवशेषमुक्ताः पदं पदनीयमात्मतत्त्वमानंदरूपं अनास्र

गी॰
टी॰
हि॰

नामयं सर्वविघातकार्योत्मकरोगरहितमभयं मोक्षाख्यं पुरुषार्थं ग
च्छन्त्यभेदेन प्राप्नुवंतीत्यर्थः यस्मादेवं फलकामनां त्यक्त्वा समत्वबु
द्ध्या कर्मानुष्ठानेन तिष्ठतस्ते: कृतांतःकरणशुद्धयस्ततस्तस्मादिवा
कप्रमाणेन त्वयात्मतत्त्वज्ञानेन तत्कार्यात् सेनतः सकलानर्थनिवृत्ति
परमानंदप्राप्तिरूपं मोक्षाख्यं विष्णोः परमं पदं गच्छेति तस्मात्त्वम
पि यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे इत्युक्तेः श्रेयोनिश्चित्त्यासर्वेवं विधंक
र्मयोगमनुतिष्ठेति भगवतोभिप्रायः ५१ ॥

सदानंदीटीका

ननु सर्वस्य समत्वपापहानमपेक्षितं पुण्यहानं तु कस्यापि पुरुषार्थ
त्वयोरन्यथा १ मैवं जन्मपदं पुण्यं हेयत्वेन विवक्षितं तत्र धीशोधकं
पुण्यं भगवतोरीश्वरार्पितं २ तत्फलहानं संसिद्धौ कर्ममात्रं वितन्वति
यतः समत्वधीयुक्ताः संन्यस्य कर्मजं फलं ३ ईश्वराराधनार्थं वकुर्वी
णाः कर्म केवलं धीशुद्धिद्वारतो वेदवाक्यजन्यात्मधीयुतः ४ संतो
जन्मारब्धबंधेन विनिर्मुक्ता अशेषतः आत्मतत्त्वपदं ब्रह्मानंदं मायावि
वर्जितं ५ पुरुषार्थं विमोक्षाख्यं प्राप्नुवंतीह तादृशाः त्वमप्ये
तादृशो भूत्वा गच्छ विष्णोः परं पदं ६ ॥ ५१ ॥

नीलकंठीटीका

एतदेवाह कर्मजमिति बुद्धियुक्ताः समत्वबुद्धियुक्ताः क्रियमा
णकर्मजं फलं त्यक्त्वा मनीषिणो मनोनिग्रहसमर्था भूत्वा जन्म
रूपेन मुक्ताः संतोऽनामयं निरुपद्रवं पदं मोक्षाख्यं गच्छंति ५१ ॥

बंधेन

धानंदीटीका

मनीषिणो बुद्धियुक्ता ज्ञानसमुच्चितकर्मकर्तारः कर्मजं फलं त्य
क्त्वा तत्पूर्वकर्मणा बन्धकत्वाभावात् कर्मबंधादिदं शरीरं कृताना
नां कर्मणां फलभोगार्थं भाविनः शरीरस्य ग्रहणं तत्प्राप्तिकताना
फलभोगार्थं परस्य ग्रहणमितीत्यंशुविलाहपाबंधः संसारल
स्मादिविनिर्मुक्ताः सन्तो नामयं पदं गच्छन्ति ५१ ॥

+ एतमेवार्थहेतूपन्यासपूर्वं विपरीततमा
+
+

रामकंठीटीका

यस्मात्कर्मजं मतत्त्वज्ञैः क्रियमाणात्कर्मणेव पूर्वं भाविविलक्षणं दुःख
दात्मकं फलं सर्वदा सर्वतो निरभिकांक्षस्मात्मनिष्ठत्वात्

भिसंधानेन त्यक्त्वा विहाय फलाभिसंध्युत्सृज्यमानकर्मप्रति
बद्धा जन्मनः पुनर्भवलक्षणाद्बन्धनाद्विमुक्ताः सन्तो
निर्विघ्नतया नामयमनित्यत्वादिसंकल्पदोषरहितं पदं
पारमार्थिकस्वरूपप्रतिष्ठात्मकं धाम गच्छन्ति प्राप्नुवन्ति यतः
त्वं बुद्धियुक्तो योगाय युज्यस्वेति पूर्वेण संबन्धः [illegible]

[illegible]

॥ ५१ ॥

लासकी [illegible] टीका

एनमेवार्थं [illegible] रूपन्यासपूर्वं विवरीतुमाह कर्मजमिति हि
बाधात्मकं फलं प्राप्तं निष्ठतया त्यक्त्वा निरभिलाषत्वात् निर
भिलाषबुद्धियुक्ता बुद्धावात्मबोधयुक्ताः प्रवहिताः सन्तः मो
क्षाख्यं प्राप्नुवन्ति सर्वोपद्रवशून्यं प्रविधानत्कार्यात्मकरोगरहि
तं पदं प्राप्नुवन्ति ... इति पूर्वेण संबन्धः ॥ ५१ ॥ यदा कर्मयोग
ने यतस्त्वं बुद्धियुक्तो योगाय युज्यस्वेति पूर्वेण संबन्धः
इति [illegible]स्वामीत्यपेक्षायामाह ॥

पंचोलीटीका

कर्मणां मोक्षसाधनत्वप्रकारमाह कर्मेति हि यस्मात् बुद्धियुक्ता
समत्वबुद्धियुक्ताः कर्मजं कर्मभ्यो जातं इष्टानिष्टमिश्रलक्षणं फ
लं त्यक्त्वा मनीषिणो ज्ञानिनो भूत्वा जीवत एव जन्मबंधविनिर्मु
क्ताः सन्तः अनामयं सर्वोपद्रवरहितं मोक्षाख्यं पदं विष्णोः परमं
पदं गच्छन्ति ॥ ५१ ॥

रामवीरसमिश्रोयनी ॥

कर्मजमिति कर्म स्वस्ववर्णाश्रमाचारोचितं तत्र तत्र स्वयुद्धादिकं
हिंसाप्रायत्वान्नरकादिफलकं यद्यप्याभासते तथापि बुद्धियुक्ता
मनीषिणः ईश्वराज्ञैषा अवश्यं कर्तव्येति निष्कामपरा मनीषवान्तद
त्रस्थाने हृदयीकृतनिश्चयास्तत्फलं त्यक्त्वा अनामयं पदं दुःखहीनं स्वर्गा
दिकं स्थानं गच्छन्तीति भावः ॥ ५१ ॥

मधुभाष्य ॥
कर्मजमिति कर्मजं फलं त्यक्त्वा कामनयेश्वरार्पणसमर्थबुद्धि
युक्ताः सम्यक्ज्ञानिनो भूत्वा पदं गच्छंति सर्पोगकर्मज्ञानसा
धनं तन्मोक्षसाधनमिति भावः किंपर्यंतमेवमवश्यं कर्तव्या
नि श्रवणादीन्येव कर्माणीत्यत आह ५१ ॥

कर्मजमिति बुद्धियुक्ताः पदं गच्छंतीत्यन्वयः बुद्धियुक्ता इति पूर्ववत्
पदमिति पद्यते प्राप्यतेऽनेन तत्त्वमस्यादिवाक्योत्थेनेतः करणपरि
णामेनेति पदमानंदरूपं ब्रह्म गच्छंति तादात्म्येन प्राप्नुवंतीत्यर्थः
न केवलं तदानंदरूपत्वादिष्टं किं त्वनिष्टपरिहारात्मकमपीत्या
हानामयमिति आमयः सविलासाविद्या तदभावात्मकमित्यर्थः
ननु किं योगमात्र[illegible]साध्यकापवर्ग[illegible]ति नेत्याह मनीषिण इ
ति योगजन्मप्रशस्तज्ञानसंपन्ना इत्यर्थः ननु सत्यपि संसारे किं सा
नेपदं सांपदं नेत्याह जन्मेति जन्मैव बंधस्तेन विशेषेणात्यंतिक
त्वलक्षणेन निर्मुक्ता इत्यर्थः ननु काम्यकर्मानुष्ठानाद्भावो बंधो भ
विष्यतीत्याशंक्योक्तं कर्मजं फलं त्यक्त्वेति पूर्वमेव न सम्यक्त्वा
दित्यर्थः एवं च काम्यकर्म त्यक्त्वा कर्मयोगमनुतिष्ठंतस्तेन कृतांतः
[illegible]रणशुद्धयस्तत्त्वमस्यादिप्रमाणोत्थैक्यात्मज्ञानविदग्धसं
विलासाविद्यामोक्षं पुरुषार्थं गच्छंत्यतस्त्वमेवंविधं कर्मयोगमनुति
ष्ठेति भगवतोऽभिसंधिः ननु कर्मयोगमनुतिष्ठतो मे कियता
वा समये न सत्त्वशुद्धिः स्यादित्याशंक्य नात्र समयनियमः स
त्त्वशुद्धेस्तु मतः सात्त्विकत्वात्प्रश्नोऽपीत्या[illegible]शयेत्याह [illegible]

भाषाअनुवाद

सुखदुःखआदिमेंसमतायुक्तभी भये औरसुकृतदुःकृत कर्मके फलको परित्यागकियोभी अर्थात्निःकामकर्मकियेसेभीफेरिमो तकैसे होगो इसशंकापरकर्मको मोक्षकी साधनताहैयहकर नेकिकर्मकेफलकी अभिलाषा छोडिकरि केवलईश्वराराधना र्थे कर्मकरतेहुये बुद्धिमानमनुष्यज्ञानीहोके जन्मरूपबन्धनसे छू टिकरि सकलउपद्रवसेरहितजो विष्णुपद जिसकोमोक्षकहतेति सकोसहजमेंपावतेहैं ५१॥

दोहा

कर्मजको फलत्यागके बुद्धियुक्त मुनिलोक जन्मबंध कु
टिजातहै जिहपद दुख न शोक ५१

335

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति त॰
दा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५२

श्रीशंकरभाष्यटी॰

योगानुष्ठानजनितसत्त्वशुद्धिजा बुद्धिः कदा प्राप्स्यत इत्युच्य॰
ते यदेति यदा यस्मिन्काले ते तव मोहकलिलं मोहात्मक॰
मविवेकरूपं कालुष्यं येनात्मानात्मविवेकबोधं कलुषीकृ॰
त्य विषयं प्रत्यन्तःकरणं प्रवर्तते तत्ते तव बुद्धिर्व्यतितरिष्य॰
ति व्यतिक्रमिष्यति प्रतिशुद्धभावमापत्स्यत इत्यर्थः तदा ।
तस्मिन्काले गन्तासि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुत
स्य च तदा श्रोतव्यं श्रुतं च ते निष्फलं प्रतिपद्यत इत्यभिप्रा
यः ५२ ॥

आनंदगिरिकृतटीका

यस्मिन्कर्मणि क्रियमाणे परमार्थलक्षणा बुद्धिरुद्देश्यतया बु॰
ध्यते तस्मात्कर्मणः सकाशादितरत्कर्म तथाविधोद्देश्यभूत
बुद्धिसंबन्धविधुरमतिशयेन निकृष्यते ततश्च परमार्थबुद्धि
मुद्देश्यत्वेनाश्रित्य कर्मानुष्ठातव्यं परिच्छिन्नफलानन्तरबुद्धि
रूप तदनुष्ठाने कार्पण्यप्रसंगात् किंच परमार्थबुद्धिमुद्देश्य
माश्रित्य कर्मानुतिष्ठतः करणशुद्धिद्वारा परमार्थदर्शनसि
द्धौ जीवत्येव देहे सुकृतादि हित्वा मोक्षमधिगच्छति तथा
च परमार्थदर्शनलक्षणयोगार्थं मनो मारयितव्यं योगश
ब्दितं परमार्थदर्शनमुद्देश्यतया कर्मस्वनुतिष्ठतो नैपुण
मिष्यते यदि च परमार्थदर्शनमुद्दिश्य तद्युक्ताः संतः समारं॰
भेरन् कर्माणि तदा तदनुष्ठानजनितबुद्धिशुद्ध्या ज्ञानिनो
भूत्वा कर्मजं फलं परित्यज्य जन्मबन्धविनिर्मुक्ता मुक्तिभाजो भव
न्तीत्येवमस्मिन्पद्ये श्लोकत्रयाक्षराणि व्याख्यातव्यानि यथो
क्तबुद्धिप्राप्तिकालं प्रश्नपूर्वकं प्रकटयति योगेति श्रुतं श्रो॰

तमेवाह ॥ इहैवेत्यादौ फलाभिलाषप्रतिबन्धात्प्रोक्ता बुद्धि
रुदेष्यतीत्याशंक्याह यदेति विवेकपरिपाकावस्था कालशब्दे
नोच्यते कालस्य दोषपर्यवसायित्वं दर्शयन् विशिनष्टि ये
नेति तदनन्तरूप कालद्वयं तवेत्यन्वयार्थं पुनर्वचनं बुद्धिशु
द्धिफलस्य विवेकस्य प्राप्त्या वैराग्यप्राप्तिं दर्शयति तदेति श्र
व्यान्यशास्त्रातिरिक्तं शास्त्रं श्रोतव्यादिशब्देन गृह्यते उक्तं वैरा
ग्यमेव स्फारयति श्रोतव्यमिति यथोक्तविवेकसिद्धौ सर्व
स्मिन्नात्मविषये नैष्फल्यं प्रतिभातीत्यर्थः ५२ ॥

स्वामिकृत टी॰

कदा तत्पदमहं प्राप्स्यामीत्यपेक्षायामाह यदेति द्वाभ्यां मोहो
देहादिष्वात्मबुद्धिस्तदेव कलिलं गहनं विदुरित्यभिधानात्तत
श्चायमर्थः यदा परमेश्वराराधनेन क्रियमाणेन यदा तत्प्रसादेन त
व बुद्धिर्देहादिमानलक्षणं मोहमयं गहनं दुर्गं विशेषेणाति
तरिष्यति तदा श्रोतव्यस्य श्रुतस्य चार्थस्य निर्वेदं वैराग्यं गंतासि
प्राप्स्यसि तयोरनुपादेयत्वेन जिज्ञासां न करिष्यसीत्यर्थः

पिशाचभाष्यम् टी॰

योगानुष्ठानजनितसत्त्वशुद्धिः कदा प्राप्यत इत्यत्राह यदेति
यदा यस्मिन्काले ते तव मोहकलिलं मोहात्मकमविवेकक
लुषं तेनात्मानात्माविवेककलुषीकृतविषयात्मतयांतःक
णं प्रवर्तते तदा बुद्धिर्व्यतितरिष्यति शुद्धभावमापद्यत इत्य
र्थः ५२ ॥

रामानुजभाष्यं टी॰

उक्तप्रकारेण कर्मणि वर्तमानस्य तया वृत्त्या निर्द्धूतकल्मष
स्य तव बुद्धिः यदा मोहकलिलं प्रत्यल्पफलसंगहेतुभूतं मोह
रूपं कलुषं व्यतितरिष्यति तदा श्रोतेस्य तत्स्वत्वस्य तस्याज्ञ
त्वस्य फलादेरितः पश्चाक्क्रान्तस्य च कृतस्य स्वयमेव निर्वेदं गं

तासिगामिष्यसि ५२ ॥

अभिनवगुप्तकृतटी०

तत्रचयोगाद्बुद्धिसाम्यवशेनतवस्फुटमेवेदमभिज्ञानंश्रोतव्यस्य०
श्रुतस्याभिलष्यमाणस्यागमस्योभयस्यापिनिर्वेदभाक्त्वम् अ
नेनचेदमुक्तम् अविद्यापदनिपतितप्रमात्रनुग्राहकशास्त्रश्र
वणसंस्कारविप्रलंभमहिमायं यत्तवास्यानेज्ञलत्वयादिदो०
प्रदर्शनम् नत्वतथाश्वासनबहुमानविगलनेविगलिष्यती
ति ५२ ॥

परमार्थप्रपा टी० ॥

अथकदाप्रशमितित्याह यदेति तेबुद्धिर्यदामोहकलिलंव्यतितरिष्यति मोहो देहा
त्मबुद्धि त्मरेवंकलिलंगहनंदुरतिक्रमत्वात् तेबुद्धिस्तद्विशेषात्त
रिष्यति उल्लंघयिष्यति तदाश्रोतव्यस्यश्रु
तस्यचफलोपधानस्यनिर्वेदंवैराग्यं
गंतासिप्राप्स्यसि तदुक्तंपा
तंजले भोगापवर्गौबु
द्धिकृतौबुद्धावेववर्त
मानौकथंपुरुषे
व्यपदिश्येतेस
हितत्फलस्य
भोक्तेतियथाविजयःपराजयोवायोधेषुवर्तमानःस्वामिनि
व्यपदिश्यतेसहितत्फलभोक्तेतिबुद्धिरेवपुरुषार्थापरि

समाप्तिर्बंधः तदर्थव्यवसायोमोक्षइति ५२ ॥

वनमाली टीका

ननुकर्मयोगोनसाक्षाज्ज्ञानहेतुः किंतुश्रवणादिकमेव आ
त्मावारेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यइतिश्रुतेः श्रुत्यु
पदेशद्वारा सत्वशुद्धिमुत्पाद्य श्रवणादीनामुपकरोति
तदाकियत्कालमनुष्ठेयमतआह यदेति यदाते
बुद्धिरंतःकरणंमोहकलिलं देहगेहादावहं
ममेत्यन्यथा ज्ञानरूपंदोषं मत्प्रसादा
द्व्यतितरिष्यति [illegible]ष्यति तदामहतः
श्रोतव्यस्यश्रुतस्यच वेदादेः
निर्वेदंनितरांलाभं गं
तासि प्राप्स्यसी
त्यर्थः
५२

नाशयि॰

सीतार्थः ५२

ऊरुमवैजयंतीटीका

ननेवंभूतामवस्थायात्मिका बुद्धिर्मम कदा भविष्यती त्यपेक्षायां
श्रीकृष्ण एनाह यदेति यदा यस्मिन्काले यस्यामवस्थायां वा मउक्त
प्रकारेणास्ववर्णाधर्मोचितकर्म कुर्वतः फलाभिलाषरहितेन पुरु
षेण मामार्पणरूपकर्मणात्वंतःकरणकिल्बिषस्य तेन बुद्धिर्मोहक
लिलं शरीरेण तत्संबन्धि चात्मीयरूपो यो मोहस्तदेव कलिलं व्य
स्यगायापापपंकं व्यतितरिष्यति विशेषेणातिशयेन तरिष्यति त
दाश्रुतस्य पूर्वं श्रवणायत्यागतस्वर्गादिसुखस्य श्रोतव्यस्य च श्रोष्य
पिकफलश्रवणार्हस्य मोऽनपर्यंतस्यापि निर्वेदं वैराग्यं त्वं गंतासि
गमिष्यसि देहाद्यनात्मवर्गेऽहं ममरूपाभिमानाभावं कृता यदा फ
लविषये विरक्तिर्त्तत्स्यति तदैव तव बुद्धिर्मदेकनिष्ठका भविष्य
तीति भावः ५२॥

मधुसूदनीटीका

नैतावता कालेन सत्वशुद्धिर्भवतीति कालनियमोऽस्ति किंतय
दा यस्मिन्काले तेतव बुद्धिरंतःकरणं मोहकलिलं व्यतितरिष्यति ।
अविवेकात्मकं कालुष्यमहमिदं ममेदमित्याद्यज्ञानविलसितम
तिगहनं व्यतितरिष्यति रजस्तमोमलमपहाय शुद्धभावमापत्स्य
ते इति यावत् तदा तस्मिन्काले श्रोतव्यस्य श्रुतस्य च कर्मफलं नि
र्वेदं वैतृष्ण्यं गंतासि प्राप्स्यसि परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो
निर्वेदमायादिति श्रुतेः निर्वेदेन फलेनांतःकरणशुद्धिस्तस्य सीम
भिप्रायः

५२

सदानंदीटीका

एवंमे कुर्वतः कर्म चित्तशुद्धिः कदेति चेत् न कालनियमस्तत्र शृणु तद्वै
मोः समाहितः । यस्मिन्कालेति कालुष्यमविवेकात्मकं मलं अहंममः

श्री
गी॰टी॰
द्वि॰

मेदमित्येवमाद्यविद्याविजृंभणं २ अस्यंतगहनेतीर्णवंतःकरणं
यदा शुद्धिमापन्नस्यैतत्तत्कारणजसंतामसंमलं ३ तस्मिन्काले सम्यक्
संश्रोतव्यस्य श्रुतस्य च फलस्य कर्मणांसम्यगेवेत्स्यं यास्यसि स्वयं
५ वैनिर्वेदफलेनैवधीशुद्धिं तास्यसीतिच ५ ५२ ॥

नीलकंठीटीका

कदा मनीषिणो भवंतीत्यत आह यदेति तेन च मोहः इष्टानिष्टवियोग
(संयोग) जपरितापजं संवैचित्यं तदेव कलिलमिव कलिलं कालुष्यं बुद्धिगतं
बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति बुद्धिः प्रसन्ना भविष्यति तदा श्रो
तव्यस्य शास्त्रभागस्य श्रुतस्य च निर्वेदं वैराग्यं गंतासि अयं भावः म
लिनायां बुद्धौ असकृद्गृहीतस्यापि शास्त्रार्थस्यास्फुरणात् श्रोतव्यश्रु
तयोर्वैयर्थ्यं तच्च दृष्टैव तद्गतशुद्धायामपि बुद्धौ सम्यः शास्त्रार्थस्फुरणात् तयोर्वैयर्थ्यं भवती
मित्युभयथापि तत्र निर्वेदः उचितः प्रसन्नायां च बुद्धौ निग्रहीतं योग्या भव
ति श्रवणादिके त्यक्ता ध्यानमिष्ट एव भवेदिति ५२ ॥

अत्र क्रममाह यदेति

आनंदीटीका

म॰ मोहं अज्ञानमेव कलिलं चित्तकालुष्यमनादिजन्माभ्यस्तमनात्मनि दे
हादावात्मज्ञानं लंघयिष्यति तदा श्रोतव्यस्य श्रावयिष्यमाणस्योपदेश ५२
स्य श्रुतस्य श्रुतपूर्वस्य निर्वेदं अवाप्यत्वाविरहं गंतासि कृतार्थत्वात्

+ यदा चैतत्परमदुरवगाहं तत्त्वज्ञानं तु क्रमपिक्रियतिम नक्षिप्रतिष्ठां न निबध्नाति तदा शिथिलीतस्मात् न न भवितव्यम् यतः क्रमेणैतत्तत्त्वं ज्ञास्यसीत्याह +

रामकंठीटीका

+ यदा यस्मिन्काले स्योपदिष्टस्य ज्ञानस्योपपत्तिमात्रप्रतिपन्नाम् मो
हकलिलमनादिजन्माभ्यस्तदेहाद्यात्मप्रत्ययस्वरूपमज्ञानकं बुद्धि
व्यवतरिष्यति विपर्ययतत्प्रतिपत्त्या लंघयिष्यति तदैवं कृतमिदं श्रोतव्य
मिति मया यावच्छिष्टजनोचितयोर्नानाशास्त्रविषययोः श्रोतव्य
श्रुतयोर्निर्वेदं विरागं गंतासि [illegible] ५२ ॥

338

यदातेबुद्धिरंतःकरणं

लासिकी [illegible] टीका

मोह यदेति कदाकर्मयोगप्रतिष्ठां प्राप्स्यामीत्यपेक्षायांआह यदेति मोह

कलिलं गहनं विशेषेण तरिष्यति तमेवदेहाद्यात्मप्रत्ययमेवकलिलं गहनं विशेषेण तरिष्यति तदा श्रोतव्यस्य निश्चित

दाश्रोतव्यस्यार्थस्य श्रुतस्य चार्थस्य निर्वेदं निष्फलत्वज्ञानं प्राप्स्यसि अविद्यापदपतितप्रमाता ग्राहकत्वात्

तयोर्वैराग्यं प्राप्स्यासि अविद्यापदपतितप्रमाताग्राहकत्वात् ॥ तदुक्तं कलाशीवेयथा ... तेन न ... प्रयोजनम्

शास्त्रस्येति तरिष्यति + ५२ ॥ तत्त्वज्ञस्य तथा देविन शास्त्रेण प्रयोजनम् +

पंचोलीटीका

योगानुष्ठानजनितसत्वशुद्ध्या बुद्धिः कदा प्राप्स्यते इत्याह यदा

इति यदा तेतव बुद्धिः मोहकलिलं मोहात्मकं अविवेककालुष्यं

यतितरिष्यति अतिक्रमिष्यति तदा तस्मिन्काले श्रोतव्यस्य श्रुतस्य च

व्यस्य श्रुतस्य च निर्वेदं वैराग्यं गंतासि प्राप्स्यसि अध्येतव्यमधीतं च निष्फलं प्र

तिभास्यति ५२

शताब्दीसमभिहोयिनी॥

पद्यते इति तेतव बुद्धिर्मोहकलिलं कलनया दिदोषदर्शनं यदा

व्यतितरिष्यति तदा एवं श्रुतमिदं श्रोतव्यमिति संशयाद्याविष्टजनोचित

योः श्रोतव्यश्रुतयोर्विरागं गमिष्यसीति स्वयमेव निःसंशयं स्वी

तकर्मानुष्ठाने प्रवृत्तो भविष्यसीति भावः ५२॥

मधुभाष्य॥

यदेति निर्वेदं नितरां लाभः प्रयोगात्तस्माद्भास्वराः पांडित्यं

निर्विद्येत्यादि नहितत्र वैराग्यमुपपद्येत तथा सति पांडित्या

दितिस्यात् न च तानि नाम भगवन्माहात्म्यादि श्रवणादि कर्म वा

ति आत्मारामादिषु न योनिर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं

भक्तिमित्थं भूतो गुणो हरिरिति वचनात् अनुष्ठानाच्च सुकादी

नां न च तेषां फलं नास्ति तस्मै वमन्तस्वत्वातेषां यानिहीति

तव भूतां तव पादपद्मध्यानाद्भवजनकथा श्रवणेन वा स्यात्

नाथ तेसि त्वमहिमन्यपि नाथ मा भूत् किं त्वंतकासि त्वलितान्य

© Dharmartha Trust. Digitized by eGangotri

ततो विमानादित्यादिवचनात् तेषामप्युपासनादिफलस्य
साधितत्वात् तारतम्याधिगतेश्च तथाहि यदि तारतम्येन सा
तू नात्मतिकं विगणायं त्वयापि तेप्रसादं नैकात्स्यतामेस्वदयं
तिकेचित् एकत्वमप्युत्तदीयमानेन नष्टं स्यातीति भक्तिमप्यति
ष्ठितामपि मोक्षपवफले नमिष्ठितामपि संभवतीति प्रतीका
दीनामिति कथमनिष्ठितां स्थितिरुपपन्नास्यात् वचनाद्य
षाभक्तिविशेषो रहस्यं तेशरूपोत्तमे तथा भक्तिविशेषो
त्तानिनां लिंगभेदने योगिनां भिन्नलिंगानामाविर्भूतेन स्व
पिणां शामानां परमानन्दं तारतम्यमस्त्येवेति तथामतिना
यिष्यतिसाक्षाव्यपि कथं चेत मद्भक्तियोगात्तानाश्वस्मवाविश
प्राप्ययिष्यसीति च तानावचनं नष्यातुर्यविषयं दुःखाभावमात्रा
यं च तथाचोक्तम् दुःखाभावापत्तौ न लिंगभेदाः समासानन्द
तथापि परमानन्दे स्तानभेदानुभिषत इति नारायणसंकोच
कल्पे प्रतीत नैवैतत्तं श्रुत्यादावचविवक्षितम् नच संप्र
मानं किंचिद्धि प्रमाणं इतरत्र प्रयोगे मदर्थिः श्रवणीयस्या ५४॥
तस्य च वेदादेः फलं प्राप्स्यसीत्यर्थः तदेवमस्पष्टयति

भाषा अनुवाद

जो कहो कि कब हम उस विसु पदको पावें गे तो दो श्लोकसे क
हते हैं कि मोह जो देहादिक मे आत्मबुद्धि अर्थात् आत्मास्वरूप जो
जब्क है सो देह है ऐसा जो दृढ विश्वास सोई दुरवगाह अज्ञान
गहन वनहै सो जब इस पूर्व कथितरूप परमेश्वर की आराधना
करनेसे भगवत की कृपासे तुमारीबुद्धि देह अभिमानरूप मोह
मय आगम्यकानन कहे वनके अच्छी तरह से पार होगी अ
र्थात् देहाभिमान छूटैगा तब विसु पदरूप मुक्ति प्राप्त होगी और
जो अर्थ सुना चाहते हो और सुनिचुके हो तिस सब मेवैराग्य उ
त्पन्न होगी अर्थात् वह सब तुच्छ कहे किसी कामका नहीं यह
जानि सकोगे फेरि और उसबातको न पूछोगे ५२ ॥ ॥

दोहा

जबहि मोह विछोभको बुद्धि तरेगी तोरि तब विचार को पा
पहैं सुनहि सुनातिहकोरि ५२॥

340

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ५३

शांकरभाष्यं

मोहकलिलात्ययद्वारेण लब्धात्मविवेकजप्रज्ञः कदा कर्मयोगजं
फलं परमार्थयोगमवाप्स्यामीति चेत् तच्छृणु श्रुतिविप्रतिपन्नेति
श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसंबंधः प्रकाशनश्रुतिभिः श्र
वणैर्विप्रतिपन्ना नानाप्रतिपन्ना अध्यात्मशास्त्रातिरिक्तशास्त्र।
सत्यर्थः श्रुतिविप्रतिपन्ना विक्षिप्ता सती ते तव बुद्धिर्यदा यस्मिन्
काले स्थास्यति स्थिरीभूता भविष्यति निश्चला विक्षेपचलनवर्जिता
सती समाधौ समाधीयते चित्तमस्मिन्निति समाधिरात्मा तस्मिन्नात्
मनीत्येतत् अचला तत्रापि विकल्पवर्जितेत्येतद्बुद्धिरन्तःकरणं तदा त
स्मिन् काले योगमवाप्स्यसि विवेकप्रज्ञां समाधिं प्राप्स्यसि ५३

आनंदगिरिकृतटीका

बुद्धिशुद्धिविवेकवैराग्यसिद्धावपि पूर्वोक्तबुद्धिप्राप्तिकालो दर्शितो न
भवतीति शंकते मोहेति प्राप्तविवेकादिफलं बुद्धेरात्मनि स्थैर्या
वस्थायां प्रकृतबुद्धिसिद्धिरित्याह तत्प्राप्तिवति इष्टं कालविशेषा
विवक्षितं तच्छब्देन गृह्यते बुद्धेः श्रुतिविप्रतिपन्नत्वं विशदयति ।
अनेकेति नानाश्रुतिविप्रतिपन्नत्वमेव संदिशति विक्षिप्तेति उक्तं
हेतुद्वयमनुरुध्य वैराग्यपरिपाकावस्था कालविशेषार्थः नैश्चल्यं वि
क्षेपराहित्यं अचलत्वं विकल्पशून्यत्वं विक्षेपो विपर्ययो विकल्पः सं
शय इति विवेकः विवेकद्वारा ज्ञाता प्रज्ञा प्राप्तका बुद्धिः समाधिस्त
दैवनिष्ठा ५३ ॥

स्वामिकृतटीका

गी॰
टी॰ द्वि॰

341

ततश्च श्रुतिविप्रतिपन्नेति श्रुतिभिर्वैदिकलौकिकार्थश्रवणैर्विप्र
तिपन्ना इतः पूर्वं विक्षिप्ता सती तव बुद्धिर्यदा समाधौ स्थास्यति समा
धीयते चित्तमस्मिन् इति समाधिः परमेश्वरः तस्मिन् निश्चला विषयान्तरै
रनाकृष्टा अत एव अचला अभ्यासपटुत्वेन तत्रैव स्थिरा च सती तदा योगं
योगफलं तत्त्वज्ञानमवाप्स्यसि ५३ ॥

पिशाचभाष्यं

तदा तस्मिन् काले गन्तासि प्राप्तासि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुतस्य
च तदा श्रोतव्यं श्रुतं च निष्फलं प्रभातीत्यर्थः मोहकलिलात्ययहेतुशा
लब्धात्मविवेकप्रज्ञः कदा कर्मयोगजं फलं परमार्थयोगमवाप्स्यामी
तत्पृच्छसि शृणोति श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसंबंधप्रका
शनश्रुतिभिः श्रुतैः श्रवणैर्विप्रतिपन्ना नसंप्रतिपन्ना विक्षिप्ता सती
तव बुद्धिर्यदा यस्मिन् काले स्थास्यति निश्चला विक्षेपचलनवर्जिता समा
धौ समाधीयते ऽस्मिन्निति समाधिः आत्मनीत्येतत् अचला तत्रापि विक
ल्पवर्जिता बुद्धिस्तेन तद्बुद्धियुक्तेः कारणं तदा योगमवाप्स्यसि ५३ ॥

रामानुजभाष्यं

योगे त्विमां शृण्वित्यादिनोक्तस्यात्मयाथात्म्यज्ञानपूर्वकस्य विधिविशि
ष्टसंस्कृतकर्मानुष्ठानस्य तल्लब्धभूतयोगाख्यं फलमाह श्रुतिविप्र
वा मत्सकाशाच्छ्रवणेन विशेषतः प्रतिपन्ना सकलेतरविसजातीयात्
मनिरतिशयस्य सत्यात्मविषया स्वयमचलापकर्तृका बुद्धिः कर्मयोगा
नुष्ठानेन विमलीकृते मनसि यदा निश्चला स्थास्यति तदा योगमात्मा
वलोकनमवाप्स्यसि एतदुक्तं भवति शास्त्रजन्यात्मज्ञानपूर्वककर्मयो
गः स्थितप्रज्ञताख्यज्ञाननिष्ठामापादयति ज्ञाननिष्ठारूपा स्थितप्रज्ञ
ता योगाख्यमात्मावलोकनं साधयति ५३

अभिनवगुप्तकृतटीका

स्थितधीः

तत्र च योगबुद्धिमाश्रयतः सेनाहितस्याटनेवेदमभिहितमनन्तमावर्णीन
स्वामिनत्वमानस्याशमतेः

अविद्यापदनिपतितमप्यात्मानमुद्धरत्कश्मलसूत्रवासंस्कारविप्रलंभम
हिमात्मे यत्तुदास्यानेजलत्वादिदोषदर्शनमनन्ततथाशास्त्रवद्ग
मानविगलनेविगलिष्यतीति ५२ ॥

परमार्थप्रपाटीका

अथैतदेवपरमेश्वरप्राप्तिनिमित्तमित्याहश्रुतीतिश्रुतिः रोचनार्था
फलश्रुतिस्तत्रविप्रतिपन्नात्वत्कादरात्एवंविधातेबुद्धिः समाधौसम्यगा
धीयतेचित्तंयस्मिन्नितिसमाधिः परमेश्वरस्वरूपंतस्मिन्निश्चलाकृतनि
श्चयानतएवाचलाऽविक्षेपासतीयदास्थास्यति स्थिताभवतितदायो
गंतत्स्मानिध्येयमवाप्स्यसि ५३ ॥

वनमालीटीका

नन्वेवंतेनवबुद्धिःश्रुतिभिर्नानाफलश्रवणैरविचारिततात्पर्यैर्विप्रति
पन्नाअनेकसंशयविपर्ययवत्त्वेनविक्षिप्ताप्राक्स्थितायदातत्परायणनरूपक
र्मयोगेनशुद्धासतीविक्षेपंपरित्यज्यसमाधौसदनंतशगालयेमयि
निश्चलाजाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिता अचलासुषुप्तिमूर्छा
स्तब्धीभावादिरूपचलनरहितासतीस्थास्यतिलयविक्षेपदोषौविहा
यसमाहिताभविष्यतीतियावत्यद्वानिश्चलासंभावनाविपरीतभाव
नारहिता अचलादीर्घकालादरनैरंतर्यसत्कारसेवनैर्विजातीयप्रत्य
यारहितासतीनिर्वातप्रदीपवदनंतशगालयेमयिस्थास्यतीतियो
ननातदायोगंपूर्णानंदघनत्वनिर्मलत्वादिनामत्साम्यरूपं यदापश्यः
पश्यतेरुक्मवर्णंकर्तारमीशंतदाविद्वान् पुण्यपापेविधूयनिरंजनः
परमंसाम्यमुपैतीतिश्रुत्युक्तमवाप्स्यसीत्यर्थः ५३ ॥

ऊहमवैजयन्तीटीका

ननुनिर्वेदेनैवकिंभविष्यतीत्यपेक्षायांतत्फलमाहश्रुतीतिश्रुतिविप्र
तिपन्नाःश्रुतयःश्रवणानितैरनेकराजसतामसमारिष्टास्त्रार्थानांश्रु
वणैर्विप्रतिपन्नाश्रुतिवंचलायानैतवबुद्धिःपूर्वमभूत्साबुद्धिर्यदानी
निश्चलामरत्वदेवभावसाधनादिराहित्येनमदेकविषयिका अचलासर
वौसमाधौसमाधीयतेमनोयस्मिन्नितिसमाधिःसर्वेश्वरोऽहंतस्मिन्न

श्री॰
गी॰टी॰
द्वि॰

गवतिमयियदायदिध्यास्यतिस्थिराभविष्यतितदानर्हितंयोगंनिष्काम
कर्मानुष्ठानसाध्यंमत्स्वरूपावलोकने अवाप्स्यसिप्राप्स्यसिवेदा
न्तादिसच्छास्त्रोदितात्मज्ञानपूर्वकंमदाराधनरूपनिष्कामकर्मानुष्ठाने
नांतःकरणशुद्धिद्वारास्थितप्रज्ञताभिधेयंज्ञानंभवतितस्मादात्मदर्श
नेततोमत्स्वरूपावलोकनमितिभगवदभिप्रायः ५३ ॥ ॥
+ अंतःकरणशुद्धौवंज्ञाननिर्वेदस्यकदाज्ञानस्य मधुसूदनीटीका श्रितिस्त्यपेक्षायामाह +
+ तेनवबुद्धिश्रुतिभिर्नानाविधफलश्रवणेरविचारिततात्पर्यैर्विप्र
तिपन्नाअनेकविधसंशयविपर्यासवत्तेनविक्षिप्ताप्राक्यदायस्मि
न्कालेशुद्धिजविवेकजनितेनदोषदर्शनेननविक्षेपंपरित्यज्यस
माधौपरमात्मनिनिश्चलाजाग्रत्स्वप्नदर्शनलक्षणविक्षेपरहिताअचलासु
लय॰ सुषुप्तिमूर्छास्तब्धीभावादिरूपलयलक्षणाचलनरहितासतीस्थास्यति
लि॰ लयविक्षेपलक्षणौदोषौपरित्यज्यसमाहिताभविष्यतीतियावत् अ
थवातिश्चलासंभावनाविपरीतभावनाविरहिता अचलादीर्घका
लादरनैरंतर्यसत्कारसेवनैर्विजातीयप्रत्ययादूषितासतीनिर्वातप्र
दीपवदात्मनिस्थास्यतीतियोजना तदातस्मिन्कालेयोगंजीवपरमा
त्मैक्यलक्षणंतत्त्वमस्यादिवाक्यजन्यमखंडसाक्षात्कारंसर्वयोगफल
मवाप्स्यसि तदापुनःसाध्यंतराभावात्कृतकृत्यःस्थितप्रज्ञोभवि
ष्यसीत्यभिप्रायः [illegible] ...नवान् ५३ ॥

सदानंदीटीका

धीर्बुद्धिर्वैराग्यमवैराग्यमेकदामम आत्मज्ञानोदयश्चेवमस्वेत्याशं
क्य श्रुतिरवविचारिततात्पर्यैरनेकश्रवणैस्तव धीःसंशयविपर्यासे
र्विक्षिप्ताप्रागनेकधा २ यस्मिन्कालेविशुद्धात्मविवेकजनितेनदि
शात्मफलेदोषदर्शनेनसमाहिता १ त्यक्त्वाविक्षेपमदैततत्त्वेसमत्तविरति ४
ला जाग्रत्स्वप्नमनोराज्यवर्जिताअचलाश्चिरस्थिता ४ अचलासमसनिता
कालदिलयप्रमादसमी... यदासंभावनात्मकविपरीतमवितथा

निदिध्यासनसंपन्नातेबुद्धिस्थास्यतिनिश्चला तस्मिंकालेपरात्मैक्ययोगं
वेदांतवाक्यजं ९ अखंडसाक्षात्काराख्यंसर्वयोगफलपरं अवाप्स्यसि
स्थितप्रज्ञःकृतकृत्योभविष्यसि ९ ५३ ॥

नीलकंठीटीका

ननुबुद्धिप्रसादोपिकेनलिंगेनज्ञेयइत्यतआह श्रुतिभिर्नानाविध
शास्त्रश्रवणैर्विप्रतिपन्नाआत्मानित्योऽनित्योवानित्योपिकर्ताऽकर्ता
वा कर्ताप्येकोऽनेकोवेत्येवमादिसंशयग्रस्तासतीयदाअसंभाव-
नाविपरीतभावनाविरामपूर्वकंश्रुतितात्पर्यविषयीभूतेब्रह्मण्यद्वैते
निश्चलाध्रुवःऊहतर्कैरनाक्षेप्यानिर्विचिकित्सापरोक्षनिश्चयवती
भूतासमाधौनिर्विकल्पकेप्रत्यगात्मनिअचलालयविक्षेपशून्यास्था
स्यतिस्थिराभविष्यतितदायोगंविवेकप्रज्ञांप्राप्स्यसि निश्चलसमाधि
लाभएवबुद्धिप्रसादलिंगमितिभावः ५३ ॥

आनंदीटीका

श्रुतेोपदेशान्तरश्रवणोविप्रतिपन्नानिर्विशेषाद्विक्षेपेतानिश्चलाबल
वद्भिरपिविकल्पैरकंपितासमाधौस्थास्यतिसमर्हितेन्तःकरणोस्थितिं
प्राप्स्यतियोगंज्ञानकर्मसमत्वयाख्यांबुद्धिंप्राप्स्यसि अथवास
माधावित्युपलक्षणंध्यानधारणासमाधिसंज्ञेसंयमेआभ्यंतरेयोगां
गेवस्यमाणोयदाबुद्धिर्मनोनिश्चलंस्थास्यतितदायोगमष्टांगंचित्तवृ
त्तिनिरोधंसंयमयोगमाप्स्यसीत्यपिसूचितम् (समाधावचलाबु
द्धिःस्थास्यतीतिभगवद्वचनेनप्राप्तावसरःशनैः तैरेतानावरणपग पृ॰ २४
न॰ मेसमनुत्पन्नाजिज्ञासेरर्जुनउवाच ५३ ना॰
नत्वनिस्थयादिदंकृतमिदंस्थानव्यमिति

रामकंठीटीका

विच्छिन्नविचिकित्साविहतयाश्रुतिर्नीशास्त्रश्रवणांतस्यामनुपादे
यत्नाद्धिप्रतिपन्नाप्रतिकूलासतीतवमतिःप्रज्ञानिश्चितायथोक्तात्म
ज्ञाननिवृत्तसंदेहा अतएवाचलाविकल्पैर्बलवद्भिरप्रकंप्यासती
स्थास्यति अस्मिन्समाधौस्थितिंप्रतिष्ठांलप्स्यतेतदानेनक्रमेणयोगयो

गी॰
टी॰
द्वि॰

343

कं योगं कर्मसमाधिलक्षणमाप्स्यसि प्रतिपत्स्यसे संप्राप्स्यसे
[illegible]
[illegible] ५३॥

लासिकी [illegible] टीका

तथा श्रुतिभिर्नानालौकिकवैदिकार्थश्रवणैर्विप्रतिपन्ना वि
क्षिप्तासती यदा समाधावात्मसमाधाने निश्चला विक्षेपरहिता
सती अचला लयरहिता च बुद्धिः स्यास्यति प्रतिष्ठां लप्स्यते त
दा योगं यथोक्तं कर्मसमाधिलक्षणं मुख्या नेष्यवाप्स्यसि ५३॥

पंचोलीटीका

मोहकलिलाऽत्ययद्वारेण लब्धात्मविवेकजां प्रज्ञां कदा कर्मयो
गजं फलं अवाप्स्यसि तच्छृणु इत्याह हे अर्जुन श्रुतिविप्रति
पन्ना अनेकसाध्यसाधनसंबंधप्रकाशनवाक्यश्रवणैः विवि
मा सती ते तव बुद्धिः यदा यस्मिन्काले निश्चला स्थिरीभूता विक्षे
पचलनवर्जिता सती समाधौ आत्मनि अचला तत्रापि विकल्प
वर्जिता स्यास्यति तदा योगं विवेकप्रज्ञां प्राप्स्यसि ५३

स्नावीरसमिद्बोधिनी॥

श्रुतीति श्रुतिः संबाधोऽस्यापकं नानाप्रकारकश्रवणां तत्र विप्रतिप
न्ना नु पारेऽयता आप्ततिकूला निश्चला निहृत संदेहत्वात्मा मुनिश्च
या अचलाचलवद्भिः अपि विकल्पैरप्रकंप्या सती तव बुद्धिः स्थि
माधौ स्यास्यति समाधिग्राहेनात्रय तनुर्विया भिधीयते तत्र चित्त
ती भविष्यति तदा योगं योगः सन्नूहनोपाय ध्यानसंगतिर्योगिनां वा
धनेन वचसा समाधिस्थस्य यन्नुर्विया निष्टस्य कर्मयोगिनो वाप्यमीश्व
शक्ति भिन्न नु ग्रामसनाद्यागादिसंधानरूपां शक्तिमवाप्स्य
सीः ५३॥

मधुभाष्य

श्रुतिविप्रतिपन्नेति पूर्वं श्रुतिभिर्वेदैर्विप्रतिपन्ना विकृष्टा
नीयदा वेदार्थविवेकजेन तत्वनिश्चयेन विपरीतवाभिभाव
निश्चला भवति ततश्च समाधावचलः ब्रह्मप्रत्ययदर्शने
न भेरीताडनादवपि परमानंदमयत्वात्तदा योगमवाप्स्य
सि उपायफलभूतमवसीत्यर्थः स्थिताप्रज्ञाज्ञानं यस्य सः स्थि
तप्रज्ञः भाष्यतेऽनयेति भाषा लक्षणमित्यर्थः अतो लक्षण
मनुवदति लक्षणानंतरं पृच्छामीति ज्ञापयितं समाधिस्थ
स्यति कं ब्रह्माणमीप्संकं इव वर्त्यतीति केशवः तथाहि न
कर्किः कृतादविवंप्रोषुकइणकेलाप्यायागायाद्विलयगर्भः
कः प्रोक्तइच्छः प्राकरएव च स्पृष्टादिना वर्तयतीते पृतः के
भावो भवानिति वचनात्तथा च किमासीत किंप्रत्यासीत न
वाङ्नो जानाति तल्लक्षणादिकम् जानंति सर्वे जनानो देव
यत्तथैवच तथापि धर्मान्निच्छंति वातीये उशविनये नेते
उपाः प्रतीयंते ब्रह्मणोभूत्वा बुद्धिनामिति वचनात् गमनादिश
वृत्तिर्नास्त्यभिसंधिपूर्विकागमनादि प्रवृत्तिवदितियाति प्रोक्त्या
हिनादर्शयिष्यन्नलक्षणप्रश्नमतश्चाह पूर्वं परमानंदरूपसमः
किमर्थं प्रवृत्तिं करोतीति प्रश्नाशयः प्रारब्धकर्मणो बतिरोहि
नवसनणोवासनया प्रायोऽलाभिसंधिपूर्विकागमनादिप्रा
वृत्तिः संभवतीत्याशयवान्यादिहरति प्रायः सर्वान् प्रजाहति
स्पर्शकादीनाममीषदर्शनात् त्वत्पादमक्तिमिच्छंति ज्ञानिन
त्वग्दर्शिनस्तुकेऽत्रामिच्छंति यदापि शब्दादीनामाप्सदेदस्प
ते नत्वाभिभूतं तेषां ज्ञानं नखोलः प्राधिकादिकसंतह
दकर्मचकारणात् उ कृवाभिभवो ज्ञानेततोन्यथा विल्व
णाइति प्रतएव कैवल्यप्रतिपादनयिकारिणामात्यहादिवेद
क्तिनते ज्ञानिनश्च त्यवगासक्तं नवार्थसमाधिकुर्वतो लक्षणाद्व

च्यते यः सर्वत्रानभिस्नेह इति स्नेहनिषेधात् नहि समाधिं प्र
वेनस्तस्य शुभाशुभप्राप्तिरस्ति एवं प्रत्तात्समाधेः संप्रज्ञा
ते च विवेचयः तथापि न तत्रैवेति नियमः कामादयो न तावद्
गच्छन्ति विनिमज्जेत सोऽज्ञानि नाज्ञानमसिद्धं तमलानादेव सं
प्रयादिति स्नेहेन नोपगताद्दिकामाः एतस्यैव नहि हठा
नोत्पत्तौ पुलकेदनं तेषामिति दर्शयति मनोगतानिति वि
नेयप्रोच्यते रसोऽप्यस्य परं दृष्ट्वा निवर्तत इति न चैतद्दृष्टा
त्मनीयं पुरुषवैशेष्यात् आत्मना परमात्मना परमात्म
न्येवस्थितः सन्नात्मारामेतस्मिन्स्थितस्य तन्मनसा यदेव तदैव
भवति विषयांस्तु परित्यज्य रामे स्थितिमतस्तत्रः देवान्
तिचैवहि नीत्यथाह कथंचनेत्युक्तं नागयुगराम कल्ये प्र
तो नात्माजीवः तदेवास्य पुत्रतरैस्त्रिभिः श्लोकैः एतान्येव
ज्ञानोपायानि तूक्तं तदेहिजस्ता इभिः साध्यस्तानि नायत
नेनस्मितिति प्रोभनाध्यासो रागः रसोरागस्तु यारक्तिः
प्रोभनाध्यासरुच्यते इत्यभिधानात् सर्वत्रानभिस्नेहश्च शु
भाशुभं प्राप्य नाभिनन्दति न द्वेष्टि न चैतस्य लक्षणं ज्ञानमूर्
त्तेनोपि भवतीत्याह तेन च श्लोकेः निराहारत्वेन विषयभो
गसामर्थ्याभावएव भवति इतर विषयाकांक्षाभावो वा प
राकांक्षादिनिवर्तते सत्वपरोक्तत्वात् ज्ञानादेव निवर्तत
इत्याह ५९॥

भाषा अनुवाद

इसी प्रकार लौकिक कहे लोक की वार्त्ता औ वैदिक कहे वेद की वार्तें अनेकप्रकार की श्रवण करते करते पूर्वसे विलिम क हे भ्रमित जो तुमारी बुद्धि सो जब समाधिमे स्थिर होगी अर्थात अच्छीतरह लगाया जाय चित जिसमे सो समाधि कहे परमेश्व तिस ईश्वरमे और विषयों को छोडि अभ्यास करते करते स्थि गा होय तब अचल रूपसे स्थिर होगी तब तुम योग का फल जो तत्वज्ञानसो पावोगे ५२ ॥

दोहा

तेरि श्रुतिसों चंचला निश्चल जब स्थित होग बुद्धि अचल समाधिमे तब तें प्रापहिं योग ५३॥

345

अर्जुन उवाच स्थितप्रज्ञस्य का भाषा समाधिस्थ
स्य केशव स्थितधीः किं प्रभाषेत किमासीत व्रजे
त किं ५४ ॥

शांकरभाष्यं

प्रश्नबीजं प्रतिलभ्यार्जुन उवाच लब्धसमाधिप्रज्ञस्य लक्षणबु
भुत्सया स्थितप्रज्ञस्येति स्थितप्रज्ञस्य स्थिता प्रतिष्ठिताहमस्मि प
रं ब्रह्मेति प्रज्ञा यस्य स स्थितप्रज्ञस्तस्य स्थितप्रज्ञस्य का भाषा किं
भाषणं वचनं कथमसौ परैर्भाष्यते समाधिस्थस्य समाधौ स्थित
स्य केशव स्थितधीः स्थितप्रज्ञस्स्वयं वा किं प्रभाषेत किमासीत ।
व्रजेत किं किं भाषणं व्रजनं वा तस्य किं कथमित्यर्थः ५४ ॥

आनंदगिरिकृतटीका

संन्यासिनो ज्ञाननिष्ठा तत्प्राप्तिवचनं प्रश्नबीजं ह्युक्तोर्जुनस्य
अभिप्रायमाह लब्धेति लब्धा समाधावात्मनि समाधानेन वा प्रज्ञा
परमार्थदर्शनलक्षणा येन तस्येति यावत् ननु तस्य भाषा तत्का
र्यानरोधिनी भविष्यति किमित्यसौ विजिज्ञास्यते तत्राह कथमि
ति ज्ञाननिष्ठस्य लक्षणविवक्षया प्रश्नमवतारयन् तन्निष्ठासाधन
बुभुत्सया विशिनष्टि समाधिस्थस्येति तस्यैवार्थक्रियां इच्छति स्थि
तधीरिति ५४ ॥

स्वामिकृतटीका

सर्वश्लोकोक्तस्यात्मतत्त्वज्ञस्य लक्षणं जिज्ञासुरर्जुन उवाच स्थितेति
स्वाभाविके समाधौ स्थितस्यात एव स्थिता निश्चला प्रज्ञा बुद्धिर्यस्य त
स्य का भाषा भाष्यतेऽनयेति भाषा लक्षणमिति यावत् केन लक्ष
णेन स्थितप्रज्ञ उच्यते इत्यर्थः तथा स्थितधीः कथं भाषणमासनं
व्रजनं च कुर्यादित्यर्थः ५४ ॥

गी॰
टी॰ द्वि॰

३५८

पिशाचभाष्यं

अवामयोगस्यफलत्वात्तुबुभुत्सयार्जुनउवाच स्थितप्रज्ञस्येति स्थिता प्रतिष्ठिताहमस्मि परब्रह्मेति प्रज्ञा यस्य तस्य स्थितिका भाषा भाषणं वचनं कथमसौ भाष्यते समाधिस्थस्य समाधौ स्थितस्य केशव स्थितधीः स्थितप्रज्ञः किं प्रभाषेत किमर्थं स्वरूपं भाषेत किमासीत कथं वा सीत व्रजेत किं कथं वा गच्छेदित्यर्थः ५४॥

रामानुजभाष्यं

एवमुक्तेः पार्थोऽतिः सङ्गकर्मानुष्ठानरूपकर्मयोगसाध्यस्थितप्रज्ञतायाः योगसाधनभूतायाः स्वरूपं स्थितप्रज्ञस्यानुष्ठानप्रकारं च पृच्छति समाधिस्थस्य स्थितप्रज्ञस्य का भाषा को वाचकः शब्दः तस्य स्वरूपं कीदृशमित्यर्थः स्थितप्रज्ञः किं च भाषादिकं करोति ५४॥ कं

अभिनवगुप्तकृतटीका

यदा स्थास्यति बुद्धिरित्यनेन वचसा समाधिस्थस्य योगिनो यः स्थितप्रज्ञशब्दस्तद्वाचक उक्तस्तस्य का भाषा किं प्रवृत्तिनिमित्तं भाष्यते वानेन निमित्तेन शब्दैरर्थ इति कृत्वा योगिनः स्थितप्रज्ञशब्दः किंरूप[illegible] वाच्योऽन्वर्थतया[illegible]कः प्रश्नः यद्यपि रूढ्या प्रयुक्तेऽवनालितथाप्यर्थतो लक्षणमपि स्वरूप[illegible]लक्षणानिमित्तं निरूपणेन स्फुटीकर्तव्यमित्युक्तः प्रश्नः स्थितधीरिति शब्दपदार्थकोऽर्थपदार्थकश्च तत्र स्थिरधीप्रश्नः प्रयोक्तलक्षणमेवार्थमाह आहोस्विदनमपीति द्वितीयः प्रश्नः स्थिरधीर्योगी किमासीत किमभ्यसेत् का वास्य स्थैर्ये स्यादिति तत्तीयः अभ्यासस्य किमाश्रयादिति चतुर्थः ५४॥

परमार्थप्रपाटीका

अथ समाधौ स्थिरबुद्धेः स्वरूपमर्जुनः पृच्छति स्थितप्रज्ञस्येति भाष्यते ऽभिधीयतेऽनेनेति भाषा स्थितप्रज्ञः प्रमानकैर्लक्षणैः कथ्यत इत्यर्थः तस्य समाधिस्थस्य च किं लक्षणं स्थितप्रज्ञः समाधिस्थो वा केन लक्षणेन ज्ञायत इति वीतरूपः ननु परत्वोत्थरपरमलक्षणं किं दर्शनमात्रेण गाखरूपं

चेन्न तर्हि प्रतिबुद्धिमता प्राकारेणैव मनोगतं ज्ञायते यतः उदीरितोऽर्थः
पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति नोदिताः अनुक्तमप्यूहति पं-
डितो जनः परेंगितज्ञानफला हि बुद्धयः इत्युक्तत्वात् अथ व्यवहारे-
णा वा तल्लक्षणं पृच्छति स्थितधीः किं प्रभाषेत कथं वदेदिति किमासी-
त कथमासीत कथमासीनो भवति कथं वा व्रजेत गच्छतीति प्रश्नार्थः

शिष्य

५४

वनमालीटीका

पान्येव जीवन्मुक्तानां लक्षणानि तान्येव मुमुक्षूणां मोक्षोपायभू-
तानीति मन्वानोऽर्जुनः स्थितप्रज्ञलक्षणं पृच्छति ज्ञाततत्त्वस्याप्यर्जु-
नस्य नरावतारस्यापि लोकोपकाराय प्रश्नः स्थिता निश्चलानन्तगु-
णालये भगवति प्रज्ञा यस्य स स्थितप्रज्ञो वस्याहुयवान् समाधिस्थोबु
स्थितचित्तस्येति तस्य का भाषा कर्मणि षष्ठी भाष्यतेऽनयेति भाषा ल-
क्षणं समाधिस्थः स्थितप्रज्ञः कैर्लक्षणैरन्यैर्व्यवह्रियत इत्यर्थः सव
सुस्थितचित्तः स्थितधीः स्वयं किं प्रभाषेत स्तुतिनिंदादावभिनंदनद्वे-
षादिलक्षणं किं कथं प्रभाषेत सर्वत्र संभावनापालिरः तथा किमा-
सीत नन्वस्थितचित्तनिग्रहाय कथं वहिरिंद्रियाणां निग्रहं करोति तन्नि-
ग्रहाभावकाले च किं व्रजेत कथं विषयान् प्राप्नोतीति तत्कर्तृकभाष-
णासनव्रजनानि मूढजनविलक्षणानि कीदृशानीत्यर्थः समा-
धिस्थस्यैकोव्युत्थितेत्रयः इति चत्वारः प्रश्नाः केशवेति संबोधयन् स-
र्वान्तर्यामितया सर्वदा प्रकाशत सर्वज्ञानवत्त्वादिना त्वमेवैतादृशो व-
क्तुं समर्थोऽसीति सूचयति ५४॥

ऊसमवैजयन्तीटीका

पवेतिः कामकर्मयोगसाध्यामात्मावलोकनसाधनभूतां भग-
वद्गदितां स्थितप्रज्ञतां श्रुत्वार्जुनस्तत्स्वरूपजिज्ञासया स्थित-
मस्तावतः पुरुषस्याचरणरीतिं पृच्छति स्थितप्रज्ञस्येति समाधि-
स्थस्य पूर्वोक्तलक्षणो समाधौ स्थितस्य स्थितप्रज्ञस्य स्थितात्मस्व-
रूपः इति निश्चला प्रज्ञा बुद्धिर्यस्य स तथा तस्य का भाषा कः शब्दल-

गी॰
टी॰ हि॰

347

हाच कोभवतिकेनशब्देनतस्यस्वरूपंज्ञायतेइत्यर्थः स्थितधीः स्थि
तानिश्चलाधीर्यस्यसः स्थिरबुद्धिः पुरुषः किंप्रभाषेतकथंभाषणं
करोति किमासीतकथमासनंकरोति किंव्रजेतकथंव्रजनंकरोति
केशवेतिसंबोधनेनकोब्रह्मात्मकस्तंद्रईशस्त्वामीयस्यतंकेशंमना
स्तस्मिन्वसतीतिकेशवः कोब्रह्माईशोयस्यतंकेशंबुद्धींद्रियंतस्मिन्
वसतीतिवेत्तिबुद्ध्यस्यामनोबुद्ध्युपलक्षितानां सर्वेषामचेतनानामंत
र्यामीसर्वज्ञस्त्वमस्यतस्माद्व्यतिरेकः कोयादृशशब्देनज्ञानास्तित्वमेव
ज्ञानासितंमावदेतिसूचितम् ५४

+ एवंलब्धावसरः स्थितप्रज्ञलक्षणंज्ञातुमर्जुनउवाच यान्ये
श्रुत्वलक्षणंमोक्षोपा
यभूतानीतिमत्वा
वानः +

मधुसूदनीटीका

वहिर्जीवन्मुक्तानांलक्षणानि

स्थितानिश्चला हे ब्रह्मास्मीति प्रज्ञायस्य सः स्थितप्रज्ञः । यस्माद्ध्यवात्
समाधिस्थो व्युत्थितचित्तश्चेत्यतो विशिनष्टि समाधिस्थस्यस्थितप्रज्ञस्य
काभाषाकर्मणिषष्ठीभाष्यते नयेतिभाषालक्षणं समाधिस्थः स्थितधी
प्रज्ञः केनलक्षणेनान्यैर्व्यवह्रियतइत्यर्थः स च व्युत्थितचित्तः स्थितधीः किं कथं
स्थितप्रज्ञः स्वयं किंप्रभाषेत स्तुतिनिंदाभिनेरहेषादिलक्षणं किंनिग्रह
प्रभाषेत सर्वत्रसंभावनायोलिङ् तथाकिमासीतव्युत्थितचित्तनिग्रहेत
यकथंवहिरिंद्रियाणांनिग्रहंकरोति तन्निग्रहाभावकालेच किंव्रजेत
कथंविषयान्प्राप्नोति तत्कार्तिकभाषणासनव्रजनानिमूढजनवि
लक्षणानिकीदृशानीत्यर्थः तदेवंचत्वारः प्रश्नाः समाधिस्थेस्थितप्र
एकः व्युत्थितेस्थितप्रज्ञेत्रयइति केशवइति केशवइति संबोधयन्स
र्वांतर्यामितयात्वमेवेतादृशंरहस्यंवक्तुंसमर्थोसीतिसूचयति ५४

[illegible]

सदानंदीटीका

उपलभ्यार्जुनः प्रश्नवीजं सर्वहिताय च तत्तल्लक्षणंज्ञातुंप्रोवाच
श्रीहरिंप्रति । यान्येवजीवन्मुक्तानांलक्षणानिभवंतिहि तानिश्चलाधी
साधनलक्षणंमोक्षोपायात्मकान्यपि ब्रह्मैवास्मीतिधीर्यस्य स्थितप्रज्ञः
नधीर्हिसः समाधिस्थस्यषष्ठीयंकर्मणिएवनकर्तरि २ समाधिस्थायुत

स्थितस्य स्थितप्रज्ञो हि धीयते तज्ञेयं केन चिह्नेन ज्ञायते सोऽर्जुनेतिति
समाधिस्थस्य का भाषा लक्षणं भाष्यते तया श्रुत्वा स्थितोऽसौ स्थितप्रज्ञः
किं प्रभाषेत वा स्वयं ५ स्तुतिनिंदादिविषयान् शत्रूञ्छत्रून्तविलक्षणान्
किमासीत कथं चित्तनिरोधार्थे विनिग्रहं ६ इंद्रियाणां करोत्येष स्वयं
हारे कथं व्रजेत् विषयान्कथमाप्नोति सारव्याहोगतान् सुधीः ७
लक्षणं भाषणं स्थानं व्रजनं च चतुर्थकं चत्वारि कोहशान्यस्य भिन्ना
न्यज्ञेभ्य इत्यले ८ पदं प्रश्नाहि चत्वारः समाधिस्थस्य वाग्मिमाः श्रुति
तस्य त्रयः प्रोक्ताः स्थितप्रज्ञस्य भागशः ९ तमेवैतादृशं ग्रंथं रहस्यव
क्तुमर्हसि सर्वांतर्यामिभावेन सर्वसामर्थ्यवान् हरिः १० श्राकृयन्को
धावेत्येवं सूचयत्यर्जुनः सुधीः ११ ५४ ॥

नीलकंठीटीका

लब्धसमाधेः स्थितप्रज्ञापरनाम्नो लक्षणानि बुभुत्सुरर्जुन उवाच
स्थितप्रज्ञस्येति स्थिता प्रत्यगात्मनि प्रतिष्ठिता प्रज्ञा यस्य तस्य स्थित
प्रज्ञस्य समाधिस्थस्य समाधौ स्थितस्य का भाषा भाषणं वचनं कथ
मसौ परैर्भाष्यते इत्येकः प्रश्नः स्थितधीः स्थितप्रज्ञः स्वयं वा व्युत्थितः स
न् किं प्रभाषेत कथं वदति कथमास्ते कथं वा व्रजति विषयान् भुंजानः
ति प्रश्नत्रयम् ५४ ॥

आनंदीटीका स्थितप्रज्ञस्य समाधिस्थस्य लक्षणमत्र गाह्वत्तर्जुन उवाच +

+ अथैनेन तदा मतिः स्थास्यतीति भगवद्वचनं श्रुत्वा

+ का भाषा सज्ञा किं प्रभाषेत किमयं वक्ति किमासीत केन व्यापारे ५४
गानिष्पत्ति किं व्रजेच्च किं प्राप्नुयात् पतेद्वाजरथितं भगवानुवाच

रामकंठीटीका

हे भगवन् केशव कर्मसु किल कौशलं योग उक्तो निश्चलप्रज्ञता च
स्थितप्रज्ञता तदेवंविधस्यास्य स्थितप्रज्ञस्य का भाषा कथमसौ भा
षते किमस्य व्याख्यानं विरुद्धमिवास्यैवेष्टितम् यतो वाङ्मनःकाये
स्त्रिभिर्व्यापाराणां कर्मोच्यते तानि सोपि चेष्टनास्योपपद्यते कि
मसौ भाषेत भाषणं क्रियां वा न तिष्ठेत् नाप्स्येकतत्र निश्चलप्रज्ञ

गी॰
टी॰
२

ताद्राषणां वचनकर्मोपपद्यते किमसौ व्रजेत् गमनक्रियोपलक्षितं
कायव्यापारमाचरेत् सोप्यस्य सर्वं वक्ष्योपपद्यते अत आसीत वाङ्
नमप्रचारपरिहारेणान्तर्येव ह्न्यातिष्ठेत् साप्यस्य कर्मकौशलं लक्ष
णोयोगे वर्तमानस्योभयकर्मनिरूत्वात्मिकानोपपद्यते इति स्वरूपा
नवधारणात्कामस्य भाषेनकर्मेतत्त्वप्रश्नत्रयमविवतितकर्मक
क्रियामात्रविषयं वारितव्यमपरस्य सर्वे समारंभा इत्यादौ बुद्धिम
क्ष्येनोक्तस्य स्थितप्रज्ञस्य स्वरूपमक्षुण्णायमपि दृष्टिगम्यमवास
म्यागनवधारितमिदानीकेनाप्युक्तेन विशेषणेन तस्यमानमव
धारयेतर्जुनेनोपयितं भगवानाह ५५ ॥

लास्रकी टीका

यदातेमतिःस्यात्पत्तीनि प्रश्नबीजं लब्धा स्थितप्रज्ञस्य लक्षणं बुभु
त्सयार्जुन उवाच । स्थितानिश्चला विकल्परविकंपा प्रज्ञा यस्य आत्म
विषयो बोधो यस्य स स्थितप्रज्ञो वस्याद्वयवान् समाधिस्थो बुभु
स्थितश्चेति समाधिस्तस्य स्थितप्रज्ञस्य का भाषा भाष्यते नयेति
भाषा लक्षणं किम् सएव बुद्ध्यानयास्थितचित्तः स्थितप्रज्ञः स्वतिनिंदा
रागद्वेषादि लक्षणं कथं प्रभाषेत सर्वत्र संभावनायां लिङ् ।
किमासीत कथं बहिरिंद्रियाणां निग्रहं करोति किंव्रजेत कथं
विषयान्याप्नोति प्रश्नविलक्षणानि तस्य भाषणासनव्रजना
निकीदृशानीत्यर्थः ५५ ॥

पंचोलीटीका

प्रश्नबीजं प्रतिलभ्य लब्धसमाधिप्रज्ञस्य लक्षणं बुभुत्सया
अर्जुनमाह स्थितःप्रज्ञस्येति अहमस्मि परब्रह्मेति प्रज्ञा प्रति
ष्ठिता यस्य स स्थितप्रज्ञः तस्य का भाषा कथ्यमन्यैर्वाच्यः समाधौ
आत्मनि स्थितस्य च का भाषा स्थितधीः स्थितप्रज्ञः किं वा किं कि
मासीत तस्यासनं कथं व्रजनं वा कथं ५५

रशलवीरसमिद्धेयिनी॥

स्थितप्रज्ञस्येति यदास्यास्यतिबुद्धिरित्यनेनवचसा समाधिस्थ
स्यधनुर्विद्यानिष्टस्यकर्मयोगिनो वाचकोयः स्थितप्रज्ञमाहउक्त
त्तस्यकाभाषाभाषतेयेननिमित्तेनसाहैरर्थइतिकृत्वाकिंप्रहति
निमित्तं धनुर्विद्यानिष्टस्यस्थितप्रज्ञमाहः किंदृष्ट्वावाचकः प्र
न्वर्थतयावेत्येकःप्रश्नः स्थितधीरिति माहपदार्थकोर्थपदार्थ
कस्य तत्रस्थितधीमाहः किंप्रयोगलक्षणमेवार्थमाह श्रादे
स्विदन्यंतपस्यादिकमपीति द्वितीयःप्रश्नः सचस्थितधीः कि
मासीत किमभ्यस्येत् कास्यस्थैर्यंस्यादितितृतीयःप्रश्नः प्रभ्या
स्यश्च किमाभ्रयादितिचतुर्थःप्रश्नः ५४॥

मधुभाष्य

५४॥

349

भाषा अनुवाद

पूर्व श्लोकमे कहा जो आत्मतत्त्वज्ञानी का लक्षण सो जानने
की इच्छा करि अर्जुन पूछते हैं कि हे केशव अनायास लभ्य स
माधि मे स्थितजो निश्चल बुद्धि स्थित प्रज्ञ पुरुष उसका क्या ल
क्षण है अर्थात् कैसे उसको जानै तात्पर्य यह है कि कैसे लक्ष
ण होनेसे किस आचरण से स्थिरप्रज्ञ होता है और पूछते कि ।
ज्ञानी कैसे बोलते बैठते और कैसे चलते फिरते रहते है ५४

अर्जुनवाक्य दोहा॥

क्या भाषा स्थित प्रज्ञ की कृष्ण समाधि स्थित जोय भाषें का
स्थितबुद्धि है किम बैठें चलें सोय ५४॥

श्रीभगवानुवाच प्रजहातियदाकामान्सर्वान्पा
र्थमनोगतान् आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्त
दोच्यते ५५ ॥

शांकरभाष्यं

स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन इच्छति योह्यादितएव संन्यस्य
कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तोयश्चकर्मयोगेन तयोःस्थितप्रज्ञ
इति प्रजहातीत्यारभ्याध्यायपरिसमाप्तिपर्यंतं स्थितप्रज्ञलक्षणं ।
साधनंचोपदिश्यते सर्वत्रैव ह्याध्यात्मशास्त्रे कृतार्थलक्षणानि या
नितान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वात् यानियत्नसाध्यानि
साधनानि लक्षणानि भवन्तितानि श्रीभगवानुवाच प्रजहातीति
प्रजहाति प्रकर्षेण जहाति परित्यजति यदायस्मिन् कालेसर्वान्
समस्तान् कामान् इच्छाभेदान्हे पार्थमनोगतान् मनसि प्रवि
ष्टान्हृदिप्रविष्टान् सर्वकामपरित्यागेतुष्टिकारणाभावाच्छरीरधा
रणनिमित्तशेषेच सत्युन्मत्तप्रमत्तस्येव प्रवृत्तिः प्राप्तेत्यतउच्यते
आत्मन्येव प्रत्यगात्मस्वरूप एवात्मना स्वेनैव बाह्यलाभनिर
पेक्षस्तुष्टः परमार्थदर्शनामृतरसलाभेनान्यस्मादलं प्रत्ययवान्
स्थितप्रज्ञः स्थिताप्रतिष्ठितात्मानात्मविवेकजा प्रज्ञा यस्यसस्थि
तप्रज्ञो विद्वांस्तदोच्यते त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्मारा
मः आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः ५५

आनंदगिरिकृतटीका

प्रश्नान्तराणि व्याख्याय वाक्यार्थमाह स्थितप्रज्ञस्येति प्रतिवचनम
वतारयितुं पातनिकांकरोति योहीति हिशब्देन कर्मसंन्यासकार
णीभूतविरागतामस्यातिः सूच्यते आदितोब्रह्मचर्यावस्थायामिति ।
साधनज्ञानमेव योगीवलक्षणभावप्रापकत्वात्तस्मिन्निष्ठापरिसमाप्ति

गी०
टी० हि०

त्रस्यामित्यर्थः कर्मैव योगस्तेन कर्मयोगेण संन्यस्य तन्निष्ठायामेव प्रवृत्त
इति शेषः ननु तत्कथमेकेन वाक्येनार्थद्वयमुपदिश्यते द्वैयार्थे वाक्य
भेदान्नैवं लक्षणामेव साधने कृतार्थलक्षणस्य तत्स्वरूपत्वेन फलत्वे ।
साधनत्वानुपपत्तेरिति तत्राह सर्वत्रैवेति यद्यपि प्रकृतार्थस्य ज्ञानिनो ल
क्षणानि तद्रूपाणि फलत्वेन साधनत्वमपि गच्छन्ति तथापि जिज्ञासोर
स्त्वेव प्रयत्नसाध्यतया साधने सम्पद्यते लक्षणं चात्र ज्ञानसामर्थ्यल
मनूद्यते न विधीयते विरोधो विधिनिषेधागोचरत्वात्तेन जिज्ञासोः सा
नानुष्ठानाय लक्षणानुवादादेकस्मिन्नेव साधनानुष्ठाने तात्पर्यमित्य
र्थः उक्तेऽर्थे भगवद्वाक्यमवतारयति यानीति लक्षणानि च ज्ञानसा
ध्यत्वभावान्यप्रयत्नसाध्यानीति शेषः स्थितप्रज्ञस्य का भाषेति प्रथम
प्रश्नस्योत्तरमाह प्रजहातीति कामस्त्यागस्य प्रकर्षो वासनाराहित्यं का
मानामात्मनिष्ठत्वं केचिदिच्छन्ते तद्युक्तं तेषां मनोनिष्ठत्वश्रुतेरि
त्याशयवानाह मनोगतानिति आत्मन्येवात्मनेत्याद्युत्तरभागमिति
न्वयमनुवदति सर्वकामेति. तर्हि प्रवर्तकाभावाद्धि देहः सर्वप्रवृत्ति
पर्यन्तिरितिनेत्याह शरीरेति उन्मादस्वान्तमत्तो विवेकविरहितत्वं भ्रा
भ्रमभागी प्रकर्षेणामदत्वं भवन् विद्यमानमपि विवेकं निरस्यन् उ
न्मत्तवद्व्यवहरन् प्रमत्त इति विभागः उत्तरार्द्धमवतार्य व्याकरोति हे
त्वन्तरइति आत्मन्येवेत्येवकारस्यात्मनेत्यत्रापि संबन्धं द्योतयति स्थित
वेति बाह्यलाभनिरपेक्षत्वेन तुष्टिमेव स्पष्टयति परमार्थेति स्थित
प्रज्ञं विभजते स्थितेति प्रज्ञाप्रतिबन्धक सर्वकामविरामावस्था
देति निर्दिश्यते उक्तमेव प्रपंचयति त्यक्तेति आत्मानं जिज्ञासमानो
गमपद्वारा सर्वेषणात्यागात्मकं संन्यासमासाद्य श्रवणाद्यावृत्त्यात्म
ज्ञाने प्राप्ते तस्मिन्नेव वासनाविषयवैमुख्येन तत्फलमनुपति ॥ ५५ ॥
ष्टिं तत्रैव प्रतिलभमानः स्थितप्रज्ञव्यपदेशभागीत्यर्थः

प्र०

स्वामिकृतटीका

अथ व साधकस्य यानि ज्ञानसाधनानि तान्येव स्वाभाविकानि सिद्धलक्ष
णानि अतः सिद्धस्य लक्षणानि कथयन्नेवांतरंगाणि ज्ञानसाधनान्या

ह यावदध्यायसमाप्ति तत्र प्रथमप्रश्नोत्तरं प्रजहातीति द्वाभ्यां श्रीभगवा
नुवाच मनसि स्थितान् सर्वान् कामान् यदा प्रकर्षेण जहाति त्यागे हेतुः
आत्मन्येव स्वास्मिन्नेव परमानन्दरूपे आत्मना स्वयमेव तुष्ट इति आत्मारा
मः सन् यदा तद्विषयाभिलाषं त्यजति तदा तेन लक्षणेन मुनिः स्थि
तप्रज्ञ इत्युच्यते इत्यर्थः ५५ ॥

पिशाचभाष्यं

स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छते स्थितप्रज्ञस्येत्यारभ्याध्याय
परिसमाप्तेः स्थितप्रज्ञस्य लक्षणं साधनं चैव उपदिश्यन्ते सर्वत्राध्या
त्मशास्त्रे लक्षणानि यानि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वा
त् यानि यत्नसाध्यानि लक्षणानि सर्वत्राध्यात्मशास्त्रे विधीयन्ते अतस्तल्ला
न्येव साधनानि भगवानुवाच प्रजहाति प्रकर्षेण जहाति परित्यज
ति यदा कामानिच्छाभेदान् हे पार्थ मनोगतान् मनसि प्रविष्टानात्मन्ये
व प्रत्यगात्मस्वरूप एव आत्मना स्वेनैव बाह्यलाभनिरपेक्षः तुष्टः पर
मार्थदर्शनामृतरसलाभेनान्यस्मिन्वस्तुनि अलंप्रत्ययवान् स्थितप्र
ज्ञः स्थिता प्रज्ञा आत्मानात्मविवेकजा प्रज्ञा यस्य सः स्थितप्रज्ञो वि
द्वान् आत्मारामः आत्मक्रीडावान्
हामलेशोच्यते त्यक्तपुत्रवित्तलाभस्यासौ
स्थितप्रज्ञ इत्यर्थः ५५ ॥

रामानुजभाष्यम्

हविशिष्टेष्वकथनेन स्वरूपमभिव्यक्तं भवतीति इति विशेषव्यते
आत्मन्येवात्मना मनसात्मैकावलंबनेन तुष्टः तेन तोषेण तदति
रिक्तान् सर्वान् मनोगतान् कामान् यदा प्रकर्षेण जहाति तदायं स्थि
तप्रज्ञ उच्यते ज्ञाननिष्ठाकाष्ठेयं ५५ ॥

अभिनवगुप्तकृतटीका

एतदेव प्रश्नचतुष्टयं क्रमेण निर्णीयते श्रीभगवान् स्थिताहृदाप्रज्ञाय
स्य शेषमनित्यमात्मरूढिते सति विषयविलेपकृतस्य कामरूपस्याप्र
मस्यानिहृत्तमात् योगिनो यः स्थितप्रज्ञ ग्राहो न यथा सचैवं प्रकाशते एकः
प्रशान्तिरागीनः ५५ ॥

परमार्थप्रपाटीका

गी॰
टी॰ द्वि॰

तत्रभगवानक्रमेणोत्तरंददाति प्रजहातीतियावदध्यायसमाप्ति। भोपार्थम
नोगतान् सर्वान्कामान्प्रजहातिआत्यंतिकत्वेनवा[illegible]वस्यजतितर्हिना
हितिरालेवमनःस्यात् शक्योतोत्याहआत्मनेति आत्मन्यानंदघनेआत्म
नास्वयमेवतुष्टः आत्मस्वरूपानुभवेनतुष्टः अनपवत्सुखानंदेभ्योनिवृत्तः
पताहंसीरश्रायदातदा[illegible]तप्रज्ञइत्युच्यते अत्रप्रज्ञाशब्देनविज्ञानेपवं
[illegible]रीभूतविज्ञानोजीवन्मुक्तःइत्यर्थः श्रुतिरपियदासर्वेप्रमुच्यंतेका
मानस्यस्यहृदिश्रिता अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुत इति अत्रै
वदेहेब्रह्मानंदमनुभवतीत्येषोर्थः ५५

वनमालीटीका

कामानकामादीनमनोगतान् अविद्यासहकृतस्वामित्वादिसंबंधेनजी
वेवर्तमानान् प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदेनतत्रोतेरप्र
योक्तानसर्वान्प्रकर्षेणनिःशेषतयाजहातिहानेहेतुर्मनोगतानय
त्रैवमनसिकामादयउत्पद्यंतेतत्रैवब्रह्माकाराकामादिविरोधिनीवि
तिरुत्पन्नेतिभवतितेषांनाशःज्ञानस्यकामादिनाशकत्वेतुरसोप्यप
रंदृष्ट्वानिवर्ततइतिसप्रतिवक्ष्यति ननुस्थितप्रज्ञस्यस्वप्रसादः
लिंगगम्यः संतोषविशेषःप्रतीयते सर्वकामत्यागेकथंस्यादिति
तत्राहआत्मन्येवपरमानंदस्वरूपेनंतगुणालयेमयिमत्प्रसादावि
र्भूतपरमानंदस्वस्वरूपेवाआत्मनामनसासंतुष्ट इतोमेलाभोनास्ती
तिमन्वानैवातिष्ठतः यदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताः अथमर्त्यो
मृतोभवत्यत्रब्रह्मसमश्नुत इतिश्रुतेः तथाचस्मएवंविधलक्षणा[illegible]
दिशष्टैभाषितइतिप्रथमप्रश्नोत्तरम् ५५ ॥

कुसुमवैजयन्तीटीका

ज्ञाननिष्ठस्यापरपर्यायस्यस्थितप्रज्ञस्यस्वरूपंतज्ज्ञानसाधनंचेतः
प्रमत्वथायान्तेनग्रंथेनाह तत्रचादौतस्यापिकमुनदर्शितेनाधिक
सूलस्वरूपत्वस्य सर्वसर्वस्माद्दुत्तरोत्तरगावरत्वेनचतुर्विधत्वंचतुर्भिःप्र
जहातीत्यादिभिर्भगवानुवाच प्रजहातीति हेपार्थयदाययस्मिन्काले
वस्थायांवाआत्मनाकामसंकल्पवर्जितेनमनसात्मन्येवस्वरूपेप
वाल्पयोगाभ्यासवशेनकाराकारिनेत्दहापत्यकलत्रादयः सर्वेप्राक

नभोगावस्थैते तुष्टः संतुष्टः सन् पुरुषो मनोगतान् रागजन्मनाम स्मा
दिभ्रान्तवर्णितानानो ब्रह्मलोकेंद्रादिलोकगतभोगानां श्रवणानमना
सि प्राप्तान् सर्वान् कैवल्यपर्यंतानपि समस्तान् कामान् प्रजहाति प्र
कर्षेण त्यजति तदा सोयं पुरुषः स्थितप्रज्ञ उच्यते ज्ञाननिष्ठासीमा
कष्ठ्यते पार्थेति संबोधनेन यथा निष्कामात पशुनीयपतिव्रताष्टः
ष्ठाभर्तरान्तयैव वैशाप्यमेव यमदीनाराध्य पृथिष्ठिरादीन् त्यायम्भो
गकामांस्त्यक्त्वा स्वस्मिन्नेव संतुष्टः सन् स्थितप्रज्ञो भव तथा तस्य च त
मपि मद्वाक्यैव मत्प्राप्त्यर्थमेव सर्वात्माकृतविषयकामनोगता
न्कामान् जहासि चेत् स्थितप्रज्ञो भविष्यसीति सूचितम् ५५ ॥

+ एतेषां चतुर्णां प्रश्नानां क्रमेणोत्तरं भगवानुवाच यावद ध्यायसमाप्ति +

मधुसूदनीटीका

+ कामान्काममसंकल्पादीन्मनोवृत्तिविशेषान्प्रकर्षेण कारणबाधेन
यदा प्रजहाति परित्यजति सर्ववृत्तिशून्य एव यदा भवति स्थितप्रज्ञ
स्तदोच्यते समाधिस्थ इति शेषः कामानामनात्मधर्मत्वेन परित्या
गयोग्यतामाह मनोगतानिति यदि ह्यात्मगताः स्युस्तदा न त्यक्तुं
शक्येरन् वह्न्यौष्ण्यवत्स्वाभाविकत्वात् मनसस्तु धर्मा एते तत्परि
त्यागेन परित्यक्तुं शक्या एवेत्यर्थः ननु स्थितप्रज्ञस्य सुखप्रसादलिं
गगम्यः संतोषविशेषः प्रतीयते स कथं सर्वकामपरित्यागे स्यादित
तत्राह आत्मन्येव परमानंदरूपेण न त्वनात्मनि तुच्छे आत्मना स्वप्रका
शचिद्रूपेण भासमानेन न तु वृत्त्या तुष्टः परितृप्तः परमपुरुषार्थ
लाभात् तथा च श्रुतिः यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति तथा च समाधिस्थः
स्थितप्रज्ञ एवंविधैर्लक्षणैर्वाचाभिधेयो भाष्यत इति प्रथमप्रश्नस्यो
त्तरम् ५५ [illegible]

[illegible] ५५ ॥

सदानंदीटीका

कामान्संकल्पमुख्यान्नैम

एषां चतुर्णां प्रश्नानां क्रमेणाहोत्तरं हरिः

नोहृद्यात्मकान्यदा १ सर्वान्कामानापेन जहातीतानशेषत: सर्वं
कामविनिर्मुक्तो यदा भवति निश्चल: २ स्थितप्रज्ञ: समाधिस्थस्तदा वै
प्रोच्यते मति: कामाश्चनात्मधर्मत्वात्त्यक्तुं योग्या अशेषत: ३ यद्येतेषा
त्मधर्मा: स्युस्त्यक्तुं शक्या: कथं तदा वैशेष्यस्य तत्स्वभावत्वात्स्वभावोऽ
तिक्रम: ४ मनोधर्मा यतस्ते त्यक्तुं शक्या: स्वावेन ते तन्निरोधेन
ते सर्वे निरुद्धा: संति वै यथा ५ तस्मादेनं तथात्मकास्तद्धर्मा: स्युर्न
घात्मका: नतु स्थितप्रियमल्हिं संतोष: किंनिबंधन: कामत्यागी भ
वेदित्याकांक्षायामाह केशव: आत्मन्येव परानंदे नव नाम निजव
के ७ आत्मना स्वप्रकाशत्वात्समानेन वित्तत: परितुष्ट: सदानंदघ
रूपार्थैकलाभत: ८ स्थितप्रज्ञ: समाधिस्थ एवं लक्षणवान्विभि: ॥
शब्दैर्भाष्यत इत्याचप्रश्नोत्तरमुदाहृतम् ९ ५५

नीलकंठीटीका

पतेषां क्रमेणोत्तराण्याह भगवान् प्रजहातीत्यादिना अष्टयास्येव कृ
तार्थलक्षणानि तानि ज्ञानसाधनानीति मत्वा उपदिश्यंते स्थितप्रज्ञ
लक्षणानि तेषामकृतार्थे प्रयत्नसाध्यत्वात्कृतार्थे तु स्वाभाविकत्वा
त् यथोक्तं उत्पन्नात्मप्रबोधस्य त्वद्वेष्टृत्वादयो गुणा: भवंत्ययत्नतस्त
स्य न तु साधनरूपिण इति यदायं योगी सर्वान्स्थूलसूक्ष्मकारणश
रीरभोग्यान्कामान्काम्यमानान्विषयान्प्रकर्षेण सम्मूलं जहाति
त्यजति कीदृशान्कामान्मनोगतान् मनस्येव संकल्पविकल्पा
त्मके स्थितान्न तु बहि: यथोक्तमन्नपादाचार्यै: दोषनिमित्तं रूपा
दयो विषया: संकल्पकृता इति तत्र स्थूलानां कामानां त्याग एकांतसेवा
नमात्राद्भवतीति सूक्ष्माणां विलीनकरणाय ग्रामस्य समनंतरूपं नादि
प्रहामनामया: स्वप्ने ये कामा: स्फुरंति तेषामपि त्यागो भगवत्स्वरूप
रूपमहामनाभ्यासबलेन भवति येन प संहृतकरणस्य संप्रज्ञातस
माधिकाले दिव्या: कामा: संकल्पमात्रोपनता दृश्यविमानादिरूपास्त
षामपि त्यागो असंप्रज्ञातसमाध्यभ्यासबलेन भवति एवं त्रिविधान
कामानत्यक्त्वा आत्मन्येवात्मवैकरसे आत्मना स्वेनैव स्वरूपानंदेन तुष्ट:

बाह्यविषयनिरपेक्षो यदा भवति तदायं स्थितप्रज्ञ इत्युच्यते ५५ ॥

आनंदटीका

कामान्बाह्याध्यविषयान्नानासंकल्पान्यदा त्यजति आत्मन्येव परमात्मस्वरूपे एवात्मनांतःकरणेन तुष्टः परमात्मज्ञानैकप्रवणः तदा स्थितप्रज्ञ उच्यते [illegible] ५५ ॥

रामकंठीटीका

इहाखिलसर्वरहस्यानामुपनिषद्भूतेस्मिन्विज्ञाने कस्मिंश्चिदेव लब्धे षु कोजन्मसहस्रपरिशीलितपर्यवभाते कात्मनापरामृष्टजन्तुमो मयमलनयासतमात्रप्रोषवेसति ममपजानस्वरूपप्रत्यवमर्षयो गपमन्नस्मरमजन्माद्युक्तघातिशयोपिकारी यस्त्याविधावसरोपजा तानुनिचूडापरमेश्वरप्रेषिताभ्यां सततसहचरीभ्यां भक्तिश्रद्धाभ्यां दत्त परमका दृष्टहस्तावलंबो यथोक्तज्ञानतिः श्रेणीस्थिरनिवेशित परमकारुणिकः यश्रुदि रागसमापत्तिमतिविश्वरूपं परमेधामाधिरोढुमध्यवसितः कश्चिय प्रपात्मतत्त्वमेवाहं तयाप्यपदिश्यत् वसति मनुष्याणांसहस्रेषु कश्चिद्यतति सिद्धये यततामपिसिद्धानां कश्चिन्मांवेत्तितत्त्वतः इति तथा बहूनां जन्मनामंतेज्ञानवान्मां प्रपद्यते इत्यादि तादृशस्य मनसो दृमावर्तितेदा नः कामान स्थितप्रज्ञो भवति किमाचरति यदा मनोगतान्संकल्पवर्तिनः कामान प्रकर्षेण त्यजति मना नत्वज्ञात्वेषयकर्मफलभक्तान्स्वाबादीन्प्रजहाति कथमेतत्संभवति कर्मा गपितान्संकल्पयति न तु कर्माणि प्रजहाति इत्येतदुपपादयितुं विशेषणमाह आ णांकरोति फलं च प्रजहाति इत्येतदुपपादयितुं विशेषणमाह सर्वः कश्चित्सुखं विदधिकारिणां तोषं प्रीतिम त्मन्येवात्मनातुष्ट इति सर्वः कश्चित्सुखसाधनभूते नपरप्राप्येन सुखसाधनभूते तुभवति किन्त्वप्राप्तपूर्वेणाकेनविदंतिमेन प्राप्तेन सन्निहि तुभवति किन्त्वप्राप्तपूर्वेणाकेन विदति येन प्राप्नोति अयं तु योगी सततसन्निहि नवस्तुना प्राप्तेनानित्यमेवतोषं प्राप्नोति परमं भावमात्रात्मावधानमिवश्ना तानस्तमितचित्प्रकाशात्मना परमशिवमहिमनारविलवस्तुसंहारविच्छेदकावि मेनतर्वदास्रावसंपूर्णस्वमहिमनारवि

गी॰ टी॰ टि॰

गां मास्वयेनिहितविस्तरेणेनमहानियानेनैवपुनः प्रमुदितस्मृति वशात्स्वतिलब्धेनात्मनैवसत्येनस्वभावेननिरुत्तरेणलाभेनलब्धस ह्रजानंदः एवंविधत्वायेहरूपंप्रार्थनीयानुत्पादविनाशायमेकान्कामा न्कथंनप्रजह्यात यदाचेत्थंभूतःसन्कामान सर्वकर्माणिऊर्ध्वमपिप्र जहाति तदास्थितप्रज्ञोयथोक्तस्वभावलब्धप्रतिष्ठबुद्धिर्भवतीति

५५ ॥ ॥

लासिकी [illegible] टीका

तदेवंचत्वारःप्रश्नाः समाधिस्थास्थितप्रज्ञेपकः स्थास्थितास्थितप्रज्ञे मयइतिएतेषांचत्वर्णांप्रश्नानांयावदध्यायसमाप्तिउत्तरंश्रीभग वानुवाचेति प्रमाणविपर्ययविकल्पनिद्रास्मृतिभेदेनपंच धोक्ताःसर्वेषांनिरवशेषतयायस्मिन्कालेजहाति चित्तवृत्तिरू न्पएवयदाभवति समाधिस्थःस्थितप्रज्ञस्तदोच्यते कामानाम नात्मधर्मतयाशक्यत्यागतामाह मनोगतानिति मनोधर्मोप वैते नत्वात्मधर्माःप्रतस्त्यक्तुंशक्याइत्यर्थः ५५ ॥ इतिसूत्र्यत्वेन [illegible]

कामान्संकल्पभेदान्
मनोवृत्तिविशेषान्
इत्याह आत्मन्येवपरमानंदरूपेणवदेहादीन्आत्मनेवन

मनोहृत्याः [illegible] तथाचश्रुतिः यदा [illegible] कामायेस्यहृदिस्थिताः अथमर्त्योऽमृतो [illegible] मश्नुतेइति एवंसमाधिस्थस्थितप्रज्ञलक्षण [illegible]

पंचोलीटीका

यत्नसाध्यत्वातयानियत्नसाध्यानिसाधनानिलक्षणानिच भवंतितानिभगवानाह प्रजहातीति हेपार्थयदामुनिःसं न्यासीमनोगतान्मनसिस्थितान्सर्वान्कामान्इच्छाभेदान् प्रजहातिआत्मन्येवप्रत्यगात्मनिःआत्मनापरमात्मनापरमा त्मदर्शनामृतलाभेनतुष्टःतदास्थितःप्रज्ञउच्यते ५५

रणवीरसमिद्धोधिनी॥

एतत्प्रश्नचतुष्टयंचक्रमेणनिर्णीयते भगवता तत्रादौकाभाषे तिप्रश्नंसमर्थयतिप्रजहातीत्येकेनसर्वान्मनोगतान्कामानव श्लेषानुपपत्तिदृत्वास्वजनमाहवे श्रत्यादिरूपान्संकल्पान्यदा त्यजति आत्मनास्वयमेवहिनसंपाद्यवाद्यनिरपेक्षयेवश्रा

त्मन्येव आत्मायत्तोधृतिर्बुद्धिः स्वभावोब्रह्मस्वधर्मैवेत्यनुभासना
त्. प्रहृतिरूपे प्रयत्ने धृतौ वा तुष्टः तदा स्थितप्रज्ञ उच्यते स्थिताद्
फलप्रज्ञाय योक्तनिश्चयात्मिका बुद्धिरस्येति व्युत्पत्त्या तत्त्वा कर्म
योगिनो वाचकत्वायः स्थितप्रज्ञ प्राहः सचेत्यं प्रकृत्येकः प्रश्नः
समर्थितः ५५॥

मधुभाष्य

५५॥

भाषा अनुवाद

श्रीभगवान बोले कि हे अर्जुन सुनो जिनको साधक लोग ज्ञान साधन के निमित्त यत्नपूर्वक साधना करते हैं वेई सिद्धके स्वाभाविक कहे स्वभाव सिद्ध लक्षण हैं इससे अब सिद्धके लक्षण कहने के अनन्तर ज्ञानके साधन अध्याय की समाप्ति पर्य्यन्त कहते हैं तिनमे से प्रथम दो श्लोकसे पहिली प्रश्नका उत्तर करते हैं कि हे अर्जुन मुनिजन मनोगत सकल कामना जब अच्छी तरहसे त्याग करते हैं कि अपने परम आनंदरूप आत्मामे जो रमे सो आत्माराम अर्थात आप अपने आत्म सुख मे संतुष्ट होते हैं तिससे जब दृढ़ विषय अभिलाष छोड़ते हैं तब उसी लक्षण सेमुनि स्थितप्रज्ञ कहे जाते हैं ५५॥

दोहा

तजैं पार्थ जब कामना मनमे गत है जोय आपहि आपमें
तुष्ट है स्थितमति कहो सोय ५५॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६

शांकरभाष्यं

किंच दुःखेष्विति दुःखेष्वाध्यात्मिकादिषु प्राप्तेषु नोद्विग्नं न प्रक्षुभितं दुःखप्राप्तौ मनो यस्य सोयमनुद्विग्नमनाः तथा सुखेषु प्राप्तेषु विगता स्पृहा तृष्णा यस्य नाग्निरिवेन्धनाद्याधाने सुखान्यनुवर्द्धते स विगतस्पृहः वीतरागभयक्रोधः रागश्च भयंच क्रोधश्च वीता विगता रागभयक्रोधा यस्मात् स वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञो मुनिः संन्यासी तदोच्यते ५६॥

आनंदगिरिकृतटीका

लक्षणभेदानुवादद्वारा विविदिषोरेव कर्त्तव्यान्तरमुपदिशति किंचेति ज्वरशिरोरोगादिकृतानि दुःखान्याध्यात्मिकानि आदिशब्देनाधिभौतिकानि व्याघ्रसर्पादिप्रयुक्तान्याधिदैविकानि वातवर्षादिनिमित्तानि दुःखानि गृह्यंते तेषूपलब्धेष्वपि नोद्विग्नं मनो यस्य स तथेति संबंधः नोद्विग्नमित्येतद्व्याचष्टे न प्रक्षुभितमिति दुःखानामुत्कानां प्राप्तौ परिहाराक्षमस्य नरकभवपरिभावितं दुःखमुद्वेगेन सहितं मनो यस्य न भवति स तथेत्याह दुःखप्राप्ताविति मनो यस्य नोद्विग्नमिति पूर्वेण संबंधः सुखान्यपि दुःखवत्त्रिविधानीति मत्वात यत्सुखकं तेषु प्राप्तेषु सत्सु तेभ्यो विगता स्पृहा तृष्णा यस्य स विगतस्पृह इति योजना अत्र स्पृहिप्राप्तानि सुखान्यनुविवर्द्धते तस्मा विदुषल नैवमित्यत्र वैधर्म्यदृष्टान्तमाह नाग्निरिवेति यथा हि दारुष्विन्धनादेरन्धनाधाने वह्निर्विवर्द्धते तथा तस्य सुखान्युपगतान्यत्र विवर्द्धमानापि तस्माद्विदुषो न तान्यपि न विवर्द्धते न हि वह्निर्दाह्यमुपगतमपि दान्ते विवृद्धमधिगच्छति तेन जिज्ञासुना सुखदुःखयोस्तत्सोद्वेगेन कर्त्तव्याविति अर्थः रागादयस्तेन कर्त्तव्या न भवंतीत्याह वीतेति अत्र मताभिनिवेशो विषयेषु रंजनात्मकलक्षणाभेदो रागाः परोगायकृता

श्री॰
गी॰टी॰
टि॰

357

स रागश्चेनेत्रादिविकारकारणं भयं क्रोधस्तु परवशीकृत्यात्मानं स्वप रापकारप्रवृत्तिहेतुर्चेद्वृत्तिविशेषः नन्वेतेषु मुनिरात्मविदित्यंगी कृत्याह सन्यासीति सावदुःखादिविषयत्वात्तद्रागादेश्चाभवावस्थात देत्युच्यते ५९

स्वामिकृतकृतटीका

किंच दुःखेष्विति दुःखेषु प्राप्तेष्वपि अनुद्विग्नमक्षुभितमनो यस्य सः सुखे षु विगता स्पृहा यस्य सः तत्र हेतुः वीताः अपगता रागभयक्रोधा यस्मा त्तत्र रागः प्रीतिः स मुनिः स्थितधीः स्थितप्रज्ञ उच्यते ५९

पिशाचभाष्यम्

किंच दुःखेष्विति दुःखेषु आध्यात्मिकादिषु अनुद्विग्नमप्रक्षुभितं मनो यस्य सोनुद्विग्नमनाः तथा सुखेषु प्राप्तेषु विगतास्पृहा तृष्णा यस्य ना ग्नेरिवेंधनाद्याधाने न सुखान्यनुवर्तते स विगतस्पृहः वीतरागभयक्रो धः रागश्च भयं च क्रोधश्च विगता यस्मात्स वीतरागभयक्रोधः स्थि तधीः स्थितप्रज्ञः मुनिर्मननशीलस्तदोच्यते ५९ ॥

रामानुजभाष्यम्

अंतरं निष्कम्पततोर्वाचीनात्सदृशविष्टावस्थोच्यते प्रियविश्लेषादिदुःख निमित्तेषूपस्थितेष्वनुद्विग्नमनाः न दुःखी भवति सुखेषु विगतस्पृहः प्रि येषु संनिहितेष्वपि निस्पृहः वीतरागभयक्रोधः अनागतेषु स्पृहा रागस्तद्रहितः प्रियविश्लेषाप्रियागमनहेतुदर्शननिमित्तं दुःखं भयं त द्रहितः प्रियविश्लेषाप्रियागमनहेतुभूतचेतनांतरगतदुःखहेतुः स्वमनोविकारः क्रोधस्तद्रहितः एवंभूतो मुनिरात्ममननशील स्थितधीरुच्यते ५९ ॥

अभिनवगुप्तकृतटीका

सावदुःखयोर्यस्य रागद्वेषरहिता वृत्तिः स मुनिरेव स्थिरप्रज्ञो नान्यः

परमार्थप्रपाटीका

अथ्यात्मरागदुःखेष्विति दैवात्म्यामेषु दुःखेषु अनुद्विग्नमनाः नोद्वि ग्नं हेयगामात्मं मनो यस्य स तथा नचैव प्राप्तेषु सुखेषु विगतस्पृहः ।

घस्य

ध्रनादरः स्थितप्रज्ञस्य भवेद्धेतमाह वीतरागा इति सष्टम् ५६॥

वनमालीटीका

किंप्रभाषेतेत्यस्योत्तरमाह दुःखेष्वितिद्वाभ्यां दुःखेषुज्वररोगादिहेतु
केष्वाध्यात्मिकेषुव्याघ्रादिहेतुकाधिदैवेषुप्रारब्धपापकर्मप्रापितेषु
नोद्विग्नंतत्परिहाराक्षमतयानव्याकुलंमनोयस्यसः अविवेकिनो
हिदुःखप्राप्तौपितुःसंतापोमेदुःखमीदृशोनिराकर्तुमीदित्यनुतापात्म
कस्तामसश्चित्तस्यवृत्तिविशेषउद्वेगोजायते तथासुखेषुसत्वगुण
हेतुकचित्तवृत्तिविशेषेषुत्रिविधेषुप्रारब्धपुण्यप्रापितेषुविगत
स्पृहः आगामितज्जातीयसुखस्पृहारहितः सुखानुभवकालेत
ज्जातीयसुखस्यकारणंधर्ममनुष्ठायवृथैवतदाकांक्षारूपातामसी
चित्तवृत्तिः आर्तिरूपास्पृहानहिकारणंविनाकार्योत्पत्तिःसंभ
वाविवेकेनपव रागोविषयेषुरंजनात्मकश्चित्तवृत्तिविशेषःसुखं
भवत्वज्ञावभिनिवेशरूपः आगामिनिरुत्सानतजन्तोदुःखंमेमाभून
विषयविनाशकेसमुपस्थितेतन्निवारणासामर्थ्यमात्मनोमन्यमा
नस्याभिज्वलनात्मकश्चित्तवृत्तिविशेषःक्रोधः तेसर्वेविगतायस्मा
तसः सतादृशोमुनिःस्थितधीरुच्यते तस्यजीवन्मुक्तस्यदेहेन्द्रिय
प्रारब्धकर्मवशाकदाचिद्रागादिकंसमुत्पन्नमपिस्त्रविषयसहा
रूतत्स्वामिनादिसंबंधेनप्रागिवजीवेनवर्तते तत्संबंधपरिकाण
देहादावहंममेत्यभिमानहेतोरविद्यायामस्यप्राशान्तस्तत्स्वरूपं
शामस्तत्तदितिमित्तोदासीनःपरंप्रपन्नस्थितबुभवप्रकटनेनशिष्य
शितार्थमनुद्वेगनिस्पृहात्वादिवाचःप्रभाषते एवंवाच्योपिमुनुः
त्वर्दुःखेनोद्विजेतसुखेनप्रहृष्येतरागभयक्रोधरहितश्चभवेदितिभा
वः ५६॥

ऊत्तमवैजयन्तीटीका

स्तानविहस्यनिरतिशयत्वाननिष्ठामुकेदानींतस्मादवस्थामाह
दुःखेष्विति दुःखेषुराजसतामसादिकर्मजनिताध्यात्मिकादित्रिवि
धनिमित्तेषुमनस्यवेफवियाग्रादिजेष्वपत्नवासमुद्विग्नमनाःअव्या

गी॰ ज्ञलवित्तः सर्वेषु सात्त्विककर्मद्वेषात्मात्मीयवर्गीयारोग्यानन्दिते
टी॰ द्वि॰ भ्रान्त्यादिलाभनिमित्ते भ्रुवा विगतस्पृहः विगता स्पृहा यस्य सक्तिर्यस्य
सः अतएव वीतरागभयक्रोधः विशेषेण इता गता रागभयक्रोधा यस्य
स्मात्सः श्रेयसः धानोऽगतिरूपार्थ एव दृष्टान्तेन तत्प्राप्तिरूपार्थः प्रक
रणविरोधात् एवंभूतो यो मुनिरात्मस्वरूपमननस्वभावः सं स्थितधीस्थि
तप्रज्ञ उच्यते कथ्यते सर्वस्याः अवस्थायाः सकाशादि यम अवस्थाः व
यतस्तस्यामवस्थायामात्मस्वरूपावलोकनं विना मे थोथरी रस्तु दुः
खादीनां भानमेव न स्यात् न तु तेषां भाने स्या किंतु तेषां सक्ति न स्यादिति
विवेकः ५९॥

+ इदानीं व्युत्थितचित्तस्य स्थितप्रज्ञस्य भाषणोपवेशन गमनानि स्फुटजनविलक्षणानि व्याख्या तत्र किं भाषेतेत्यस्योत्तरमाह द्वाभ्यां +

मधुसूदनी टीका

दुःखानि त्रिविधानि शोकमोहज्वरशिरोरोगादिनिमित्तान्याध्यात्मिका
नि व्याघ्रसर्पादिप्रभवान्याधिभौतिकानि अतिवातातिवृष्ट्यादिहे
तुकान्याधिदैविकानि तेषु दुःखेषु रजःपरिणामसंतापात्मकचि
त्तवृत्तिविशेषेषु प्रारब्धपापकर्मप्रापितेषु अनुद्विग्नं दुःखपरिहाराक्षम
तया व्याकुलं न भवति मनो यस्य सोऽनुद्विग्नमनाः अविवेकिनो हि दुः
खप्राप्तौ सत्यामहो पापोऽहं धिङ्मां दुरात्मानमेतादृशं दुःखभागिनं को
मे दुःखमीदृशं निराकुर्यादित्यनुतापात्मको भ्रान्तिरूपस्तामसः चि
त्तवृत्तिविशेष उद्वेगाख्यो जायते यद्यपापानुष्ठानसमये स्यात्तदा
तन्निवृत्तिप्रयोजनो दुःखकारणे सत्यपि किमिति मम दुःखं जाय
तइति अविवेकजभ्रमरूपत्वात् अविवेकिनः स्थितप्रज्ञस्य संभवति दुः
खमात्रं हि प्रारब्धकर्मणा प्राप्यते न तु तदुत्तरकालीनो भ्रमोऽपि तस्य
स्थितप्रज्ञस्य भ्रमोपादानाज्ञाननाशेन भ्रमासंभवात् तज्जन्य दुःख
प्रापकप्रारब्धाभावात् यथा कथंचिद्देहयात्रामात्रनिर्वाहकप्रार
ब्धकर्मफलस्य च भ्रमाभावेऽपि बाधितानुवृत्त्योपपत्तेरिति विस्तरेण
णाग्रे वक्ष्यते तथा सुखेषु सत्त्वपरिणामरूपप्रीत्यात्मकचित्तवृत्ति

प्रतिबंधकत्वेन तत्फलः स्यात् भोगकाले तु भवत्कारणे सति कार्यस्योत्क्षेप्तुमशक्यत्वात्

विशेषेषु त्रिविधेषु प्रारब्धपुण्यकर्मप्रापितेषु विगतस्पृहः आगामित
ज्जातीयसुखस्पृहारहितः स्पृहा हि नाम सुखानुभवकाले तज्जातीयसु
खस्य कारणे धर्ममननुष्ठायैव तदाकांक्षारूपा तामसी चित्तवृत्तिर्भ्रां
तिरेव सा चाविवेकिन एव जायते न हि कारणाभावे कार्यं भवितुमर्ह-
ति अतो यथा सति कारणे कार्यं मा भूदिति द्वेषाकांक्षारूप उद्वेगो विवेकि
नो न संभवति तथैवासति कारणे कार्यं भूयादिति तृष्णाकांक्षारूपात्
त्मिका स्पृहापि नोपपद्यते प्रारब्धकर्मणः सुखमात्रप्रापकत्वात्
हर्षात्मिका वा चित्तवृत्तिः स्पृहाशब्देनोक्ता सापि भ्रान्तिरेव अहो धन्यो
ऽहं यस्य ममेदृशं सुखमुपस्थितं को वा मया तुल्यो भुवने केनोपायेन ममेदृ
शं सुखं न विच्छिद्येतेत्येवमात्मिकोत्फुल्लतारूपा तामसी चित्तवृत्तिः अ
त एवोक्तं भाष्ये नाग्निरिवेंधनाद्याधाने यः सुखान्यनुविवर्धते स विगत-
स्पृह इति वक्ष्यति च न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियमिति ।
सापि न विवेकिनः संभवति भ्रान्तित्वाभावात् तथा वीतरागभयक्रो
धः रागः शोभनाध्यासनिबंधनो विषयेषु रंजनात्मकः चित्तवृत्तिवि
शेषः स्वताभिनिवेशरूपः रागविषयस्य नाशके समुपस्थिते तन्निवा
रणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकः चित्तवृत्तिविशेषो भयं
एवं रागविषयविनाशके समुपस्थिते तन्निवारणसामर्थ्यमात्मनो म
न्यमानस्याभिज्वलनात्मकः चित्तवृत्तिविशेषः क्रोधः ते सर्वे विपर्यय
रूपत्वाद्विगता यस्मात् स तथेह शोभनो मुनिर्मननशीलः संन्यासी स्थितप्र
ज्ञ इत्युच्यते एवंलक्षणः स्थितधीः स्वानुभवप्रकटनेन शिष्यशिक्षार्थ
मनुद्वेगनिस्पृहत्वादिवाचः प्रभाषत इत्यन्वय उक्तः एवं वाक्योऽपि मुमुक्षु
र्दुःखे नोद्विजेत् सुखे न प्रहृष्येत् रागभयक्रोधरहितश्च भवेदित्यभिप्रा
यः ५६ ॥

सदानंदीटीका

अथ व्युत्थितचित्तस्य स्थितप्रज्ञस्य भाषणं आसनं गमनं चैतत्त्रयं भूतवि
लक्षणं । यादृशं तत्त्रयाणामध्यात्मं सम्यग्व्यज्यते शोकमोहज्वरादीः

गी॰
टी॰ द्वि॰

359

निदुःखान्याध्यात्मिकानि वै २ आधिभौतिकदुःखानि व्याघ्रसर्पादिजा
नि च अतिवातातिवृष्ट्यादिदुःखं स्यादाधिदैविकं ३ तेषु दुःखेषु रजसः परि
णामात्मकेषु च प्रारब्धकर्मणामेषु व्याकुलं यस्य नो मनः ४ प्रीतिका
यितया तेषु नोद्वेगं भजते बुधः देहाभिमानिनो दुःखे प्राप्ते सत्यामहो वत
पापिष्ठोहं वपिज्ज्वरायस्यादीदृशो दुःखभागिनं कामे दुःखं निराकुर्यादिस
द्वेगोभिजायते ६ पापानुष्ठानसमये यद्येवं स्यान्न हानतः प्रतिबंधेन प
रमसफलः स्यात्तु ज्ञात्मनः ७ भोगकाले तु योद्वेगो मूढस्यैव न तद्विदः ग
ध्यात्वैवम् सुखस्य परिणामात्मकेषु च ८ प्रारब्धकर्मणामेषु त्रिविधेषु
गतस्पृहः [illegible] सुखानुभवकाले हि मूढानाम विवेकिनां ९
तृष्णाकोलाविनाथ मेतज्ज्ञानी यः सुखस्य च स्थितप्रज्ञस्य चश्रोतेर भा
वात्तामसोभ्रमः १० नैवास्यतः स्पृहाभून्यः स्वात्मनेस्थितः सुधीः म
नात्मन्यात्मधीरेव कारणं सकलभ्रमे ११ शोभनाध्यासजो रागो विष
येरंजनात्मकः अतस्तनाभिनिवेशात्मा चित्तवृत्तिविशेषकः १२ तन्नाशे
रस्तु दैवान्नाशके प्रत्युपस्थिते तन्निराकरणापाक्षेपीदृं सततन्न यस्य
तन्निवारणसामर्थ्यमन्यमानस्य चात्मनः चित्तवृत्तिविशेषः स्यात्क्रो
भिज्वलनात्मकः १४ ते विपर्ययरूपत्वाद्रागाद्या विगता यतः एता
मनि धीरः स्थितप्रज्ञ उदाहृतः १५ एवं सशिष्यशिलार्थमनुद्वेगादि
कानि रः स्वानुभूतिप्रकाशेन निर्मलात्मा प्रभाषते १६ एवं स्वे
विवेकनष्टमोहितेन च रागक्रोधादिशून्यः स्यादित्यवक्त्रा सूर्योदयः

नीलकंठीटीका

दुःखेषु आध्यात्मिकादिषु दुःखसाधनेषु प्राप्तेष्वपि अनुद्विग्नमनाः अक्षु
लमनाः वदतीति च यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यत इति
सुखेषु सुखसाधनेषु स्रक्चंदनादिषु प्राप्तेष्वपि विगतस्पृहो नितरां स्पृहा
ता भवति अतएव वीताः रागभयक्रोधा यस्मात्स तथा न हि तस्यापि
[illegible]मवस्थायां रागादयो दुःखादयो वा संभवंति एवंविधः समाधिस्थः
धीः स्थितप्रज्ञ उच्यते ५६॥

आनंदीटीका

अनुद्विग्नमना निर्विकारचित्तः रागः विषयेषु स्पृहा भयं प्राप्तेषु विषयेषु अपगमात् त्रासः क्रोधः अपगतेषु चित्तज्वलनं तेषां अपगतानां वीतरागभयक्रोधः मुनिः [illegible] ५६ ॥

+ सामान्येन स्थितप्रज्ञस्य लक्षणमुक्त्वा तदेव विशेषतो वक्तुमाह +

रामकंठीटीका

+ दृष्टकर्मफलभूतेषु दुःखेषु प्राप्यमानेषु प्राप्तेषु बहुप्रकारतया सर्वप्राणिनां विकारहेतुत्वमायाते यदुक्तलक्षणः स्थितप्रज्ञः प्राप्यमाणेषु सत्सु दुःखेष्वनुद्विग्नमना निर्भयचित्त एव भवति सुखेषु प्राप्यमाणेषु विगतस्पृहो निवृत्ताभिलाषो भवति यथोक्तपरिपूर्णात्मस्वरूपलब्धप्रतिष्ठत्वात्सर्वसाम्यसमाधिसमापन्नत्वात् एवात एव वीतरागभयक्रोधो रागः सुखविषयोऽभिलाषस्तथा भयं सुखप्रतीघातहेतोः शंकाप्र तीकारात्सत्रासस्तथा क्रोधः शंकाप्रतीकारस्तथाविधं प्रतिरोधः एते वीता विगता यस्य तथाविधः स्थितप्रज्ञ उच्यते ([illegible]) ५६ ॥

+ प्राप्तेषु दुःखेषु आध्यात्मिकादिषु अनुद्विग्नमनाः [illegible] सुखेषु विगतस्पृहो निवृत्ताभिलाषः वीतरागो रंजना मनो यस्य सः सुखेषु विगतस्पृहो निर्ममनशीलः + लक्कोभयं क्रोधो यस्य स [illegible]

लाभिकी [illegible] टीका

इदानीं द्वाभ्यां स्थितः स्थितप्रज्ञः किं प्रभाषेतेत्यस्योत्तरमाह द्वाभ्यां दुःखे [illegible] इति स्वात्मपरामर्शी अन्यजन्योऽयोगी स्थितप्रज्ञ इत्युच्यते ५६ ॥

पंचोलीटीका

प्रथमप्रश्नस्योत्तरं तत्र किं प्रभाषेतेत्यस्योत्तरमाह द्वाभ्यां दुः खेषु आध्यात्मिकादिषु अनुद्विग्नमनाः अक्षुभितमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधो मुनिः स्थितधीः उच्यते ५६

[illegible]दीपिका॥

स्थितधीः किं प्रभाषेतेति द्वितीयं प्रश्नं समर्थयति दुःखेष्व नुद्विग्नमना इत्यादि [illegible] पंचभिः श्लोकैः समाधि [illegible]

तज्जयासिद्धिरूपेषु दुःखेषु हेतुरहितः संभावितजयासिद्धिरूपेषु
सुखेषु चास्पृहः अत एव वीतरागभयक्रोधः क्रोधपदेनात्र द्वेषो
लक्ष्यते तथा च वीतो रागो उक्तसुखप्रीतिः भयेन द्वेषेणाक्रोधो द्वे
षस्य यस्य योद्धियस्मा द्विभेति सतं द्वेष्टीति यद्वा रागः पुत्रमित्रा
दिविषयः स्नेहः प्रवृत्तिनिरोधकः भयं महाबलेभ्यः परेभ्यः स
काशाज्जातं कथमहं युद्धे स्वबंधून्हत्वा नायित्वा जीवामीत्येवंरूपस्तासो
वा क्रोधः सर्वेषां बंधादीनां विच्छेदको युद्धमार्गः कथं दितःस्या
दितिद्वेषः एतत्त्रयेन रहितो वीतरागभयक्रोधः एवं विधस्त्रम
निर्मोनी नरके नियतं वासो भवतीत्यनुश्रुतमेत्येवं प्रकारानेक
विधविकल्पोत्पादकवाक्यालापे मंदादरो वनजो वंस्थितः कर्म
योगी एव स्थितप्रज्ञो नान्यः ५८

मधुभाष्य

५८॥

भाषा अनुवाद

लक्षण कहने के बहाने से जिज्ञासू अर्जुन को और जो करना चहिये सो उपदेश करते है कि जिनका मन दुख पड़ने से उद्विग्न अर्थात् खेद युक्त और सकल सुख की स्पृहा करे इच्छा करैं सुख दुख मे समान रहैं सो वीतराग अर्थात् विषय प्रीति रहित एवं भय औ क्रोध शून्य स्थितप्रज्ञ कहे स्थिर बुद्धि मुनि कहावते है ५ ६

दोहा

दुख विषैं न विक्षोभ मन सुख महि वांछा नांहि विनाराग
भय क्रोध जो स्थिरमति मुनि कहतांहि ५६॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं
नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५७

शांकरभाष्यम्

किंच यः सर्वत्रेति यो मुनिः सर्वत्र देहजीवितादिष्वप्यनभिस्नेहः
स्नेहवर्जितः तत्तत् प्राप्य शुभाशुभं तत्तच्छुभमशुभं वा लब्ध्वा ना
भिनंदति न द्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यत्यशुभं च प्राप्य न द्वेष्टि
इत्यर्थः तस्यैव हर्षविषाद वर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति

आनंदगिरिकृतटीका

स्तनभेदानुवादद्वारा विविदिषोरेव कर्तव्यांतरमुपदिशति किंचेति ।
विवेकवतो विदुषो विवेकजन्या प्रज्ञा कथं प्रतिष्ठां प्रतिपद्यतामित्या
शंकाह यः सर्वत्रेति ननु देहजीवनादौ स्पृहा शुभाशुभप्राप्तौ हर्षवि
षादौ विदुषो विविदिषोश्चावर्जनीयौ इति प्रज्ञास्थैर्यासिद्धिरत आह
यो मुनिरिति तत्तदिति शोभनत्वेनाशोभनत्वेन वा प्रसिद्धत्वं प्र
तिनिर्दिश्यते तदेव विभजते शुभमिति विषयेष्वभिष्वङ्गाभावः शु
भादिप्राप्तौ हर्षाद्यभावश्च प्रज्ञास्थैर्ये कारणमित्याह तस्येति ५७॥

स्वामिकृतटीका

कथं भाषेतेत्यस्योत्तरमाह य इति यः सर्वत्र पुत्रमित्रादिष्वप्यनभि
स्नेहः स्नेहशून्यः अत एव बाधितानुवृत्त्या तत्तच्छुभमनुकूलं प्राप्य ना
भिनंदति न प्रशंसति अशुभं प्रतिकूलं प्राप्य न द्वेष्टि न निंदति किंतु
केवलमुदासीन एव भाषते तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः ५७ ॥

पैशाचभाष्यम्

किंच य इति यो मुनिः सर्वत्र स्वदेहजीवनादिष्वनभिस्नेहः अभिस्ने
हवर्जितस्तत्तत्प्राप्य शुभाशुभं तत्तच्छुभाशुभं लब्ध्वा न हृष्यति न
द्वेष्टीत्यर्थः तस्यैवं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा यस्य स्थितप्र
तत्सदोच्यते त्यक्तपुत्रवित्तलाभः सन्यासी आत्मारामः प्रतिष्ठितः ५७

गी॰
टी॰ हि॰

३६२

रामानुजभाष्यम्

ततोर्वाचीनदशोच्यते यः सर्वत्रप्रियेष्वनभिस्नेहः उदासीनः प्रियसं
श्लेषविश्लेषरूपशुभाशुभं प्राप्याभिनंदनद्वेषरहितः सोपि स्थितप्रज्ञः ५७

अभिनवगुप्तकृतटीका

युक्तं चैतत् यतः शुभाशुभप्राप्तौ नस्याह्लादनतापौ न भवतः ५७ ॥

परमार्थप्रपाटीका

अस्य यथाक्रमं व्याख्याह यः सर्वत्रेति यः सर्वत्रदेहादिविषयेषु अथवा सर्वत्र
बंधुष्वपि अनभिस्नेहः स्नेहशून्यः अथ तदेवाह नाभिनंदतीति तत्तच्छुभाशु
भं प्राप्य क्रमेण नाभिनंदति शुभं प्राप्य न प्रशंसति अशुभं प्राप्य न द्वे
ष्टीति केवलमुदासीनवत्तिष्ठति तस्य प्रज्ञा प्रतिष्ठितेति विद्धि ५७ ॥

वनमालीटीका

सर्वेषु देहजीवनादिषु प्रियेष्वनभिस्नेहः यस्मिन् सत्यन्यदीये हानिवृद्धी
स्वस्मिन्नारोप्येते स तादृशोन्यविषयकः प्रेमापरपर्यायः स्ने
हविशेषः स्नेहस्तद्रहितोनभिस्नेहः परमानंदरूपे सर्वांतर्यामिनि स
श्रयणागतानिहत्यारेवितनमात्रयास्वसारूप्यदायिन्यपि स
र्वथाभिस्नेहवान् भवेदेव प्रारब्धकर्मप्रापितशुभं सुखहेतुं विषयं प्राप्य
नाभिनंदति अशुभं दुःखहेतुं प्राप्य न द्वेष्टि अनेन स्वस्याहर्षैर्न निंदति
वैवालकाभावात्तस्यानभिस्नेहस्य हर्षविषादशून्यस्य तेः प्रज्ञा
परमात्मतत्वविषयिका प्रतिष्ठिता फलपर्यवसायिनी एवं सुख
द्वेष्यतादृशक्लेशादिरहिता भवेदिति भावः अत्र प्रशंसादिरूपावाचा
नभाषत इति व्यतिरेकः उक्तः पूर्वपद्ययापादद्वयेनार्वाचीनावस्थाना
वस्थोक्ता ५७ ॥

उत्तमवैजयन्तीटीका

इदानीं ततोप्यवरामवस्थामाह य इति यः पुरुषः सर्वत्र प्रीतिविषय
स्थानेषु स्वजनमित्रादिषु अनभिस्नेहः स्नेहरहितः सन् तत्तत्तेषु तेषां
प्रियेषु अप्रियेषु च शुभाशुभं प्राप्य प्रियेषु पुत्रकलत्रादिषु आलिंगनेन अ
शुभं निसमभायेपाकर्षरूपमंगलं प्राप्य नाभिनंदति आनंदेन प्राशंसति

मिये शृगालव्याघ्रादिभिर्मलिनेनाशुभं हि भागपहीनतद्रूपामं मलेव
प्राप्य न द्वेष्टि व्याघ्रादिभिर्द्वेषं न करोति तस्य पुरुषस्य प्रज्ञा बुद्धिः प्रति
ष्ठिता स्थिरा भवति एवंभूतो हि पुरुषः स्थितप्रज्ञो भवतीत्यर्थः ५७ ॥

मधुसूदनीटीका

किंच सर्वत्र देहजीवनादिष्वपि यो मुनिरनभिस्नेहः सर्वप्रकारेण तद्धि
तोऽनभिस्नेहः भगवति परमात्मनि तु सर्वथाभिस्नेहवान्भवेदेव ।
अनात्मस्नेहाभावस्य तदर्थत्वादिति द्रष्टव्यं तत्तत्प्रारब्धकर्मणा परिप्रा
पितं शुभं सुखहेतुं विषयं प्राप्य नाभिनंदति हर्षविशेषपुरःसरं न प्रशं
सति अशुभं दुःखहेतुं विषयं प्राप्य न द्वेष्टि अंतरसूयापूर्वकं न निंद
ति यस्य हि सुखहेतुर्यः स्वकलत्रादिः सम्यग्भोविषयस्तद्गुणक
थनादिप्रवर्तिका धीवृत्तिर्भ्रांतिरूपाभिनंदः स च तामसः तद्गुणकथ
नादेः परप्ररोचनार्थत्वाभावेन व्यर्थत्वात् एवमसूयोत्पादकेन दुःख
हेतुपरकीयविद्याप्रकर्षादिनेनसम्यग्भोविषयस्तन्निंदादिप्रवर्तिका
भ्रांतिरूपा धीवृत्तिर्द्वेषः सोऽपि तामसस्तन्निंदाया निवारणार्थत्वाऽभा
वेन व्यर्थत्वात् तावभिनंदद्वेषौ भ्रांतिरूपौ तामसौ कथमभ्रांते शुद्धसा
त्त्वे स्थितप्रज्ञे संभवेतां तस्माद्विचालकाभावात्तस्यानभिस्नेहस्य ह
र्षविषादरहितस्य मुनेः प्रज्ञा परमात्मतत्त्वविषया प्रतिष्ठिता फलपर्य
वसायिनी स स्थितप्रज्ञ इत्यर्थः एवमन्योऽपि मुमुक्षुः सर्वत्रानभिस्ने
हो भवेत् शुभं प्राप्य न प्रशंसेत् अशुभं प्राप्य न निंदेदित्यभिप्रायः अत्र
वनिंदाप्रशंसादिरूपा वाचो न प्रभाषेत इति व्यतिरेक उक्तः

५७ ॥ ॥

यस्मिन्सत्यन्यदीये हानि
वृद्धी तस्मिन्नारोप्येते सता
द्गुणान्यविषयः प्रेमा परस्प
धीयस्तामसो वृत्तिविशेषः
स्नेहः १०

सदानंदीटीका

यस्मिन्सत्यन्यदीये हि हानिवृद्धी ह्यात्मनि आरोप्येते तमोहन्यात्स्नेहः
प्रेमापराभिधः १ देहादिविनेकलत्रादौ स्नेहशून्यः स तादृशः सुखहेतुं तं शु
भं न तत्तद्विषयं प्राप्य कर्मणा २ न प्रशंसति हर्षेण दुःखहेतुं तं तथाशुभं

गी॰ टी॰ द्वि॰

363

विषयेप्राप्यमानेष्वयापूर्वकोक्तंतेनचनिंदति ३ अत्रस्यसर्वत्रवेहेतर्यः सक
लत्रादिकेष्वभः तत्तुरागाख्यापनोफक्काथीहृतिरभिनंदकः ४ तथाप्र
दीयविद्यादिप्रकर्षाप्तुजनेप्रति अशुभोविषयस्तत्समनिंदादिप्र
वर्तिका ५ धीहृतिर्भ्रांतिरूपास्यात्द्वेषः सोतेननतामसः ताशुभौर
धं॰ शुद्धसत्वेस्मिन्संभवेतांकृतुतौ ६ तस्माद्विचालकाभावात्प्रज्ञातस्या
त्मगोचरा प्रतिष्ठानिश्चलापुमाफलपर्यवसायिनी ७ स्थितप्रज्ञः
तिनिंदकस्यापेवृंनभाषते एवंमनुत्तरत्वोपिनिः स्नेहः सकलेष
चू॰ वेत ८ तद्गुंशेसंशुभमप्राप्यननिंदेद्शुभेगतः ९ ५७ ॥

नीलकंठीटीका

स्थितधीः किंप्रभाषेतेत्यस्योत्तरमाह यः सर्वत्रेति सर्वेषुपत्नदारादे
हजीवनादिष्वभिस्नेहः अभिस्नेहवान् हिपत्नदारादिषुविक
लेषुसकलेषुवाऽहमेवविकलः सकलोऽस्मीतिदैन्यदर्पीपितः पूर्व
परानुसंधानरहितोजल्पतिअयंतुनतथेतिभावः तत्तच्छुभं
प्राप्यनाभिनंदतिसेतद्द्वेष्टिभूत्वाशुभप्रापयितारंनप्रशंसति तथाअ
शुभंप्राप्यनद्वेष्टिद्वेष्टाः खीभूत्वाअशुभप्रापयितारंननिंदतियस्तस्यप्र
ज्ञाप्रतिष्ठिता ५७ ॥

आनंदीटीका

स्नेहस्निग्धतासक्तिः सर्वत्रदारपुत्रादौतद्रहितोनभिस्नेहः शुभंप्राप्य
नाभिनंदतिनस्तौतिअशुभंप्राप्यनद्वेष्टि येनोपायभूतेनक
रणास्थितप्रज्ञस्तंप्राप्येतेतन्वाचेत्याह ५७ ॥

+ एवंप्राप्यमानसुखदुःखनिर्विकारतयातंप्रतिपाद

रामकंठीटीका

यितमाह +

+ योगीतत्तदनंतभेदंसुखसाधनभूतंदुःखसाधनभूतंवासुखात्मकं
दुःखात्मकमेववाशुभाशुभंप्राप्यनाभिनंदतिनाद्वेष्टितदाकस्थितप्र
ज्ञास्यलक्षणमज्ञाप्राप्तसुखदुःखस्यनिर्विकारतयालक्षणंतोभिमम
ति यतः सर्वस्मिन्वस्तुनिमूलनभिस्नेहः इदंममसर्वस्वमेतेनविनाममस
शु॰ सर्वदुःखकारणमित्यभीष्टवस्तुषुनुरागोभिस्नेहः सयस्यनास्तिस
तथोक्तः तथाशुभंप्राप्यनद्वेष्टि द्वेषनिमित्तविषयप्रयत्नलक्षणं

निर्मतनिर्विकारस्यात्ममात्र

याति यएवंविध:आत्मयोरप्रियाप्रिययो ... ५८

तृप्त्यवस्थितबुद्धिस्तस्यप्रतिष्ठितामज्ञोच्यते [illegible]

[illegible]

नारायणी टीका

योमुमुक्षुस्थाने पि सर्वत्र सुत्रमित्र विषया ... स्पष्टार्थ: ५८ ॥ दिशुनि:स्नेह: तत्तत्रानाविधंशुभ मनुकूलंप्राप्यनप्रशंसति नतद्वेषु ... ंप्रतिकूलंनप्राप्यनद्वेष्टिनस्य प्रज्ञाप्रतिष्ठितामस्थितप्रज्ञस्यार्थ: ... लन्त्यादिरूपावाचोनभाषतेइ तिअतिरेकउक्त: अथकिमासी ... तेनयोगारमारूढबुद्धि: ५८ ॥

पंचोलीटीका

य:सर्वत्रदेहेजीवानादिषपिअनभिस्नेह: स्नेहवर्जित:यतत् शुभंप्राप्यनअभिनंदति अशुभंप्राप्यनद्वेष्टितस्यमुने:प्रज्ञा विवेकजाबुद्धि:प्रतिष्ठिता ५८

श्रीमदानंदगिरिकृता ... ॥

उक्तंचैतयत: सर्वत्रसर्वेषु ... उदासीनेषु आत्मनि च यस्य जीवननैरपेक्ष्यं किंतु ... यस्तथर्मीचारोचितेकर्तव्यतानि द्वयोरेकतरस्य अयस्तस्य शुभाशुभप्राप्ताविशुद्धतापोनभवति ... ५८ ... नयसिद्धेरन्यतरस्यनदसिद्धेसंशुद्धेनियतत्वात् ५८

मधुभाष्य॥

५८॥

364

भाषाअनुवाद

अर्जुनने पूछाथा कि तत्वज्ञानी किस प्रकारसे बात करते हैं उस प्रश्नका उत्तर करते हैं कि समस्त पुत्र मित्र धन धाम आदि कमे जिसको स्नेह कहे प्रीति नहीं है और शुभ प्राप्ति होनेसे हर्षवी औ अशुभ लाभ होनेसे उद्विग्न भी न होय है अर्थात् स्तुति औ निन्दामे राग द्वेष कहे प्रीति विरोध हीन है केवल उदासके समान अर्थात् उदासीन ऐसे होवात करते हैं उन्हीकी प्रज्ञा प्रतिष्ठित हैं वेई स्थिरबुद्धि मुनि हैं ५७॥

दोहा॥

स्नेहरहित जो सर्व महि प्राप्त शुभाशुभ कोय नहिं हरषै न
द्वेष चितताकी मति स्थित सोय ५७॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः इन्द्रि
याणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ५८

शांकरभाष्यम्

किंच यदा संहरत इति यदा संहरते सम्यक् उपसंहरते चायं ज्ञाननि
ष्ठायां प्रवृत्तो यतिः कूर्मोऽङ्गानीव सर्वशः यथा कूर्मो भयात् स्वान्यङ्गा
न्युपसंहरति सर्वतः एवं ज्ञाननिष्ठ इंद्रियाणीन्द्रियार्थेभ्यः सर्वविषये
भ्य उपसंहरते तस्य प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यम् ५८ ॥ ॥

आनंदगिरिकृतटीका

जिज्ञासोरेव कर्तव्यान्तरं सूचयति किंचेति इंद्रियाणां विषयेभ्यो वैमु
ख्यस्य प्रज्ञास्थैर्यकारणत्वादादौ जिज्ञासुना तदनुष्ठेयमित्याह य
देति मुमुक्षुणा मोक्षहेतुं प्रज्ञां प्रार्थयमानेन सर्वेभ्यो विषयेभ्यः स
र्वाणीन्द्रियाणि विमुखानि कर्तव्यानीति श्लोकव्याख्यानेन कथयति
यदेत्यादिना उपसंहारः स्वव्यापारात्तस्यैव सम्यक्त्वमतिदृढत्वं
श्रयमिति प्रकृतस्थितप्रज्ञग्रहणं आवर्तयति ज्ञाननिष्ठायामिति इं
द्रियोपसंहारस्य प्रलयरूपत्वं आवर्त्य श्लोकोवात्मकत्वं दृष्टांतेन दर्शय
ति कूर्मस्तु दृष्टांतं आकरोति यथेति दार्ष्टांतिके योजयन् ज्ञाननिष्ठ
यं तत्र प्रवर्तयति एवमिति इंद्रियाणां विषयेभ्यो वैमुख्यकरणं प्रज्ञास्थै
र्य हेतुरित्युक्तमुपसंहरति तस्येति ५८ ॥

स्वामिकृतटीका

किंच यदेति यदा चायं योगीन्द्रियार्थेभ्यः शब्दादिभ्यः सकाशादिंद्रिया
णि संहरते प्रत्याहरति अनायासेन संहारे दृष्टान्तः अंगानि करचरणा
दीनि कूर्मो यथा स्वभावेनैवाकर्षति तद्वत् ५८ ॥

पैशाचभाष्यम्

किंच यदेति यदा संहरते सम्यगुपसंहरति अयं ज्ञाननिष्ठायां प्रवृत्तो
मुनिः कूर्मोऽङ्गानीव यथा कूर्मो भयात् स्वाङ्गान्युपसंहरति सर्वस्मादि
ति एवं चायमस्य इंद्रियाणीन्द्रियार्थेभ्यः सर्वविषयेभ्यः उपसंहरति तस्य

प्रज्ञा प्रतिष्ठितास्यादित्यत आह ५८ ॥

रामानुजभाष्यम्

ततोर्वाचीनदशायां इंद्रियाणि इंद्रियार्थान् स्प्रष्टुमुद्युक्तानि तानि कूर्मोगानीवेंद्रियार्थेभ्यः सर्वतः प्रतिसंहृत्य मनस्यात्मन्येव स्थापयति सोपि स्थितप्रज्ञः ५८ ॥

अभिनवगुप्तकृतटीका

नवास्यपाचकवद्योगमहिम्ने यदा यदा किलायमिंद्रियाणि संहरते आत्मन्येव कूर्मः स्वांगानि क्रोडीकरोति विषयेभ्यो विषयान्निवार्य तदा तदा स्थिरप्रज्ञः यो हि इंद्रियार्थेभ्यः प्रभृति इंद्रियाण्यात्मनि संहरते विषयेंद्रियादिकं सर्वमात्मसात्कुरुते [illegible] स्थिरप्रज्ञशब्देन प्रवर्तते उच्यते ५८ ॥

परमार्थप्रपाटीका

किंचयदेति योगी इंद्रियार्थेभ्यः शब्दादिभ्यः सकाशाद्यदा इंद्रियाणि संहरते प्रत्याहरति तदा तस्य प्रज्ञा प्रतिष्ठितेति विद्धि अथवा परिपक्वमनसः इंद्रियाकर्षणोभ्यासात्प्रयासो भवति तथापि तस्य न वेति स्वरूपापीनेंद्रियाकर्षणे दृष्टांतमाह यथा कूर्मः कच्छपः अंगानि करचरणादीनि स्वभावेनैवकर्षति तद्वत् इहलौकिकात्मस्वभावात्भवेत् स्वभूम्ना रे भवत्वेतत्पर्वेंद्रियनिवृत्तिः ५८

वनमालीटीका

किमासीतेत्यस्योत्तरं षड्भिः वक्तुं तत्र प्रारब्धकर्मवशाद्[illegible]त्थानेन विक्षिप्तमानींद्रियाणि पुनरनायासेनोपसंहृत्य समाधावेव स्थितप्रज्ञस्योपवेशनमिति दर्शयितुमाह यदेति सर्वशः सर्वाणींद्रियाणींद्रियार्थेभ्यः शब्दादिभ्यः च पुनः स्थैर्ये यदा संहरते पुनः उपसंहरति तत्र दृष्टांतः कूर्मोंगानीव तदा तस्य प्रज्ञा प्रतिष्ठितेति ५८ ॥

कृष्णवैजयन्तीटीका

तस्मात्स्वरूपावस्थानसमये विद्यमान एवायमिति यद्वत् कूर्मः कमठोंगान्यवयवान् पादशिरांसि दीनानि तद्वत् सर्वेषां गानि निरुंध्यन् ... स्वभावाद्भावयतः

संहरते सम्यगाभ्यंतरमाकर्षति तद्वदयं योगी वश्रवर्यदा यस्मिं काले इंद्रि

यार्थेभ्यः पंचेंद्रियविषयेभ्यः शब्दादिभ्यः सकाशात् इंद्रियाणि ज्ञानकर्मा

त्मकानि स्वस्वविषयात् गृहीत्वेव कर्मातित महि विषयरूपं दृष्ट्वैव संसारप

तनभयात् संहरते स्ववशं करोति तदा तस्य विभुत्वस्य प्रज्ञा प्रतिष्ठिता भव

ति सो विज्ञाननिष्ठो भवतीत्यर्थः ५८ ॥

द्विःश्लोकैः तत्रच प्रारब्धकर्मवशात् व्युत्थानेन विलि

शब्दादिभ्यः ॥ मानींद्रियाणि पुनरुपसंहृत्य

समाध्यर्थमेव स्थितप्रज्ञ

स्योपवेशनमिति दर्शयि

समाह +

मधुसूदनीटीका

…सीतेति प्रश्नस्योत्तरं वक्तुमारभ्यते भगवानुवाच

यं व्युत्थितः सर्वशः सर्वाणींद्रियाणि इंद्रियार्थेभ्यः सर्वेभ्यः चः पुनरर्थे

यदा संहरते पुनरुपसंहरति संकोचयति अत्र दृष्टांतः कूर्मो गानीव तदा तस्य

प्रज्ञा प्रतिष्ठितेति स्पष्टम् पूर्वश्लोकाभ्यां व्युत्थानदशायामपि सकलतामस

सहत्वभावउक्तः अधुना तु पुनः समाध्यवस्थायां सकलवृत्त्यभावइति विशे

[illegible]

वः [illegible] ५८ ॥

[illegible]

सदानंदीटीका

किमासीतेति प्रश्नस्य वक्तुमनुत्तरमीश्वरः यदिति रभते श्लोकैः सर्वमंगल

सेनवे १ विलितयानींद्रियाणि व्युत्थाने सति कर्मणा समस्तानींद्रियार्थे

भ्यः शब्दादिभ्यो यदा स्वयं २ संकोचयति येयथा कूर्मो गानीव सर्वशः स

माधिकालेन स्यास्ति प्रज्ञा सम्यक् प्रतिष्ठिता १ पूर्वश्लोकद्वये प्रोक्तो व्युत्था

नेसमयेमनेः सर्वतामसवृत्तीनामभाव स्तत्वदर्शनात् ४ पुनः समाध्या

वस्थायामफलो कोमहात्मनः समस्तवृत्त्यभावोत्र विशेषो यं विचार्यतां ५८ ॥

नीलकंठीटीका

किमासीतेत्यस्योत्तरमाह यदेति इंद्रियार्थेभ्यः शब्दादिविषयेभ्यः प्रार

ब्धकर्मवशेन व्युत्थितोपि योगी हेतदर्शनाद् इंद्रियः सन् निरोधसंस्कारप्रा

बल्यात् प्रीत्या समाधिमनुतिष्ठेनेवास्ते इत्यर्थः शेषं स्पष्टम् ५८ ॥ ॥

श्रीधरीटीका

ग्रहणात् गृहीतेषु ॥ ॥ ॥

स्य च इंद्रियाणामिंद्रियार्थेभ्यः संहारः विषयाणामग्रहणात्

दानाम् कूर्माद्रिति पत्तद्वये उत्तरमेव पतंसमर्थयति ५८ ॥

विदेतिप्रतिपादयितुमाह ॥

रामकंठीटीका

सनिष्ठितप्रज्ञत्वं येन कर्मणोपायभूतेन निष्पाद्यते तद्ध्यानपिस्थितप्रज्ञस्यैव

व्यशाङ्क्षो [illegible] तिरेके यदा पुनरयं योगी सर्वतः सर्वेभ्य इंद्रियार्थेभ्यः शब्दादिभ्य इंद्रियाणि श्रोत्रादीनि संहरति व्यतिरेचयति स्वभावत च्छिद्राके रश्मिरूपाणि तन्निष्ठामेव करोति कथं कूर्मः कच्छपो यथा स्वावयवान्स्वशरीरनिष्ठान्करोत्येवं तस्यैषा स्थितप्रज्ञ उच्यते [illegible]
[illegible]
[illegible]
[illegible] ५८॥

लासिकी टीका

यो व्यतिरेके यदा पुनरयं मुनिस्तत्सर्वविषयेभ्य इंद्रियाणि प्रत्या [illegible] हृत्यासीत स स्थितप्रज्ञ इति पिंडार्थः अनायासेन संहारे दृष्टान्तः कूर्मोंगानीवेति ॥ ५८

पंचोलीटीका

इदानीं किमासीतेति प्रश्नस्योत्तरं वक्तुमारभते भगवान् षड्भिः श्लोकैः यदा इत्यादिना ह च अपरं यदा अयं मुनिः ज्ञाननिष्ठायां प्रवृत्तः सर्वशः सर्वेभ्यः इंद्रियार्थेभ्यः विषयेभ्यः इंद्रियाणि चक्षुरादीनि संहरते उपसंहरते क इव कूर्मोंगानीव यथा कूर्मो भयात् स्वांगानि सर्वशः सर्वतः उपसंहरते तस्य प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता ५८

श्रीगीरसमिद्धायिनी॥

न चास्य पाचकवयोगः दृढ इति नमित्याह यदेति इंद्रियार्थेभ्य इति ल्यब्लोपे पंचमी यदा यदा किलायं रूपादीन्विषया न्विद्धायत दव प्राप्नुवेति यावत् इंद्रियाणि दक्षपादादीनि संहरते आत्मन्येव कूर्मः स्वांगानि क्रोडीकरोति स्वाचारोचितप्रहारादेः तस्य तानि विदधाति तदा स्थितप्रज्ञ इत्यर्थः ५८

मधुभाष्य

५८॥

भाषा अनुवाद

जिज्ञासू को और क्या करना योग्य हैं सो सूचन करावते कह
ते हैं कि और पूर्व कथित योगी जब इंद्रियार्थ जो नानाप्रकार वि
षय तिनसे सर्व इंद्रियों को अनायास कहे सहजमे लौटावे अ
र्थात फेरलेय इसमे दृष्टांत कहते कि जैसे कूर्म कहेवकूआ अ
पने मुख कर चरणा अनायास समेटि लेता तैसेही योगी विषयोंसे
इंद्रियोंको जब बटोर ले सकै तब उस ज्ञानी कीबुद्धिस्थिरहे ५८

दोहा

जब हि संकोचें विषयसें इंद्रियकोंदृढ जीव कमठअंग,
जिमिसर्वसें ताकी मतिदृढसीव ५८॥

विषयाविनिवर्त्तंते निराहारस्य देहिनः रस
वर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते ५९ ॥

शांकरभाष्यम्

तत्र विषयाननाहरत आतुरस्यापि इंद्रियाणि निवर्त्तंते कूर्मांगा
नीव संह्रियंते न तु तद्विषयो रागः स कथं संह्रियत इत्युच्यते विषया इ
ति यद्यपि विषयोपलक्षितानि विषयशब्दवाच्यानींद्रियाण्यथवा वि
षया एव निराहारस्य अनाह्रियमाणविषयस्य देहिनः कष्टे तपसि ।
स्थितस्य मूर्खस्यापि निवर्त्तंते देहिनो देहवतः रसवर्जं रसो रागो विषयेषु
यः तं वर्जयित्वा रसशब्दो रागे प्रसिद्धः स्वछन्दतः स्वरसेन प्रवृत्तो रसिको
रसज्ञ इत्यादिदर्शनात् सोऽपि रसो रंजनरूपः सूक्ष्मोऽस्य यतेः परं परमार्थ
तत्त्वं ब्रह्म दृष्ट्वोपलभ्याहमेव तदिति वर्तमानस्य निवर्त्तते निर्बीजं विषय
विज्ञानं संपद्यते इत्यर्थः नासति सम्यग्दर्शने रसस्य उच्छेदः तस्मात् स
म्यग्दर्शनात्मिकायाः स्थैर्यं कर्तव्यमित्यभिप्रायः ५९ ॥

आनंदगिरिकृतटीका

इंद्रियाणां विषयेभ्यो वैमुख्येऽपि न तद्विषया रागानुवृत्तेः कथं प्रज्ञाला
भः स्यादिति शंकते नन्वेति व्यवहारभूमिः सप्तम्यर्थः विषयाननाहर
तस्तूपभोगाविमुखस्येत्यर्थः रागसंबंधोपसंह्रियते न तु हि प्रज्ञालाभः
संभवति रागस्य तत्परिपाल्यत्वादिति मत्वाह स कथमिति रागनिवृत्त्यु
पायमुपदिशन्नुत्तरमाह उच्यत इति विषयोपभोगपराङ्मुखस्य उ
तो विषयपराङ्मुखस्य तत्राहृतिस्थाप्रसक्तेत्याशंक्याह यद्यपीति निराहा
रस्येत्यस्य व्याख्यानमनाह्रियमाणविषयस्येति यो हि विषय प्रवणो
न भवति तन्मैत्यात्मिके तपसि क्लेशात्मके व्यवस्थितस्य विषयाहीनस्या
पीन्द्रियाणि विषयेभ्यः सकाशाद्यद्यपि संह्रियन्ते तथापि रागो व
शिष्यते स च तत्त्वज्ञानादुच्छिद्यत इत्यर्थः रसशब्दस्य माफ ष्यादि षड
विपरसविषयत्वं निषेधति रसप्राह इति दृढप्रयोगमन्तरेण कथं प्र
सिद्धिरित्याशंक्याह स्वरसेनेति स्वच्छयेति यावत् रसिकः स्वच्छ पर्व

गी॰
टी॰ द्वि॰

369

वश्यैर्वर्तैरसक्तो विवक्षितोपेक्षितज्ञानेत्यर्थः कथं तर्हि तस्य निवृ
त्तिस्तत्राह रसोपीति दृष्ट्वैवोपलब्धिपर्यायं स्पष्टयति अहमेवेति
रागापगमे सिद्धमर्थमाह निर्बीजमिति ननु सम्यग्ज्ञानं मन्त्रेण
रागो नापगच्छति चेन्नदपरमाहते रागवतः सम्यग्ज्ञानोदया ।
योगादित्येतन्न शक्यतेति तत्राह नास्तीति इन्द्रियाणां विषयपारव
श्ये विवेकहारापहृते सत्यपि रागो व्यावर्त्तते न तस्य सम्यग्ज्ञानोत्प
त्यानत्वस्यापि रागस्य सर्वात्मना निवृत्त्युपपत्ते नैतच्छक्यतेत्यर्थः
प्रज्ञास्थैर्यस्य सफलत्वे स्थिते फलितमाह तस्मादिति ५८ ॥ ॥

स्वामिकृतटीका

ननु नेन्द्रियाणां विषयेष्वप्रवृत्तिः स्थितप्रज्ञस्य लक्षणं भवितुमर्हति
मूढानामातुराणामुपवासपराणां च विषयेष्वप्रवृत्तेरविशेषात् त
त्राह विषया इति इन्द्रियैर्विषयाणामाहरणं ग्रहणम्
आहारः निराहारस्येन्द्रियैर्विषयग्रहणमकुर्वतो देहिनो देहाभिमानि
नो ज्ञस्य विषया विनिवर्तन्ते इत्यर्थः किंतु रसवर्जं रसो रागोऽभिलाषस्तु
न निवर्तत इत्यर्थः रसोऽपि रागोऽपि परं परमात्मानं दृष्ट्वास्य स्थितप्रज्ञ
स्य सतो निवर्तते नश्यतीत्यर्थः यद्वा निराहारस्योपवासपरस्य विषयाः
प्रायशो निवर्तन्ते क्षुधासंतप्तस्य शब्दस्पर्शाद्यपेक्षाभावात् परं तु रस
वर्जं रसापेक्षा तु न निवर्तत इत्यर्थः शेषं समानम् ५९ ॥

तदनुभवो विनिवर्त्तते

पिशाचभाष्यम्

विषयेति यद्यपि तानि विषयग्राहकाणीन्द्रियाणि निराहार
स्य अनाह्रियमाणविषयस्यातुरस्य काष्ठतपोरसवर्जं रसो रागः रसि
को रसज्ञ इति प्रयोगदर्शनाद्रागं वर्जयित्वा स्थितप्रज्ञलक्षणं न भवेत्ता
सर्वेन्द्रियाणां विषयेभ्यो व्यावृत्तिरभिमता कथं तर्हि विषयेभ्यो रागस्य
निवृत्तिरिति चेत् रसोऽप्यस्य यतेः परं परमात्मानं दृष्ट्वा उपलभ्य अहमेव
तदिदं मनसा इति निवर्तते निर्बीजरागक्षयपतन इत्यर्थः नास्ति सम्यग्द
र्शने रागस्योच्छेद इत्यात्मन्यदर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्त
व्यमित्यभिप्रायः ५९ ॥

रामानुजभाष्यम्

एवंवृत्तविधा ज्ञाननिष्ठा पूर्वं पूर्वोक्तेन योगेन निष्पादिका इदानीं ज्ञाननि
ष्ठायाः दुःसाधतां तत्साध्योपायश्चाह इंद्रियाणामाहारा विषया निराहा
रस्य विषयेभ्यः प्रत्याहृतेंद्रियस्य देहिनो विषया विनिवर्तमाना रसवर्जं
विनिवर्तंते रसो रागः विषयरागो न निवर्तत इत्यर्थः रसो रागोप्यात्म
स्वरूपं विषयेभ्यः परतरं सुखतरं दृष्ट्वा निवर्तते ५९ ॥

अभिनवगुप्तकृतटीका

...तपस्विनो
...सौ स्थिरप्रज्ञ
...वर्तते

८ यद्यप्याहार्यैरूपादिभिर्विषयैः संबंधोस्य नास्ति तथापि तस्य विषया
अंतःकरणगतं परागलक्षणं रसं वर्जयित्वा निवर्तंते नो नासौ स्थि
रप्रज्ञः रसं केचिदाशायेमफलादिकमाहुः योगिनस्तु परमेश्वरद
र्शनादपरागो न भवति अ[illegible]स्य तु तपस्विनो नासौ निवर्तते ५९ ॥

परमार्थप्रपाटीका

ननु ग्रामोपवासस्य जडस्य रोगाभिभूतस्य कस्यापि ग्राह्यस्पर्शादयो वि
षया विनिवर्तंत एव एवं तस्य तथा निवृत्तविषयस्य स्थितप्रज्ञस्य को विशे
ष इत्याह विषया इति निराहारस्य ग्रामोपवासस्य यस्य कस्यापि देहिनो
देहाभिमानवतो जीवस्य विषयाः अग्राह्यत्वेन एव विनिवर्तंते परंतु
रसवर्जं रसो रागोभिलाषस्तत्तु हि विषयापेला न हर्जे[illegible]यपिंडः स्याथ
तेन विषयेभ्यो निवृत्तिरस्ति तथापि विषयैर्भवितव्यमिति संकल्पोस्ति
अस्य स्थितप्रज्ञस्य तत्परं परमात्मानं दृष्ट्वा विषयाभिलाषो निवर्तत इ
ति महान्विशेष इत्यर्थः ५९ ॥

वनमालीटीका

ननु मूढस्यापि रोगादिना विषयेभ्य इंद्रियोपसंहरणं संभवतीत्यत आ
ह विषयेति निराहारस्य देहाभिमानवतो मूढस्यापि रोगिणः साक्षाद
यो निवर्तंते किंतु रसवर्जं रसो रागो न निवर्तत इत्यर्थः अस्य तु स्थितप्र
तस्य परमात्मानं साक्षात्कृत्य रसोपि तु दृष्ट्वैव रागोपि निवर्तते य
स्मान्निरतिशयसौंदर्यादपरोक्षदर्शनं विना न सरागविषयोच्छेद

श्री
गी टी
हिं

तस्मात्सरागविषयोच्छेदकस्योक्तदर्शनस्य स्थितप्रज्ञारूपस्यस्थैर्यं महतायत्नेनसंपादयेदितिभावः ५९ ॥

उक्तमवैजयन्तीटीका

एवंज्ञाननिष्ठस्य यतहीनिष्ठामकेदानींतस्यात्मावलोकनेनैवेंद्रियविषयविजयोभवतीत्यथेत्याह विषया इति निराहारस्य शब्दादीन्विषयानाहरंतिसमंतात्गृह्णंतियानितान्याहाराणिश्रोत्रादीनिवा तैरिंद्रियैर्निर्गतानिस्वाहाराणियस्मात्तथाभूतस्येंद्रियहीनस्यरोगिणःइहदेवविपरीतान्यपनादिलक्षणानितस्यदेहिनोदेहवतःपुरुषस्य विषयाःशब्दादयोविनिवर्तंतेविशेषेणातिदूरतिप्राप्नुवंतिग्राहकानामभावेनग्राह्याणामप्यभावःइतिनियमात्किंतुरसवर्जंरसोरागस्तंवर्जयित्वाःतेनिवर्तंतेविषयाभिलाषोननश्यतीत्यर्थः अस्यात्मज्ञाननिरतस्यरसोपिविषयरागोपिपरंविषयसुखेभ्योऽधिकतरंसुखरूपमात्मतत्त्वंदृष्ट्वामनसैवानुद्रष्टव्यमित्यादिशास्त्रविचारद्वारानिरीक्ष्यनिवर्तते उपरमति यथाजन्मदरिद्रोलक्ष्मीपतिंप्राप्यकाष्ठादिविक्रयात्तद्व्यापाराद्वासनावाउपरमतितथानिरतिशयानंदमयमात्मानंनिरीक्ष्यात्पल्पविषयसुखवाउपरमंप्राप्नोतीत्यर्थः ५९ ॥ ॥ ॥

\+ नत्रमूढस्यापिरोगादिवशाद्विषयेभ्यइंद्रियाणाम् उपसंहरणंभवति तत्रकथंतस्यप्रज्ञा प्रतिष्ठितेत्युक्तं श्रुतश्चाह ॥ +

मधुसूदनीटीका

\+ निराहारस्येंद्रियैर्विषयानन्नाहरतोदेहिनोदेहाभिमानवतोमूढस्यापिरोगिणःकाष्ठतपस्विनोवाविषयाःशब्दादयोनिवर्तंते किंतुरसवर्जंरसस्तान्वर्जयित्वाश्रतस्यविषयानिवर्तंते तद्विषयोरागस्तुननिवर्ततइत्यर्थः अस्यतुस्थितप्रज्ञस्यपरंपुरुषार्थंदृष्ट्वातदेवाहमस्मीतिसाक्षात्कृत्यस्थितस्यरसोपिक्षुद्रसुखरागोपिनिवर्तते अपिशब्दाद्विषयाश्च तथाचयावानर्थइत्यादौव्याख्यातं एवंचसरागविषयनिवृत्तिःस्थितप्रज्ञलक्षणमितिनदोषोभिचारइत्यर्थः यस्मान्नासतिपरमात्मसम्यग्दर्शनेसरागविषयोच्छेदः तस्मात्सरागविषयोच्छेदिकायाःसम्यग्दर्शनात्मिकायाःप्रज्ञायाःस्थैर्यंमहतायत्नेन

संपादयेदित्यभिप्रायः [illegible]

[illegible] ५९ ॥

सदानंदीटीका

ननु मूढजनस्यापि रोगादिवशातः स्वयं विषयेभ्योप्युपरतिरिंद्रिया
णां भवत्यतः १ प्रज्ञा प्रतिष्ठिता तस्य कथमुक्तमिहेति चेत् आतुरस्ये
द्रियैर्भोगाननाहरतस्याप्रज्ञात् २ प्राज्ञादयो निवर्तंते यदा काष्ठतप
स्विनः विषयेषु निवृत्तेषु तत्स्मान निवर्तते ३ स्थितप्रज्ञस्य धीरस्य
साक्षात्कृत्य परं पदं तदेवाहमिति स्वात्मपदे नित्यं स्थितस्य च ४ । विरे
तज्ज्ञाने द्वेषरागोपि विषयैः सह नश्यति एवं रागनिवृत्तिस्तत्त्वात्मवि
यतः ५ समूलरागायफच्छेदः स्यान्न साक्षात्कृतेर्मुनेः तस्मात्त्वमपि
तत्त्वैकसाक्षात्कारे यत्नस्व भोः ९ ५९ ॥

नीलकंठीटीका

ननु विषयेभ्य इंद्रियाणां निवृत्तिश्चेत् स्थितप्रज्ञताहेतुस्तर्हि सुप्तिमू
र्छालयग्रहावेशादावपि स्यादिति सर्वोपि स्थितप्रज्ञः स्यादेवेत्याशंक्याह
विषया इति सत्यं देहिनो देहाभिमानवतो मूढस्य मूर्च्छादौ निराहार
स्य इंद्रियैर्विषयानन्नाहरतोऽभुंजानस्य विषया विनिवर्तंत एव तथा
पि रसवर्जं रसो रागस्तद्वर्जं निवर्तंते तत्रापि सूक्ष्मरूपेण रागोस्ति रा
गमूलस्यात्मा ज्ञानस्याद्दाहादर्शनात् स्थितप्रज्ञस्य तु अस्य रसोपि नि
वर्तते ब्रह्मैवाहमस्मीति साक्षात्कृत्य निराहारस्य प्राज्ञादीन रसस्तु विशेष
वर्तते मूलाज्ञानदाहादित्यस्ति समादेः समाधिस्थस्य मूढस्यापि विषयानन्नाह
रतो भावः प्रांचस्तु रोगिणः काष्ठतपस्विनो वा मूढस्यापि विषया निवर्तंत इति
रतो रसवर्जं विषया विनिवर्तंते स्थितप्रज्ञस्य तु परं दृष्ट्वा रसोपि निवर्तत इति
व्याचख्युः ५९ ॥

प्रानंदीटीका

गी॰
टी॰
हि॰

371

आह्रियते इत्याहारो विषयग्रहणं तस्मान्निर्गतस्योपवासादिना
विषयग्रहणमकुर्वतः रसो विषयाभिलाषस्तद्वर्जं विनिवर्तते निराहा
रस्य विषयाभिलाषस्तिष्ठत्येवेत्यर्थः परं दृष्ट्वा वक्ष्यमाणप्रकारेणासं
प्रज्ञातेन परमेपि यन्नस्मात्ताक्वारात् रसो विषयाभिलाषो निवर्त
ते [illegible]
[illegible] ५९॥

+ अथो विषयेभ्य इंद्रियसंहारः किं शब्दाद्यग्रहणेन वा किं वा ग्राह्यमाणेषु शब्दादिष्वपि निर्विकारत्वेनात्रोक्त इति पक्षद्वयसंभावनायां पूर्वपक्षोऽयं प्रतिपादनपूर्वकमुत्तरमेव पक्षं समर्थयितुमाह +

रामकंठी टीका

अभ्युपगम्येदमुच्यते अस्त्येतत् निराहारस्य शास्त्रविहितानपि शब्दादी
ननाहरतस्तान् दूरतः परिहरतो विषया इष्टाः शब्दादयो विनिवर्तन्ते प्र
त्यासत्त्यभावात्तत्कार्यं रागादिकं नारभन्ते किंतु रसवर्जं तद्विषयं रसम
भिलाषं रागाख्यं क्लेशं वर्जयित्वा सहितरानीप्रसवम नुवर्तते परम
नैष्ठिकस्य रसोपि निवर्तते नाम परं प्रकृष्टं समाधेयं वस्तु दृष्ट्वा तत्सा
क्षात्कृत्य यदैष योगी यदा परतत्त्वविषयपरिहारसमाधिक्रमेणाप्रपश्यति त
दा तत्स्वरूपत्वात्तस्य रसोपि जातु निवर्तते इति क्रान्तो निष्ठान्ततेन व्याख्ये
य [illegible]
[illegible]
[illegible] ५९॥

लासिकी टीका

ननु यदि विषयेषु ग्रहनिरवस्थितमप्रत्तलक्षणं नष्टसंज्ञानामातुरो
पवासपरतपस्विनां विषयेषु ग्रहणेन विशेषस्तत्राह विषया इति
^किंतु रसवर्जं रसोऽभिलाषो रागस्तु न निवर्तते इत्यर्थः स तदानीं ग्रह
मनुवर्तते परं परमात्मानं दृष्ट्वा सतः साक्षात्कारवतो रसो रा
गोऽपि निवर्तते न स्फुरतीत्यर्थः ५९॥

^निराहारस्येंद्रियैर्विषयग्रहणमकुर्वतो देहिनो देहाभिमानिनो तस्य विषया निवर्तन्ते तदनुभावो निवर्तते इत्यर्थः

विषयाननाह हरतःआतुरस्यापिइंद्रियाणिनिवर्तंतेनतत्तद्वि
षयोरागःसकथंसंक्रियतेतदाह विषयेति निराहारस्यअनुप
भुज्यमानविषयस्यदेहिनःरसवर्जंविषयरागवर्जंविषयाविनिव
र्तंतेअस्यदेहिनःरसोपिपरंपरमार्थतत्त्वंदृष्ट्वानिवर्तते ५९

रसावीरसमिहोच्यिनी॥

ननुशुद्धविमुखस्यतत्रस्यतपस्विनोपिकथंनस्थितप्रज्ञत्वमाहो
वाचकइत्याशंक्याह विषयाइति आहरंतीति प्रहरंत्यस्मिन्निति आ
हरति भवत्यतिवीरानितिवाबुध्यत्याहारपाहेनशुद्धमभिधीय
मे ततश्चनिराहारस्यशुद्धविमुखस्यविषयाः देषाविषयैतूपव
तैनमित्यनुपासनादेषाविषयास्तउपलब्धितंसमांगराज्यंविनि
वर्तंतेपरंपराक्रमणात् ननुरागयातस्तवंच किंतु रसवर्जंरागत्त
नविगलतीतिसंजीवनायपेक्षणास्वधर्मेत्यागपूर्वंवैमुख्यात् प्र
नएवप्रज्ञास्थैर्याभावान्नामोस्थितप्रज्ञः रागद्वेषरहितेनस्वोविते
कर्मणिप्रहतिमत्वंहितहलक्षणं शेषामर्थेकांक्षितेनोराज्यभोगाः
स्वकानिचेत्यादिकमेवद्विष्टद्वपरांमुखतावाथनंजयेनदृष्टत्वेन
दर्शितं आपिपुनरर्थे अस्यकर्मयोगिनस्तुरसःपरंदृष्ट्वा स्वधर्मो
स्वरूपमेवपरंपुरुषार्थसाधनमितिनिश्चित्यविगलतिसतादि
निरस्यागेनशुद्धप्रहतस्यप्रज्ञास्थैर्यमितितात्पर्यं ५९॥

मधुभाष्य

विषयाइति इंद्रियाणिजयंत्याशुनिराहाराममनीषिणः वर्जयित्वातु
रसनामसोरस्येवहृतइतिवचनाद्रागवते रसमाहृत्यरागवापि
त्वाव अपरोक्तज्ञानरहितज्ञानिनोपिसाधारणप्रयत्नवतोपिमनोद
इंद्रियाणि पुरुषस्यप्रमाथीनिभिमानिनः कोदोषस्ततःप्रमाथीति
पथमपीलानिपुरुषस्य तत्प्राकाम्यवेत्यतआह ५९॥

372

भाषा अनुवाद

जो कहो कि इंद्रियों की विषय मे अप्रवृत्ति होना यह स्थित प्रज्ञ का लक्षण न होसकेगा क्यों कि जड़ आतुर औ उपवास करने वाले मनुष्योंकी इंद्रीभी विषयमे नहीं प्रवृत्त होतीहै तो इनसे औ ज्ञानीसे फेरि क्या विशेष कहे अन्तर है इन को भी स्थिरबुद्धि मानि कहना उचित है तिस पर कहते हैं कि हां आहार नकरनेसे निराहार पुरुष को यद्यपि विषयों का इंद्रिय द्वारा ज्ञान नहीं होता सत्य है परंतोभी उसकी विषयों से अभिलाषा नहीं जाती अर्थात् विषयकी वासना मनमे बनीरहती है और स्थित प्रज्ञ पुरुष के परमात्म दर्शन होनेसे विषय की लालसा निवृत्तहो जाती अच्छी तरहसे अभिलाष सहित विषय वासना नाश होती है और जड़ आतुर जैसे विषयों के अज्ञ तैसे आत्माको भी नहीं जानते तोवे स्थिर बुद्धि कैसेहोसकते हैं और रस कहे राग जो प्रीतिसो स्थित प्रज्ञ की आपसे आप निवृत्त होतीहै ५९ ॥

दोहा

विषयनिवर्तनजीवके निराहारके होय विषयरागछूटैंतवे देष निरसपरकोय ५९ ॥

373

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इं
द्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६०

शांकरभाष्यम्

सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता आदाविंद्रियाणि स्ववशे
स्थापयितव्यानि यस्मात्तदनवस्थापने दोषमाह यततइति यततः प्र
यत्नं कुर्वतोपि हि यस्मात् अपि कौंतेय पुरुषस्य विपश्चितो मेधाविनो
पीति व्यवहितेन संबंधः इंद्रियाणि प्रमाथीनि प्रमथनशीलानि वि
षयाभिमुखं हि पुरुषं विक्षोभयंत्याकुलीकुर्वंत्याकुलीकृत्य च हरंति
प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकविज्ञानयुक्तं मनो यतस्तस्मात्

आनंदगिरिकृतटीका

श्लोकांतरमवतारयति सम्यग्दर्शनेति मनसः स्ववशत्वादेव प्रज्ञा
स्थैर्यसंभवे किमर्थमिंद्रियाणां स्ववशत्वापादनमित्याशंक्याह ननु
विवेकवतो विषयदोषदर्शिनो विषयेभ्यः स्वयमेवेंद्रियाण्यावर्ते
ते किं तत्र प्रज्ञास्थैर्यं चिकीर्षता कर्तव्यमिति तत्राह यततो हीति वि
षयेषु भूयो दोषदर्शनमेव प्रयत्नः हिशब्दस्य यस्मादर्थस्य समासो
संबंध्य वदति अपिशब्दस्य प्रयत्नं कुर्वतोपीति संबंधं गृहीत्वा संबंधा
न्तरमाह पुरुषस्येति प्रमथनशीलत्वं प्रकटयति विषयेति विक्षोभ
स्याकुलीकरणस्य फलमाह आकुलीकृत्येति प्रकाशमेवेत्युक्तं वि
शदयति पश्यत इति विपश्चितो विदुषोपि प्रकाशमेव प्रकाशशब्दित
विवेकाख्यं विज्ञानयुक्तमेव मनो हरंतीद्रियाणीति संबंधः हिशब्दार्थम
नूद्य तस्मादिंद्रियाणि स्ववशे स्थापयितव्यानीति पूर्वेण संबंधमा
भिसंधायाह यतस्तस्मादिति ६०

स्वामिकृतटीका

इंद्रियसंयमं विना तु स्थितप्रज्ञता न संभवति अतः साधकावस्थायां
तत्र यत्नः कर्तव्य इत्याह यततो ह्यपीति द्वाभ्यां यततो मोक्षे प्रयतमा
नस्यापि विपश्चितो विवेकिनोपि मन इंद्रियाणि प्रसभं बलाद्धरंति यतः

प्रमाथीनि प्रमथनशीलानि क्षोभकाणि ६०॥

पैशाचभाष्यम्

तस्यैवमस्यादर्शनस्थैर्यस्योपायमाह यततो ह्यपीति यततः यतमानस्यापि पुरुषस्य विपश्चितः मेधाविनोऽपि मनः इन्द्रियाणि प्रमाथीनि प्रमथनशीलानि प्रसभं हरन्तीति ६०॥

रामानुजभाष्यं

आत्मदर्शनेन विना विषयरागो न निवर्तते अनिवृत्ते विषयरागे विपश्चितो यतमानस्यापि पुरुषस्येन्द्रियाणि प्रमाथीनि बलवन्ति मनः प्रसभं हरन्ति एवमिन्द्रियजय आत्मदर्शनाधीनः आत्मदर्शनमिन्द्रियजयाधीनमिति ज्ञाननिष्ठा दुःसम्पाद्या ६०॥

अभिनवगुप्तकृतटीका

यद्यस्मात्तस्यापि तत्परस्यापि मन इन्द्रियैर्ह्रियते अथवा यतन्तस्य सयत्नस्यापि योगिनश्च मनः एवं जेतव्यमिति हितो योऽनिर्वाणितः ६० ॥

परमार्थप्रपाटीका

एवं विस्तरतो व्यवहारस्य स्थितप्रज्ञस्य दशामुक्त्वेदानीमभ्यासादिपूर्वं पूर्वतो दशामाह यततो ह्यपीत्यादि यततो ह्यात्मप्राप्त्यर्थं प्रयत्नं कुर्वतोऽपि विपश्चितः आत्मानात्मविवेकवतः पुरुषस्येन्द्रियाणि चत्वारीति अनादिविषयवृत्तिमत्तया प्रमाथीनि क्षोभकाणि आत्माभिमुखमपि मनः प्रसभं बलाद्धरन्ति विषयवृत्तिं कुर्वन्ति ६०

वनमालीटीका

तत्र प्रज्ञास्थैर्यं वा स्थितं तदिन्द्रियनिग्रहो साधारणो हेतुः तदभावे प्रज्ञादर्शनादि तन्निग्रह आवश्यकः तत्र सदनन्तरगालयमन्तर्यामिणं परमकारुणिकं मामनाश्रित्य स्वयत्नेनैवेन्द्रियजये प्रवर्तमानस्यानर्थो भवतीत्याह यततो ह्यपीति हे कौन्तेय यततः भूयो भूयो विषयेषु दोषदर्शनात्मकं यत्नं कुर्वतो विपश्चितो विवेकिनोऽपि पुरुषस्य मनः तत्समात्रं निर्विकारं कृतमपीन्द्रियाणि हरन्ति विकारं प्रापयन्ति ननु विरोधि निर्विवेकमनः कथं तत्राह प्रमाथीनि प्रमथन

श्येल्लानि अतिवलीयस्त्वाद्विवेकोपमर्दनक्षमाणि अतः प्रसभं बला
त्कारेणापश्यत एव विपश्चितः स्वामिनि विवेके वरत्नके मतिविवेकप्रज्ञा
प्रविष्टमपि मनस्ततः प्रथा अस्व विषयाविष्टं तेन हरंतीत्यर्थः हि प्रसि
द्धोयमर्थः लोके यथा प्रमाथिनो दस्यवः प्रसभं धनिनो रक्षकं चाभिभू
यत्नयोः पश्यतोरेव धनं हरंतीति तथेंद्रियाण्यपि विषयसंनिधानेन मनो
हरंतीति ६०॥

ऊरुमवैजयन्तीटीका

नत्विंद्रियाणां विषयेभ्यो निवृत्तिरेवैतेनैव फलसिद्धिर्भवति विषयरागस्या
निवृत्तेः न सत्यां का वा ज्ञानित्वाद्विवृत्ते येवात्मदर्शनमपि किमर्थं कर्तव्यमि
त्याशंक्य विनात्मावलोकनेन विषयरागस्यानिवृत्त्यभावस्तदभावे इंद्रि
यविजयस्याप्यभावस्ततोपि पुनर्विषयाविर्भावो भवतीत्याशयेनाह य
ततः इति द्वाभ्याम् यततः इति हे कौंतेय यद्यस्मादपि निश्चयेन यततः विष
येभ्यः पुनः पुनरिंद्रियनियमने यतमानस्यापि तस्य विपश्चितो निजज्ञानिला
भविवेकवतः पुरुषस्य शत्रुदमने सामर्थ्यवतः एवंभूतस्यापि ज्ञानिनः
प्रमाथीनि प्रकर्षेण मनसो मथनस्वभावकानींद्रियाणि प्रसभं हठान्म
नो हरंति रागयुक्तानींद्रियाणि विषयेषु मनः आकर्षंति रागवत्त्वमस्त
इंद्रियाणां त्वेवमिंद्रियमनसोरन्योन्यं विषयेषु विकर्षणाकर्षणेनो भ
योर्विषयप्रवृत्तिरेव भवति न तु निवृत्तिः अतः आत्मदर्शनेन विषयराग
स्य निवृत्तौ सत्यां स्वमेवेंद्रियमनोविषयाः सर्वे निवर्तंते इत्यभिप्रायः कौं
तेयेत्यनेन मदनुग्राविजितादिलक्षणायाः पतिदेवतायाः कुंत्याः पुत्रो
मदनुरक्तस्त्वमस्यतस्तवेंद्रियविजयो मदाश्रयणेनातिसुलभो भवतीति सू
चितम् ६०॥

+ तत्रप्रज्ञास्थैर्यार्थं बाह्येंद्रियनिग्रहो मनोनिग्रहस्त्वा साधारणं कारणं तदभावे प्रज्ञानाशादर्शनादि तिवक्तुं बाह्येंद्रियनिग्रहाभावे प्रथमं दोषमाह +

मधुसूदनीटीका

+ हे कौंतेय यततः भूयो भूयो विषयदोषदर्शनात्मकं यत्नं कुर्वतोपि वति
ङ्गोङि तकरणादनुदात्तेतो नावश्यकमात्मनेपदमिति ज्ञानात्परस्मैप
दमविरुद्धं विपश्चितः अत्यंतविवेकिनोपि पुरुषस्य मनः क्षणमात्रेनि
र्विकारं कृतमपींद्रियाणि हरंति विकारं प्रापयंति नत्वविरोधिनि विवेक

गी॰ टी॰ हि॰

केमतिज्ञतोविकारप्राप्तिस्तत्राह प्रमाथीनिप्रमथनशीलानिस्रुति
वलीयस्त्वाद्धिवेकोपमर्दनसमर्थानि अतः प्रसभं प्रसह्यबलात्कारेण
प्रपश्यतएवविपश्चितिः स्वामिनिविवेकेसतिसर्वंप्रमाथिनादेवेंद्रिया
णिविवेकजप्रज्ञायांप्रविष्टंमनस्ततः प्रच्याव्यस्वविषयाविष्टंवितन्व
नै॰ तेनीत्यर्थः हिशब्दःप्रसिद्धिद्योतनार्थःइति प्रसिद्धोह्ययमर्थोलोकेयथाप्र
माथिनोदस्यवः प्रसभमेवपालितेनपत्युरलंकंत्वाभिभूयतयोःपश्य
तोरेवधनंहरंति तथेंद्रियाण्यपिविषयसन्निधानेमनोहरंतीति
६० ॥

सदानंदीटीका

मज्ञास्थैर्यपरोहेतुःसेंद्रियमनसोनिग्रहः तदभावेपराहानिःप्रज्ञाया
इतिकथ्यते १ भूयोभूयोपिभोगेषुदोषदृष्टिंप्रकुर्वतः सम्यग्विवे
किनोप्येतन्मनःस्थितमपिक्षणात् २ विकारंप्रापयंत्येतानींद्रियाणिप्र
मथनात् यततःपश्यतएवबलात्कारात्स्वामिनस्यापिविपश्चितिः ३ तेषांका
निविलीयस्त्वात्विवेकेसतिरक्तके प्रविष्टंतानिविख्याप्यविवेकजमन
तोमनः ४ विषयाविष्टमासक्ष्यांतहरंत्येवेंद्रियाणयदः यथाप्रमाथि
नश्चौराःप्रसह्यधनिनोधनं ५ हरंत्येवंमनःस्वस्वविषयेषींद्रियाणि
च ९ ६० ॥

नीलकंठीटीका

किंच हमादेरिंद्रियाणिस्त्रांतानिस्वयमेवलीयंते समाहितेनतुतानि
कूर्मेणांगानीवस्वेच्छयासंह्रियंते एतच्चात्यंतायाससाध्यमित्याह
४ यततइति विपश्चितःशास्त्राचार्योपदेशवतोयततोपिसमाधिसि
द्ध्यर्थंयतमानस्यापिपुरुषस्येंद्रियाणिकर्तृणिमनःप्रतीचिस्थिरी
क्रियमाणंकर्मभूतंहरंतिविषयप्रवणंकुर्वंति यतःप्रमाथीनि
यथाबलवस्तोराबनेएकंपुरुषंप्रमथ्यतस्यवित्तंहरंति एवंइंद्रियाणि
यततोमनोहरंति यतःप्रसभंमतिप्रायेनप्रमथनशीलानि ६० ॥

आनंदीटीका

तदिंद्रियजयेयतनस्यापिसुष्ठुयोगाभ्यासेनकृतयत्नस्यापि एवंचेत्किंका

+ एवंविषयपरिहारपरमसमाधेः परामपि काष्ठां प्राप्तस्य स्खलत्वं प्रतिपादयन्प्रयोक्तृत्ता
+
नस्सर्वमनिषिद्धविषयेसेवात्मकं मस्खलं समाधिं सिद्धांतीजर्वन्नाह

र्यमित्याह ६०॥

रामकंठीटीका

+ यतस्मान्नस्यापि विषयानाहरणा समाहितस्य परतत्वदर्शनयोग्यता
मपि प्राप्तस्य विदुषोऽपि विपश्चितो ज्ञानविधानजागरूकत्वाच्छिद्रान्वेषा
णापरायणाप्रमथनशीलानींद्रियाणिप्रसभंप्रसह्यैव कं विदेवकाल
लेशं लब्ध्वा मनश्चित्तं हरंति लब्धादपि समाधिफलाद्यपकर्षंति विष
याभिमुखतां नयंति श्रूयंते हि ययाति विश्वामित्रप्रतिषेधयोगानिशायो
गिनश्चिरादपि इंद्रियैः कामान्प्रति प्रवर्तनेन प्रमथित चित्ताः [illegible]
[illegible]
[illegible] ६० ॥
[illegible]

लौकिकीटीका

[illegible]
च्छिद्रान्वेषिणामिंद्रियाणां वशीकारं विना स्थितप्रज्ञत्वासंभ
वइत्याह यतत इति सर्वं संहरंति विषयाभिमुखं कुर्वंति हि प्रसि
द्धोऽप्रसिद्धमेवेतत् ६०॥

पंचोलीटीका

इंद्रियाणामयमने दोषमाह यतत इति
आत्मप्रज्ञाचिकीर्षोः इंद्रियाणामयमने दोषमाह यतत इति मेधा
हे कौंतेय हि यस्मात् यततोऽपि यत्नं कुर्वतोऽपि विपश्चितः
विनः पुरुषस्य प्रमाथीनि प्रमथनशीलानि इंद्रियाणि प्रसभं ह
ठात् मनो हरंति ६०

रसाविरससिद्धांतबोधिनी॥

यतत इति हि यस्माद्धि पश्चितः सिद्धासिद्धान्यतरस्याव प्रणमाविता
यततोऽपि प्रयत्नस्यापि पुरुषस्य प्रकर्षेणा
निश्चित्वानस्य अत एव यततोऽपि सयत्नस्यापि मनो बलात्कारेण हरंति विषया
मथितं शीले येषां तानींद्रियाणि दर्शनेस्वेदो यत्नैः प्रह्लादैः प्रोधित्यात्
च्यावयंति च त्वगादिवं

यततः प्रयतमानस्य
प्रत्यवस्य हृदयपि अनुदा
तेत्वलक्षणमात्मनेपद
मनित्यं च लिङ्गे। ड्रि.न्त
रणाज्ञापकात् विपश्चि
तः सदसद्विवेकिनः पु
रुषस्य यतमानस्य मना
हृत्य इन्द्रियाणि प्रमाथी
नि दस्यवइव प्रमथन
शीलानि लोभकाणि प्र
सभं बलात्कारेण मनो
मननात्मकं चित्तमेव

कर्मयोगिनाचमनएवजेतव्यमितितात्पर्यं मनसोजयस्यनिश्च
दार्ढ्यं इति द्वितीयो निर्णीतः ८०॥

मध्वभाष्य

८०॥

भाषा अनुवाद

इंद्रियोंका संयम किये बिना अर्थात् विषयों से रोकने के बि
ना स्थित प्रज्ञ कहे परमात्मा मे अचल बुद्धि होती नहीं इससे
प्रथम साधन की अवस्था मे इंद्रीयोंको स्वाधीन करने के अर्थ
बड़ा यत्न करना चाहिये यह कहते हैं कि हे कौंतेय कुंतीनन्द
न अर्जुन मोक्षके हेत प्रयत्न करते हुये विवेकी विचारवान
ज्ञानी पुरुषके भी मनको ये प्रबल प्रमाथी कहे क्षोभ करने वा
ली इंद्री हरणा करलेती हैं ६० ॥

दोहा

यत्न करत भी पुरुषके कुंति सुत बुधकेहि मथनशील इं
द्रिय सबै हठकर मन हरलेहि ६०॥

377

तानिसर्वाणिसंयम्य युक्तआसीतमत्परः वशे
हियस्येन्द्रियाणि तस्यप्रज्ञाप्रतिष्ठिता ६१ ॥

शाङ्करभाष्यम् ॥

तानीति तानिसर्वाणि संयम्य संयमनं वशीकरणंकृत्वा युक्तः
समाहित सन्नासीत मत्परोऽयंवासुदेवः सर्वप्रत्यगात्मापरोय
स्य समत्परः नान्योऽहं तस्मादित्यासीतेत्यर्थः एवमासीनस्य
यतेर्वशे हि यस्येन्द्रियाणि वर्तन्ते अभ्यासवशात् तस्य प्रज्ञा
प्रतिष्ठिता ६१ ॥

आनन्दगिरिकृतटीका ॥

इन्द्रियाणां स्ववशत्वसम्पादनानन्तरं कर्तव्यमर्थमाह ता
नीति एवमासीनस्य किंस्यादिति तदाह वशेहीति समाहि
तस्य विक्षेपविकलस्य कथमासन मित्यपेक्षायामाह मत्
परेति परापरभेदशङ्कामपाकृत्यासनमेव स्फोरयति नान्यो
ऽहमिति उत्तरार्द्धं व्याकरोति एवमिति हिशब्दार्थं स्फुटयति
अभ्यासेति परस्मादात्मनो नाहमन्योस्मीति प्रागुक्तानुसन्धा
नस्यादरेण नैरन्तर्य दीर्घकालानुष्ठान सामर्थ्यादित्यर्थः
अथवा विषयेषु दोषदर्शनाभ्यास सामर्थ्यादिन्द्रियाणि संय
तानीत्यर्थः ६१ ॥

स्वामिकृतटीका ॥

यस्मादेवं तस्मात् तानीति युक्तोयोगीतानिइन्द्रियाणिसंयम्य
मत्परः सन्नासीत यस्यवशेवशवर्तीनि एतेनकथमासीतेति
प्रश्नस्यवशीकृतेन्द्रियः सन्नासीतेतिउत्तरमुक्तंभवति ६१ ॥

पिशाचभाष्यम् ॥

यस्मादेवंतस्मात् तानिसर्वाणीन्द्रियाणिवशीकृत्ययुक्तःसमा
हितःसन्नासीतमत्परः अहंवासुदेवःसर्वप्रत्यगात्मापरःप्रधानं
यस्यसमत्परः नान्योऽहं तस्माद्वासुदेवादित्युपासीतेत्यर्थः वशे
एषः वशेहियस्येन्द्रियाणिवर्तन्तेअभ्यासबलात्तस्यप्रज्ञाप्रति
ष्ठिता ६१ ॥

गी. टी. द्वि.

378

रामानुजभाष्यम् ॥

सर्वस्य दोषस्य परिजिहीर्षया विषयानुरागवियुक्ततया दुर्जयानीन्द्रियाणि संयम्य चेतसः शुभाश्रयभूते मयि मनोवस्थापनसमाहित आसीत मनसि मद्विषये सति निर्दग्धाशेषकल्मषतया निर्मलीकृतं निःशेषविषयानुरागमलरहितं मन इन्द्रियाणि स्ववशानि करोति ततो वश्येंद्रियं मन आत्मदर्शनाय भवति उक्तं च यथाग्निरुद्धतशिखः कक्षं दहति सानिलः तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषमिति तदाह वशे हीति ॥ ६१ ॥

अभिनवगुप्तकृतटीका ॥

य एवं मनसेन्द्रियाणि नियमयति न त्वग्रहेण स एव स्थिरप्रज्ञः स च मत्पर एवासीत मामेव चिदात्मानं परमेश्वरमभ्यसेत् ॥ ६१ ॥

परमार्थप्रपा ॥

तथा च मनोनिग्रहस्यापि वैकल्यादिन्द्रियनिग्रहो मुख्य एव भवति एवं तानि सर्वाणि संयम्य अतीन्द्रियनिग्रहेण स्वाधीनानि कृत्वा मत्परः सन्मदाश्रयवर्तित्वेन युक्तः सन्नासीत तानि एवमनेनापि प्रकारेणेन्द्रियाणि यस्य वशे भवंति तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः अनेन किमासीतेति प्रश्नस्य वशीकृतेन्द्रियः सन्नासीतेत्युत्तरमुक्तं भवति तदुक्तमथर्वोपनिषत्सु यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सह तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः यस्तु विज्ञानवान्भवति युक्तेन मनसा सह तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेरिति स्पष्टार्थेयमुक्तिः ॥ ६१ ॥

वनमाली टी. ॥

मामाश्रित्य ये हीन्द्रियजयाय यतंते ते नायासेनैवेन्द्रियाणि वशीकुर्वन्तीत्याह तानीति तानि सर्वाणीन्द्रियाणि ज्ञानकर्मसाधनानि संयम्य सम्यक् वशीकृत्य युक्तः समाहितमनाः सन्नासीत प्रमाथिनां कथं वशीकरणं तत्राह मत्परः अहं सर्वेश्वरोऽनंतगुणगणालयः परः उत्कृष्टः सर्वस्वतयोपादेयो यस्य स मत्परः एकांतमद्भक्त इत्यर्थः तथा चोक्तं न वासुदेवभक्तानामशुभं विद्यते क्वचिदिति यथा हि लोके बलवंतं राजानमाश्रित्य दस्यवो निगृह्यंते

मुपा

राजाश्रितोयमिति ज्ञात्वा वतेस्य [illegible] मेवृतद्व [illegible] भवंति तथै
व भगवंतं सर्वान्तर्यामिणमाश्रित्य तद्भक्तं नैवदुष्टानींद्रियाणि
निगृहीतानि भवंति इंद्रियवशीकारे फलमाह वशेहीति किमा
सीतेत्यस्योत्तरमुक्तं ६१ ॥

उत्तमवैजयनीटी· ॥

तस्मात्तानीति सर्वाणि बाह्याभ्यन्तराणि पूर्वस्परेण विषयरागो
त्पादकानि इंद्रियाणि संयम्य विषयेभ्यः संयम्य परमं कृत्वा मत्पर
ब्रह्मैव सर्वेश्वरः परो यस्मात्स तथा मदनन्यभक्तः सन्युक्तः व
शीकृतेंद्रियामनाः ज्ञानयोगयुक्तः सावधानः सन्नासीत तिष्ठे
त् एतदुक्तं भवति यथान्यदेवभक्तानां रावणकंसदुष्कारपरा
दीनामिंद्रियैः शत्रुभिश्च पराजयमरणादीन्यनेकामंगलानि
भवंति तथा मम भक्तानां युष्मदादीनां भवंति यतो मद्विज्ञानाम
टैकाधीनयोग ब्रह्म मानोहं यन्तर्यामिरूपेण बहिर्यामिरूपेण च
स्थितः सर्वेश्वरोहमेवाशुभानींद्रियाणि शत्रूंश्च नाशयामि तथा
चोक्तं यथाग्निरुद्धशिखः कक्षं दहति सानिलः तथा चित्त
स्थितो विष्णुर्योगिनां सर्वकिल्बिषमिति नवासुदेवभक्तानाम
शुभं विद्यते क्वचिदित्यादिप्रमाणमिति नन्वेंद्रियसंयमे कृते यो
गिनः किंफलं स्यादित्यपेक्षायाह वशेहीति हीति निश्चये यस्य
योगिनः इंद्रियाणि वशे स्वाधीने भवंति तस्य प्रज्ञा प्रतिष्ठिता
सोपि स्थितप्रज्ञ उच्यते इत्यर्थः ६१ ॥

मधुसूदनी टी· ॥

एवं तर्हि तत्र कः प्रतीकार इत्यत आह तानींद्रियाणि सर्वाणि ज्ञा
नकर्मसाधनभूतानि संयम्य वशीकृत्य युक्तः समाहितः निगृही
तमनाः सन्नासीत निर्व्यापारस्तिष्ठेत प्रमाथिनो कथं स्ववशीक
रणमिति चेत्तत्राह मत्पर इति अहं सर्वात्मा वासुदेव एव परम
उत्कृष्ट उपादेयो यस्य स मत्परः एकान्तमद्भक्त इत्यर्थः तथा
चोक्तं नवासुदेवभक्तानामशुभं विद्यते क्वचिदिति यथा हि लो
के बलवन्तं राजानमाश्रित्य दस्यवो निगृह्यन्ते राजाश्रितोयमि
ति ज्ञात्वा चेतस्य यमेव तद्वश्या भवंति तथैव भगवंतं सर्वान्

योमिनमाश्रित्यतत्प्रभावेनैवदुष्टानींद्रियाणिनिगृह्णातितन
स्वभगवदाश्रितोयमितिमत्वातानितद्वश्यानिभवंतीतिभावः
यथाचभगवद्भक्तेमहाप्रभाववत्वंतथाविस्तरेणाग्रेव्याख्यास्यामः
इंद्रियवशीकारेफलमाह वशेहीतिस्पष्टं तदेतद्वशीकृतेंद्रियः
सन्नासीतेति किमासीतेतिप्रश्नस्योत्तरमुक्तंभवति ६१

सदानंदी टी० ॥

एवंतर्हिमतीकारःकस्तत्रेत्यतआह तं तानींद्रियाणिधीकर्म
साधकान्यखिलान्यपि १ समाहितोवशीकृत्यनिगृहीतमना
स्वसन् निर्व्यापारतयातिष्ठेन्मांसमाश्रित्यमत्परः २ वासुदेवा
हमेवशेषोयस्योपादेयश्चांतरः सचास्त्येकांतमद्भक्तोवशीकर्ते
द्रमोखिलं यथाराजानमाश्रित्यनिगृह्णंतेहिदस्यवः राजाश्रि
तोयमित्येवंज्ञात्वावश्याभवंतिते ४ भगवंतंतथाश्रित्यतत्प्रभा
वेणसर्वशः निगृह्णानींद्रियाण्येवत्तोभक्तान्यपियोगिनः ५
कस्मादाश्रितोयंमत्वेत्येस्वयंवश्यानिसंतिवै माहात्म्यंभगवद्भ
क्तेःस्फुटंचाग्रेभविष्यति ६ इंद्रियाणांवशीकारेफलमाहरं
मापतिः वशेहीतिस्पष्टमिदंकिमासीतेतिप्रश्नतः ७ उत्तरं
प्रोक्तमित्येतदतःकृत्स्नंयतेःशृणु ८ ६१ ॥

नीलकंठी टी० ॥

यद्यप्येवंतथापितानिनियंतव्यान्येवान्यथास्थितप्रज्ञत्वस्यैवा
सिद्धेरित्याह तानीति संयम्यवशीकृत्ययुक्तःसन्नद्धःमत्परःअ
हमेवसर्वेषांप्रत्यगात्मापरःस्त्र्यादिभ्योवास्नेभ्योदेहेंद्रियादि
भ्यश्चांतरेभ्यश्चउत्कृष्टःप्रियतमोयस्यसमत्परःसन्नासीत हि
यस्मात्वशेयज्ञातायांशेषंस्पष्टं ६१ ॥

२ श्रीआनंदी टीका

यद्यस्मात्[illegible]विषया[illegible]समाहितस्य[illegible]दर्शनयोग्यतामा
[illegible]विषमश्रितोज्ञानविज्ञानजागरूक[illegible]परा
[illegible]मनवनशीलानींद्रियाणिप्रमथप्रमथे[illegible]देवकालले[illegible]
[illegible]रंति लब्धादपि[illegible]मलाहमकुर्वति विषयाभि[illegible]

यंति प्रत्येंद्रियमादिविषयप्रतिषेधयोगनिष्ठायोगिनश्चिरादपि
इंद्रियैः कामान्प्रतिप्रवर्तनेन समर्थितचित्तः यत एवमयं सच्चलो विषय
परिहारसमाधिर्न तस्तानींद्रियाणि मनसा यथोक्तज्ञाननिष्ठेन चेतः
सामर्थ्यमात्मवशानि कृत्वा युक्तो यथोक्तलक्षणे स्वात्मनत्वे समाहितः
सर्वावस्थास्तदेकनिष्ठः मत्परः शास्त्रानिषिद्धशब्दादिग्रहणेष्व
आसीत यस्मात् यथोक्तेन क्रमेण यस्य योगिनः इंद्रिया
ण्येवं इंद्रियनिग्रहपरः आसीत तस्य प्रतिष्ठिता लब्धनिश्चलस्थितप्रज्ञोच्यते
णिवशे विधेयत्वेन वर्तंते तस्य प्रतिष्ठिता
नागेंद्रः पोतः कश्चित् गारुडिकस्तादृशः संभवति यो मंत्रप्रभावेन भुजगा
स्वनिषेद्धुमलं मयदातास्तत्रोपासनशैथिल्यलक्षणप्रमादमातिष्ठति
तदा तेक्रिडान्वेषिणो भुजगास्तं व्यापादयन्त्येव कश्चित् गारुडशास्त्र
रहस्यं वेदित्वा तादृशातिशययुक्तो भवति येन तैरेव भुजगैः स्वगदामभि
रिवक्रीडति तं च ते कदाचिदभिभवितुं प्रभवंति एवं योगी कयाचित्
तयाकं वितर्काल विषयान्परिहृत्य समाधिमभ्यस्यति तस्य मनागप्यवधा
नविक्षेदात्ते लब्धावकाशा विषयाः चित्तं प्रमथ्नन्त्येव यस्तु यथोक्तपार
मार्थिके स्वात्मन्येव सदा सम्यगवस्थितः स विषयैः क्रीडन्नपि न कर्णविहाधि
तेशकाः यथोक्त वसन्विषयमध्येपि न वसत्येव बुद्धिमान् सर्वत्र सर्वदा
द्विरसन्सविषयेष्वपि अथ कूर्मो गौ वेन्दुपमानं निर्देशाद्विषयेभ्यो यतत्त्व
तेन मे वेंद्रियाणां संहारः संयमो यस्य भ्योऽन्यथैव तेष्वतिपादयन्प्रतिष्ठितप्र
ज्ञत्वस्य श्लोकपंचकेन स्वलक्षणमाह ॥१॥

रामकंठटीका

युक्तः प्रभवस्तावष्टांगयोगः तानींद्रियाणि संयम्य मनसैव निगृह्य वशीकृ
त्य न तु निराहारतया तत्परः तेषामिंद्रियाणां संयमपर एवासीत तत्रैवाव
हितचित्तो न तु तिरपेक्षः हि यस्मात्यस्येंद्रियाणि वशे तस्य प्रज्ञा प्रतिष्ठिता
अत्र मत्पर इत्यपि उल्कपाठदर्शनात् अहं वासुदेव एव पर उपास्यो यस्य
तिवाव्यायामीश्वरप्रणिधानाद्वेति योगशास्त्रसूत्रार्थो वेत्यापरमेश्वरा
भिध्यानमात्रेणापींद्रियवशीकारो जायत इत्यर्थः ॥१॥

तात्पर्यटीका

यथा मन्दमंत्रा अपि संगारुडिके क्रिडान्वेषिणो भुजगा व्यापादयितुमुद्य
छंति गारुडाभ्यस्तमंत्रस्तु वशीकृतास्तैः स्वगदामभिरिवक्रीडति तद्वेत
त् यथोक्तं वसन्विषयमध्येपि न वसत्येव बुद्धिमान् सर्वदा सत्येव दुर्बोद्धिर

...एवं ततः ता
...णींद्रिया
...यम्य वशीकृ
...त्वा भ्या
...नत्वप्रवृत्त्या
...आत्मतत्त्वे स
...तः मत्परो
...एव चिदात्मानं
...मस्य र भक्त्या
...तः आसीत स
...स्येत युक्तमेवै
...न हि राजाश्रि
...ति दस्यवः प्रभ
...वशीकारफ
...ाह वशेहीति

सन्त्वविषयेष्वपि ६१ ॥

पंचोलीटीका

युक्तः समाहितचित्तः तानि सर्वाणि इंद्रियाणि संयम्य वशीकृत्य मत्परः मत्परायणः तिष्ठेत् हि यस्मात् यस्येंद्रियाणि वशे यदधीनानि वर्तंते तस्य प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता ६१

रणवीरसमिद्बोधिनी॥

अथ किमासीनेति इत्ती यं समर्थयति तानि सर्वाणीत्यारभ्य स मुपैति मामोति न कामकामीत्यंतैरेकादशभिः यानि वा वश्यक तेव्यात्मनः प्रच्यावयंति तानि सर्वाणि संयम्य स्ववशे विधाय म त्परः आसीत पिपर्ति पालयति पूरयति कर्मफलानि वेति परः अ हमेवेश्वरः परः पारगं फलदातारं वा यस्येति मां पारगमाश्रित्य मयीश्वरेर्पितकर्मफलस्स्वस्वकर्मणि निष्ठावान्भूयात् यतः स्वा यत्तेंद्रियस्य स्वकर्माचरणे स्थैर्यं भवतीति ६१

मधुभाष्य

तानीति बहुयत्नवतः आकान्यतो यत्नं कुर्यादित्याशयः युक्तः मयि मनो युक्तः अहमेव परः सर्वस्मादुत्कृष्टो यस्य स मत्परः फलमाह वशे हीति रागादिदोषकरणमाह परिहरणायश्लोकद्वयेन संमोहः क्रोधेन्ना तथाहि मोहप्रकाशार्थं उक्तः उपगीता स मोहसंज्ञितं अथमलक्षणं वै वर्नियतपापकर्मस्य इति तथा वान्यत्र संमोहो धर्मकामिनेति स्मृतिविभ्रमः प्रतिषेधादिस्मृतिविनाशः बुद्धिनाशः सर्वात्मनादोषबुद्धिनाशः विनश्यति नरकाद्यनर्थं प्राप्नोति तथा ह्युक्तम् अथ मं कामिनः प्राप्ते विस्मृतिर्जायते यदा दोषादृष्टेस्तत्क्षणे तेश्च नरकं प्रतिपद्यते इति इंद्रियजयफलमाह रागद्वेषाभ्यां ओकाभ्यां विषयानग्र

भवन्नपि विधेयात्मा मनो यस्य स जितात्मेत्यर्थः प्रसा
दं मनःप्रसादं कथं प्रसादमात्रेण सर्वदुःखहानिः प्रस
न्नचेतसो हि बुद्धिः पर्यवतिष्ठति प्रसादे सति बुद्धिः स
म्यक् स्थितिं करोति प्रसादो नाम प्रायो विषयागतिः प्र
सादाभावे दोषमाह नेन रम्यां शोकाभ्यां नहि प्रसादाभा
वेयुक्तस्य चित्तनिरोधः अयुक्तस्य च बुद्धिः सम्यक्ज्ञानं ना
स्ति न तद्वोपपादयति न चायुक्तस्येति शांतिर्मुक्तिः शां
तिर्मोक्षोऽथ निर्वाणमित्यभिधानात् कथमयुक्तस्य भा
वमान भवति इत्यत आह ८२॥

रामचंद्रसरस्वतीकृतटीका ॥

तानिति तानींद्रियाणिसर्वाणिज्ञानकर्मसाधनरूपानिसंय
म्य स्ववशेविधाययुक्तःकर्मयोगपरःआसीतेतिशेषःइत्यर्थः नन्वे
वंदुष्टानिकथंवशीकर्तुंशक्यंते तत्राहमत्परः अहमेवपर
उत्कृष्टोनियंतायस्येतिमत्परः विपक्षेईश्वरोदंडकर्तेतिभिया
तत्संयमःसुलभइतिभावः तद्वशीकारेफलमाह वशेइति
स्थे नन्विंद्रियाणिमनःक्षोभमात्रकारित्वानिचेत्मनसिसं
तविषयाः वासेयोगंजनकत्विप्रतिसाधकइत्यतआह ॥६१

दोहा

तिन समझि कों बस करें युक्त परायण मम होय इंद्रियजाके
बस रहें ताकी मति दृढ सोय ६१॥

भाषा अनुवाद

इंद्रियोंको स्वाधीन करना यह कहि करि फेरि क्या करना
उचितहै सो कहतेहैं कि तो सब इंद्रियों का संयम करिके
युक्त योगी मेरेमें तत्परहो रहे अर्थात् आत्मामे निष्ठा करि
बैठे यह कहि ज्ञानी कैसे स्थिति करते इस प्रश्नका उत्तर
दिया अर्थात् जिसके इन्द्रीगण वशहैं उसकी प्रज्ञा कहे बु
द्धिप्रतिष्ठितहै ६१ ॥

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते सङ्गा
त्संजायते कामः कामात्क्रोधोऽभिजायते ६२ ॥

शांकरभाष्यं

अथेदानीं पराभविष्यत् सर्वानर्थमूलमिदमुच्यते ध्यायतइति
ध्यायतश्चिंतयतो विषयान् शब्दादि विषय विशेषान् आलोच
यतः पुंसः पुरुषस्य संग आसक्तिः प्रीतिः तेषु विषयेषूपजाय
ते उत्पद्यते संगात् प्रीतेः संजायते समुत्पद्यते कामः तृष्णा
तस्मात्कामात् कुतश्चित् प्रतिहतात् क्रोधोभिजायते ६२ ॥

आनन्दगिरिकृतटीका ॥

समनन्तरं श्लोकद्वयतात्पर्यमाह अथेति पुरुषार्थोपायोपदे
शानन्तर्यमथशब्दार्थः तन्निष्ठत्वराहित्यावस्थां दर्शयति इदा
नीमिति पराभविष्यतो महान्तमनर्थं गमिष्यतो विवेक
विज्ञान विहीनस्येति यावत् सर्वानर्थमूलं विषयाभिध्यानं
तस्य तथात्वमनुभवसिद्धमिति वक्तुमिदं मित्युक्तं विषयेषु
विशेषत्वमारोपित रमणीयत्वं प्रीतिरासक्तिरिति साधारणा
सक्तिमात्रं गृह्यते तृष्णेत्युद्रिक्ता शक्तिरुक्ता प्रतिबन्धेन प्रमा
णेन वा प्रतिहतिः ६२

स्वामिकृतटीका ॥

वाह्येन्द्रियसंयमाभावे दोषमुक्त्वा मनःसंयमाभावे दोषमाह ।
ध्यायतइति द्वाभ्यां गुणबुद्ध्या विषयान् ध्यायतः पुरुषस्य तेषु
संगआसक्तिर्भवति आसक्त्या च तेष्वधिकः कामो भवति कामा
च्चकेनचित्प्रतिहतात्क्रोधो भवति ६२ ॥

पिशाचभाष्यम् ॥

अथेदानीमात्मनाशस्य मूलमुच्यते ध्यायतश्चिंतयतः शब्दादिवि
षयान्संगः प्रीतिः तेषु शब्दादिषु विषयेषूपजायते उत्पद्यते संगा
त्प्रीतेः संजायते समुत्पद्यते कामस्तृष्णा कामात्कुतश्चित्प्रतिह
तात्तु क्रोधोभिजायते [illegible]
[illegible] कार्याकार्याविवेकः संमोहात्स्मृतिविभ्रमः स्मृत्वा ६२

गी॰ टी॰ वि॰

३०५

रामानुजभाष्यम् ॥

एवमप्रवेश्यमनःस्वीयगौरवेणेंद्रियजये प्रवृत्तो विनष्टो भव
तीत्याह [illegible]विषयानुरागस्य हि मय्यनिवेशितमनसः इंद्रि
याणि संयम्यावस्थितस्यापि अनादिपापवासनया विषयध्या
नमवर्जनीयं स्यात् ध्यायतो विषयान्पुंसः पुनरपि संगोतिवृद्धो
जायते संगात्संजायते कामः कामो नाम संगस्य विपाकद
शा पुरुषो यां दशामापन्नो विषयानभुक्त्वा स्थातुं न शक्नोति त
तः कामात्क्रोधोभिजायते कामे वर्तमाने विषये चासंनिहि तेसंनिहि
तान्पुरुषान्प्रति क्रोधो भवति ६२ ॥

अभिनवगुप्तकृतटी॰ ॥ उपक्रमे ६२ ॥

परमार्थप्रपाटीका ॥

एवंबाह्येंद्रियसंयमाभावे दोषमुक्त्वाधुना मनःसंयमाभावे
दोषमाह ध्यायत इति द्वाभ्यां विषयान्ध्यायतः पुंसः पुरुष
स्य तेषु विषयेषु संगश्चासक्तिर्भवति ततः संगात्कामस्तैर्वि
षयैरेवं रूपं भवितव्यमिति तदर्जने आदरो भवति तत्र केनचि
दंतरायेकृते क्रोधो भवति ६२ ॥

वनमाली टीका ॥

ननु मनोबाह्येंद्रियग्रहणद्वारानर्थहेतुत्वं निगृहीतबाह्येंद्रि
यस्य तु तत्वानंदे श्रीभगवन्मनस्यनिगृहीतेपि न कापि क्षतिः
बाह्यैर्योगाभावेनैव कृतकृत्यत्वादतो युक्त आसीतेति व्यर्थ
मित्याशंक्यानिगृहीतबाह्येंद्रियस्यापि युक्तत्वाभावे सर्वानर्थ
प्राप्तिमाह ध्यायत इति द्वाभ्यां निगृहीतबाह्येंद्रियस्यापि [illegible]
दीन्विषयान्ध्यायतः मनसा पुनः पुनश्चिंतयतः पुंसस्तेषु विष
येषु संगश्चासक्तिर्जायते संगात्ममेदं भवत्विति इच्छा जायते कामा
त्कुतश्चित्प्रतिहन्यमानात्तत्प्रतिघातकविषयकक्रोधोजा
यते ६२ ॥

उत्तमवैजयन्ती टीका ॥

एवमपि बाह्येंद्रियाण्येव स्ववशीकृत्वा यदि मनसः संयमं न क
रोति तर्ह्यपि बहुतरदोषाविष्टत्वेन पुमान् विनष्टो भवतीत्या
ह ध्यायत इति द्वाभ्याम् ध्यायत इति यद्यपि स्ववशीकृतद्वान

कर्मात्मकेन्द्रियस्याङ्गीकृतविषयाभिनिवेशस्य मत्परस्यायो
गिनो निर्दोषत्वमस्ति तथाप्यनन्तजन्मातिशयाभ्यस्तविषया
तिमलिनीकृतस्वरूपेण मनसा विषयान् शब्दादीन् ध्यायतः
पुंसः पुरुषस्य तेषु संगः सुहृदहमेते नैव जीवामि स्त्वीभवा
भिनान्यथेत्येवमतिशयचिन्तनरूपप्रीतिविशेष उपजायते उ
त्पन्नो भवति तस्मात्संगात्कामः॥ इदं सर्वं जगन्ममैवाधीनम
स्त्वितीच्छाविशेषः संजायते+ तस्माच्च कामात्क्रोधः यद्वस्तुका
ममुत्पादयति तस्य वस्तुनो यः कश्चिद्विघातको भवति तं प्रति
द्वेषप्रति क्रोधोऽभिजायते कामएव स्वपरिणामेन क्रोधरू
पेणोत्पद्यत इत्यर्थः ६२ ॥

मधुसूदनी टीका

ननु मनसो वाह्येन्द्रियप्रवृत्तिरनर्थहेतुत्वं निगृहीतवाह्येन्द्रियस्याप
स्यात् हे भगवन्मनस्यनिगृहीतेपि न कापि क्षतिः वाह्यायोगा
भावेनैव हानकत्वाददतोयुक्तं आसीनेति वर्धयुक्त मित्याशं
क्यानिगृहीतवाह्येन्द्रियस्यापि युक्तत्वाभावे सर्वानर्थप्राप्तिमाह
द्वाभ्यां निगृहीतवाह्येन्द्रियस्यापि शब्दादीन्विषयानध्यायतो
मनसा पुनः पुनश्चिन्तयतः पुंसस्तेषु विषयेषु संगश्च संगः म
मत्पेन सुखहेतवएव तइत्येवशोभनाध्यासलक्षणः प्रीतिवि
शेष उपजायते संगात्सुखहेतुत्वाज्ञानलक्षणात्संजायते का
मः ममैते भवंवितित्टस्याविशेषः तस्मात्कामात्केनचित्प्र
तिहन्यमानात्तत्प्रतिघातकविषयः क्रोधोऽभिज्वलनात्माभि
जायते ॥ ६२ ॥

सदानंदी टीका ॥

नन्विन्द्रियवशीकारेजातेस्वांतविनिग्रहः स्वतःसिद्धः किमर्थं
तदासीतेति पृथक्श्रमः १ इन्द्रियद्वारतोनर्थकरं नैवस्वतोम
नः उतवातदत्रोरगवदनिरोधेस्यकाक्षतिः २ मेवं मनोनि
रोद्धव्यं सर्वानर्थकरं यतः निग्रहीतेन्द्रियस्यापि मनसावि
षयान्प्रियान् ३ पुंसश्चिन्तयतस्तेषु शोभनाध्याससहेतुकः
प्रीतिभेदोयश्चासंगोममैतेसुखहेतवः ४ इत्येवंजायतेततः

गी॰
टी॰
द्वि॰

स्मात्संगात्कामः प्रजायते भवंत्वेतेममेत्येवंरूपस्याभेदस्ततोपिच ऊतस्विद्व्न्यमानात्तस्मात्प्रतियातकगोचरः क्रोधोभिज्वलनात्मा स्संजायतेक्रोधतस्ततः ६ ६२ ॥

नीलकंठी टीका ॥

यदापंचावतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनविचेष्टतिता माहुः परमांगतिमितिश्रुतेरिंद्रियमनोबुद्धीनांनिग्रहेपरम पदप्राप्तिरित्युक्तं तत्रउपसंहृतकरणस्यबाह्यान्शब्दादीनप्र हृतोमनोमात्रेणावस्थितस्ययोगिनोमनसोऽनिग्रहेकिंस्यादि त्याह ध्यायतइतिद्वाभ्यां विषयान्शब्दादीन्ध्यायतश्चिंतयतः पुंसः पुरुषस्यतेषुशब्दादिषुसंगः संबंधोजायते वाह्यार्थभो निगृहीतान्यपिइंद्रियाणिमनोदोषात्पुनर्बाह्यार्थान्प्रकृतीत्य र्थः ततः संगात्कामस्तस्मिन्विषयेऽभिलाषः संजायते कामात् कुतश्चिद्धेतोः प्रतिहतादभिज्वलनात्माक्रोधोभिजायते ६२॥

रामकंठीटीका

इहखल्वविद्यापरमेश्वरमायामुषितसज्ज्ञानतयाशरीरमात्रमात्मत्वेन प्रतिपन्नस्यसंसारिणः सतः पुंसः सन्निहितमपिशुद्धमध्येयंनिरूपमा नंदनिजानन्दस्वधामसागरंसत्यंस्वात्मानमविमृषतोऽविवेकपरिमोनित्य निःकृतिमस्तु(?)वसाधनस्पृहतयाशब्दादीन्विषयान्ध्यायतः सततंचिन्त यतः तेषुसंगोनिविडनिमग्नमानसत्वमुपजायते उत्पद्यतेतस्मात्तथा विधात्संगात्कामस्तद्विषयोभिलाषोरागाख्यः क्लेशः संजायतेसमु द्भवति ६२

आनंदी टीका

इंद्रियाणांप्रमाथित्वंदर्शयति निगृहीतबाह्येंद्रियस्यापिमनसोनिग्रहा भावाद्विषयांश्चिन्तयतस्तेषुसंगोजायतेसंगात्कामः कथमेतान्प्राप्स्या मीतितृष्णाप्राप्तेषुवर्धते ६२

ब्रह्मानंदीटीका

नपरमिंद्रियवशीकारंविनास्थितप्रज्ञत्वासंभवोयावद्दोषप्रसक्ति रपीत्याह ध्यायतइति ध्यायतोविमृशतोनत्वात्मानम् सदोषः ६२ ॥ पुरुषस्यतेषुसंगः प्रसक्तिर्भवति संगात्कामोभिलाषोजायते कामात्केनचित्प्रति हतात्क्रोधोभवति ॥

पंचोलीटीका

विषयान् शब्दादीन् ध्यायतः अलोचयतः पुंसः पुरुषस्य तेषु विष येषु संगः आसक्तिः उपजायते संगात् आसक्तेः प्रीतेः कामस्त स्मात् उपजायते कामात् अभिलाषात् कुतश्चित प्रतिहतात् क्रो धोभिजायते ६२

मधुसूदनसरस्वतीकृतगूढार्थदीपिनी॥

ननु वार ब्धपुरुष विरक्तस्य विषयत्यागे सति प्रज्ञास्थैर्यं का विह्नवत्येवे नकेवलम ति कुतोनासो स्थित प्रज्ञ प्राह नव्यवह्रियते त्यागेन मर्व थाप्रज्ञा पो स्य प्रज्ञा स्थैर्याभाव एव यावत् उभयलोकभ्रष्टतया सर्वं गृहीतस्य पीत्याह ध्यायत इति द्वाभ्यां ध्यानादिविषयानस्य अंते इति वहिन्त्यागात् ध्यानकाल एव च संगादयो मन उपरंजयंति इति विषयत्यागः कथमपि न सिद्ध्यतीति कथं तस्य प्रज्ञास्थैर्यमिति स मदाद्यपि प्रज्ञत्यक्तेवं विषयान्ध्यायतस्त्याग पूर्वकाले दुःखदा विवेकं विवेचयतः पुंसस्तेषु विषयेषु संग उपरागः उपजायते उपर जननबीजवत्त्वाच्च कालांतरे कामः संजायते तस्मात्क्रोधः तस्माच्च कार्याकार्यविवेकरूपः संमोहः तस्मात्त्वबुद्धेः कर्मनिष्ठानुकूला णास्तकाल आदिरूपा मतेर्नाशः ततश्च प्ररणप्रापति उभयतो भ्रंशप तीति स्वधर्मपरधर्मेवनास्य स्थैर्यमिति स्वधर्माचरणमेव श्रेयः सा धनमितिभावः ६२॥

मधुभाष्य॥

रामचंद्रसरस्वतीकृतटीका ॥

ध्यायतइतिद्वाभ्यां संगः रुचिराः किलैते विषयाइत्येवं लक्ष्मा
णकामप्रभिर्भाव्यंइत्येवरूपः कामप्रहितोक्रोधः सचप्रसिद्धः
संमोहः कार्याकार्यविवेकविरहः स्मृतिविभ्रमोवस्त्वत्रसंथा
नचलनंबुद्धिनाशः ऐकात्म्याकारमंतोहृतिनिलयः ततो
नाशोधिकारच्युतेरिति तदेवं बाह्येंद्रियव्यापाराभावेपिचेत
सिविकृतेऽनर्थप्रदर्शपचेतसिवशेसत्यपिप्रविरुद्धेबाह्येंद्रिय
व्यापाराभावेपिचेतसिविकृतेऽनर्थप्रदर्शपचेतसिवशेसत
पि प्रविरुद्धेबाह्येंद्रियव्यापारेणुणमाह ॥ ६२।६३ ॥

ज्ञानेरी टीका

देहातवत्वचिंतयपरमेश्वरमायामुषितसज्ञानतयाशरीरपात्रमात्मत्वे
नमन्तिपन्नसंसारिणः सतः पुंसः सन्निहितमपिमुक्तिं येयनिरुपमा
नतिजानेदस्वयासागरंसंतंस्वात्मानविमृश्यतोऽडःखैकपरिमानि
त्यनित्यानिमस्वसाधनस्थतया शब्दादीन्विषयान्ध्यायतः सततंचि
तयतः तेष्वसंगोनिविडनिमग्नमानसत्वरूपजायते उत्पद्यतेतस्मात्
ध्याविद्यात्संगात्कामस्तत्तद्विषयाभिलाषोरागात्मः क्लेशः संजायतेसत
भवति ६२

भाषा अनुवाद

बाह्य इन्द्रिय कहे बाहर की इंद्रियोंके नवश रहने मे जो दोष सो देखाय अब अवशी भूत जो मन तिसका दोष देखावते है कि बुद्धि के द्वारा रूपादिक विषयों को ध्यान करते हुये पुरुषका मन उन विषयों मे आसक्त होता अर्थात् विषय सङ्ग होताहै और सङ्गसे अधिक अधिक कामना उत्पन्न होतीहै फेरि जो कामना किसी प्रकारसे नष्ट होय तो क्रोध प्रकट होताहै अर्थात् कामसे क्रोध होयहै ६२ ॥

दोहा

विषय ध्यानसें पुरुषकों तामे संगजाय संग उपजावें
कामकों काम क्रोध प्रगटाय ६२॥

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ६३

शांकरभाष्यम् ॥

क्रोधाद्भवति संमोहः संमोहोऽविवेकः कार्याकार्यविषयविभ्रमो भवतीति संबध्यते क्रुद्धो हि संमूढः सन् गुरुमप्याक्रोशति संमोहात् स्मृतिविभ्रमः शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्याद्विभ्रमो भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौ अनुत्पत्तिस्ततः स्मृतिभ्रंशाद्बुद्धेर्नाशः कार्याकार्यविषयविवेकायोग्यता अन्तःकरणस्य बुद्धेर्नाश उच्यते बुद्धिनाशात्प्रणश्यति तावदेव हि पुरुषो यावदन्तःकरणं तदीयं कार्याकार्यविषयविवेकयोग्यं तदयोग्यत्वे नष्टएव पुरुषो भवत्यतः तस्यान्तःकरणस्य बुद्धेर्नाशात्प्रणश्यति पुरुषार्थायोग्यो भवतीत्यर्थः ६३

आनन्दगिरिकृतटीका ॥

क्रोधस्य संमोहहेतुत्वमनुभवेन दृढयति क्रुद्धो हीति आक्रोशत्यविक्षिपति तदयोग्यत्वमपीत्यर्थः संमोहकार्यं कथयति संमोहादिति स्मृतेर्निमित्तनिवेदनद्वारा स्वरूपं निरूपयति शास्त्रेति क्षणिकत्वादेव तस्याः स्वतो नाशसम्भवात्र संमोहाधीनत्वं तस्येत्याशंकाह स्मृतीति स्मृतिभ्रंशेऽपि कथं बुद्धिनाशः स्वरूपतः सिध्यति तत्राह कार्येति ननु पुरुषस्य नित्यसिद्धस्य बुद्धिनाशेऽपि प्रणाशो न प्रकल्पते तत्राह तावदेवेति कार्याकार्यविवेचनयोग्यान्तःकरणाभावे तत्त्वविवेकविवर्तनया सतोऽपि पुरुषस्य करणाभावादपागततत्त्वविवेकस्य नष्टत्वव्यपदेशः तदेतदाह पुरुषार्थेति ६३ ॥

स्वामिकृतटीका ॥

किं च क्रोधादिति क्रोधात्संमोहः कार्याकार्यविवेकाभावः ततः शास्त्राचार्योपदिष्टार्थस्मृतेर्विभ्रमो विचलनं विभ्रंशः ततो बुद्धेश्चेतनाया नाशः वृत्तादिविषाभिभवस्ततः प्रणश्यति

गी॰
टी॰
द्वि॰

र्तततस्योभवति ६३ ॥

क्रोधाद्भवतिजायतेसंमोहः **पिशाचभाष्यम्** कार्याकार्यविवेकः संमोहात्स्मृतिविभ्रमः शास्त्रा+

+ र्योपदेशजातसंस्कारजनितायाःस्मृतेर्भ्रंशः उत्पत्तिनिमित्तभ्रं शेसत्यामनुत्पत्तिस्ततश्चस्मृतेर्भ्रंशात् बुद्धिनाशः कार्याकार्य विवेकलक्षणायाबुद्धेर्नाशः बुद्धिनाशात्स्वयंप्रणश्यतिप्ता वाद्धिपुरुषोयावत्कार्याकार्यविवेकस्तन्नाशेनष्टएवपुरुषो भवति ॥ ६३ ॥

रामानुजभाष्यम् ॥

क्रोधाद्भवतिसंमोहः कृत्याकृत्यविवेकशून्यतातयासर्वंक रोतीतिततस्प्रारब्धेइंद्रियजयादिकेप्रयत्नेस्मृतिभ्रंशोभ वति स्मृतिभ्रंशाद्बुद्धिनाशआत्मज्ञाने यो व्यवसायः कृत स्तस्यनाशः बुद्धिनाशात्पुनरपिसंसारेनिमग्नोनष्टोभवति ६३ ॥

अभिनवगुप्तकृतटीका ॥

तपस्विनोविषयत्यागएवविषयग्रहणेपर्यवस्यति ध्यात्वाहि तेतत्संपतेध्यानकालएवसंगादयउपजायन्ते इत्यनुपायो विषयत्यागः स्थितप्रज्ञस्य ६३ ॥

परमार्थप्रपाटीका ॥

क्रोधात्संमोहः कार्याकार्यविचाराभावस्तस्मात्स्मृतिविभ्रमः शास्त्राचार्योपदेशः कीदृशोहं किंकरोमीतिनस्मरति तस्मा द्बुद्धिनाशस्तस्मात्प्रणश्यतिलोकनिंदास्पदत्वेनजीवन्मृततु ल्योभवतिएवमनेनप्रथमतोविषयानुस्मृतिः परिहार्येत्युक्तं उक्तंचलोकएषविषयानुरंजनेडःखगर्भमपिमन्यतेसुखं आमिषंवडिशगर्भमप्यहोमोहतोग्रसतियद्वदंडजइति ६३ ॥

वनमालीटीका ॥

क्रोधाद्भवतिसंमोहः कार्याकार्यविवेकाभावरूपः संमोहात् स्मृतिविभ्रमः शास्त्राचार्योपदिष्टभगवदनुसंधानस्यविभ्रं शोनाशः बुद्धिनाशात्प्रणश्यतिश्रीहरिधाम्नः प्रच्युतः सन्सं सारेपततीत्यर्थः यस्मादेवंमनसोनिग्रहाभावेनिगृहीतबा ह्येंद्रियस्यापिपरमानर्थप्राप्तिस्तस्मान्महताप्रयत्नेनमनो

निगृह्णीयादित्यभिप्रायः ६१ ॥

उत्तमवैजयन्ती टीका ॥

ततः किमत आह क्रोधादिति क्रोधात्सकाशात्संमोहः कर्तव्या
कर्तव्यज्ञानशून्यरूपो भवति संमोहात्स्मृतिविभ्रमः शास्त्रो
पदिष्टमत्प्राप्तिसाधनरूपमदाराधनात्मककर्मानुष्ठाने या
स्मृतिः स्मरणं तस्य विभ्रमः विस्मरणं भवति स्मृतिभ्रंशाद्बुद्धि
नाशः पूर्वोक्तव्यवसायात्मिकाया मत्प्राप्त्यंतरंगोपायाया
बुद्धेर्नाशोऽदर्शनं भवति बुद्धिनाशात्प्रणश्यति मदनन्यवि
षयाया बुद्धेर्नाशाद्धेतोरन्यदेवविषयाया बुद्धिरुत्पद्यते तस्याः
सकाशात्प्रणश्यति प्रणष्टो भवति संसारचक्रे पुनः पुनर्
दीर्घं च बहुपर्यायो भ्रमणं प्राप्नोतीत्यर्थः ६३ ॥

मधुसूदनी टीका ॥

क्रोधाद्भवति संमोहः कार्याकार्यविवेकाभावरूपः संमो॰
हात्स्मृतिविभ्रमः स्मृतेः शास्त्राचार्योपदिष्टार्थानुसंधानस्य
विभ्रमो विचलनं विभ्रंशः ततश्च स्मृतिभ्रंशाद्बुद्धेरैकात्म्या
कारमनोवृत्तेर्नाशः विपरीतभावनोपचयदोषेण प्रतिबं
धात् अनुत्पत्तिरुत्पन्नायाश्च फलायोग्यत्वेन विलयः बुद्धि
नाशात्प्रणश्यति तस्याश्च फलभूताया बुद्धेर्विलोपात्प्रणश्य
४ ति सर्वपुरुषार्थायोग्यो भवति यो हि पुरुषार्थायोग्यो जातः स
मृत एवेति लोके व्यवह्रियते अतः प्रणश्यतीत्युक्तं यस्मादे
वं मनसो निग्रहाभावे निगृहीतबाह्येंद्रियस्यापि परमानर्थ
प्राप्तिस्तस्मान्महता प्रयत्नेन मनो निगृह्णीयादित्यभिप्रायः
अतो युक्तमुक्तं तानि सर्वाणि संयम्य युक्त आसीतेति ६३ ॥

सदानंदी टीका ॥

कार्याकार्यविवेकस्याभावः संमोहः उद्भवेत् येनागुरुमित्रा
दीन्यथाक्रमं प्रतिमूढधीः संमोहाज्जायते तस्मात्स्मृतेर्भ्रंशो
सानर्थदः १ शास्त्राचार्योपदिष्टार्थानुसंधानस्य विभ्रमः त
तोऽस्मिन्कार्याहतेः प्रतिबंधो विपर्ययात् २ बुद्धेर्नाशस्ततस्त

गी॰ टी॰ द्वि॰

स्याविलोपादेव पूरुषः पुमर्थायोग्यतापन्नो नष्ट एवेति कथ्य ते ३ यस्मादेवं हि मनसो निग्रहाभावतः पुमान् नष्टस्तस्मात्स्वभावेन तस्यायतस्यास्य विनिग्रहे ध यत्नोयुक्तं मयोक्तं तदासीतेति पुरातन ५ श्रीमत्कृष्णपदारविंदमधुरभोहृत्निवहद्भ्रामरी श्रद्धाभक्तियुतं मनोनवरतं यावत्प्रविष्टं न हि तावत्त्लोभकशीलतां प्रतिपदं नाद्यापि जहाति खिका चांचल्यं प्रजहातितत्र निरतं चेतः स्वयं बाधितं १ ६३ ॥

नीलकंठी टी॰ ॥

ततः क्रोधात्संमोहः कार्याकार्यविवेकाभावो भवति ततः स्मृतिविभ्रमः शास्त्रानुसंधानस्य विभ्रंशः रूपं चलनं भवति स्मृतिभ्रंशात् बुद्धिनाशः शास्त्रार्थस्य निश्चितस्यापि तिरोधानं भवति तस्मिंश्च शास्त्रजे परोक्षज्ञानेपि नष्टे पुरुषो न श्यति पुरुषार्थायोग्यो भवति यो हि ताद्दशः स नष्ट एवेति लोके वदंति ६३ ॥

रामानंदी टीका १

तस्माच्च नश्यति हृल्लेशवस्तुषु क्रोधः द्वेषाख्यः क्लेशप्रकारोभिजायते प्रभवति ततस्तस्मात्संमोहः आत्मानात्मादिवस्तुविवेकविरहात्मकमज्ञानं प्रभवति मोहाख्यः क्लेशो जनितीत्यर्थः ततः प्रस्मृतिर्विभ्राम्यति मत्पस्वतंत्रमात्मानमस्पृशती स्वरूपलोपमिवाप्नोति तादृशाच्च तस्माद्बुद्धिः परमार्थनिश्चयात्मकं ज्ञानं नश्यति तिरोभवति तस्माच्च हेतोः पुरुषः स्वस्वरूपप्रतिष्ठाभावलक्षणं नाशमुपगच्छतीति संसारिणः पुरुषस्य बुद्धिश्रयाप्रतिष्ठितबुद्धित्वस्य हेतुपरंपरां प्रतिपाद्येदानीमनुजिघृक्षया लक्षणादिप्यमाणमन्देहतिरस्कारिणी तिरोधानतया प्रकाशमानयथोक्तस्वस्वभावप्रकाशस्य प्राप्तप्रबोधस्य मुमुक्षोः प्रतिष्ठितप्रज्ञत्वस्य कारणक्रमं प्रतिपादयितुमाह ६३

२

श्रानंदी टीका

विनश्वरत्वेन क्रोधः विनश्वलनेन क्रोधात्संमोहः कार्याकार्यविचाराभावः संमोहात्स्मृतिविभ्रमः शास्त्राचार्योपदेशानुसंधानाभावः स्मृतिनाशा

बुद्धिनाशाः बुद्धेः शास्त्रस्य परमार्थनिश्चयस्य नाशः बुद्धिनाशात्प्रणश्य
ति सम्यगुपादेयं स्थितप्रज्ञत्वं नाप्नोतीत्यर्थः ६३

लासिकी [illegible] टीका

क्रोधात्संमोहः कार्याकार्यविवेकाभावः ततश्च शास्त्राचार्योपदिष्टार्थस्य स्मृतेर्विभ्रमो
विभ्रंशः ततो बुद्धेः परमार्थनिश्चयात्मकस्य बोधस्य नाशस्तिरोभा
वः ततः प्रणश्यति पुरुषार्थान्मोक्षाख्याद्भ्रश्यति ६३ ॥

पंचोलीटीका

क्रोधात्संमोहः अविवेको भवति संमोहात् शास्त्रसंस्कारजनि
तायाः स्मृतेर्विभ्रंशो भवति स्मृतिभ्रंशात् कार्यविषयायाः बुद्धेः
नाशो भवति बुद्धेर्नाशात् प्रणश्यति विवेकविज्ञानरहितो नष्टप्राय एव
वभवति ६३

रणवीरसमिद्बोधिनी ॥

स्पष्टार्थः ६३

मधुभाष्य ॥

६३ ॥

भाषा अनुवाद

और क्रोध मोहका हेतुहै इसको दृढ करतेहै कि क्रो
धसे अर्थात् उसके द्वारा मोह होताहै अर्थात् काज अका
जका विचार नही रहता फेरि संमोह होनेसे शास्त्र और
आचार्य तथा गुरुका दिया जो उपदेश कहे शिक्षा अर्थ
सो विचलित अर्थात् भूल जायहै और स्मृतिभ्रंश होनेसे
कहे उपदेश भूल जानेसे बुद्धिकी चेतना चली जातीहै
अर्थात् बुद्धि नष्ट होतीहै बुद्धिनाश होनेसे जडको समा
न होय फेरि वह मनुष्य मुर्देकी तरह होकर नष्ट हो
ताहै ६३ ॥

दोहा

क्रोधहुंसे संमोह है संमोहस्मृति विकलाय स्मृतिभ्रंश
मतिनाश है बुद्धिनाश नाशहोजाय ६३॥

392

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् । आ
त्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ६४ ॥

शांकरभाष्यम् ॥

सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानम् अथेदानीं मोक्षकारण
मिदमुच्यते रागद्वेषेति रागद्वेषवियुक्तैः रागश्च द्वेषश्च रागद्वेषौ
तत्पुरःसरा हीन्द्रियाणां प्रवृत्तिः स्वाभाविकी तत्र यो मुमुक्षुर्भव
ति स ताभ्यां वियुक्तैः श्रोत्रादिभिरिन्द्रियैर्विषयानवर्जनीयांश्च
रन्नुपलभमानः आत्मवश्यैरात्मनो वश्यानि वशीभूतानि तै
रात्मवश्यैर्विधेयात्मेच्छतो विधेय आत्मान्तःकरणं यस्य सोऽयं प्र
सादमधिगच्छति प्रसादः प्रसन्नता स्वास्थ्यं ६४ ॥

आनंदगिरिकृतटीका ॥

विषयाणां स्मरणमपि चेदनर्थकारणं सुतरां तर्हि भोगेन
जीवनार्थं भुञ्जानो विषयाननर्थं कथं न प्रतिपद्येत इत्याशंक्य
हेत्वनुवादपूर्वकमुत्तरश्लोकतात्पर्यमाह सर्वानर्थस्येति अन
र्थमूलकथनानन्तर्यमथशब्दार्थः परिहर्तव्ये निर्णीते सति त
त्परिहारोपायजिज्ञासां दर्शयति इदानीमिति रागद्वेषपूर्विका
प्रवृत्तिरित्यत्रानुभवं दर्शनार्थो हि शब्दः शास्त्रीयप्रवृत्तिव्यासेधा
र्थं स्वाभाविकीत्युक्तं तत्रेत्यधिकृतानधिकृत्य प्रयोगो वर्जनी
यानशनपानादीन् देहस्थितिहेतूनिति यावत् इन्द्रियाणां
विषयेषु प्रवृत्तिस्त्विन्द्रियमात्रानुपपत्त्या वर्जनीयेष्वपि सास्वादि
त्याशंक्याह आत्मेति अन्तःकरणाधीनत्वपीन्द्रियाणां तदनि ६४
यमानेषामपि नियमानुपपत्तिरित्याशंक्याह विधेयात्मेति

स्वामिकृतटीका ॥

ननु इन्द्रियाणां विषयप्रवणस्वभावानां निरोद्धुमशक्यत्वात्
अयं दोषो दुष्परिहर इति स्थितप्रज्ञत्वं कथं स्यादित्याशंक्याह रागे
ति द्वाभ्यां रागद्वेषरहितैर्विगतदर्पैरिन्द्रियैर्विषयांश्चरन् उपभुञ्जा
नोऽपि प्रसादं शान्तिं प्राप्नोति रागद्वेषराहित्यमेवाह आत्मनो मन
सो वश्यैर्विधेयो वशवर्ती आत्मा मनो यस्येति अनेनैव कथं व्रजेत ।

भुंजीतेत्यस्य चतुर्थप्रश्नस्य स्वाधीनैरिंद्रियैर्विषयानधिगच्छतीत्युत्तरमुक्तं भवति ६४ ॥

पिशाचभाष्यम् ॥ ञ्च

अथेदानीं मोक्षकारणमुच्यते रागद्वेषेति रागद्वेषश्च रागद्वेषौ तत्पुरस्सरा हीन्द्रियाणां प्रवृत्तिः स्वाभाविकी ताभ्यां वियुक्तैरिंद्रियैरात्मवश्यैर्विषयांश्चरन्नुपलभ्यमानो योगी आत्मवश्यैः स्वाधीनैर्विधेयआत्मा अंतःकरणं यस्य सोऽयं विधेयात्मा प्रसादं स्वास्थ्यमधिगच्छति प्राप्नोति ६४ ॥

रामानुजभाष्यम् ॥

उक्तेन प्रकारेण मयि सर्वेश्वरे भावेन न्यस्तमनानिर्दग्धकल्मषो रागद्वेषवियुक्तैरिंद्रियैर्विषयांश्चरं विषयान्निरस्कृत्य वर्तमानो विधेयात्मा विधेयमना प्रसादमधिगच्छति निर्मलान्तःकरणो भवतीत्यर्थः ६४ ॥

अभिनवगुप्तकृतटीका ॥ नास्ति

[illegible] ६४ ॥

परमार्थप्रपाटीका ॥

अथैतत्कर्तुमसमर्थो पि तरतीति ब्रजेत किमस्योत्तरमाह रागद्वेषेति रागद्वेषवियुक्तैरिंद्रियैर्विषयांश्चरन् प्रसादमधिगच्छति रागं प्रीति रासक्ति द्वेषश्च ताभ्यां वियुक्तैरुदासीनैरिंद्रियैर्विषयान्भुंजानः अथ रागद्वेषवियुक्तत्वे हेतुमाह आत्मवश्यैरिति आत्मावश्याये षां तानि सर्वआत्मभावनाभ्युक्तानि तैर्विधेयः परिनिष्ठित आत्मा मनो यस्य स तथाभूतः प्रसादं शांतिमधिगच्छतीत्यर्थः तदुक्तं अग्निसंगाद्यथा लोहमग्नितामुपगच्छति आत्मसंगात्तथा गच्छत्यात्मतामिंद्रियादिकमिति ६४ ॥

वनमाली टीका ॥

मनसि निगृहीते तु बाह्येंद्रिय[illegible] निग्रहाभावेपि न दोषः राज्ञि निगृहीते हि प्रजाः स्वयमेव वशीभवन्ति यथा तथा मनसि निगृहीते इंद्रियाणि स्वयमेव वशीभवंतीति वदन् किं ब्रजेतेत्यस्योत्तरमाह रागेत्यष्टभिः स्वस्याविधेयं वशीभूतमात्मं मनो यस्य स[illegible]

आत्मवश्यैः स्वाधीनैः रागद्वेषाभ्यां वियुक्तै रहितैरिंद्रियैः श्रोत्रादिभिः
विषयान् शब्दादीन् निषिद्धांश्चरन्नुपलभमानः प्रसादं चित्तस्य स्वछ
तां परमात्मसाक्षात्कारयोग्यतामधिगच्छति रागद्वेषप्रयुक्तानि हि
न्द्रियाणि दोषहेतुस्तान्यपर्यंते मनसि स्ववशे तु न रागद्वेषौ तयो
रभावे च न तदधीनेंद्रियप्रवृत्तिः प्रारब्धवशाद्देहनिर्वाहाय विष
योपलंभो न दोषाय भवेत् निषिद्धाचारस्य रागाद्यधीनस्य प्राकल्पक
तेयान्त्र स्वभावस्त एव तन्मतो न चलतीति भावः अतो वा किं व्रजे
तेत्यस्योत्तरमुक्तं ६४

आत्मवैजयन्ती टी. ॥

यस्माद्विषयाशक्तेंद्रियमना विषयान् ध्यायन् सन् विषयजन्यसं
गादिकबुद्धिनाशांतेभ्य उत्तरोत्तरपरिणामभूतेभ्योऽतिप्रबलत
रेभ्यः षट्प्रकारदोषेभ्यः सकाशात्तत्क्षणमात्रेण भ्रष्टो भवति तस्मा
न्मनः स्वविषयासक्तिं विहाय रागादिरहितैरिंद्रियैर्यथेष्टं विष
यभोगान् कुर्वाणोऽपि तैर्दोषैर्न नष्टो भवति किंतु मनस्त्विष्टभबुद्धि
भवतीत्याह रागेति द्वाभ्यां रागद्वेषैरिति तु शब्दः संगकामादिदो
षनिरसनपरः य एवंभूतो भवति तं विषयसंगादयो दोषा नाभिभ
वतीत्यर्थः आत्मवश्यैर्मद्विधेयेन मनसा वश्यानि वशीभूतानि
इष्टे वस्तुनि रागोऽनिष्टे द्वेषस्ताभ्यां वियुक्तैः तथात्मैः अत एव रागद्वेषवि
वियुक्तैः विगताः योगा येषां तैस्तथात्मैः रागद्वेषविषया
भ्यः सकाशाद्वियुक्ताः विगताः यो गच्छन् भवन्नु वा विषया
वर्जितैरिंद्रियैर्विषयान् शब्दादीन् चरन् विधेयात्मा स्ववशीभूतमनाः प्रसादं श्रे
नूं गं ज्ञानः सन्नपीत्यर्थः
तत्कारणशुद्धिमधिगच्छति प्राप्नोति ६४ ॥

मधुसूदनी टीका ॥

योऽस्त्वसमाहितचेताः सर्वाणींद्रियाणि निरुद्ध्यापि रागद्वेषदुष्टेन म
नसा विषयान् चिंतयन् पुरुषार्थाद्भ्रष्टो भवति विधेयात्मा तु शब्दः पू
र्वस्माद्व्यतिरेकार्थः वशीकृतांतःकरणस्त्वात्मवश्यैर्मनोधीनैः
स्वाधीनैरिति वा रागद्वेषाभ्यां वियुक्तैर्विरहितैरिंद्रियैः श्रोत्रादिभि
विषयान् शब्दादीनानिषिद्धांश्चरन्नुपलभमानः प्रसादं प्रसन्नतां

मनसि निगृहीते तु वाह्ये
न्द्रियनिग्रहाभावेऽथ नं
ष्ट इति वदन् किं व्रजेते
स्योत्तरमाहात्म ॥ ६४ ॥

गी० टी० हि०

चित्तस्य स्वच्छतां परमात्मसाक्षात्कारयोग्यतामधिगच्छति रागद्वेषप्र
युक्तानींद्रियाणि दोषहेतुत्वेन प्रतिपद्यंते मनसि स्ववशे तु न रागद्वे
षौ तयोरभावे तु तदधीनेंद्रियप्रवृत्तिः प्रवर्जनीयतया तु विषयोप
लंभेन दोषमावहतीति न सुद्धिव्याघात इति भावः एतेन विषया
णां स्मरणमपि चेदनर्थकारणं हंत तर्हि भोगः तेन जीवनार्थं वि
षयान् भुंजानः कथमनर्थं न प्रतिपद्येतेति शंका निरस्ता स्वाधी
नैरिंद्रियैर्विषयान् प्राप्नोति चेत् किं व्रजेतेति प्रश्नस्योत्तरमुक्तं भव
ति ६४ ॥

सदानंदी टी० ॥

निगृहीते तु मनसि विनैंद्रियविनिग्रहं दोषो नेति वदन्नाह व्रजे
तेत्यस्य चोत्तरं १ वशीकृतमनास्तु स्वाधीनैरिंद्रियैश्चरन् वि
युक्तैर्द्वेषरागाभ्यां शब्दादिविषयांस्तथा २ चित्तस्य स्वच्छतां ब्रह्म
साक्षात्त्वैकयोग्यतां सम्प्राप्नोति ततश्चित्तं निरोद्धुं प्रयतेत ३
६४ ॥

नीलकंठी टी० ॥

ननु विषयानध्यायतोपि योगिनो वृत्त्या नेत्रमाणस्वाभाव्यादिंद्रि
याणां विषयेषु संगोऽवश्यंभावी हरंस्तत्स्वीकरीत्या तस्यापि नाशप्र
सक्तिरित्याशंक्याह रागद्वेषेति विधेयात्मा किंकरीकृतमना आ
त्मवश्यैर्मनोऽधीनैरिंद्रियैः स्वामिनश्चित्तस्य किंकरीकृतस्य का
मक्रोधहीनत्वात्स्वयमपि रागद्वेषवियुक्तैर्विषयानुपथि पतित
तृणादीनीवानास्थया चरन् पशुपत्रपिबमानुं तत्र कामाद्यनुद
यात् प्रसादं संकल्पविकल्पकलेपशून्यालेन मनसः स्वाच्छ्य
मधिगच्छति मनसः स्वाच्छ्यमेव प्रत्यगात्मनः स्वाच्छ्यं तस्य तद्गु
णसारत्वात् अजितमनस्कमिव जितमनस्कं विषयसंगो न बा
धतेऽतो मनोजय एवापूर्वकर्तव्य इत्यर्थः ६४ ॥

रामकंदीटीका

आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छतीति आत्मवश्यैर्विधेयात्मा तु।

मान् विधेयः प्रत्यवमर्षविषयभूतत्वात्स्वाधीन आत्मा स्वभावो यस्य सतादृ
शः पुरुषः आत्मवश्यैस्तादृशस्य महत्स्यात्मनः स्वशक्तितया प्रतिपाद्यमाना
त्वाद्विधेयैस्तदधीनप्रवृत्तिस्थितिसंहृतिभिरिन्द्रियैर्बाह्याभ्यन्तरैः करणैः किरणै
रिवार्कैः पदार्थान्विषयांश्चरन्गच्छन्प्रसादं स्वच्छत्वादिकलंकसंपर्काभावरूपं वै
शद्यमधिगच्छति प्रतिलभते अत एव कीदृशैरिन्द्रियैर्विषयांश्चरन् रागद्वेष
विमुक्तैः रागद्वेषौ हि विषयमात्रध्यानसंप्रसक्तस्याविस्मृतस्वात्मनः पुंसो विष
यान्प्रति प्रवर्तमानेष्विन्द्रियेषु परिस्फुरतः यस्य तु सर्वतः परिपूर्णत्वान्नित्यनिर
भिलाषस्वरूपप्रत्यवमर्षपूर्वकः सर्वज्ञानक्रियाव्यवहारः तस्य रागद्वेषाभ्यां
विमुक्तानीन्द्रियाणि स्वस्वविषयमभिप्रवर्तन्त इति तादृशैरिन्द्रियैर्विषयांश्चरन्प्र
सादमधिगच्छतीत्युक्तं ६४

आनंदीटीका

इंद्रियवशीकारेगुणमाह विधेयो वश्यः स्वसमाहितआत्मान्तःकरणं यस्य प्र
सादं स्वच्छत्वादिवाञ्छारूपपंकसंपर्काभावं ६४

^ विषयध्यानसक्तस्याविस्मृतात्मनो विषयप्रवणेन्द्रियेषु रागद्वेषौस्तः अनीदृशस्तु प्रकृतौ रागद्वेषयुक्तैरिन्द्रियैरात्मवश्यैः स्वाधीनैः स्वभावतः सद्भिर्विषयानुपभुंजानः विधेयात्मा विधेयः ^

लासिकी [illegible] टीका

एवं सर्वानर्थमूलानामपि विषयाणां युक्तोपभोगमोक्षकारणमिति
वदन्किं व्रजेत्तस्योत्तरमाह यावदध्यायसमाप्ति ^ प्रत्यवमर्षेन वश्यैः
आत्मा स्वस्वभावो यस्य स स्वच्छत्वादिसंपर्ककलंकाभावं प्राप्नोति + ६४

(margin) प्रसादं

+ तदुक्तं शिवोपनिषदि
ग्राह्यग्राहकसंबन्धे सामान्ये सर्वदेहिनां
योगिनां तु विशेषोयं संबन्धे सावधानतेति +

पंचोलीटीका

सर्वानर्थस्य मूले विषयाभिध्यानमुक्त्वा अथेदानीं मोक्षकारणमि
दमुच्यते रागद्वेषेति तत्पुनः विधेयात्मा वश्यपावितः रागद्वेषविमुक्तैः
रागद्वेषरहितैः आत्मवश्यैः आत्मना वशीकृतैः इंद्रियैः श्रोत्रादिभिः
अप्रार्थितान् विषयान् चरन् उपलभमानः प्रसादं स्वास्थ्यमधिगच्छ
ति ६४

स्वामी [illegible] टिप्पणी॥

रागद्वेषेति अयं गुरुः समादीनरदंतव्य इतिरागः अयं परकीयो वश्यं
दंतव्य इति द्वेषस्ताभ्यां रहितैर्युत आत्मवश्यैः स्वायत्तैरिंद्रियैश्चक्षुरा
दिभिर्विषयान्प्रतिपदभूतान्संमुखायातान्व्यवहारविषयीभूतान् चर
न् वध्यनतया जानन् प्रसादं मोहकालुष्याभावं प्राप्नोति यतो विधेयात्मा

नियमितमनाः मनसो नियमने हि सर्वाणींद्रियाणि नियमितानि भवंतीति ९४॥

मधुभाष्य

९४॥

भाषा अनुवाद

जो कहो कि चिरकालसे विषयमें निमग्न स्वभाव कहे विषय
में आसक्त इन्द्रियगणका विषयसे रोकना जो प्रमाथ प्रति
कठिन है तो पूर्व उक्त दोष निवारण कैसे हो सकैगा इससे
स्थितप्रज्ञा होनाभी असंभव प्रति उपस्थित है इस शंका पर क
हतेहैं कि राग कहे प्रीति और द्वेष जो विरोध तिनसे रहि
त होके अर्थात् इनको छोड़के और अभिमान त्याग कवि
के सब इंद्रियोंके द्वारा विषयोंका भोग करनेसे भी शान्ति
प्राप्ति होतीहै तो राग द्वेष रहित कैसे होय सो कहतेहैं और इंद्रिय
कि मनके आधीन कहे वशीभूत सब इंद्रियहै और इंद्रिय
वशकारी मनको जो मनुष्य अपने वशकर रावैहै उसके
फेरि और राग द्वेषादिक रहते नहीं इस कहनेसे अर्जुन
की चौथी प्रश्न जो है कि स्थितप्रज्ञ कैसे गमन करैहै उस
का उत्तर दिया कि स्वाधीन इंद्रियगण रावि विषयोंमें ग
मन करै अर्थात् इंद्रीजितहो विषयभोग करै जिस हेतु
आत्मवश इंद्रिय द्वारा विषय भोग करता हुआ आत्मा
सुखी रहताहै ६४ ॥

दोहा

राग द्वेष बिन विषयको इंद्रिय सों करै भोग इंद्रिय मन बस
जाहिके सो प्रसाद लहै लोग ६४ ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते । प्र
सन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५

शांकरभाष्यं ॥

प्रसादे सति किं स्यादित्युच्यते प्रसाद इति प्रसादे सर्वदुःखा
नां आध्यात्मिकादीनां हानिर्विनाशोऽस्य यतेरुपजायते किं
च प्रसन्नचेतसः स्वच्छान्तःकरणस्य हि यस्मादाशु शीघ्रं
बुद्धिः पर्यवतिष्ठते आकाशमिव परि समन्तात् अवतिष्ठते
आत्मस्वरूपेणैव निश्चलीभवतीत्यर्थः एवं प्रसन्नचेतसोऽव
स्थितबुद्धेः कृतकृत्यता यतस्तस्माद्रागद्वेषवियुक्तैरिन्द्रियैः
शास्त्राविरुद्धेष्ववर्जनीयेषु युक्तः समाचरेदिति वाक्यार्थः ६५

आनंदगिरिकृत टी॰ ॥

तथापि नानाविधदुःखाभिभूतत्वान्न स्वास्थ्यमास्थातुं शक्य
मित्याशयेन पृच्छति प्रसाद इति श्लोकार्द्धेनोत्तरमाह दुःख
नइति सर्वदुःखहान्या बुद्धिस्थैर्येऽपि प्रकृतं प्रज्ञास्थैर्यं ।
कथं सिद्धमित्याशंक्याह प्रसन्नेति बुद्धिप्रसादस्यैव फला
न्तरमाह किंचेति तस्माद्बुद्धिप्रसादार्थं प्रयतितव्यमिति
शेषः श्लोकद्वयस्यात्तरोत्थमर्थमुक्त्वा तात्पर्यार्थमुपसंहर
ति एवमिति युक्तः समाहितो विषयपारवश्यशून्यः सन्नि
ति यावत् ६५ ॥

स्वामिकृत टीका ॥

प्रसादे सति किंस्यादित्यत्राह प्रसाद इति प्रसादे सति सर्वदुः
खानां नाशः ततश्च प्रसन्नचेतसो बुद्धिः प्रतिष्ठिता भवतीत्य
र्थः ६५ ॥

पिशाचभाष्य टी॰

प्रसादे सति किं स्यादित्यत्रोच्यते प्रसादे प्रसन्नतायां सत्यां स
र्वदुःखानामाध्यात्मिकाधिभौतिकाधिदैविकानां हानिर्नाशः
आध्यात्मिकानि जन्मजरामरणेन तदंतरे परिपतितवातपि॰

जश्लेष्मसंक्षोभजनिताविकाराः आधिभौतिकानिर्भूतानामि
तरेतरंवध्यवध्यघातकभावेनजनितानिदुःखानि शस्त्रग्रह
णादीनि अधिदैविकानिवातातपवर्षतन्मृतिबंधजनिता
निदुःखानि शस्त्रग्रहणादीनि अधिदैविकानिवातातपव
र्षतन्मृतिबंधजनितानिदुःखानि एतेषामाध्यात्मिकादीनां
दुःखानांहानिर्नाशोऽस्ययोगिनःप्रजायते किंचप्रसन्नचे
तसःस्वस्थांतःकरणस्याशुशीघ्रंबुद्धिःपर्यवतिष्ठति आका
शमिवात्मैकत्वग्राहिणीपरितःसमंतादवतिष्ठते आत्मस्व
रूपेणैवनिश्चलाभवतीत्यर्थः ६५ ॥

रामानुजभाष्य टी॰

अस्यपुरुषस्यमनसःप्रसादेसतिप्रकृतिसंसर्गप्रयुक्तसर्वदुः
खानांहानिरुपजायतेप्रसन्नचेतसःआत्मावलोकनात् विवि
क्तदोषरहितंतदानीमेवहिविविक्तात्म विषयाबुद्धिर्मतीप
र्यवतिष्ठतेअतोमनःप्रसादेनदुःखहानिर्भवत्येव ६५ ॥

अभिनवगुप्तकृत टी॰ नास्ति

स्पष्टार्थेन ६५ ॥ ॥

परमार्थप्रपा टी॰

अथतेनकिंस्यादित्याह प्रसादइति अस्यपुरुषस्यप्रसादेजा
तेसतिसर्वदुःखानांहानिर्जायते एवंसर्वदुःखनिगत्वेनप्रस
न्नमनसःआशुशीघ्रंबुद्धिःपर्यवतिष्ठतिस्थितानिश्चलाभवति
तदुक्तंविज्ञानामृतनिर्झरावनिविवस्वानंदपूर्णोदयेरूर्मिः
शाश्वतस्तुप्रसादसदनेभूतानुकंपाग्रहः निर्वाणमपदीप्र
दीपकलिकावैरूप्यभागप्यसंदंदत्याधीनपदावलंबरसिका
स्तानाश्यितिसद्धिदः ६५ ॥

वनमाली टी॰

प्रसादेसतिकिमित्यतआह प्रसादइति चित्तस्यप्रसादेस्वच्छत्व
रूपेसतिसर्वदुःखानामाध्यात्मिकादीनांहानिर्नाशोऽस्योपजा
यतेह्यतःप्रसन्नचेतसोऽपिजनस्याशुशीघ्रमेव बुद्धिरनंतसद्गुणा

लयेमयिपर्यवतिष्ठते स्थिराभवति प्रसादेसतिमयिबुद्धिप
र्यवस्थानंततोमदापरोक्षंततोमत्स्वरूपमहाप्रसादस्ततोविद्या
निवृत्तिस्ततःसर्वदुःखनाशपूर्वकपरमानंदावाप्तिरूपोमो
क्षइतिभावः ६५ ॥

उत्तमवैजयन्ती टी. ॥ प्रसादइति प्रस

प्रसादादपि किंफलंभवतीत्यपेक्षायामाह प्रसादइति प्रस
ज्ञाननिष्ठस्ययोगिनोविषयमलरहितस्यचित्तस्यप्रसादेशु
द्धेसतिसर्वदुःखानांशकृतदेहादिसंबंधजनितानांसर्वेषां
दुःखानांहानिर्विनाशःउपजायतेभवति मनसएवप्रसा॰
देकुतोदुःखहानिरित्यत्राह हियस्मात्प्रसन्नचेतसोनिर्मल
चित्तस्यशुद्धस्यबुद्धिरात्मदर्शनविषयासतीपर्यवतिष्ठते
सर्वेश्वरेमयिनिश्चलातिष्ठति तस्मान्मनःप्रसादएवदुःखहा
निर्भवति नन्वितरेषामिंद्रियाणांनिर्मलत्वेयतस्तेषामपि
मनसःशुद्धिद्वारेवशुद्धिर्भवतीत्यभिप्रायः मनएवमनुष्या
णांकारणंबन्धमोक्षयोःबंधनंविषयासक्तंमुक्तंनिर्विषयं
स्मृतमितिवचनमत्रानुसंधेयं ६५ ॥

प्रसादमधिगच्छतीत्युक्तं तत्र प्रसादेसतिकिंस्यादित्युच्यते ॥

मधुसूदनी टी.

चित्तस्यप्रसादेस्वच्छत्वरूपेसतिसर्वदुःखानामाध्यात्मिकादी
नामज्ञानविलसितानांहानिर्विनाशोस्ययतेरुपजायते ।
हियस्मात्प्रसन्नचेतसोयतेराशुशीघ्रमेवबुद्धिर्ब्रह्मात्मैका
कारापर्यवतिष्ठते परितःसमंतादवतिष्ठतेस्थिराभवति ।
विपरीतभावनादिप्रतिबंधाभावात् ततश्चप्रसादेसतिबुद्धि
पर्यवस्थानंततस्तद्विरोध्यज्ञाननिवृत्तिः ततस्तत्कार्यसकल
दुःखहानिरितिक्रमेणापिप्रसादेयत्ताधिक्यायसर्वदुःखहा [illegible]
निकरत्वकथनमितिनविरोधः [illegible]
[illegible] ६५ ॥

सदानंदी टी. ॥

चित्तस्यस्वच्छतायांत्वभ्रांतिज्ञानेनैकजन्मनां आध्यात्मिकादिदुः

खानांसर्वेषांजायतेतत्वयः १ यस्माच्छीघ्रंयतेयस्यप्रसन्नमनसो
मतिः ब्रह्मात्मैकत्वबोधाकारासमंतादवतिष्ठते २ अतःसर्व
प्रयत्नेनशुद्धधर्मतत्परायणः वशीकृतमनःस्यादितिष्टेद्ब्रह्मा
ह्वयेमयि ३ ६५ ॥

नीलकंठी टीका ॥

किंच चित्तस्यप्रसादेहिअस्यपुंसःसर्वदुःखानांकाममूलकानां
कामाभावात्हानिःपरिहारोजायते कामानुदयेहेतुमाह
प्रसन्नेति हियस्मात्प्रसन्नचेतसःपुंसोबुद्धिर्ब्रह्मात्मैकत्वि
षयः आशुशीघ्रंपर्यवतिष्ठते सुदृढाभवति तस्मिंश्चसतिप्र
त्याभावान्नकामोदयइत्यर्थः ६५ ॥

आनंदी टीका

एवंप्रसादेप्राप्तेसतिअस्यपुंसःसर्वेषांदुःखानामाध्यात्मिकादी
नांहानिःनाशउपजायतेहियस्मात्प्रसन्नचेतसोबुद्धिराशुपर्यव
तिष्ठतेपरितोव्याप्नोति ६५ ॥

रामकंठी टीका

एवंविधेचनिसर्गनिर्मलस्वरूपाभिव्यक्तलक्षणेप्रसादेसतिरा
गादिक्लेशनिबन्धनानांसर्वेषामाध्यात्मिकादिदुःखविकाधिभौति
कानांदुःखानांहानिःपरिहृत्यैअस्यपुंसउपजायते यतोयथाक्र
क्रमेणप्रसन्नेनीरागद्वेषकलंकेचेतोयस्यतादृशस्यपुंसआशु
प्रसादसमनन्तरमेवबुद्धिःप्रज्ञापर्यवतिष्ठते परितःसमंता
त्सर्वस्वात्मनिनिर्विकल्पांप्रतिष्ठांलभतेयतएवंतस्मात्कारणा
द्यस्यकृष्णस्यसर्वतःसर्वेभ्यःस्वस्वहेतुभ्योदुःखहेतुभ्यश्चेंद्रि
यार्थेभ्योविषयेभ्योदुःखहेतुभ्योपिद्वेषविरहितत्वेन स्वस्वहेतु
षपिनीरागतयाप्रसन्नान्येवनिगृहीतानिनियमितानिबाह्या
भ्यन्तराणीन्द्रियाणितस्यतथाविधस्यप्रज्ञासम्यक्परमेश्वरसायु
ज्यफलप्रज्ञाबुद्धिःप्रतिष्ठास्वात्मनिलब्धस्थितिः ननुत्वस्ययःप्रत
त्नप्रयत्नलक्षणःसमाधिनिरुद्धान्यनुपहतरागद्वेषमयमूल
त्वात्प्रसन्नानिकार्यकराण्येवनिगृहीतानीन्द्रियाणिसम्यक्प्रतिपाद·
तएवंसमस्तसंसारिप्रकृष्टविलक्षणप्रबुद्धस्यहृतिंप्रति

यित्वमाह ६५ ॥

लासिकी [illegible] टीका

प्रसादे सति किं स्यादित्यत आह प्रसाद इति प्रसादे तु खल्वादिले[illegible] प्रसादे इति प्रसादे हि खलु आत्मनि पर्यवतिष्ठते ६५ लभ्र

पाभावे सति निर्विलत्वाय तिष्ठे [illegible] प्रसादे जायते प्रसन्नचेतसो लिप्तांतःकर णस्य बुद्धिर्नि पर्यवतिष्ठते

सर्वेषां त्रिविधानां दुःखानां हानिः तयो
णस्य बुद्धिर्निश्चयात्मिका प्रज्ञा

पंचोलीटीका

प्रसादे सति किं स्यादित्याह प्रसाद इति प्रसादे चेतसः प्रसाय
प्रसादे सति किं स्यादित्याह प्रसाद इति प्रसादे चेतसः प्रसाय जायते किं च
नेदुःखानां आध्यात्मिकादीनां हानिर्विनाश उपजायते किं च विवेकजाप्र ६५
हि यस्मात्प्रसन्नचेतसः स्वच्छांतःकरणस्य बुद्धिर्विवेकजा प्रलीभवति
ज्ञाप्राणुशीघ्रं पर्यवतिष्ठते आत्मस्वरूपेणैवा निश्चलीभवति

रणवीरसिद्धोधिनी॥

प्रसादफलमाह प्रसाद इति निगदव्याख्यातमेतत्॥ ६५॥

मधुभाष्य॥

६५॥

390

भाषा अनुवाद

इस प्रकार शांति प्राप्त होने पर फिरि क्या होताहै सो क-
हतेहै कि शांति लाभ होनेसे सब दुःख नाशहो जातेहैं
फेरि इस शान्त चित्त पुरुषके सुन्दर बुद्धि स्थिर होती
है ६५ ॥

दोहा

भय प्रसन्न यह जीवके दुखहोत है नाश चित्तप्रसन्नके
होतहि स्थिरबुद्धि दृढ वाधा ६५

नास्तिबुद्धिरयुक्तस्य नचायुक्तस्यभावना
नचाभावयतःशान्ति रशांतस्यकुतःसुखं ६६

शांकरभाष्यटी.

सेयंप्रसन्नता स्तूयते नास्तीति नास्ति नविद्यते नभवतीत्यर्थः
बुद्धिरात्मस्वरूपविषया अयुक्तस्यासमाहितान्तःकरणस्य
नचायुक्तस्येति नचास्य अयुक्तस्यभावना आत्मज्ञानाभिनि·
वेशः तथाच नास्यभावयतः आत्मज्ञानाभिनिवेशमकुर्वतः
शांतिरूपशमो नविद्यते अशांतस्यकुतःसुखं इंद्रियाणांहि
विषयसेवातृष्णातो निवृत्तिर्यातत्सुखं नविषयविषयातृ
ष्णा दुःखमेव हि सा न तृष्णायांसत्यां सुखस्यगन्धमात्रमपि
उत्पद्यतइत्यर्थः ६६ ॥

आनंदगिरिकृतटीका ॥

किं पुनःसत्त्वशुद्ध्यैव यथोक्तबुद्धिःसिद्ध्यति नेत्याह सेयमि
ति असमाहितस्यापि बुद्धिमात्रमुत्पद्यमाने प्रतिभातीत्याशं
क्य विशिनष्टि आत्मस्वरूपेति नहि विक्षिप्तचित्तस्यात्मस्वरू
पविषया बुद्धिरुदेतुमर्हतीत्यत्र हेतुमाह नचेति आत्मज्ञाने
शाद्धादार्पततोज्ञाते स्मृतिसंतानानुकरणं साक्षात्कारार्थम
भिनिवेशो भावनेति चोच्यते नचासौ विक्षिप्तबुद्धेःसिध्यती·
ति हेत्वर्थे विवक्षितमाह आत्मज्ञानेति भावनाद्वारासाक्षात्
काराभावेपिकाक्षतिरित्याशंक्याह नथेति असमाहितस्य
भावनाभावादितियावत् आत्मन्यापाततोज्ञाने श्रवणाद्या
वृत्तिरूपां स्मृतिमनातन्वानोस्यापरोक्षबुद्ध्यभावेनानर्थनि
वृत्तिःसिद्धतीत्याह उपशमइति अनिवृत्तानर्थस्य परमान
न्तसागराद्विभक्तस्य संसारवारिधौनिमग्नस्य सुखाविर्भावो
नसंभवतीत्याह अशान्तस्येति तथापि विषयसेविनोवैष
यिकंसुखं संभवतीत्याशंक्याह इंद्रियाणांहीति तस्मात्
यस्य शास्त्रप्रसिद्धमात्मभवविकल्प सुखत्वमिति वक्तं हि श

हः विषयसेवातस्तस्यापि विषयोपभोगद्वारात्सुखमुपलब्ध-
मित्याशंक्याह दुःखमेवेति तत्रापिहि शान्तो न भवतीति त
देव स्पष्टयति नेत्यादिना ६६ ॥

स्वामिकृत टी॰

इंद्रियनिग्रहस्य स्थितप्रज्ञतासाधनत्वं व्यतिरेकमुखेनोपपाद-
यति नास्तीति अयुक्तस्यावशीकृतेंद्रियस्य नास्ति बुद्धिः शास्त्रा
चार्योपदेशाभ्यामात्मविषया बुद्धिः प्रज्ञैव नोत्पद्यते ऽतस्तस्याः
प्रतिष्ठितता वार्ता कुत इत्यत आह नचायुक्तस्य भावना ध्यानं
भावनया हि बुद्धेरात्मनि प्रतिष्ठा भवति सचायुक्तस्य यतो ना
स्ति नचाभावयतः आत्मध्यानमकुर्वतः शांतिरात्मनि चित्तो
परतिः अशांतस्य च कुतः सुखं मोक्षानंद इत्यर्थः ६६ ॥

पिशाचभाष्य टी॰

नास्ति बुद्धिरयुक्तस्येति न विद्यते सर्वथा प्रसक्ता बुद्धिरात्मस्वरूप
विषया अयुक्तस्य असमाहितस्य नचायुक्तस्य भावना आत्मज्ञा
नाभिनिवेशो भावना नचाभावयतः शांतिः अभावयतः आ
त्मज्ञानाभिनिवेशशून्यस्य शांतिरुपशमो न विद्यते अशांत-
स्यानुपरतेंद्रियस्य कुतः सुखं इंद्रियाणां विषयतृष्णातो निवृ
त्तिस्तु सुखं न तु तृष्णा सा दुःखमेव हि तृष्णायां सत्यां न सुखस्य
गंधमात्रमप्युपपद्यते ६६ ॥

रामानुजभाष्य टी॰

मयि सन्न्यस्तमनोरहितस्य स्वयत्नेनेंद्रियदमने प्रवृत्तस्य क
दाचिदपि विविक्तात्मविषया बुद्धिर्न भवति अत एव तस्य तद्भा
वना न संभवति विविक्तात्मानमभावयतो विषयस्पृहाशां
तिर्न भवति अशांतस्य विषयस्पृहायुक्तस्य कुतो नित्यनिरति
शयसुखप्राप्तिः ६६ ॥

अभिनवगुप्तकृत टी॰ नास्ति

स्पष्टार्थम् ६६ ॥

परमार्थप्रपा टी॰

इंद्रियनिग्रहस्यास्थितप्रज्ञतासाधनत्वंव्यतिरेकमुखेनोपपाद
यति नास्तिबुद्धिरिति अयुक्तस्यावशीकृतेंद्रियस्यबुद्धिर्ना॰
त्यनेनच पदेनयाव्याख्या अयुक्तस्यभावनाआत्मभावनापिनास्ति
तथाअभावयतः ब्रह्मभावनावर्जितस्यसत्वेमात्मसत्वेनास्ती
त्यर्थः ६६ ॥

वनमाली टी॰

उक्तमेवार्थंव्यतिरेकमुखेनद्रढयति नास्तीति अयुक्तस्याजित
चित्तस्यबुद्धिर्ब्रह्मापरोक्षेणनभवति नतुध्यानादेवब्रह्मापरोक्षंतस्या
नचास्ति चायुक्तस्यति चित्तैकाग्रतारहितस्यभावनाध्यान
मपितस्मादेव नचाभावयतोभावनारहितस्यशांतिर्मनोनिष्ठा अ
शांतस्यमदनिष्टस्यकुतःसुखं दुःखासंभिन्नमानंदरूपंकुतः ६६ ॥

ऊतमवैजयन्ती टी॰

ननुफलमूलादिभोजनोपवासगिरिगुहाभ्यंतरादिजनशून्य
देशनिवसनादिभिरनेकसाधनकष्टैर्वेंद्रियविजयंकृतेसति
मनःस्वयमेवनिर्विषयंभवति किमर्थंतस्यशुद्धयेत्वयापिभग
वतियुक्तत्वमित्याशंकायामाह नास्तीति अयुक्तस्यापिनयु
क्तमनसःपुरुषस्यबुद्धिरात्मस्वरूपदर्शनविषयानास्तिनभ
वतिअयुक्तस्य आत्मबुद्धियुक्तरहितस्यतस्यभावनाआ
त्मविषयाचिंतानभवति अभावयत आत्मचिंतारहितस्यशा
न्तिश्चविषयेभ्यउपरतिश्चनभवति अशान्तस्यविषयापराम
रहितस्य सुखंप्रकृतिसंबन्धध्वंसपूर्वकमात्मस्वरूपलाभा
नेतरेमत्वामिस्वरूपानंदलक्षणंमोक्षः कुतोभवति नकुतश्चि
दपीत्यर्थः तस्मान्मत्स्वरूपयुक्तैरेवमनसेंद्रियाणिनिर्विष
याणिभवंति नान्यैःसाधनैः यदिकेवलैर्यमनियमादिसाध
नबलैरिंद्रियविजयाय योगीप्रवर्तते तर्हिऋषिशृंगमिभरथी
दिवत्स्वयमेवेंद्रियैः पराजितोभवतीत्यभिप्रायः ६६ ॥

मधुसूदनी टी॰

अयुक्तस्याजितचित्तस्यबुद्धिरात्मविषयाश्रवणमननाख्यवेदां

+उक्तमेवार्थंव्यतिरेकमुखेनद्रढयति+
+अयुक्तस्याजितचित्तस्य

गी.
टी.
द्वि.

न विचारजन्यं नास्ति नोत्पद्यते तद्बुद्ध्यभावेन चायुक्तस्य भाव
ना निदिध्यासनात्मिका विजातीयप्रत्ययानंतरसजातीयप्र
त्ययप्रवाहरूपा सर्वत्र नञोस्तीत्यनेनान्वयः न चाभावयत
आत्मानं शांतिः सकार्याविद्यानिवृत्तिरूपा वेदांतवाक्यजन्याब्र
ह्मात्मैक्यसाक्षात्कृतिः अप्रशांतस्यात्मसाक्षात्कारशून्यस्य कुतः
सुखं मोक्षानंद इत्यर्थः [illegible]
६६ ॥

सदानंदी टीका

व्यतिरेकमुखेनेमं दृढयत्यर्थमीश्वरः ऽयुक्तस्याजितचित्तस्य बुद्धि
र्वेदांतवाक्यजा १ नोत्पद्यतेस्य तद्बुद्ध्यभावेनास्यैव भावना
निदिध्यासनरूपायाः शांतिहेतुः स्थिरात्मिका २ निदिध्यासन
शून्यस्य नास्त्यविद्यापरिक्षयः साक्षात्कारः परात्मैक्यतत्त्वस्या
नंदकारणं ३ तत्साक्षात्कारशून्यस्य मोक्षानंदः कुतो भवेत्
अतस्त्विंद्रियनियम्याशु यतः स्वानंदसिद्धये ४ ६६ ॥

नीलकंठी टीका

समनस्कानामिंद्रियाणामनिग्रहो दोष उक्तः बुद्धेरपर्यवस्था
नेको दोषस्तत्राह नास्तीति अयुक्तस्य श्रवणमननयोरकृता
सक्तस्य बुद्धिर्ब्रह्मात्मैक्यनिश्चयो नास्ति प्रमाणविषयासंभा
वनायाः प्रमेयविषयासंभावनायाश्चानिरासात् तथायुक्त
स्याप्यसमाहितमनसः भावना ब्रह्माकारांतःकरणवृत्तिप्रवा
हो नास्ति मनसश्चांचल्येन बुद्धेरपि चांचल्यात् अभावयतो ध्या
नमकुर्वतः शांतिः सर्वदुःखोपरमश्च नास्ति चेतसोनवस्थित
त्वेन दुःखावश्यंभावात् अशांतस्यानुपरतसर्वदुःखस्य सुखं
प्रत्यगद्वयानंदात्मकं कुतः न कुतश्चित् दुःखित्वादेव अयंच
अयुक्तस्येति पदत्रयं निर्योगेत्यस्य स्वरूपं द्वितीयं प्रजहसमाधावित्य
स्मा
स्य तेंडके: पर्यवस्थानमावश्यकं ६६ ॥

आनंदी टीका

अयुक्तस्ययोगाभ्यासहीनस्यज्ञानकर्मसमुच्चययुक्तिहीनस्य
चबुद्धिः स्वस्वरूपबोधिसम्यग्ज्ञानेनास्तिनजायते एवमयुक्त
स्यभावनाश्रद्धाफलावश्यंभावनिश्चयोनोत्पद्यते अभावय
तः अश्रद्दधतः शांतिर्विषयोपरतिर्नास्तिअशांतस्यविषयाभि
लाषिणः कुतः सुखम् ६६ ॥

रामकंठी टीका

स्पष्टोऽर्थः ६६ ॥

अयुक्तस्यभावनात्मविषयंध्यानंचनास्ति अभावयतो भावनामकुर्वतः शांतिश्चित्तोपरतिर्न अशान्तस्य अनु परतचित्तस्य कुतः सुखं मोक्षानंदइत्यर्थः ॥

अयुक्तस्यासमाहितस्यनित्यंस्वात्मा नमविमृशतो

नासिपुं [illegible] टीका

बोधवतोऽपि अस्य एवमयुक्तिहीनस्यगुरूपदेशार्थभावव्यतिरेकेना
ह नेति बुद्धिरात्मनिश्चयात्मिका नास्ति अभावंप्राप्नोति ६६

पंचोलीटीका

अयुक्तस्ययोगरहितस्यबुद्धिः आत्मस्वरूपविषयानास्तिवपु
नः अयुक्तस्यासमाहिताचित्तस्यभावनाआत्मज्ञानाभिरति
र्नास्तिचपुनः अभावयतः आत्मज्ञानाभिनिवेशंअकुर्वतः
शांतिर्नभवति अशांतस्यउपशमरहितस्यसुखंकुतः त्व
स्तायोःसत्योःसंन्याससुखस्यगंधमात्रमपिनोपपद्यतेइत्य
र्थः ६६

रसावीरसमिद्धिबोधिनी ॥

नास्तीति युक्तार्द्दतात्मनेनहादितादेहेत्वना स्वधर्मोऽयमन्ततः प्र
च्यवनं ततस्तस्यात्यावतेनं योग इति सिद्धंतितं ततश्च तद्दृढ
तस्यबुद्धिकृतलक्षणानास्तिनस्थिरीभवति भावनास्मृति
श्चनास्ति अस्मतेशोपपमाभावः अशांतस्य च सुखंनास्ति
संभाष्याविष्टत्वेनदोलायमानत्वात् ६६ ॥

मधुभाष्य ॥

६६ ॥

भाषा अनुवाद

इंद्रियों का निग्रह कहे काबू रखना जो स्थित प्रज्ञ पुरुष
का साधन सो विपरीत कहे उलटी रीतिसे कहतेहै कि
अवशीकृत इन्द्रिय मनुष्यके शास्त्र और आचार्यके उपदे
श से आत्मज्ञान होनेके योग्य बुद्धि उत्पन्न नही होतीहै
सो स्थितप्रज्ञ होना दूरवातहै इहां भावना का अर्थ ध्या
नहै सो ध्यानके द्वारा बुद्धि आत्मा मे प्रतिष्ठित कहे स्थि
न होतीहै परन्तु जो इंद्रियगण वशन करि सके उस
को यह ध्यान कहांहै इसीसे वह आत्माके ध्यानका अन
धिकारीहै तो फिरि उसको शांति नही होती अर्थात् (
आत्मामे चित्तयुक्त नही होता और अशांत पुरुष को
सुख कहे परम आनंद कहांसे होसके ॥ ६६ ॥

दोहा

योगयुक्त बिन बुद्धि नहिं स्मृतियुक्त बिन नाहिं स्मृतिरहित
शांति नहिं रहित शांति सुख काहि ॥ ६६ ॥

इंद्रियाणांहिचरतां यन्मनोनुविधीयते त
दस्यहरतिप्रज्ञां वायुर्नावमिवांभसि ६७ ॥

शांकरभाष्यटी.

अयुक्तस्यकस्माद्बुद्धिर्नास्तीत्युच्यते इंद्रियाणामिति इंद्रि
याणांहि यस्मात्चरतांस्वविषयेषु प्रवर्तमानानां यन्मनो
नुविधीयते अनुप्रवर्तते तदिंद्रियविषयविकल्पनेनप्रवृ
त्तंमनोस्य यतेर्हरति प्रज्ञामात्मनात्मविवेकजां नाशयति
कथं वायुर्नावमिवांभस्युदके जिगमिषतां मार्गादुद्धृत्यो
न्मार्गे यथावायुर्नावं प्रवर्तयत्येवमात्मविषयां प्रज्ञांहृत्वा
मनोविषयां कल्पनांकरोति ६७ ॥

आनंदगिरिकृतटी. ॥

आकांक्षाद्वारा श्लोकांतरमुत्थापयति अयुक्तस्येति विवि
क्तचेतसो भावनाभावे साक्षात्कारलक्षणाबुद्धिर्नभवतीति
हेत्वंतरेणसाधयति इंद्रियाणामिति यत्पदोपात्तं मनस्त
त्पदेनापिदृश्यते इंद्रियाणांश्रोत्रादीनांविषयःशब्दादयस्ते
षांविकल्पनं मिथ्याविभज्यग्रहणं तेनेतियावत् दृष्टान्तमा
करोति उदकइति यस्मात्तस्मादयुक्तस्य नोत्पद्यते बुद्धिरि
तियोजना ६७ ॥

स्वामिकृतटीका ॥

नास्तिबुद्धिरयुक्तस्येत्यत्रहेतुमाह इंद्रियाणामिति इंद्रिया
णामवशीकृतानां स्वैरं विषयेषुचरतांमध्येयदेवैकमिंद्रि
यंमनः अनुविधीयते अवशीकृतंसत् इंद्रियेणसहगच्छति
तदेवेंद्रियमस्यमनसः पुरुषस्यवाप्रज्ञांबुद्धिंहरतिविषय
विक्षिप्तांकरोति किमुतवक्तव्यंबहूनिप्रज्ञांहरंतीतियथा
प्रमत्तस्यकर्णधारस्यनावंवायुःसमुद्रेसर्वतःपरिभ्रमयति
तद्वत् ६७ ॥

गी.
टी.
हिं.

405

पिशाचभाष्य टी.

अत्रपरेणेंद्रियस्यतत्स्थानेनिवृत्तिस्तुवेनास्तिकस्मादित्यत्राह
इंद्रियाणांहियस्मात्स्वरतांविषयेषुवर्तमानानांयन्मनोनुवि
धीयते अनुवर्तनेनतदस्यहरतिप्रज्ञांहरतितदिंद्रियविष
यविकल्पेनप्रवृत्तंमनः अस्ययतेर्हरतिप्रज्ञांआत्मानात्मवि
वेकजांवायुर्नावमिवांभसि उदकेजिगमिषतांमार्गादुद्धृ
त्यउमार्गेयथावायुर्नावंप्रवर्तयति एवमात्मविषयांप्रज्ञां
इंद्रियानुविधायिमनोविषयाभिमुखींकरोति ६७ ॥

रामानुजभाष्य टी.

पुनरप्युक्तेनप्रकारेणेंद्रियनियमनमकुर्वतोनर्थमाह इं
द्रियाणांविषयेषुचरतांविषयेषुवर्तमानानांवर्तमनुयन्म
नोनुविधीयते पुरुषेणानुवर्त्यते तन्मनोस्यविविक्तात्मप्रव
णवतींहरति विषयप्रवणांकरोतीत्यर्थः यथांभसिना
यमानांनावंप्रतिकूलोवायुर्हरति ६७ ॥

अभिनवगुप्तकृत टी. नास्ति

प्रतं

[illegible] ६७ ॥

परमार्थप्रपा टी. ॥

अथनास्तिबुद्धिरयुक्तस्येत्यत्रहेतुमाह इंद्रियाणामिति वि
षयेषुस्वैरंचरतामिंद्रियाणांमध्येएकमिंद्रियंयन्मनः अनुतदनु
गतमेवविधीयतेप्रेर्यते तदस्यपुरुषस्यप्रज्ञांहरति तथाचैक
स्यमनसःसंयमेकृतेसर्वेषांसंयमःकृतएवस्यादित्यर्थः अ
प्रज्ञाहरणेदृष्टांतमाह वायुरिति अस्मावधानकार्याधाराधि
ष्ठितांनावंवायुर्यथेतस्ततोभ्रामयतितद्वत् ६७ ॥

वनमाली टी.

नन्वयुक्तस्याकृतेनाश्रवणादिनस्ताहगबुद्धिरित्यतआह इंद्रि
याणामितिचरतांविषयेषुवर्तमानानामवशीकृतानामिंद्रि
याणांमध्येयदेकमपींद्रियमचललीकृत्यमनोविधीयतेप्रव

तेनैकर्मकर्त्तरि लकारः तदिंद्रियमपि मनसानुसृतम् अ॰
स्य पुरुषस्य प्रज्ञां आत्मविषयकं परोक्षं हरति अपनयति यदे॰
कमपींद्रियं प्रज्ञां हरति तदा सर्वाणि हरंतीति किमु वक्तव्यं
अम्भसि विपरीतो वायुर्नावमिव ६७ ॥

उत्तमवैजयन्ती टी॰

यदि योगिनो मनो बाह्येंद्रियाणामनुभवति तर्हि तस्य महान
नर्थो भवतीत्याह इंद्रियाणामिति विषयेषु चरतां गच्छतामिं॰
द्रियाणां श्रोत्रादीनां वागादीनां च अनुयच्छात्तेनात्मनेन योगि
नानुरूपेण यन्मनो विधीयते वर्त्तते तन्मनः अस्य पुरुषस्य प्र॰
ज्ञामात्मविषयां बुद्धिं हरति विषयेष्वाकर्षति तत्र दृष्टांतः य
था मदिरामत्तस्यासावधानस्य कर्णधारस्य अम्भसि महार्णवे
स्वकीयमार्गे गच्छन्तीं नावं वायुस्तत्रतिह्लो महान्वातो हर
ति इतस्ततो भ्रमयति तद्वन्नानाविषयेषु [illegible] मनो बुद्धीभ्र
म[illegible]तीत्यर्थः ६७ ॥

मधुसूदनी टी॰

+ अयुक्तस्य कुतो नास्ति बुद्धिरित्यत आह +

+ चरतां स्वविषयेषु वर्त्तमानानामवशीकृतानामिंद्रियाणां मध्ये
यदेकमपींद्रियमनुलक्षीकृत्य मनो विधीयते प्रेर्यते प्रवर्त्तते इ॰
ति यावत् कर्मकर्त्तरि लकारः तदिंद्रियमेकमपि मनसानुसृ॰
तमस्य साधकस्य मनसो वा प्रज्ञामात्मविषयां शास्त्रीयां हरति
अपनयति मनसस्तु विषयाविष्टत्वात् यदेकमपींद्रियं प्रज्ञां
हरति तदा सर्वाणि हरंतीति किमु वक्तव्यमित्यर्थः दृष्टांत॰
न्तस्पष्टः अंभसीव वायोर्नौकाहरणसामर्थ्यं न भवतीति ह्व
यितुमंभसीत्युक्तं एवं दार्ष्टान्तिके अंभःस्थानीये मनः वाय॰
लेपसत्येव प्रज्ञाहरणसामर्थ्यमिंद्रियस्य न तु भूस्थानीये मनः
स्थैर्ये इति सूचितं [illegible] ६७ ॥

सदानंदी टी॰ ॥

अयुक्तस्य कुतो नास्ति बुद्धिरित्यत्र उच्यते स्वैरं प्रवर्त्तमानानां॰

वर्ति॰

गी॰ टी॰ द्वि॰

इंद्रियाणां प्रमाथिनां १ विषयेषु वर्तमानानां मध्ये यद्येकमपि हीन्द्रियं मनोऽनुलक्षीकृत्यैव साधकस्य प्रवर्तते २ मनसानुमतं तच्च प्रज्ञामात्मैकगोचरां साधकस्यापनयति शास्त्रीयां विषयाहृतं ३ यद्येकमपि तां प्रज्ञां विद्वांसो हरतीन्द्रियं किमुत वाच्यं तदा सर्वाणीन्द्रियाणि हरेयुरिति तां ४ नौकाहरणसामर्थ्ये मंभस्येव न तु स्थितौ वायोस्तद्वदिन्द्रियस्यापि चांचल्ये मनसः सति ५ प्रज्ञाहरणसामर्थ्यं मनःस्थैर्ये नास्यतत् इति हृदयितं प्रोक्तं मंभसीति पदे त्विह ६ ६७ ॥

नीलकंठी टी॰ ॥

तदभावे दोषमाह इंद्रियाणां हीति हि यस्मात् इंद्रियाणां चरतां स्वस्वविषये प्रवर्तमानानां कर्मणि षष्ठी यत् रागादिकलुषितं मनः तान् अनुलक्षीकृत्य विधीयते प्रवर्त्यते कर्मकर्तरि लकारः प्रवर्तत इत्यर्थः तत् इंद्रियानुसारि मनः अस्य साधकस्य प्रज्ञामात्मतत्वविषयां बुद्धिं हरति तस्यां मनोऽनुसारित्वात् दृष्टांतः स्पष्टार्थः अन्ये तु इंद्रियाणां मध्ये यदिंद्रियमनुलक्षीकृत्य मनः प्रवर्तते तदिंद्रियं अस्य साधकस्य मनसो वा प्रज्ञां हरतीति योजयंति आत्मविषयां प्रज्ञां हृत्वा मनो विषयविषयां करोतीति भावं समप्यालोचनीयं ६७ ॥

ज्ञानेदी टीका

पतत्सर्वमुपसंहरति ६७ ॥

रामकंठी स्पोटी.

स्पष्टोऽर्थः ६७

त्वामिकी [illegible] टी॰ कर्मसूत्रं मनश्चात्ममननात्मकमनुविधीय

इंद्रियाणां

अत्र हेतुमाह. विषयेषु स्वैरं हि चरतां मध्ये यदेकमिंद्रियं तेनु करोति स्वस्वरूपं तस्का तस्माद् धृशं विषयविमर्शात्मकतां गच्छति तदेवेंद्रियं पुरुषस्य आत्मनिश्चयरूपतां बुद्धिं हरति विषयवित्तिमां करोति. ६७ ॥ किमुत बहूनि प्रज्ञां हरन्तीति यथाप्रमत्तस्य कर्णधारस्य नावं वायुः समुद्रे परिभ्रामयति तद्वत् ॥

+ मस्य

पंचोलीटीका

इंद्रियाणांहीतिहियस्मा
अयुक्तस्यकस्मात् बुद्धिर्नास्तीत्याह इंद्रियाणांचरतांस्वविषयेषुप्रवर्तमानानामनुवि
तयन्मनःइंद्रियाणांचरतांस्वविषयेषुप्रवर्तमानानामनुवि
धीयतेअवशीकृतंसत् इंद्रियैःसहगच्छतितन्मनःअस्ययते
इंद्रियविषयविकल्पेनप्रवृत्तंसत्प्रज्ञामात्मानात्मविवेकज्ञा
हरतिकइववायुरिवयथावायुःअंभसिउदकेजिगमिषतांनावं
मार्गादुद्धृत्यउन्मार्गेनावंप्रवर्तयतिएवमात्मविषयांप्रज्ञांहृ
त्वामनोविषयांकरोति ६७

श्रीधरस्वामिकृतसुबोधिनी॥

इंद्रियाणामिति चरतां
अयुक्तस्यकस्माद्बुद्धिर्नास्तीत्यत्रहेतुमाह इंद्रियाणांवरणादीनांयन्मनोनुवि
स्वस्वविषयेषुप्रवर्तमानानामिंद्रियाणांचरणादीनांयन्मनोनुवि
धीयतेनुप्रवर्तते तदिंद्रियविषयसंकल्पनेनप्रवृत्तंमनोस्या
युक्तस्यकर्मयोगिनः प्रज्ञांप्रारभ्यमाणांनिश्चयात्मिकांहरति
अन्यविषयांकरोतिकथं वायुर्नावमिवोदकेजलेजिगमिषतां
मार्गादुद्धृत्योन्मार्गेयथावायुःप्रवर्तयत्येवंप्रारभ्यमाणांविषयां
बुद्धिंहित्वामनोविपरीतविषयांकरोति तस्मान्मनोनियमनं
मेवकार्यंयथास्वार्थेनप्रच्यवेततितात्पर्यम् ६७॥

मधुभाष्य

इंद्रियाणामिति अनुविधीयतेक्रियते नत्वीश्वरेणेंद्रियाणाम
नु बुद्धिज्ञानमिति वक्ष्यमाणावा प्रज्ञांप्रज्ञानं उत्पत्यादपिनि
वारयतीत्यर्थः उत्पन्नस्याप्यभिभवोभवतीत्यर्थः तस्मात्सर्वा
त्मनोनिग्रहीतेंद्रियएवज्ञानीतिनिगमयति ६७॥

भाषाअनुवाद

इंद्री वश किये विना तत्वज्ञान नही होता इसका का
रण कहतेहैं कि अवशीकृत इंद्रिय विषाधीन भोगी
पुरुषकी इंद्रियोंके बीच जब एक इंद्रीके साथ मन था
वताहै अर्थात् उसके आधीन हो विषय पर चला तो
फिर वह मन पुरुषकी बुद्धि हरिकै उसको विषयमें
वेलिप्त करताहै तब सब इंद्री इकट्ठे हो अज्ञा को ह
रन करतीहै तो और क्या कहै फेरि वायु जैसे जलमें
नावको इधर उधर नचावतीहै तैसे यह मन इंद्रियों
के साथ विलिप्त हो जहां तहां मारामारा भ्रमता फि
रता इस पुरुष को खराब करता है ६७ ॥

दोहा

इंद्रियअपने विषयकोभोगें जहांजनजाय सो याकीम
तिहरतहै ज्यौंजल नावहिवाय ६७॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इं
द्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८

शांकरभाष्यं ।

यतो हीत्युपन्यस्तस्यार्थस्यानेकधोपपत्तिमुक्त्वा तं चार्थमुपपा
द्योपसंहरति तस्मादिति इंद्रियाणां प्रवृत्तौ दोष उपपादितो
यस्मात्तस्मा यतेः यस्य यतेः हे महाबाहो निगृहीतानि सर्वशः
सर्वप्रकारैर्मानसादिभेदैरिंद्रियाणींद्रियार्थेभ्यः शब्दादिभ्य
स्तस्य प्रज्ञा प्रतिष्ठिता ६८ ॥

आनंदगिरिकृतटी. ॥

यततो हीत्यादिश्लोकाभ्यामुक्तस्यैवार्थस्य प्रकृतश्लोकाभ्या
मपि कथ्यमानत्वादस्ति पुनरुक्तिरित्याशंक्य परिहरति य
ततो हीत्यादिना ध्यायतो विषयानित्यादीनामुपपत्तिवच
नमुन्नेयं तच्छब्दापेक्षितार्थोक्तिद्वारा श्लोकमवतारयति ।
इंद्रियाणामिति असमाहितेन मनसा यस्मादनुविधीयमा
नानींद्रियाणि प्रसह्य प्रज्ञामपहरंति तस्मादिति योजना ६८

स्वामिकृतटीका ॥

इंद्रियसंयमस्य स्थितप्रज्ञत्वे साधनत्वं लक्षणत्वं चोक्तमुपसं
हरति तस्माद्यस्येति तस्य प्रज्ञा प्रतिष्ठिता भवतीत्यर्थः लक्ष
णत्वोपसंहारे तस्य प्रज्ञा प्रतिष्ठिता ज्ञातव्या इत्यर्थः महाबाहो
इति संबोधयन् महति वैरिनिग्रहे समर्थस्य तवात्रापि साम
र्थ्यं भवेदिति सूचयति ६८ ॥

पिशाचभाष्यटी.

यततो ह्यपीत्युपन्यस्तस्यानेकविधोपपत्तिमुक्तान्तस्यार्थमु
क्तान्तस्यार्थमुपपाद्योपसंहरति तस्मादिति यस्यैव योगिनो
परमात्मनि नित्यशुद्धबुद्धमुक्तस्वभावे सर्वगते प्रयमह
मस्मीति प्रज्ञा प्रतिष्ठिता स संयमयोगी ६८ ॥

रामानुजभाष्यं ॥

गी.
टी.द्वि.

२०९

तस्मादुक्तेन प्रकारेण शुभाशुभेष्वपि निविष्टमनसो यस्येन्द्रिया
णीन्द्रियार्थेभ्यः सर्वशो निगृहीतानि तस्यैवात्मनि प्रज्ञा प्रतिष्ठि
ता भवति ६८ ॥

अभिनवयामकृत टी.

यस्तु मनसो नियामकः स विषयान्सेवमानोपि न क्रोधादिक
लोलैरभिभूयत इति स एव स्थितप्रज्ञो योगीति तात्पर्यम् ६८

परमार्थप्रपा टी.

अथोपसंहरन्नाह तस्मादिति भो महाबाहो यस्मादेवं तस्मा
त्कारणाद्यस्य पुरुषस्य सर्वशः सर्वाणीन्द्रियाणीन्द्रियार्थेभ्यो
निगृहीतानि आकर्षितानि भवंति तस्य प्रज्ञा प्रतिष्ठिता ६८

वनमाली टी.

तस्मादिन्द्रियनिग्रहादेव ज्ञानी भवतीति नियमयति तस्मादि
ति यत एवं निगृहीतेन्द्रियस्यैव प्रसादः प्रसन्ने चेतस्येव युक्ति
युक्तिमत एव तत्वज्ञानं तत्वज्ञानवत एवापरोक्षज्ञानसाध
नं ध्यानं तस्माद्यस्य पुंसः इन्द्रियनिग्रहस्तस्याक्रमेणाप्यपरंप
रया मोक्षहेतुभगवत्प्रसादकारणापरोक्षज्ञानं भवती
त्यर्थः ६८ ॥

उत्तमवैजयन्ती टी.

यस्मादनेकसाधनसम्पन्नस्य योगिनो मत्स्वरूपयुक्तविरहि
तं मनो बाह्येन्द्रियाणां विषयप्रवणत्वं कृत्वा बुद्धेरात्मदर्शन
विमुखत्वं नयति तस्मादिति तस्मात्कारणात् हे महाबा
हो यस्य पुरुषस्येन्द्रियार्थेभ्यः स्वस्वविषयेभ्यः सर्वशः [illegible]
भ्यन्तराणीन्द्रियाणि मद्युक्तेन मनसा निगृहीतानि स्ववशीभू
तानि भवंति तस्य मच्चित्तस्य पुरुषस्य प्रज्ञा बुद्धिः प्रतिष्ठितात्म
स्वरूपप्रकर्षेण स्थिता भवति महाबाहो इति संबोधनेन श्रीम
न्नारायणमानसोद्भवं बाहुपर्यायवनसम्पन्नानीलादिगुणसीमां
योऽहं द्वारति यत्पादयोपि शुश्रूषुः सोऽवश्यं पियदिगुणाप्रस
हायरूपभजारहितस्य तवैन्द्रियजो भक्तीनाभवत हीदी
नीत्वमरंगमस्य शीघ्रज्ञानकारणस्य मत्सहायकस्य तवैन्द्रिय

विजयेकश्चिदपिप्रयासोनभवतीतिध्वनितम् ६८ ॥

मधुसूदनी टी० ॥

सर्वशः सर्वाणि समनस्कानि हे महाबाहो इति संबोधयन् सर्वशत्रुनिवारणक्षमत्वादिंद्रियशत्रुनिवारणेपि त्वंक्षमोसीति सूचयति स्पष्टमन्यत् तस्येति प्रसिद्धस्यैवपरामर्शः इंद्रियसंयमस्य स्थितप्रज्ञत्वप्रतिलक्षणत्वस्यमुमुक्षुंप्रतिसाधनत्वस्यचोपसंहरणीयत्वात् तदेवंमुमुक्षुणाप्रज्ञास्थैर्यायप्रयत्नपूर्वकमिंद्रियसंयमः कर्तव्य इत्युक्तं [illegible]

[illegible] ६८ ॥

सदानंदी टी०

यस्मादेवंततोयस्यसविज्ञानीइंद्रियाणिच निगृहीतानिसर्वाणितस्यप्रज्ञाप्रतिष्ठिता १ निवातकवचादीन्योरिपून्जितवानसि महाबाहोसमर्थस्त्वमिंद्रियाविनिवारणे २ ६८ ॥

नीलकंठी टी०

यतनोप्यपीत्यत्रोपक्रांतमर्थंवद्धयाऽप्युपसंहरति तस्मादिति यस्मादिंद्रियाधीनंमनोमनोनुगाचप्रज्ञातस्मात्हे महाबाहो यस्ययतेः इंद्रियाणि सर्वशः सर्वप्रकारेण स्वकारणेनमनसासहितानीतियावत् इंद्रियार्थेभ्यः शब्दादिभ्योनिगृहीतानिभवंति तस्यप्रज्ञाप्रतिष्ठितेतिविद्धि ६८

आनंदी टीका

स्पष्टार्थः ६८

रामकंठी टीका

॥ तस्माद्यस्यसर्वशः मनस्कानीन्द्रियाणि निगृहीतानि

स्पष्टार्थः ६८ ॥

लाक्षिकी धनपती टीका

तदेतदुपसंहरति तस्मादिति विषयेभ्योमुमुक्षुत्वादान्ता ग्निग्रहेसमर्थस्यतिनत्वस्यहत्या हे महाबाहो इति संबोधयन्वैरिनिग्रहेसमर्थस्त्वं इंद्रियनियमनेपिसामर्थ्यंभवेदितिसूचयति तस्य प्रज्ञा प्रतिष्ठिता भवतीत्यर्थः तवखेचरीइंद्रियनियमनेपिसामर्थ्यभवेदितिसूचयति न विज्ञापरमात्मभावानां विषयाननुस्मरतः

द्योक्रम् प्रसंत्यक्तात्मभावानां

र्थानांजीवतामेवभुक्तेनेति ६८ ॥

पंचोलीटीका

यततोह्यपीतिउपन्यस्तस्यार्थस्यानेकयाउपपत्तिःउक्तापत्ता वतार्थमुपपाद्यउपसंहरति तस्मादितिइंद्रियाणांप्रवृत्तौदो षउक्तादितोयस्मातस्मात्हेमहाबाहोअस्ययतेःइंद्रियाणि॰ सर्वशःइंद्रियार्थेभ्यःविषयेभ्यःनिगृहीतानितस्ययतेःप्रज्ञा॰ विवेकजाबुद्धिःप्रतिष्ठिता ६८

रणवीरसमिद्धुयिनी॥

एवमुक्तमर्थमनेकधोपपाद्योपसंहरति तस्मादिति इंद्रिया नुवर्तमानोमनोयस्मात्प्रज्ञांविक्षेपयति तस्माद्यस्येंद्रिया णींद्रियार्थेभ्योनियमितानि तस्यस्वविषयेप्रज्ञा प्रतिष्ठिता ६८

मधुभाष्य

तस्मादिति उक्तंलक्षणंपिंडीकृत्याह ६८॥

410

भाषा अनुवाद

इंद्रियोंका संयम करना स्थिरप्रज्ञ पुरुषका साधन औ
र यही उसका लक्षणहै यह जो पूर्व कहि चुके सोई ।
अब फेरि कहते कि हे महाबाहो अर्जुन जो इन सब इं
द्रियों को विषयोंसे शान्त राखि सकै उसकी प्रज्ञा प्र
तिष्ठितहोतीहै महाबाहु संबोधनसे यह जनाया कि
तुम वैरियोंके निग्रह करनेसे समर्थ हो इससे अवश्य
इंद्रियोंको वश करि सकोगे ये इंद्री पुरुषकी परम श
त्रुहै शत्रुको जय करने विना बडी हानिहै यह इसका
भावार्थहै ६८ ॥

दोहा

तातें जेहि अर्जुन सभसें वशकरलीन इंद्रिय इंद्रिय विष
यसें ताकी मति आसीन ६८॥

यानिशासर्वभूतानां तस्यांजागर्तिसंयमी ।
यस्यांजाग्रतिभूतानि सानिशापश्यतोमुनेः ॥६९॥

शांकरभाष्यटी॰

योयंलौकिकोवैदिकश्चव्यवहारः सउत्पन्नविवेकज्ञानस्यस्थि
तप्रज्ञस्याविद्याकार्यत्वात्विद्यानिवृत्तौ निवर्ततेः विद्यायाश्च ।
अविद्याविरोधान्निवृत्तिरित्येतमर्थं स्फुटीकुर्वन्नाह यानिशेति
यानिशारात्रिः सर्वपदार्थानामविवेककरी तमःस्वभावत्वा॰
त् निशासर्वेषांभूतानांसर्वभूतानां किं तत्परमार्थतत्वं स्थितप्र
ज्ञस्य विषयोयथानक्तंचराणामहरेव सदन्येषांनिशाभवति
तद्वन्नक्तंचरस्थानीयानां अज्ञानिनां सर्वभूतानां निशेव नि
शा परमार्थतत्वागोचरत्वादतद्बुद्धीनां तस्यां परमार्थतत्वल
क्षणायां अज्ञाननिद्रायाः प्रबुद्धोजागर्तिसंयमी संयमवान्
जितेन्द्रियोयोगीत्यर्थः यस्यां ग्राह्यग्राहकभेदलक्षणायामः
विद्यानिद्रायां प्रसुप्तान्येवभूतानि जाग्रतीत्युच्यन्ते यस्यांनि॰
शायां प्रसुप्ताइव स्वप्नदृशः सानिशा अविद्यारूपत्वात्परमा
र्थतत्वं पश्यतोमुनेरतः कर्माण्यविद्यावस्थायामेवचोद्यन्ते
नविद्यावस्थायां विद्यायांहि सत्यामुदितेसवितरिशार्वरमिव
तमः प्रणाशमुपगच्छत्यविद्या प्राग्विद्योत्पत्तेरविद्याप्रमाण॰
बुद्ध्यागृह्यमाणाक्रियाकारकफलभेदरूपासती सर्वकर्महे॰
तुत्वं प्रतिपद्यते नाप्रमाणबुद्ध्या गृह्यमाणायाः कर्महेतुत्वो
पपत्तिः प्रमाणभूतेन वेदेन ममचोदितंकर्तव्यं कर्मेतिहि
कर्मणि कर्ता प्रवर्तते नाविद्यामात्रमिदंसर्वंनिशेवेति यस्य
तु पुनर्निशेवाविद्यमात्रमिदंसर्वंभेदजातमितिज्ञानं तस्यात्म
ज्ञस्य सर्वकर्मसंन्यासएवाधिकारो नप्रवृत्तौ तथाच दर्शयि
ष्यति तद्बुद्धयस्तदात्मानइत्यादिना ज्ञाननिष्ठायामेव त

गी.
टी.
द्वि.

स्याधिकारः तत्रापि प्रवर्तकप्रमाणाभावे प्रवृत्तेरनुपपत्तिरिति
चेन्न स्वात्मविषयत्वादात्मविज्ञानस्य न ह्यात्मनः स्वात्मनि प्रवर्तक
प्रमाणापेक्षता आत्मत्वादेव तदन्तत्वाच्च सर्वप्रमाणानां प्रमा-
णत्वस्य न ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहा-
रः संभवति प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्त्यं प्रमाणं निवर्तयद्
देवाप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे लोके च
वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य तस्मात् नात्म
विदः कर्मण्यधिकार इति सिद्धं ६९ ॥

आनंदगिरिकृतटीका

आत्मविदः स्थितप्रज्ञस्य सर्वकर्मपरित्यागेऽधिकारस्तद्विपरी-
तस्याज्ञस्य कर्मणीत्येतस्मिन्नर्थे समनन्तरश्लोकमवतारयति
योयमिति अविद्यानिवृत्तौ सर्वकर्मनिवृत्तिश्च तन्निवृत्तिरेव
कथमित्याशंक्याह अविद्यायाश्चेति स्फुटीकृतं च बाह्याभ्यंतर
करणानां पराक्प्रत्यक्प्रवृत्तिवत्तथाविधे दर्शने च मिथो वि
रुध्यते पराग्दर्शनस्यानाद्यात्मावरणाविद्याकार्यत्वादात्मदर्श
नस्य च तन्निवर्तकत्वात् तत आत्मदर्शनार्थमिंद्रियाण्यर्थेभ्यो
निगृह्णीयादित्याहेति योजना सर्वप्राणिनां निशा पदार्थाविः
वेककरीत्यत्र हेतुमाह तमःस्वभावत्वादिति सर्वप्राणिसाः
धारणीं प्रसिद्धां निशां दर्शयित्वा तामेव प्रकृतानुगुणत्वेन प्र
श्नपूर्वकं विघटयति किं तदित्यादिना स्थितप्रज्ञविषयस्य प
रमार्थतत्वस्य प्रकाशैकस्वभावस्य कथमज्ञानं प्रति निशात्व
मित्याशंक्याह यथेति तत्र हेतुमाह अगोचरत्वादिति अत
द्बुद्धीनां परमार्थतत्वातिरिक्ते द्वैतप्रपंचे प्रवृत्तबुद्धीनामप्रति
पन्नत्वात्परमार्थतत्वं निशेवाविद्यमानमित्यर्थः तस्यामित्यादि
व्याचष्टे तस्यामिति निशावद्भूतायामवस्थायामिति यावत्
योगीति ज्ञानी कथ्यते द्वितीयार्द्धं विभजते यस्यामिति प्रवृः

ष्मानो जागरणं विरुद्धमित्याशंक्याह प्रसुप्ताइवेति परमा॰
ति४ र्थतत्त्वमनुभवन्तीनिवृत्ताविद्यस्य संन्यासिनो द्वैतावस्थानिशे
त्यत्र हेतुमाह अविद्यारूपत्वादिति परमार्थावस्थानिशेत्य
विद्वांसो विदुषान्तु द्वैतावस्थातथेति स्थितेफलितमाह अत
इति अविद्यावस्थायामेव क्रियाकारकफलभेदप्रतिभानादि
त्यर्थः विद्योदयेपि तत्प्रतिभानाविशेषात् पूर्वमिव कर्मा
णि विधीयेरन्नित्याशंक्याह विद्यायामिति अविद्यानिवृत्तौ
बाधितानुवृत्त्या विभागमानेपि नास्तिकर्मविधिर्विभागा
भिनिवेशाभावादित्यर्थः अविद्यावस्थायामेवकर्मणीत्युक्तं
व्यक्तीकरोति प्रागिति विद्योदयात्पूर्वं बाधकाभावाद
बाधिताविद्या क्रियादिभेदमापाद्य प्रमाणरूपयाऽज्ञाय
स्नातोऽप्य कर्महेतुर्भवति क्रियादिभेदाभिमानस्य तद्धे॰
त्वादित्यर्थः नविद्यावस्थायामित्युक्तं प्रपंचयति नाप्रमा॰
णेति उत्पन्नायांच विद्यायां अविद्यायाः निवृत्तत्वात् क्रिया
दिभेदभानमप्रमाणमिति बुद्धिरुत्पद्यते तयाऽप्रमाणाय
द्योक्तविभागभागिन्यप्यविद्या नकर्महेतुत्वं प्रतिपद्यते बा॰
४ यितत्वेनाभासतया तद्धेतुत्वायोगादित्यर्थः विद्याविद्यावि
भागेनोक्तमेव विशेषं विवृणोति प्रमाणभूतेनेति यथोक्ते
नवेदेन कामनाजीवनादिमतो ममकर्मविहितं तेनमया
तत्कर्तव्यमिति मन्वानःसनूकर्मण्येवाधिक्रियते तंप्रतिमा
धनविशेषवारिणोवेदस्य प्रवर्तकत्वादित्यर्थः सर्वमेवेदम
विद्यामात्रं द्वैतं निस्सेवति मन्वानस्तु नप्रवर्तते कर्मणीति
व्यावर्त्यमाह नाविद्येति विदुषोनकर्मण्यधिकारश्चेत्तस्याः
धिकारस्तर्हि कुत्रेत्याशंक्याह यस्येति तस्य आत्मज्ञस्यफल
हृतसंन्यासाधिकारे वाक्यशेषं प्रमाणयति तथाचेति प्र
वनेकं प्रमाणं विधिलक्षणभावेकर्मस्विवविदुषोज्ञाननिष्ठाया

मपि प्रवृत्तेरनुपपत्तेरात्मज्ञानवतोऽपि विधिरिति शं
कते तत्रापीति किमात्मज्ञाने विधिमपेक्षते किंवाम्नायः
तस्य स्वरूपविषयस्य यथाप्रमाणप्रमेयस्तुत्यत्वेर्विध्यनपेक्ष
त्वादित्याह न स्वात्मेति न द्वितीय इत्याह नहीति प्रवर्तक
प्रमाणशाहितस्य विधेः साध्यविषयत्वादात्मनश्चासाध्यत्वादि
तिहेतुमाह आत्मत्वादेवेति आत्मतज्ज्ञानयोर्विध्यनपेक्षत्वेपि
ज्ञानिनो मानमेयव्यवहारे प्रतिनियमार्थो विध्यपेक्षास्यादि
त्याशंक्याह तदन्तत्वाच्चेति सर्वेषां प्रमाणानां प्रामाण्यस्यात्म
ज्ञानोदयावसानत्वात्तस्मिन्नुत्पन्ने व्यवहारस्य निरवकाशत्वा
न्न तत्प्रतिनियमाय ज्ञानिनो विधिरित्यर्थः उक्तमेव व्यक्ती
करोति नहीति धर्माधिगमवदात्माधिगमेपि किमिति य
थोक्तो व्यवहारो न भवतीत्याशंक्याह प्रमातृत्वं हीति तन्नि
वृत्तौ कथमद्वैतज्ञानस्य प्रमाणमित्याशंक्याह निवर्तयदे
वेति निवर्तयद्द्वैतज्ञाने स्वयं निवृत्तेर्न प्रमाणमित्यत्र दृ
ष्टान्तमाह स्वप्नेति आत्मज्ञानस्य विध्यनपेक्षत्वे हेत्वन्तरमा
ह लोकेचेति व्यवहारभूमौ हि प्रमाणस्य वस्तुनिश्चयफ
लपर्यन्तत्वे सति प्रवर्तकविधिसापेक्षत्वानुपलंभाद्द्वैतज्ञा
नमपि प्रमाणत्वान्न विधिमपेक्षते रज्ज्वादिज्ञानवदित्यर्थः
आत्मज्ञानवतस्तन्निष्ठाविधिमन्तरेण ज्ञानमाहात्म्येनैव सि
द्धत्वात्तस्य कर्मसंन्यासेधिकारो न कर्मणीत्युपसंहरति न
स्यादिति ६९ ॥

स्वामिकृतटीका ॥

ननु च न कश्चिदपि प्रसुप्त इव दर्शनादिव्यापारशून्यः सर्वात्म
नानिगृहीतेंद्रियो लोके दृश्यते अतो संभावितमिदं लक्षणमि
त्याशंक्याह या निशेति सर्वेषां भूतानां या निशा निशेव निशा
आत्मनिष्ठा आत्माज्ञानधीताहतमतीनां तस्यां दर्शनादिकं व्य

वहाराभावात् तस्यामात्मनिष्ठायां संयमी निगृहीतेंद्रियो जा
गर्ति प्रतिबुध्यते यस्यां तु विषयनिष्ठायां भूतानि जाग्रति प्रतिबु
ध्यंते सा आत्मा तत्वं पश्यतो मुनेः निशा तस्यां दर्शनादिव्यापारस्त
स्य नास्तीत्यर्थः एतदुक्तं भवति यथा दिवांधानामुलूकादीनां
रात्रावेव दर्शनं न तु दिवसे एवं ब्रह्मज्ञस्योन्मीलितात्मस्यापि ब्रह्म
णिवदृष्टिर्न तु विषयेषु प्रवृत्तो नासंभावितमिदं लक्षणमिति ॥६९॥

पिशाचभाष्यं टी.

या निशा रात्रिः सर्वपदार्थानामविवेककारणी सर्वभूतानां नि
शेति सर्वप्राणिव्यवहारागोचरब्रह्मरूपमुच्यते तस्यां जाग
र्ति प्रबुद्धवानात्मे यस्यां सर्वभूतानि जाग्रति प्रबुध्यंते यस्यां व्य
वहरंति सा अविद्या निशा परमार्थस्वरूपं ब्रह्म पश्यतो मुनेर्यो
गिनः ॥६९॥

रामानुजभाष्यं टी.

एवं नियतेंद्रियस्य प्रसन्नमनसः सिद्धिमाह या आत्मविषया
बुद्धिः सर्वभूतानां निशा निशेवाप्रकाशिका तस्यामात्म
विषयायां बुद्धाविंद्रियसंयमी प्रसन्नमना जागर्ति आत्मानम
वलोकयन्नास्त इत्यर्थः यस्यां शब्दादिविषयायां बुद्धौ सर्वा
णि भूतानि जाग्रति प्रबुद्धानि भवंति सा शब्दादिविषया बुद्धिरा
त्मानं पश्यतो मुनेर्निशेवाप्रकाशिका भवति ॥६९॥

अभिनवगुप्तकृतटीका

योगी च सर्वव्यवहारान्कुर्वाणोपि लोकोत्तर इति निरूपयता
परमेश्वरेण संक्षिप्यात्मस्वरूपं कथ्यते या सर्वेषां भूतानां
निशा मोहिनी माया तस्यां तु निजागर्ति कथं इयं हेयेति य
स्यां च दशायां लोको जागर्ति नानाविधां चेष्टां कुरुते सा मुने
रात्रिः यतोसौ व्यवहारं प्रतिबुद्धः एतदुक्तं भवति येयं मा
यावत्तु तस्या मोहकालं नामरूपं स्ववितंत्रताभासनं च तत्र

लोकः प्राप्तोस्वरूपमस्यात्रपरामृष्टेष्वद्वितीयस्मिंरूपेनिब
द्धस्तिराले योगीतुतद्विपरीतः तदीयंमोहकत्वंतदुक्त
लनायपश्यतिस्वत्वेतत्रतेनातुनाद्रियेत पश्यन्सम्यग्ज्ञानी
मिथ्याज्ञानेोपथातास्वस्वत्वेतत्रतानादरः पश्यतएवसारात्रि
रितिचित्रं विद्यायांचावयंतेयोगी यत्र सर्वोविमूढः अविद्यायांतुतुष्टो यत्र जनः
प्रबुद्ध इत्यपिचित्रम् ६९

परमार्थप्रपा टी.

अथविमय पराहृतेंद्रियस्यस्थितिमाह यानिशेति सर्वा
णिभूतान्यात्मानेनजानंतिअतआत्मविषयकाज्ञानरूपा ते
षांभूतानांरात्रिः यथोलूकानांदिनमेवरात्रिः एवंतस्यारा
त्रौसंयमीपराहृतेंद्रियोयोगीजागर्तिउद्बुद्धोभवतितथा
तस्यांजाग्रद्दृश्यायांभूतानिजाग्रतिस्वव्यवहारंकुर्वंतिसापश्य
तआत्मदृष्टेर्मननशीलस्यनिशाभवति तत्रत्यव्यवहा
राभावात् तदुक्तं आत्मानंहृदिस्फुरंतंसर्वशरीरभाजांतेषां
निशाभवतिसाखलु तत्रसो यो जागर्तिजाग्रतिचते
व्यवहारजातेतत्रसुरत्नरूपधियःसादासमातइति एवंस
कलेंद्रियपराहृतत्वमेवास्थितप्रज्ञत्वमित्यर्थः यद्वासर्वभू
तानांसर्वदेहिनांयासकलेंद्रियोपरमरूपानिशासुषुप्तिः
तत्रात्माकारांतःकरणवर्त्तीसत्यामपिआत्मानंनविदंति अ
थतस्यांतुर्यावस्थायांपरिणतायांसंयमीआत्मनिष्ठःउमात्तु
जागर्तिआत्मात्रस्वबोधानुभववान्भवति दैवंस्येतन्मिथुनेनप
रमोक्षेषआनंदसाम्याद्देवंवित्स्वप्यालोकयेत् तएवतदेवते
मिथुनेनप्रियेणयथाआसमंद्वयतीतिश्रुतेः याशिष्टेपि निद्रा
दौजागरणास्यांतेयोभावउपपद्यते तंभावंभावयन्साक्षाद
हृदयानंदमश्नुतेइति अथयस्यांजाग्रदवस्थायांभूतानिजाग्र
तिस्वव्यापारंकुर्वंतिसाव्यवहारमपश्यतआत्मदृष्टेःउपरस्य
निशारूपमपंचास्फुरणात् ६९ ॥

वनमाली टी.

एवं मुमुक्षुणा प्रयत्नेनेंद्रियनिग्रहः कर्तव्यः ज्ञानिनस्तु स्वाभावि
क इत्याह या निशेति अज्ञानां सर्वभूतानां या भगवद्विषयका स्थिरप्र
ज्ञा निशेव निशा यस्यामज्ञाँतिगाढनिद्रायामिव शेरते संयमी
जितचित्तेंद्रियः जागर्ति सम्यगपरोक्षेण परमेश्वरं पश्यतीत्यर्थः
यस्यां विषयभोगरूपायां ज्ञान्यपेक्षया निशायां भूतानि परमेश्व
रविमुखानि जाग्रति मुनेः परमेश्वरमननशीलस्य निशा तस्यां
स निद्रातीत्यर्थः यथा काकस्य रात्र्यंधस्य दिनमुलूकस्य दिवां
धस्य निशा रात्रौ पश्यतश्चोलूकस्य हि न रात्रिर्दिवसा काकस्य त
थाज्ञाज्ञयोः ६९ ॥

वैजयन्ती टी.

उक्तमेवं
नत्विंद्रियाणामिंद्रियार्थेभ्यः संयमनं कृत्वापि योगी तदनंतरं किं
फलमाप्नोतीत्यपेक्षायां तस्यात्मदर्शनरूपं विकाशस्य विषयिणीं
बुद्धिं स्वीनीमाह यानिशेत्यादिभिस्त्रिभिः या निशेति सर्वभूतानां
सर्वेषां सर्वेश्वरेश्वराद्भगवतो मत्तः सकाशादितरान् देवानन्यस्त
मत्वेन मन्यमानानां जीवेश्वरयोः स्वरूपायाथार्थ्यज्ञानेन तया
भेदमज्ञानकल्पितमिति वदतां शास्त्राचार्यादिकं सर्वं जगन्मि
थ्येति प्रजल्पतां परिछिन्नबाह्यानां भूतानां नित्यबद्धजीवानां या
निशा क्रूरभ्रांत्युक्तातिमहान्धकारवती निवृत्तेषां स्वप
रस्वरूपाप्रकाशिका अन्यदेवभावसाधनादिशून्याः निमित्तभग
वद्भक्तिविशिष्टाश्च वा स्यदिति लक्षणात्मदर्शनरूपविकाशपरमात्म
विषयिणी या बुद्धिः सैव निशा तु च्यते तस्यां हरिविमुखजनमोह
कामिणां क्रूरस्य विषयिणो बुद्धेः संयमी शीघ्रं स्वर्गादिरूपशाखा
रिविषयपदेभ्यो विविधिषु शिवेंद्रादिदेवेभ्यः सकाशात् बाह्यानं
प्करणरूत्तीनां भगवत्स्वरूपविग्रहगुणशक्तिलीलादिशुवि
षयेषु संयमः सम्यगुपरमो यस्य भीविष्यते यस्य तथाभूतः विश्वन
परमेश्वरेण सह स्वाभाविकभिन्नाभिन्न
न्यभक्तः जागर्ति स

गी॰
टी॰
द्वि॰

रूपत्वेपश्यन्नतद्विनोविनिद्रः संतिष्ठतिसंयमीत्येकवचनेनैवं
भूतस्यहरिभक्तस्यातिदुर्लभत्वंदर्शितं यस्यांकस्मिंनत्रानेकामरभ
क्तिमत्स्यांभगवदनन्यरतिविरहितजनानन्दकारिण्यां प्रयत्यार्थे
नात्मपरमात्मतत्वविषयिण्यामनिश्चिततत्वत्रयायांबुद्धौभू
तानिकस्मभक्तिविरहितानिभूतपत्याप्रमर[illegible]णाश्रद्धावति
जाग्रतिकर्तुरादिरजनीचरवद्धिनिद्राणिसंतिष्ठंतिसाबुद्धिः
आत्मानात्मपरमात्मस्वरूपंयाथात्म्येनपश्यतःमुनेर्भगवत्स्व
रूपगुणलीलादिमाहात्म्यावगंतुस्तत्स्वरूपगुणादिमनन
स्वभावस्यवाहकस्यैकनिष्ठस्यसंयमिनःनिशानिरतिशयाति
निविडजलदवृन्दसंघटितामावास्याविशिष्टातिशयान्धकार
वतीतमिस्रेवाप्रकाशिकाभवति संयमीनिरूपितलक्षणमा
त्मदर्शनपूर्विकांभगवत्प्राप्त्युपायभूतांकेवलांकस्यविषयिणीं
बुद्धिविनान्यांसंसारप्रापिकांप्रहृतिलक्षणांनानादेवविषयि
णींबुद्धिनजानातीत्यभिप्रायः ६९ ॥

+ स्थितप्रज्ञस्यतत्वतःसिद्धएवसर्वेन्द्रियसं मधुसूदनी टी॰ ॥ यमइत्याह +

+ यावेदांतवाक्यजनितसाक्षात्काररूपाहंब्रह्मास्मीतिप्रज्ञा स
मतानां र्वभूतानांनिशेवनिशातान्प्रत्यप्रकाशरूपत्वात् तस्यांब्रह्म
विद्याख्यांलक्षणायांसर्वभूतनिशायांजागर्तिप्रज्ञाननिद्रायाः
प्रबुद्धःसन्सावधानोवर्तते संयमीइंद्रियसंयमवान् स्थितप्र
बुद्धेः ज्ञइत्यर्थः यस्यांद्वैतदर्शनलक्षणायामविद्यानिद्रायांप्रसु
प्तान्येवभूतानिजाग्रतिस्वप्नवत् व्यवहरंतिसानिशानप्रका
शते आत्मतत्वंपश्यतोपरोक्षतयामुनेःस्थितप्रज्ञस्य यावद्धि
नप्रबुध्यते तावदेवस्वप्नदर्शनंबाधपर्यंतत्वाद्भ्रमस्य नत्वबो
धकालेतत्प्रभ्रमनिमित्तःकश्चिद्व्यवहारः तदुक्तंवार्तिकका
रैःकारकव्यवहारेहिशुद्धंवस्तुनवीक्ष्यते शुद्धेवस्तुनिसिद्धे
चकारकव्याप्तंरूपंविरितितितथाच यस्यविपरीतदर्शनंतस्यन
वस्तुदर्शनंविपरीतदर्शनस्यावस्तुदर्शनंजन्यतानि यस्यच

तिस्तथा कालूकनिशावायंसंसारोज्ञात्मवेदिनः यानिशासर्वभूतानामित्य
वादवचस्वयं ×

वस्तुदर्शनेनतस्यनविपरीतदर्शनं विपरीतदर्शनकारेस्य वस्तु
दर्शनेनबाधितत्वात् तथाचश्रुतिः यत्रवान्यदिवस्यात्त
त्रान्योन्यत्पश्येत् यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदि
तिविद्याविद्ययोर्व्यवस्थामाह यथाकाकस्यरात्र्यंधस्यदिनमु
लूकस्यदिवांधस्यनिशारात्रौपश्यतश्चोलूकस्ययद्दिनंरात्रि
रेवसाकाकस्येतिमहदाश्चर्यमेतत् एतत्तत्त्वदर्शिनःकथ
माविषयकाक्रियाकारकादिव्यवहारःस्यादितिस्वतःसिद्धए
वनस्येंद्रियसंयमइत्यर्थः [illegible] ६९ ॥

सदानंदी टीका ॥

एवंस्थितप्रज्ञस्यसैर्यार्थेंद्रियसंयमः कार्यःप्रयत्नतःशा
स्त्राचार्याभ्यामुपदेशतः १ उत्पन्नेतत्वविज्ञानेक्षीणेऽज्ञानेसकार्ये
के इंद्रियाणांसंविनानांस्वतःसिद्धोस्तिसंयमः २ इत्याहभ
गवान्विसृष्टब्रह्मनिष्ठाप्रदर्शनात् वेदांतवाक्यजाप्रज्ञाहंब्रह्मा
स्मीतियाहृढा ३ प्रज्ञान्यस्यप्रकाशत्वादज्ञानोरजनीवया
ब्रह्मविद्यास्वरूपिण्यांतस्यांजागर्तिसंयमी ४ जितेंद्रियोजि
तमनाःस्थितप्रज्ञउदारधीः प्रबुद्धोऽज्ञाननिद्रांतःसावधान
सवर्तते ५ ग्राह्यग्राहकरूपायानिशाविद्यातमोमयी प्रह
सात्मैवभूतानियस्यांव्यवहरंतिवै ६ स्वप्नवत्सानिशातस्य
ब्रह्मनत्वंप्रपश्यतः स्थितप्रज्ञस्यविदुषोभेददृग्वावभास
ते ७ प्रबुध्यतेनयावद्धितावत्स्वप्नस्यदर्शनं प्रबुद्धस्यपुनः
स्वप्नोबाधितोभ्रमकालिकः ८ बाधपर्यंततातद्दृष्टासकार्यं
साभ्रमस्यच साक्षात्कृतेपरेतत्वेनभ्रमोनचतत्कृतिः ९ सम्
लभ्रांतिबाधाच्चतदुक्तंवार्तिकेस्फुटं कारकव्यवहारेहिशु
द्धंवस्तुनवीक्ष्यते १० शुद्धेवस्तुनिसिद्धेवकारकव्यापृतिस्तथा।
या काकोलूकनिशावायंसंसारोज्ञात्मवेदिनोः ११ यानिशा

गी॰
टी॰
द्वि॰

सर्वभूतानामित्यवोचत्त्वयेहरिः विपरीतदृशोनास्तिसम्य
ग्वस्तुनिरीक्षणं १२ वस्त्वदर्शनजायस्माद्विपरीतादृगेवसा
सम्यग्वस्तुदृशोनास्तिविपर्ययनिरीक्षणं १३ सम्यग्दृशावा
धितत्वात्समूलस्यभ्रमस्यहि उलूकस्यदिवांधस्ययथाकाक
दिनेनिशा १४ रात्र्यंधस्यचकाकस्ययथोलूकदिनेनिशा
तथाज्ञस्यनिशावस्तुनिष्ठाब्रह्मविदोमुनेः १५ तथाब्रह्मवि
दोमूढनिष्ठारात्रिर्विवादिना सततत्वदृशोनास्तिक्रियाका
रकलक्षणः १६ व्यवहारोस्यसिद्धांतःसर्वितेंद्रियसंयमः
वित्तस्यस्यात्मनिष्ठत्वादेषणात्रययमुज्झतः तस्याप्यनिष्ठुतो
त्थानमर्थायातेप्रवर्तते इत्युक्तंश्रीवसिष्ठेनरघुनाथंप्रतिस्फु
टम् १७ ॥

नीलकंठी टी॰ ।

यदापंचावतिष्ठंतइत्युदाहृतश्रुतेस्तामाहुःपरमांगतिमि
त्येतच्चतुर्थपादेव्याचष्टे यानिशेति सर्वेषांभूतानामज्ञाने
यानिशेवनिशायस्यामंधादिनेउलूकाइवानथाप्रण्यथाप्र
वसर्वेप्राणिनोभवंतितस्यांतस्मिन्प्रत्यग्ज्योतिषिसंयमीइं
द्रियमनोबुद्धीनांनिग्रहणशीलोयोगीजागर्तिइंद्रियादी
नांदृकशक्तिलोपोपिप्रत्युपरतदृकशक्तिरेवास्ते तथाच
श्रुतिः नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वादिति
यस्यामविद्याख्यायांनिशायांक्रियाकारकादिद्वैतस्वप्नप्रव
र्तिकायांसर्वाणिभूतानिजाग्रतिनिशीथेउलूकाइवस्वप्नस्था
पोरप्रवर्तते साप्रविद्यापश्यतोमुनेःआत्मदर्शनवतोयो
गिनःप्रारब्धकर्मणाविदेहकैवल्यप्रतिबंधात्लेशतोनुव
र्तमानात्सुत्थानकालेव्यवहरतोस्यगाढांधकारवतीनिश्रा
वक्लेशकरीभवति प्रतिसक्रमाराद्धियोगिनःवायव्यवहा
रादिजेनेनराइवगाढांधकारसंचारात् यथोक्तंयोगभा

षे प्रतिमात्रकल्पो हि विद्वानत्यल्पदुःखलेशेनाप्युद्विजते
इति प्रत्यवार्तिकानि कारकव्यवहारे हि शुद्धं वस्तु न वीक्ष्य
ते शुद्धे वस्तुनि सिद्धे च कारकव्याप्टतिस्तथा काकोलूक
निशेवायं संसारोऽज्ञात्मवेदिनोः या निशा सर्वभूतानामि
त्यवोचत्स्वयं हरिरिति बुद्धतत्त्वस्य लोकोऽयं जडोन्मत्तपिशा
चवत् बुद्धतत्त्वोऽपि लोकस्य जडोन्मत्तपिशाचवदिति तद्वे
वं किमासीतेत्यस्योत्तरं यदा संहरते चायमित्यादिना एतद
तेन ग्रंथेन स्थितप्रज्ञः सदा समाधिमनुतिष्ठन्नुपरमां गतिं प्रा
प्नोतीत्युक्तं ६९ ॥ आनंदी टीका। सर्वभूतानामन
स्थितप्रज्ञस्य योगेन जगद्विलक्षणत्वमाह ... निशास्ति संचारादिविष
वास्थितबुद्धीनां या विद्या तत्त्वज्ञानात्मिका तस्यां विद्यायामेवम
योनात्मिस्मृत्याय तस्यां विद्यायां न प्रविचरन्ति स्थितप्रज्ञो जागर्ति
वेभूतनिशायां संयमी ... विद्यायां संसारव्यवहारहेतो भूमानि
विगतमोहनिद्रो यस्यामविद्यायां तत्कर्मकरणप्रबुद्ध
मूढाः जाग्रति सुखदुःखादिकामनया सेयमविद्यात्मिका रात्रिः संचा
यः विनिद्रतां सावधानतामनुभवति स्थितप्रज्ञस्य रात्रिः
पश्यतः परमार्थतत्त्वमालोकयतः मुनेः स्थितप्रज्ञस्यालोचनेन
रास्याविषयः सर्वमिदं विस्तरेणाभिनवगुप्तपादैः व्याख्यातं तथा च मो
क्षोन्नरसंक्रमितवाच्यस्याप्युदाहरणं या निशा सर्वभूतानामित्यादि संसा
लोपायेऽपि ६९ ॥ रामकंठी टीका

या निशा सर्वभूतानामविद्यात्मकत्वात्मिका परोक्षार्थः परा शान्तिस्तस्यां जागर्ति संयमी स्थितः यस्मिंज्जाग्रति भूतानि हि ... तदा यांति तस्यां जागर्ति संसारे ... इत्यर्थः

सर्ववस्तुप्रकाशाकस्वरूपप्रकाशनिरूपणाह पाहतिरेवेह संसा
रिणः प्रतिनिशा शब्देनोक्ता तद्विषयत्वेन हि सर्वभूतान्यनुमिधि
तद्गृह्यास्तिकृत्वा प्रसुप्तानीति हृष्टानि एवं विद्याया सर्वभूतानां निशात
स्यां तद्विषये संयमी यथोक्तप्रकारेण निगृहीतसर्वेन्द्रियः प्रबुद्धो
जागर्ति प्रत्यक्स्वात्मस्वभावनिर्मलविज्ञानमयविलोचनविभा
समानां तामेवाविकुंचनाविगतमोहनिद्रात्मे यस्यां तु प्रतिक्षण
विनश्वरसुखदुःखमाथनभूतविषययग्रहणोत्संगमामात्रव्यग्रसम
ग्रेन्द्रियग्रामायां संसारव्यवहारे ये सर्वभूतानि समस्तप्राणभूतो

गी.
टी.
द्वि.

जाग्रति तावन्मायावहितत्वात् विनिद्रितामिवानुभवंति
मानाहृशीहृतिः पश्यतः सदसत्पदार्थसार्थं परमार्थमालोक
यतो मुनेः संयमिनः प्रबुद्धस्य रात्रिर्निशा तां प्रतितस्य निरवधा
धानत्वात् [illegible]
[illegible]
[illegible]
[illegible]
[illegible] १९ ॥

सर्वेषां भूतानामात्मज्ञानधीनाहं तमतीना

भासकी [illegible] टीका

प्रतः संसारिजनस्य विलक्षणं प्रबुद्धस्य वृत्तिमाह येति । याह
नि आत्मनिष्ठारूपा निशेव निशा स्फुटार्थप्रकाशिका परमार्थ
भूतायामवृत्तायाविद्यमानायां ह्वादिषु निमग्नतया तेषाम्
स्फुटत्वेन भासनात् तस्यां संयमी उक्तविषयान्निगृहीतेंद्रियः
प्रबुद्धो जागर्ति स्फुटं परमार्थं पश्यति यस्यां रूढो विषयनिष्ठा
रूपायां निशायां भूतानि जाग्रति स्फुटमर्थान् पश्यति सा मुने म
ननशीलस्यात्मनि समाहितस्य पश्यतो दर्शनादिव्यापारकुर्व
त एव निशा स्फुटतया विषयावभासनात् यथा मधुपानेन क्षी
वस्य ॥ १९ ॥ तदुक्तं मोहाप्रायश्च रतमुत्तनयाविष्टस्वहितहानिपरोपिसन् परिक्लांततया विनि
निद्रालुरिवलक्ष्यते इति ॥

पंचोलीटीका

योऽयं लौकिको व्यवहारः स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य
अविद्याकार्यत्वादविद्यानिवृत्तौ निवर्त्तते अविद्यायाश्च विद्यावि
रोध्यान्निवृत्तिः इत्येतमर्थं स्फुटीकुर्वन्नाह तथा च विद्याविद्ययोः विरो
धात्तद्विषययोर्भिन्नविषयत्वमाह यानिशेति सर्वभूतानां यस्मिन् प
रमार्थतत्त्वे मोहमयी सर्वपदार्थानां अविवेककरी तमः स्वभावा नि
शा तस्यां तस्मिन् परमार्थतत्त्वे संयमी जागर्ति यस्यां अविद्यालक्ष
णायां निशायां भूतानि जाग्रति परमार्थतत्त्वं पश्यतो मुनेः सा निशा

९९

रणवीरसमिद्बोधिनी ॥

कर्मयोगी च सर्वव्यवहारानुकारी अपि लोको नर इति निरूपयता
परमेश्वरेण मतिख्यास्य स्वरूपं कथ्यते यानिशेति सर्वेषां भूतानां

भूताविष्टामामिव निश्चयाभावाद्दोलायमानानामकर्मयोगिनां
यानिषण निषेवमोहिनो ग्रयंगुरुरयं पिता यं पितामहो यं भ्राता
यं प्रतो यं रक्षत्व कं तव्य यतान्हत्वामुष्मिन्पापकर्मकारितया
निरयभाजनं कृत्वैनान्विनाशनमप्यस्थितेर्जिजीविषाभावाद्वा
त्यंतल्केषपापं स्यामेत्यादिरूपाऽऽहिरण्विधीयमानमनोवृत्ति
प्रारभ्यमाणस्ववर्णाश्रमाचारोचितकर्मणः सकाशान्निवृत्तिनि
मित्तीभावसाधर्म्यात् प्रारभ्यमाणस्वधर्माचरणविषयप्रवृत्ति
स्मारणेनेतरानुभवजनकत्वात्कषमलोऽसादनसाधर्म्याद्वा निषण
यामपिहिलोको दिनव्यवहारान्सत्यभूतान्विष्टत्यतिष्ठपरवशा
भावात्स्वामिकेव्यवहारमनुभवति तस्यां मनोवृत्तौ संयमी संस्म
गच्छति नियच्छति षणु विष्टहणाति दंडयतीति संयमी यद्वा तु निग्र
ह्यायतः कर्मयोगी जागर्ति स्वधर्माचरणोद्युक्तो निश्चयत्वेनकषमल
परवशत्वाभावात्ततो निवृत्तेः यस्यां पुनर्वृत्तौ स्वधर्मभूतशुद्धादिन्याग
पूर्वं परधर्मभूतमभिन्नाचरणाय प्रभितिवेषरूपायांलोकोजागर्ति
विविधं संकल्पते सावृत्तिरसुनेर्जीषमनास्थितस्यव्यवहारतत्परस्य
तियावत् निषेव निषण स्वामिकतल्याभासते मिथ्येवायं गर्वादि
हननिमित्तकं किल्विषं भ्रम इति यद्वा तत्र वृत्तौ मनसः प्रवेशा
दानात् यतः षषयतः संमुखायातानुवादीन्हननतोषतान्यषयतः
यद्वा षषयतः स्वधर्माचरणे धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न वि
यते अत्यारम्भ लभं तेषु हमीदृशमित्यंतेन ग्रंथेन प्रतिपादितमास्य
त्रिकं षषोमनं फलं तदनाचरणेच ग्रंथचेतनमिमं धर्म्यमिमारम्भ
ततोऽतः स्वतंत्रं किमित्यंतेन ग्रंथेन प्रतिपादितमैहिकामुष्मिके
मयानिषेवजयेपराजयेवासति हतोवेतिपयोक्तामुभयलोकेपि
स्वामीष्टसिद्धिं विवेचयतस्तिमिथ्यात्वाभासेदेहः षषयतषव
सारात्रितितिविवे तस्मादिंद्रियपरवशतयास्वधर्मानिवृत्तिरूपा
हृतिं विहाय तत्त्वहक्तिरूपांवृत्तिमातिष्ठल्लोकोत्तरः कर्मयोगीतित
मेवास्यस्थैर्यमिति सिद्धान्तसारार्थः ६९॥

मधुभाष्य

या निषेति या सर्वभूतानां निशा परमेश्वरस्वरूपलक्षणा य
स्यां तमभूतानीव न किंचिज्जानंति तस्यामिंद्रियसंयुक्तो जानी
जागर्ति सम्यगपरोक्षेणापश्यति परमात्मानमित्यर्थः यस्यां
विषयलक्षणायां भूतानि जाग्रति तस्यां निशायामिव सम्मः
पश्योनजानाति मत्तादिवत् गमनादिप्रवृत्तिः तदुक्तम् देहं
ततन्नवरमं देहोपि दैववशागत इति श्लोकाभ्यां मननयुक्तो मुनिः
पपपत आत्मस्यसाधनमाह तेन विषयानुभवप्रकारमाह ६९

भाषा अनुवाद

जो सन्देह करो कि निद्रागत कहे सोये मनुष्यके समान
देखना सुनना बोलना चलना या परस करना आदि इंद्रि
यों के व्यापार से रहित कहे इंद्रीजित तो कोईभी पुरुष इ
स संसारमे नही देख पडताहै तो स्थित प्रज्ञका लक्षण जो
कहा सो असंभव अर्थात् कोई भी स्थिर बुद्धि नहीहै इस ।
पर श्रीभगवान कहते है कि अज्ञान रूप अन्धकार से आ
च्छन्न कहे ढँपे सकल मनुष्यों को आत्मनिष्ठा कहे आत्मज्ञा
न तत्वज्ञान रूप विषयमे दर्शन आदि कोई व्यापार न रह
नेसे जन्तुवों को जो निशा कहे रात्रि अर्थात् दर्शनादि ।
व्यापार शून्य अवस्था तद्रूप आत्मनिष्ठा कहे तत्वज्ञान अव
स्था रात्रिहै जिसमे विषयी विचारों को कुछ नही सूझता
सोये पुरुषके समान शिथिल पडेहै कोई इंद्री भी कुछ
काममे नहीहै यही आत्मनिष्ठा रूप निशा सब जीवोंको
जानो इससे संयमी कहे इंद्रीजित जागतेहै अर्थात् त
त्वज्ञान का अनुभव करते और स्वस्वरूप को देखते आ
नन्द पावते है । और जो विषय निष्ठा कहे विषयोंका ।
ज्ञान जिसमे सब प्राणी जागते अर्थात् विषयी जन विष
यों मे बोधयुक्त हो दर्शनादि व्यापार करते स्वमकी ऐसी
स्वपनमे मगनहै सोई मुनि जो तत्वज्ञानीहै उनको रात्रि
तुल्यहै अर्थात् इस विषय मोह रूप रात्रिमे उनको कुछ
नही सूझता सोये नरके समान अचेतहै अर्थात् असम
हष्टिहै और विषय देखते नही सोई कहा कि जो निशा
सब भूतकहे प्राणियों की है उसमे मुनिजन जागते औ
र जो ज्ञानियों की रात्रि उसमे प्राणीसब जागते है जैसे
उल्लू आपतो ओव मगाडर छुछुन्दर आदि जीव और जो

वोंकी राति और इनका दिन है अपना सब व्यापार करते ख
सीसे झूमते रात भर तैसेही जानो ६९ ॥

दोहा

जो यह रात्रि सभ जीवकों ता म हि योगी जाग जा म हि जगत
जीव सभ मुनिको सो निशा भाग ६९॥

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशं
ति यद्वत् तद्वत्कामा यं प्रविशन्ति सर्वे स शा
न्तिमाप्नोति न कामकामी ७० ॥

शांकरभाष्य टी.

विदुषस्त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिर्नत्वसंन्या
सिनः कामकामिन इत्येतमर्थं दृष्टान्तेन प्रतिपादयिष्यन्ना
ह आपूर्येति आपूर्यमाणमद्भिरचलप्रतिष्ठं अचलतया प्र
तिष्ठा अवस्थितिर्यस्य तमचलप्रतिष्ठं समुद्रमापः सर्वतो गताः
नाः प्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तं यद्वत् तद्वत्का
मा विषयसन्निधावपि सर्वत इच्छाविशेषा यं मुनिं समुद्रमि
वापोऽविकुर्वन्तः प्रविशन्ति सर्वे आत्मन्येव प्रलीयन्ते न स्वा
त्मवशं कुर्वन्ति स शान्तिं मोक्षं प्राप्नोति नेतरः कामकामी का
म्यन्त इति कामाः विषयास्तान् कामयितुं शीलं यस्य स काम
कामी नैव प्राप्नोतीत्यर्थः ७० ॥

आनंदगिरिकृत टी.

ननु संन्यासिनामपि विद्यावतां विद्याफलस्य मोक्षस्य लब्धुं
शक्यत्वात् किमिति विदुषः संन्यासो नियम्यते तत्राह विदुष
इति आपातज्ञानवतो विवेकवैराग्यादिविशिष्टस्यैषणाभ्यः
सर्वाभ्योऽभ्युत्थितस्य श्रवणादिद्वारा समुत्पन्नसाक्षात्कारवतो
स्तथाविधस्य संन्यासिनो मोक्षो नान्यस्य विषयतृष्णापरिभूतस्य
इत्येतद् दृष्टान्तेन प्रतिपादयितुमिच्छन् रागद्वेषविमुक्तेरल
इति श्लोकोक्तमेवार्थं पुनराहेति योजना अद्भिः समुद्रस्य सम
न्तात् पूर्यमाणत्वेऽद्भिः क्रामवती नदीयाः स्थितिरापते हित्वा
शंकाह अचलेति नहि समुद्रस्योदकात्मके प्रतिनियतं ह
पे कदाचिद्विवर्द्धते ह्रसते वा तेन नदीयाः स्थितिरेकरूपैवे
त्यर्थः न तद्वदेवासेवापः समुद्रान्तर्गच्छन्ति नहि तस्यावि

गी० टी० हि०

क्रियावत्त्वादप्रतिष्ठा स्यादित्याशंक्याह स्वात्मस्थमिति इच्छाविशे
षाः विषयाणामसन्निधौ विदुषि निर्विकारे प्रविशन्तोपि सन्निधा
नेतस्मिन्नुप्रविशन्तो विकारमापादयेयुरित्याशंक्याह विषये
ति प्रवेशं विघटयति सर्वतइति योऽकामइत्यादिश्रुतेर्विषय
विमुखस्य निष्कामस्य मोक्षो न कामकामुकस्येत्याह सशान्त
मिति ७० ॥

स्वामिकृतटी०

४ नन्वविषयेच्छाभावे कथमसौ तान्भुंक्ते इत्यपेक्षायामाह
आपूर्यमाणमिति नानानदीभिरापूर्यमाणमपि अचलप्रतिष्ठ
मनतिक्रांतमर्यादमेव समुद्रं पुनरपि आपो यथा प्रविश
न्ति तथा कामा विषया यं मुनिं प्रति अदृष्टभोगेर्विक्रियमाणमेव
प्रारब्धकर्मभिराक्षिप्ताः संतः प्रविशन्ति सशान्तिं कैवल्यं प्राप्नोति
नतु कामकामी भोगकामनाशीलः ७० ॥

पैशाचभाष्ये टी०

एवमविद्याविद्याभेदाद्विदुषः सर्वकर्माणि विदुषस्सर्वनि
वृत्तिः स्वभावात्मकलकर्मसंन्यासएव विदुषस्त्वेकेषणस्य
स्थितप्रज्ञस्यपतेरेवमोक्षः न कामकामि न इत्येवमर्थं दृष्टान्ते
न प्रतिपादयिष्यन्नाह आपूर्यमाणमद्भिरचलप्रतिष्ठमच
लाप्रतिष्ठायस्य सस्तमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति य
द्वत्यथानद्वत्तथाकामा यं प्रविशन्ति परमात्मज्ञानेनैवरा
गद्वेषभेदप्रकंपमाने सशान्तिं मोक्षलक्षणं प्राप्नोति न काम
कामी कामान्कामयत इति कामकामी ७० ॥

रामानुजभाष्ये टी० ॥

यथात्मनैवापूर्यमाणमेकरूपं नादेया आपः प्रविशन्ति आसा
मंताः प्रवेशे अप्रवेशे च समुद्रो न कंचन विशेषमापद्यते एवं
सर्वे कामाः शब्दादिविषया यं मुनिं प्रविशन्ति तदिंद्रियगोचर
तां प्राप्नुवंति सशान्तिमाप्नोति शब्दादिंद्रियगोचरतामापन्ने
ष्वप्यात्मावलोकनतृप्तो यो न विकारमाप्नोतीत्यर्थः सएव

नू॰ यं मुं॰ प्ति॰

शांतिमाप्नोति न कामकामी शब्दादिभिर्यो विक्रियते स कदाचि
दपि न शांतिमाप्नोति ७० ॥

अभिनवगुप्तकृत टी०

अत एव योगी न कामार्थं बहिर्धावति अपि त्विंद्रियधर्मतया तं
विषया अत्र प्रविशंते न तरंगयंति नदीवेगा इवोदधिम् एवं
त्त्वीयो निर्णीतः ७० ॥

परमार्थप्रपा टी०

अथेंद्रियपराहतिं दृष्टांतेनाह आपूर्यमाणमिति स पुरुषः
शांतिं शमत्वं प्राप्नोति स कः सर्वे कामाः सर्वे विषया हृदयं
प्रविशंति पराहता भवंति न हृत् किंवत् यद्वदापो नाम नदी
प्रवाहाः समुद्रं प्रविशंति किंभूतं आपूर्यमाणमेघैर्बहिर्निःसा
र्यमाणे ऽपूदके अनुपक्षीणं तथा पुनः तैः सामर्थ्यो सत्र प्रवाहैर्यु
केऽपि अचलप्रतिष्ठं अनुलंघितमर्यादं एवं प्रकृतेऽपि विषय
हृति अबहिर्निःसृतास्वपि स्थितप्रज्ञत्वादनुपक्षीणपुनः प्र
विष्टास्वपि अहंमितिरिति निर्ममत्वाभिमानशून्यमित्यर्थः एवंवि
ध एवात्मस्वभाक् परंतु न कामकामी भोगकामनाशीलः ७० ॥

वनमाली टी०

ननु बाह्यार्थानुसंधानं विना ज्ञानिनो युज्यते तापि कथं विक्रम
नादिकं विषयानुभवस्तु दृश्यमानः कथं स्यात् तस्य नियत
साधनसाध्यस्यानुसंधानं विना तद्यादित्याशंक्य तस्य विष
यानुभवप्रकारमाह आपूर्यमाणमिति नदीभिरापूर्यमा
णं सने ह्यष्यादिप्रभवाप्रणा सर्वाः आपः समुद्रं प्रविशंति की
दृशम् अचलप्रतिष्ठं अनतिक्रांतमर्यादं अचलानां मेनाका
दीनां प्रतिष्ठा यस्मिन् इति वा अतिगंभीरं यद्वत् येन प्रकारेण
निर्विकारत्वेन तद्वत् तेनैव निर्विकारत्वप्रकारेण यं स्थित
यद्वा निर्विकारमेव संतः कामाः अन्यैः काम्यमानाः शब्दाद्याः
अवर्जनीयतया प्रारब्धकर्मवशात् आविशंति न तु विकर्तुं शक्नु
वंति स शांतिं सर्वलौकिकालौकिककर्मविक्षेपनिवृत्तिं मोक्षा

गी॰
टी॰
हि॰

रियांचाप्नोति न कामकामी काम्यान्न विषयान्कामयितुं शीलं
यस्य स कामकामी स तु शांतिं नाप्नोति ७० ॥

क्रमवैजयन्ती टी॰

ननु एवंभूतः संयमी कोवा भवति यस्येदृशी बुद्धिरथवेदृग्बुद्धि
युक्तो यः सः किं वा फलमाप्नोतीत्याशंकायामस्य दृष्टांतेनाह
आपूर्यमाणमिति यद्वद्येन प्रकारेण अनेकनदनद्यादिसंब
न्धिन्या महत्यो वेगवन्त्य आपो जलानि आपूर्यमाणं निजा
परिमितनीरनिकायैरेव अस्वतस्वतटमभिव्याप्य पूर्यमाणं
परिपूर्णमित्यनेनास्येतरनद्यादिजलाभिलाषानपेक्षत्वमुक्तं
अतएव अचलप्रतिष्ठं अचला नादेयजलौघैरक्षुभिता प्रति
ष्ठा स्थितिर्यस्य तथाभूतमित्यनेनास्यागाधत्वमतिविस्तार
त्वंचोक्तं समुद्रं समुद्रं जलविधेनयस्य तं महज्जलराशि
वं तं प्रविशंति सर्वाभ्यो दिग्भ्यो विशन्त्यपि तं न क्षोभयन्तीत्य
र्थः तद्वत्तेनैव प्रकारेण सर्वे कामाः काम्यन्त इति कामाः श
ब्दादयो विषया यद्वा देवतान्तरविषयकाः साधनफलस
म्बन्धादिरूपाः सर्वे प्राकृतवस्तुमात्रविषयकाः समस्ताः का
माः आपूर्यमाणं देहगेहादौ सर्वस्मिन्प्राकृतवस्तुन्यहं मम
ति भावे देहांतरेषु भावे हित्वान्यावलोकनात् उक्तेन कृष्णैक
भक्तियुक्तेन मनसैव आसमन्तात्सर्वेन्द्रियविषयभोगेभ्यः
पूर्यमाणं तमभिमतमिति ज्ञेतायतोऽचलप्रतिष्ठं चला ल॰
क्ष्मी विधेनयस्य स चलो विष्णुः अस्यासौ चलश्चाचलः अथवा स
ति क्षेतः अक्षराणामकारोस्मि इत्यत्रैव वक्ष्यमाणात्त्वतस्य र॰
मासहितस्य विष्णोः प्रतिष्ठा प्रकर्षेण स्थितिर्यस्मिन्स्तं ल॰
क्ष्मीनिवासनिवासभूतमित्यनेनास्य रमासहितविष्णुनिवा
सत्वेनान्यदेवादीनां शब्दादिप्राकृतविषयाणां च वासनार॰
हितांतःकरणत्वं निरतिशयानंदसम्पूर्णत्वं चोक्तं समुद्र
पक्षप्रायमर्थोऽज्ञेयः ननु विष्णोः प्रतिष्ठा तु सर्वेष्वपि भूतमा
त्रेषु विद्यते न तु केवलं विष्णुभक्तिमत्स्वेव सर्वव्यापनशीलं

त्वादतः सर्वाणि भूतानि संयमिनः कथं न स्युः कथं वैको विस्तम्भक
एवसंयमीत्याशंकायामेवं घटनाते इति कुतस्तु केन न द्वितीयात्वेन
यच्छब्दार्थेन सह संयमीत्यस्य पदस्याभेदार्थं दर्शयन्नाह यमिति
ये विषयास्त्रय्यहभाजनं संयमिनं प्रविशन्ति प्रकर्षेण विशन्ति ते
कामायस्येन्द्रियसन्निकर्षेणाप्राप्तवन्त्यपि यन्मनसि विक्रियां नो
त्पादयन्ति स एव संयमी कृत्स्नभक्तः शान्तिं भगवत्साम्यायति
हरणेच्छुकिमाप्नोति न कामकामी कामानु शब्दादिविषयान्का
मयितुं शीलं यस्य तथा सः यद्वा कामानां कामवतां ब्रह्माद्येन
कदेवानां कामास्तत्प्राप्तीच्छा विघ्ने यस्य सः पुरुषः शान्तिं ना
प्नोति यतोऽस्य कामकामिनी बुद्धिर्भिन्नानेकदेवविषयि
काऽनेककामनया सकलीभावं प्राप्ता सती साम्यपरमात्मत
त्वविचारे समर्था भवति प्रत्येककामकामी स्वस्वरूपदर्शिना
भावेन शान्तिं नाप्नोतीति भावः ७० ॥ स्पार्थीसिद्धेतिसहस्त्रांतमाह+

मधुसूदनी टीका । एवं प्रापिसर्वाप्रापः ब४

एतादृशस्यास्थितप्रज्ञस्य सर्वविक्षेपशान्ति +

\+ सर्वाभिर्नदीभिरापूर्यमाणं संतं वृष्ट्यादिप्रभवाभिरपि सर्वाभिरापः
समुद्रं प्रविशन्ति कीदृशमचलप्रतिष्ठमनतिक्रान्तमर्यादं प्र
चलानां मैनाकादीनां प्रतिष्ठा यस्मिन्निति गाम्भीर्यातिशय उक्तः
यद्वा येन प्रकारेण निर्विकारत्वेन तद्वत्तेनैव निर्विकारत्वप्रका
रेण यं स्थितप्रज्ञं निर्विकारमेव संतं कामाः सर्वैर्लोकैः काम्यमा
नाः शब्दाद्याः सर्वे विषयाः अवर्जनीयतया प्रारब्धकर्मवशात्
+विद्युन्तः विशन्ति न तु विकर्तुं शक्नुवन्ति स समुद्रस्थानीयः स्थित
प्रज्ञः शान्तिं सर्वेषां लौकिकालौकिककर्मविक्षेपनिवृत्तिं वाधिता
नुवृत्त्या विद्याकार्यनिवृत्तिं चाप्नोति ज्ञानबलेन न कामकामी
कामान् विषयान् कामयितुं शीलं यस्य स कामकामी लौकिककर्मणः
ति व्याख्यातो नाप्नोति अपि तु सर्वदा लौकिकालौकिकार्थः एतेन द्रा
विक्षेपेण महति क्लेशार्णवे मग्नो भवतीति वा सर्वविक्षेपनिवृत्ति
निन एव फलभूतो विद्वत्संन्यासः

गी.
टी.
हि.

पाज्ञीवस्तु किं दैवाधीनविषयभोगेपि निर्विकारत्वेन त्यादिकमुक्तं वेदितव्यं ७० ॥

427

मधुसूदनी टी.

८ तदेवं सर्वविक्षेपनिवृत्तिस्थितधीमतः उक्ताधुनाकामशांतिः सदृष्टांतानिरूप्यते १ आपूर्यमाणं सर्वाभिर्नदीभिरपि सागरं वर्षादिप्रभवा आपः प्रविशंति यथाविलाः २ अनतिक्रांत मर्यादं तिष्ठंतं निर्विकारतः धीरं तेन प्रकारेण स्थितप्रज्ञमव स्थितः ३ निर्विकारतया संतं काम्यमानाअपीतरैः शब्दाद्या विषयाः सर्वे यदिप्रारब्धकर्मणा ४ प्रविशंति न तच्चित्तं विक र्तुं शक्नुवंतितं समहार्णववल्लोपायः स्थितप्रज्ञो विचक्षणः सर्वलौकिकविक्षेपनिवृत्तेर्ज्ञानतेजसा अविद्याकार्यमाभा समपिप्राप्तकामसेनेष्टिकी ६ शांतिमाप्नोतिमुख्यस्तु कामका मीनशांतिभाक् काम्यान्कामयितुं शीलं यस्य संसारिणः सच ७ सदा क्षोभशालीवे भग्नो भवतीत्याशयो हरेः ८ । ७० ॥

नीलकंठी टी.

य[illegible] [illegible]ते[illegible]ः [illegible] [illegible]पाद्यमवेक्ष्य यानि यानि सर्वं सा[illegible]न[illegible]नयानिशेषवति [illegible] तस्मात् [illegible] उलूकादिवानंदारूपाथाएव सर्वेप्राणिनोभवं [illegible] यमीइंद्रियमनोबुद्धीनांनिग्रहण [illegible]इंद्रियादीनांहरकत्वात्किलोपपिउपपत्तेः [illegible] तथाचश्रुतिः नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्य [illegible] यस्मात् विद्या [illegible] निशायां क्रियाकारका [illegible] भवति कायां सर्वाणि भूतानि जाग्रति निमीय उलूका [illegible] सापविद्यापश्यतो मुनेः [illegible] कर्माणि [illegible] केवल्य प्रतिवेद्यात्त लेशमात्र [illegible] भवति [illegible] गाच्छयकारवती [illegible] [illegible] हियोगिनः वासव्यवहार [illegible] यात् यथोक्तं योगभाष्ये ।

प्रतिमानकत्वेनाहि दि[illegible]त्वेनाविनाशी
नत्र प्रजहाति यदा कामान्नुद्रेंद्रियाणींद्रियार्थेभ्यो निगृहीतानी
न्माहिनासक्ताहि विषयाणां प्रहाणं तेभ्यः श्वेंद्रियादीनां प्रत्याहर
णमुक्तं तेन तेषामात्मनः पृथक्सत्वमस्तीति सिद्धं नचनेहना
नास्ति किंचनेत्यादिश्रुत्या तेषां बाधात्र तदस्तीति वाच्यं इहेति
प्रतीच्येव ननिषेधात् नहि इहभूतले घटो नास्तीत्युक्ते घटस्य
स्वरूपं निषिध्यते किंतु तस्य भूतलसंबंधमात्रं तस्मात्कामाना
पृथक्सत्वमस्त्येव नानाद्वैतसिद्धिरित्याशंकां सदृष्टांतेन परिहर
ति आपूर्यमाणमिति प्रविशंतीभिरद्भिरापूर्यमाणमपि अचल
प्रतिष्ठं अनुद्रिक्तं वृद्धिहीनत्वात् एवं निर्गच्छंतीभिरद्भिरपि समा
नमपि अचलप्रतिष्ठं अविकृतं ह्रासहीनत्वादित्यपि बोध्यं एवंविधं
समुद्रं यद्वत् आत्मप्रभवा आपः प्रविशंति नहतं यं पुरुषं कामेन
पूर्यमाणं हीयमानं वा अचलप्रतिष्ठं निर्विकारं वृद्धिह्रासहीनत्वा
त आत्मप्रभवाः सर्वे कामाः प्रविशंति स एव शांतिमाप्नोति
कद्वैःखोपरमं प्राप्नोति नतु कामकामी विषयार्थी अयं भावः क्व
स्वस्यात्मनः सर्वसाक्षित्वेनेव चलयतीति सर्वं कृति स्मृतिम
सिद्धं तेन कामानां प्रहाणं तेभ्यः श्वेंद्रियाणां प्रत्याहरणे समर्थमा
णं न तेषां परमार्थतः पृथक्त्वं साधयति बहुप्रमाणविरोधा
न किंतु पारमार्थिकं पृथक्सत्वमभिप्रेत्य प्रहाणादिकमुक्तं
प्रविलापनेनैवमेव व्याख्येयं यथा ग्रंथपाठिकतेषां कपालेति
वपरिहस्याहो निवेपतिनायागउच्यते नत्वश्रोतार्थमात्रं नहाट
हापिज्ञेयं नेहनानास्तीत्यपीह परिहरूपमानेप्रपंचे आत्माति
ति किंनाना किमपि नास्तीत्येवं परत्वयाव्याख्येयं तथाच आत्मै
वेदं सर्वं ब्रह्मैवेदं सर्वं सर्वं खल्विदं ब्रह्मेत्यादयः श्रुतिवादाः स
गद्वैते आत्मनि कल्पितस्यापि तन्नैव निषेधेनान्यत्र सत्वाउप
पंचेनैकामानां पृथक्सत्वमस्तीति युक्तं एव समुद्रदृष्टांतः य
विसमुद्रात्पृथग्गंगायाः सत्वमस्तीति तन्न कार्यकारणस्मना
दिविकसत्तायाअभावात् वाचारंभणं विकारो नामधेयमिति
कार्यस्य वागालंबनमात्रत्वश्रवणादित्यन्यत्र विस्तरः ७० ॥

गी॰
टी॰
द्वि॰

हरणे आख्यातम् उपमान **आनंदी टीका** निदर्शनेन स्थितप्रज्ञस्वरूपमाह +

आपो नानानदीगताः सर्वतः समुद्रं ताभिरापूर्यमाणम् प्रचलप्रतिष्ठम् अपरित्यक्तस्वावस्थं निश्चलं पारगंभीरं नित्यम् प्रविशन्ति यथा प्रविशन्ति सावेग मागता अपि तस्मिन्नेव लीयन्ते तद्वद्यं स्थितप्रज्ञं सर्वे कामाः प्रविशन्ति याः प्रसंगागतैः शब्दादिभिर्विषयैः प्रकृष्टैरपि क्षोभयितुं विकारेण न शक्यते स एव शान्तिमाप्नोति न तु कामकामी प्रत्यक्षं परिहृतेन्द्रियव्यापारोऽपि मनसा कामान्विषयान्कामयमानः शान्तिं नाप्नोति अयं तात्पर्यं ज्ञानसमुच्चितेन कर्मणा वक्तिः न तु कर्मसंन्यासेन ७० ॥

^पा (right margin)

रामकंठी टीका

सम्बन्धः प्रकृष्टा निश्चयः शान्तिं सकलविकल्पकल्लोलक्षोभरहितया स्थितिं मनश्चित्तवृत्तिनामधिगच्छति प्राप्नोति कोऽसौ यं कामा विषया लब्धप्रविशन्ति निरभिलाषमेवावगाहन्ते कथं यथा समुद्रं नानागन्नागतसरित्प्रवाहाः पूः कीदृशं ताभिरापूर्यमाणं प्रियमाणमपि प्रचलप्रतिष्ठं निश्चलं पारपारगंभीरं नित्यावस्थानं अनेनोपमानेन प्रत्यासत्तिसामर्थ्यात्सम्बध्यमानेन पित्वादिर्देहत्वभिः शब्दादिभिर्यैः क्षोभयितुं न शक्यते स एव शान्तिं नाप्नुयात् यत्नेष्वसन्निहितेषु शान्तः यथाक्रमम् विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीरा इत्यतः एवाह न कामकामी शान्तिमाप्नोति [illegible]

[illegible]

लासिसी [illegible] ७० ॥

[illegible] टीका

नन्वस्फुटतया यदर्थप्रकाशनं तद्वृत्तैः स्वावड्ःत्वादिभिर्विक्रियाति भोगैरविक्रियमाणमेवं योगीनमभिलाषेणन बहिर्याति अनिन्द्रियगतया नेविषयाश्च प्रविशन्तोननतरंगयन्तीत्यर्थः ७० ॥

नानानदीभिरापूर्यमाणमप्यचलप्रतिष्ठमनतिक्रान्तमर्यादमेव समुद्रं पुनरप्यन्या आपो यथा प्रविशन्ति तथा कामा यं मुनिमनर्हीः

^ह (left margin)

^नत (left margin)

* आरब्धकर्मभिराक्षिप्ताः सन्तः प्रविशन्ति स शान्तिं मोक्षाख्यं प्राप्नोति न तु कामकामी विषयाभिलाषुकः

पंचोलीटीका

विदुषः त्यक्तैषणस्य स्थितप्रज्ञस्य यतेः एव मोक्षप्राप्तिः न त्वसंन्यासि
नकामकामिनः इत्येतमर्थं दृष्टान्तेन प्रतिपादयिष्यन्नाह आपूर्यमा
णइति अद्भिः आपूर्यमाणमचलप्रतिष्ठं अचलतया अवस्थितं समु
द्रं यद्वत् प्रविशंति तद्वत् सर्वे कामाः सर्वे मनोरथाः यं यतिं प्रविशंति आ
त्मन्येव लीयन्ते स प्रशांतिं मोक्षमाप्नोति न कामकामी विषयकामना
युक्तः न प्राप्नोति ७०॥

रणवीरसमिद्धोधिनी॥

अतएव आपूर्यमाणमिति आपो नदीवेगाः समुद्रं यद्वत्प्रविशं
ति अंतर्लीना भवंति प्रवेशप्रकारं विशेषणद्वारेणाह आपूर्य
माणं आसमंतात्पूर्यत इति न कश्चिद्देशोस्य सर्वथा न प्रविशंति
नित्यं तेषां प्रवहनस्वाभाव्यात् तथासत्यपि अचलप्रतिष्ठं वेला
रूपा मर्यादा प्रतिष्ठा ततो नोत्तरंगयति एवं कामाः अन्यथाप्र
तिपन्नाः गुरुरयं न द्रष्टव्य इत्यादिरूपा मनोधर्माः संकल्पा यं प्र
विशंति स्वभावात्स्ववेपांकवंति परं तथैवांतर्भवंति नृत्वनिश्चया
बालयंति स एव कर्मयोगी प्राप्नोति दुःखनिहतिं प्राप्नोति न पुनः
कामकामी काम्यंत इति कामाः पुत्रादयः तान्कामयितुं संकल्प
यितुं शीलमस्येति ताच्छील्ये णिनिः ताच्छील्यं च तत्स्वभावता न
प्यायायमर्थः स्वभावस्यानिहतेर्यः कामानेव संकल्पयति कथं
मेतान् लभेयमिति न तु प्रारभ्यमाणां क्रियां निर्वर्तयति निश्चयदार्ढ्या
भावात् स कथं प्राप्नोति भागभवेदिति यद्वा नकामकामीत्येकं पदं सः
स्पृहे नगर्भे विशेषणं कं सुखं न कं नकं दुःखं न समासः नद्व
समंतात् लीनाति हृतीकरोतीति नकामः स्वर्गः तं कामयतीति द्व
त्रियस्य संमुखं दुःखे माणान्यागादवश्यंभाविनी स्वर्गप्राप्तिरिति
रतीयो निर्णीतः ७०॥

प्राकृष्यमाण इति यो विषयैराकृष्यमाणोप्यचलप्रतिष्ठो भवति
नोत्सेकं प्राप्नोति प्रलयं च करोति स मुक्तिं प्राप्नोतीत्यर्थः एतद
न च प्रलयं करोति न चाभावं गच्छति न हि स मुक्तः सरित्स्वेवार्ण
प्रवेशनिमित्तो हर्षविशेषो बहुतरो प्राप्नोति प्रलयं च करोति स
मुक्तिं प्राप्नोतीत्यर्थः एतदेव प्रपंचयति ७०॥

भाषा अनुवाद

जो कहो कि विषयमें दृष्टि विना फेरिवे ज्ञानी विषय भोग
कैसे करतेहै इस आशयमे कहतेहै कि जैसे नद नदी ना
नीके जल प्रवाहकेजोरसे अचल समुद्रमे जाय प्रवेश क
रते पर समुद्रकी इच्छा नही तैसेही विषय सब अदृष्ट करे
पूर्वकर्मके अनुसार भोग इच्छा हीन मुनिके अंतःकरण
मे अदृष्टके जोरसे कर्मके द्वारा विषय प्रवेश करते पर
न्त तिनके द्वारा ही अर्थात् विषय भोग करते भी वे कै
वल्य मुक्ति पावतेहै और कामके कामी भोग कामना (
शील कहे विषय स्वभाव नही होतेहै ७० ॥

दोहा

चौपाई ॥

पूर्ण अचल प्रतिष्ठित होई प्रविशे जल समुद्र ज्यो सोइ त्यों
विषयी जीव स्वरव निक नना
सम काम लिप सो शांति पावें
वें ७० ॥

विहाय कामान्यः सर्वान् पुमांश्चरति निस्पृहः
निर्ममो निरहंकारः स शांतिमधिगच्छति ७१

शांकरभाष्यं

विहायेति विहाय परित्यज्य कामान्यः संन्यासी सर्वानशेषतः कार्त्स्न्येन चरति जीवनमात्रचेष्टाशेषः पर्यटतीत्यर्थः निःस्पृहः शरीरजीवनमात्रेऽपि निर्गतास्पृहा यस्य स निःस्पृहः सन् निर्मम इति ममत्ववर्जितः शरीरजीवनमात्राक्षिप्तपरिग्रहेऽपि ममेदमित्यभिनिवेशवर्जितः निरहंकारो विद्यावत्त्वादिनिमित्तात्मसंभावनारहितइत्यर्थः स एवंभूतः स्थितप्रज्ञो ब्रह्मविच्छांतिं सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्यामधिगच्छति प्राप्नोति ब्रह्मभूतो भवतीत्यर्थः ७१ ॥

आनंदगिरिकृतटीका

यदि गृहस्थेनापि मनसा समस्ताभिमानं हित्वा कूटस्थं ब्रह्मात्मानं परिभावयता ब्रह्मनिर्वाणमाप्यते प्राप्तं तर्हि मोक्षस्य संन्यासविडम्बनमेवेत्याशंक्याह यस्मादिति शब्दादिविषयप्रवणस्य न तद्विच्छाभेदभागिनो नच ततोऽधिकमित्यर्थः जीवनमपि कथमित्याशंक्याह जीवनमात्रेति शब्दादिविषयत्यागो जीवनमपि कथमित्याशंक्याह त्वर्थं चरतीत्युक्तात् पूर्वोक्तमन्वयं विगमयितुमनंतरं वाक्यमित्यर्थः जीवन्नेति सम्भवद्रागद्वेषादिके देशे निवासमाह त्वर्थं वस्तीति विहाय कामानित्यनेन पुनरुक्तिमेतद्व्याचष्टे पर्यटतीति विहाय निस्पृहत्वमुक्त्वा निर्ममत्वात् पुनर्वदन्तीति परिहरति शरीरेति निःस्पृहत्वमुक्त्वा निर्ममत्वात्पुनरुक्तिमाशंक्याह शरीरजीवनेति सत्यहंकारे ममकारस्याव श्यकत्वान्निरहंकारं व्याकरोति विद्यावत्त्वादीति सशांतिमाप्नोति इत्युक्तमुपसंहरति स एवंभूत इति संन्यासिनो मोक्षमपेक्ष्य मात्रस्य सर्व

गी॰ टी॰ द्वि॰

कामपरित्यागादीनि श्लोकोक्तानि विशेषणानि यत्र साधनानि तत्सम्पत्तिफलस्य कैवल्यमित्यर्थः ७१ ॥

स्वामिकृत टी॰

यस्मादेवं तस्माद्विहायेति प्राप्तान् कामान् विहाय त्यक्त्वोपेक्ष्य अप्राप्तेषु च निःस्पृहः यतो निरहंकारः अत एव तद्भोगसाधनेषु निर्ममः सन् देहेष्टिर्भूत्वा यश्चरति [illegible]वशेन भोगान् भुंक्ते यत्र क्वापि गच्छतीति वा स शांतिं प्राप्नोति ७१ ॥

पिशाचभाष्ये टी॰

यस्मादेवं तस्मात् विहायेति चरति शरीरजीवनमात्रमेव चेष्टते निस्पृहः शरीरजीवनमात्रेऽपि निर्गता स्पृहा यस्य स निस्पृहः उपेक्षकः निर्ममः शरीरादौ ममेदमिति बुद्धिरहितः निरहंकारः विद्यावत्त्वादिनिमित्तेनात्मसंभावनारहितः शांतिम विद्योपरमलक्षणामधिगच्छति ७१ ॥

रामानुजभाष्ये टी॰

काम्यंत इति कामाः शब्दादयो विषयाः यः पुमान् शब्दादीन् सर्वान्विषयान्विहाय तत्र च निस्पृहः ममतारहितश्च अनात्मनि देहे आत्माभिमानरहितश्चरति स आत्मानं दृष्ट्वा शांतिमृगच्छति

अभिनवगुप्तकृत टी॰

स योगी सर्वकामसंन्यासित्वाच्छांतिरूपं मोक्षमेति ७१ ॥

परमार्थप्रपा टी॰

अथ तदेव प्रकटयति विहायेति यः पुमान् साधितपुरुषार्थः सर्वान्कामान्विषयान्विहाय तृणोपमान्कृत्वा निस्पृहश्चरति अथ निस्पृहत्वमेवाह निर्मम इति विषयेषु सत्स्वपि ममताभिमानशून्यः परहितेषु निरहंकारः अहं कर्त्ताहं कर्तेति श्लाघ्याशून्यः [illegible]यो निस्पृहः स एव शांतिमधिगच्छति नान्यः ७१ ।

वनमाली टी॰

का॰

एतदेवप्रपंचयति विहायेति सर्वान्बाह्यान्गृहक्षेत्रादीन्
आंतरान्मनोराज्यरूपान् वासनामात्ररूपांश्चपथिगच्छतस्तृ
णस्पर्शादिकल्पान्कामान्द्विविधान्विहाय यः शरीरजीवन
मात्रे निःस्पृहः सन् यतो निरहंकारो देहेंद्रियादावहंममेति
धीशून्यः निर्ममो देहयात्रामात्रार्थेपि प्रारब्धकर्माक्षिप्ते कौ
पीनाच्छादनादौ ममेदमिति धीशून्यः सन् यः पुमांश्चरति
प्रारब्धकर्मवशाद्भोगान्भुंक्ते स एवंभूतः स्थितप्रज्ञः सर्वसं
सारदुःखोपरमरूपां शांतिं प्राप्नोतीत्यर्थः तदीदृशं व्रजनं
स्थितप्रज्ञस्येति चतुर्थप्रश्नस्योत्तरं परिसमाप्तम् ७१ ॥

ऊहमेवैजयन्ती टी॰

यस्मात्कारणात्कामकामी स्वस्वरूपदर्शनाच्छांतिं नाप्नोतीति त
स्माद्यः सकलान्कामांस्त्यजति स एव शांतिं प्राप्नोतीत्याह वि
हायेति श्रीकृष्णः प्राक्कृतेन निजकर्मणा लब्धान्सर्वा
न्कामान्शब्दादिविषयान्कृतेस्वर्देवलोकादिप्राप्तिका
मान्वा सर्वान्प्राकृतरूपान्विहाय परित्यज्य निःस्पृहः अ
लब्धविषयेषु या स्पृहा कांक्षा तद्रहितः ननु लब्धानां परि
त्यागोऽलब्धानां तु स्पृहाराहित इति कुतो भवतीत्यपेक्षायामाह
त्वगभिन्नौ विशेषणे वाह निर्ममो निरहंकार इति यतोऽहंता
निर्ममः यो ममकारास्पदेषु लब्धेषु तत्तद्विषयेषु सत्स्विदं व
स्तु ममैव नान्यस्येत्येवं भावशून्योस्ति अतस्तस्य तेषां परित्या
गेनातिकष्टो भवति यतश्च निरहंकारः योऽहंकारास्पदे श
रीरे योऽहं शरीरमहमेव चेतनरूपात्मनोस्तीदं न भवती
ति बुद्धिरहितो भवत्यतो हेतोस्तस्माल्लब्धेषु देहसम्बन्धिषु
पशुकलत्रपुत्रादिषु स्पृहाशून्यत्वं संभवत्येव एवंभूतः सन्
यः पुमान्पुरुषः चरति विषयान्भुनक्ति विषयेषु गच्छति
वा संयमी पुरुषः शांतिं संसारान्निवृत्तिमधिगच्छति प्राप्नो
नैयाप्नोति विषयभोगानुपकुर्वाणोऽपि नैष मनसा प्राकृतेना

गी० टी० द्वि०

न्येषांभूतानामतिप्रबलैरपितैरसावनभिभूयमानःसन्नात्मा
वलोकनपूर्विकया[illegible]कभक्तिनिष्ठिकयावृत्त्यापरमनि
वृत्तिंप्राप्नोतीत्यभिप्रायः ७० ॥

मधुसूदनी टी० ॥

यस्मादेवंतस्मात्प्राप्तानपि सर्वान्बाह्यान्पुष्टस्रक्चन्दनादीनान्तरा
न्मनोराज्यरूपान्वासनामात्ररूपांश्चपथिगच्छत्तृणस्पर्श
तुल्यान् कामांस्त्रिविधान्विहायोपेक्ष्यशरीरजीवनमात्रेपिनि
स्पृहःसन्यतो निरहंकारःशरीरेंद्रियादावहमित्यभिमान
शून्यःविद्यावत्त्वादिनिमित्तात्मसंभावनारहितइतिवा अतो
निर्ममःशरीरयात्रामात्रार्थेपिप्रारब्धकर्माक्षिप्तकौपीना
च्छादनादौममेदमित्यभिमानवर्जितःसन्यःपुमांश्चरति
प्रारब्धकर्मवशेनभोगान्भुंक्ते याद्दृच्छिकतयायत्रक्वापि
गच्छतीतिवासएवंभूतःस्थितप्रज्ञःशांतिंसर्वसंसारदुः
खोपरमलक्षणामविद्यातत्कार्यनिवृत्तिमधिगच्छतिज्ञान
बलेनप्राप्नोति तदीदृशंब्रह्मनिष्ठत्वंस्थितप्रज्ञस्येतिचतु
र्थप्रश्नस्योत्तरंपरिसमाप्तं [illegible]
[illegible]
[illegible]
[illegible] ७१ ॥

सदानंदी टी०

यस्मादेवमतःप्राप्तानपिबाह्यान्पुष्टहारादिकान् वासनामा
त्ररूपांश्चमनोराज्यात्मकानपि १ पथिप्राप्तांस्तृणस्पर्श
तुल्यांस्त्रिविधानपि उपेक्ष्यदेहयात्रायामपियोनिःस्पृ
होमुनिः २ देहाद्यहंकृतेःशून्यःस्वश्लाघ्यादिविवर्जितः १
तादात्म्याध्यासशून्यत्वात्संसर्गाध्यासवर्जितः ३ शरीरया
त्रामात्रार्थेप्राप्तेप्रारब्धकर्मणा ममेदमितितत्रापिस्वत्वबु
द्धिविवर्जितः ५ भोगान्प्रारब्धवशतोभुंक्तेभोक्तृत्वमंतरा १

अथ व्रजेत किमिति चतुर्थप्रश्नं समर्थयति विहायेत्यादिना यः
यः सर्वान्कामान्सर्वान्फललक्षणान्संकल्प्यांस्त्यक्त्वा निःस्पृहः फला
भिसंधिरहितः सिद्ध्यसिद्ध्योः समः इति यावत् निर्ममः ममतारहि
तः सत्संबन्ध्ययं यथानर्ह इति संकल्परहितः निरहंकारः ईश्वरा
एव कर्तेति स्वात्मन्यनारूढाभिमानः वद्यतिव मयैवैते निह
ताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्नित्यादि चरति स्वधर्मे
प्रवृत्तो भवतीति स शान्तिमानन्दमाप्नोति ७१॥

मध्वभाष्य

विहायेति कामान्विषयान्निःस्पृहतया विहाय यश्चरति भक्त
यति भक्तयामीत्यहंकारममकारवर्जितश्च सहितमानः स
एवमुक्तिमधिगच्छतीत्यर्थः उपसंहरति ७१॥

433

ह्यर्थः ज्ञानंतत्साधनंकर्मसत्त्वशुद्धिश्चतत्फलं तत्फलंज्ञान
निष्ठैवेत्यध्यायेस्मिन्प्रकीर्तितम् ७२ इतिश्रीमधुसूदनीटी॰
कायांद्वितीयोध्यायः २ ॥

सदानंदी टी॰

एवंचतुर्णांप्रश्नानामुत्तरव्याजतोत्रच तत्त्वविलक्षणान्यना
न्याविलानिसुलक्षणा १ प्रकर्तव्यतयोक्तानिजीवस्तुकेचक
सिद्धये सूच्यतेज्ञाननिष्ठेयमधुनात्रोपसंहृता २ एवायथा॰
काब्राह्मीयाब्रह्माद्वैतैकगोचरा निष्ठाचकर्मसंन्यासपूर्वि
काज्ञानलक्षणा ३ एतांब्राह्मीस्थितिंप्राप्ययःकोपिनविमु
ह्यति मोहहेतोरविद्यायाबाधितत्वान्नसंभवः ४ अस्यामेत
च्चवयसिस्थित्वामनसिनिश्चला ब्रह्मात्मनिर्वृतिंनिरामो
नाख्यामधिगच्छति ५ किंतुवाच्यंब्रह्मचर्यादेवसंन्यसयः
शमात् यावज्जीवंस्थितस्तावत्सोब्राह्मीमेवावतिष्ठते ६ सया
तिब्रह्मनिर्वाणमित्यपेराशयोहरेः ७ वयोवृद्धोप्यात्मबोधंत
दुत्तमतिमलोच्छेदनार्थंस्वधर्मं तत्संशुद्धिंततोज्ञाःविलक
रणफलंज्ञाननिष्ठांपरेष्टां योमत्कायप्रियायावदद्मलयशाः
श्रीपतिर्धर्मगोप्ता सश्रीकसोऽविलसद्भ्रमतिमिरहरोपाव
भास्वान्ममांतः ८ ७२ ॥ इतिसदानंदीटीकायांद्वितीयोध्या
यः २ ॥

नीलकंठी टी॰

चैतन्याहितोकर्मयोगप्राप्यांसांख्ययोगनिष्ठांफलेनसहवक्तुमुपसं
हरति एषेति एषास्थितप्रज्ञलक्षणप्रसंगात्कथिताब्राह्मीब्र
ह्मशब्देनाप्रब्रह्मविदुच्यते ब्रह्मविद्ब्रह्मैवभवतीतिश्रुतेः तूष्णी
यंब्राह्मीस्थितिनिष्ठांप्राप्यनरोनविमुह्यति पुनर्मोहंनप्राप्नोति
अस्यामंतकालेपिस्थित्वेतिसकृज्ज्ञानापीयंफलवतीनत्वपास
नावच्छिराभ्यासमपेक्षतइत्युक्तं ब्रह्मरूपंप्राप्नोति किंलोकां
नरवत्गतिंप्राप्यब्रह्मनेत्याह निर्वाणमिति निर्गतंवानंगम
नेयस्मिन्नाप्यब्रह्माणिनत्रिर्वाणंनयाप्रकृतिः नतस्याप्राणाउत्क्रा

मेत्यैवमेवसमवलीयंते ब्रह्मैव सन्ब्रह्माप्येतीति गतिमंतरेणघटा
णहूपोपाधिप्रविलयमात्रात् घटाकाशस्य महाकाशत्वप्राप्ति
वत् जीवस्य ब्रह्मप्राप्तिमाह अंतकालेपीत्यपिशब्दात् यो ब्रह्म
चर्यादारभ्यात्मनिष्ठः स ब्रह्मनिर्वाणं कैमुतिकन्यायेन प्राप्नो
तीति गम्यते अस्याध्यायस्यार्थः संग्रहीतो मधुसूदनश्रीपादैः
ज्ञानं तत्साधनं कर्म सत्त्वशुद्धिश्च तत्फलं तत्फलं ज्ञाननिष्ठै
वेत्यध्यायेस्मिन्नकीर्तिते इति श्रीनीलकंठी टीकायां द्विती
योध्यायः २ ॥ ॥ ॥

आनंदी टीका

एतदध्यायार्थमुपसंहरति नत्वेवाहं जातु नासमित्या
रभ्याध्यायांते मो॥ ब्राह्मी ब्रह्मणः परापरस्वरूपस्य परमेश्व
रस्य संबन्धिनी स्थितिर्निष्ठा नित्यवर्तनप्रकारः तथा ब्राह्मी
स्थितिर्यया स्थितया ब्रह्मणि स्थीयते सा स्थितप्रज्ञता चतुर्भिः श्लोकै
स्तत्त्वज्ञः हे पार्थ एनां द्विप्रकारार्थामेव ब्राह्मीं स्थितिं प्राप्य
विचार्य लब्ध्वा च पुनर्न विमुह्यति पुनः अन्यात्मभ्रमरूपमिथ्या
ज्ञानेन विषयभोगेन लोभं च नाप्नोति अस्यां ब्राह्म्यां स्थित्वा वर्तन
कालेपि स्थित्वा निर्वाणं प्रशांतं ब्रह्मस्वरूपं निप्राप्नोति अपि श
न्यादेवं वाक्यार्थः इयं स्थितिर्हि बहुतरप्रयाससाध्या परमेश्व
राज्ञयह लभ्या वेति अंतकालात्मक इच्छतरश्च तेंद्रियसंघात
सर्वविमर्शासमर्थे देहस्मृति जातायामपि निरंतराभ्यासक्रमे
णावापरमेश्वरानुग्रहेण अंतकालेपि विकलेंद्रियस्यैतत्संघात
मरणावस्थासमये यस्यां स्थितावस्थितप्रज्ञतामधिगम्य निःश्रे
यसप्राप्तिरिति सिद्धम् ७२ इति श्रीआनंदी टीकायां द्विती
योध्यायः २ ॥

रामकंठी टीका

एवा विहाय कामान्यः सर्वान्निःस्पृहत्वेन ग्रंथेन प्रतिपादिता ब्रह्मणः
परमात्मस्वरूपपरमात्मसंज्ञकस्य संबन्धिनी स्थितिः एतया ब्रह्म
णि स्थीयते इति विषयानंतरं निहत्य रतितया प्रतिष्ठा क्रियते अत

द्वितीयेऽध्यायेऽस्मिन् हृदयइवगंभीरविमले रहीनेगीतानां विवुधदयितानां प्रणयतः तदास्नेयानंदा
मृतरसमहार्वं रसयतां सदावःसुभावोभवतहतहत्यः हतधियाम् ॥+

एवंनोप्राप्यधयोक्तेनक्रमेण स्वात्मीकारेणस्वीकृत्याभियुक्तोनः
प्रवैनोप्राप्यधयोक्तेनक्रमेण स्वात्मीकारेणस्वीकृत्याभियुक्तो सामंतका
प्रवैनोप्राप्यप्रत्ययरूपंवैविश्रंभजते यतोस्यामंतका
मुद्यति देहादिष्वात्मप्रत्ययरूपंवैविश्रंभजते यतोस्यामंतका
लेप्युपरसमयेपिस्थित्वाविश्रम्यनिर्वाणंनानाविकल्पतोभवत
याल्पश्यांतब्रह्मपरंतत्वंस्वस्वभावमयमृच्छति तदेकात्म्यमापद्य
तइत्यामृ+१२ इतिरामकंठटीकायां द्वितीयोध्यायः २ ॥

~~लालिनी~~ ~~सर्वज्ञमी~~ टीका

एवंप्रतिष्ठानस्यमहिमानंमाह एषेति
ब्राह्मीविधायाः प्रवुद्धावस्थायाः संज्ञानंहंमहिमानंवाह एषेति दे
एषोक्तरूपाब्राह्मीस्थितिर्ब्रह्मज्ञानावस्थापनांप्राप्यनमुह्यति दे
हाद्यात्मप्रत्ययंनभजते यतोस्यामवस्थायामंतकालेपिस्थित्वाब्रह्मनिर्वाणंपर
ममयेपि ईश्वरानुग्रहेणज्ञानापिज्ञानमात्रंस्थित्वाब्रह्मनिर्वाणंपर
तत्वलयंगच्छतिप्राप्नोतिइति+१२ इतिसर्वज्ञमीटीकायांद्विती श्री
योध्यायः १२ ॥ तत्त्वोक्तिविदर्कपुहिपश्रीभगवदाशयज्ञेनमात्रैन॥ ध्यात्वांजनमप्रसृतिमवतःसेवनंतद्विलोके पद्यमितोजीवितोनेपिभास्वत्रिवीणयप्रभवसिसनोतेनकेनः समाप्य॥+

~~पचोलीटीका~~

एषेति हेपार्थएषाब्राह्मीयथोक्तास्थितिः स
मेयान्तानतिष्ठास्तूयते एषेति हेपार्थएषाब्राह्मीयथोक्तास्थितिप्राप्यनविमु
वैसंन्यासब्रह्मस्वरूपेणावस्थानमित्येतत् एनांस्थितिंप्राप्यनविमु
ह्यतिमोहंनप्राप्नोतिअंतकालेपिअंतेवयस्यपिअस्यायथोक्तायांब्रा
ह्यांस्थित्वाप्रमान्ब्रह्मनिर्वाणंमोक्षंगच्छतिप्राप्नोतियःब्रह्मचर्या
देवसंन्यस्ययावज्जीवंब्रह्मण्येवावतिष्ठते सब्रह्मनिर्वाणंगच्छतितत्रकिं
वक्तव्यं १२ इतिश्रीपंचोल्याद्वितीयोध्यायः २

~~श्रीमम~~ इतिश्रीरामसिद्धेधिनी॥

~~श्रीमम~~ श्रीरमममिद्धेधिनी॥

एषेति वेदस्तत्वंतयोब्रह्मेत्यनुप्रामनाङ्ग्रस्तवेदः मघावप्रकांतः
एषेति वेदस्तत्वंतयोब्रह्मेत्यनुप्रामनाङ्ग्रस्तवेदः एषापूर्वोक्तिलक्षणस्थितिर्निष्ठा एना
त्वाहुनुवेंदस्ताद्विधाब्राह्मी एषापूर्वोक्तिलक्षणस्थितिर्निष्ठा एनां स्थित्वाति
माप्यनकश्चित्स्त्रियवृधुरपिविमुह्यति अस्यांनिष्ठायांस्थित्वाति य
सर्वंमाप्यांतकालेपियुद्धेसमुत्वमरणादोप्राणत्यागेषदंगच्छति य
उक्तंहाविमोक्षकथौलोकेसूर्यमंडलभेदिनो तथावयोगयामाया
तपस्विभिर्याम्रविशालभ्यते प्रयत्नतः सत्रिभिर्याभ्यते वया प्र
यांतितामामाप्नुवंतिमनस्विमेभगतांपमेयेपञ्चतान्नामानाप्नोति १

गी.
टी.
द्वि.

434

मंतव्येवमसमवक्लीयंतेब्रह्मैवसन्ब्रह्माप्येतीति गतिमंतरेणप्रा
णाद्युपाधिप्रविलयमात्रात्तत्स्वटीका घटस्यमहाकाशत्वप्राप्ति
वत् जीवस्यब्रह्मप्राप्तिमाह अंतकालेपीत्यपिशब्दात् योब्रह्म
चर्यादाश्रमात्प्रतिष्ठतिसब्रह्मनिर्वाणंकैमुतिकन्यायेनप्राप्नो
तीतिगम्यते अस्याध्यायस्यार्थः संगृहीतोमधुसूदनश्रीपादैः
ज्ञानेतत्साधनेकर्मसत्वशुद्धिश्चतत्फलं तत्फलंज्ञाननिष्ठे
वेत्यध्यायेस्मिन्प्रकीर्तितं इतिश्रीनीलकंठी टीकायांद्विती
योध्यायः २ ॥ ॥ ॥

नंदी टीका

एतदध्यायार्थमुपसंहरति एषानैषवाहंज्ञात्वानासमित्या
रभ्याध्यायांतेयोः ॥ ब्राह्मीब्रह्मणः परापरस्वरूपस्यपरमेश्व
रस्यसंबन्धिनीस्थितिनित्यानित्यवर्तनप्रकारः तथाब्राह्मी
स्थितिर्यथावत्प्रज्ञातब्रह्मणिस्थीयतेसास्थितप्रज्ञताचतेप्रोक्ते
त्यत्रयः हेपार्थएनांहिप्रकारार्थामेवब्राह्मींस्थितिंप्राप्य
विचार्यलब्ध्वाचपुरुषोनमुह्यति अनात्मन्यात्मभ्रमरूपंमिथ्या
ज्ञानेविषयभोगेनलोभंचनाप्नोति अस्यामास्यामास्थित्वावंतः
कालेपिस्थित्वानिर्वाणमप्राप्तब्रह्मस्वरूपतिप्राप्नोति अपिश
ब्दस्यैवाकार्थः इयंस्थितिर्हिबहुतरप्रयासप्राप्यापरमेश्व
रानुग्रहलभ्यावर्तिष्ठंतकालात्प्राक् रूढतरश्वेतेंद्रियसंघाते
संववमर्षसमर्थेदेहेसतिजातायामपिनिरंतराभ्यासक्रमः
णावापरमेश्वरानुग्रहेहणांतकालेपिविकलेंद्रियस्तनसंघाते
मरणावस्थामतेप्यणस्यास्थित्वास्थितप्रज्ञतामधिगम्यनिःश्रे
यसप्राप्तिरितिनिसिद्धिम ७२ इतिश्रीआनंदी टीकायांद्विती
योध्यायः २ ॥

कंठी टीका

एषाविहायकामान्यःसर्वानित्यनेनग्रंथेनप्रतिपादिताब्रह्मणः
परमात्मनस्वरूपपरमात्मसंज्ञकस्य।संबन्धिनीस्थितिः एतयाब्रह्म
णिस्थीयतेइतिविषयान्तरनिहत्तरतितयाप्रतिष्ठाक्रियते अत

गृहीतेगीतानांविबुधदयितानांप्रणयतः तदाज्ञेयानंदा
ॐ द्वितीयेध्यायेस्मिंहृदयइवगंभीरविमले भावोभवतुकृ तकृत्यःकृतधियाम् ॥+
मृतरसमहर्षैरसयतां सदावः

प्रज्ञाप्रत्ययरूपंवैविश्रमभजते यतोस्यामंतका
एवैनांप्राप्ययद्योकेनक्रमेणस्वात्मीकारेणस्वीकृत्याभिमुक्तेन।
मुह्यति देहादिष्वात्मप्रत्ययरूपंवैविश्रमभजते यतोस्यामंतका
लेप्युपरसमयेपिस्थित्वाविश्रमनिर्वाणंनानाविकल्पशोभप्रत
यात्मशांतब्रह्मपदंतत्वंस्वस्वभावमयमृच्छति तदेकात्म्यमाप्य
तइत्यामृ॥७२ इतिरामकंठीटीकायांद्वितीयोध्यायः २ ॥
भाष्योत्कर्ष

~~नारायणी~~ श्रीधरी टीका
तत्र स्थितिमहिमानमाह एषेति
ब्राह्मीस्थितिर्ब्रह्मज्ञानावस्थापनांप्राप्यनमुह्यति दे
ब्राह्म्याः प्रबुद्धावस्थायाः संज्ञानंरमहिमानमाह एषेति
एषोक्तरूपाब्राह्मीस्थितिर्ब्रह्मज्ञानावस्थायामंतकालेपिस्थ
हादावात्मप्रत्ययंनभजते यतोस्यामवस्थायांब्रह्मनिर्वाणपर
समयेपि ईश्वरानुग्रहेणाज्ञापितएणमाप्राप्यत्वाब्रह्मनिर्वाणपर
तत्वलयंगच्छतिप्राप्नोतिइति॥७२ इतिवसवगुप्तीटीकायांद्विती ॥श्री
तद्योकंचिदर्कंमृहिष्णुश्रीभगवदाशयज्ञेनभाष्येण॥ श्राह्लांजन्मप्रभृतिभवतःसेवनेनद्विलोके वाच्यकेनापरिमितफलंभुक्तिमुक्तिप्रकारं ज्योतिर्माद्यःस्मृति पद्यमितोजीवितेतेपिभास्वन्निर्वाणायप्रभवसिसमानेनकेनः समाप्यः॥+
योध्यायः।२ ॥

पंचोलीटीका
हेपार्थएषाब्राह्मीयथोक्तास्थितिःस
एवेति हेपार्थएषाब्राह्मीस्थितिंप्राप्यनविमुह्य
मेघात्माननिष्ठास्तूयते एषेति एनांस्थितिंप्राप्यनविमु
वैसंन्यास्यब्रह्मस्वरूपेणावस्थानमित्येतत् एनांस्थितिंप्राप्यनविमुह्यति
सतिमोहंनप्राप्नोतिअंतकालेपिअंतेवयस्यपिअस्यांयथोक्तायांब्रा
ह्माःस्थित्वाप्रमान्ब्रह्मनिर्वाणंमोक्षंऋच्छतिप्राप्नोतियः ब्रह्मचर्या
देवसंन्यस्यायावज्जीवंब्रह्मण्येवावैतिसब्रह्मनिर्वाणंगच्छतितत्रकिं
वक्तव्यं ७२ इतिश्रीपंचोल्याद्वितीयोध्यायः २
~~नारायणी~~ श्रीरसमिद्धबोधिनी॥

एषेति वेदस्तत्वंतयोब्रह्मसेत्यनुप्रासमनाद्यस्त्ववेदः सम्यक्प्रकांतः
स्नाहनुवेदस्तहिपृथाब्राह्मी एषापूर्वोक्तलक्षणास्थितिर्निष्ठापनां
प्राप्यनकश्चिन्निश्चयंवेधुरपिविमुह्यति मृत्स्यात्निष्ठायांस्थित्वाति
स्वयंप्राप्यांतकालेपियुक्तेसम्यक्प्रवेशमरणादेप्राप्तंतपदंगच्छति य
इके हाविमोक्षरूपोलोकेसूर्यमंडलभेदिनो तथाचयोगयाया
तपस्विभिर्याश्च विरक्तैलभ्यते प्रयत्नतः सांसिमिभिश्च यथा प्र
यांतितामाप्नुयातिमनस्विनोमरणानाम्पमेधेपशुतानामाणताइति ३

ति च त्रयी निरतीन: ७२ इति श्रीरणवीरसमिद्धे थिन्यां
गीताव्याख्यायां द्वितीयोध्यायः २॥

मधुभाष्य

एषेति ब्राह्मी स्थितिः ब्रह्मविषयास्थितिर्लक्षणे अंतकालेप्य
स्यां स्थित्वा ब्रह्मैव ब्रह्म गच्छति अन्यथा जन्मांतरं प्राप्नोति
यं यं वापीति वचनात् ज्ञानिनामपि सति प्रारब्धकर्म
णि शरीरांतरं युक्तं भोगेन विनतेरयुक्तं संति हि बहुशरीर
फलानि कर्माणि कानि चित् ममजन्मानि विप्रः स्यादित्यादे
दृष्टेः ज्ञानिनामपि बहुशरीरप्राप्तेः तथा चोक्तम् स्थितप्रज्ञोपि
यत्स्वर्षं प्राप्य रोढ्रपदं ततः साकर्षणात ततो मुक्तिमगाद्धि लप्र
मादत इति गारुडे महादेववचनं तत्र च मुक्तिनिरूप्यते इ
ति च नारदीये निश्चितफलं च ज्ञानं तस्य तावदेव चिरं यदुच
नार्चिषमेवाभिसंभवतीत्यादिश्रुतिभ्यः नच कार्यव्यूहापेक्षा
तयथापिकान् लतयथाशुष्करूपलाभे ज्ञानाग्निः सर्वकर्मा
णीत्यादिवचनेभ्यः प्रारब्धेन विरोधः प्रमाणाभावाच्च नच
तच्छास्त्रं प्रमाणं अक्षपादकणादानां सांख्ययोगजटाभृतां
मृतमालब्धये वेदं दूषयंत्यस्त्वेतम् इति निंदतान् शैवश्च
तिस्तत्र च शिवभक्तानां ज्ञातिपरत्वमेव न समस्त्यं च नहि तेषामपी
तरस्य च विकल्पार्थं प्रामाण्यं तथा चोक्तं तेवचन इमहाबाहो मो
दर्शनान्यागिकारय अतप्यानि वितप्यानि दर्शयत्स्वमहाभ
जप्रकाशकाकवात्मा न मश्काशं च मारुविति वराहे कृत्ति
तानि च मिथ्याशास्त्राणि कल्पितेविष्णुप्रचोदितः शंकारपाशास्त्राणि विमू
रणाय जनप्रचोदिताः इत्यादि व्याख्यानं श्रुतानि प्रोक्तान्यन्यान्या
विरोधत इति नारदीये अतो ज्ञानिनां भवत्येव मुक्तिः नचोक्तं

ज्ञानिनां कर्मयुक्तानां कायत्यागक्षणो यदा विष्णुमायातदाते
षां मनो वाक्षं करोति दोतिगारूढे नवान्येषां तदा स्मृतिर्भवति
वहुजन्मविपक्केन भक्तिज्ञानेन येद्दावं भजंति तत्स्मृतिं वते दे
वो याति न चान्यथेत्युक्ते मलेवैवेति निर्वाणमशरीरं कायो वा
लांशरीरं चेत्यभिधानात् एतद्गुणमवश्यमेति प्रयोगाच्च।
निर्वाणात्मप्रतिपादनमतिंद्रियाइत्यादिवत् कथमन्य।
या सर्वगुणगणादि श्रुतिसिद्धाकृतिर्भवतउपपद्यते नचान्यरूप
निर्वाणात्मा श्रुतिसिद्धाकृतिर्भवानिति शब्द्यतइति"
या सर्वगुणगणादि ब्रह्मेति परमात्मेति भगवानिति परमं यो महद्ब्रह्म
वतउत्तमं ब्रह्म परंब्रह्म परंब्रह्म जनार्दनः योसौ वतींद्रियग्राह्यः
भागवते भगवंतं परंब्रह्म क्षरादपि चोत्तमः नवतस्मोस्त्यभिय
यस्मात्परमतीतोहमक्षरादपि चोत्तमः नभविष्यति नचतस्मादेतकल्प्य
नास्ति नाप्ययमसमं नभूतं न भविष्यति नवतब्रह्मणोऽशरीरत्वादेतकल्प्य
कःऊतोन्यो इत्यादिभ्यः नचतद्ब्रह्मणोऽशरीरत्वात् सुवर्णज्योतीः
तस्यापि शरीरश्रवणात् आनंदरूपमस्तु तत् आनंदामि
कःऊतोन्यो इत्यादिषु यदिरूपं न स्यात् आनंदरूपस्य
तस्यापि शरीरश्रवणात् आकाश इत्यादिषु कथं सुवर्णरूपत्वं स्यात् आनंदरूपस्य
द्रष्टोस्मिन्नंतरआकाशइत्यादिषु कथं सुवर्णरूपत्वात् आनंदरूपवानुच्यते
द्रहरोस्मिन्नंतरआकाशइति कथं हृदयदेइत्यादौ रूपवानुच्यते
येवस्यात् नचानंदरूपमिति नचिदानंदइत्यादौ आदित्यवर्णंतमसःपर
कथंचदहरं दहरस्यस्यकेचित्सुर्वर्णंक्रतोरं आदित्यादिवचनात्
सहस्रशीर्षापुरुषः रुक्मवर्णंकर्तारं विश्वतश्चक्षुरित्यादिवचनात्
त्वात् सर्वतः पाणिपादं तत् विश्वतश्चक्षुरित्यादि प्रतिपादितमनन्त
विश्वरूपाध्यायादेश्वरूपवान् नवसीयते आदिविग्रहं स्वीकृत्य
नैश्वर्यवीर्यानंदश्रीशक्ति मोक्षभगवान् एतास्यशक्तिविविधं
स्वरूपतेस्वाभाविकीज्ञानवलकियाव यः सर्वतः आनंदश्र
त्मनः एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति अना
दिमध्यांतमनंतवीर्यमहदमलदामितकांतिकांतं मध्यनंतमु
रोनंतेगुणतोनंतविग्रहे विज्ञानशक्तिरहमासमनंतशक्तेः
तर्यतत्सर्वंदहरदा आत्मानमनंतत्वंचस वेदविहान् अन्यतमो
मकुंठकोनामलोके भगवत्पदार्थः येषांयस्यसमधस्य अनी

वृपरिक्षणं तेह त्वं ज्ञानं च सौभगं यच्चात्यद्भुतं कं समं तु वा घ्रातकः के
वलमतपरश्चतादिभ्यः ज्ञानि सर्वाण्यन्योन्यस्य रूपाणि विज्ञानमा
नंदं ब्रह्म आनंदो ब्रह्मेति व्यजानात् सत्यं ज्ञानमनंतं ब्रह्म पुरुष
ज्ञानमयं तपः समाभगवश्च विभुः स्वाराट् नतस्य शाकृतामूर्तिर्मा
समेरो स्थिसंभवा नयोगितादीश्वरत्वात्तस्य रूपो द्युतो विभुः
सदेहः सुखेनयश्च ज्ञानभाः सत्यपराक्रमः ज्ञानः ज्ञानः सुखः
सुखः सविभुः परमो न रमति पौषि विले देहोयं मे स हा न दो
नायप्रकृतिनिर्मितः परिपूर्णो ह्यसवैचतेन नारायणोस्य दृ
मित्यादि ब्रह्म वेवते न देवलीलया वासो परिच्छिन्नादिरूपेण
दर्शयति मायया नैव गर्भे वसेद्व्यान चापि वसुदेवतः न वा
पि माथवा जातो न चापि जन्मदाभिनः नित्यानंदो हृयोप्येवं कि
उते मो यदर्थान्न प्रतिपाये नैवे स प्रात्मात्मवता नयो स्वरो भवेत्
हि तु खं भगवान्वासुदेवः स्वगीदेवी क्षिजातः परमसुखवति
पिवीय रूपोप्य वोधं लोकानां दर्शयन्यामुनि समुत्कृत्नात्म प्रिया
र्थे जगाम सद्ब्रह्मवंशं च पूर्णो जनमोहनाय स्त्रीसंगिनामिति
रति प्रपंचश्चचार सर्वेश्वरविश्ववीर्यो यश्च दारपरश्चितः स्वयं रुद्र
वाकरस्तं कर्मजितो जितवानिश्चितः योजितो विजितो भवस्या
गागेयन जयानद नवाम्बो याह्यामासकनराः कोपरस्त्वतमन्या
दिभ्यश्च सत्कादे न तत्र संसारति रूपधर्माः यत्र च परावरमेदो
वगस्यते न चात्र तु हि मपेक्ष्या वरं च विश्वरूपमपेक्ष्यान्यत्र न
बाक्रं परिपूर्णानि रूपाणि समान्यविलरूपतः तथाप्यपेक्ष्यम
शनादर्शितवान्स्वबंकोपि हि परावरत्वदस्येव स भक्तानां विमोह
नमिति परमात्रे नवा च किंचिदुपचरितादिवाच्यं प्रविश्य पात्रेः प
दर्शवै विद्याबोधकम कृष्णादिमादि रूपाणि परिपूर्णानि सर्वदा
नवारगमारभिज्ञानिनित गाप्यस्मा न्विसीदसीत्यादेश्च नारदीये न
त्मान्स्वर्वरूपवनंत तगणनित्य निरस्त दोषं वनारायणोस्य परं च स्याप
तेवत्नान्यत्र हीति वाशिष्ठम ॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्य
विरचिते श्रीमहाभारततात्पर्यनिर्णये
कृत्तौ भाष्यवेदितो ... ः २॥

याहाक्षिकतयायत्रकापियातिमवाप्नुमान् ५ यएवंभू
तपश्चोग्रास्थितप्रज्ञउदारधीः शांतिंसमस्तसंसारदुःखो
भावोपलक्षितां ६ निर्वाणाख्यमवाप्नोतितत्त्वबोधबले
नैवे ईदृशंव्रजनंतस्यास्थितप्रज्ञस्यकीर्तितम् ७ ॥ ७१

नीलकंठी टी० ॥

प्रासंगिकीमाशंकांपरिहृत्यव्रजेतकिमित्यस्यप्रश्नोत्तरमाह
विहायेति पूर्वोक्तान्त्रिविधान्कामान्विहाययः चरतिविष
यान्भुंक्तेनिस्पृहःसन्यतोनिर्ममः ममताबाह्येष्विदंममभू
यादित्यन्यथनाशंसांस्पृहांकरोति निर्ममोपिकुतः यतोनिर
हंकारः नष्टाहंकारःसन्नयस्यस्यादेममताहृष्णातस्मादहं
कारप्रविलयात्शांतिमोक्षंप्राप्नोति सचयःसर्वत्रानभिस्ने
हइतिसर्वत्रयच्छब्ददर्शनात्साधनविधिपरएवायंग्रंथःप्र
ज्ञास्थितप्रज्ञस्यप्रकृतत्वात्तदनुवादार्थोयच्छब्दोनर्थकः
स्थितप्रज्ञस्यप्रकृतत्वात्तदनुवादोयच्छब्दस्यबोधकः यएवंकरोतिसइदंप्राप्नो
प्नोति लोकेपिहियएवंस्वभावकथनेसएवंकरोतीतितत्र
ग्रहोतीति यएवंकरोतिसइदंप्राप्नोतिइतितत्रतयच्छब्दः विधेलक्षणकथनार्थत्वेपितत्रता
लपएवप्रयुज्यतेतत्रयच्छब्दः विधेलक्षणकथनार्थत्वेपितत्रता
नीतिद्वयोरपिप्रयोगोदृश्यतेलक्षणकथनार्थत्वेपितत्रता
त्पर्यीभावाद्विधावेवपर्यवसानमितिदिक् ७१ ॥

आनंदी टीका

एतदेवप्रकाशयति विहायकार्यमित्येवयत्कर्मनियतंक्रि
यतेतेन संगंत्यक्त्वाफलंचैवत्यक्त्वादशाध्यायेसिद्धांतात्तुगम
नक्रियमाणएव कर्माणिफलासक्तित्यक्त्वैवमएवंनिर्ममःममे
दमस्त्वित्यक्त्वा इंद्रियैराहरतेवमएवंनिरहंकारःप्रहंक
प्रमान्सर्वान्कामांश्चरति इंद्रियविषयान्स्पृहाविहीनःतथाहिनिरहंकारःअहंक
दंभूयादितिममतायातिक्रांताः तथाहिनिरहंकारःप्रहंक
तोभोक्तेत्यादिवासनाहीनःशांतिमधिगच्छति ७१ ॥

रामकंठी टीका

यःसर्वानशेषान्कामान्निर्णाशाह्लादिविषयानभिलाषान्मनसेव
विहायपरित्यज्येंद्रियैर्विषयांश्चरति सवगाहते शांतिमुक्ताह
प्रामधिगच्छतिप्राप्नोति कीदृशःसन् नित्यतस्मादयचिन्मात्रप
तिलब्धात्मप्रत्ययत्वान्निःस्पृहःस्पृहातोविषयस्वलोलभताया

निष्क्रांतस्तथा निर्ममः प्रतिनियतदेहेंद्रियादिषु भावेषु मम
मेदमिति ममत्वाभिमानान्निष्क्रांतस्तथा निरहंकारः देहेंद्रि
यप्राणादिष्वात्मप्रत्ययरूपाद्विज्ञानाहंकारादपि निष्क्रांत इ
त्येतदनेन ग्रंथेनापवर्गमार्गप्रणीतस्पष्टः प्रथम सहजन्म
नाद्व्यभिचारिविरुद्धत्वविनोपदेशायौगपद्यद्वितया सद्गु
रूपदिष्टदेहदेहिव्यतिरेकज्ञाननिरंतराभ्यासवशादहंकारा
दिवर्गव्यावर्तमानात्मप्रत्ययस्याहंतत्सामान्यसंविन्मात्रा
दहंप्रतीतेश्चिदेकरश्मिरूपाणामंतर्बहिष्करणशक्तीनां
शास्त्रचोदितेषु विषयेषु विहरणत्वमेव निग्रहं निवृत्तंपद
प्राप्तिहेतुं सिद्धांतीकृत्य समस्तशास्त्राध्यायप्रदर्शितपरमरह
स्योपदेशावसानभूतार्थप्रतिपादकं द्वितीयमध्यायमुपसंह
रति ७१ ॥

लासिकी [illegible] टीका

एतमेवाभिप्रायं समासेनाह विहायेति यः पुमान्स्वरूपप्र
तिष्ठो निरहंकारो न केवलं देहादावभिमानशून्यः नकेवलं निर
हंकारः यावन्निर्ममोपि देहादिषु ममताशून्यः तथा निःस्पृहो
विषयेषु निरभिलाषः सर्वान्कामान्भोगान्विषयान्विहाय योगी
नानंते प्रवृत्त्याचरति भुंक्ते स प्राप्तिमोक्षमधिगच्छति ग्राह
कैंद्रियग्राहकत्वेन सर्वानित्युक्तं चान्यच्च सम्यक्त्वबोध
विश्रांतो यावल्लभावभवस्थितिः विषयानपि सेवमानोपि जीवन्मु
क्तत्वेनावतिष्ठति इति ७१ ॥

पंचोलीटीका

यस्मादेवं तस्माद्यः संन्यासी पुमान्सर्वान्कामानशेषान्मनः
स्थान्विहाय परित्यज्य निःस्पृहः शरीरजीवनमात्रेपि निरभिलाषः
निर्ममो ममतारहितः निरहंकारः अभिमानरहितः सन् जीवनमा
त्रचेष्टाशेषः पर्यटति सोऽस्थितप्रज्ञः शांतिं निर्वाणमधिगच्छति
व्रजनं स्थितप्रज्ञस्येति वक्तव्यप्रश्नस्योत्तरं ७१

भाषा अनुवाद

जब ऐसी अवस्थाहै तो जो प्राप्त विषयको त्याग करते या अनादरसे ग्रहण करते और अप्राप्तमे इच्छा रहित कहे । किसीकी अभिलाष नही रखते इससे उनके अहंकार नही है इसीसे भोग अभोग साधनमें ममता तथा स्नेह शून्य होकर आत्मामें दृष्टि राखि अदृष्ट वशते विषय भोग । करतेहै और कही भी जाय पर शान्तिको प्राप्त होतेहै अर्थात् जो सब कामना छोडि वेपरवाह अहं ममता ही न पुरुष भोग करै या कही जाय पर शान्ति तो पावते हीहै ७२ ॥

दोहा

सर्वकाम त्यागें पुरुष जो विचरें निस्पृह निर्मम निरहंकार सो शान्ति प्राप्त अतिदीह ७१॥

438

एषाब्राह्मीस्थितिःपार्थ नैनांप्राप्यविमुह्यति
स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छ
ति ७२ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्म॰
विद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादे सां
ख्ययोगोनामद्वितीयोध्यायः २ ॥ ॥

शांकरभाष्य टी.

सैषा ज्ञाननिष्ठा स्तूयते एषाब्राह्मीति एषा यथोक्ताब्राह्मी
ब्रह्मणि भवेयं स्थितिः सर्वकर्म संन्यस्य ब्रह्मरूपेणैवावस्था
नमित्येतत् हे पार्थ नैनां स्थितिं प्राप्य लब्ध्वा विमुह्यति न मोहं
प्राप्नोति स्थित्वास्यां स्थितौ ब्राह्म्यां यथोक्तायामन्तकालेपि
अन्ते वयस्यपि ब्रह्मनिर्वाणं ब्रह्मनिर्वृतिं मोक्षमृच्छति किमु
वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येवावति
ष्ठते स ब्रह्मनिर्वाणमृच्छतीति ७२ ॥ इतिश्रीभगवद्गीताभा
ष्ये द्वितीयोध्यायः २ ॥

आनन्दगिरिकृत टी.

तत्रतत्र संक्षेपविस्तराभ्यां प्रदर्शितां ज्ञाननिष्ठां प्रथिकारि
स्तुत्यर्थत्वेन स्तोतुमुत्तरश्लोकमवतारयति सैषेति गृह
स्थः संन्यासीत्युभावपि चेन्मुक्तिभागिनौ किंतर्हि केचन सर्व॰
संन्यासेनेत्याशंक्य संन्यासिव्यतिरिक्तानामन्तरायसंभ
वादपेक्षितः संन्यासीत्याह एषेति स्थितिमेव ब्राह्मी
ष्ठ सर्वमिति न विमुह्यतीति पुनर्नेत्याह ज्ञानकर्षणमन्वयार्थं सं
न्यासिनो विमोहाभावेपि गृहस्था धननाशादिनिमित्तप्राये
णाविमुह्यन्ति विशिष्टः स तु परमार्थविवेकरहितो भवतीत्य
र्थः सर्वकर्मसंन्यासपूर्विका ब्रह्मनि॰
ष्ठा यथोक्ता ब्राह्मी स्थितिः

गी॰ टी॰ द्वि॰

ष्ठा तस्यां स्थित्वा तामिमामायुषश्चरमेऽपि भागेऽप्येत्यर्थः अपि
शब्दसूचितं कैमुतिकन्यायमाह किमुत बाल्यमिति तदेवं तत्त्वं
पदार्थौ तदैक्यं वा वाक्यार्थस्तज्ज्ञानादेकाकिनोऽपि कस्तदुपाय
श्चेत्येतेषामेकैकत्र श्लोके प्राधान्येन प्रदर्शितमिति निष्ठाद्वय
मुपायोपेयभूतमध्यायेन सिद्धं ७२ इति श्रीआनंदगिरिकृतटी-
कायां द्वितीयोऽध्यायः २॥

स्वामिकृत टीका

उक्तां ज्ञाननिष्ठां स्तुवन्नुपसंहरति एषेति ब्राह्मी स्थितिर्ब्रह्मज्ञान
निष्ठा एषा एवंविधा एतां परमेश्वराराधनेन विशुद्धान्तःकरणः पुमा
न्प्राप्य न मुह्यति पुनः संसारमोहं न प्राप्नोति यतः अन्तकालेऽ
न्त्यसमयेऽपि अस्यां क्षणमात्रं स्थित्वा ब्रह्मनिर्वाणमृच्छति प्राप्नो
ति यजमान किं पुनर्वक्तव्यं बाल्यमारभ्य स्थित्वा प्राप्नोतीति ७२
इति सुबोधनीटीकायां द्वितीयोऽध्यायः २॥

पैशाचभाष्य टी

सैषा ज्ञाननिष्ठा एषा यथोक्ता ब्राह्मी ब्रह्मणि भवेयं स्थितिः नैनां
स्थितिं प्राप्य लब्ध्वा विमुह्यति न मोहं प्राप्नोति स्थित्वास्यां ब्राह्म्यां
स्थितौ यथोक्तायामन्तकालेऽपि अन्ते वयस्यपि ब्रह्मनिर्वाणं ब्र-
ह्मनिर्वृतिं मोक्षमृच्छति गच्छति ७२॥ इति पैशाचभाष्ये द्वि-
तीयोऽध्यायः २॥

रामानुजभाष्यं । मनो

एषा नित्यात्मज्ञानपूर्विका असंगकर्मणि स्थितिः प्राप्य न मुह्यति न
पुनः संसारमाप्नोति अस्यां स्थित्या मन्तिमेऽपि वयसि स्थित्वा
ब्रह्मनिर्वाणमृच्छति निर्वाणमयं ब्रह्म सुखैकतानमभिगच्छ-
तीत्यर्थः ७२ इति रामानुजभाष्ये द्वितीयोऽध्यायः २॥

बालनवग्रमकृत टी॰

एषा सा ब्रह्मसनातायस्यां क्षणमात्रं स्थित्वा वा स्थितिं प्राप्य शरीरभे

दान्परमंब्रह्मप्राप्नोतीति प्रश्नचतुष्टयंनिर्णीतमितिशिवम्
ध्यानार्थसंग्रहः मुहोऽत्रचेतसश्चित्रागतिस्त्यागेनयात्किल
प्रारोहत्येवविषयांश्चयंस्त्यक्त्वापरित्यजेत् ॥ ७२ इतिश्रीमन्
द्भगवद्गीतासु द्वितीयोध्यायः २ ॥ ॥ ॥

परमार्थप्रपा टी॰

एषोक्तालक्षणाब्राह्मीस्थितिः ब्रह्माकारेणावस्थितिरूपन्याः
स्तापन्नाप्राप्यनमुह्यति पुनर्मोहं नप्राप्नोति अस्यामंतकाले
देहावसानेन्तलंस्थित्वापिब्रह्मनिर्वाणमृच्छतिप्राप्नोति किं
पुनर्यावज्जीवमित्यर्थः अध्यायतात्पर्यं शोकोदेहात्मबुध्या
न्तुभवतिमरणार्थीनिदेहातिरिक्तोदेहदृष्टैकआत्माविमरतु
पहतोहंत्वहन्ताशून्यः नस्पृशतांतत्रशोकस्तदिहनिजमनःशु
द्धितःसाधुसिद्धौहेदेश्याः सद्वितीयेऽष्टाभिमवदत्सांख्ययो
गाधिकारं ७२ इतिपरमार्थप्रपाटीकायांद्वितीयोध्यायः २

वनमाली टी॰

उक्तमुपसंहरति एषेति एषास्थितप्रज्ञलक्षणव्याजेनकथिता
एषातेभिहितासांख्येबुद्धिरितिचप्रागुक्तास्थितिर्निष्ठासर्वका
म्यकर्मन्यासपूर्वकपरमात्मज्ञानरूपाब्राह्मीपरब्रह्मविषया
हेपार्थएतांस्थितिंप्राप्यायःकश्चिदपिपुनर्नविमुह्यतिमोहंहे
तुभूतायांविद्यायांभगवदपरोक्षहेतुकतन्महाप्रसादेनति
हतत्वात् अस्यांस्थितावंतकालेऽपिवयसिस्थित्वाब्रह्मणि
निर्वाणंतस्मात्परमरूपमोक्षंप्राप्नोतीत्यर्थः ७२ इतिवनमाली
टीकायांद्वितीयोध्यायः २ ॥

वैजयन्ती टी॰

पूर्वोक्तामात्मज्ञानपूर्विकां निष्कामकर्मनिष्ठामुपसंहरति
एषेति हे पार्थ एषातेऽभिहितासांख्येबुद्धिर्योगेत्विमांशृण्वि
त्यारभ्य विहायकामान्यःसर्वान्इत्यंतेनग्रंथेनमयायाकथितासाप
ब्राह्मीब्रह्मावाप्तिकरीस्थितिः आत्मज्ञानयुक्ता
निष्कामकर्मनिष्ठाभवति स्थिरधीःपुरुषः एनांस्थितिंप्राप्य

गी.
टी.
द्वि.

नमुह्यतिप्रकृतिकार्येषुदेहगेहादिषुमोहंनप्राप्नोति अ
न्तकालेपिमरणसमयेपि अस्यांस्थितौस्थित्वानिर्वाणं अन
वधिकातिशयसुखस्वरूपंब्रह्मऋच्छति यद्वानिर्वाणंनिर्ग
तेवाणंगंधे यस्मिंस्तत्तथाप्रकृतेस्तत्कार्याणांचसम्बन्धगं
धरहिते ब्रह्मणिनिर्वाणंब्रह्मनिर्वाणमप्राकृतंवैकुंठाख्यं
ब्रह्मणोनिवासस्थानं यद्वा ब्रह्मवित्निर्वाणंप्रकृतिसम्बंधा
दिरहितंशुद्धात्मस्वरूपंप्राप्नोतीत्यर्थः तथाचात्रैववक्ष्यति
यद्गत्वाननिवर्तंतेतद्धामपरमंमम यंप्राप्यनपुनर्जन्मदुः
खालयमशाश्वतं नाप्नुवंतीतिकेप्रकृतिकार्यकेनापिशब्देन
यमर्थःसूच्यते तथाहि यदिप्राणत्यागात्प्रागीदण्डपरि
मितेस्वल्पकालेपियःपुरुषोस्यांस्थितोतिष्ठतिसोपिब्रह्म
निर्वाणंगच्छति नहियस्तुजन्मारभ्यदेहान्तावधिमदर्पितसक
लात्मात्मीयादिवस्तुजातोमदाराधनपरोमदेकनिष्ठोनिखि
लोपायोपेयफलसम्बन्धादिरूपेणमामेवभजमानःपुमान
स्यांतिष्ठतिसतदृच्छतीतिकिमुवक्तव्यमितित्वंतु[illegible]
स्वःपृथायाःपुत्रोसिअतोमत्प्रसादात्तवैवास्यांस्थितिःसुलभाभ
वतीतिसम्बोधनाभिप्रायः ७२ इतिकृ[illegible]वैजयन्तीटीका
यांद्वितीयोध्यायः २ ॥

+ तदेवंचतुर्णांप्रश्नानांउत्तरव्याजेनसर्वाणिस्थि
संप्रतिकर्मयोगफल भूतांसांख्यनिष्ठांफलेन

मधुसूदनी टी. नप्रज्ञलक्षणानिमुमुक्षुकर्तव्यतयाकथितानि
लब्धस्वरूपं [illegible] ति+

+एषास्थितप्रज्ञलक्षणव्याजेनकथिता एषातेभिहितासांख्य
बुद्धिरितिचप्राक्कथितेतिनिष्ठासर्वकर्मसंन्यासपूर्वकपर
मात्मज्ञानलक्षणाब्राह्मीब्रह्मविषयाहेपार्थ एनांस्थितिंप्रा
प्ययःकश्चिदपिपुनर्नविमुह्यति नहिज्ञानबाधितस्याज्ञान
स्यपुनःसंभवोस्ति अनादित्वेनोत्पत्त्यसंभवात् अ
स्यांस्थित्वान्तकालेपिअन्त्येपिवयसिस्थित्वाब्रह्मनिर्वाणंब्र
ह्मणिनिर्वाणंनिर्वृतिंब्रह्मरूपंनिर्वाणमितिवाऋच्छतिगच्छ
तिभेदेन किमुवक्तव्यंयोब्रह्मचर्यादेवसंन्यस्ययावज्जीवम
स्यांब्राह्म्यांस्थितावतिष्ठतेसब्रह्मनिर्वाणमृच्छतीत्यपिश

भाषा अनुवाद

पूर्व कही हुई ज्ञाननिष्ठा की प्रसंसा करि कहतेहैं कि हे
अर्जुन उक्त ब्रह्मज्ञान की निष्ठा ऐसीहै इसमे भगवतके
आराधनसे शुद्धचित्त पुरुष यह ब्रह्मनिष्ठा पाय करि और
संसार सागरमे मूढ नही होता देखो मरती वारभी एक
क्षणभर जो ब्रह्मनिष्ठामे मन स्थिर करते वेइसमे लीन हो
ताहै तो बाल पनसे या बहुत दिनोंसे इस ब्रह्मनिष्ठा की
अभ्याससे इसमे मन स्थिर करि अन्तमे मुक्ति मिलेगी इसमे
फिरि कछु सन्देह बाकीहै सो हे पार्थ यह ब्राह्मी स्थितिहै
इसको प्राप्तहो फेरि मोह नही पाते अन्तकालमे भी इससे
क्षणभर मनथिर करि मनुष्य निश्चय ब्रह्म निर्वाण पद
पावते हैं ७२ इति द्वितीयोऽध्यायः २॥

दोहा

पार्थ यह ब्राह्मी स्थिति इदमिलें होतनमोह अंतकालस्थि
त याहिमें निर्वाण ब्रह्महोय सोह ७२॥ इति श्री॥